इंद्रियाणामुत्पत्तिमाह ॥ तैजसानीति तैजसाहंकारादुत्पन्नानि तानींद्रियाणां वैकारिकत्वकानि हस्तर्थमेक
रः ॥ द्विविधान्यपींद्रियाणि तैजसान्येवेत्यन्वयः तत्र हेतुः प्राणस्येति द्विय स्मात्प्राणस्य क्रियाशक्तिः ॥ बुद्धेश्च विज्ञा
नशक्तिः ॥ अतः प्राणस्य तैजसत्वात् इंद्रियक्रियाशक्तिमत्तामिंद्रियाणां तैजसत्वं तथा बुद्धेस्तैजसत्वा
न्नेंद्रियत्वात् ज्ञानशक्तिमत्तामपींद्रियाणां तैजसत्वमित्यर्थः ॥ २९ ॥ तन्मात्राण्यपि तैजसे वैकारिकाच्चाहंकारादेव भूतो
त्पत्तिं नत्वहं तत्त्वे वाह ॥ तामसादिति पंचदशभिः श्लोकैः शब्दगुणमित्यादिभिर्विषयो समनंतरं तमेवं यथा
ऽऽह श्लोकः ॥ नत्ववस्तिः प्राणोपात्तत्वात् ॥ शब्दगुणं छंतिमापायेति नित्याह्वगे ॥ ३० ॥ शब्दस्य लक्षणमाह ॥ अर्था
श्रयत्वमर्थवाचकत्वं दृष्टलिंगत्वं ॥ क्रियाद्यंतसिंतस्य वस्तुतोपकरणेन इत्येलिंगमित्युद्गदृष्टस्ययोरिति न

तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः ॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३१ ॥
तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् ॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगं ॥ ३२ ॥
अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥ ३३ ॥ भूता
नां छिद्रदातृत्वं बहिरंतरमेव च ॥ प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणं ॥ ३४ ॥ नभसः श
ब्दतन्मात्रात्कालगत्या विकुर्वतः ॥ स्पर्शोऽभवत्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः ॥ ३५ ॥ मृदुत्वंक
ठिनत्वं च शैत्यमुष्णत्वमेव च ॥ एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ॥ ३६ ॥

नभस्तन्मात्रत्वं शब्दस्य लक्षणमित्यन्वयः ॥ ३३ ॥ छिद्रदातृत्वमवकाशदातृत्वं बहिरंतरव्य
वहारास्पदत्वं ॥ प्राणात्मनः प्राणधीनां धिष्ण्यत्वमाश्रयत्वेनाग्रादि छिद्ररूपेणाहंतिः कार्यमेवल
क्षणमिति लक्षणं ॥ एवमुत्तरत्रापि ज्ञेयं केनश्लोकेन तन्मात्रमहाभूतानां मृतिः द्वितीयेन तन्मात्रलक्ष
णं तृतीयेन महाभूतलक्षणमिति मंतव्यं ॥ ३४ ॥ कालात् त्वक् स्पर्शस्य संग्रहः ॥ सम्यक्ग्रहणं यया
तु इत्यनिश्चनलिंगत्वात् ॥ यद्वा स्पर्शः सम्यक्संगृह्यते येन भवतीति शेषः ॥ ३५ ॥ शब्दतन्मात्राद्यादित्सादिनि
मात्राणां शब्दोऽत्रानुवर्तनाय स्पर्शस्य स्पर्शत्वं लक्षणमित्यर्थः ॥ नभस्वतो वायोस्तन्मात्रत्वं च ॥ ३६ ॥

भा
टी
२४

चालनेष्टत्वणात्वादेः स्पृष्टत्वेमेलनेंद्रियेणादेः प्राप्तिः संयोगः द्रव्यस्य गंधवतो घ्राणेन प्रतीतत्वाच्छैत्यादिम
तः स्पर्शनेन प्रतिशास्पर्शश्चेंद्रियप्रतीतेस्तत्त्वे सर्वेंद्रियाणां मात्मत्वमुपोद्वलकं कर्मेणा कार्येणाभिल
क्षणं भावेस्तु ॥ कर्मेंद्रियाभिलक्षणमिति ॥ विग्रहेण कारणो ॥ ३४ ॥ द्रव्यकृतिनेत्व ॥ द्रव्यस्याकारकसम
वेकत्वे ॥ गुणानां द्रव्यापसर्जनप्रतीतिः प्राद्रव्यस्य तस्यानंतरेणैव प्रतीतिः ॥ अप्रत्यक्षद्रव्यत्वस्पर्शादे
रपिस्यानंतरेणैव प्रतीतिः ॥ द्रव्यस्य तत्रैवमिति तस्याप्येवविशेषवत्त्वः व्यक्तिसंस्थानेद्रव्यस्यपासं
स्थासन्निवेशः सैव संस्थानस्य प्रतिमातया प्रतीतिरिति स्पर्शः तेन समलेन सम्यक्साधारणत्वे ॥ घो

चालनेष्टहनं प्राप्तिर्नेत्रत्वं द्रव्यगाह्ययोः ॥ सर्वेंद्रियाणां सान्मत्वं वायोः कर्मभिलक्षणं ॥ ३५ ॥ वायो
स्पर्शात्मताग्रहूपदेवेरिनादभ्रतः ॥ समुत्थितेन तनत्वेन स्पृष्टत्वरूपाय लेभने ॥ ३६ ॥ द्रव्याकृति
त्वेगुणानां व्यक्तिसंस्थानमेव च ॥ नेत्रेतेन जस्स साधि रूपमात्र स्पृहत्तया ॥ ३७ ॥ घ्राणत्वंपचने
पानमर्दने हिममर्दने ॥ तेजसो ग्रहणयत्नेताः वोषणंतद्रुद्देव च ॥ ३८ ॥ रूपमात्राद्विकुर्वाणानि
तेसादेव वोदिनात ॥ समात्रमभनस्मादे भोजिह्वारसग्रहः ॥ ३९ ॥ कषायो मधुराम्लकटु
ल्वरतिने कथा ॥ भोतिकानां विकारेण रसएको विभिद्यते ॥ ४० ॥ क्लेदनेपिंडनेरह्किः प्राण
नाप्यायने इदने ॥ तापापनोदे भयस्त्वं भसोहजनयस्त्रिमाः ॥ ४१ ॥

तनेप्रकाशनेपवनेतेडुलादेः तदवरद्रुग्रप्रानाचपिपावाचतह्वारेणापानमर्दनेव ॥ जिह्वारसने
द्रियं रसो गर्यते । नयेति रसग्रहः ॥ यद्वारसग्रहस्तत्तो भवतीति विशेषः ॥ ४२ ॥ कषायादिषु लवणो
पिद्दह्वः भोतिकानां संसर्गिद्रव्याणां ॥ यथकोमधुरवववसन ॥ ववसन ॥ एवमनेकधाभिद्यते ॥
सरस्वद्रव्यथ्यं क्लेदनमार्द्रीकरणोपिंडने मस्तादेः पिंडीकरणं तमिसस्त्रिदातत्वप्राणनं जीवनं ॥ आ
पोमयः प्राणा इति श्रुतेः आप्यायनेतद्रुद्रलव्यनिवर्तनं ॥ अदनमद्रहकरणं ॥ दनमितिपावेसपवा

गंधमात्रः गंधमात्रमिति ॥ ४४ ॥ करंभो मिश्रगंधः यथा व्यंजनादीनां हिंग्वादिसंस्कारेण पूतिर्दुर्गंधः सौर-
भ्यकं कर्पूरादेः शांतः शतपत्रादेः उग्रो लशुनादेः अम्लः आम्रादेः द्रव्यावयवानां वैषम्यादेक एव भिद्यते नानागंधः स्या-
त् ॥ ४५ ॥ ब्रह्मणो भावनं प्रतिमादिरूपेण साकारतापादनं स्थानं ॥ जलादिविलक्षणतया तत्तन्मूर्त्या विशे-
षणं स्थितिः ॥ धारणं जलाद्याधारत्वं सतां नामाकाशादीनां विशेषणमवच्छेदकत्वं सर्वेषां सत्वानां प्राणि-
नां ॥ तद्गुणानां च वृक्षादीनामुद्भेदः परिणामविशेषैः प्रकटीकरणं ॥ ४६ ॥ श्रोत्रादीनां ग्राह्याद्विग्राहकं
च तत्तन्नेत्रादिलक्षणं तदेवेत्याह पंचभिः श्लोकार्थैः ॥ नभसो गुणविशेषः शब्दो यस्यार्थो विषयः ॥

रसमात्राद्विकुर्वाणादंभसो दैवचोदितात् ॥ गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ॥ ४४ ॥
करंभपूतिसौरभ्यशांतोग्राम्लादिभिः पृथक् ॥ द्रव्यावयववैषम्याद्गंध एको विभिद्यते ॥ ४५ ॥
भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणं ॥ सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं ॥ ४६ ॥
नभोगुणविशेषोर्थो यस्य तच्छ्रोत्रमुच्यते ॥ वायोर्गुणविशेषोर्थो यस्य तत्स्पर्शनं विदुः ॥ ४७ ॥
तेजोगुणविशेषोर्थो यस्य तच्चक्षुरुच्यते ॥ अंभोगुणविशेषोर्थो यस्य तद्रसनं विदुः ॥ ४८ ॥
भूमेर्गुणविशेषोर्थो यस्य स घ्राण उच्यते ॥ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् ॥ ४९ ॥
अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥ एतान्यसंहत्य यदा महदादीनि सप्त वै ॥ ५० ॥
कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥ ५१ ॥

णविशेषमाह द्वाभ्यां परस्यार्थे द्वयोः इति परस्येति
परस्य कारणस्य धर्मः शब्दादिः अपरस्मिन्कार्ये वाय्वादौ कारणान्वयादुपलभ्यते ॥ अतो भावानामा-
काशादीनां विशेषो गुणः सर्वोपि शब्दादिर्भूमावेवोपलक्ष्यते ॥ चतुर्णामनुगमान्वयात् ॥ जलादिषु प-
श्चान्वयमेव न ॥ सर्वं प्राकाशतः प्रमाणत्वयाभावादेक एवेति ॥ एवं कारणोत्पत्तिमुक्त्वा कार्योत्पत्ति-
माह सार्धैः त्रिभिः ॥ ४९ ॥ एतान्यसंहत्य सम्मिलितान्यपृथक्स्थितानि तदा जगदादिरीश्वरः उपाविशत् ॥ समं

यनुविद्धेभ्यः त्वभितेभ्यः यस्मादंडादसौ विराट् ॥ पुरुष उदतिष्ठत् ॥५२॥ भगवतो रूपमिति तद्रूपाभेदाभि
प्रायेण ॥ तस्मिन्नंडाख्यादिविभागमाह नवभिः ॥५४॥ उत्थायोदासीन्यं विहाय तमाविश्याधिष्ठाय म
हादृष्टासौ देव स्वस्वं छिद्रं ॥५५॥ वाण्या सह वह्निरभवत् ॥ नासे निरभिद्येतां ॥ प्राणोतः प्राणेन ऊतः स्यूतः

ततस्तेनानुविद्धेभ्यो युक्तेभ्योंऽडमचेतनं ॥ उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥५२॥ एतदंडं
विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ॥ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ॥५३॥ यत्र लोकवि
तानोयं रूपं भगवतो हरेः ॥ हिरण्मयादंडकोशादुत्थाय सलिले शयात् ॥ तमाविश्य महादेवो
बहुधा निर्बिभेद खं ॥ निरभिद्यतास्य प्रथमं मुखं वाणी ततोभवत् ॥ वाण्या वह्निरथो नासे प्रा
णोतो घ्राण एतयोः ॥५४॥ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः ॥ तस्मात्सूर्यो व्यभिद्येतां
कर्णौ श्रोत्रं ततो दिशः ॥५५॥ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः ॥ तत ओषधयश्चासन् शि
श्नं निर्बिभिदे ततः ॥५६॥ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदं ॥ गुदादपानोपानाच्च मृत्युर्लो
कभयंकरः ॥५७॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् ॥ पादौ च निरभिद्येतां गतिस्ता
भ्यां ततो हरिः ॥५८॥ नाड्योस्य निरभिद्यंत ताभ्यो लोहितमाभृतं ॥ नद्यस्ततः समभवन्नुदरं निर
भिद्यत ॥ क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ॥६०॥

सन् प्राणः एतयोर्नासिकयोरभवदि
त्यनुषंगः ॥५६॥ घ्राणादनंतरं वायुः प्राणोत इति विशेषणम् ॥ सर्वेंद्रियेष्वपि द्रष्टव्यं ॥ अभिद्येतामन्
वभिद्येतामिति पादद्वयेप्येक एवार्थः ॥ ततो दिशः प्राविशन् ॥ आदिशब्देन केशाः ॥ स्वराट् इंद्रः
हरिर्विष्णुः ॥ आभृतं जातम् ॥६१॥ ॥ ॥ ॥ ॥ ॥

५४

उपसंहरति एतावानिति ॥ ४४ ॥ मय्यर्पितं सन्मनः स्थिरं भवतीति यत् एतावानेव ॥ ४४ ॥ इति श्रीभागवत
भावार्थदीपिकायां तृतीये पंचविंशः ॥२५॥ षड्विंशे तु प्रकृत्यात्मविवेकस्योपवर्ण्यते ॥ सांख्येन सर्वभावा-
नां तत्त्वलक्षणभेदतः ॥१॥ तत्त्वविन् ॥ तत्त्वमार्गं पद्धत्या वदंति सांख्यमित्यभिसांख्यभक्तियोगश्चेति अथ
श्रुपतिम् ॥ तत्र भक्तियुक्तेदानीं सांख्यमाह ॥ अथेति ॥१॥ तत्र मुक्तिसाधनज्ञानादेव न तु तत्त्वलक्षणज्ञा-
नात् ॥ तमेव विदित्वातिमृत्युमेतीति श्रुतेः ॥ तत्राह ज्ञानमिति ॥ आत्मदर्शनरूपं ज्ञानमतएवहृ-
दयग्रंथिभेदनमहंकारनिवर्तकं ॥ निःश्रेयसप्रयोजनाय ॥ यदाहुस्तत्ते वर्णयामि ॥ तत्त्वलक्षण

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ॥ क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ॥ ४३ ॥ ए-
तावानेव लोकेस्मिन्पुंसां निःश्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ॥ ४४
इति श्रीभागवते तृतीयस्कंधे कापिलेयभक्तियोगो नाम पंचविंशोध्यायः ॥२५॥ श्रीभगवानुवाच ॥ थी
वापुत्रापयत्नोकं तत्रेति जासुतेनपदं ॥ मात्रे सांख्यं तदध्यात्मं यायायामेनाहृ तत्त्ववित् ॥ २
कपिल उवाच ॥ अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पुरुषः प्रा-
कृतैर्गुणैः ॥ १ ॥ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं ॥ यदाहुर्वर्णये तत्ते हृदयग्रंथिभे-
दनं ॥ २ ॥ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितं

तत्त्वादेव विविक्तात्मज्ञानं भवतीति भावः तत्र पुरुषं लक्षयति ॥ ३ ॥ अनादिरिति ॥ आत्मैव पुरुषः
पुरि पुरि शेते कोसावात्मा प्रत्यक् प्रतिलोमे धाम स्फूर्तिर्यस्य तद्गुणाकपदं आवर्तयति ॥ अनादि-
रिति ॥ सांसारिकपदं आवर्तयति ॥ प्रकृतेः परः असंगः असंगः ज्ञानादिगुणत्वं वारयति निर्गुणः
मीमांसकमतं ज्ञानविषयत्वं वारयति ॥ स्वयंज्योतिः प्रभाकराभिमतं ॥ ज्ञानाश्रयत्वेन स्फुर-
णमपि निरस्तं स्वयंज्योतिर्हि हेतुः ॥ विश्वं येन समन्वितं प्रकाशते इति शेषः ॥ एतैरेव हेतुभिः
पुरुषस्य प्रकृतेः परत्वमपि सिद्धम् ॥ ३ ॥

अनावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा ॥ तत्रावरणशक्त्या सैव जीवोपाधिरविद्या विक्षे-
पशक्त्या सैव मायापारमेश्वरी ॥ एवमग्र जीवेश्वररूपेण द्विविधस्तत्रयः प्रकृत्यविवेकेन संसर-
ति ॥ स जीवः यस्तु प्रकृतिं वशीकृत्य सृष्ट्यादि करोति स परमेश्वरः ॥ तत्र प्रकृत्यविवेकेन जीवस्य
संसारप्रकारमाह ॥ स एष इति पंचभिः स इत्यात्मा सूक्ष्मां देवीं देवस्य विष्णोः शक्तिं लीलयोपगतां
यदृच्छयैवाभ्यपद्यतेत्यन्वयः ॥ ५ ॥ गुणैरिति ॥ तां च गुणैः सृजन्तीं तत्रज्ञाननिगूहनया ॥ तथा च
श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयन्तीं सरूपाः अजो ह्येको जुषमाणोनु-

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ५ ॥ गु-
णैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ६ ॥
एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥ ७ ॥
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतं ॥ भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥ ८ ॥

शेते जहात्येनां भुक्तभोगामजोन्य इति ॥ अहो आत्मानं विस्मृतवान् ॥ पराभिध्यानं प्रकृत्य-
ध्यासस्तेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु गुणैरेव कर्तृत्वमात्मनि मन्यते ॥ ७ ॥ तदिति कर्तृ-
त्वमननमेवास्य पुरुषस्य संसारस्तस्मात् कर्तृत्वे सतः कर्मभिर्बन्धः ॥ ईशस्यापारतन्त्र्यस्यैव क-
र्मबन्धकृतं भोगपारतन्त्र्यं निर्वृतात्मनः सुखात्मकस्यैव संसृतिः ॥ तदस्मत्सु प्रवाहः प्रकृत्य-
विवेककृतमेतत्सर्वं भवतीत्यर्थः ॥ न त्वेतत्सामानाधिकरण्येनैव कर्तृत्वादि प्रतीतेस्त-
स्यैव तद्गति क्रियतां तेनाह ॥ ८ ॥

कार्यं शरीरं कारणानींद्रियं कर्त्तॄदेवतावर्गस्तद्भावापत्तौ पुरुषस्य प्रकृतिं कारणं विदुः कूटस्थस्य स्वतो विकाराभावात् ॥ प्रकृतिपरिणामभूतदेहाद्यहंकारकृतमेव कर्तृत्वादिकमित्यर्थः ॥ भोक्तृत्वे तु पुरुषं कारणं विदुरित्यस्यायं भावः ॥ यद्यप्यहंकारगतमेव कर्तृत्वादिकं भोक्तृत्वं च तथापि विकारस्य जडत्वे स्वानन्दत्वानुपपत्तेः भोगस्य चिदवसानत्वात् पत्युरेव तत्प्राधान्यमिति ॥ ं ॥ तदेवं संसारिणः पुरुषं तद्देहे तं प्रकृतिं च तत्त्वतः ज्ञात्वा इदानीं जगत्कारणभूमीश्वरं तत्प्रकृतिं च पृच्छति ॥ प्रकृतेरिति ॥ अस्य विश्वस्य सदसत्त्वस्थूलसूक्ष्मं च यदात्मकं तयोः प्रकृतिपुरुषयोः ॥ तत्र प्रकृतिं लक्षयति यदिति ॥ ९ ॥ यत्तदिति

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ॥ भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परं ॥ ८ ॥ देवहूतिरुः ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ॥ ९ ॥ श्रीभगवानुवाच ॥ यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकं ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ १० ॥ पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥ ११ ॥ महाभूतानि पंचैव भूरापोग्निर्मरुन्नभः ॥ तन्मात्राणि च तावंति गंधादीनि मतानि मे ॥ १२ ॥

तं तदेव प्रकृतिं प्राहुः किं तत्प्रधानं सतोः विशेषं सत्त्वरजस्तमसां साम्यावस्थारतिव वनात् ॥ विशेषवत् ॥ विशेषाणामहंकारकार्याणामाश्रयः ॥ नन्विदं ब्रह्मन् ॥ त्रिगुणं सुखदुःखमोहात्मयो गुणास्तेविद्यं ते यस्मिन्नव्यक्तेन स्वत्वादीनां साम्यगुणानां निरस्तं किं महत्तत्वादि ॥ नत्वग्रहणकमकार्यं किंकालादि न सदात्मकं ॥ कार्यकारणरूपं ॥ किं जीवः नु नित्यं ॥ अन्येषां तत्त्वानां लक्षणं वक्तुं तानि गणयति पंचभिरित्यादि ॥ संख्याभेदेन तच्च तत्त्वविधानिकं ॥ एतानि च तत्त्वविंशतिर्यस्मिन् ॥ गणेतं गणं प्राधानिकं प्रधानकार्यात्मकं ब्रह्म विदुः ॥ एतद्विवृणोति ॥ महाभूतानीति त्रिभिः ॥ तावंति पं

भा.
टी.
५२

अंतरात्मकमंतःकरणं लक्षणरूपया एव वृत्त्या भेदिकया यया वृत्त्या भेदो लक्ष्यः एतावानेव संख्यातः गणितः तत्त्वैः ॥ कालेन सम न्नदृश्यमानदृश्यः कालः स पंचविंशकः प्रकृतेरेकावस्थाविशेषरूपत्वं यद्वाऽयं पुरुष इति प्रसिद्धः कालः पंचविंशकः ॥ १६ ॥ एके च पौरुषं पुरुषस्येश्वरस्य प्रभावं विक्रमं कालमाहुः ॥ तमेव कालं द्विधा लक्षयति ॥ यतो भयं भवति ॥ कस्य प्रकृतिमीयुषः प्राप्तस्यात एव देहेऽहंकारेण विमूढस्य कर्तुर्जीवस्य ॥ एतेन संहारकत्वेन लक्षितः ॥ सृष्टिहेतुत्वेन लक्षयति ॥ प्रकृतेरिति ॥ १७ ॥ कोऽसौ भगवान् तमाह ॥ अंतः सर्वप्राणिनां यः पुरुषरूपेण नियंतृत्वेन समन्वेति सम्यगहंकाररहितत्वेनानुस

इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः ॥ वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥ १४ ॥
मनो बुद्धिरहंकारश्चित्तमित्यंतरात्मकं ॥ चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥ १५ ॥
एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह ॥ सन्निवेशो मया प्रोक्तो यः कालः पंचविंशकः ॥ १६ ॥
प्रभावं पौरुषं प्राहुः कालमेके यतो भयं ॥ अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥ १७ ॥
प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ॥ चेष्टा यतः स भगवान्काल इत्युपलक्षितः ॥ १८ ॥
अंतः पुरुषरूपेण कालरूपेण यो बहिः ॥ समन्वेत्येष सत्त्वानां भगवानात्ममायया ॥ १९ ॥

तो वर्तते च बहिश्च कालरूपेण ॥ एष भगवान् ॥ यद्वाऽयं पुरुष इति प्रसिद्धः कालः स पंचविंशः ॥ एके च पुरुषस्य प्रभावं कालमाहुः ॥ प्रभावस्य च लक्षणमंतर्वर्ति पुरुषस्यैव ॥ कालत्वे हेतुः प्रकृतेरिति ॥ उभयथापि विवक्षायां हेतुः अंतर्वर्ति शेषं समानं तदेवं प्रकृतेश्चतुर्विंशतिभेदाः ॥ जीवेश्वरयोश्चैक्यविवक्षया च पंचविंशतितत्त्वानि भवंति ॥ तयोर्भेदविवक्षया च षड्विंशतिरिदानीं तत्त्वानामुत्पत्तिपूर्वकं लक्षणमाह ॥ दैवादित्यादिना ॥ १९ ॥ ॥

यः पंचभिर्भूतैः रचिते शरीरे अयथा मिथ्यैव बद्धः नव स्ततः यतः तेन शरीरेणारहितः असंगः अतोः
यथैव इंद्रियगुणार्थचिदात्मकः ॥ इंद्रियाणि गुणाः अर्था अचिदाभासश्च तदात्मकः सोहं तं वंदे क
थंभूतं तेन शरीरेण ॥ अविकुंठो महिमा यस्य तं ॥ अवगुंठेति पाठे अवस्त्रं स्वरूपं तन्मात्र संचयस्य
समहिमा यस्य तं सर्वथा ॥ तत्र हेतुः प्रकृतिपुरुषयोः परं नियंतारं कुतः अपि सर्वं तं विद्याशक्तिमि
त्यर्थः ॥ विद्याविद्याकृतो विशेषस्तु इति भावः ॥१४॥ ननु ज्ञानेनैव बंधो निवर्तिष्यते किं परमेश्वर व
दनेनेत आह ॥ यस्मायया न इष्यस्मृतिः सत्र संसारसंबंधि निमित्तं ॥ सद्यतिश्रमेणापि न त्यक्तेनेत्के

यः पंचभूतरचिते रहितः शरीरे छन्नोः यथेंद्रियगुणार्थचिदात्मकोहं ॥ तेनाविकुंठमहिमान
मृषिं तमेनं वंदे परं प्रकृतिपूरुषयोः पुमांसं ॥१४॥ यन्मायया युरुगुणकर्मनिबंधनेस्मिन्सां
सारिके पथि चरंस्तदभिश्रमेण ॥ नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंत
रेण ॥१५॥ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः ॥ तं जीव
कर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥१६॥

शोचन्नयं जीवो मह
तत्सेवेश्वरस्यानुग्रहं विना तु नः कया युक्त्या लोकं निजस्वरूपं प्रवृणीत संभजेत ॥ अतिश्रमहेतु
त्वेन पंथानं विशिनष्टि उरुगुणा त्रिगुणात्मिका निमित्तानि कर्माणि निबंधनानि यस्मिन् ॥ ईश्वरप्र
सादं विना तत्त्वज्ञानाभावात्स एव सेव्य इत्यर्थः ॥१५॥ ईश्वर एव ज्ञानदस्तमुपास्य इत्याह ॥ यदेतत्त्रैकाल
विषयं ज्ञानं तदेवविनाकृतमो मम प्रददात् ॥ न कोपि किंतु स देवः ईश्वर एव ॥ अस्मत्प्रकृते जीवो हृदया
तः ॥ तेन्याह ॥ जीवरूपो कर्मपदवीमनुवर्तमाना वयमिति नमतिरेकेण न कोपि समर्थ इत्यर्थः

सूतिर्देहनिर्वासनैर्वेपितः सोदरः समानोदरजन्मा विष्ठाभूः कृमिरिव॥१०॥ नाथमानो याचमानः उपतप्यमान इति वा॥ ऋषिः देहात्मदर्शी भीतः पुनर्गर्भवासात्॥ सप्तवध्रयो बंधनभूता धातवो यस्य सः विक्लवया प्राकृतया॥११॥ उपसन्नं जगत्स्थितिं सेच्छया गृहीतनानातनोः भगवतश्चरणारविंदमकुतोभयं सोऽहं शरणं व्रजामि॥ भुवि चलदिति श्रीकृष्णावताराभिप्रायेण॥ असतो मे अनुरूपा योग्या येनेदृशी गर्भवासलक्षणा गतिर्दर्शितास्य॥१२॥ ननु कोऽसौ यं शरणं व्रजसि को वा नवन

आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः॥ नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः॥१०॥
नाथमान ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः॥ स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः॥११॥
जीव उवाच॥ तस्योपसन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि चलच्चरणारविंदम्॥ सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा॥१२॥ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलम्ब्य मायां॥ आस्ते विशुद्धमविकारमखंडबोधमातप्यमानहृदयेऽवसितं नमामि॥१३॥

स्वविशेषः॥ येन सेव्यसेवकत्वमित्यपेक्षायामाह॥ अत्र मातर्देहे भूतेंद्रियाशयमयीं देहकारणभूतां मायामवलंब्य आश्रित्य॥ कर्मभिरावृतस्वरूपः बद्ध इव यः आस्ते॥ सोऽहं यस्त्वत्र एव वास्ते तं नमामि॥ कथंभूतमित्यपेक्षायां तत्राहो जीवं विशेषं दर्शयति॥ आतप्यमाने हृदये॥ अवसितं प्रतीतमेवमप्यविकारं तत्कृतः अखंडबोधोऽयमतं॥१३॥ ननु त्वमपि वस्तुतः शुद्धएव असंगोऽयं शुद्धस्वरूपत्वादिष्यते कथं तवायं विशेषस्तत्राह॥१४॥

कतः विस्तृद्धं नि. पा. १२

भा
टी
१०

कलिलं शुक्रशोणितमिश्रं भवति बुद्बुदं वर्त्तुलं भवति ॥ कर्कंधुर्बदरीफलं तदाकारं कठिनं ॥ पेशीमां
सपिंडाकारमंडं वा यो मंतरे वा हं श्चाद्यं गात्राः विग्रहो विभागः लिंगं छिद्राणि च तेषां शुद्ध्व ॥ ३ ॥ ज
रायुणा गर्भवेष्टनेन वीतः प्रावृतः ॥ ४ ॥ मातुर्जग्धेन भक्षितेनान्नेन पानाद्यैश्च पथ्यमाना धातवो य
स्य तं तनुं तां संभवायस्मिंस्तस्मिन् ॥ अस्य संमते गर्भे शेते ॥ तथा च मार्कंडेयपुराणे ॥ नाडीयाप्यायनीनाम
नाभ्यां तस्य निबध्यते ॥ स्त्रीणां तथांत्रसुषिरे सा निबद्धोपजायते ॥ क्रमंते भुक्तपीतानि स्त्रीणां

कलिलं त्वेकरात्रेण पंचरात्रेण बुद्बुदं ॥ दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं ॥ २ ॥ मासेन तु
शिरो द्वाभ्यां बाहू ह्याद्यंगविग्रहः ॥ नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ॥ ३ ॥ चतुर्भि
र्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः ॥ षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ॥ ४ ॥ मातुर्जग्धा
न्नपानाद्यैरेधद्धातुरसंमते ॥ शेते विण्मूत्रयोर्गर्ते स जंतुर्जंतुसंभवे ॥ ५ ॥ कृमिभिः क्षतस
र्वांगः सौकुमार्यात्प्रतिक्षणं ॥ मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ॥ ६ ॥ कटुतीक्ष्णो
ष्णलवणरूक्षाम्लादिभिरुल्बणैः ॥ मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ॥ ७ ॥ उल्बेन सं
वृतस्तस्मिन्नंत्रैश्च बहिरावृतः ॥ आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥ ८ ॥ अकल्पः
स्वांगचेष्टायां शकुंत इव पंजरे ॥ तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं ॥ स्मरन्दीर्घमनु

गर्भाद्दरेत यथा ॥ नेराप्याप्ति नदेहो सौ जंतुर्हेहिप्र यैति वैशनि ॥ च्छ्वासं शर्म किं नाम विंदते ॥ ९ ॥
नत्वत्स्यैः क्रिमिभिः स्पृष्टः सौकुमार्यात्कोमलत्वेन तत्सर्वांगानि यस्य ॥ ६ ॥ उल्बणैरुग्रैः सहे
सर्वैः सुरोगेषु ॥ ७ ॥ उत्थितवेदना यस्य प्राप्तव्यं मूत्रैरेणान्वयः ॥ ८ ॥ उल्बेन जरायुणा भुग्नं कुटिली भू
तं पृष्ठं शिरोधरा ग्रीवा च यस्य दैवात्पूर्वकर्मवशात् ॥ लब्धा स्मृतिर्येन सः ॥ दीर्घं उच्छ्वासं यथा

सप्तमे जन्म
कर्माणि ग
तानि स्मरते
स्वादि: ३

१०

उभयेऽकुटुंबं स्वदेहं च ॥ २० ॥ पापार्जितेन धनेन भुंजते बहवः कर्त्तैव नरकं यातीत्याह ॥ एक इति ॥ एतद्दे
हेन पदूतं तस्य लेकलेवरं वा इहैव हित्वा कुशलादितरत ॥ पापं तदेव पाथेयं भोग्यं यस्य ॥ २१ ॥ ननु
कुटुंबपोषणपापमपि विहाय गच्छतु ॥ तत्राह ॥ दैवेनेति तस्य कुटुंबपोषणस्य शमलं पापं दैवेनेश्व
रेण प्रापितं भुंक्ते ॥ २२ ॥ ननु कुटुंबपोषणं विहितमेव तत्राह केवलेनेति ॥ तमसो नरकस्य चरमं पदं
स्थानं ॥ २३ ॥ पुनर्मनुष्यशरीरप्राप्तिकारणमाह ॥ नरलोकस्य मनुष्यदेहप्राप्तेः रथस्तादर्वाक्तया

अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ॥ या यातना वै नारकास्ता इहाप्युपलक्षिताः ॥ २९ ॥ एवं कु
टुंबं बिभ्राण उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशं ॥ ३० ॥ एकः प्रपद्यते
ध्वांतं हित्वेदं स्वकलेवरं ॥ कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ॥ ३१ ॥ दैवेनासादितं तस्य श
मलं निरये पुमान ॥ भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ॥ ३२ ॥ केवलेन ह्यधर्मेण कुटुंबभर
णोत्सुकः ॥ याति जीवोंधतामिस्रं चरमं तमसः पदं ॥ ३३ ॥ अधस्तान्नरलोकस्य यावतीर्यात
नादयः ॥ क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३४ ॥ इति श्रीभागवते तृतीये कापिलेयोपाख्याने कर्म
विपाके त्रिंशोध्यायः ॥ ३० ॥ श्रीभगवानुवाच ॥ कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये ॥ स्त्रियाः प्रविष्ट उ
दरं पुंसो रेतःकणाश्रयः ॥ १ ॥

वस्तो यातनाः आदिशब्देन श्वसूकरादियोनयस्ता यावतीर्यातनाः सर्वाः
क्रमेण संप्राप्य भोगेन क्षीणपापः शुचिः सन् ॥ अत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ॥ ३४ ॥ इति श्रीभाव
र्थदीपिकायां तृतीयस्कंधे त्रिंशः ॥ ३० ॥ एकत्रिंशे विमिश्रेण पुण्यपापेन हि जन्म ॥ मनुष्ययोनिसं
प्राप्तिर्वर्ण्यते रागसीमनि ॥ १ ॥ पुनरत्राव्रजेदित्युक्तं तदेव विशेषतो दर्शयति ॥ कर्मणा पूर्वकृते
न दैवमीश्वरः तदेव नेत्रं प्रकाशकं यस्य प्रविष्टो भवति ॥ १ ॥

भा. टी. १७

सरभसंसमाक्रोधयमीत्दूर्णाधयोः तीक्ष्णा ॥१९॥ ग्राहमस्तनिरुध्य ॥२०॥ नयोस्तर्जनैर्निर्भिन्नं हृदयंयस्यग्रा
तेः सन् ॥ वलतीतिहितीयेनान्वयः ॥२१॥ ततद्रग्रांपीतोयामः ॥ तप्तावालुकायस्मिन् ॥ निर्गत आश्र
मोविश्रामस्थानमुदकंवयस्मिन् ॥२२॥ यमसादनंनीतोभवति ॥२३॥ नत्रैवविशेषमाह ॥ अध्वनः
संबंधिनोयोजनानांनवतिनवचसहस्राणि ॥ पापाधिकोद्वाभ्यांनीतः सन् ॥२४॥ यातनाः संदे

यमदूतौतदाप्राप्तौभीमौसरभसेक्षणौ ॥ सदृष्ट्वात्रस्तहृदयः शकृन्मूत्रंविसृजति ॥१९॥ या
तनादेहआवृत्यपाशैर्बद्ध्वागलेवलात् ॥ नयंतोदीर्घमध्वानंदंड्यंराजभटायथा ॥२०॥ ततो
निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः ॥ पथिश्वभिर्भक्ष्यमाणआर्तोघंस्वमनुस्मरन् ॥२१॥ क्षुत्
परीतोर्कदवानलानिलैः संतप्यमानः पथितप्तवालुके ॥ कृच्छ्रेणपृष्ठेकशयाचताडितश्चल
त्यशक्तोपिनिराश्रमोदके ॥२२॥ तत्रतत्रपतन्श्रांतोमूर्छितः पुनरुत्थितः ॥ पथापापीयसा
नीतस्तमसायमसादनं ॥२३॥ योजनानांसहस्राणिनवतिंनवचाध्वनः ॥ त्रिभिर्मुहूर्तैर्द्वाभ्यां
वानीतः प्राप्नोतियातनाः ॥२४॥ आदीपनंस्वगात्राणांवेष्टयित्वोल्मुकादिभिः ॥ आत्ममांसादनं
क्वापिस्वकृत्तंपरतोपिवा ॥२५॥ जीवतश्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यै
र्दशद्भिश्चात्मवैशसं ॥२६॥ कृंतनंचावयवशोगजादिभ्योभिदापनं ॥ पातनंगिरिशृंगेभ्योरोध
नंचांबुगर्तयोः ॥२७॥ यास्तामिस्रांधतामिस्रारौरवाद्याश्चयातनाः ॥ भुंक्तेनरोवानारीवामिथः
संगेननिर्मिताः ॥२८॥ अ

पतोदृश्यतिवनद्भिः ॥ आदीपनेप्रज्वलनेप्राप्नोतिस्वेनकृत्तंअन्येनवा
कृत्ते ॥ छिन्नंयत्स्वमांसं ॥ तस्यमांसस्यभक्षणमित्यर्थः ॥ आत्मनोवैशसंपीडनं ॥२६॥ मिथापवं
भेदप्रापणं ॥२७॥ नवैतत्संभावितं ॥ अत्राप्येष्टयमानत्वादित्याह ॥ अत्रैवेतिमिथः संगेनपरस्य

स्कं. ३ १७

कृतघ्नाः वित्तमाहात्म्याद्विह्वलाः धर्मापेक्षु दुःखमश्नन्ति ते ॥ ९॥ येषां यौवनेनार्थो याति तान्सलातिशोषभु-
गिनितसभोगोपितुले भवत्स्पर्थे ॥ १०॥ वार्तायां जीविकायां निःसत्वः प्रशान्तः परार्थे परस्वे ॥ ११॥ अकृतस्
अनमर्थो ॥ १२॥ एवं प्रथमाग्राहयित्वं तेन यात्रादरं न कुर्वन्ति ॥ कीनाशाः कृपणाः कृषीवला गोचरे दहद्व
लीवर्दे ॥ १३॥ भ्रियमाणाः शुष्कमांसाः ॥ १४॥ अवमत्याः वत्तया ॥ उपन्यस्तसमीपे प्रतिमंगरदपालः श्वा

गरदेशुकृतपमैः शुद्धः स्वनं वेपनेद्धिनः ॥ कुर्वेत्त अप्रतीकार्य स्वयं स्वव नत्सते गरही ॥ १५॥ अथैर्यापा
दितैर्गुर्वां हिंसयेत स्तत स्वतान ॥ शुसानिये षां यो येन शोषभुरथान्यथः स्वयं ॥ १६॥ वार्धायां ल
प्यमानायामारब्धा यांपुनः पुनः ॥ लोभाभिभूतो निःसत्वः परार्थे कुरुते स्पृहां ॥ १७॥ कुटुंबभर
णाकल्पोमंदभाग्योहृथोद्यमः ॥ श्रियाविहीनः कृपणो ध्यायन्स्वसतिमूढधीः ॥ १८॥ एवं स्वभ
रणाकल्पं तत्कलत्रादयस्तथा ॥ नाद्रियंते यथापूर्वं कीनाशा इव गोजरं ॥ १९॥ तत्राप्यजाता
निर्वेदो भ्रियमाणः स्वयं भृतैः ॥ जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे ॥ २०॥ आस्तेवमत्यो
पन्यस्तं गृहपाल इवाहरन् ॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः ॥ २१॥ वायुनोत्क्र
मितोत्तारः कफसंरुद्धनाडिकः ॥ कासश्वासकृतायासः कंठे घुरघुरायते ॥ २२॥ शयानः प
रिशोचद्भिः परिवीतः स्वबंधुभिः ॥ वाच्यमानोपि न ब्रूते कालपाशवशंगतः ॥ २३॥ एवं कुटुंब
भरणे व्यापृतात्मा जितेंद्रियः ॥ म्रियते रुदतां स्वानामुरु
आस्तरवभुंजानः आमयावी रोगी ॥ १९
उत्तारो बहिर्निर्गतनेत्रः कफेन संरुद्धा नाड्यो मार्गा भवन्ति यस्य तेन कासश्वासाभ्यां कृतश्रायासो य
स ॥ घुरघुरेत्यव्यक्तशब्दं करोति ॥ २२॥ परिवीतः परिवेष्टितः वाच्यमानः बंधोत्यन्ते त्याह मानः ॥ २३
अस्तिधीन इत्यमति ॥ २४॥ मृतस्य जीवस्य पापाभ्यां हेतूनां ॥ तत्र पापगतिमाह यमदूतौ विकराद्याव

सद्गुः त्वं विज्ञापयन्नाह॥ देहीति॥ अन्यदेह विवरे मातृकुक्षिदेशे स्वविण्मूत्रकूपः तस्मिन्पति
तः तत्र जठराग्निना भृशं तप्तो देही यस्मात्तत्र कूपपाणौ धीः इतो विवरात्॥ विवक्षितं निर्गतमिच्छ
त्॥ स्वमासान्नवयावन्॥ अमौकदातं ग्रहा वा हितिं नीमते॥ १॥ तत्कृतमुपकारं स्मरन्नाह॥ येनेह
श्रीगातिं ज्ञानं न भवाहृषेनेति निरूपमेनेमर्थः॥ सत्कृतेनैव स्वयं तत्र अञ्जलिमात्रं विना तत्कृ
तोपकारे प्रत्युपकारकः कुर्यात्तदसमर्थः॥ १०॥ इह श्रीगातिमित्येनेन जात्यन्तरविलक्षणं ज्ञान
स्यापनवानित्यर्थः॥ तदेव लक्षणमाह पञ्चषपतीति॥ अयमपरः पञ्चादिः समवृष्टिः जीवः स्व
देशो शारीरके शारीरके भवे॥ स खलु खिके बलेन तनुपशुपति॥ अदंशनयंत्र हर्षयाविषणाया॥ य
देस्यमदेह विवरे जठराग्निना स्वविण्मूत्रकूप पतितो सशांतमदेहः इच्छन्निनो विवक्षितं
गणाय तन्मासान्निर्वास्यते कूपपाणार्थीभिगावन्कदात्॥ ९॥ येनेह श्रीगातिमसौ दशमासस्य
शमस्याद्दितः पुरुदयनभवाहृष्टोन॥ स्वेनैव तत्पतत्कृतेनेन सदीननाथ॥ को नाम तत्यैनि।
विनाञ्जलिमसकृयोत॥ १२॥ पञ्चपञ्चयधिषणाया तनुसमवृष्टिः शारीरके दशशारीर्यप
वः स्वदेह॥ यत्तत्स्याममदशुकषष्ठणाप शुपवहिर्दिचेत्यमिवनजीन॥ १३॥ सोऽहवस
हनेन विवेकज्ञानेन दशशारीरीरस्य उपलक्षण॥ शमदमादियुक्तः शारीरवानास्मभवेत मेवपु
रणामनादिपुरुषपूर्णो वहिः दिचपशुपपशपामीत्यर्थः कथमयं रोक्ततयाप्रमीते वेत्यभि
वाहकाराम्परभो काव्यलिवेत्यर्थः॥ १४॥ विवेकज्ञानस्त मे समासो हेगमनुवदन्मोक्षमार्गमेवाश्र
यन्ति॥ सोऽहमितिहाभ्यां॥ हे विभो वरूपुः खलु स यथा भवति॥ तथा गर्भे वसन्नपि सोऽहमित्ति
गते निमिच्छामि॥ तत्र हेतुः अथ कृपपायय जवहिरु पयातं तत्प्राणिनं देवस्य तवमायाउपसर्वति

श्री॰
भाग॰
टी॰
११

तस्मादहं वैवस्थितोपि विगतविक्लवः ॥ अव्याकुलः सन् ॥ सुहृदा आत्मना सारथिरूपया बुद्ध्यैव ॥ आत्मानं तमसः संसारादुद्धरिष्यामि अनेकरन्ध्रनानागर्भवासरूपमेतत् ॥ व्यसनं दुःखं यथा मे मा भविष्यत् ॥ न भविष्यति तथा ॥ कातन्त्रार्थं साधनं तस्मा मयो तत्राह ॥ उपसादितौ हृदये प्रापितौ विष्णोः पादौ येन मया सः २१ ॥ दशमासाः परिच्छेदका यस्य गतिप्रसूतिपूर्वं तत्र तोपलक्षणं ॥ ऋषिर्जीवः ॥ सद्यस्तत्क्षणमेवाऽवाचीनमवाङ्मुखं सूतिहेतुर्मारुतः क्षिपति नुदति ॥ २२ ॥ अवसृष्टः ॥ अधः क्षिप्तः सन् ॥ २३ ॥ रोरूय

२० तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव ॥ भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादितविष्णुपादः ॥ २१ ॥ श्रीकपिल उवाच ॥ एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः ॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः ॥ २२ ॥ तेनावसृष्टः सहसा कृत्वावाक्‌शिर आतुरः ॥ विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः ॥ २३ ॥ पतितो भुव्यसृङ्मिश्रो विष्ठाभूरिव चेष्टते ॥ रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥ २४ ॥ परच्छन्दं न विदुषा पुष्यमाणो जनेन सः ॥ अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥ २५ ॥ शायितोऽशुचिपर्यङ्के जन्तुः स्वेदजदूषिते ॥ नेशः कण्डूयनेऽङ्गानामासनोत्थानचेष्टने ॥ २६ ॥ तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः

ने ॥ २४ ॥ परस्य छन्दमभिप्रायमविदुषा ॥ अनभिप्रेतं तत्स्वार्थे रोदने उदरव्यथां प्रकल्प्य तां च रसपानं उदरव्यथया ॥ रोदने स्तनपानमित्यादि ॥ आसनोत्थानचेष्टने च अनीशः सन् ॥ रोरूयति रुदन्दुःखं गतः ॥ २५ ॥ आमा कोमला त्वग्यस्य तं विगतं ॥ गर्भे जातं ज्ञानं यस्य ॥ पौगण्डं पञ्चवर्षाणि ततः ॥ पौगण्डयौवनादर्वाक्तत्र व्याध्ययनादिदुःखं ॥ यौवनदुःखमाह ॥ सार्धैस्त्रिभिः ॥ २७ ॥

कृष्ण ४

मेल
ना४
१९

अलब्धाभीप्सितेनैव नष्टश्चार्पितः आमः सन्॥ अज्ञानाद्दिद्धो दीप्तो मन्युर्यस्य सः देहेन सह देववर्धमानेना
भिमानेन मन्युना च विग्रहं विरोधम् करोति॥ आत्मनो नाशायनाशाय॥ २८॥ अज्ञानेन पंचभूतैरा
रब्धे देहे असदाग्रहो अहं ममेति मतिं करोति॥ २९॥ तदर्थं देहार्थं यत्ते नकर्माणि बद्धः यो देहः अ
नुयाति पुनः पुनः यात्यनुवर्तते इति वा॥ कुतो विद्याकर्मभ्यां बन्धनं इति तथा॥ ३०॥ यद्यसद्भिः

आलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः॥ सह देहेन मानेन वर्धमानेन मन्युना॥ २८॥
करोति विग्रहं कामी कामिष्वन्ताय चात्मनः॥ भूतैः पंचभिरारब्धे देहे देह्यबुधो सकृत्॥ २९॥
अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं॥ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं॥ ३०॥ यो
नुयाति ददत्क्लेशमविद्याकर्मबंधनः॥ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः॥ ३१॥
आस्थितो रमते जंतुस्तमो विशति पूर्ववत्॥ सत्यं शौचं दयामौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा
शमो दमो भगश्चेति यत्संगाद्याति संक्षयं॥ ३३॥ तेष्वशांतेषु मूढेषु खंडितात्मस्वसाधुषु
संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च॥ ३४॥ न तथास्य भवेन्मोहो बंधश्चान्यप्रसंग
तः॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः॥ ३५॥ ॥

स्थितो प्रवृत्तः सन्॥ तेषां पथि रमते पथि सन्मार्गे आस्थितो पि यद्यसद्भिः सह रमते इति वा॥ ३१॥
न हि यातनादेहमात्मेत्यादि सर्वोक्तप्रकारेण नरकं प्रविशति॥ ३२॥ असत्संगं निंदति सत्य
मिति त्रिभिः खंडितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु॥ ३४॥ यथा च योषित्सं
गिनां संगतो बंधः॥ तथान्यप्रसंगतो भवेत्॥ योषित्संगस्यानर्थहेतुतां प्रपंचयति॥ ३५॥

प्रजापतिरिति स्वमभिः रोहिद्भूतां मृगीरूपां सतीं ऋक्षरूपी मृगाकारः सन्॥ हतत्रपो निर्लज्जः तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि देवमनुष्यादयः तेषु कोऽनु पुमानखण्डितधीः अनाकृष्टमनाः॥३७॥ दिशां जयिनः शूरानपि॥३८॥ प्रतिलब्ध आत्मस्वरूपो लाभो येन॥ प्रमदासु सङ्गं याः प्रमदा निरयद्वारं वदन्ति॥३९॥ योगिनः शनैः शुश्रूषादिमिषेणोपयाति॥ या योषित् तां मायाम् आत्मनो मृत्युं ईक्षेत तेन तृणैरावृतं कूपमिव॥४०॥ स्त्रियं प्रत्येतद्देवाह॥ यामिति द्वाभ्यां॥ ऋषभायतीं पुरुषवदाचरन्तीं

प्रजापतिर्दुहितरं दृष्ट्वा तद्रूपधर्षितः॥ रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः॥३६॥ तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान्॥ ऋषिं नारायणमृते योषिन्मय्येह मायया॥३७॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्॥ या करोति पदाक्रान्तान्भ्रूविजृम्भेण केवलम्॥३८॥ सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः॥ मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य॥३९॥ योपयाति शनैर्माया योषिद्देवविनिर्मिता॥ तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतम्॥४०॥ यां मन्यते पतिं मोहान्मन्मायामृषभायतीम्॥ स्त्रीत्वं स्त्रीसङ्गतः प्राप्तो वित्तापत्यगृहप्रदम्॥४१॥ तामात्मनो विजानीयात्पत्यपत्यगृहात्मकम्॥ दैवोपसादितं मृत्युं

पुरुषवदाचरन्तीं यां मम मायां वित्तादिप्रदं पतिं मन्यते॥ स्त्री मृगयोर्गायनं यथा॥४२॥

सङ्गतः प्रेतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः तां पत्यादिरूपं मत्सं विजानीयात्॥ मृगयोर्लुब्धकस्य गायनं गानं यथा मृगस्य मृत्युः॥४२॥ न देव जीवस्य संसृतिः प्रपञ्चिता॥ तत्र च तस्य कर्मवशेन॥ लोकाल्लोकान्तरं गमने जन्ममरणे चोक्ते॥ न ह्येवं शङ्कान्तेनानुआप कस्य कथं लोकाल्लोकान्तरगमनं निमित्तं च कथं जन्ममरणे भोगेन कर्मक्षये च सति जन्ममरणे वेष्यते॥ न कृतः पुनरर्पितस्य कर्मसंभवश्च॥ मत्र लोकान्तरगमनं कर्मवशं भवतीत्याह॥ दे

१९

त्य

जीवस्योपाधिनयाभूतेनानेन जीवेन लिंगदेहेन लोकांतरमनुव्रजन् ॥ अविरतं कर्माणि करोतीति
कर्मणामसमाप्तिरुक्ता ॥ ४३ ॥ जन्ममरणसंभवमाह ॥ जीवो जीवोपाधिर्लिंगदेहः ॥ अस्यात्मनः अनुगतः अ
नुवर्ती भूतेंद्रियमनोमयः स्थूलभूतादिविकारो देहः ॥ भोगायतनेन तयोर्निरोधः कार्यायोग्यता ॥ तदस्य
जीवस्य मरणमुच्यते ॥ आविर्भावस्तु संभवो जन्मोच्यते ॥ ४४ ॥ एतदेव दृष्टांतेन स्पष्टयति द्रव्योप
लब्धिस्थानस्य नेत्रगोलकादेः द्रव्येक्षायां रूपादिदर्शने काचकामलादिदोषेण यदायोग्यता भवति
तदैव चक्षुरिंद्रियस्याप्ययोग्यता ॥ अनयोः स्थानचक्षुषोर्यदायोग्यता तदैव द्रष्टुर्जीवस्य द्रष्टृत्वायो

देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ॥ भुंजान एव कर्माणि करोत्यविरतं पुमान् ॥ ४३ ॥ जी
वो ह्यस्यानुगतो देहो भूतेंद्रियमनोमयः ॥ तन्निरोधोस्य मरणमाविर्भावस्तु संभवः ॥ ४४ ॥ द्रव्यो
पलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा ॥ तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं ॥ ४५ ॥ यथाक्ष्णो
र्द्रव्यावयवदर्शनायोग्यता यदा ॥ तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ॥ ४६ ॥ तस्मान्न
कार्यः संत्रासो न कार्पण्यं न संभ्रमः ॥ बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह ॥ ४७ ॥

ग्यता ॥ एवं स्थूलदेहवैकल्येन तदेव जीवस्य मरणं शरीरादपसर्पणं न त्वन्यत् स्वरूपतः ॥ ४५ ॥ कचिद्दे
कः श्लोकोपि कः पठ्यते ॥ तत्राप्ययमर्थः ॥ द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायां यदायोग्य
ता ॥ तत्पंचत्वं मरणं ॥ अहंमानादिदमेवाहमित्यभिमानेन द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्प
त्तिः ॥ यथाक्ष्णोर्गोलकयोः द्रव्यावयवस्य रूपादेर्दर्शने योग्यता शोषसमाने ॥ यस्मात्त्वं वस्तुतो जीवस्य
जन्ममरणादि ॥ तस्मान्मरणात्संत्रासो न कार्यः जीवनेन च कार्पण्यं देहं कार्ये संभ्रमश्च ॥ संभ्र
मः संभ्रमयालुव्या ॥ जीवन्नयत्ते ॥ ४७ ॥ ननु सर्वथा मुक्तसंगत्वेन कथं जीवितमत आह ॥

भा
टी
२२

सम्यक्स्वपतिविचारयतीतिसम्यग्दर्शनं ॥ तयाबुद्ध्यामायाविरचितेलोकेकलेवरंन्यस्यनिद्दिष्यत
स्विवासक्तिंमुक्त्वाचरेदित्यर्थः ॥४८॥ इतिश्रीभावार्थदीपिकायांतृतीयस्कंधेएकत्रिंशोध्यायः ॥३१॥
द्वात्रिंशेसात्विकीधर्मैरूर्ध्वागतिस्तदीर्यते ॥ तत्त्वज्ञानविहीनस्यततश्चपुनरागतिः ॥१॥ तदेवंपापकर्म
णांगतिरुक्ता ॥ इदानींकाम्यकर्मणांगतिमाह ॥१॥ अथयेतिचतुर्भिः योगृहेष्वावसन्स्वान्धर्मान्
दोग्धि ॥ दोग्ध्यमाह ॥ काममर्थंचतान् ॥ दुग्धान्धर्मान्भूयःपिपर्तिपूरयति ॥ प्रवर्तत इति ॥१॥ सोपिभ

सम्यग्दर्शनयाबुद्ध्यायोगवैराग्ययुक्तया ॥ मायाविरचितेलोकेचरेन्न्यस्यकलेवरम् ॥४८॥
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेजीवगतिवर्णनेएकत्रिंशोध्यायः ॥३१॥ कपिलउ॰
अथयोगृहमेधीयान्धर्मानेवावसन्गृहे ॥ काममर्थंचधर्मान्स्वान्दोग्धिभूयःपिपर्तितान् ॥१॥
सचापिभगवद्धर्मात्काममूढःपराङ्मुखः ॥ यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः ॥२॥
तच्छ्रद्धयाक्रान्तमतिःपितृदेवव्रतःपुमान् ॥ गत्वाचांद्रमसंलोकंसोमपाःपुनरेष्यति ॥३॥
यदाचाहीन्द्रशय्यायांशेतेनंतासनोहरिः ॥ तदालोकालयंयांतितएतेगृहमेधिनाम् ॥४॥
येस्वधर्मान्नदुह्यन्तिधीराःकामार्थहेतवे ॥ निःसंगान्यस्तकर्माणःप्रशान्ताःशुद्धचेतसः ॥५॥
निवृत्तिधर्मनिरतानिर्ममानिरहंकृताः ॥ स्वधर्माख्येनसत्वेनपरिशुद्धेनचेतसा ॥६॥

गवद्धर्माद्यथनरूपाद्धर्मात् ॥ पराङ्मुखःसन् ॥ साहंकारादेवान्पितॄंश्चयजते ॥२॥ ततःकिंतदाह ॥ त
च्छ्रद्धयाक्रान्ताआसमन्तान्मतिर्यस्यपितृषुदेवेषुचव्रतंनियमोयस्य ॥ सोमपाःतत्रसोमपीत्वेत
थः ॥३॥ लोकेतिष्ठन्नपिपुण्यक्षयात्पातमुक्त्वालोकानामपिलयमाह ॥ यदाच ॥ अहीन्द्रःशल्ये
ये ॥ भगवद्धर्मनिष्ठानांत्वनावृत्तिमेवगतिमाहत्रिभिः ॥ येवकामार्थप्रयोजनायस्वधर्मंनदुह
न्तिनदुहन्ति ॥ निःसंगान्न्यस्तानिईश्वरेसमर्पितानिकर्माणियैः ॥५॥

२२

विश्वतोमुखं परिवृढं यांति॥ तथा च श्रुतिः सूर्यद्वारेण ते विरजाः प्रयांति यत्रामृतः स पुरुषो ह्यव्ययात्मे
ति॥ प्रकृतिमुपादानकारणं॥ उत्पत्त्यंतभावनं निमित्तकारणं॥ ७॥ परमेश्वरं हरिं हिरण्यगर्भोपा
सकानामविक्रमेणात्मप्राप्तिमाह॥ द्विपरार्धावसान इति त्रिभिः परस्य हिरण्यगर्भस्य पदविचिंतकाः
परमेश्वरं हरिं हिरण्यगर्भोपासकाः॥ ८॥ क्ष्मादीनि पंचमहाभूतानि॥ मन इंद्रियाणि च अर्थाः शब्दा
दयः॥ भूतादिस्तामसाहंकारः॥ एवमादिभिः परिवृतं ब्रह्मांडं प्रतिसंहर्तुमिच्छुः सन्॥ अव्याकृ
तमीश्वरं यर्हि विशति द्विपरार्धलक्षणं कालमनुभूय परेत्य हरेण तावद्भगवंतं हिरण्यगर्भमनुप्रविष्टा ये यो

सूर्यद्वारेण ते यांति पुरुषं विश्वतोमुखं॥ परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनं॥ ७॥ द्विप
रार्धावसाने यः प्रलयो ब्रह्मणस्तु ते॥ तावदध्यासते लोकं परस्य परचिंतकाः॥ ८॥ क्ष्माम्भोन
लानिलवियन्मनइंद्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः॥ अव्याकृतं विशति य
र्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयंभूः॥ ९॥ एवं परेत्य भगवंतमनुप्र
विष्टा ये योगिनो जितमरुन्मनसो विरागाः॥ तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपया
न्त्यगताभिमानाः॥ १०॥ अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयं॥ श्रुतानुभाव

तिनः अमृतं परमानंदरूपं प्रधानं ब्रह्म ... तेनैव सह होय ॥ शरणं व्रज भावेन भामिनि॥ ११॥
यांति न तु पूर्ववत्तदा अगताभिमानाः॥ तथा च श्रुतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे॥ प
रस्यांते कृतात्मानः प्रविशंति परं पदम् इति॥ १०॥ भगवदुपासकास्तु साक्षादेव तं प्राप्नुवंति॥ न तु क्र
मेण॥ अतस्त्वं साक्षात्तमेव भजेत्याह॥ अथ तस्माद्भावेन प्रेम्णा एवं तावद्भगवद्भक्तानां निरंतरमेव
तत्प्राप्तिः भगवद्भेदेन हिरण्यगर्भोपासकानां तु क्रमेणेत्यभिप्रेत्य भेददर्शनोपासनेन तु ब्रह्मादयोऽपाव
नै

ते किन्तु नाम इत्याह ॥ आद्य इति चतुर्भिः ॥ यो वेदगर्भः सोपि गुणव्यतिकरे जाते ॥ एवं यथा ब्रह्मपदा धिकृतः सन् ॥ प्रजायते ॥ न केवलं स एव केवलः किन्तु ऋषिभिः मरीच्यादिभिश्च सह ॥ जन्मनि हेतुद्वयं भेददृष्ट्याभिमानेन कर्तृत्वादिति च ॥ यथा एवं तत्र हेतुं ॥ निःसंगेन निष्कामेन कर्मणोनि ॥ किं कृत्वा प्रजायते गुणमयमपारमेश्वर्यमेश्वर्यं निषेव्य प्रजापालनं स्वस्य गुणं गुणाधिष्ठातारं प्रद्युम्नावतारं ब्रह्म पुरुष ॥ ११ ॥ संस्मयमाना ॥ १४ ॥ ते पितृषि पितृगणयोः स्वकर्मनिमित्तमेव स्वर्गं ये तिष्ठन्तु पुरुषं च संस्मरन्यथा

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ॥ योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥ १२ ॥ भेददृष्ट्याभिमानेन निःसंगेनापि कर्मणा ॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभं ॥ १३ ॥ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना ॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते ॥ १४ ॥ ऐश्वर्यं पारमेष्ठ्यं च तेपि धर्मविनिर्मितं ॥ निषेव्य पुनरायान्ति गुणव्यतिकरे सति ॥ १५ ॥ ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः ॥ कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः ॥ १६ ॥ रजसा कुंठमनसः कामात्मानोजितेंद्रियाः ॥ पितृन्यजंत्यनुदिनं गृहेष्वभिरताशयाः ॥ १७ ॥ त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः ॥ कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥ १८ ॥

सर्वे स्वस्वाधिकारेण तु नरा यान्तीत्यन्वयः ॥ १० ॥ एवं ब्रह्मोपासकानामपि भेददर्शनाभिमानाभ्यामेवमावृत्तिः तदा काममकर्मिणां किं वक्तव्यमिति ॥ तान् विनिन्दन्नाह ये त्विह ॥ ये त्विह कर्मस्वासक्तमनसः सन्तः अप्रतिषिद्धानि काम्यानि ॥ नित्यानि च कर्माणि कृत्स्नानि कुर्वन्ति ते अर्यमोणादिरूपेण तद्यथा धूममार्गेण पितृलोकं व्रजन्तीति पंचमेनान्वयः ॥ मध्ये तान्विनिन्दन्नाह ॥ १९ ॥ हरिमेधसो मेधायस्य कथनीया उरवो विक्रमा यस्य मधुद्विषः कथायां विमुखाः सन्तो ये त्रैवर्गिकाः ॥ १८ ॥

एतच्छ्रवणकीर्तनेन मत्स्मापि मत्पदप्राप्तिरेव फलमित्याह ॥ य इति ॥ अथार्थे चकारः सोपि सन्मद्वीमे-
ति निश्चितं ॥४३॥ इति श्रीभावार्थदीपिकायां तृतीये द्वात्रिंशः ॥३२॥ त्रयस्त्रिंशे तु तन्मेव कपिलसोपदेशतः
ज्ञानभावेन तस्मात् जीवन्मुक्तिरुदीर्यते ॥१॥ विस्रस्तमोहरूपं पटलमावरणं यस्याः सा ॥ तत्त्वाख्येव वि-
षयः तेनांकिता सिद्धिः सांख्यज्ञानं तस्य भूमिं देहं प्रवर्तकं ॥१॥ अथापि निवाभ्यान्तरे अजोपि तव वपुः केव-
लं दध्यौ न तु दृष्टवान् ॥ स एव स्वयं साक्षाद्यस्य तवैव जठराब्जजातः ॥ स भवानेव विश्वस्य सर्गादि विधत्ते ॥ न
नतव सर्गादिकर्ता कश्चिदस्ति ॥ एवंभूतस्त्वं मे मया कथं जठरेण धृत इति त्रयाणामन्वयः ॥ कथंभूत-
वपुस्तत् ॥ यत्केनचिद्दृष्टं अंतः सलिले शयानं एकीकृत्य भूतानींद्रियाणि अर्थाश्च यत्राहंकारादयः ॥ आत्मा

य इदं शृणुयादम्ब श्रद्धया पुरुषः सकृत् ॥ यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ॥४३॥
इति श्रीभागवते तृतीये द्वात्रिंशः ॥३२॥ मैत्रेय उ॰ ॥ एवं निशम्य कपिलस्य वचो जनित्री सा कर्दम-
स्य दयिता किल देवहूतिः ॥ विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धि-
भूमिं ॥१॥ देवहूतिरु॰ ॥ अथाप्यजोन्तःसलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते ॥ गुणप्रवाहं
सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥२॥ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्त-
वीर्यः ॥ सर्गाद्यनीहोवितथाभिसंधिरात्मेश्वरोतर्क्यसहस्रशक्तिः ॥३॥

वमनः एतन्मयं वपुस्ते योगमिति

यं ॥ कुतो गुणानां प्रवाहो यस्मिंस्तत् ॥ सतः अशेषस्य कार्यकारणस्य बीजं कारणं ॥२॥ कथंभूतो भ-
वान् ॥ सर्गादि विधत्ते गुणप्रवाहरूपेण विभक्तं वीर्यं शक्तिर्येन सः शक्तिद्वारेण विधत्ते न साक्षादित्य-
र्थः यतः स्वतोनीहो निष्क्रियः तर्हि कथं शक्तिद्वारेणापि सर्गादि विधत्ते ॥ गुणप्रवाहरूपेणाप्यवित-
थाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते ॥ आत्मनो जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः
न तु कथं विविधान् ॥ भोगानेक एव विदध्यात् ॥ अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य ॥३॥

यथा बहूनां रूपरसादीनां गुणानामाश्रयो दुग्धादिः ॥ एक एवार्थो मार्गभेदैस्तैस्तैरिन्द्रियैर्नानायती-
यते चक्षुषा शुक्ल इति ॥ रसनेन मधुर इति स्पर्शनेन शीत इत्यादि तथा ॥ भगवानेव तत्तद्रूपेण शास्त्रवर्त्मभिर्गम्यते
३३ ॥ शास्त्रमार्गानेव प्रपंचयति ॥ क्रिययेति त्रिभिः क्रियया पूर्तेन क्रतुभिर्यागैः मर्शनेन मीमांसा-
ना ॥ आत्मेन्द्रियजयेनापि विहितवर्जनेन ॥ ३४ ॥ उभयचिह्नेन सकामनिष्कामलक्षणेन ॥ तमेवाह ॥ यः प्रवृत्तिसका-
मधर्मः साध्यत्वमार्गोऽपि भगवत्प्रवृत्तिसाधनत्वात्स्वरूपमिति भावः ॥ एभिर्वेत्यैभिः स्वदृक् स्वप्रकाशः ॥ ३५

यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः ॥ एको नानेयते तद्वद्भगवाञ्छास्त्रवर्त्मभिः ॥ ३३ ॥ क्रि-
यया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः ॥ आत्मेन्द्रियजयेनापि संन्यासेन च कर्मणां ॥ ३४ ॥ योगेन वि-
विधांगेन भक्तियोगेन चैव हि ॥ धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ॥ ३५ ॥ आत्मतत्त्वावबो-
धेन वैराग्येण दृढेन च ॥ ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥ ३६ ॥ प्रावोचं भक्तियोग-
स्य स्वरूपं ते चतुर्विधं ॥ कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु ॥ ३७ ॥ जीवस्य संसृतीर्बह्वीरवि-
द्याकर्मनिर्मिताः ॥ यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ॥ ३८ ॥ नैतत्खलायोपदिशेन्नाविनी-
ताय कर्हिचित् ॥ न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥ ३९ ॥ न लोलुपायोपदिशेन्न गृहारूढचे-
तसे ॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥ ४० ॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे
भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ॥ ४१ ॥ बहिर्जातविरागाय शान्तचित्ताय दीयतां निर्मत्स-
राय शुचये यस्याहं प्रेयसां प्रि-

तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगेन समानार्थत्वमुक्त्वा भ-
क्तियोगमुपसंहरति द्वाभ्यां प्रावोचमिति ॥ चतुर्विधं त्रिगुणनिर्गुणभेदेन प्रत्यभिवत्ति ॥ उक्तमिति नि-
यतासिकं यत्ति ॥ श्रृणु हे मातः ॥ ३८ ॥ उपदेशे अनधिकारिणमाह नैतदिति द्वाभ्यां ॥ खलाय परो-
द्वेषकाय भिन्नाय दुराचाराय धर्मध्वजाय दंभिकाय ॥ ३९ ॥ अधिकारिणमाह ॥ श्रद्दधानायेति

ननु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाधनसाध्येन योगेन प्राप्यते तत्राह ॥ एतावानिति युज्यते प्राप्यते ॥ यदयं च संगमुदास एव योगफलमित्यर्थः ॥ २७ ॥ ननु कथं प्रत्यक्षत्वात्प्रतीतः प्रपंचोऽनुदासितुं शक्यते ॥ प्रतीतेर्भ्रांतत्वादित्याह ॥ ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिधर्मोपस्तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभातीत्यर्थः ॥ २८ ॥ अर्थरूपत्वमेवोदाहरन् दर्शयति यथेति अहंकारः स च त्रिगुणात्मकः पुनश्च भूतरूपेण पंचविध इंद्रियरूपेणैकादशविधः स्वराट् जीवरूपस्तस्य जीवस्य वपुरंडं जगद्यतो येभ्यो महदादिभ्यस्तथावभाति ॥ २९ ॥ ननु तर्हि जनः किमित्येव

एतावानेव योगेन समग्रेणेह योगिनः ॥ युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः ॥ २७ ॥
ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं ॥ अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा ॥ २८ ॥
यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट् ॥ एकादशविधस्तस्य वपुरंडं जगद्यतः ॥ २९ ॥ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः ॥ समाहितात्मा निःसंगो विरक्त्या परिपश्यति ॥ ३० ॥
इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं ॥ येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ॥ ३१ ॥ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ॥ द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥ ३२ ॥

न पश्यतीत्यत आह ॥ एतद्वै इति ॥ ३० ॥ उक्तमेवार्थं स्तुवन्नुपसंहरति पन्चर्थं संक्षेपेणानुवदन्नि इतीति हे गुर्वि श्रेष्ठे ॥ ३१ ॥ अनेन च ज्ञानयोगेन भगवानेव प्राप्यः प्राप्यो यथा भक्तियोगेनेत्याह ॥ नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च योगः नह्ययोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्दो लक्षणं ज्ञापको यस्य तदुक्तं गीतासु ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रता इति ॥ ३२ ॥ ननु ज्ञानयोगस्यात्मलाभः फलं शास्त्रेणावगम्यते ॥ भक्तियोगस्य तु भजनीयेश्वरप्राप्तिः अनयोरेकार्थत्वमित्याशंक्याह यथेति

ये चाच्युतस्य कथासुधां हित्वा असतां गाथाः शृण्वन्ति ॥ नूनं दैवेन विहता इत्यन्वयः ॥१९॥ पितृलोका न्तरं प्रजामनु पुत्रादिषु प्रजायन्ते ॥ गर्भाधानादारभ्य श्मशानान्ताः क्रियाः कृतवन्तः यथोक्तकारिण इत्यर्थः ॥२०॥ कथं प्रजायन्ते तदाह ॥ ततस्ते पुनरिमं लोकं प्रतिपतन्तीति विभ्रंशित उदयो भोगसाधनं येषां ॥२१॥ परमेष्ठिनं परमेश्वरं प्रीत्या तस्य गुणानामाश्रयतया या भक्तिस्तया ॥२२॥ भजने च ज्ञानवैराग्ये स्वत एव भवत इत्याह वासुदेव इति ॥२३॥ तदेवोपपादयति ॥ यदास्य भक्तस्य चित्तं भगवद्गुणानुरागेण

नूनं दैवेन विहता ये चाच्युतकथासुधाम् ॥ हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः ॥१९॥
दक्षिणेन पथार्यम्णः पितृलोकं व्रजन्ति ते ॥ प्रजामनु प्रजायन्ते श्मशानान्तक्रियाकृतः ॥२०॥
ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति ॥ पतन्ति विवशा देवैः सद्यो विभ्रंशितोदयाः ॥२१॥
तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं ॥ तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं ॥२२॥
वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं ॥२३॥
यदास्य चित्तमर्थेषु समेष्विन्द्रियवृत्तिभिः ॥ न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत ॥२४॥
स तदैवात्मनात्मानं निःसंगं समदर्शनं ॥ हेयोपादेयरहितमारूढं पदमीक्षते ॥२५॥
ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ॥ दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥२६॥

तस्मिन्नेव वा निश्चलं सत् इन्द्रियवृत्तिभिः वैषम्यमर्थेषु न गृह्णाति ॥२४॥ तदैवात्मनात्मानं स्वप्रकाशमीक्षते ॥ कथंभूतं समं च तद्दर्शनं च तत्कुतः निःसंगं संगाद्धि वैषम्यं भवति ॥ निःसंगत्वे हेतुः हेयोपादेयरहितं ॥ तत्कुतः पदमवसितमारूढं परमानन्दोऽहमिति निश्चयं प्राप्तमित्यर्थः ॥२५॥ स एव सर्वेष्वप्युक्तं तदेव साम्यं दर्शयति ॥ ज्ञानमात्रमेव परंब्रह्मादिशब्दैः प्रसिद्धं ॥ दृश्यादिभिः पृथक्करणैः

किंच प्रलये यस्योदरे एतद्विश्वमासीत् ॥ स त्वं मया जठरेण कथं धृतः ॥ ननु शिशोरपि किमेतद्दु
र्घटं तत्राह वटपत्र इति अंघ्रिं पादांगुष्ठं पिबतीत्यंघ्रिपानः ॥ इदमपि शिशुत्वं तद्वदेव माया इति
भावः ॥४॥ अथवा न त्वं मया अपरिच्छिन्नत्वाज्जठरे भृतः किंतु वराहादिवदवतारवदिच्छयैवाविर्भूतो
सीत्याह ॥ त्वं देहतंत्रो देहं परिकरः स्वीकृतवानसि ॥ पाप्मनां दुष्टानां निदेशभाजां मदाज्ञानुव
र्तिनां विभूतये संपद्धे ज्ञानमार्गप्रदर्शनाय ॥५॥ अतस्त्वद्दर्शनादहं कृतार्थास्मीति किं स्तुत्यः

स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् ॥ विश्वं युगांते वटपत्र एकः शेते
स्म मायाशिशुरंघ्रिपानः ॥४॥ त्वं देहतंत्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये
यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ॥५॥ यन्नामधेयश्रवणा
नुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ॥ श्वादोपि सद्यः सवनाय कल्पते कुतः पु
नस्ते भगवन्नु दर्शनात् ॥६॥ अहो बत श्वपचोतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यं ॥ ते
पुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ॥७॥

यन्नामधेयस्य श्रवणमनुकीर्त
नं च तस्मात् क्वचिदपि स्मरणमात्रादपि श्वादः श्वपचः सोपि सवनाय सोमयागाय कल्पते यो
ग्यो भवति ॥ अनेन तु पुनस्ते लब्धमे ॥६॥ तदुपपादयति ॥ अहो बतेत्याश्चर्ये ॥ यस्य जिह्वाग्रे तव नाम
वर्तते ॥ स श्वपचोपि ॥ अतोस्मादेव हेतोर्गरीयान् ॥ यद्यस्माद्धर्मं ते स्वनरुति वाकृत इत्यत आह त
पस्तपस्तेपुः कृतवंतः जुहुवुः होमं कृतवंतः सस्नुः तीर्थेषु स्नाताः आर्यास्त एव सदाचाराः
ब्रह्म वेदमनूचुः अधीतवंतः स त्वन्नामकीर्तनेन तपआद्यनुष्ठानमनयत्तेन पुण्यतमा इत्यर्थः यद्वा

२मा

१

प्रत्यक्स्रोतसिप्रत्याहृतेआत्मनिभाव्यंसंचिंत्यंवेदगर्भंयस्यसः॥८॥ अविक्लवयागंभीरयावाचा॥९॥ नेनवसुसेव्येनसुखसेव्येनमेमयाउदितेनास्थितेनानुष्ठितेनपरांकाष्ठांजीवन्मुक्तिंअवरोत्स्यसिप्राप्स्यसि॥१०॥ यायायास्यसिअतद्विदःमन्मतमविद्वांसः॥ अनुमतःअनुज्ञातः॥१२॥ सरस्वत्याआपीडेपुष्पमुकुटतुल्येसरस्वत्यानिपाठेमुकुंदेनेवसंवेष्टितेबिंदुसरसिसमाहितावभूव॥१३॥ कथंभूतासती

तंत्वामहंब्रह्मपरंपुमांसंप्रत्यक्स्रोतस्यात्मनिसंविभाव्यं॥ स्वतेजसाध्वस्तगुणप्रवाहंवंदेविष्णुंकपिलंवेदगर्भं॥८॥ **मैत्रेयउवाच**॥ ईडितोभगवानेवंकपिलाख्यःपरःपुमान्॥ वाचाविक्लवयेत्याहमातरंमातृवत्सलः॥९॥ **कपिलउवाच**॥ मार्गेणानेनमातस्तेसुसेव्येनोदितेनमे॥ आस्थितेनपरांकाष्ठामचिरादवरोत्स्यसि॥१०॥ श्रद्धत्स्वैतन्मतंमह्यंजुष्टंयद्ब्रह्मवादिभिः॥ येनमामभवंयायामृत्युमृच्छंत्यतद्विदः॥११॥ **मैत्रेयउवाच**॥ इतिप्रदर्श्यभगवान्सतींतामात्मनोगतिं॥ स्वमात्राब्रह्मवादिन्याकपिलोनुमतोययौ॥१२॥ साचापितनयोक्तेनयोगादेशेनयोगयुक्॥ तस्मिन्नाश्रमआपीडेसरस्वत्याःसमाहिता॥१३॥ अभीक्ष्णावगाहकपिशान्जटिलान्कुटिलालकान्॥ आत्मानंचोग्रतपसाबिभ्रतीचीरिणंकृशं॥१४॥ प्रजापतेःकर्दमस्य

समाहितानदाह॥ अभीक्ष्णंत्रिषवणमवगाहःस्नानंतेनकपिशान्पिशंगान्॥ स्वनपवकुटिलान्केशान्तथा॥ आत्मानंदेहंचीरंयथाविणाहृपांचबिभ्रतीसती॥१४॥ प्रजापतेःकर्दमस्यतपोयोगाभ्यांविजृंभितंसमस्तिशाविनंस्वर्गादेस्पृहणीया॥ अत्रप्रजानेरवस्विरतात्सतीवदनंकिंचिदनिर्वाच्यंशोकव्याकुलत्वकारेतिपष्टेनान्वयः॥१५॥ ॥ ॥

अष्टादशे हिरण्याक्षवधो दुर्दैववराहयोः ॥ निर्विशेषं महायुद्धं देवतोभिनिरूप्यते ॥१॥ प्रतियोद्धारं कृ-
त्वा महामनाः शायिष्यसे इति यदुक्तं तद्विगणय्य अवगणय्य वित्वा ॥ यतो दुर्मदः ॥१॥ अभितो जयनीतमभि-
जित ॥ तं वीरहरिं भक्षयैः वर्णोर्ध्वं नीयमानाम् अवनिं येन तं अग्रदंष्ट्रया दंष्ट्राग्रेण स्वरुचः ॥ हिरण्याक्षतेजो-
सि अरुणश्रिया शुक्लं यत ॥ तेनाक्ष्णा नेत्रेण मुष्णंतं तिरस्कुर्वंतं ॥ अहो चित्रं वनगोचरो मृगः वारिचरो
वराहः ॥२॥ एहि आगच्छ रसौकसां पातालवासिनां नो अस्माकं समर्पिता ॥ अनया पातालावतरणम

मैत्रेय उवाच ॥ तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ॥ हरेर्विदित्वा
गतिमंग नारदाद्रसातलं निर्विविशे त्वरान्वितः ॥१॥ ददर्श तत्राभिजितं धराधरं प्रोन्नीय-
मानावनिमग्रदंष्ट्रया ॥ मुष्णंतमक्ष्णा स्वरुचोरुणश्रिया जहास चाहो वनगोचरो मृगः ॥२॥
आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता ॥ न स्वस्ति यास्यस्यनया मम
मेक्षतः सुराधमासादितसूकराकृते ॥३॥

स्यानवष्टतेः इति भावः ॥ हिरण्याक्षेण धिक्षे पार्थे प्रयुक्तापि भारती वक्तुर्नो भगवंतं तस्तोति ॥ तथाहि
वनगोचरो जलशायानः श्रीनारायणः ॥ स एव योगिभिर्मृग्यते ॥ इच्छात्वाहं नेगायने रतिम गौ
अक्षतानास्ति त्वोयस्मात ॥ सर्वज्ञत्वे सर्वधिः ॥ सुराधम आपस्मात् हे सुरोत्तम मम सेन्तमाणस्यापि सतः
मामस्नात्तस्यापित्वमनया सह वर्तमानः ॥ नो स्वदीयं स्वस्ति समस्तं मंगलं राज्यं यास्यसि प्रापयसि ना
वसं देहः ॥ तथापि ॥ अस्मत्कृपया विमुंच अस्मभ्यं आसादिता लीलया स्वीकृता सूकराकृतिर्येन ॥ ३

भा
टी
९९

अभवाय नाशाय भृतः पुष्टः वत्स तत्त्वमो तायभूतोऽहं॥ आस्थितेऽस्मिन्नर्थे योऽभवाय रोदनेन चौर्येण
नयतीति॥ तथा वत्स तत्त्वहृत्तनवस्थितो जयतीति संस्थाप्य हत्वा॥ वत्स तत्त्व योगमायाहृत्वमवि
तं बलं यस्य अल्पं पौरुषं यस्मात्॥ ततो समकृत्या परिभत्वा भत्वाहृदि स्थिरीकृत्येत्यर्थः॥ हे मृडश्
मूढान् प्रापयतीति॥ प्रकर्षेण अविति धातुः सहदानुगैश्च वंसे सारकुः त्वानि मज्जेना याया मि॥ यस्य
त्वं ते वीर्यवानपि मोचयसीति भावः॥४॥ अस्मद्भुजच्युतया पि गदया शीर्णं शीर्षं यस्य॥ तथाभूते

त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंस्यसुरान् परोक्षजित्॥ त्वं योगमायाबलमल्प
पौरुषं संस्थाप्य मूढान् प्रमजे सहानुगः॥४॥ त्वयि स्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्यु
तपायेव वम्बलिं हरन्त्यृषयो ये च देवाः स्वयं सर्वे न भविष्यन्त्यमूलाः॥५॥ स तत्यमानो
रिपुरुक्षितो मरैर्दृष्ट्वा प्रगां गामुपलक्ष्य भीतां॥ ततो दंष्ट्रिरगाद्दुमध्यात्प्राहाह
न्नः सकरेणयेच्छे भः॥६॥

त्वयि सुसंस्थिते सति ये त्वम्यस्मद्धुनाबलिं हरन्ति न वी ना भक्ता
ये च एवं भक्ताः ऋषयो देवाश्च ते सर्वे स्वयमेव॥ उद्यमं विनैव अमूला न भविष्यन्ति॥ किं तर्हि मूलं
लाश्च भविष्यन्तीत्यर्थः॥५॥ सहरिः अरैर्दुरुक्तात्मेवनोमराः पान्तु विशेषात्तैः तत्यमानं वध्यमा
मानं दृष्ट्वा ऽगातोऽपिष्ठीभीतामालक्ष्य नोदरुक्तमध्यामपश्यन्॥ सहमान एव निर्गतः करेण
हे स्तिनो॥ वत्स तत्त्व अविरुक्तितः॥ अमरैर्निमित्तभूतैस्तयमानः॥ यथा क्रतार्थयाहिंसा
वध्यादीनां व्यथां हृष्ट्वा॥ अत्रकं पयापि पीड्यमानः इत्यर्थः तो दंष्ट्रिणित्यस्यायमेवार्थः॥६॥

९९

सलिलान्निर्गच्छन्तमनुगतः सन् ॥ हिरण्यवत्कपिशाः केशा यस्य दैत्यस्य ॥ ऊर्ध्वो मकरः करालो दंष्ट्रा यस्य
अशनिवन्निःस्वनो यस्य ॥ निर्लज्जानामसतां किं विगर्हितमस्ति ॥ निर्लज्जभयाभावात् ॥ पलायनं त्वाश्र
कमित्यर्थः ॥ वस्तुतस्तु गतह्रियः अगमह्रियः न सन्तो येभ्यः ते वा खलु पालत्वात् किं विगर्हितमस्ति न किंचि
त् ॥ अतः खलत्वाद् दृष्ट्वा प्रविभरद्गणार्थं ॥ किं विप्रलापनमपि न निंदितमित्यर्थः ॥ यदा लोकोप
कारायभुवमुद्धरतोः कुह्नवणमनुचितमन्वानो दैत्य आत्मनमेवाधिक्षिपति ॥ गतह्रियाह्याः वैकय
गणममसतामस्माकं किं विगर्हितं गर्हानास्ति ॥ अपितस्नेव ॥ थिगस्मानित्यब्रवीदित्यर्थः ॥ ८ ॥ स

तं निःसरन्तं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः ॥ करालदंष्ट्रोऽशनिनिःस्वनोऽब्र
वीद्गतह्रियां किं त्वसतां विगर्हितं ॥ ९ ॥ स गामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्व
सत्त्वं ॥ अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोरेः ॥ १० ॥ परानुषक्तं तपनीयो
पकल्पं महागदं काञ्चनचित्रदंशं । मर्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः प्रचण्डमन्युः प्रहसंस्तं बभाषे ॥

भगवान्विश्वसृभिष्टुतो विबुधैश्च प्रसूनैरापूर्यमाणः पादौ अन्तरे विश्वसृजां प्रसूनैर्विबुधैरभिष्टु
तश्चेति ॥ सलिलस्योदस्तादुपरि स्थलवहारगोचरे देशे गां विन्यस्य तस्यामाधारशक्तिं निहितवा
न् अरेः तस्य पश्यत एव ॥ १० ॥ परा हतं परानुषक्तं लग्नं तपनीयोपकल्पं स्वर्णाभरणं काञ्चनमयं चि
त्रं दंशं कवचं च यस्य तं दैत्यं प्रचण्डमन्युस्तमपि द्विलेपादिकं चानुकरणमात्रम् ॥ दैत्यवाक्यभीतानां देवा
नामभयनिह्नुतये ॥ वस्तुतस्तेन ततः यानुमतेन कोपादिदृष्टत्वाभावात् ॥ ११ ॥ ॥

ग्रामसिंहान्श्वनः प्रतिमुक्तस्य बद्धस्य विकत्थनं श्लाघां ॥ १० ॥ न्यासहरा निक्षेपहराः द्राविताः पलायने का
रिताः ॥ अथापि असमर्था अपि तिष्ठामः ॥ तत्किं यतः स्थेयं स्थातव्यमेवास्माभिः ॥ तत्किमित्यत आह क्व यामः
गंतव्यदेशाभावात् ॥ ११ ॥ पद्रथानां पदातीनां ये यूथपास्तेषामधिपः मुख्यः इत्यर्थः ॥ अस्वस्तये अस्म
द्वधार्थं आशु घटस्व यतस्व ॥ अनूहो निर्विमर्शः यो नातिपिपर्ति न पूरयति पालयति वा ॥ असौ असभ्यः

श्रीभगवानुवाच ॥ सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान् ॥ न मृत्युपाशैः प्रति
मुक्तस्य वीरा विकत्थनं तव गृह्णंत्यभद्र ॥ १० ॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्रा
विता स्ते ॥ तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरं ॥ ११ ॥ त्वं पद्रथानां कि
ल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः ॥ संस्थाप्य चास्मान्प्रमृजाश्रु स्वकानां यः स्वां प्र
तिज्ञां नातिपिपर्त्यसभ्यः ॥ १२ ॥ मैत्रेय उवाच ॥ सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं ॥ आजहारो
ल्बणं क्रोधं क्रीड्यमानोऽहिराडिव ॥ १३ ॥ सृजन्नमर्षितः श्वासान्मन्युप्रचलितेंद्रियः ॥ आसाद्य तर
सा दैत्यो गदयाभ्यहनद्धरिं ॥ १४ ॥ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि ॥ अवंचयत्तिर
श्चीनो योगारूढ इवांतकं ॥ १५ ॥ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः ॥ अभ्यधावद्धरिः क्रु
द्धः संरंभाद्दष्टदच्छदं ॥ १६ ॥ ततः स्वगदयारातिं दक्षिणस्यां भ्रुवि प्रभुः ॥ आजघ्ने स तु तां सौम्य
गदया कोविदोऽहनत् ॥ १७ ॥

सभायामनर्हः ॥ १२ ॥ सोऽधिक्षिप्तः सत्यं वयमिति श्लोकेन रुषा प्रलब्ध
उपहसितश्च ॥ एते वयमिति द्वाभ्यां ॥ क्रीड्यमानोऽहिराट् महासर्प इव ॥ १३ ॥ मन्युना प्रच
लितानि इंद्रियाणि यस्य ॥ १४ ॥ अंतकं मृत्युं ॥ १५ ॥ सौम्य विदुर गदामस्यामामेवाहनत्

हर्षस्तोसिरत्याहः ॥ १९ ॥ सूयोः स्पर्धमानयोः तिग्माभ्यां गदाभ्यामाहतास्मेतानियथोः तेनतास्तवती
ति ॥ ततास्तंवयतुस्थिरंतसत्राणमवत्राणंतेनविहहो मन्युर्ययोः ॥ विविवात्मार्गान ॥ गदाइद
ममणाप्रभेदान ॥ रल्लागोमे ॥ नस्थानिमित्तभ्रतायांशुष्मिणोर्मतयोर्हयभयोः यस्तुतेपिरलाह
स्वीतदर्थे ॥ हयभोहित्वलवहूनिदिनानिसंग्रयितानगस्तंगसंख्यविदीर्णगलहुधिरोपरस्परो
पमर्दव्यग्रोग्रसंरंभोचमत्का वितजेगयूथपोस्तुप्पमानोतिष्ठतइतिप्रसिद्ध ॥ १९ ॥ यत्तापवावय

एवंगदाभ्यांगुर्वीभ्यां हर्यक्षोहरिरेवच ॥ जिगीषयासुसंरब्धावन्योन्यमभिजघ्नतुः ॥ १८ ॥ त
योः स्पृधोस्तिग्मगदाहताङ्गयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः ॥ विचित्रमार्गांश्चरतोर्जि
गीषयाव्यभादिलायामिवशुष्मिणोर्मृधः ॥ १९ ॥ दैत्यस्ययज्ञावयवस्यमाययागृहीतवारा
हतनोर्महात्मनः ॥ कौरव्यमह्यांद्विषतोर्विमर्दनंदिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥ २० ॥ आस
न्नशौण्डीरमपेतसाध्वसंकृतप्रतीकारमहार्यविक्रमं ॥ विलक्ष्यदैत्यंभगवान्सहस्रणीर्जगा
दनारायणमादिसूकरम् ॥ २१ ॥ ब्रह्मोवाच ॥ एषतेदेवदेवानामंघ्रिमूलमुपेयुषां ॥ विप्रा
णांसौरभेयीणांभूतानामप्यनागसां ॥ २२ ॥ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोसुरः ॥ अन्वे

मात्मनो विकाशिनाद्यभावेन भेदमाह ॥ यद्यस्मात् ॥ आत्मा एषाम ध्यात्मादीनामाद्यः कारणमत एव

हेतुरूपमार्कं वपुः स्वरंध्रे सिद्ध्यति यः स्वतः खे ॥ आत्मा य देषामपरो यश्चाद्यः स्वयानुभूत्या
खिलसिद्धिसिद्धः ॥ एवं त्वगादि श्रवणादि चक्षुर्जिह्वादिनासादि च चित्तयुक्तम् ॥ १० ॥

वाक्‌रूपेऽभिन्नश्च तस्मादेतेभ्योऽपि परो भिन्नः स्वप्रकाशत्वादपीत्याह ॥ स्वयानुभूत्या स्वतः सिद्धप्रकाशेन
अखिलानां सिद्धानां परस्परं प्रकाशकानामपि प्रकाशकः ॥ सर्वेषामपि सामान्यतश्चित्प्रकाशविष
यत्वात् ॥ अत एव तस्य स्वप्रकाशकत्वे सिद्धं ॥ चक्षुषि दर्शितं त्रैविध्यमिंद्रियान्तरेष्वतिदिशति ॥
एवमिति ॥ यथा चक्षुः एवं त्वगाद्यपीत्यर्थः ॥ त्वक् स्पर्शो वायुरिति श्रवणं शब्दो दिश इति ॥ जिह्वा
रसो वरुण इति ॥ नासा गंधोऽश्विनाविति ॥ चित्तं तच्चिन्तनं मनः करणं रमिति ॥ तत्र चित्तं चेतयितव्यं
वासुदेव इति मनः मंतव्यम ॥ चंद्र इति ॥ बुद्धिर्बोद्धव्यं ब्रह्मेति ॥ अहंकारोऽहंकर्तव्यं रुद्र इत्येवं त्रैविध्यमि

॥ १० ॥

श्री

५२

आत्मना जगज्जडस्वभावेन विलक्षणौ अन्योन्यापाश्रयात् ॥ परस्परपरिहारेणाप्रतीतेरित्यर्थः ॥ तदेव
व्यनक्ति ॥ प्रकृतौ तत्कार्ये देहे प्रकृतिश्चात्मनि ॥ तेन विना तस्या अप्रतीतेर्देहात्मनोर्भेदो लक्ष्यत इत्यर्थः
॥२५॥ हृदि वर्तमानं संशयम् ॥ नयेन युक्तानैपुण्यं प्रवीणपेशलैः ॥२६॥ अर्हसीत्युक्तं ॥ तत्र हेतुमाह
त्वत्त इति ॥ हि यस्मात् ॥ त्वत्प्रसादादेव ॥ अत्र ज्ञाने प्रमोषः भ्रंशश्च ते शक्तितः मायातः ननु स्वप्रकाश
स्यात्मनः ॥ कथं ज्ञानप्रमोषः ज्ञानदाने तत्प्रमोषे वा ॥ मम किं प्रयोजनं तत्राह ॥ त्वमेवेति ॥२७॥ विकारा

उद्धव उवाच ॥ प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ ॥ अन्योन्यापाश्रयात्कृष्ण दृश्यते न
भिदा तयोः ॥२५॥ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि ॥ एवं मे पुण्डरीकाक्ष महान्तं सं
शयं हृदि ॥ छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः ॥२६॥ त्वत्तो ज्ञानं हि जीवानां प्रमोषस्ते
ऽत्र शक्तितः ॥ त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः ॥२७॥ श्रीभगवानुवाच ॥ प्रकृतिः पुरुष
श्चेति विकल्पः पुरुषर्षभ ॥ एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥२८॥ ममाङ्ग माया गु
णमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैव

विकाराभ्यां नानात्वैकत्वाभ्यां सापेक्षनिरपेक्षाभ्यां प्रकाशाभ्यां वा तस्य न भेदं व्यक्तुमाह ॥ प्रकृतिः
पुरुषश्चेति ॥ विकल्पात्स्वन भेदः एवं च न उपेक्षाया प्रकृतिशब्दोक्तदेहादिसंघातस्य विकारि
त्वमावहति ॥ एष इति द्वाभ्यां ॥ एष सर्गः सृज्यत इति सर्गो देहादिसंघातः ॥ वैकारिकः वि
कारवान् ॥ अत्र हेतुः ॥ गुणव्यतिकरात्मकः गुणक्षोभकृतः ॥२८॥ नानात्वमेवाह ॥ ममेति विक

एवं समतमुपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितो व्युत्पन्नो विशेषतः पुनाम्यर्थं दर्शयति ॥ स
मेवेति ॥ ज्ञानं ज्ञानानीति इष्टजीवः ॥ उभयोर्द्वयोः पक्षयोः यथार्थः आत्मा चेति मम ॥ तत्र पक्षान्तरादी
नाकारणात्वेन तत्वादिष्वंतर्भावः ॥ इतरेषां मते तर्भावार्थमाह ॥ तत तस्ते भ्यः ॥ सप्तभ्यो देहेंद्रियासवः ॥
कार्याणि जायंते ॥ १९ ॥ षडिति मतेपि भौतिकस्य भूतांतर्भावं जीवस्य च परमात्मांतर्भावमाह ॥ तेषु
कृ इति ॥ २० ॥ अत्र वृद्धी मात्मनो ज्ञानात्पात्मनो स्तु ॥ चत्वारि तत्वानि ग्रंतर्भावार्थमाह ॥ तेरि

समेवं यथा तत्त्वानि त्रयार्थाः पंचखादयः ॥ ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः ॥ १९ ॥ ष
डित्यत्रापि भूतानि पंच षष्ठः परः पुमान् ॥ तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ॥ २० ॥
चत्वार्येवेति तत्रापि तेज आपोन्नमात्मनः ॥ जातानि तैरिदं जातं जन्मावयविनः खलु ॥ २१ ॥
संख्याने सप्तदशके भूतमात्रेंद्रियाणि च ॥ पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः ॥ २२ ॥
तद्वत्षोडशसंख्याने आत्मैव मन उच्यते ॥ भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश ॥ २३ ॥

स्वयविनः कार्यस्य ॥ २१ ॥ भूतानि च मात्राणि च इंद्रियाणि च पंच पंच ॥ एकेन मनसा सह आ
त्मा सप्तदशः ॥ २२ ॥ आत्मैव संकल्पयन्मन उच्यते ॥ त्रयोदशपक्षे भूतानि तन्मात्रै रेकीकृता
नि पंचैवेंद्रियाणि च तत्र त्वकाषाकानि पंचैव ॥ मनस्त्वे [illegible] णींद्रियाधिष्ठातृ ॥ आत्मा च द्विविधः
एवं त्रयोदशैकादशपक्षे ॥ जीवमनसोरात्मान्तर्भावेन ताश्चैवैकादशा नवपक्षेष्वप्रकृतयः ३

एकादशादर्शयति ॥ श्रोत्रमिति ॥ दर्शनं चक्षुः ज्ञानशक्तयः ज्ञानेंद्रियाणि ॥ पंचवागादिपायूपस्था
निहस्ते केनेतानि चत्वारि श्रोत्रश्रुति ॥ कर्माणि कर्मेंद्रियाणि पंच ॥ उभयं उभयात्मकं मनः श्रग
हेउह्वे ॥ एवमेतान्येकादश ॥ १५ ॥ पंच दर्शयति शब्द इति ॥ शब्दादीनि विषयतया परिणतानि
पंचमहाभूतानि ॥ गंधादिभिस्तद्धर्मैः संपन्नत्वे पि स्यात्मादगतीति ॥ गतिमुत्सर्गशिल्पं ॥ उत्सर्ग
प्रशिल्पवनानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि तत्त्वान्तराणीत्यर्थः ॥ १८ ॥ तदेवं म
श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपायूंघ्रिः कर्माण्युभयं म
नः ॥ १९ ॥ शब्दः स्पर्शो रसो गंधो रूपं पंचेमेऽर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसि
द्धयः ॥ २० ॥ सर्गादौ प्रकृतिर्यस्य कार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त
ईक्षते ॥ २१ ॥ अजादयो विकुर्वाणा धातवः पुरुषेक्षया लब्धवीर्याः सृजन्त्यंडं संहताः प्र
कृतेर्बलात् ॥ २२ ॥ तत्र येन तत्त्वसंख्याभेदं निरूप्य ॥ यादिवर्णानां नीति यत्तत्स्य ॥ तत्र
तत्त्वस्वामर्थं दर्शयति ॥ सर्गादाविति ॥ कार्याणि षोडशविकाराः कारणानि महदादीनि सप्त ॥ तद्रूपि
णी सती प्रकृतिः ॥ अस्य विश्वस्य सर्गादौ गुणैः सत्त्वाद्यवस्थां धत्ते ॥ उपादानकारणरूपत्वात् पु
रुषस्त्वव्यक्तः अपरिणामी निमित्तभूतः केवलमीक्षते अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न
इति ॥ २३ ॥ तत्त्वैरारब्धस्य कार्यस्य तदंतर्भावमभिप्रेत्याह ॥ अजादय इति ॥ अजादयो महदाद

श्री भा. ए. टी. ११

कथं तर्हि पंचविंशतिपक्षः ॥ तत्राह ॥ पुरुषेति ॥ वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वात् अतस्तयोरन्यतमस्य तत्कल्पना अपार्था व्यर्था ॥ एवं पंचविंशतिपक्षप्रवृत्तिरित्यर्थः ॥ नन्वेवमपी श्वरस्याद्यज्ञानस्य पृथक्त्वात् षड्विंशद्वयमपि न घटते ॥ अत आह ॥ ज्ञानं चेति ॥ सत्त्वगुणो हि ज्ञानस्य हेतुर्भूतमित्यर्थः ॥ ११ ॥ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यादित्याह ॥ प्रकृतिरिति ॥ गुणसाम्यं हि प्रकृतिः ॥ अतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य ॥ अकर्तृत्वात्तस्य स्थित्यादिहे

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ॥ तदन्यकल्पनापार्था ज्ञानं च प्रकृतेर्गुणः ॥ ११ ॥ प्रकृ-
तिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः ॥ सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ॥ १२ ॥ सत्त्वं
ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ॥ गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥ १३ ॥ पु-
रुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ १४

भूतगुणाश्रयत्वादुपपन्नेः ॥ १२ ॥ अतः सत्त्वं सत्त्वमयं ज्ञानं ॥ प्रकृतेर्गुण इति पूर्वेणैव संबंधः ॥ ननु तर्हि तत्त्वं कर्मैव ज्ञानं च तत्त्वांतरं स्यात् ॥ तत्र रजः कर्म तमोऽज्ञानमिति ॥ अज्ञानं च तमसः ॥ अतः कर्म ज्ञानयो रजस्तमोद्वारा प्रकृतावेवान्तर्भाव ॥ इति भावः ॥ तथापि कालस्वभावयोस्तत्त्वान्तरत्वं स्यात् न गुणानां व्यतिकरो यस्मात् ॥ स ईश्वर एव कालो नाम स्वभावो नाम सूत्रं महत्तत्त्वं तस्य सर्वधर्मिमत्वात् ॥ प्रकृतेर्भेदविवक्षितः ॥ अतो गुणास्त्रीणि तत्त्वानि ॥ १३ ॥ अपराणि पंचविंशतितत्त्वानि पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति ॥ पुरुष इति सार्धद्वाभ्यां ॥ व्यक्तं महत्तत्त्वं नभआदी

संतिसर्वं चेतिषड्वक्तं तत्प्रपंचयति ॥ परस्परेतिद्वाभ्यां ॥ अन्योन्यस्मिन्ननुप्रवेशाद्वक्तुर्यथाविवक्षितं ॥ त
था पूर्वं कारणमपरं कार्यं कार्यकारणभावेन प्रसंख्यानं भवति ॥ यद्वा पूर्वाः ल्पसंख्या अपरा अधिक
संख्या ॥ तयोर्भावः पौर्वापर्यं तेन प्रसंख्यानं गणनमिति ॥ ७ ॥ अनुप्रवेशं दर्शयति ॥ एकस्मिन्नपीति
पूर्वस्मिन्कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविशन्ति मृदि घटवत् ॥ अपरस्मिन्कार्यतत्त्वे कार
णतत्त्वान्यनुगतत्वेन प्रविष्टानि घटे मृद्वत् ॥ ८ ॥ अविरोधमुपसंहरति ॥ अतोमीषां तत्त्वानां पौर्वापर्यं का

परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ ॥ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ॥ ७ ॥ एकस्मि
न्नपि दृश्यन्ते प्रविष्टानीतराणि च ॥ पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ॥ ८ ॥ पौर्वापर्य
मतोमीषां प्रसंख्यानमभीप्सतां ॥ यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात् ॥ ९ ॥ अना
द्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् ॥ स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥ १० ॥

स्मा

रणकार्यत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये यथा यथा विवक्षया ॥ यद्वक्त्रं ॥ यस्य मुखं
प्रवर्तते ॥ तत्सर्वं विविक्तं निश्चितं वयं गृह्णीमः ॥ उक्तत्वेन सर्वत्र युक्तेः संभवात् ॥ ९ ॥ ननु कार्यका
रणतत्त्वानां पृथक्त्वापृथक्त्वविवक्षया भवतु नाम संख्याभेदः ॥ जीवेश्वरयोस्तु कथं भेदाभेदविव
क्षया षड्विंशतिपंचविंशतीति पक्षौ प्रवृत्तौ तत्राह ॥ अनादीति ॥ स्वतो न संभवति ॥ अन्यस्तु संभवा
त्स्वतः सर्वज्ञः सर्वज्ञः परमेश्वरो ज्ञानदो भवितव्य इति षड्विंशतिपक्षाभिप्राय इत्य
र्थः ॥ १० ॥

विविधाभिर्वैदिकलौकिकादिभाषाभिर्विततां यथोनवं चत्वारिचत्वार्यक्षराणि अधिकानि येषां तैः छंदोभिरुपलक्षितां एवमनंतपारां सृजति ॥ स्वयमेवाक्षिपते ॥ उपसंहरति ॥४०॥ तेषु कतिचिच्छंदांसि दर्शयति ॥ गायत्रीति ॥ तत्र चतुर्विंशत्यक्षरा गायत्री ॥ ततश्चतुरुत्तरवृद्ध्या उष्णिगादिछंदांसि अत्यष्टिः ॥ अतिजगती ॥ अतिविराड्वेत्यर्थः ॥ एतैश्छंदोभिरुपलक्षितामिति पूर्वेणैवान्वयः ॥४१॥ अतो हृदयमपि सा कल्पेन स्वरूपेता दुर्ज्ञेयत्वमाह ॥ किमिति ॥ कर्मकांडे विधिवाक्यैः किं विधत्ते ॥ दे

विविधभाषाविततां छंदोभिश्चतुरुत्तरैः ॥ अनंतपारां बृहतीं सृजत्याक्षिपते स्वयं ॥४०॥
गायत्र्युष्णिगनुष्टुप्च बृहती पंक्तिरेव च ॥ त्रिष्टुब्जगत्यतिजगती ह्यतिविराट् ॥४१॥ किं विध
त्ते किमाचष्टे किमनूद्य विकल्पयेत् ॥ इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥
४२॥ मां विधत्तेभिधत्ते मां विकल्प्यापोह्यते ह्यहं ॥४३॥

वृत्ताकांडे मंत्रवाक्यैः ॥ किमाचष्टे प्रकाशयति ॥ ज्ञानकांडे किमनूद्य विकल्पयेत् ॥ निषेधार्थमिति एवंस्या हृदयं तात्पर्यं मत्तः ॥ मत्तोन्यः कश्चिदपि न वेद ॥ ननु तर्हि त्वमेव कृपया कथयेत्यतो मामिति कथयति मामेव ॥ यज्ञरूपं विधत्ते मामेव ॥ तत्तद्देवतारूपमभिधत्ते ॥ न मत्तः पृथक् ॥ यच्चाकाशादिप्रपंचजातं ॥ तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिना विकल्प्यापोह्यते न तत्परमेव ॥ न मत्तः पृथगस्ति ॥ ऊं न रन्यपेरा

तत्र मनीषिभिरेव तत्सेयं सूक्ष्मत्वं दर्शयति ॥ मयेति ॥ मया नर्यामिणोपवृंहितमथिष्ठितं सत्स्थानेष्वप
रिच्छेदमाह भ्रमन्नेति ॥ अपरिच्छिन्नत्वे पर्यविकारित्वमाह ॥ अक्षेति ॥ अविकृत तस्यापि नियंतृत्वं घटयति अ
नेन शाक्तिनेति भ्रमेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्येन मनीषिभिः ॥ अतः सूक्ष्मत्वेन दर्शि
तेऽह दृष्टांतः विसर्गः नंतु रिवेति ॥ २२ ॥ ततो वैखर्या व्याप्त्या ह स्पावाच उमति प्रकारं सदृष्टांत
माह ॥ यथेति त्रिभिः हृदयात्मकान्मुखद्वारात् ॥ उम तेबहिः प्रकटयति ॥ दार्ष्टांतिके दर्शयति ॥ आ
काशादीन् ॥ प्राणः तेजुपाधि द्विरण्यगर्भरूपः ॥ प्रभुर्भगवान् ॥ तेन रूपेण ॥ २३ ॥ छंदोमयो वेदमूर्तिः

मयोपवृंहितं भ्रमत्वात् ब्रह्मणानेन शाक्तिना ॥ भ्रमेषु घोषरूपेण विसर्गरूपेण वंद्यते [illegible] ॥ यथो
र्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ॥ आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ॥ २४ ॥ छं
दोमयोऽमृतमयः सहस्रपदवीं विभुः ॥ ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम् ॥ २५ ॥

स तत्र मतयः घोषवान् ॥ नादोपादानवान् ॥ मनसा निमित्त ॥ भूतेन ॥ निमित्ततामेव दर्शयति ॥ स्प
र्शादीन्वर्णान्रूपयति ॥ संकल्पयतीति स्पर्शरूपि तेन स्पर्शग्रहणमुपलक्षणं ॥ हृदयाकाशाद्
हृतीति ॥ तृतीयश्लोकार्थं व्याख्यानाय विशेषणानि ॥ सहस्रपदवीं ॥ बहुमार्गान्देवाह ॥ ॐकारात्
उरः कंठादिसंगेन व्यंजितैः स्पर्शादिभिर्भूषितां ॥ ॐकारस्थानः सूक्ष्माभिव्यंजनः तत्वकारादिवर्ण
रूपः तस्य व्यंजकोदित्वात् ॥ तत्र स्पर्शाः कादिपंचवर्गाः स्वराः अकारादयः षोडश ॥ ऊष्माणः श
षसहा अंतस्था यरलवाः ॥ २५ ॥ रामानुजायनमः २९ ॥ ---- ॥

भा॰ व॰ टी॰ ८८

त्वद्रमसं चरतीति तिनयाने लुब्धक॥ सुमनसां पुष्पाणां शरणे आश्रये वाटिकायां मिथित्वा॥ मिथः प
रस्परं स्त्रिया सह मिलित्वा॥ तत्रैव रक्तं मासक्तं षडङ्घ्रयो भ्रमरा स्तेषां गणाः तेषां सामसु गानेषु लुब्धेक
र्णौ यस्य तं॥ परेषाम सुभिः तैः स्वीयान् तृप्यंतीति असुतृपः तान् विगणय्य अगणयित्वा लुब्धकस्य
बाणेन भिन्नं मृगं मार्गयात्वेषय॥ श्लोकस्य तत्रेयोजयन्॥ व्याचष्टे सुमनः इति॥ ५४॥ सुमनोभिः समा
नो धर्मैः पतिरत्नामविरसनंचासां स्त्रीणां॥ मिथित्वेत्यस्य व्याख्या॥ मिथुनीभूय स्त्रीभिः सहेति शेषः॥
रक्तमित्यस्य व्याख्या तास्वभिनिवेशितमनो येन॥ असुतृप इत्यस्य व्याख्या आयुर्हरतीति यानिति

क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णं॥ अग्रे वृकानसुतृपो वि
गणय्य यान्तं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नं॥ ५४॥ सुमनःसमधर्मणां स्त्रीणां शरण आ
श्रमे॥ पुष्पमधुगंधवत् क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जिह्वोपस्थादि विचिन्व
न्तं मिथुनीभूय तदभिनिवेशितमनसं॥ षडङ्घ्रिगणसामगीतवदतिमनोहरवनितादि
जनालापेष्वतितरामतिलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रान् तान् काल
विशेषानविगणय्य गृहेषु विहरन्तं पृष्ठतः परोक्षमनुप्रवृत्तो लुब्धकः कृतान्तोऽन्तःशरेण य
मिह पराविध्यति॥ तमिममात्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसीति॥ ५५॥ स त्वं विचक्ष्वा
मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते॥ जह्यङ्गनाश्रममसत्तमयूथगा

मसस्याख्या विहरन्तं सितिश्रेतः नलिकापांगहेन शरे ((थं प्रीणीहि हंसशरणं विरम क्रमेण॥ ५६॥
णपराविध्यति हेरादेवनाद्युपान्ति॥ उपदेशमाह स त्वमिति॥ ५७॥ विचक्ष्व विचार्य अन्तर्हृदि चित्तं कर्णयो
र्धुनीं नदीमिव बहिर्वृत्तिं चित्ते नियच्छ एतद्व्रयं वै द्वियोपलक्षणार्थं गृहाश्रमं च नहि कीदृशमसत्त
मानामतिकामुकानां गाथा यस्मिन् तं तेषां गाथा वार्ता यस्मिन्॥ जीवानां शरणं सर्वं एवं क्रमे
ण सर्वतो विरम॥ ५८॥ ग्रन्थान्तरस्य हृदयं क्रमशोऽनुवदतिस्म तमिति॥ ५९॥

८७

अर्थकाशिषु परमार्थवत्प्रकाशमानेषु परमार्थबुद्धिं मा कृथाः । रोचनामात्रेण केवलं श्रोत्रप्रियेषु ॥ वस्तुतस्त्वस्पृष्टवस्तुषु ॥ ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति ॥ कथमस्पृष्टवस्तुत्वमत आह ॥ ४९ ॥ ये धूम्रधियो मलिनबुद्धयः सकर्मकं कर्ममात्रं वेदमाहुस्ते स्वं न विदुरित्याह ॥ आस्तीर्येति ॥ हे बृहद्बधाद्बहुपशुवधात् ॥ महायज्ञादहमस्मि कर्मकारीति ॥ अतः स्तब्धः अविनीतः सन् ॥ कर्म नावैषि परं विद्यां स्वरूपं तच्च न वेत्सि ॥ ५० ॥ नारदः स्वयं तत्स्वरूपमुपदेशेन निरूपयति ॥ हरितोषयतीति हरितोषं यत् ॥ तदेव कर्म यया तन्मति

२२ पदं ॥ विदमार्गमाहुः ॥ ते अतद्विदः ॥ अवेदज्ञाः यत्तलेशमवरूपमभृतं लोकमात्मतत्त्वं वेदनात्मयं गोचरं न विदुः यत्र देवोऽस्ति ॥ ४९ ॥ तत्र २२

तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ॥ मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४८ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४९ ॥ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलम् ॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम् ॥ ५० ॥ तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥ ५१ ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ स वै प्रियतमश्चात्मा यतो न भयमण्वपि ॥ इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ॥ ५२ ॥ नारद उवाच ॥ प्रश्न एवं हि संछिन्नो भवतः पुरुषर्षभ ॥ अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ॥ ५३ ॥

र्यस्मिन्मतिर्भवति सैव विद्या महाफलत्वात् ॥ ५१ ॥ तत्स्वरूपे ज्ञाप्ये हरेः परमफलत्वं दर्शयन्नाह द्वाभ्यां हरिर्देहभृतामात्मा ईश्वरश्च न च हेतुः स्वयं स्वातंत्र्येण प्रकृतिः कारणं ॥ अतस्तस्यैव पादमूलमेव शरणमाश्रयो यस्मात् ॥ न च तद्भजने श्रमः न च दुःखं भयं वेत्याह ॥ यो वेद स एव विद्वान् स गुरुरेव हरिश्च ॥ ५२ ॥ उक्तमुपसंहरति ॥ एवं भवतः प्रश्नः संछिन्नः परिहृतः ॥ तदेव सामान्यतो बंधमोक्षप्रकारं कथारूपेण कथयति ॥ अपि नातीतं निर्वंशस्य चित्ते श्रवणं मनः प्रतीक्षमाणं संतं तत्क्षणमेव महाभयकंपितं सकलगात्रं महाद्विवी

भा
चटी
८८

प्रविष्टश्च॥ एवं बुद्धिमूलत्वात् संततमाह॥ सावधानैः कर्णैर्ये॥ ताः सरितः पिबंति सेवंते॥ अशनादेर्नत्व भजते॥ अज्ञानादयस्तान्न स्पृशंतीति भक्तिरसिकान्न बाधंते इत्यर्थः॥ ४०॥ सत्संगमंतरेण एवं स्वयमेव हरिकथा विना नादावालस्यादिना रसावेशाभावात्तत्पिपासाद्यभिमतस्य भक्तिर्न संभवतीत्या हैतैरिति॥ ४१॥ भगवदनुग्रहमंतरेण न कस्यापि ज्ञानसंभव इति कैमुत्यन्यायेनाह चतुर्भिः प्र जापतिपतिर्ब्रह्मा॥ ४२॥ मदंता अहं नारदोंते येषां ते वाचां पतयोपि तपोविद्यासमाधिभि रुपायैः॥ पश्यंतोपि विविच्य तेनापि पश्यंतं सर्वसाक्षिणं न पश्यंति॥ कुत इत्यत आह॥ ४५॥ श

तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः स्रवंति ताये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः॥ ४०॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः॥ न करोति हरेर्नूनं कथामृतनिधौ रतिम्॥ ४१॥ प्रजापतिपतिः साक्षाद्भगवान्गिरिशो मनुः॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः॥ ४२॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः॥ भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः॥ ४३॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः॥ पश्यंतोपि न पश्यंति पश्यंतं परमेश्वरम्॥ ४४॥ शब्दब्रह्मण्यदुष्पारे चरंत उरुविस्तरे॥ मंत्रलिंगैर्व्यवच्छिन्नं भजंतो न विदुः परम्॥ ४५॥ यदा यमनुगृह्णाति भगवानात्मभावितः॥ स जहाति मतिं लोके वेदे च परिनिष्ठिताम्॥ ४६॥

ब्दब्रह्मणि वेदे दुरुविस्तारे यस्यार्थतो विपारस्य मेतस्मिन्वर्तमानः मंत्राणां लिंगैर्वज्रहस्तत्वादिरूपैरुक्तविविधदेवताभिधानसामर्थ्यैः परिच्छिन्नमिंद्रादिरूपं तत्तत्कर्माग्रहेण मन्यंते॥ परमेश्वरं न विदुः॥ न संत्यतमः को नाम कर्माग्रहं हित्वा परमेश्वरमेव भजेदित्यत आह॥ यदेति॥ ४६॥ यदा यमनुगृह्णाति॥ इत्यनुग्रहे हेतुः आत्मनि भावितः सन्॥ स तदा लोके लोकव्यवहारे वेदे च कर्ममार्गे परिनिष्ठितां मतिं त्यजति॥ ४६॥ ॥

परितः

८०

दुःखस्य मूलभूतानि कर्माणि प्रतिक्रियाभिर्नैव निवर्तन्त इत्याह ॥ ३१ ॥ नैकांततः प्रत्यंतं सवासनं केवलं ज्ञानं यदि तेऽप्यविद्योपसृते स्वप्नं ॥ अतो विरोधान्न निवर्त्यनिवर्तकत्वमिति भावः ॥ स्वप्नदृष्टान्तः स्वप्ने दृष्टः स्वप्नः प्रबोधं विना यथा न नश्यति तेन प्रतिकर्मणोऽनर्थः ननु तथाऽज्ञानं विलसितेन न संसृतिहेतोर्देहादेरभावे सत्वात्किं तन्निवर्तते न यथा स्वेन तन्मात्राहार्थ इति ॥ ३२ ॥ लिंगरूपेणोपाधिभूतेन तदेव संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह ॥ अथ तस्मादात्मरूपार्थभूतस्य सेवात्मकं यतोऽतात्मनस्ततोऽनर्थपरंपरा संसृतिर्भवति ॥ तस्याः व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव ॥ ३३ ॥ ननु संसृ-

यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ॥ तं स्कंधेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥ ३४ ॥
नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् ॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥ ३५ ॥ अ-
र्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ मनसा लिंगरूपेण स्वप्ने विचरतो यथा ॥ ३६ ॥ अ-
थात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥ ३७ ॥ वासु-
देवे भगवति भक्तियोगः समाहितः ॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥ ३८ ॥ सोऽचि-
रादेव राजर्षे स्यादच्युतकथाश्रयः ॥ शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥ ३९ ॥ यत्र
भागवता राजन्साधवो विशदाशयाः ॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥ ४० ॥

तिं निहन्ति वैराग्यपूर्वकाज्ज्ञानादेव न तु भक्त्या तरति शोकमात्मविदिति श्रुतेस्तत्राह ॥ सध्रीचीनेन समीचीनेन प्रकारेण नन्वसौ महाफलो भक्तियोगः कथं स्यादित्यत आह ॥ ३८ ॥ स त्वच्युतस्य कथामाश्रित्य वर्तमानो विरक्तः स्यादित्यत आह ॥ स एवंतो हेयानस ॥ कृत्स्नात्तदाहयचेति ॥ ३९ ॥ भगवतो गुणानुकथने श्रवणे च व्यग्रं सत्वरं चेतो येषां ते ॥ ननु साधुसंगं विना स्वयमेव हरिकथायां कृतरत्यादिना भक्तिर्भवेदेवेत्याशंक्याह द्वाभ्यां तस्मिन्निति ॥ ४० ॥ तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिता मधुभिच्चरित्रमेव पीयूषं तद्देवशिष्यन्तरतिशेषो यास्ता असारांशाः हित्वपुद्दा

तदेवं प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्वमेवोपसंहरति ॥ वेदा इति ॥ कर्मब्रह्मदेवताकांडविषया इमे वेदा ब्रह्मात्मविषयाः ॥ ब्रह्मैवात्मा न संसारी तेन तद्विषयाः ॥ नतस्वेत्वात्स्वर्गादौ च फलश्रुतिरियं नृणां न श्रेयोरोचनं परं श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनमित्युक्तमेव कारणमनुस्मारयति ॥ परोक्षेति ऋषयो मंत्राः तद्द्रष्टारो वा न तु किमिति ॥ यतः परोक्षमेव मम च प्रियं ॥ अयं भावः ॥ शुद्धांतःकरणैरेव तद्बोद्धव्यं नान्यैरनधिकारिभिः ॥ वृथा कर्मत्यागेन भ्रंशप्रसंगादिति ॥ ३५ ॥ ननु वेदज्ञा अपि ॥ जैमिन्यादयः किमिति तथा न वर्णयंति ॥ मां न जानंतो वेदार्थं वा न कोपि वेदेत्याशयेनाह ॥ शब्दब्रह्मेति ॥ यावः

वेदा ब्रह्मात्मविषयास्त्रिकांडविषया इमे ॥ परोक्षवादा ऋषयः परोक्षं मम च प्रियम् ॥ ३५ ॥ शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयम् ॥ अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ॥ ३६ ॥

त्समाप्तिः ॥ स्वरूपतोऽर्थतश्च दुर्विज्ञेयमित्याह ॥ प्राणेंद्रियमनोमयम् ॥ प्राणमयं परारूपं ततो मनोमयं पश्यंत्याख्यं ततश्चेंद्रियमयं मध्यमाख्यं ॥ तस्य वाग्व्यंजकत्वेन वागिंद्रियप्रधानत्वात् ॥ किंचानंतपारं समष्टिप्राणादिमयस्य च तस्य कालतो देशतश्चापरिच्छेदात् ॥ अर्थतोपि दुर्विज्ञेयमित्याह ॥ गंभीरमिति गूढार्थं ॥ अतो दुर्विगाह्यमनिप्रवेश्यमानरू ॥ तथा च श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहितानि नेंगयंति ॥ तुरीयं वाचो मनुष्या वदंति ॥ अयमर्थः वाचः शब्दब्रह्मणः परिमितानि गणितानि तानि ॥ प्रथने स्वाधाने परत्व मीमति पदानि रूपाणि चत्वारि तानि ॥ चत्वार्यपि मनीषिणो न दृश्यः ॥ ते विदुर्नान्ये ॥ यतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति स्वरूपेण प्रकाशयंति ॥ यतः केवलं वाचस्तुरीयं चतुर्थं भागं वैखरीरूपं मनुष्याः यानि नो वदंति नमपि वदंतीवनन्तु

इति वेदध्वनिंश्रुत्वा न वेदत्वा वदंति हि २

पितृलोकावइति श्रुतेः समाप्यतः ॥ पितृलोके कामनालेव ॥ अंतःकरणशुद्धिः कामनावेति भावः नद्भुतं ॥ नाकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित ॥ यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितम् इति २९ ॥ अतत्वादेवर्हिंसया विहाराः क्रीडा येषां ते ॥ ३० ॥ किंच तेमदद्भुद्द्य इत्याह ॥ स्वमोपमइति ॥ अमुं परलोकं ॥ आशिषश्चास्मिंल्लोके संकल्पा ॥ नद्भुतानिश्चित्य विप्रवाक्फलात ॥ संजातकर्मह्यविनियोजयंति

हिंसाविहाराह्यालब्धैः पशुभिः स्वसुखेच्छया ॥ यजंते देवता यज्ञैः पितृभूतपतीन्खलाः ॥ ३० स्वमोपममसुं लोकमसंतं श्रवणप्रियं ॥ आशिषो हृदि संकल्प्य त्यजंत्यर्थान्यथा वणिक् ॥ ३१ ॥ रजःसत्वतमोनिष्ठा रजःसत्वतमोजुषः ॥ उपासत इन्द्रमुख्यान्देवादीन्न तथैव माम् ॥ ३२ ॥ इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि ॥ तस्यांत इह भूयास्म महाशाला महाकुलाः ॥ ३३ ॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणां ॥ मानिनां चातिस्तब्धानां मद्वार्तापि न रोचते

यथा काश्चित् कुलस्य समुद्रादिलंबनेन वस्तुयतना जैनेच्छया मिद्धं यत्नेन जंतुभयप्रदे भवति ॥ तद्वदिमर्थः ॥ ३४ ॥ अतो रजः ॥ सत्वतमो निष्ठा सेरजः सत्वतमोजुषः ॥ स्वानुरूपानिंद्रादीनां मदेशात्वान्मडुपासनमेव तत्त ॥ यथा वन्नोपासते भेददर्शित्वादित्यर्थः ॥ ३२ ॥ हृदि संकल्प्येत्युक्तं ॥ तामेव संकल्पं दर्शयति ॥ इष्ट्वेति ॥ तस्य भोगस्यांते इह भूयास्म ॥ ३३ ततः किमित्यत आह ॥ एवमिति ॥ अतो नामस्य

ऊतु दितोऽप्रपंचयति ॥ कामिनइत्यष्टभिः ॥ कामिनइत्यष्टभिः ॥ कामित्वात्कृपणाः ततो लुब्धाः तृष्णाकु
लाः ॥ अतः पुष्पेष्ववांतरफलेषु परमफलबुद्धयः ॥ अतएवाग्निमुग्धाः अग्निसाध्यकर्माभिनिवेशेना
लब्धविवेकाः ॥ ततश्च धूमतांताः धूममार्गी ते येषां ते स्वलोकमात्मतत्वं ॥ तथा च श्रुतिः ॥ कश्चिद्वा अ
स्माल्लोकात्प्रेत्य आत्मानं न वेद ॥ अयमहमस्मीति कश्चित्स्वं लोकं न प्रजानाति ॥ अग्निमुग्धो हैव धूमतां
त इति ॥ २७ ॥ कोऽसौ स्वलोकस्तमाह नेति ॥ हृदिस्थमात्मानं मां स्वलोकं न तु हृदिस्थमहंकारा
स्पदं जानंत्येव सत्यं परमात्मानं तु न जानंतीत्याह ॥ य इदं यस्मिन्निदं जगदस्ति कुतो यत इदं जग

कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः ॥ अग्निमुग्धा धूमतांताः स्वलोकं न विदंति
ते ॥ न ते मामंग जानंति हृदिस्थं य इदं यतः ॥ उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः ॥
२८ ॥ ते मे मतमविज्ञाय परोक्षं विषयात्मकाः ॥ हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना ॥ २

ज्जातं तं कुतो न जानंति हि यस्मात् ॥ उक्थं कर्मैव शास्त्रं शंसनीयं येषां पशुहिंसासाधनं वा येषां
ते ॥ अतः केवलमसुतृपः प्राणतर्पणपराः नीहारं तमः तेन व्याप्तानि चक्षूंषि येषां ते यथा स्व
विहितमपि न जानंति ॥ न ह वै ॥ तथा च श्रुतिः ॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव
॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति ॥ २८ ॥ वेदतात्पर्याज्ञानाद्धिंसात्म
नतीत्याह ॥ ते परोक्षमस्फुटं मे मतमविज्ञाय देवादीन्यजंते इत्युत्तरेणान्वयः ॥ स्वमतमेवाह ।
हिंसायां मांसभक्षणार्थेन फले च यदि रागः स्यात्तर्हि यज्ञ एवेत्यभ्यनुज्ञानं द्वारा परिसंख्येयं

श्री॰ भा॰ प॰ टी॰ ८

स्नानेव हिंसायां मांसभक्षणार्थेन फलार्थे यदि रागः स्यात् तर्हि यज्ञ एव सम्पन्न इति द्वारा

ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात्कुतः स्वार्थविभ्रंश इत्यत आह ॥ इयं फलश्रुतिः ॥ न श्रेयः परमपुरु-
षार्थपरा न भवतीत्यर्थः किं तर्हि मुमुक्षूणां नृणां मोक्षविवक्षयाऽवान्तरफलैः कर्मसु रुच्युत्पा-
दनमात्रं ॥ यथा भैषज्ये रोगघ्ने रोचनं रुच्युत्पादनं यथा हि ॥ पिब निंबं प्रदास्यामि खलु ते खंडलड्डुका-
न् ॥ पित्रैवमुक्तः पिबति न फलं तावदेव तत् ॥ २३ ॥ न तु कर्मकांडे मोक्षस्य नामापि न श्रूयते कुत एव-
व्याख्यायते ॥ यथाश्रुतं तस्यावहनादित्याह ॥ उत्पत्त्यैवेति द्वाभ्यां ॥ उत्पत्त्या स्वभावत एव कामेषु पश्वादि-
प्राणेषु आयुरिन्द्रियबलवीर्यादिषु स्वजनेषु पुत्रादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु ॥ २४ ॥ अ

फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् ॥ श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनम् ॥ २३ ॥
उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च ॥ आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु ॥ २४ ॥
नतानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि कथं युंज्यात्पुनस्तेषु तांस्तमो विशतो बुधः ॥ २५
एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः ॥ फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ॥ २६ ॥

तत्तान् स्वार्थं परमसुखम् अविदुषः अतो नतान् नम्रीभूतान् ॥ वेदो यद्बोधयिष्यति ॥ न देवः श्रेयः पर
विधास्यतीत्यर्थः ॥ तानेवं भूतान् वृजिनाध्वनि काम्यवर्त्मनि देवादियोनिषु भ्राम्यतः ततः पुन-
स्तमः वृक्षादियोनिं विशतः पशुकामश्च पुत्रादिकामश्च इति च कथं च पुनस्तेष्वेव कामेषु
स्वयं बुधो वेदो युंज्यात् प्रवर्तयेत् ॥ तथा सत्यनर्थः स्यादिति भावः ॥ २५ ॥ कथं तर्हि कर्ममीमांसकाः
फलपरतां वदंति तत्राह एवमिति ॥ एवं व्यवसितं वेदस्याभिप्रायं कुसुमितां ॥ अवान्तरफलप्ररोच

श्री॰
भा॰ ए॰
टी॰
८५

दोषस्य क्वचिद्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति ॥ समानस्य पतनस्यैव कर्मणः सुरापानादेराचरणं ॥ अ
पतितानां पतनहेतुरपि न आसां कर्मणां च पतितानां पुनः पातकमधिकारभ्रंशकं न भवति ॥ पूर्वमेव पा
तितत्वात् ॥ अतोऽत्र दोषस्यापि दोषत्वं नास्तीत्यर्थः ॥ तथा संगोऽपि योषिते दोषः ॥ अपितु गुणः ॥ स्वतो
भार्यामुपेयादित्यादिविधानात् ॥ उभयत्र दृष्टान्तः ॥ पूर्वमेवाधः शयानो यथा न पतति ॥ १७ ॥ अतो गुण
दोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह ॥ यतो यत इति ॥ यथाक्रमत्र

समानकर्माचरणं पतितानां न पातकं ॥ औत्पत्तिको गुणः संगो न शयानः पतत्यधः ॥ १७ ॥ यतो यतो
निवर्तेत विमुच्येत ततस्ततः ॥ एष धर्मो नृणां क्षेमः शोकमोहभयापहः ॥ १८ ॥ विषयेषु गुणा
ध्यासात्पुंसः संगस्ततो भवेत् ॥ संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां ॥ १९ ॥ कलेर्दुर्विष
हः क्रोधस्तमस्तमनुवर्तते ॥ तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं ॥ २० ॥ तया विरहितः साधो
जन्तुः शून्याय कल्पते ॥ ततोऽस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च ॥ २१ ॥ विषयाभिनिवेशेन
नात्मानं वेद नापरम् ॥ वृक्षजीविकया जीवन्व्यर्थं भस्त्रेव यः श्वसन् ॥ २२ ॥

एवं परतो वेदस्य निरोधकत्वं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति ॥ विषयेष्विति चतुर्भिः ॥ संगः आसक्ति
स्ततस्तेषु विषयेषु येन प्रतिहन्यते कामः ॥ तेन सह कामादेव कलिः कलहो विवादः ॥ १९ ॥ दुर्विषहस्ती
व्रस्तमः ॥ संमोहस्तं क्रोधं चेतना कार्याकार्यस्मृतिः ॥ द्रुतमशीघ्रं ॥ २० ॥ शून्याय कल्पते ॥ असन्नल्पो भव
तीत्यर्थः ॥ स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्छितस्य तत्तुल्यस्य ॥ २१ ॥ न केवलं स्वार्थप्रपंचयति वि

वर १

रू

शौचं शोधकं यावत्तावत्तद्धरणादिनापोहति ॥ तावन्मात्रं खल्वनग्राह्यमिति तावानन्तकर्त्तव्यमिष्य
ते ॥ १३ ॥ एवं तावद्द्रव्यशुद्धिरुक्ता ॥ इदानीं कर्त्तृशुद्धिमाह ॥ स्नानेति ॥ अवस्था कौमारादिः वीर्यं शक्तिः
संस्कार उपनयनादिः कर्म संध्योपासनादि तैस्तादिलक्षणं ॥ आत्मनः साहङ्कारस्य कर्त्तुः ॥ एतैः स्नाना
दिभिर्यथायथं ॥ तत्तत्कार्यानुसारिणी शुद्धिः ॥ इयं च शुद्धिर्न व्यवहारार्था किंतु विहितकर्मार्थेत्याह
शुद्ध इति ॥ द्विज उपलक्षणं शूद्रादेरपि ॥ मंत्रशुद्धिर्न व्यवहारार्था किंतु विहितकर्मार्थेत्याह ॥ शुद्ध

स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः ॥ मत्स्मृत्या चात्मनः शौचं शुद्धः कर्म चरेद्द्विजः ॥ १४ ॥
मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं ॥ धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः ॥ १५ ॥ क्वचिद्गुणो
पि दोषः स्याद्दोषोपि विधिना गुणः ॥ गुणदोषार्थनियमस्तद्भिदामेव बाधते ॥ १६ ॥

माह ॥ १४ ॥ सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः कर्मणः शुद्धिमाह ईश्वरार्पणं कर्मणः शुद्धि
र्मंत्राद्यर्थं शुद्धग्रहीउपसंहरति ॥ देशकालद्रव्यकर्त्तृमंत्रकर्मभिः ॥ षड्भिः शुद्धैः धर्मः संपद्यते ॥ एते
षां यो विपर्ययः सोधर्मस्तद्धेतुरित्यर्थः ॥ १५ ॥ अयं च गुणदोषविभागो न वास्तव इत्याह ॥ क्वचिदिति
आपदि प्रतिग्रहो गुणो अन्नापदि निषिद्धत्वाद्दोषः ॥ परधर्मश्च परस्य गुणोपि सस्य दोषः दोषोपि कु
टुंबत्यागादिर्विरक्तादेर्न दोषः अपि तु विधिबलेन गुणः ॥ एवं योयं गुणदोषयोरेकत्र स्थितिर्वा यो नि
यमः गुणदोषार्थवायोनियमः नियामकशास्त्रं नतन्तयो भेदमेव बाधते ॥ १६ ॥

श्री
मा.पं.
टी.
८५

शक्ताशक्तावस्थयोर्यथागादिग्रस्तकान्तादेः शक्तान्यस्य शुद्धिः अशक्तान्यतिशुद्धिः ॥ वृद्धाशक्तजननादौ दशाहा हृद्धिस्नानेनस्य शुद्धिः अतत्स्नानेनाशुद्धिः ॥ जातेनाशुद्धिः समद्राजीर्णामलवद्वस्त्रादेः स्नानादं यन्मशुद्धिः द्विरिद्धं प्रतिशुद्धिः तत्रापिविशेषमाह यदिति ॥ यतेनचद्रव्यवचनादपो द्रव्यशुद्धिर्हावायात्मनेयदशंकुर्वन्ति ॥ नद्देशा वस्थानुसारतएवद्रव्याणां चकुर्वन्तिन सर्वतः तथादिनि भयवपवदेशेस्नानादिस्वहिसंकुर्वन्ति ॥ ननुसोनायाः स्थले ॥ तथारोगादिव्यानिरिक्तश्वावस्थायामेवकुर्वन्ति ॥ नवाल्सरोगाद्यवस्थायामिति ॥ तथाचस्मृतिः देश
शक्ताशक्तावथवाबुद्ध्यासमस्याञ्चयदात्मने ॥ अशंकुर्वन्तिद्रियथादेशावस्थानुसारतः ॥११॥ यात्म दार्वस्थितेतत्तारसतेजसचर्मणां ॥ कालवाय्वग्निमृत्तोयैः पार्थिवानांशुनागुनैः ॥१२॥ अमेध्य लिप्तयद्येनगोधलेपश्चयोहति ॥ भजतेशक्तिनिस्यनछौचनावदिष्यते ॥ १३ ॥
कालंतथात्मानंद्रव्यंद्रव्यप्रयोजनं ॥ उपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेदिति ॥११॥ इत्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तनवचनादिशुद्धिरेकरूपेवद्रव्यतस्तस्य शुद्धिर्बहुरूपेतिनाप्रपंचयति ॥ थात्मेतिदारुकादीनां यथायथंकालादिभिः शुद्धिः तत्रापिकाकांसजाशुपघातनावनैनदेशकालावस्थाद्यनुसारेणचयत्ने रसेअप्रत्ताशुतैः मिलितैः केवलैश्चकालस्यशुनश्चहणाशुननमदर्शनार्थम् ॥१२॥ अस्पृश्यस्पर्शशुद्धिमु कालेपविषयेप्याह ॥ यस्मीवपात्रवस्त्रादियेनतत्स्त्रणात्ताराश्लोदकादिनामधले ॥
पंचव्ययोहतिमज्जतिस्वगातचमलंस्यकामसक्तोति
सुमेवरूपभजतेनस्यनतत् ॥१ ॥
रामानु ॥१॥

७२
ना१२
६२
८५

देशानांमध्येकृष्णसारहरिणारहितोऽशुचिः॥ तत्रापिब्रह्मण्यः ब्राह्मणभक्तिशून्योयंतमशुचिः॥ कृष्णेनमृ
गेनशून्यः प्रदेशः॥ सोपिब्रह्मसौवीरः कीकटः सवीराः समस्तकर्मशून्योवा॥ सौवीरः कीकटोप्यशुचिः॥ तदु
क्तं॥ सर्वैर्गुणैर्युतोदेशः समस्तश्चेत्स्वलभ्यतइति॥ तद्वर्जितोयः कीकटः॥ अंगवंगकलिंगादिः असंस्कृ
तः॥ संमार्जनादिशून्यः म्लेच्छबहुलोवार्द्धिरिणादुष्टं॥ एकवद्भावः॥ तदशुचिः॥ तद्दमः शुचिरित्यर्थोयु
क्तंभवति॥ ८॥ कालस्यशुद्ध्यशुद्धीदर्शयति॥ कर्मण्यपश्यतिइत्यतः॥ इत्यसंपन्नासनोवासर्वाङ्गादिर्थः कर्म
एयः॥ कर्मादिः॥ सकालः॥ नास्तिनुकर्मणिगुणवान्॥ यतोयस्मिन्॥ इत्यालाभेनवाराष्ट्रविप्लवादिनावा
अशुद्धलक्षणोदेशानामव्रह्मण्येपाशुचिर्भवेत्॥ कृष्णसारोप्यसौवीरः कीकटासंस्कृतोनविशः॥ ९॥ क
र्मणोगुणवान्कालोद्रव्यतः स्वतएववा॥ यतोनिवर्ततेकर्मसदोषोकर्मकः स्मृतः॥ ९॥ इत्यस्य
कर्मनिवर्ततेयः॥ सूतकादेर्दशाहादिना (द्रव्यशुद्धीचइत्येणवचनेनचसंस्कारेणचकालेनमहत्त्वा
त्मनः॥ अकर्मकः॥ कर्मानर्हः॥ स्मृतः॥ सकालोदोषग्रस्तइत्यर्थः॥ ९॥ वस्तुशास्त्रोपन्नानांइत्यादिना
शुद्ध्यशुद्धीदर्शयति॥ इत्यसेतिचतुर्भिः॥ इत्येणतोयादिनाशुचिः सूत्रादिनावाशुचिः वचनेनशुद्धमशु
द्धंवेतिसंदेहो॥ शुद्धमिसेवंरूपेणब्राह्मणवचनेनशुद्धिः विपरीतेनाशुद्धिः संस्कारेणप्रोक्षणादिना
पुष्पादेः शुद्धिः॥ अवघ्राणादिनाशुद्धिः॥ कालेनदशाहादिनानवोदकादेःशुद्धिः॥ कालेमहोदये
ग्रासंसवर्मन्तुमहमेवहि॥ अकालेदशरात्रेस्नानतः शुद्धिर्विधीयते॥ पर्युषितान्नादेरशुद्धिः॥ अमंसं
तानुपहतानांनवाकादुदकानांमहत्स्वालम्बाभ्यांशुच्यशुद्धीः॥ १०॥

आधिदैविकादिभिर्दुःखैः क्लिश्यमानो ममाहमिति देहे शान्तेव धोगिणो नेव वर्तते इति द्वयोरन्वयः ॥ २५ ॥ अशनापिपासादीन्प्राणधर्मान् ॥ अपटुत्वादीनिन्द्रियधर्मान् ॥ कामादीन्मनोधर्मान् ॥ निर्गुणोऽपि आत्मन्यध्यस्य कामलवं ध्यायन्नेव शेते ॥ ध्यायन् ॥ कर्मकृत् ॥ ततः किमित्यत आह ॥ यदेति द्वाभ्यां ॥ २६ ॥ स्वदृक् स्वप्रकाशः स्वभावोऽपि ॥ शुक्लं सात्विकं कृष्णं तामसं लोहितं राजसं ॥ यथाकर्मेत्यभिजायते ॥ २७ ॥ तदेवाह शुक्लादिति द्वाभ्यां ॥ प्रकाशो भूयिष्ठो येषु दुःखमुदर्के उत्तरकाले येषु ।

एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः ॥ क्लिश्यमानः शतंवर्षं देहे देही तमोवृतः ॥ २५ ॥
प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ॥ शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत् ॥
२६ ॥ यदात्मानमविज्ञाय भगवन्तं परं गुरुं ॥ पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥ २७ ॥
गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः ॥ शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते ॥ २८ ॥
शुक्लात्प्रकाशभूयिष्ठाँल्लोकानाप्नोति कर्हिचित् ॥ दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्
क्वचित् ॥ क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं
भवः ॥ ३० ॥ क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहं ॥ चरन्विंदति यद्दिष्टं दण्डमोदनमेव वा ॥ ३१ ॥
तथा कामाशयो जीव उच्चावचपथा भ्रमन् ॥ उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ॥ ३२ ॥
दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु ॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ॥ ३३ ॥

क्रियायामायासो येषु तान् ॥ तमः शोकाभ्यामुत्कटा ये पुनस्तांल्लोकानाप्नोतीति शेषः ॥ नोभयं नपुंसकं ॥ यथाकर्मगुणं कर्मगुणाननतिक्रम्य तेषु देवादिषु भवो जन्म ॥ एवमोतीतिसदृष्टान्तमाह द्वाभ्यां ॥ ३१ ॥ क्षुधा परीतो व्याप्तः सारमेयः श्वा दंडं दंडेन ताडनं ॥ ३२ ॥ कामस्याशयमाशयो यस्य ॥ ननु तर्हि स एव स्वसंभवात् दुःखेषु च प्रतीकारसंभवात् ॥ नैकान्ततो हेयमित्यत आह ॥ दुःखेष्विति ॥ ३३ ॥ दुःखस्य च प्रतीकारस्यावश्चास्तित्वात्तेन तस्य प्रतिक्रिया ॥ तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि

मद्दिवीयघदीद्देनेत्यादेरर्थं संगच्छते॥ यथा यथा बुद्धिः समेविक्रियते॥ आप्रतिविकरोति वा इंद्रि
याणि पविलमयति॥ यस्मात्तेरस्तौ लिमभ्रान्ता तथा नयानस्याहेतीदंशीनसूक्ष्मीनायाः केवलम्
पद्दैवसन्॥ बलात्तु कार्यते॥ २०॥ आश्रुतमित्येतद्याचष्टे वाप्रतिहतोरयोवेगः॥ अनीतो सस्से
वन्सरवधः॥ वल्मनस्वगातिः स्वमघारीशाद्देः तुह्यावेवविहमतेनदेशान्तरगमभावात्॥ पाठेन वे
सवत्सरसूनत्कृतेवयस्तुनाभ्यंगतिर्येसेति॥ हेयमित्यस्याख्यानादेनकृतादिवक्रेमित
यथा यथा विक्रियते गुणाको विकरोति वा॥ न यानयोपद्रष्टान्तान्तहेतीरज्जकार्यते॥ १९
देहोरथस्त्विंद्रियाश्वः संवत्सररयोगतिः॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासवंधुरः॥ २०॥ म
नोरश्मिर्बुद्धिसूतो हृत्नीडो द्वंद्वकूबरः॥ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः॥ २१॥ आ
कूतिर्विक्रमो बाह्योमृगतृष्णां प्रधावति॥ एकादशेंद्रियभूः पंचसूनाविनोदकृत्॥ २२॥
संवत्सरश्चंडवेगः कालोयेनोपलक्षितः॥ तस्याहानीहगंधर्वीगंधर्वाराधयः स्मृताः॥
हरत्यायुः परिक्रांत्याषष्ट्युत्तरशतत्रयं॥ २३॥ कालकन्यानरासाक्षात्लोकस्तानाभिन
दति॥ संसारजन्मरहस्त्रलयायपवनेश्वरः॥ २४॥ आधयोव्याधयस्तस्य सैनिकायव
सव्याख्या द्विकर्मचक्रइतित्रिगुणापंचतेभूताः॥ भूतोपसर्गाश्रुरघः मन्नाशोद्विविधोज्वरः॥ २५
अहंकारमित्येतद्याचष्टे पंचेंद्रियार्थप्रक्षेपइति॥ पंचेंद्रियैः सूनाविनोदमिति त्याघेन विषयसे
वां करोतीति पंचसूनाविनोदकृत् ग्रनेनचवारम्रगयानवेत्यादिव्याख्यात॥ २४॥ परिक्रांत्यापरि
भ्रमणेन॥ २४॥ भगिनीत्वेन जरद्देलोकानांनाशयाय॥ २५॥ वराः सचारिणः भूतानाश्रयसगौणी
रायामाश्रुयीस्रोमस्तुहेनः रथोवेगोसप्रज्वरस्येतिप्रबाहव्याख्यापाठानरेभनकृतानवधःग्रनेन
चादिभिरुपरूहंस्पापपदंव्याख्यातं॥ द्विविधं प्रीतोसहूवेगाभ्रवेषाभेदात्॥ एवंपदोत्तनेनोक्त
मर्थव्याख्याय सर्वकथातात्पर्यमाह एवमित्यादिविरमक्रमेणोत्तेनेन॥ २६॥ ध्यनइति विवेकपद

भा ८८ टीका

श्री·
भा·प·
टी·
८०

एतावत्त्वंभावएतावद्भेदेनानात्वमित्यर्थः ॥ यद्विवक्षयायत्प्रयोजनमभिप्रेत्यचगायंति ॥ आयुष्मन्नितिसंबो-
ध ॥ विवक्षाभेदेनसर्वंयुक्तमेवमाययाचेत्किंनामनयुक्तमित्याह ॥ युक्तमिति ॥ यथाब्राह्मणाभाषंतेतथायुक्तं
च ॥ नवस्तुतः ॥ यस्मात्संतिसर्वत्रांतर्भूतानिसर्वाणितत्त्वानि ॥ किंचमायामिति ॥ असत्त्वमपिमायाश्रयणात्
घटतएवेत्यर्थः ॥ उद्गृह्यस्वीकृत्यनदिसरीविजयापरिमाणादिविवादेकिंचिदघटनमेवभवति ॥ तत्रोद
नैतदिति ॥ ४ ॥ ननुयदिसर्वमपियुक्तंकुतोविवादः ॥ यदिवमायैवालंबनेकुतोदंतप्रतिविवादः ॥ तत्रा

केचित्षड्विंशतिंप्राहुरपरेपंचविंशतिम् ॥ सप्तैकेनवषट्केचिच्चत्वार्येकादशापरे ॥ १ ॥ केचि
त्सप्तदशप्राहुःषोडशैकेत्रयोदश ॥ २ ॥ एतावत्त्वंहिसंख्यानामृषयोयद्विवक्षया ॥ गायंतिपृथ
गायुष्मन्निदंनोवक्तुमर्हसि ॥ ३ ॥ श्रीभगवानुवाच ॥ युक्तंचसंतिसर्वत्रभाषंतेब्राह्मणायथा ॥ मा
यांमदीयामुद्गृह्यवदतांकिंनुदुर्घटं ॥ ४ ॥ नैतदेवंयथात्थत्वंयदहंवच्मितत्तथा ॥ एवंविवद
तांहेतुं शक्तयोमेदुरत्ययाः ॥ ५ ॥ यासांव्यतिकरादासीद्विकल्पोवदतांपदं ॥ प्राप्तेशमदमेप्ये
तिवादस्तमनुशाम्यति ॥ ६ ॥

ननैतदिति ॥ एतत्तुप्रतिचविवदमानानांमदीयादुरतिक्रमाः शक्तयः
सत्त्वाद्याअंतःकरणविशेषरूपेणपरिणताएवहेतुरित्यर्थः ॥ ५ ॥ तासांविवादहेतुत्वमुपपादयति ।
यासामितिव्यतिकरात्क्षोभाद्वदतांपदंविषयः ॥ विकल्पोभेदआसीत् ॥ अंतःकरणवृत्तिविकल्पोवानत
त्त्वतः ॥ एतदेवव्यतिरेकेणाह प्राप्तइति शमदमयोर्हेतुभूतस्मिन्नात्मनिविकल्पोप्येतिलीयते ॥ तंचवि
कल्पमनुवादः ॥ शाम्यतीति ॥ ६ ॥ रामानुजायनमः ६ ॐनमः कृष्णायनमः ६

एतावानेव सर्वेषां वेदानामर्थः ॥ तमाह ॥ शब्दो वेदः ॥ मां परमार्थरूपमाश्रित्य ॥ भिदां मायामात्रमित्यनूद्य
नेह नानास्ति किंचनेति प्रतिषिध्य प्रसीदति ॥ निवृत्तव्यापारो भवति ॥ अयं भावः ॥ यथा स्रक्चंदनयोः रसः ॥ सप्र
वर्तते हि स्वारंभकत्वात् ॥ नानाकांडशाखास्वपि ॥ तथैव प्रणवस्यैवार्थः ॥ परमेश्वरः सप्रवर्तते हि स्वारंभकानां
वेदकांडशाखानामपि संगच्छते तान्यत्र इति ॥ ४२ ॥ नित्यमुक्तः स्वतः सर्ववेदज्ञः सर्ववेदवित् ॥ स्वपरत्ता
नदानां यस्त वंदे श्रीमत्सुरम् ॥ १ ॥ इति श्रीभागवते एकादशे एकविंशः ॥ २१ ॥ द्वाविंशे तत्त्वसंख्यानामवि

एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥ मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ॥ ४२
इति श्रीभागवते महापुराणे एकादशस्कंधे एकविंशः ॥ २१ ॥ उद्धव उ० ॥ कति तत्त्वानि विश्वेश सं
ख्यातान्यृषिभिः प्रभो ॥ नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम ॥ १

रोधः विविच्यते ॥ पुंप्रकृत्योर्विवेकश्च जन्ममृत्युविधादि च ॥ १ ॥ तदेवं वेदानां ब्रह्मणि परत्वं निराकृत्य मो
क्षपरत्वे निर्णीते ॥ सति च मोक्षपरत्वेपि ॥ तद्वादेन च विवादः ॥ तथा हि केचिन्नव संख्या स्मृविवदंते नेतरापि
च बाह्यार्थसदसत्स्वेऽत्रात्मनत्वेष्वेकत्वनानात्वादिषु ॥ तत्र किं सत्यमिति निर्जिज्ञासया पृच्छति ॥ कतीति
ऋषिभिराचार्येषु बहुधा संख्यातानि ते भकतिप्रकाशानीत्यर्थः ॥ भगवन्मतानुवादपूर्वकं बहुधा सं
ख्यानं प्रपंचयति ॥ नवेति त्रिभिः ॥ त्वं तावदष्टाविंशतिं तत्त्वानि ग्राम्यतानि च वयं शुश्रुमश्रुत्वं वनः ॥ १

तदुपपादयति ॥ नैरपेक्ष्यमेव परं ॥ उत्कृष्टमनल्पकं महत् ॥ निःश्रेयसं फलं तत्साधनं च प्राहुः ॥ मेभ
क्तिरिति निराशिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकारणभूतापेक्षारहितस्य मे भवेत् ॥ यद्वा
मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः ॥ ३५ ॥ अनेन प्रकारेण सिद्धानां न गुणदोषा इति वि
शेषं परिहारमुपसंहरति ॥ न मयीति ॥ गुणदोषैर्विहितप्रति॰षिद्धैरुद्भवा येषां ते गुणाः पुण्यपापादयः सा
धूनां निरस्तरागादीनां अतः समचित्तानां ॥ अतएव बुद्धेः परमीश्वरं प्राप्तानां ॥ ३६ ॥ कामफलमनिष्टानिंदि
यत्रेनानन्यभक्तिमार्गानुपसंहरति ॥ एवमिति मे पथः ॥ मत्प्राप्त्युपायाननुतिष्ठंति ॥ तेक्षेमं कालमायाद्

नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३५ ॥ न मय्ये
कांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां समचित्तानां बुद्धेः परमुपेयुषां ॥ ३६ ॥ एवमेतान्मया
दिष्टाननुतिष्ठंति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ३७ ॥ इति श्रीभागवते एका
दशस्कंधे विंशतितमोऽध्यायः ॥ २० ॥ ॥ रामानुजाय नमः ॥ ॥ २० ॥ ॥

दिरहितं ममलोकं विंदंति यत्परमं ब्रह्म ॥ तद्विदुः ॥ ३७ ॥ इति श्रीभागवतभावार्थदीपिकायामेकाद
शे विंशतितमोऽध्यायः ॥ २० ॥ ॥ जयति स्वपरानंदः परानंदनकेसरी ॥ यत्कृपालवलेशेन श्रीधरः
सत्कृतिः कृती ॥ १ ॥ ईदंतामिच्छयामंतः त्वम्पतामममसाहसम् ॥ मयादिशीयबोधायद्य नमेत न्न
संशयः ॥ २ ॥ एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणां ॥ कामिनां द्रव्यदेशादिगुणदोषाः प्रपंचिताः ॥ ३ ॥ तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तम् ॥ न च ज्ञानभक्तिसिद्धानां किंचिद्गुणदोषा

श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना ॥ तत्तं तद्योक्तेन मामसकृन्नित्यं भजतो हृदय्याः हृद्गताः कामा नश्यन्ति ॥२९॥ हृदयमेव ग्रंथिरहंकारः तत्त्वविवेकाश्च सर्वसंशयाः असंभावनादयः ॥ कर्माण्यनारब्धफलानि संसारहेतुभूतानि ॥३०॥ तदेवं व्यवस्थयाधिकारत्रयमुक्तं ॥ तत्र च भक्तेः स्वनिरपेक्षत्वादस्य च तत्सापेक्षत्वाद्भक्तियोगस्य श्रेष्ठत्वमुपसंहरति तस्मादिति त्रिभिः ॥ मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रेयः साधनम् ॥३१॥ तत्र हेतुः यत्कर्मभिरित्यादि ज्ञानवैराग्यपि तीर्थयात्राव्रतादिभिः श्रेयः साधनैर्यत्

प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः ॥ कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ॥२९॥ भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥३०॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥३१॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥३३॥ न किंचित्साधवो धीरा भक्ता ह्येकान्तिनो (मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥३४॥

ज्ञानं च सत्तु श्रद्धादि तत्सर्वं ॥३२॥ अंजसानायासेन भक्तेश्च स्वर्गमपवर्गं मद्धाम च वैकुण्ठं लभत एव वांछा तु ॥ नास्तीत्याह कथंचिद्यदि वांछतीति ॥ तत्र हेतुमाह न किंचिदिति ॥३४॥ धीराः धीमन्तः यतो ममैकान्तिनः ॥ मय्येव प्रीतियुक्ताः अतो मया दत्तमपि नाददति किं वक्तव्यं यदि वांछन्तीत्यर्थः अपुनर्भवं मात्यंतिकं

स एव गुणो नेतरः तद् उपपादयति ॥ तस्माद्धि विधिनिषेधाभ्यामुक्तेन गुणदोषविधानेन कर्मणां निय-
मः संकोचः कृतः ॥ इमं तत्र आह ॥ जात्या तु स्वभावेनैवाशुद्धानां कर्मणां सर्वेषामासां संगानां त्यजनेच्छयाऽ-
यं भावः ॥ पुरुषस्यात्मशुद्धिर्नाम न प्रवृत्तेर्यस्मात् स्वाभाविकप्रवृत्तेरेव तस्मान्निवर्तनात् ॥ न च सहसा स-
र्वतो निवृत्तिः कर्तुं शक्यते ॥ अतः इदं न कर्तव्यम् ॥ इदमेव कर्तव्यमित्येवं स्वाभाविकप्रवृत्तिसंकोचे हि द्वारे-
ण निवृत्तिरेव क्रियते ॥ यथा च ॥ न प्रवृत्तिपरो वेदः तस्य योगसाध्याये वक्ष्यामः ॥ उक्तमेव हि काम्यनिषिद्धादि

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ कर्मणां जात्यशुद्धानामनेन नियमः कृतः ॥ गुणदो-
षविधानेन संगानां त्यजनेच्छया ॥ २६ ॥ जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु ॥ वेद दुःखा-
त्मकान्कामान्परित्यागेऽप्यनीश्वरः ॥ २७ ॥ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः ॥ जुषमाणः
श्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ ॥

नातः परं योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादि
विधिगोचरतेति ॥ २६ ॥ अनधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः ॥ मत्कथासु जातश्र-
द्धः अत एव अन्यकर्मसु उद्विग्नः ॥ न तु तत्फलेष्वविरक्तः ॥ तदाह वेदेति ॥ यद्यपि वेद तथापि तत्परित्या-
गेऽनीश्वरः असमर्थः ॥ २७ ॥ एवंभूतो यः स श्रद्धालुः ॥ भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ॥ ततः
सदनन्तरं मां प्रीत्या भजेत् विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह ॥ गर्हयन्निति ॥ कथं भजेदित्य-

लोमतः पृथिव्यादिक्रमेणाप्ययं चानुध्यायेत् प्रसीदति निश्चलं भवति ॥ २२ ॥ ततश्चागमापायिषु
देहेष्ववधिभूतात्मदर्शनात् ॥ तद् विवेकापन्नसंसारे निर्विमृश्यात्मनो विरक्तस्य ॥ ततश्चात्मवेदिनो गुरूपदि
ष्टयालोकस्य ॥ ततो गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाभिमानं त्यजति ॥ २३ ॥ किं
वयमादिभिर्योगमार्गैः आन्वीक्षिकापदार्थहृद्यशोधनेन ममार्चनध्यानादिभिर्वा ॥ वाशाहृनाश्यपर

निर्विसस्य विरक्तस्य पुरुषस्योक्तवेदतः ॥ मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया ॥ २३ ॥ य
मादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥
यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं ॥ योगेनैव दहेदंहो नान्यत्तत्र कदाचन ॥ २५ ॥

स्वस्थानं संदर्शयति ॥ एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत् ॥ अतोन्यं नत्कार्यमित्यर्थः ॥ २४ ॥ न
नु नैमित्तिकप्रायश्चित्तैः प्रमादादिकृतस्य प्राप्तपापापनुत्तये प्रायश्चित्तं कार्यमेव तत्राह ॥ यदीति
२५ ॥ योगेन ज्ञानाभ्यासेनैव ॥ एतच्च भक्तस्यापि नामकीर्तनाद्युपलक्षणार्थं नान्यत् कृच्छ्रादि ॥ २५
ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वात् ॥ हिंसादिकं त्वशुद्धिहेतुत्वाद्दोषः ॥ तत्र च न त्रिवर्गकता
कृच्छ्रादिप्रायश्चित्तं विना योगेनैव कथं पापहरं तत्राह ॥ स्वे स्वे इति सार्धेन ॥ ॥

ग्र॰:२

मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः॥ सत्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत्

श्री॰ भा॰ ए॰ टी॰ ८८

एवं तावद्विरक्तस्य वैराग्यद्वारा ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च
ज्ञानशमः पूर्वं किंचिद्विरक्तस्य वर्जनीयं चाह साधर्षं नवभिः॥ यदारंभेष्विति आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेन ता
दृशः तत्फलेषु विरक्तस्य॥ तदा संयतेंद्रियः सन्॥ आत्मनोभ्यासेनात्मविषयवृत्तिसंतत्याऽचलं यथा भ
वति॥ तथा मनो धारयेत्॥१८॥ तत्र प्रथममेवात्मनि धारणासंभवात्॥ तत्स्वभावानुसारेणैव वशीकरण
माह॥ यदास्य भ्राम्यत्प्रारंभमदनवस्थितं भवति तदानुरोधेन किंचिदपेक्षापूरणद्वारेण॥१९॥ ननु तर्हि य

यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः॥ अभ्यासेनात्मनो योगी धारयेदचलं मनः॥१८॥ धार्य
माणं मनो यर्हि भ्राम्यदाश्वनवस्थितं॥ अतंद्रितोनुरोधेन मार्गेणात्मवशं नयेत्॥१९॥ एष वै परः
मो योगो मनसः संग्रहः स्मृतः॥ हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः॥२०॥ सांख्येन स
र्वभावानां प्रतिलोमानुलोमतः॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति॥२१॥

यावदेवं मे वश्यं स्यात्॥ मनोगतिं न विसृजेत्॥ तदपेक्षितेन किंचित्पुनः संलालयेदित्यर्थः॥१९॥ अनेनैव मार्गे
ण संग्रहस्थानेन स्तौति॥ एष इति॥ एष अनुवृत्तिमार्गेण मनसः संग्रहः परमो योगस्तत्साधनत्वात्॥ उ
पचारेण स्तुतिः॥ यथा दान्तस्य दमनीयस्यार्वतः॥ अश्वस्य हृदयज्ञत्वमभिप्रायज्ञानमिच्छन् अपेक्ष
माणः अश्वधारकः॥ प्रथमं किंचिदनुवर्तते॥ तदा च रश्मिना तत्पथेनैव गच्छति न तूपेक्षितेन तद्व
दित्यर्थः॥२०॥ एवमीषद्वशीकृतस्य मनसोऽनंतरं स्थूलापायानाह सांख्येनेति त्रिभिः॥ सांख्येन तत्व
विवेकेन सर्वभावानां महदादिदेहांतानामनुलोमतः प्रकृत्यादिक्रमेण भवमुत्पत्ति॥ ॥

८८

ति२

अतो नरः स्वर्गतिं न कांक्षेत॥ नारकीमिति दृष्टांतः॥ यद्वा स्वर्गनरकसाधनकर्माणि न कुर्यादित्यर्थः॥ अ
स्मान्निश्रेष्टत्वान्मनुष्यलोकमेव यमित्यपि न कांक्षेत॥ यतो देहावेशात्॥ देहासक्त्या स्वार्थे प्रमाद्यति
अवधानशून्यो भवति॥ १३॥ अपि तु यत्नेन देहसाधकमिति विद्वान्॥ तत्रार्थसिद्धिदमपि मर्त्यं ज्ञात्वा अप्र
मत्तो नासक्तः सन्॥ मृत्योः पूर्वमेव मोक्षाय घटेत यत्नं कुर्यात्॥ १४॥ अप्रमत्तो मुक्तसंगः॥ स्वस्वधाम्नो॥ तीत्यत्र

न नरः स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणः॥ नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति॥ १३॥ एतद्वि
द्वान्पुरा मृत्योरभवाय घटेत सः॥ अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं॥ १४॥ छिद्यमानं यमैरेतैः
कृतनीडं वनस्पतिं॥ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः॥ १५॥ अहोरात्रैश्छिद्यमानं बुद्ध्वायु
र्भयवेपथुः॥ मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति॥ १६॥ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुक
ल्पं गुरुकर्णधारं॥ मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा १७

दृष्टांतः॥ छिद्यमानमिति॥ यमैरेतैर्यमवन्निर्दयैः पुरुषैः कृतनीडं यस्मिन्॥ तं स्वकेतं स्वस्याश्रयं॥ अलंपटः
अनासक्तः॥ १५॥ दार्ष्टांतिकमाह॥ अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन॥ वेपथुः कंपो यस्य सः॥ १६॥ ए
वमप्रयत्नमनं निंदति॥ नृदेहं सर्वेतावत्प्राप्तेराद्यात्॥ यो भवाब्धिं न तरेत्स आत्महा॥ नृदेहं नवः आद्यं सर्व
फलानां मूलं॥ एतदुपार्जितकर्मभिः सर्वजन्मभिः किंच सुदुर्लभं उद्यमकोटिभिरपि प्राप्तुमशक्यं तथापि
तु॥ सुलभं यदृच्छया लब्धत्वात्॥ तं च सुकल्पं पटुतरं॥ किंच गुरुः सम्यक् तमात्रः एव कर्णधारो नेता यस्य तं मया
च स्मरणमात्रेणानुकूलमारुतेन प्रेरितम्॥ १७॥

तस्मान्नं

यमैरुपति
वृक्षं परि
त्यज्य २

श्री
भा॰पु॰
टी॰
२०
वि॰

यदृच्छया केनापि भाग्योदयेन ॥ नरकाम्यकर्मस्वप्रवर्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकारश्च तदा।
ध्यायेवसति। निष्कामकर्मयोगाधिकारिणस्तु यथाशक्ति ॥ स च ज्ञानभक्तियोगाधिकारात्प्रागेव ॥ तद्वि
हितयोस्तु स्वल्पः ताभ्यां सिद्धानां तु न किंचिदिति च ॥ सावधिकर्मयोगमाह ॥ तावदिति नवभिः ॥ कर्मा
णि नित्यनैमित्तिकानि यावता यावत् ॥ ९ ॥ कर्मयोगिनोऽपि ज्ञानभक्तिभूमिकारोहप्रकारमाह ॥ स्वधर्मस्थ
इति ॥ अनाशीःकामः अफलकामः ॥ अन्यत् ॥ निषिद्धं नरकपातहेतुं दैवविहितातिक्रमाद्वा निषिद्धानि च

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ॥ न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥ ८
तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥ ९ ॥ स्वध
र्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव ॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥ १० ॥ अस्मिँल्लो
के वर्तमानः स्वधर्मस्थोऽनघः शुचिः ॥ ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥ ११ ॥ स्व
र्गिणोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं ॥ १२

रागाद्धाः नः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति अफलकामत्वाच्च स्वर्गमपीत्यर्थः ॥ १० ॥ किं
त्वस्मिँल्लोके ऽस्मिन्नेव देहे ऽनघः निषिद्धत्यागी अतः शुचिः ॥ निवृत्तरागादिमलः ॥ यदृच्छयेति केव
लज्ञानादपि भेमेकईलि भक्ताद्योनयति ॥ ११ ॥ अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहस्तो निस्वर्गि
पीति निरयिणश्चेति दृष्टान्तेनेनामं ज्ञानभक्त्योस्तदुभयं स्वर्गिनारकिशरीरम् ॥ १२

८०

ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो दृष्ट्वा मनुष्येभ्यः ॥ कथयिष्यन्तीति नेत्याह ॥ पित्रादीनां सर्वेषां तव वेदा
ख्यरूपो वेद एव तु श्रेयः चक्षुः प्रमापकं ॥ अनुपलब्धेऽर्थे मोक्षस्वर्गादौ च न यथा साध्यसाधनयोः ॥ इदम
स्य साध्यमिदमस्य साधनमित्यत्रापि वेद एव गुणदोषदृष्ट्यभावेनि ॥ श्रेयस्तु न घटते ॥४॥ किं च यथाहं गुणदोषवि
हितां भेददृष्टिं त्वमिदं विषये यास्मिंश्च कथं निवर्तयेदित्याह ॥ ते निगमान्नवाज्ञारूपाद्वेदादेव न हि स्वतः ॥ य
स्मादर्थप्रामत्वेन निवर्तेत ॥ इत्थं भ्रमो भवति ते निवर्तयेति शेषः ॥५॥ विषयाभेदेपि अधिकारिभेदेना

पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥४॥ गुणदोषभि
दादृष्टिर्निगमात्ते न हि स्वतः ॥ निगमेनापवादश्च भिदाया इति ह भ्रमः ॥५॥ श्रीभगवान् ॥ योगास्त्र
यो मया प्रोक्ता नृणां श्रेयोविधित्सया ॥ ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥६॥ निर्वि
ण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ॥ तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ॥७॥ रा
मानुजाय नमः ॥ ७ ॥

विरोधं परिहरन्प्रथमं योगत्रयमाह योगास्त्रय इति ॥ योगा उपायाः स्वस्वकर्मदेवताः
काण्डैः ॥ प्रोक्ताः कर्मैव निष्कामं श्रेयोविधित्सया मा तत्साधनेच्छया अन्य उपायो नास्तीति ॥ काम्यकर्मा
दिकं व्यावर्तयति ॥ तथा चोत्तराध्याये स्फुटीकरिष्यति ॥ य एतानित्यादिना ॥६॥ तेष्वधिकारभेदमाह
निर्विण्णानामिति द्वाभ्यां ॥ इदं तेषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानामत एव
तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सिद्धिदः ॥ तेषु अनिर्विण्णचित्तानां दुःखबुद्धिशू
न्यानामतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ॥ ७ ॥

निगमेनैतस्या
पवाद(इति)
भ्राह ।

श्री॰
भा॰ ए॰ टी॰
६५

विंशेयोगत्रयंयेषांतेभक्तिज्ञानक्रियात्मकं ॥ गुणदोषव्यवस्थार्थमधिकारविभागतः ॥ १ ॥ गुणदोषदृशिर्दोषोगुण
स्तूभयवर्जितइत्युक्तंतदाक्षिपति ॥ विधिश्चेतिपंचभिः विधिश्चप्रतिषेधश्चेतीश्वरस्यतवनिगमश्चाज्ञारूपोवेदः
सचविधेयानांप्रतिषेध्यानांकर्मणांगुणदोषंचपुण्यपापरूपमवेक्षते ॥ १ ॥ उत्तमाधमभावेनतदधिकारिणां
वर्णानामाश्रमाणांविकल्पंभेदंच ॥ गुणदोषरूपमेवावेक्षते ॥ प्रतिलोमानुलोमजंचगुणदोषंचपुण्यपापरू
पमवेक्षते ॥ प्रतिलोमजाः ॥ उत्तमवर्णास्त्रीषुजाताः मूर्धावसिक्ताम्बष्ठादयः ॥ तेषांच ॥ असत्सेनसविज्ञेयाः
प्रतिलोमानुलोमजाइतिगुणदोषाविद्यादीन् ॥ कर्माहतानहताभ्यांस्वर्गनिरकंतत्फलतयागुणदोषरूप

उद्धव ॥ विधिश्चप्रतिषेधश्चनिगमोहीश्वरस्यते ॥ अवेक्षतेरविंदाक्षगुणदोषंचकर्मणां ॥ १ ॥ वर्णाश्र
मविकल्पंचप्रतिलोमानुलोमजं ॥ द्रव्यदेशवयःकालान्स्वर्गंनरकमेवच ॥ २ ॥ गुणदोष
भिदादृष्टिमंतरेणवचस्तव ॥ निःश्रेयसंकथंनृणांनिषेधविधिलक्षणम् ॥ ३ ॥

मेवावेक्षते ॥ गुणदोषदृशिर्दोषइतिनिराकृतत्वात् ॥ गुणदोषभिदादृष्टिमंतरेणतांविनानिषेध
विधिलक्षणंकर्मकांडंतववचः कथं ॥ तच्चवचोंतरेणनृणांनिःश्रेयसंकथंस्यात् ॥ तत्रापिश्रोतव्य
श्यादिसाधनविधानेनानुध्यायाद्यकृत्स्नंदानाचोविगलापनंद्विजदित्यादिनिषेधस्यचावश्यकत्वादि
तिभावः यद्वागुणदोषभिदादृष्टिमंतरेणनिषेधविधिलक्षणंतववचोविनेति ॥ सामानाधिकरण्यमेवा
स्तु ॥ यद्वागुणदोषभिदादृष्टिमंतरेणनिषेधविधिलक्षणमपिवचः ॥ कथंनुजन्मसाद्दिवाकार्वतु
निःश्रेयसंपरंस्यात्सर्वस्यवेदस्यतन्मयंनाभीकारादिमर्थः ॥ ३ ॥

६५

अहंबुद्धिरित्युपलक्षणं गेहादिष्वहं ममेत्यभिमानवान्॥ मूर्ख इत्यर्थः॥ मन्निगमः॥ मां नितरां गमयति प्राप
यति यो निवृत्तिमार्गः स तु पंथाः सन्मार्गः न कंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः॥ स उत्पथः उ
न्मार्गः॥ न तु चौराद्याकुलः सत्त्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः॥ ४२॥ तमसः उन्नाहः उद्रेकः नर
कः॥ न तामिस्रादिः॥ गुरुरेवं बंधुर्न भ्रात्रादिः॥ स चाहमेव यथाहं न राजगुरुः॥ एवं कृपणपरो बंधुर्विषमसमु
पाश्रित्य॥ गुरुः सकलधर्मात्मा यत्र किंचन गोहविविति॥ समाधनमोगायतनं न तु मानुष्यं मानुषरूपश

मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः॥ उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः॥ ४२॥
नरकस्तम उन्नाहो बंधुर्गुरुरहं सखे॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते॥ ४३॥ दरिद्रो
यस्त्वसंतुष्टः कृपणो यो जितेंद्रियः॥ गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः॥ ४४॥ एत उद्ध
व ते प्रश्नाः सर्वे साधु निरूपिताः॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः॥ ४५॥ गुणदो
षदृशिर्दोषो गुणस्तूभयवर्जितः॥ ४५॥ इति श्रीभागवते एकादशस्कंधे एकोनविंशोऽध्यायः॥

रीरमेव न तु हर्म्यादि॥ गुणैः संपन्नः आढ्य उच्यते न तु धनी॥ ४३॥ असंतुष्टो यः स दरिद्रः न निःस्वः॥ यो जि
तेंद्रियः स तु कृपणः न दीनः॥ विषयेष्वनासक्तधीर्यः स ईशः स्वतंत्रः न राजादिः गुणसंगः
गुणेषु संगो यस्य सः विपर्ययः अनीशः॥ एतच्च शमादिविपर्ययोपलक्षणार्थं॥ ४४॥ उपसंहरति
साधु मया तोषयोगितया॥ एतच्च सर्वं गुणदोषयोर्विवेकायोद्धवेन पृष्टमिति तयोः संक्षेपतो लक्ष
णमाह किं बहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेवेत्याह॥ गुणदोषयोर्दृष्टिर्दोषो

तत्त्वज्ञानं कथयति ॥ नवेति ॥ प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणि ॥ एकादशेंद्रियाणि पंचमहाभू-
तानि त्रयोगुणाः ॥ एतान्भावानष्टाविंशतितत्त्वानि ॥ ब्रह्मादिस्थावरांतेषु कार्येष्वनुगतानि येन ज्ञानेन वे-
त्ति ॥ अथैष्वपि भावेषु एकं परमात्मतत्त्वमनुगतं येन वेत्ति ॥ कार्यकारणात्मकं जगत्पश्यन् ॥ परमका-
रणात्मकमेवेति ततः ॥ नतु ततः पृथगिति येन पश्येत् ॥ तज्ज्ञानमित्यर्थः ॥१४॥ विज्ञानमाह ॥ एतदेवेति श्लो-
कार्धेन ॥ यद्यप्येतैरेकैकेनानुगतता ॥ नैकात्मकाभावात् ॥ सर्वमेतत्तत्त्वानां ॥ तथा पूर्ववन्न वेत्ति ॥ किंतु तदेकं
परमेकारणं ब्रह्मैव तदा पश्यति तदेव विज्ञानमुच्यते ॥ एतदुक्तं भवति ॥ परोक्षज्ञानेनापरोक्षमनुभवमसाविद्यो-

नवैकादश पंच त्रीन्भावान्भूतेषु येन वै ॥ ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं ॥१४॥ एतदेव
हि विज्ञानं न तथैकेन येन यत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां ॥ आदावंते च मध्ये च

दादिष्विव नित्यमभावान्तरानुगतस्य एतत्त्वा- सृज्यात्सृज्यं यदन्वियात् ॥ पुनस्तत्प्रतिसंक्रामे यच्छि-

त्मनः पृथक्शरीरमिति मन्यते ॥ अपरोक्षज्ञानेन तु बाधितमेव जीवन्मुक्तः संसारशेषं पश्यति ॥ ततः परेण प-
श्यति च अतः परोक्षापरोक्षज्ञाने ॥ ज्ञानविज्ञानशब्दाभ्यां ॥ उच्येते ॥ तत्र कदाचिदनीदृशं जगदित्यादिम-
ते तैनैतेषां भावानामुत्पत्त्यादयो न स्युः ॥ नहि कारणस्य कस्याभावात् ॥ देकात्मना मिथ्यात्वं च न स्यात् ॥ अत-
स्तेषामुत्पत्त्यादीन्साधयति ॥ स्थित्येति ॥ त्रिगुणात्मनां सावयवानामित्यर्थः ॥ विमता भावा उत्पत्त्यादिमं-
तः ॥ सावयवत्वाद्घटादिवदिति पश्येत् ॥ ततश्चादावुत्पत्त्यावंते परिणामांतरापत्तौ च कारणत्वेन मध्ये वा-
श्रयत्वेन [illegible] सृज्यात्सृज्यं कार्यात्कार्यांतरं प्रति यदन्वियात् ॥ अनुगच्छेत् ॥ तस्य तत्संक्रा-
मे तेषां प्रलये च यदवशिष्येत तदेव सदिति पश्येदित्यर्थः ॥१६॥

ज्ञानादेर्विशेषं जिज्ञासुः पृच्छति ॥ ज्ञानमिति ॥ शुद्धमेतत् ॥ ज्ञानं विपुलं निश्चितं यथा भवति ॥ तथाक
थयेति महद्भिर्ब्रह्मादिभिर्विमृग्यं ॥८॥ महद्भिर्मृग्यत्वमभिनयेनाह ॥ तापत्रयेणाभितो रुद्धस्य ॥ अतः
संतप्यमानस्य श्रेयस्त्वदङ्घ्रिद्वन्द्वमेवातपत्रं तस्मात् न केवलमातपत्रं तस्मात् ॥ न केवलमातपत्रात् ॥ किं तु ततः

उद्धव उवाच ॥ ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं ॥ आख्याहि विश्वेश्वर विश्व
मूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ॥८॥ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश ॥
पश्यामि नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ॥९॥ दष्टं जनं संपतितं बिलेस्मिन्का
लाहिना क्षुद्रसुखोरुतर्षं ॥ समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव ॥१०॥ श्रीभग
इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरम् ॥ अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृण्वतां ॥११॥ निवृत्ते
भारते युद्धे सुहृन्निधनविह्वलः ॥ श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥१२॥ तानहं तेभि
धास्यामि देवव्रतमुखाच्छ्रुतान् ॥ ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् ॥१३॥

तप्यमानस्य वर्षतीत्यमृतस्मात् ॥९॥ अतिकृपामुत्पादयन्नाह ॥ दष्टमिति ॥ अस्मिन्बिले संसारकूपे पति
तं मग्नं च कालाहिना दष्टं एवमपि क्षुद्रसुखेष्वेव उरुस्तर्षस्तृष्णा यस्य तं दष्टमातः कथं समुद्धरणीयस्त
त्राह ॥ आपवर्ग्यैः ॥ अपवर्गोपायकैः ॥ वागमृतैः ॥ आसिंचेति ॥१०॥ न
हिंस्रासार्थं विद्वत्सभायां निर्णीतमहं वक्ष्यामीत्याह
इत्थमिति ॥ ज्ञानादिभिरुपबृंहितान् तत्त्वादि

अध्या ३ इति श्रीमद्भागवते पुराणे ... उद्धवः ... वाचेदं वचनम्
तन्मावेन: ११

भक्तिः प्रेमलक्षणा संजायते ॥ अस्य भक्तस्य अन्यः ॥ कोऽर्थः साधनरूपः साध्यरूपो वा अवशिष्यते ॥ सर्वोऽपि तत एव भवतीत्यर्थः ॥ २४ ॥ तदेवाह ॥ यद्वा किं बहुना ॥ चित्तमेवानर्थहेतुरिष्टमर्थानर्थयोः कारणमित्याह ॥ यदात्मनीति द्वाभ्यां ॥ यदात्मन्यर्पितं चित्तं शान्तं सत्त्वोपबृंहितं ॥ धर्मादीन् प्राप्नोत्येव ॥ २५ ॥ एतदेव व्यतिरेकेणाह च्युत इति ॥ यद्यदा चित्तं विकल्पेषु देहादावर्पितं सत्परिधावति ॥ तदा यिकं रजस्तमस्त्रिष्टं च भवति

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ॥ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥ २४ ॥

यदात्मन्यर्पितं चित्तं शान्तं सत्त्वोपबृंहितं ॥ धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ २५ ॥ यदर्पितं तद्विकल्पे इन्द्रियैः परिधावति ॥ रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं ॥ २६ ॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं ॥ गुणेष्वसङ्गो वैराग्यमैश्वर्यं चाणिमादयः ॥ २७ ॥ उद्धव ॥ यमः कतिविधः प्रोक्तो नियमो वारिकर्षण ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो ॥ किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥ २८ ॥ पुंसः किं स्विद्बलं श्रीमन्भगो लाभश्च केशव ॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ॥ ३० ॥ कः पण्डितः कश्च मूर्खः कः पन्था उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित्को बन्धुरुत किं गृहं ॥ ३१ ॥ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥ ३२ ॥ ततश्च विपर्ययं अधर्मादिकं विद्धि ॥ २६ ॥ तानेवैतान्धर्मादीनाचष्टे ॥ धर्मो मद्भक्तिकृत्स एव प्रोक्तः ॥ प्रश्नाष्टकमाह ॥ २७ ॥ धर्मादीनां महाजनप्रसिद्धानामन्यथा व्याख्यानत्वाद्यमादिष्वपि मद्व्याख्यातः स्वरूपतो वा किंचिद्विलक्षणं स्यादिति संभावनया तद्विशेषजिज्ञासुः पृच्छति ॥ यम इति पञ्चभिः ॥ २८ ॥ इष्टमभिमतं धनं च किं परेति विद्यादीनां विशे

वैराग्यमाह ॥ नेहेति । नानास्ति किंचनेत्यादि श्रुतिः प्रमत्तं यदादित्यतिरेकेण न दृश्यते ॥ चैतन्यव्यतिरेकेण च न किंचिद्दृश्यत इति येतिह्यं महाजनप्रसिद्धिः अनुमानं विमतं मिथ्या दृश्यत्वात् ॥ शुक्तिरजतवदित्यादि ॥ एवं प्रमाणचतुष्टयम् ॥ एतेष्वनवस्थानात् ॥ एतैर्विदितत्वात् ॥ एवं सर्वानुगतेनात्मना तत्तुल्यमात्मनत्वं पश्य न्विकल्पस्य च मिथ्यात्वात् ॥ ततो विरज्यते विरक्तो भवतीत्यर्थः ॥ १७ ॥ न चैवं दोषः स्वर्गादिसुखाशया न विरज्येतेत्याह ॥ कर्मणामिति ॥ आविरिंचात् ॥ ब्रह्मलोकपर्यंतमदृष्टमपि स्वर्गमंगलं दुःखरूपं नश्वरं च पश्येत् श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥ १७ ॥ कर्मणां परिणामित्वादाविरिंचादमंगलम् ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १८ ॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम् ॥ १९ ॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनम् ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ २० ॥ आदरः परिचर्यायां सर्वांगैरभिवंदनम् ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥ २१ ॥ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणम् ॥ मय्यर्पणं च मनसः सर्वकामविवर्जनम् ॥ २२ ॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥ २३ ॥ ॥ १९ ॥ भक्तियोगस्य कारणमाह ॥ भक्तियोगः पूर्वमुक्त एव ॥ तथापि तस्मिन्प्रीतिं प्राप्नुवते तुभ्यं पुनः कथयिष्यामि ॥ १९ ॥ श्रद्धा श्रवणादरः ॥ शश्वदिति विशेषादुपन्यते ॥ मदनुकीर्तनं श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः ॥ २० ॥ अंगचेष्टा लौकिकक्रिया वचसा लौकिकेनापि मद्गुणानामी[illegible]णकथनं ॥ २२ ॥ मदर्थे मद्भजनार्थं निरोधिनोऽर्थस्य परित्यागः ॥ भोगस्य तत्साधनस्य चंदनादेः ॥ सुखस्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्कर्म तदपि मदर्थं

श्री॰ भा॰ टी॰ ६८

अमबुद्धत्तं सत्त्वंस त्यामियाचवाक्रु एवं सतसम्पयोः॥ स्फुटएव विवेकः क्रमप्राप्तं त्यागं व्याख्यातमादौत
तोभेदेन योचेष्टावष्टतस्यापिमलत्यागरूपत्वेन त्यागादभेदप्रतीतेः कर्मसु असंगमः अनासक्तिः शौचंत्या
गात्तसत्वासइतितयोभेदइत्यर्थः॥ ३८॥ तृष्णामिश्रंयत् यमः॥ नपश्चादिमाथारणा भगवत्समः परमेश्वरोहमे
वयत्नः॥ मद्बुद्ध्यायत्नोत्तुज्ञेयः॥ नक्रियाबुद्धेरित्यर्थः॥ यज्ञार्थं दानंदक्षिणासाचज्ञानोपदेशः॥ नदक्षिणादिदा
ने॥ नेनदद्यत्तत्तपोविसः आप्यतेइदंमनंबलं॥ तत्त्वमनोदमनदेहत्वनात्याणायामइति॥ ३८॥ तयालोकप्रसि

सनेवसत्वनावाणीकविभिः पदिकीर्तिता॥ कर्मस्वसंगमः शौचंत्यागः सम्यासउ
च्यते॥ ३८॥ यमिष्ठंधनेन्तृष्णामयज्ञोहंभगवत्समः॥ दक्षिणाज्ञानसंदेहः प्राणायामः
परंबलं॥ ३९॥ भगोमेयैश्वरोभावोलाभोमद्भक्तिरुत्तमः॥ विद्यात्मनिभिदाबाधोजुगु
प्साह्रीरकर्मसु॥ ४०॥ श्रीगुणानेव्यपेतायाः सुखंदुःखसुखात्ययः॥ दुःखंकाम
सुखापेक्षापंडितोबंधमोक्षवित्॥ ४१॥

हेवाभिमता॥ लाभंव्याचिख्यासुः प
थमंभगं॥ ततोभेदेनव्या
चष्टे॥ लोकेतयोरभेदप्रसिद्धेः॥ भगोभाग्यंतत्रमेश्वरोभावोमदीयमैश्वर्यादिषाड्गुण्यमित्यर्थः॥ उत्तमो
लाभस्तुमद्भक्तिः नपुत्रादिः॥ विद्याचात्मनिभिदायास्तद्भेदस्यबाधः नज्ञानमात्रं॥ अकर्मसुजुगुप्सादेय
तदर्शनेह्रीः नलज्जामात्रम्॥ ४०॥ गुणापवर्गोर्भइत्तेनकिरीटादिकुः सुखदुःखयोरत्ययः॥ अतिक्रमः अ
नुसंधानंसुखंतेनभोगः भोगापेक्षैवदुःखंनाग्निदाहादिबंधमोक्षतत्त्वं॥ वावेतिसर्पंपुंसोनविहन्मारे॥ ४

६२

५८

यमनियमानाह ॥ अहिंसेति त्रिभिः ॥ अस्तेयं मनसापि परस्वाग्रहणं ॥ आस्तिक्यं धर्मे विश्वासः ॥३३॥ शौचं बाह्यमाभ्यंतरं चेति द्वयम् ॥ अतो द्वादश नियमाः ॥ श्रद्धा धर्मे आदरः ॥३४॥ उभयोः श्लोकयोर्ये स्मृताः ते यमा [निय] माश्च ॥ यद्वा उभयोः मुमुक्षोर्यमाः मुख्याः सकामस्य नियमा मुख्याः स्मृता इत्यर्थः ॥ अत्र हेतुमाह हि यस्मात् ॥ उपासिताः सेविताः संतः पुंसां प्रवृत्तानां निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहंतीति ॥३५॥ मुमुक्षोरुपादेयान् शमादीन् ॥ हेयांश्च दुःखादीन् ॥ महाजनप्रसिद्धेभ्यो वि-

[margin: प्रवृत्तिनि वृत्तयोः]

श्रीभगवानुवाच ॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयम् ॥३३॥ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम् ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् ॥३४॥ एते यमाः सनियमा उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ॥३५॥ शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः ॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥३६॥ दंडन्यासः परं दानं कामत्यागस्तपः स्मृतम् ॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनम् ॥३७॥

लक्षणानाह ॥ शमत्वादिना यावत्समाप्तिः ॥ एतेनैव तद्विपरीता अशमादयोऽप्युक्ता ज्ञेयाः ॥ शमो मन्निष्ठता बुद्धेः ॥ न तु शांतिमात्रं ॥ दम इंद्रियसंयमः ॥ न चौरादिदमनं ॥ तितिक्षा विहितदुःखसंमर्षः ॥ सहनं न तु भारादेः ॥ जिह्वोपस्थयोर्जयो वेगधारणं धृतिः ॥ न त्वनुद्वेगमात्रं दंडो जनद्रोहः ॥ तस्य त्यागो दानं न तु धनार्पणं ॥ कामत्यागः भोगोपेक्षा तपः ॥ न कृच्छ्रादि ॥ स्वभावो वासना तस्य जयः प्रतिबंधः शौर्यं न विक्रांतिः ॥ समं ब्रह्म तस्य दर्शनमालोचनं सत्यं विषयत्वात् सत्यं न यथार्थभाषणमात्रम् ॥३७॥

ज्जलस्पर्शविनष्टताः दुर्मनाः ॥ ५० ॥ इति श्री० एकादशस्कंधे त्रिंशत्तमोऽध्यायः ॥ ३० ॥ एकत्रिंशे स्वकं धाम जगाम भगवानितः ॥ तमेवानुययुः सर्वे पार्षदा देवाद्यस्ततः ॥ १ ॥ देवानुपविधायादौ भूम्यादेवानिधायतात् श्रीकृष्णः स्वेच्छयाधाम स्वतन्त्वेन समाविशत् ॥ २ ॥ मुनयः सनकादयः प्रजेश्वरा मरीच्यादयः द्विजाः

इत्युक्त्वा सं परिक्रम्य तमसत्कृत्य पुनः पुनः तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीम् ३० इति श्रीभागवते एकादशस्कंधे त्रिंशत्तमोऽध्यायः ॥ ३० ॥ श्रीशुक उ० ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः ॥ महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥ १ ॥ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ चारणा यक्षरक्षांसि किंनराप्सरसो द्विजाः ॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः ॥ ४ ॥ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नृप ॥ ३ ॥ कुर्वंतः संकुलं राजन्भक्त्या परमया युताः ॥ ३ ॥ भगवान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः ॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ॥ ५ ॥ ॥

रुद्रलोकवासिनः पतितायो मैत्रेयादयश्च भगवतो निर्याणं द्रष्टुकामाः ॥ संतः परमोत्सुकास्तत्रागमन् ॥ २ ॥ तेषां मोत्सुक्यकृतं महोत्सवमाह सार्धेन गायंतश्चेति ॥ ४ ॥ विभूतीः रुद्रादींश्च पद्मनेत्रे न्यमीलयत् ॥ इत्यत्रायं भावः पूर्वं ब्रह्मादिभिः सलोकोऽलोकपालान्तः पाहि वैकुंठ किंकरानिति । प्रार्थितत्वादिदानीं च स्वस्वलोकं प्रतिनेतुमागतत्वात्कृष्णचेतसु दत्तिपपाहं चयितुं समाधिमिव

द्वारकां शारीरे गोमन्तस्यायं भावः ॥ शुद्धसत्त्वमयीं निजां श्रीमूर्त्तिमन्तर्धायान्येन तिष्ठामि एवं विडंबनमा
त्रमिति ॥ एतदेव स्फुटीकरिष्यति देवादयो ब्रह्मरुद्रस्याद्यास्तादिना ॥ ४१ ॥ तं पत्तिनं ददृष्ट्वा नस्य पादः
योर्निपपात ॥ ४२ ॥ उदीक्षमाणस्य कृतस्य सतः ॥ ४४ ॥ निर्याणायोगमार्गेण महद्यामिति शरीरा
इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा ॥ त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥ ४० ॥
दारुकः कृष्णपदवीमन्विच्छन्नुपगम्यते ॥ वायुं तुलसिकामोदमाघ्रायाभिमुखं ययौ ॥ ४१ ॥
तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिं ॥ स्नेहप्लुतात्मा निपपात पाद
योरथादवप्लुत्य सबाष्पलोचनः ॥ ४२ ॥ अपश्यतस्त्वच्चरणाम्बुजं प्रभो दृष्टिः प्रणष्टा तमसि
प्रविष्टा ॥ दिशो न जाने न लभे च शांतिं यथा निशायामुडुपे प्रणष्टे ॥ ४३ ॥ इति ब्रुवति सूते
वै रथो गरुडलाञ्छनः ॥ खमुत्पपात राजेन्द्र साश्वध्वज उदीक्षतः ॥ ४४ ॥ तमन्वगच्छन् दि
व्यानि विष्णुप्रहरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥ ४५ ॥ गच्छ द्वार
वतीं सूत ज्ञातीनां निधनं मिथः ॥ संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशाम् ॥ ४६ ॥ द्वा
रिकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥ ४७ ॥ स्वं
स्वं परिग्रहं सर्वे आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्वे इंद्रप्रस्थं गमिष्यथ ॥ ४८ ॥ त्वं तु
मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥ ४९ ॥
भिप्रायेण ॥ ४७ ॥ अविनाः रक्षमाणाः इंद्रप्रस्थं गमिष्यथेति ॥ ब्रूहीति सर्वेषामन्वयः ॥ ४८ ॥ मन्मा
यारचनामेतां विज्ञायेति निजश्रीमूर्त्तेरंतर्द्धिं नत्वा हृष्यां शोकमाक्रान्तिं निरस्यति ॥ ४९ ॥

सडकिभिः ॥ सत्याग्रवितयाउक्तयोयेषुतैः ॥ नाहंप्रकाशः ॥ सर्वस्ययोगमायासमावृतः मूढोयेना।

कालयवनोविराधोत्रिशिरार्कनिणपाद्यास्तदात्मिकाः ॥ अर्जुनःशेषस्तःसाम्बुःकृष्णस्यविर
हावरः ॥ आत्मानंसोन्वयामासकृष्णसंगीतैः सडकिभिः ॥२०॥ वैष्णवानष्टगोत्राणामर्जुनः
सोपराधिकं ॥ इतानांकारयामासयथावदनुपूर्वशः ॥२१॥ द्वारिकोद्वारिणामेकासमुद्रे
श्रावयन्तामागं ॥ वर्जयित्वामहाराजश्रीमद्भगवदालयं ॥२२॥ नित्यंसन्निहितस्तत्रभगवा
न्मधुसूदनः ॥ स्नात्वाशोधाशुभहरंसर्वमंगलमंगलं ॥२३॥ स्त्रीबालवृद्धानादायहतशे
षान्धनंजयः ॥ इन्द्रप्रस्थेसमावेश्यवज्रंतत्राभ्यषेचयत् ॥२४॥ श्रुत्वासुहृद्वधंराजन्वज्रंतना
नेपितामहः ॥ तावत्पथयेकृत्वाजग्मुःसर्वेमहापथं ॥२५॥ यएतद्देवदेवस्यविष्णोः
कर्माणिजन्मच ॥ कीर्तयेच्छ्रद्धयामर्त्यः सर्वपापैःप्रमुच्यते ॥२६॥ नामानेजायनमः२६

भिज्ञानातिलोकोमामजमव्ययमित्यादिभिः ॥२०॥ नष्टगोत्राणां नष्टक्षेत्रिणां सोपराधिकं
पिंडादिकादि ॥२२॥ आदितआरभ्यश्रीकृष्णचरितकीर्तनस्यफलमाहयएतदिति २६

किंतु यदि समर्थस्तर्हि किंचित्कालमेवैतेन वपुषा किं नातिष्ठदित्याह ॥ तथापीति ॥ यद्यप्युक्तप्रकारेण
शेषस्य जगतः स्थित्यादिषु अनन्यहेतुर्निरपेक्ष एव कारणं ॥ स्वयं यद्यस्मादशेषशक्तिधृक् ॥ तथापि पा
दयोर्व्यस्तहृदयः ॥ निजं वपुः अत्र शेषितं कर्तुं नैच्छत ॥ किं तु स्वमेव लोकमनयत् ॥ अत्र हेतुः ॥ मर्त्येन देहेन किं
न किंचित्कार्यमिति ॥ यद्यप्युक्तं ॥ स्वस्थानामात्मनिष्ठानां दिव्यां गतिं मेऽदृष्टादर्शयन् ॥ अन्यथानेपिदि

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्र शेषि
तं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥ य एनं प्रातरुत्थाय कृष्णस्य पदवीं परां ॥ प्रयतः की
र्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां ॥ १४ ॥ दारुको द्वारिकामेत्य वसुदेवोग्रसेनयोः ॥ पतित्वा चर
णावस्रैर्न्यषिंचत्कृष्णविच्युतः ॥ १५ ॥ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप ॥ तच्छ्रु
त्वोद्विग्नहृदया जनाः शोकविमूर्छिताः ॥ १६ ॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः ॥
व्यसवः शेरते यत्र ज्ञातयो घ्नंत आननं ॥ १७ ॥ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्ण
रामावपश्यंतः शोकार्ता विजहुः स्मृतिं ॥ १८ ॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ उ
पगुह्य पतींस्तात चितामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन्

योगाग्निमनाहृत्य योगबलेन देहसिद्धिं विधाय पश्चात्रैव रंतु यतेरन् ॥ तन्मा भूदित्येतदर्थमिति भावः
१२ एतामुक्तप्रकारां पदवीं गतिं ॥ १३ ॥ तदेव भगवता वलोकं गच्छता ॥ वसुदेवादीनामपि तन्त्या
गयेयउपायाच्चिंतितश्रामीममाहरुकर्त्यादिना ॥ १४ ॥ कृष्णरामौ सुतावपश्यंतः ॥ १५ ॥ १६ ॥ १७ ॥

भा
एधी
८१

अभिप्रायावबिस्मानतः प्रथममप्रिहेदृष्टोतेनस्य पूर्वमजो हृदृष्टप्राप्तनस्तमेवार्थंप्रपंचयति
राजन्नित्यादिभिः ॥ ५ ॥ परस्य सर्वकारणस्य नतु भृत्स्य पद्मादिषु जननाप्ययेहाः ॥ आविर्भाव
तिरोभावचेष्टाः मायया अत्र कारणमात्रमेवैहि ॥ न दोषयथाविहितं नानाहि येजन्मादीत्विदंवा
यतितद्वत ॥ आत्मानावश्यादेवादिषु जन्मादिषु कायावद्विष्ठुसंगतिरोधादिषु मायावि
हतएवात्मनस्तस्याहस्वेति ॥ आत्मनास्वयमेवेदं जगत्सृष्ट्वा अन्तर्यामित्वेनानुप्रविष्टप्रा

प्रस्यस्तद्वदयत्तेनदृष्टा योगगतिं हरेः ॥ विस्मितास्तं प्रयोसेनः स्वं
स्वंलोकं प्रतुष्टदा ॥ ६ ॥ राजन्परस्यतनुभृज्जननाप्ययेहा मायावि
डंबनमवेहि यथा नटस्य ॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते सं
हृत्य चात्ममहिनोपरतः स आस्ते ॥ ७ ॥ मर्त्येन यो गुरुसुतं यमलो
कनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम् ॥ जिग्येन्तकान्तक
मपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहम् ॥ ८ ॥

त्ममहिम्ना आस्ते ॥ ७ ॥ नपुनरन्यथासंनिवेश्यतोस्मिन्नेवावतारेतस्य भावोतिरतिशयोदृ
ष्टइत्याह ॥ मर्त्येनेति ॥ यमेन स्वलोकं प्रतिनीतं गुरुसुतं मर्त्येन ॥ तेनैव शरीरेणाय्यः अनय
त ॥ आनीतवान् ॥ शरणदः शरणागतरक्षकः त्वां च ब्रह्मास्त्रदग्धं योरक्षितवान् ॥ अथ अं
तकानामंतकमपीशं श्रीरुद्रं बाणसंग्रामेजितवान् ॥ मृगयुं लुब्धकं स्वः स्वर्गमनय
त ॥ तस्ये असौ स्वावने स्वरक्षणे अनीशः असमर्थः किं ॥ ८ ॥

८१

योगिनामिव स्वेच्छेदस्वतनुमग्नेर्वारयति ॥ लोकाभिरामामिति ॥ अयमर्थः योगिनो हि स्वं
देहमेवं स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकान्तरं प्रविशन्ति ॥ भगवांस्तु न तथा अ
दग्ध्वैव स्वतनुसहितएव स्वकं धाम वैकुंठाख्यमविशत ॥ तत्र हेतुः लोकानामभिरामः अभि
तो रमणं स्थितिर्यस्यां तां जगदाश्रयत्वेन जगतोपि दाहप्रसंगादित्यर्थः ॥ किंच धारणाध्या
नस्य च मंगलं शोभनं विषयमितरथा तयोर्निर्विषयत्वस्यात् ॥ इत्यपते चाद्या सुमासकाले
तथैव तद्रूपसाक्षात्कारः फलप्राप्तिश्चेति भावः उक्तप्रारीराभिप्रायेण वा यथाश्रुतमे
वास्तु ॥ तत्रापि लोकाभिरामादिभ्यादिविशेषणानामौचित्यमसंगतम् ॥ तदप्यदग्ध्वातिशे

लोकाभिरामां स्वतनुं धारणाध्यानमंगलं ॥ योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं ॥ ६ ॥ दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्री श्चानु तं ययुः ॥ ७ ॥ देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ ८ ॥ सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलं ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥ ९ ॥

धारणानिर्गतत्वमेव सांप्रतं ॥ ६ ॥ तदा तत्स्वमेव लोकमागमि
ष्यतीति संभ्रमेण देवादिकृतः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवो भवदित्याह
दिवीति भूमेः सकाशात् श्रीकृष्णमनुययुः ॥ ७ ॥ तदा श्रीकृष्णे तदृष्टे न सति कुतो गत इति
वितर्कयंतोपि ब्रह्ममुख्या देवादयः स्वधामनि विशंतं श्रीकृष्णं न ददृशुः तत्र हेतुः अवि
ज्ञातगतिमिति किं वितर्कविदग्धमनसोऽतिविस्मिता बभूवुरित्यर्थः ॥ ८ ॥ अविज्ञातगति
त्वे दृष्टांतेन स्पष्टयति ॥ सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते तथाभ्रमंडलं हित्वा गच्छ
तः श्रीकृष्णस्य दैवैरपि न लक्ष्यते किं तत्र मानवैरित्यर्थः ॥ ९ ॥

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्॥ नास्त्यकृतः कृतेन तथा॥ यदा सर्वे प्रमुच्यं-
ते कामा येस्य हृदि स्थिताः अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते इत्याद्या वैराग्यमंगं विदध-
तीत्याह॥ स्वजनसुतेति॥ आत्मा देहः धाम गृहं॥ असवः प्राणाः स्वजनादिभिः किं सर्वैरसौ सुखा-
निविष्टे तेषु स्थितेष्वपि परमानंदे॥ एतत्सेवानंदस्य मात्रा निभृतानि मात्रामुपजीवंती-
त्यस्फुतैः श्रयत त्वां सेवमानस्य पुंसः आत्मनि सति लक्षणोद्वेगैरेतैः किं क उपयोग इति॥ सत्स्व-
स्यपरमार्थे सुखमजानतो अतएव मिथुनतः स्त्रीपुंमिथुनीभूय रतये मायासुखाय च

स्वजनसुतात्मदारधनधामधरासुरथै।
स्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे।
इति सदजानतां मिथुनतो रतये चरतां सुख-
यति को न्विह स्वविहते स्वनिरस्तभगे॥ ३५॥

चरतां प्रवर्त्तमानानां तापत्रयप्रदे देहानां॥ अंतकानुपरतिलिखितेन मायानो॥ आधिव्याधि-
लग्नकोटिप्रहारजर्जरितांगानां विषयपाशपाशितैरावश्यमकरकेनानेन॥ इतस्ततो वि-
कृष्यमाणानां कर्मतिलिखिताविष्टोऽन्नामनतत्परतः पुरुषान्कोन्वयः सुखयति॥ आनंदयति
न कोपीत्यर्थः॥ इह संसारे कथंभूते स्वविहते स्वत एव नष्टे स्वनिरस्तभगे॥ स्वत एव गत-
सारे॥ यद्वा तत्र को न्विह नस्त्येन हि प्रोषणं हृदये अतत्त्वभजनं मे बोधितमित्यर्थः भजतो
हि भवान्सात्वान्परमानंदविहतं॥ आत्मैव किं मतं कुसंततकेदारसुतादिभिः॥ ३५॥

सचभगवतिभावोमनोनियमनेसतिभवति॥ सोपिगुरुप्रसादेनादितिः॥ गुरुप्रसादंतेविदूषयंति
नहिज्ञानार्थंसद्गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठं॥ आचार्यवान्पुरुषोवेदनैषा
तर्केणमतिरापनेया॥ प्रोक्तान्येनैवसुज्ञानायप्रेष्ठेत्याद्याः श्रुतयप्रत्याह॥ विजितहृषीकवायु
भिरिति॥ विजितानिहृषीकाणिइंद्रियाणिवायुश्चप्राणोयैः तैरप्यदांतमनस्तुरगं॥ प्रदांतेप्र
दमितेनमनएवतुरगः तुरंगमस्तत्साम्यात्॥ तंयेयंतंनिग्रहीतुंयतंतिप्रयतंतेतेअतिलोलमतिच
चलं॥ गुरोश्चरणंसमवहाय॥ अनाश्रित्यतेउपायेषुखिद्यंते॥ क्लिश्यंतीत्युपायखिदः सतः॥

विजितहृषीकवायुभिरदांतमनस्तुरगंयइहयतंतियंतुमतिलोलमुपायखिदः॥ व्य
सनशतान्विताःसमवहायगुरोश्चरणंवणिजइवाजसंत्यकृतकर्णधराजलधौ॥३३॥

सनशतान्विताः बहुव्यसनाकुलाः दुरंतसंसारसमुद्रे संतिष्ठंतिपतंतीति॥ दुःखमेवाप्नुवंतीत्यर्थः
हे अज अकृतकर्णधराः अस्वीकृतनाविकाः वणिजो यथापदंत॥ उक्तंच॥ नृदेहमाद्यंसुलभं
सुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारं मयानुकूलेननभस्वतेरितंपुमान्भवाब्धिंनतरेत्स
आत्महा॥ प्राकृतैः संस्कृतैश्चैवगद्यपद्याक्षरैस्तथा॥ देशभाषादिभिः शिष्यंबोधयेत्सगुरुः
स्मृतः॥ गुरुणोपदर्शितभगवद्भजनलक्षणानुभूतेनैवसततएवमनोनिश्चलंभवति॥ नान्यथेति
यदायदानांदशोभवत्पदेपदंमनोमेभगवंल्लभेत॥ तदानिरस्ताखिलसाधनश्रमः श्रये

एवं गुरूपदेशेन तत्वमवगम्य सारासारविवेकेन च सर्वतो निर्विण्णान् देव महत्संगेनोपपत्तिभिः स
म्यगवधारयितुं तीर्थसदनानि भजन्तः पर्यटन्तीति ॥ मतत्वमित्यादिस्कन्धार्थमाह ॥ भुवि पुरु
पुण्यतीर्थसदनानीति ॥ ते उत्कलत्वात् ऋषयो विमदा निरहंकाराः यतः भवत्पदाम्बुजं हृदः ॥ भव
तः पादाम्बुजं ॥ हृदि येषां ते ॥ अतः स्वयमेव ॥ अघभिदंघ्रिजलं येषां ते ॥ उतापि ॥ तथाविधा अपि

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विम ॥
दास्तउत भवत्पदाम्बुजहृदोघभिदंघ्रिजलाः

पुरूणि बहूनि तीर्थानि सदनानि क्षेत्राणि तान्येवोपासते सेवन्ते ॥ आयन्तत्रैव महत्संगो भव
तीति ॥ अथवा पुरूणि अधिकं भगवद्भजनलक्षणं पुण्यं येषां तानि च तीर्थानि च गुरवः महां
तश्च ऋषयः तेषां सदनानि ॥ आश्रमान् ॥ यथाहामरसिंहः निपानागमयोस्तीर्थमृषिजुष्टे
जले गुराविति ॥ न पुनः पुरुषसारहरानवमत्यान्वासते ॥ पुरुषाणां सारविवेकस्थैर्यंद

माशंतिपशुखेदरंतीतितथातेचतेयावसथागृहाःतान॥नचतेषांगृहादिभवकसितख
लापेदेत्याह॥दधतिमनःसकृत्त्वयियज्ञात्मनिनिमग्नसुखेइतिसकृदपित्वयिमनोदधति
तेपिगृहादयासक्तानभवंति॥ किंपुनरेवंभूताइत्यर्थः॥ मेचनत्वंगतदंगसंगमतिशांत्वामेव

सकृन्मनस्त्वयियज्ञात्मनिनिमग्नसुखेनच
नरूपासतेउरुकमसारहरावसथान्॥२८॥

सेचिंतयन्तेनःसंतिपतोयतोमतदमदास्तातामप्रमानावसन्॥तिमंतनस्यपंकजाहि
गलितत्वमसुख्याच्यास्तनस्तोमःसंसवसंस्तुतोनरहदेनस्यामहेदेहमन्॥ २५॥ ॥ ॥
॥॥॥ ॥

ननु आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तेनाम्नायानां क्रियार्थेन समन्वय इति॥ तत्रतत्र॥ जै
मिनिना वेदस्य क्रियापरत्वाभिधानात्॥ उपनिषदामपि तदेव युक्तं॥ यथोक्तं तत्र वार्तिककृता॥ एते
न ज्ञानार्थकत्वं प्रतिपादने॥ नोपनिषदां नैराकांक्ष्यात् ख्यातमिति॥ न एकमेवाद्वितीयं ब्रह्म विज्ञानमा
नंदं॥ अवस्तर आशवः सर्वेन हि परीमार्थप्रतिपादनात्॥ न ह्यद्वितीयपरमानंदरूपस्य कर्मांगत्वं युज्य
ते॥ अनंतमतं चैतद्वार्तिककृतः कथं सर्वं चैव हि विज्ञानं संस्कारत्वेन गम्यते॥ प्रदांगत्वात्मविज्ञाना
दन्यत्र न्यायवृथार्थता॥ मिति तेनैवोक्तत्वात्॥ एतदर्थमेवमननाय सूत्रं यः पर्यंदर्शितः सकलं मावत् द्वैत
सत्त्वे न भवेद् एवं तदेव तत्र न संभवतीति प्रश्नाभ्यां मननेन तत्त्वावधारणप्रकारमाह॥ सतइ इ
सतः इदमुत्थितं सदिति चेत् तत्र तर्कैः दृष्टं व्यभिचरति क्वचित् क्वचित् न्यूष्यान न योऽभय एकं॥ एव
हृतये विकल्पः खिलो धर्मः परया भ्रमय निर्भारतीतऽऽकृष्ट तमिरुत्स्य जडान्॥ २९॥
स्थितमिति॥ सदिति चेदिति॥ इदं यत्किंचिददिति॥ साध्या धर्मः सत्त्वउत्पन्नत्वात्॥ यद्यत् उत्पन्नं तत्सदात्मैव ती
त्तीकमेव दृष्ट॥ यथा कनकाउत्पन्नं कुंडलादि तदात्मकं तद्वदिति॥ तत्र यदि सद्भेदः साध्यते तदा
अपादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुः स्यात्॥ ननु तर्क्यतामिति॥ ननु नाभेदः साध्य
मः किंतु तदुत्पन्नत्वेन कुंडलादिवदभेदः प्रतिषेध्य या मया यादृक् व्यभिचरति॥ पित्रपुत्रादौ व्यभिचार द
र्शनात्॥ ननु तदुत्पन्नत्वं नाम तदुपादानत्वं॥ न तत्सदृशं भिन्नत्वं॥ अतो नानैकांतिकत्वमित्याह क्वचिति॥
क्वचिन्मृषेति॥ गुणोपादानस्यापि फणीनो न गुणत्वं॥ किंतु मिथ्यात्वमन्यथा कुंडलादिवद्वाधप्रसं
गात्॥ अतः पुनरप्यनैकांतिकत्वमेवेति भावः॥ ननु न सनकेवलं गुणमात्रफणिन उपादानं किंतु

एवंभ्रमस्यचनवत्वमसत्त्वं ॥ अतः सदुपादानत्वमसिद्धमिति ॥ नचभ्रमस्यैवप्रपंचस्येति ॥ ननुमादनेनद्वैत
नाप्रपंचस्यसत्त्वंतद्वैतंतरेणानुमाथयामः ॥ तथाहि सदिदमर्थक्रियाकारित्वात् ॥ नयदेवंनतदेवंय
थाशुक्तिरजतमिति ॥ तत्राहब्रह्मनये ॥ विकल्पत्रयमपिनघटतेव्यवहारेणार्थक्रियार्थविकल्पोभ्र
मः ॥ अपितु ॥ दृष्टएवकूटकार्षापणादिनापिक्वचिद्व्यवहारदर्शनात् ॥ ननेकत्वस्यमानस्यारोपोभ्रमं
प्रसिद्धः ॥ अन्येतामसत्त्वेकथंप्रपंचभ्रमः स्यात् ॥ सत्येद्वैतमिति ॥ अतोचभेदः ॥ अथैस्यतत्त्वंच्छायत्वमस
त्कथमुच्यतेति ॥ एतात्रशणामभाक्रमआरोप्यतत्वानवैतितेत्याह ॥ अथयथापरयेति ॥ अथैवपरस्पर्या
योविकल्पस्त्वन्यः ॥ अयंभावः संस्कारजन्मोभ्रमः संस्कारश्चिद्येपूर्वप्रतीतिमात्रमपेक्षते ॥ न
वस्तुसत्त्वप्रतीतोभ्रमानावत्तसत्त्वाभावेनभ्रमव्यतिरेकादर्शनात् ॥ अतोनादित्वात्सर्वपूर्वभ्रमदृष्टस्यो
त्तरोत्तरोभ्रमविषयः ॥ अथपरंपरान्यायेनव्यवहारः सेत्स्यतीत्यप्रयोजनकोहेतुरिति ॥ ननु अत्तत्वेद्वैतवा
त्मर्मास्याजिनः स्वर्गतोभवति ॥ अपामसोममम्रताअभूमेत्यादिभिः कर्मफलस्यानित्यत्वश्रतिपाद
नादसत्त्वंनघटते ॥ नहिनिर्मवस्वप्नसद्भवति ॥ तस्माद्दृष्टानिपादितत्वात् ॥ द्वैतंसद्वेत्याशंक्याह
भ्रमयतीति ॥ हेभगवन् ॥ तेतवभारतीवेदलक्षणा ॥ उरुकृतिभिर्वेदार्थाभिर्गौणलक्षणादिवृत्ति
भिः ॥ उरुकृत्यजगत् ॥ कर्मअवाप्तअवाकान्तमंदमतीन् ॥ भ्रमयतिमोहयति ॥ अयंभावः ॥ नहिवेदः
कर्मफलनित्यमभिधेते ॥ किंतुलक्षणयाप्राशस्त्यमात्रंविध्येकवाक्यत्वात् ॥ अन्यथावाक्यभे
दप्रसंगात् ॥ तद्यथेहकर्मजितोलोकः क्षीयते ॥ एवमेवामुत्रपुण्यजितोलोकः क्षीयतेति ॥ इतिन्या
योपबृंहितश्रुत्यन्तरविरोधाच्चस्वर्गादिनित्यत्वप्रतिपादनंनभवति ॥ उद्यतेभवतः विरोधाच्च ॥ अतः कर्मजन्यानामिदंभ्रममात्र

तदेवं प्रपंचस्य सत्त्वे साधकं नास्तीत्युक्तं ॥ इदानीमसत्त्वे सृष्टिप्रलययोरुक्तनयः ॥ यतो वा इमानि भूतानि जायंते इत्याद्याम्नातत्वं लं चानुमाने प्रमाणमित्याह ॥ नयदिदमिति ॥ यद्यस्मादिदं विश्वमग्रे ॥ सृष्टेः पूर्वं नआसीत् ॥ आत्मा वा इदमेक एवाग्र आसीत् ॥ इत्यादिश्रुतेः ॥ न च नियतनाशत्वलयात् ॥ अनु अनंतरं भविष्यत् ॥ भविष्यति ॥ नासदासीन्नो सदासीत्तदानीं तदानीमित्यादिश्रुतेः ॥ अतः कारणात् ॥ अन्तरा मध्यप्रेपकरणेके वलं त्वयि त्वेषामिथ्यारूपमेव विभातीति मितं मनिश्चितं ॥ यत एवमतः श्रुत्या शिवणाज्ञातिविकल्पपथ्येः ईविणाज्ञानीनां इत्थंभावानां मल्लाहकालायस सहपाशाणविकल्पाभेदाः ॥ घटकुंडलादयः तेषां येषां नामानीः प्रकाराः ॥ तैरूपमीयते सदृशनया निरूप्यते ॥ तथा न चकार्यकारणानां नामधेयनामधेयमा

नयदिदमग्र आसन्न भविष्यदन्तो नियतनाद्नुमितं मनसा त्वयि विभा ॥ ॥
नितृषैकरसे ॥ अत उपमीयते द्रविणजातिविकल्पपथैर्वितथमनो
विलासमृतमित्यवयंत्यबुधाः ॥ ३० ॥ रामानुजायनमः ॥ ३१ ॥

यता कारणं ॥ मृदाद्येव तु सत्यम् ॥ तथाश्याप्याकाशादीनां नाममात्रत्वेऽपि वस्तुत्वं इति निरूपणं इत्यर्थः तथा च श्रुतयः ॥ यथा सौम्यैकेन मृत्पिंडेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्यात् ॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ॥ तथा एकेन लोहमणिना ज्ञातेन सर्वं लोहमयं विज्ञातं स्यात् ॥ तथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसमित्यादि तस्माद् असत्त्वे प्रमाणाभावाद् सत्त्वे प्रमाणस्य विद्यमानत्वात् ॥ वितथं मनोविलासमृतं सत्यमिति ये ऽवयंति जानंति ते अबुधा अज्ञा इत्यर्थः ॥ अबेवेष्ययो वा ॥ विवादाध्यासितं न सत् ॥ आद्यंतयोरविद्यमानत्वात् ॥ विकारित्वाद् स्वप्नवदाद्युक्तिरजना

तत्तु च यद्ययं चोनाम्येवन्तत्वा हतातेन॥ चैतन्यस्य संबंधरागो योऽपि नर्हि किमपराद्धं जीवेन यतः॥ अयं सरति किं वा बहुगुणमीश्वरस्य यतो नित्यमुक्तः॥ किं विषयं च तदा कर्मकांडमित्यपेक्षायामीश्वरविषयं ह्येव तो सपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥ अजामेकां लोहितशुक्लकृष्णाम् अभिमत्यायावर्द्धितीत्याह॥ स यदजया त्वजा॥ मनुशयीत॥ यस्मात्॥ अजया मायया अजामविद्याम् अनुशयीत॥ आलिंगेत्॥ ततो गुणांश्च देहेंद्रियादीन् सेवमानस्तत्कृतान् अथ धत्त॥ तदनु तदनंतरं मृत्युं मृत्युं सेवमानस्तदनु अपेतभगः॥ विदितानंदादिगुणः सन् मृत्युं संसारं भजन्ते अभ्यासेति तद्विषयं च कर्मकांडमिति भावः॥ त्वमुत जहासि तामहिरिव त्वचमात्तभगो

स यदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः॥ त्वमुत जहा-
सि तामहिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः॥ ३८॥ ॥ ॥

वास्तविकं त्वंशांशिभावमाह अहिरिव त्वचमिति अहिरिव त्वचमिति अयं भावः॥ यथाभुजंगः॥ स्वगात्रम् अपि कंचुकं जीर्णत्वेनाभिमन्यते॥ तथा त्वमजां नहि निरंतराभ्यासादिसंवित्कामधेनुं हृदये रज्यामिति तामुपेक्ष्य सदा तिष्ठसि भवतमवाह॥ आत्तभगः नित्यप्राप्तैश्वर्यः महसि परमैश्वर्ये अष्टगुणिते अणिमाद्यष्टविभूतिमति महीयसे सर्वोत्कर्षेण विराजसे॥ कथंभूतः॥ अपरिमेयभगः अपरिमितैश्वर्यः॥ न मेषामिव देशकालादिपरिच्छिन्नत्वात् अष्टगुणितमैश्वर्यं अपितु परिपूर्णस्वरूपानुसंधिबलादपरिमितमित्यर्थः॥ त्वं पतीतव वीतगुणागमनतां कालस्वभावादिभिर्भावात्मतरजस्तमोमयगुणानां वृत्तीलयंतीवहन्त॥ नानाजन्मयदाशिरसाति भरं समर्दयंत्यातरंमायातेषां रणागानो स्मिन्नरूरे तंदेवमोवा

एवं तावद्भक्तसाधनकदंबेन ये भगवंतं भजंति ॥ ते स्त्वं तरंति ॥ इतरे च संसरंतीत्युक्तं ॥ इदानीं ये बहिःसं
गं परित्यज्य भगवन्मार्गे प्रवृत्ता अपि कथंचिदंतर्वासनाशिनः कामान्न मुंचंति ॥ ते न भगवंतं प्राप्नुवंति ॥ न
वेह स्वर्गं लभंते ॥ केवलं दुःखान्येव प्राप्नुवंतीति ॥ ना ज्योचत्न कामान्कामयते ॥ मत्स्यमानः सकर्मभि
र्जायते ॥ तत्र तत्रैवागच्छत्यर्थमाह ॥ यदिन समुद्धरंतीति ॥ हे भगवन् ॥ ये यतयः हृदि स्थिताः कामजं
टाः कामस्य मूलानि वासनाः ॥ यदिन समुद्धरंति ॥ नोत्पाटयंति ॥ तेषामसतां भगवान् ॥ हृदिगतो
पि दुरधिगमः दुष्प्रापः कथं अस्मृतकंठमणिः ॥ विस्मृतकंठमणिरिव तल्लभ्यः ॥ स यथा कंठे वर्तमानोपि

यदिन समुद्धरंति यतयो हृदि कामजटा दुरधिगमोसतां हृदिगतोस्मृतकंठमणिः ॥ असुतृप
योगिनामुभयतोप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥ ३९ ॥

अस्मृत इवेदमामत्वाभाति ॥ न दहतीति ॥ न केवलमेतावत् ॥ किंतु ॥ असुतृपयोगिनामिंद्रियतर्पणप
राणां ॥ योगाभ्यासिनामुभयतोप्यसुखं ॥ इहामुत्र च दुःखमेव तदाह ॥ अनपगतांतकात् ॥ अनिवृत्ता
न्मृत्योः लोकाराधनधनार्जनादि क्लेशात् ॥ भोगवैभवशोकभयादेहमावृत्तेः एव ॥ भगवतः ईश्व
रादपि दुःखं ॥ कथंभूतादनधिरूढपदात् ॥ अनधिरूढं पदं स्वरूपं येषां तस्मात् ॥ तत्स्वरूपप्राप्त्यभा
वाद्विद्यावद्विषयत्वेन प्राप्त निरयं सीतिक्रमानि वेधन ॥ त्वदंघ्रिरूपेन रक्षामि ॥ रसुनाम्य सुखमिति
र्थः ॥ हृदभ्यासमिषेणैवं विनतजनं भोगैकचिंतानुदेशं सुसानमन्निर्हुंगविरचितो द्योगात्क्रमे राकुल

स्वात्मालं बितमतजननतासत्मानतानस्मदं दीनानां
यदयानिधान परमानंद प्रभो पाहि माम् ॥ ३९ ॥

श्री॰
भा॰स्क॰
३०
११८

ननु यतेर्वं किमपि ह्रुतसमाप्ति ॥ प्रारब्धमेव सुखोपभोगेनापलिप्यते ॥ अतः किमपि द्रष्टव्यात्याप्यते उभ॰
यतोप्यसत्वमिति ॥ श्रूयते च ॥ एष नित्यो महिमा ब्राह्मणस्य ॥ न कर्मणा वर्धते नो कनीयानित्यादि त
याद्द ॥ त्वदवगामी ति ॥ हेसद्गुणापहृणोऽप्यर्थयुक् ॥ त्वदवगामी न ज्ञानवान् ॥ भवदन्यशुभाशुभयोः भव॰
तः कर्मफलदातुरीश्वराद्धेतोः ॥ उभयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्मभिः फलभू
तान्सुखदुःखसंबंधान् ॥ न वेत्ति नानुसंधत्ते ॥ तर्हि तदानीं च देहभृतो देहाभिमानिनां प्रवृत्तिकरीर्गिरः
विधिनिषेधलक्षणा न वेत्ति ॥ विगतदेहाभिमानतया कार्यबोधाभावान्न नियुज्यते इत्यर्थः ॥ युक्तं चैतत् ।

त्वदवगामी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः ॥ अनुयुग
मन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ ४० ॥ रामानन्ता

यतः कारणात्त्वं मनुजैरन्वहं श्रवणभृतः ॥ श्रवणेन चेतसि धृतस्त्वं तेषामपवर्गगतिः ॥ अपवर्गरूपा
गतिर्भवसि ॥ कथं श्रवणभृतः ॥ अनुयुगं सगुण गीतपरंपरया ॥ उपदेशसंततिस्तया तत्संप्रदा
यानुसरणेनेत्यर्थः ॥ एतदुक्तं भवति ॥ ये तावत्तत्त्वज्ञानिनः ॥ न तेषां कर्माधिकारशंकापि ॥ ये चानव
रतं ॥ त्वत्कथाश्रवणादिनिष्ठास्तेषामप्यवसराभावात् दानानां विधिनिषेधबाधा ॥ इतरेषां तु योग
क्षेमं नैष्ठिकलालनलालसानामनुभयतोप्यसत्वमिति ॥ श्रवणमेतद्वमेदिशमायव स्फुरति यत्र सुखं
सुखसंगमः ॥ श्रवणवर्णनभावमयापि वा तदहं भवामि यथाविधि किंकरः ॥ ४० ॥ रामानन्दायन
मः ॥ रामकीर्तनम् ॥ ४०

११८

इत्यशेषसमाम्नायोपनिषद्रस इति ॥ सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥ ब्रह्मदायादेति ॥ ब्रह्मैव दाय मिवायनं यस्य ॥ अतिसेवते इति ॥ तथा ब्रह्मपुत्रैर्निवाहर्णाः ॥ कृतं कृत्यं ॥ फलमर्थमनसि धारयेत् ॥ बी।

श्रीशुक उवाच ॥ इत्येतद्ब्रह्मणः पुत्रा आश्राव्यात्मानुशासनं ॥ सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनो गतिं ॥ इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥ त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशासनं ॥ धारयंश्चर गां कामं कामानां भर्जनं नृणां ॥ ४४ ॥ **श्रीशुक उवाच** ॥ एवं स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥ ४५ ॥ **नारद उवाच** ॥ नमस्तस्मै भगवते कृष्णायामलकीर्तये ॥ यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ ४६ ॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोऽगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥ ४७ ॥ सभाजितो भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतम् ॥ ४८ ॥ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः कृतस्त्वया ॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥ ४९ ॥

एवं तर्हि नैष्ठिकः नमस्तस्मै कृष्णावतार तथा नारायणं च नमस्य इति ॥ उक्तं हि ॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति ॥ साक्षात्पितुरिति ॥ योनिजत्व यथा नैवं विना जनकस्याग्निमंथनावसरे कथंचिदरणौ रेतः पतितं स मंथव्यासवत्तदैव ततउत्पन्नः शुक इति द्विवदं

श्री. भा. द. १२०

१२०

तदवगामी ॥ नवेत्रिसूत्वद्धः खेनच विधिनिषेधाविसृष्टं ॥ तत्रननु कथमवगंतुं शक्यं तु स्वगमनस्यो
केत्वादिनेवमाशंक्य सत्यमनवगाह्यम हिम्नो वाङ्मनसोरत्वाद विषयत्वेनैवज्ञानमिति दर्शनम् ॥ यद्दे
धुंगापुर्यद्वीक्ष्य विद्यायदंतराद्यावापृथिवीइम पद्भूतंचभवद्भविष्यद्वेत्यादिश्रुतिप्रतिपादितमप
रितं महिमानमाह ॥ द्युपतयएवेति ॥ हे भगवन् ते अंतं द्युपतयः ॥ स्वर्गादिलोकपतयो ब्रह्मादयोपि
नययुः नप्रापुः नतु केनः यदनवद्धत्वात् किमपिनभवसि ॥ आत्मा द्युपतयो नययुरिति यद्यस्मात्त्वम
पिआत्मनोंतं नयासि ॥ कुतस्त्वं हि सर्वज्ञतासर्वशक्तितावा ॥ अतआह ॥ अनंततया ॥ अनंताभावेन ॥ न
हि शशविषाणस्तानं सर्वज्ञतादृत्ति ॥ नतद्रशमित्वाशक्तिवैभवं विहन्ति ॥ अनंतत्वमेवाह ॥ यदंतरेति ।

द्युपतयएवतेनययुरंतमनंततयात्वमपियदंतरांडनिचया ॥ ननुसावरणाः खंरखं रजांसिवांति
वयसासमहयश्रुतयस्त्वयिहिफलंत्यतन्निरसनेनभवन्निधनाः ॥ ४१ ॥

यस्यत्वंततवामध्ये ॥ नत्वहोसावरणाः उत्तरोत्तरदशगुणसमावरणयुक्ताः अंडनिचयाः ब्रह्मांडसम
हाः वांति परिभ्रमंति ॥ वयसाकालचक्रेणत्वेरजांसीवसहएकदेव ॥ नत्वपर्यायेणेह यस्मादेवं अतः
श्रुतयस्त्वयिफलंति ॥ तात्पर्यं वृत्त्यापर्यवसंति ॥ अयमेतावानिति ॥ सगुणस्यगुणानंत्यात् ॥ निर्गुण
स्यागोचरत्वात् ॥ कथंतर्हिपदार्थतात्पर्यमिति ॥ नत्रविधिपिवलिवाकोभवेदयंनियमः पदार्थस्यैववा
क्यार्थत्वमिति ॥ निषेधमुखेनत्वनायंनियमस्स्यात् ॥ अतन्निरसनेनेति ॥ अस्मदेवनहिहि नादृशा अवि
दितात् ॥ अल्पत्वधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ॥ अस्थूलमनणिवत्यादिपका
रेणलक्षणयाच ॥ तत्वमसीत्यादयः पर्यवस्यंति ॥ नचवाच्यं ॥ निषेधेः शून्यमेवज्ञाप्यतइति यतः भ
वन्निधनाः भवति त्वयि निधनं समाप्तिर्येषांतास्तया ॥ नहिनिरवधिमतेनवायिफलंतीत्यर्थः ॥ ४१ ॥

समस्तवेदसमर्थं संग्रहेणानुस्मारयति ॥ यो ऽस्योत्प्रेक्षक इति ॥ यत्र अस्य विश्वस्योत्प्रेक्षकः एवमिदमनुष्ठापयि-
तो मम स्वरूपसाधर्थ्यसिद्धये ॥ सृष्टिस्थितिप्रलयान् आपनीयमित्यालोचक इत्यर्थः अनेन नित्यमुक्तं एव
मालोच्याप्यादिमध्यनिधने ॥ आदिर्जन्म मध्यं पालनं निधनं मृतं ॥ एतेषु कर्मसु यो वर्तते ॥ अनेनोपादानत्वमु-
क्तं ॥ ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वप्रसिद्धेः सत्यं तयोरपि तत्पर्वोद्भवत्वान्नलकारणस्य एवे-
त्याह ॥ यो ऽव्यक्तजीवेश्वर इति ॥ प्रवेशं नियमेन दर्शयति ॥ पूर्वोक्तप्रकारेणेदं सृष्ट्वा ॥ यदर्थमेतत्सृष्टं तेन
ऋषिणा सह एकार्थग्रहमिति दर्शनादृषिः जीवः ॥ तेन सहानुप्रविश्य पुरः शरीराणि ॥ तस्यैशासयतनाति

यो ऽस्योत्प्रेक्षक आदिमध्यनिधने यो ऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शा-
स्ति ताः ॥ यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेद-
जस्रं हरिं ॥५०॥ इति श्रीभागवते दशमस्कंधे नारदनारायणसंवादे सप्ताशीतितमो ऽध्यायः ॥८७॥

चक्रे ताः पुरः शास्ति प्रशास्ति लेशेन इति तथा स जीवः अजां कार्यकारणलक्षणामविद्यां जहाति ॥ नन्व-
नुसंपन्नस्यापि जीवत्वं तद्वदेवापद्यते ॥ अत आह ॥ सुप्तः कुलायं यथेति ॥ यथा सुप्तः शरीरत्वं नैव प-
श्यति ॥ सन्तु तास्मानं यथा पश्यतीति ॥ एवं जीवत्वं तत्कमपि न देहत्वं न पश्यति ॥ सत्त्व न किंचित्पश्यती-
ति तं हरिमजस्रमनवरतं ध्यायेत् ॥ किंभूतमत आह ॥ अभयं न भयं यस्मात् ॥ भयनिवर्तकमित्यर्थः कुत एत-
त्कैवल्यनिरस्तयोनिं कैवल्येनात्मस्वरूपावस्थानेन निरस्ता निरस्ता योनिर्मलकारणं माया येन तं
ते ॥५॥ सर्वश्रुतिशिरोरत्ननीराजितपदांबुजं ॥ भोगयोगप्रदं वंदे माधवं कर्मिनम्रयोः ॥१॥ ॥ इति श्री-
भावार्थदीपिकायां सप्ताशीतितमः ॥ ८७ ॥ ॥ ॥ रामानन्दाय नमो नमः ॥ ८७ ॥ ॥ रामः

अष्टाष्टीतिनमेविष्णुभक्तस्यैवलक्ष्मपते ॥ ततोवासेदवभक्तस्तुविभ्रांतिमितिवर्णिते ॥ हरिर्भजनोमु।
क्तिरस्यतुकममयथ्यायेदनसमिति ॥ तरुशंकते ॥ देवासुरेति ॥ अशिवं ॥ अवयीवितभोगां ॥ भोगाः सो
तीकः लक्ष्म्याः पतिंसर्वभोगगुणं ॥ अन्योपमर्दनं ॥ तमसत्वविष्णाविलिंगात्वमाह ॥ वैकाविकरुति ॥ अ
हंयुहंकारः विकाराः मनइंद्रियभूतरूपाः षोडशेति ॥ इंद्रियदेवानामभेद विवयाकंचनेनियमि
विद्विकारोपाधिकंभजन ॥ उपाध्यनुरूपाणांविभजीनांस्वरूपंभावोजीति ॥ उपद्रष्टासाक्षीसन् य
तः सर्वदृक्सर्वंपश्यति ॥ अतः प्रकृतेः परइति ॥ तदेवदंतत्वं ॥ वस्तुतोगुणासेवथरूपद्वयमिहोच्य
राजोवाच ॥ देवासुरमनुष्येषु ये भजंत्यशिवं शिवं ॥ प्रायस्ते धनिनो भोजा नतु लक्ष्म्याः प
तिं हरिं ॥ १ ॥ एतद्वेदितुमिच्छामः संदेहोत्र महान्हि नः विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भ
जतां गतिः ॥ २ ॥ श्रीशुक उवाच ॥ शिवः शक्तियुतः शश्वत्त्रिलिंगो गुणसंवृतः ॥ वैकारि
कस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ३ ॥ ततो विकारा अभवन्षोडशामीषु कंचन ॥ उप
धावन्विभूतीनां सर्वासामश्नुते गतिम् ॥ ४ ॥ हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः
ते तद्धर्मीयोगुणोगाभ्यांविवर्तत ॥ शरणः स ॥ स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ ५ ॥
श्रादयः प्रागन्तोरहपाः स्वभावनः ब्रह्मविष्णुशिवानां च गुणायत्नस्वरूपिणां ॥ नातिभेदो भवेहेदो
गुणधर्मविद्वाशतः ॥ स त्वसंज्ञान्मा नो जानातुर्विज्ञो विलेपमृत्ने ॥ रजस्तमो गुणाभ्यां तु भवेता
ब्रह्मरुद्रयोः ॥ गुणोपमर्दतो भूयस्तदंशानां च भिन्नता ॥ अतः समग्रसत्वस्य विष्णोर्मोक्षकरी
मतिः ॥ अंशतो मे निरुतेष्वतथानंदमयः स्वतः ॥ अंशतस्तारतम्येन ब्रह्मरुद्रादि सेविनां ।

यस्याहमनुगृह्णामीति ॥ अयमर्थः ॥ यो विषयासक्तिनिर्वीर्णुरपि कथंचिद्विद्यमानेष्वसज्जते क्षिप्रमेव च ॥ न
सर्वविषयापहारएवानुग्रहः इति यथाश्रुतमेव फलवादीनामभिप्रायैर्विरोधात् ॥ अथवा प्रथमं विभूतीः का
मानुरूपाः दत्त्वा पश्चान्मे विषयभोगावमानेन तस्य निर्वेदमुत्पाद्य हरिष्यामि ॥ परमानुग्रहकांक्षिणमिति ॥ न
ह्यकं भगवानेव ॥ न मय्यावेशितधियां कामः कामाय कल्पते ॥ इति दुःखदुःखितमिति दुःखादनु दुःख

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः । शृण्वन्भगवतो धर्मानपृच्छदिदमच्युतं ॥ ५ ॥ स आह
भगवांस्तस्मै प्रीतः शुश्रूषवे प्रभुः । नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोः कुले ॥ ६ ॥ श्रीभ
गवा ॥ यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजंत्यस्य स्वजना दुःखदुःखितं ॥ ७
स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया । मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहं ॥ ८ ॥ तद्ब्रह्म
परमं सूक्ष्मं चिन्मात्रं सदनंतकं । ततो मां सुदुराराध्यं हित्वान्यान्भजते जनः ॥ ९ ॥ ततस्त आशु
तोषेभ्यो लब्धराज्यश्रियोद्धताः । मत्ताः प्रमत्ता वरदान्विस्मयंत्यवजानते ॥ १० ॥ श्रीशुक उ ॥ शाप
प्रसादयोरीशा ब्रह्मविष्णुशिवादयः । सद्यः शापप्रसादोंऽग शिवो ब्रह्मा न चाच्युतः ॥ ११ ॥ अ
त्रैवोदाहरंतीममिति[illegible]ाविदः । वृकासुराय गिरिशो वरं दत्त्वाप संकटम् ॥ १२

खितमिति प्रतीयमानमित्यर्थः ॥ स पुनर्बंधुनामाग्रहेण धनेहयाप्यहूनोपि ॥ मदनुग्रहे यदि निष्क
लोऽयमो निर्विण्णः स्यात्तदा मदनुग्रहमिति ॥ ममासाधारणमनुग्रहं तमेवाह ॥ तद्ब्रह्मेति ॥ ततः पश्चा
दपि मामसेवयन् ॥ यत्वाशु तोषजनस्त्वर्थः पतदेवेनिरूपसेन स्पष्टयितुमाह ॥ शापप्रसादयोरि
ति ब्रह्मा चेत्यन्वयः ॥ १२ ॥ तामानुजायवमभ ॥ १२ ॥

श्री भा० ह० २२२

शाकुनेः पुत्रः स्वसंकटमापन्नैर्लामोम्यादनेपुरपालनं च स्वगात्रतडपधावत ॥ कथमात्मक्रमेण ॥ स्वमो
मेन नुद्नेवरनिर्वन्मस्यत ॥ छेत्तुमुद्यतः स निमानग्निरिवदेदीप्यमानो वयमधुनाततनाः ॥ यथा किंचि
डुः खिन्नमनेकामेवारयामस्तदादिनि ॥ स च उपस्तुताक्षुतिः परिपूर्णदेहो भवति ॥ त्वावारयन् ॥ एवमा
कर्णनामासरभु नः शाकुनेः पश्चिनावदं ॥ दृष्ट्वा सुवोषं पश्चेद्देवेषु विष्डमतिः ॥ २३ ॥ सयाद
देवगिरिशमणा धावाम्यु सिद्यति ॥ योल्याभ्या गुणदोषाभ्यामास्तुनुष्यतिकुप्यति ॥ २४ ॥ दशा
स्वाबाणायोस्तहः स्तवनोर्वदिनो विव ॥ पेश्वर्यमतुलं दत्तानंतयापद्मसंकट ॥ २५ ॥ इत्यादिष्ट
स्तमहत्तु रउपाधावत्स्वगात्रतः ॥ केदारप्रात्मक्रमेणाल्लुहकुत्रग्निस्तु त्वहस्म ॥ २६ ॥ देवोपनविम
प्राप्यात्वैदातमसमेहति ॥ शिरो हृत्वात्स्वविनिनानतीर्थाज्ञिनत्रमस्धेन ॥ २७ ॥ तदा महामहा
कारुणीकः सपूजेरिर्धयावयं वाग्निरिवोस्थितोनलात् ॥ निरदहदोभ्यां भुजयोस्पवायवः
स्पर्शनाडयु उपस्तुतानाक्षुतिः ॥ २८ ॥ तमादवोगालमलदृष्णीष्वमे यथाभिकाममविनराशितेव
॥ पीयेयतो येनत्वराणास्य पद्यतामदं त्वया मामस्शमयीतेत्रुध्या ॥ २९ ॥ देवं सवबेणापीयात्व
देमतभयापदं ॥ यस्य यस्य करे शीर्षं सिद्धास्य सनिपतामिति ॥ ३० ॥ तच्छ्रुत्वा भगवान्रुद्रो सद्
मिनाश्वभारत ॥ ओमितिप्रहस्य स्त्रसेदहेहेरस्तनेयथा ॥ ३१ ॥ इत्युक्तः सोसुरोन तं गौरीहृदयम
लालसः ॥ सनदस्पशीर्षाद्या शंभोर्मूर्ध्नि किलासुरः ॥ ३२ ॥ स्वहस्ते द्रानुमारे भेसो ऽविभ्यत्वत्
ताद्धिवः ॥ तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः ॥ यावदंतं दिवो भूमेः काष्ठानामुदगादुदक् २४
यतो यतो धावति तत्र तत्र ॥ सोनयावदेहोत्वयापी ग्रतेइति ॥ दानुमनदमविदत्रवान् ॥ सर्वा
पत्नीरमिव उपसृष्टमनुगतउरगान् ॥ यथावन् ॥ ३२क ॥ उसरतः ॥ २५ ॥ ॥

२२२

वैकुंठं श्वेतद्वीपं तद्वत्कामसरं ॥ तथा व्यसनं ॥ नाह व्यसनं ॥ तं वृजिनार्दनः ॥ दुः व्यहं नाहम्तनपवहस्तमे स्वला
दिभिरुपलक्षितः प्रत्युदियात् ॥ संमुखमागतः व्यक्तं निश्चितं ॥ किं किमर्थं श्रान्तो दूरं सर्वः पुरुषार्थः
दत्तः ॥ अतो मां पीडयेति ॥ प्रायशः पुंभिर्धृतैः भावान् ॥ स्वार्थान्समीहते ॥ साधयितुमिच्छति ॥ अथ वा जन
ग्रस्तानंतः प्रतिनिवर्तितुं स्त्री मासन्तरे स्वराः ॥ ततो वैकुंठमगमद्भास्वरं तमसः परं ॥ २५ ॥ यत्र नारा
यणः साक्षान्न्यासिनां परमा गतिः ॥ शान्तानां न्यस्तदंडानां यतो नावर्तते गतः ॥ २६ ॥ तं तथा व्यस
नं दृष्ट्वा भगवान्वृजिनार्दनः ॥ दूरात्प्रत्युदियाद्भूत्वा बटुको योगमायया ॥ मेखलाजिनदंडाक्षै
स्तेजसाग्निरिव ज्वलन् ॥ तमभिवादयामास कुशपाणिर्विनीतवत् ॥ २८ ॥ श्रीभगवानुवा०
शाकुनेय भवान्व्यक्तं श्रान्तः किं दूरमागतः ॥ क्षणं विश्रम्यतां पुंस आत्मायं सर्वकामधुक् ॥ २९ ॥
यदि नः श्रवणायालं युष्मद्व्यवसितं विभो ॥ भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते ॥ ३० ॥
श्रीशुक उ० ॥ एवं भगवता पृष्टो वचसामृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठितं ॥ ३१ ॥
श्रीभगवानुवाच ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि ॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाच
राट् ॥ ३२ ॥ यदि वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां ॥ ३३ ॥ य
द्यसत्यं वचः शंभोः कथंचिद्दानवर्षभ ॥ तदैनं जह्यसद्वाचं न यद्वक्तानृतं पुनः ॥ ३४ ॥ इत्थं भग
वतश्चित्रैर्वचोभिः स सुपेशलैः ॥ भिन्नधीर्विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् ॥ ३५ ॥
नः पुंभिः सहायैः स्वकार्याणि साधयति ॥ अतो नः कथ्यतामिति ॥ पैशाच्यं पिशाचानामधिपतित्वं ॥ य
द्यथावदिष्यतीति विश्रंभः भामकैः सुपेशलैः रतिरम्यैः भिन्नधीः भ्रंशितमतिः ॥ २५ ॥

श्री
भा०
द
१८

विसुवावरूत्वं ॥ विश्वेशोत्वयिकृतागाः कृतापराध इति ॥ अव्याकृतशक्त्युदन्वतः वाङ्मनसोरगोचरशक्ति समुद्रस्य गिरित्रमोक्षं शिवमोचनरूपं ॥ चरित्रं संसृतिभिर्नानारूपसंचारैः ॥ ४० ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे अष्टाशीतितमोध्यायः ॥ ८८ ॥ ॥ नवाशीतितमे देवः को महानिति संशये । परीक्षा विस्तो ।

वृक्यापतच्छिन्नशिरा वज्राहत इव क्षणात् ॥ जयशब्दो नमःशब्दः साधुशब्दोभवद्दिवि ॥ ३६ ॥ मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे ॥ देवर्षिपितृगंधर्वा मोचितः संकटाच्छिवः ॥ ३७ ॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः ॥ अहो देव महादेव पापोयं स्वेन पाप्मना ॥ ३८ ॥ हतः को नु महत्स्वीश जंतुर्वै कृतकिल्बिषः ॥ क्षेमी स्यात्किमु विश्वेशे कृतागस्को जगद्गुरौ ॥ य एवमव्याकृतशक्त्युदन्वतः ॥ परस्य साक्षात्परमात्मनो हरेः गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथारिभिः ॥ ४० ॥ इति श्रीदशमस्कंधे अष्टाशीतितमोध्यायः ॥ ८८ ॥ श्रीशुक उवाच ॥ सरस्वत्यास्तटे राजन्नृषयः सत्रमासत ॥ वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ १ ॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप ॥ २ ॥ तज्ज्ञप्त्यै प्रेषयामासुः सोभ्यगाद्ब्रह्मणः सभाम् ॥ २ ॥ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्त्वपरीक्षया ॥ तस्मै चुक्रोध भगवान्प्रज्वलन्स्वेन तेजसा ॥ ३ ॥ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः ॥ अशीशमद्यथा वह्निं स्वयोन्या वारिणात्मभूः ॥ ४ ॥

तत्कर्षस्तु निभ्योवणीयद्गुरुः ॥ १ ॥ इति ज्ञानं तस्मादस्मादित्यस्मादिति । स्वयोन्या स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येण अग्निः तेन यथा कश्चिदग्निं शमयति तथा स्वकार्येण पुत्रेण पुत्रेणानिमित्तेन तेन क्रोधं शमयामासेत्यर्थः ॥ ४ ॥ रामानुजायनमः ॥ रामानुजायनमः ४

१३१

ते महामुनेवत्रे कर्कशमहतः स्पर्शेन परिपीडितो ० यत्नु स्काविप्रचरणौ ४५ मूल

तीर्थीकारिणातीर्थं तु निमित्तं न तस्य महत्यां गाम्भीर्याम्गिता निर्ह्लेमः तस्मै बभूव निःशेषः ॥ विस्मिता अपगतानि रेके विनिर्विकारत्वेन भूयोमे ॥ अहंपुः मदनमं निश्चितवेन ॥ यतो यस्मिन्न वैराग्यं च तु विधमिनि पावेन वातविध्वमेव दृश्यं ॥ विषयाः स्पृष्टुं मशक्तवनोपि सम्मानेच्छा त्यागेनामाघवे

ततः कैलासमगमत्स्तं देवो महेश्वरः ॥ प्रविशं तु समारेभे उत्थाय ध्यानरमुद्रां ॥ ५ ॥ नेत्रं नु मस्य सूपयत्रतिदेवस्तु कोपवान् ॥ शूलमुद्यम्यतेद्रष्टु मारेभे निगमलोचनः ॥ ६ ॥ पतितानां पादयोर्देवी सांत्वयामास सन्मिगिरा ॥ अथो जगाम वैकुंठे यत्र देवो जनार्दनः ॥ ७ ॥ ध्यायानश्रिय उत्संगे पदाव तस्य नारायणः ॥ तत उत्थाय भगवान्महल्लक्ष्म्यासनो गतिः ॥ ८ ॥ स्वमत्यादवरुह्यासु तं नाममित्रसमासुनि ॥ आहते स्वागतं ब्रह्मत्विषीदासनेव्रणा ॥ ९ ॥ अज्ञानतामागतानः त्वं तुमर्हथनः प्रभो ॥ अनीवकोमलौ नानचरणौ मर्दयन्नेनपाणिना ॥ १० ॥ ननु हि सह लोकं सा लोकपालाश्च मकृतान् ॥ ११ ॥ पादोदकेन भवतः त्वं तीर्थानां तीर्थकारिणा ॥ अथाह भगवल्ल स्याश्रा मम एकांतमाजने ॥ १२ ॥ वत्सस्तुरसि मे भूनिर्भवत्साद हृतांहसः ॥ १३ ॥ श्रीशुक उवाच एवं ब्रुवति वैकुंठे भृगुस्तन्मंद्रयागिरा ॥ निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठाश्रुलोचनः ॥ १४ ॥ पुनश्च सत्रमाव्रज्य मुनीनां ब्रह्मवादिनां ॥ स्वानुभूतमशेषेण राजन्भृगुरवर्णयत् ॥ १५ ॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ॥ भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतोऽभयं ॥ १६ ॥ धर्मः रागं पंतनो विषयाणाम भेलवणादिव (साज्ञाद्य नाज्ञानं वैराग्ये च नत्त्विन ॥ पेस्वयं चार्थाय तिरेकेणापि हृत्निर्दिनीयं न यथा तन्नावपिमन स्मि रागशेषिसेन बासे न्द्रिये रेव विषयसेवनं त

तस्य भगवत एव यस्यपि विविधाश्चाकृतयः तत्र नामस्य तस्यैव तीर्थस्याथ ते गुरुपार्श्वदेवतः इत्थं नि
श्चित्य सरस्वतीतीर्थवासिनो विप्राः इति स्वयासुक्तिं प्राप्तरिति व्यासनंदनस्य मुखपंकजाद्गुरुतगो
यपीयूषं तुलोचहरैः प्रशान्तयशोयः संसारी सेवनेन समुक्तो भवतीति ॥ सवोकंललनगो भगवा
न् ॥ कल्पएव तिदर्शयितुमात्मानो नरमाह ॥ एकदेति ब्रह्मगद्यदूषरत्यादिकोनोनमाथ्यो वाक्य
मुनीनां न्यूनदृष्टानां शरणानां समचेतसा ॥ अकिंचनानां साधूनां यमाहुः परमां गतिं ॥ १८
तस्य यस्याविद्याम‍त्रिशीष्णेणाल्लिस्य देवता ॥ भजतस्तनाशिषः प्रांतायेवानिगुणं बुद्धयः ॥
विविधाकृतयस्तस्य तत्सामरा स्मराः ॥ गुणितेनमायया स्पृष्टाः सम्यक्तीर्थस्य साधने
१९ ॥ शुकउवाच ॥ एवं मात्रस्य नाविप्रानुद्गाणांसे सुयसुकृतये ॥ गुरुपसंपदांभोज सेवयातत्कृ
तिंगतः ॥ २० ॥ सूतउवाच ॥ इत्येतन्मुनितनयास्य पद्मगंधपीयूषं भवभयभित्परस्य
प्रेसः श्लोकं श्रवणपुटैः पिवंत्यभीक्ष्णं पांथो ध्वभ्रमणपरिश्रमं जहाति ॥ २१ ॥
श्रीशुकउवाच ॥ एकदाद्वारवत्यांतु विप्रपत्न्याः कुमारकः ॥ जातमात्रो मृतः स्यूतम्मा
रकिल भारत ॥ २२ ॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः ॥ इदं प्रोवाच विलपन्
तुरो दीनमानसः ॥ २३ ॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः ॥ क्षत्रबंधोः कर्मदोषात्पं
चत्वं मे गतोऽर्भकः ॥ २४ ॥ हिंसाविहारं नृपतिं दुःशीलमजितेंद्रियं ॥ प्रजा भजंत्यः सीदंति द
रिद्राः नित्यदुःखिताः ॥ २५ ॥ एवं द्वितीये विप्रर्षिस्तृतीये त्वेवमेव च ॥ विसृज्य स नृपद्वा
मायिनकाश्चिद्दोषः अतो राजदोषेणैव मन्यन्ना नियंतेऽश्लेनिवारेवारणंचुक्रोशेऽस्मद्यर्थः ॥ ब्रह्मस्तत्रकिंक

तदेवाह ॥ धनदारात्मजाप्तज्ञातिधनादिभिर्विमुक्तः यत्र येषु जीवत्स्वशोचंतितेजीवंतिकेवलंजीविकासंभा
दयं तिद्दतकल्मषः इति अग्निप्रवेशेन ब्राह्मणाविलापश्रवणापातकात्स्वतो भवेयमित्यर्थः ॥ अहतकल्मष
पक्षे द्वितिवा तत्र्यहं यमेहनसंप्रतीमः ॥ एवं प्रोहि वादो विसंभितः विप्रासंप्रापितः तिशाययतत्क्षणावेत

धनदारात्मजाप्तज्ञा यत्र शोचंति ब्राह्मणाः ॥ तेवैरा नत्पवेशेन न दाक्षीवं त्पसंभवाः ॥ २१ ॥ अहं धना
वांभगवत्तिष्ठेदीनयोरिह ॥ अनिस्तीर्णप्रतिज्ञोग्निं प्रवेक्ष्ये हतकल्मषः ॥ २० ॥ ब्राह्मण उ० ॥ सक
र्षणोवासुदेवः प्रद्युम्नो धन्विनांवरः ॥ अनिरुद्धोप्रतिरथो न त्रातुं शक्नुवंति यत् ॥ २ ॥ तत्कथं नु भवा
न्कर्मदुष्करं जगदीश्वरैः ॥ त्वं चिकीर्षसि बालिश्यान्न तच्छ्रद्दध्महे वयं ॥ २३ ॥ अर्जुन उ० ॥ नाहं संकर्ष
णोब्रह्मन्न कृष्णः कार्ष्णिरेव च ॥ अहं वा अर्जुनो नाम गांडीवं यस्य वै धनुः ॥ २४ ॥ मावमंस्था मम ब्रह्म
न्वीर्यं त्र्यंबकतोषणं ॥ मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ॥ २५ ॥ एवं विस्रंभितो विप्रः फाल्गु
नेन परंतप ॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ॥ २६ ॥ प्रसूतिकाल आसन्ने भार्याया द्वि
जसत्तमः ॥ पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ॥ २७ ॥ स उपस्पृश्य शुच्यंभो नमस्कृत्य महे
श्वरं ॥ दिव्यान्यस्त्राणि संस्मृत्य सज्यं गांडीवमाददे ॥ २८ ॥ न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः ॥
तिर्यगूर्ध्वमधः पार्थश्चकार शरपंजरं ॥ २९ ॥ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः ॥ सद्योदर्श
नमापेदे सशरीरो विहायसा ॥ ३० ॥
अस्त्राणि पेतकात्वेनकृसावत्त्रया मदेश्वरं नमस्कृत्यत्यरु
णात् ॥ आहतवान् ॥ तदेवाह तिर्यगूर्ध्वमिति ॥ अदर्शनमापेदे ॥ देहोपि ॥ नावशिष्टइत्यर्थः ॥ ३० ॥
रामानुजायनमः ॥ ॥ ॥

यस्य प्रभोः तमत्र प्रद्युम्नः वारितस्तमपपत्तिभिः प्रतिषेधं कुर्वता ॥ मावज्ञ मावज्ञां नीहि ॥ ये ते इदं ते ॥ त एव मनुष्याः
नः कीर्तिं स्थापयिष्यन्ति ते ख्यलोकारि ष्यति ॥ पाठान्तरे तच्छेदो भंगाभयादागंतुकमिति ॥ सप्त सप्तसंख्या गिरयो ये

तत्राह विप्रो विजयं विनिंदन् कृष्णसन्निधौ ॥ मौढ्यं पश्यत मे योहं श्रद्दधे क्लीबकत्थनं ॥४०॥ न प्रद्यु
म्नो नानिरुद्धो न रामो न च केशवः ॥ यस्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ॥४१॥ धिगर्जुनं मृषा
वादं धिगात्मश्लाघिनो धनुः ॥ दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥४२॥ एवं शपति विप्रर्षौ
विद्यामास्थाय फाल्गुनः ॥ ययौ संयमनीमाशु यत्रास्ते भगवान्यमः ॥४३॥ विप्रापत्यमचक्षाणस्त
त ऐंद्रीमगात्पुरीं ॥ आग्नेयीं नैरृतीं सौम्यां वायव्यां वारुणीमथ ॥४४॥ रसातलं नाकपृष्ठं धिष्ण्यान्य
न्यान्युदायुधः ॥ ततोलब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रुतः ॥४५॥ अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषे
धता ॥ दर्शये द्विजसूनूंस्ते मावज्ञात्मानमात्मना ॥४६॥ ये ते नः कीर्तिं विमलां मनुष्याः स्थापयिष्यन्ति ॥ इ
ति संभाष्य भगवानर्जुनेन सहेश्वरः ॥४७॥ दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ॥ सप्त द्वीपान्स
सिंधूंश्च सप्त सप्त गिरीनथ ॥४८॥ लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥ तत्राश्वाः शैब्यसु
ग्रीवमेघपुष्पबलाहकाः ॥४९॥ तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥ तान्दृष्ट्वा भगवान्कृष्णो महा
योगेश्वरेश्वरः ॥५०॥ सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत्पुरः ॥ तमः सुघोरं गहनं कृतं महद्विदा
रयद्भूरितरेण रोचिषा ॥ मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा चमूः ॥५१॥ द्वारेण च
क्रानुपथेन तत्तमः परं परं ज्योतिरनंतपारं ॥ समश्नुवानं प्रसमीक्ष्य फाल्गुनः प्रताडिताक्षोपिदधे

पृष्ठीपेषु ॥ नान्नहतमिति ॥ प्रकृतिपरिणामरूपं तालोकाभावमार्गं चक्रानुपथेन चक्रमनुगतेन द्वारेण तत्तमः
परतस्मात्तमसः परं हरेर्वर्तमानं परं श्रेष्ठं भागवतं ज्योतिः समश्नुवानं व्याप्नुवन्तं समीक्ष्य प्रपीडितेनात्रेनैवेक्ष्य

एवं ततः उवलंतः महातऊर्मयो भूषणानि यस्य तत ॥ तत्र सलिले भवतं महाकालस्वरं द्युमंतं मंद्युमंतं श्रेष्ठं सहस्र
मूर्धिभवाः फणा तासु मणयस्तेषां द्युतिभिः दिसहस्रतः तरेदूर्जितस्फटिकगिरिवसंकाशं शितिकंठजिह्वं
कंठाग्रजिह्वाग्र शितयो नीलाः कंठजिह्वा यस्य तं तत्तज्ज्ञोगामुखो आसतं तत्स्थानं तस्य भोगो देहः स्वतकर

ततः प्रविष्टः सलिलं नभस्तनावलीयमानेन हृदाद्रुमि भूषणं ॥ तत्राद्भुतं वै भवतं द्युमंतं संभ्राजमानं
संभमहस्रशोभितं ॥ ५३ ॥ तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्धन्यफणामणिद्युभिः ॥ विभ्राज
मानं द्विगुणोत्तशोणिभ्राणामितावलाभं शितिकंठजिह्वं ॥ ५४ ॥ ददर्श तज्ज्ञोगसुखासनं विभुं
महानुभावं पुरुषोत्तमोत्तमम् ॥ सांद्राब्दाभं सुपिशंगवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणं ॥ ५५ ॥
महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलं ॥ प्रलंबचार्वष्टभुजं सकौस्तुभं श्रीव
त्सलक्ष्मं वनमालयावृतं ॥ ५६ ॥ स्वतैदं तं दप्रभुर्वैः स्वपार्षदैस्सकादिभिर्मूर्तिधरैर्निजायुधैः पु
ष्ट्या श्रिया कीर्त्यजया गविलर्द्धिभिर्निषेव्यमानं परमेष्ठिनां पतिं ॥ ५७ ॥ ववंद आत्मानमनंतमच्यु
तोत्तिस्त तत्र दर्शनमात साध्वसः ॥ नावाद्भुतमा परमेष्ठिनो प्रभुर्विदोन्नली सस्मित मूर्त्तया गिरा
५८ ॥ ॥ ॐ नमो नारायणाय नमः ॥ ॥

मासनं यस्य तं ससंतो मणिव्राता येषु तेषां किरीटकुंडलानां प्रभा तया क्षिप्ताः सर्वतः स्फुरंतः सह
स्रम परिक्षिप्ताः कुंतलाः केशा यस्य तं कीर्त्यजया कीर्तिसहितया ॥ अजया ॥ अखिलर्द्धिभिः अणि
मादिभिर्विभूतिभिः ऊर्जितया पिनाराः ॥ ५५ ॥ ॥

मे कलावतीर्णाविति संबोधनं भीष्मस्मेश्रंतिकं सकाशं इतमागछतं ॥ आचरतामिदं तु भारतगुह्यास्सर्वमेवकृ
तमपि श्रेष्ठकथनप्रस्तावेन प्रोक्तं ॥५९॥ ॥ इति श्रीभागवते भावार्थदीपिकायामेकोननवतितमः ॥८९॥

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ॥ कलावतीर्णाववनेर्भरासुरान्हत्वेह भूय
स्त्वरयेतमंतिमे ॥५९॥ पूर्णकामावपि युवां नरनारायणावृषी ॥ धर्ममाचरतां स्थित्यै ऋषभौ लोक
संग्रहम् ॥६०॥ इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिना ॥ ॐ इत्यानम्य भूमानमादाय द्विजदारकान्
६१॥ न्यवर्तेतां स्वकं धाम संप्रहृष्टौ यथागतं ॥ विप्राय ददतुः पुत्रान्यथारूपं यथावयः ॥६२॥ निशाम्य वै
ष्णवं धाम पार्थः परमविस्मितः ॥ यत्किंचित्पौरुषं पुंसां मेने कृष्णानुकंपितं ॥६३॥ इतीदृशान्यनेका
नि वीर्याणीह प्रदर्शयन् ॥ बुभुजे विषयान्ग्राम्यानीजे चात्यूर्जितैर्मखैः ॥६४॥ प्रववर्षाखिला
न्कामान्प्रजासु ब्राह्मणादिषु यथाकालं यथैवेंद्रो भगवाञ्छ्रेष्ठ्यमास्थितः ॥६५॥ हत्वा नृपानधर्मि
ष्ठान्घातयित्वार्जुनादिभिः अंजसा वर्तयामास धर्मं धर्मसुतादिभिः ॥६६॥ इति श्रीभागवते दश
मस्कंधे एकोननवतितमोऽध्यायः ॥८९॥ श्रीशुक उ० ॥ सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः पतिः
सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः ॥१॥ ॥

चरमे तु पुनः प्रोक्ता कृष्णलीला समासतः यदुवंशप्रसूतानामानंत्यं च सकारणं ॥ श्रीकृष्णस्य विभूतिं संक्षे
पेण दर्शयति ॥ सुखं स्वपुर्यामिति ॥ सर्वसंपदादिविशिष्टायां १ ॥

स्वपत्नी॥

प्रियः पतिः (षोडशसहस्र) नामेकवल्लभः सन् ॥ तासां गेहेषु रमस्व त्वं यः गेहविशेषणानां ॥ प्रोत्फुल्लानाम्बुजिन्या के
त ॥ नवमृगादिनीषु वाभोविगाह्य विजहार महानुदयो वैभवं यूसमस्तः योषितां कुचकुंकुमैर्लिप्तांगाः य
न ताभिः परिरब्धः सूतमागधवंदिभिः स्तूयमानः ताः क्लिन्नवस्त्राः अत एव विहृतोरुकुचप्रदे

स्त्रीभिः स्नानमेवषाभिर्नवयौवनकांतिभिः ॥ कंदुकादिभिर्हर्म्येषु क्रीडंतीभिस्तडिद्द्युभिः ॥ २ ॥ नि
त्यं संकुलमार्गायां मदच्युद्भिर्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वै रथैश्च कनकोज्ज्वलैः ॥ ३ ॥ उद्यानोपव
नाढ्यायां पुष्पितद्रुमराजिषु निर्विशद्भृंगविहगैर्नादितायां समंततः ॥ ४ ॥ रेमे षोडशसाहस्रप
त्नीनामेकवल्लभः ॥ तावद्विचित्ररूपोऽसौ तद्गेहेषु महर्द्धिषु ॥ ५ ॥ प्रोत्फुल्लोत्पलकह्लारकुमुदां
भोजरेणुभिः ॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च ॥ ६ ॥ विजहार विगाह्याम्भो ह्रदिनीषु म
होदयः ॥ कुचकुंकुमलिप्तांगः परिरब्धश्च योषितां ॥ ७ ॥ उपगीयमानो गंधर्वैर्मृदंगपणवानका
कान् ॥ वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ॥ ८ ॥ सिच्यमानोऽच्युतस्ताभिर्हसंतीभिः स्म रे
चकैः ॥ प्रतिषिंचन्विचिक्रीडे यक्षीभिर्यक्षराडिव ॥ ९ ॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः
सिंचंत्य उद्धृतबृहत्कबरप्रसूनाः ॥ कांतं स्म रेचकजिहीर्षयोपगुह्य जातस्मरोत्सवलसद्वद
नाविरेजुः ॥ १० ॥ ॥ ॥

शाः उद्धृतानि ॥ विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि
यासां ताः ॥ जातेन स्मरेणायउत्सवस्तेन लसंति विवदनानि यासां ताः ॥ १० ॥ ॥ ॥ ॐ नमो भगव
ते वासुदेवाय नमः ॥ ॥

श्री॰
भा॰उ॰
२०६

तामांस्त्वेभ्मः विषज्जितकुंकुमाताप्यसमः क्रीडयाग्रभिषंगेनाभिनिवेशेन॥ धुतः कंपितः कुं
तलवृंदवधूः यस्यसः मुकुंदैकप्रियः समाद्रिताइवाभगिरः॥ सतः पुनस्तमेववेषाविनयमान
तृयथाभवंति॥ तथायानिवाक्यानिकुत्रुत्तानि॥ मेममोगदतः शृणुविस्त्यर्थः॥ ईश्वरः श्रीकृष्णः स्व
पितिवंतुनिद्राभंगाकुर्वंतीविलसि॥ नशापेनस्वपिषि॥ तदनुचिंतमिसर्थः॥ अथवानापराध स्ल॰
ष्णोलस्तनकलनविषज्जितकुंकुमसक्रीडाभिषंगात्पुनकुंतलवृंदवधः॥ सिचन्नकुंयुवनिमिःश
तिभिश्चममातोरेमेकरेणुभिरिवेभपतिः परीतः॥११॥ नवाननानंकीनोचगीतवाद्योपजीवि
नो॥ क्रीडालंकारवासासिकृष्णोटदावस्यचप्रियः॥१२॥ कृष्णस्सैवंविहरतोगत्यालापविभ
स्मितैः॥ नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणांकिलहृताधियः॥१३॥ ऊचुर्मुकुंदैकधियोगिरउ
न्मत्तवज्जडं॥ चिंतयंत्योरविंदाक्षंतन्मेनिगदतः शृणु॥१४॥ महिष्यऊचुः॥ कुररिविलपसित्वं
वीतनिद्रानशेषेस्वपितिजगतिरात्र्यामीश्वरोगुप्तबोधः॥ वयमिवसखिकच्चिद्गाढनिर्भि
न्नचेतानलिननयनहासोदारलीलेक्षितेन॥१५॥ नेत्रेनिमीलयसिनक्तमदृष्टबंधुस्त्वंरोरव
वीषिकरुणाबतचक्रवाकि दास्यंगतावयमिवाच्युतपादजुष्टां किंवास्रजंस्पृहयसेकबरेण
वोढुं॥१६॥ भोभोसदानिष्टनसेउदन्वन्नलब्धनिद्रोधिगतप्रजागरः किंवामुकुंदापहृतात्मल
लांछनः प्राप्तांदशांत्वंचगतोदुरत्ययाम्॥ १७॥ ॥ रामः॰ वापीस्याघायेनाकु ः॥ नलिन
नयनस्यहासेनसहितमुदारंयल्लीलेक्षितंतेनकच्चिद्गाढनिर्भिन्नचेतास्वमिति॥ नक्तंरात्रावदृष्टः
बंधुः सनीरोरवीषिकिंवानैनावत॥ अपिचवयमिवस्पृहयसेअलब्धनिद्रः सदानिष्टनसेकोपाः

शुकं दशनि तानतिरहस्यानि विस्रम्भयते इकचिंतयाकच्छिन्नं तन्नीगोसि वयमिव स्थितानगीतानुवाद्रुरे हे चंद्रो
नलु येवापलतसे ॥ अप्रियाचरणं विनासरोदीरणे न वयातनतनं मलयानिलतवानुवितमितर्थः
१९॥ मेवेति ॥ आतपादिहरणादिसामान्यान्तयादर्वेदुसवृतंदयितनः ॥ सा त्वमसि अतो भवानं ध्यायति
ध्याने लिंगमाह ॥ अश्रुकंदर्द्वाविदि ॥ अश्रोकिंमिलितयानतनशुखंकृतं तयतोऽहं खेदसालसंगाइति
तंयत्नमाणा वल्लवतामसिष्टदीनरैद्दोत्तीणात्समोनतिजदीधितिभिः हिताणोषि ॥ कच्चित्सुकंदरादि
तानियथा वर्यतेविस्रम्भमोक्ष्य मितगीहपलत्वसेनः ॥ २० ॥ किंवाचविनमस्मादिमिमल्लयाति
लेनेषिय गोविंदायाणानितिमिन्नेहृदिरयमिनः स्मरे ॥ २१ ॥ मवश्रीमस्तमसिदयिताया दवंद्र
सन्ततं श्रीवत्साकं वयमिव भवान्ध्यायतिप्रेमवद ॥ अस्तकंठः शावलहृदयोसदविधो
वाच्छयाता ॥ स्तनास्तनाविहृतनतिमुकुंदः खेदसालसंगाः ॥ २५ ॥ प्रियरावपदानिभाषेसम
नसंमोविकयानयाविरा ॥ करवाणिकिमधुनेतिप्रियंवदसी वल्लानकंटकोकिल ॥ २१ ॥ नच
लसिनवदसदारवुद्द्वितिनिधरचिंतयसेमदहनमर्थे अपिवन्तवसदेवनंदनोविवयमिव
हेकोकिलप्रियाणावसश्रीहृसमसपदानीवपदानिशावंद्रो कामयसेसनेवेविधर्तम् ॥ २४ ॥ ॥
त्तभावसेसनंत्वंजीवयतीति ॥ तयाकोमलयागिरावल्लितकंठवमणीयकंमेकयकिंतवप्रि
यंकरवाणिइति ॥ नेतिनिधरत्वेनवदसिनचलसिअतोनूनंमदहनमर्थे चिंतयसेवततर्हि ॥ किं
वयंयथास्तनेविधत्तेकामयाहेम ॥ तयात्वंसनतनतलेः स्परोवेदु कामयसेऽपि मनिचेनर्दितवा
मस्मदवस्थाभविष्यतीतिभावः ॥ २२ ॥ ॥

भोसिंधुपत्न्याः तयः संप्रतियीक्षेसिंधुर्मेवद्वारागृहतन्हृष्णागुष्मानानंदतीय॥वतादोकष्टंग्रतःसुष्मं
तोद्रुदाः यासांताः ग्रपगतकमलशोभाः हृशाश्रुवयं॥ययाप्रियतमस्यभर्तुर्मधुपतेः समस्मिद्धंतदेवा
गांतद्संहृतेकल्पयित्वाङुः हंसेतितः॥ग्रस्मात्मतिभुरारहस्यज्ञः॥किंवाचलसोहृदः स्मरति॥सत्वे
वमाप्रस्थापितवानितिवदतग्राङुः हेतोद्दत्तद्रस्यहृतकस्मान्नवंयंभजामः॥कामार्थमाव्हयतिपु
ष्मात्वमिचेत॥ग्रतोतर्हिनमिष्टालापयग्राकारयउगेमिति॥गाद्धंतमिवतंपुनराङुः योस्मात्वंचयि

सुष्मद्भदाः कर्षितावतसिंधुपत्न्याः संप्रत्ययात्तकमलश्रियइष्टभर्तुः यद्दहृयंयडुपतेः प्रणयाव
लोकमप्राप्यमुष्टहृदयाः पुरुकर्षितःः स॥श॥हंसस्वागतमास्यतोपिवययोर्बुसंगशेोरेः कथा
हृतेलोलविदामकश्चिदपिंतः स्वस्त्यास्तउक्तं पुरा॥किंवातमलसोहृदः स्मरतितकस्माङ्गजा
मावयंनेोद्वालापयकामदंश्रियम्तेसैवैकनिष्टाश्रियो॥रथ॥उतीहशेनभावेनकृष्णयो
गस्वरेश्वरे॥कियमाणेतमाधवोत्लुभिरेपरमांगतिम्॥२४॥कृतमाघोप्यियः स्त्रीणांप्रसयाक
र्षितेमनः॥उरुगायोरुगीतोवापश्यंतीनांऊततः पुनः॥१९॥॥

लापकाकिंतीरमनेतोश्रियमहते
तमेवाल्ला॥एयसातदेकनिष्टाकथंपरिस्हतुंशक्यतेइतिचेदतग्राङुः स्त्रियांजातावेकवचनं॥ग्रस्मा
स्तुत्रीषुमध्येकिंसैवेकनिष्टानतुवयमित्यर्थः पादांतेदेवोद्भमथुनतइन्तमधुरालापमांगेयसनेंग्र
रतिप्रदं श्रियस्तेवयंकस्माद्भजामः॥किंत्वनाहृताग्रपिसतीपुनः पुनः॥सेवभजनत्वयतोस्माद
रणेमानिन्यः स्त्रियएकनिष्टाएकतिनैवस्वमानसिद्धेनिष्टायासाम्पितासांहसपवंभृतोभावे।

पदं स्यानं या रुक्मिणीप्रमुखा वाऽष्टौ ता उदाहृताः ॥ प्राक् एवमष्टौ तत्र शताधिकं षोडशसहस्रमहिषीणां पुत्राः लक्ष
मेकमशीतिस्त्तरैकषष्टिसहस्राणि भवंति प्रद्युम्नानिरुद्धश्चेति प्रत्रं पुत्राणां मध्ये समदशैव स्तेयाः प्रथयाः निरुद्ध

याः संपर्यचरत्स्येमाणा पादसंवाहनादिभिः ॥ जगद्गुरुं भर्त्तृबुध्या तासां किं वर्ण्यते तपः ॥२७॥ एवं वेदो
दितं धर्ममनुतिष्ठन् सतां गतिः ॥ गृहं धर्मार्थकामानां मुहुश्चादर्शयत्पदं ॥२८॥ आस्थितस्य परं धर्मं कृष्णस्य
गृहमेधिनां ॥ आसन्षोडशसाहस्रमहिष्यश्च शताधिकाः ॥२९॥ तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदा
हृताः ॥ रुक्मिणीप्रमुखा राजंस्तत्पुत्राश्चानुपूर्वशः ॥३०॥ एकैकस्यां दश दश प्रकृत्यापादयत्प्रभुः ॥ या
वत्य आत्मनो भार्या अमोघगतिरीश्वरः ॥३१॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥ आसन्नुदार
यशसस्तेषां नामानि मे शृणु ॥३२॥ प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान्भानुरेव च ॥ सांबो मधुर्बृहद्भानुश्चि
त्रभानुर्वृकोऽरुणः ॥३३॥ पुष्करो वेदबाहुश्च श्रुतदेवः सुनंदनः ॥ चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव
च ॥३४॥ एतेषामपि राजेंद्र तनुजानां मधुद्विषः ॥ प्रद्युम्न आसीत्प्रथमः पितृवद्रुक्मिणीसुतः ॥३५॥ स
रुक्मिणो दुहितरमुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥३६॥ स चा
पि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥ वज्रस्तस्याभवद्यस्तु मौसलादवशेषितः ॥३७॥ प्रतिबाहु
रभूत्तस्मात्सुबाहुस्तस्य चात्मजः ॥ सुबाहोः शांतसेनोऽभूच्छतसेनस्तु शांततः ॥३८॥ न ह्येतस्मिन्कु
ले जाता अधना अबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥३९॥ यदुवंशप्रसूतानां पुं
सां विख्यातकर्मणां ॥ संख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप ॥४०॥ तिस्रः कोट्यः सहस्राणामष्टाशीति
शतानि च आसन्यदुकुला

नामापि कस्त्रिंशत्रयेदिति सहस्राणामपरिमितानां क्रमाणामित्यन्वयः ॥४१॥

यदा प्रत्येकं बहूनामध्यापयतामाचार्याणामियं संख्या तदपि कृतमात्रं ॥ ततस्सर्वगतायने ॥ तदा कुमा
राणामेव संख्या कर्तुं न शक्यते कुतः ॥ पुनः सर्वयादवानामिति नैवोच्यमाना इति प्रत्येकं बहुभीरपैविति
नेयं एवमेव यदुकुलेपि देवा इति ॥ तथा चोक्तं ॥ सहस्रशः सुसंभूता देवा यदुकुले पृथगिति ॥ तस्मा
त्कृष्णस्य कीर्तिः सर्वतीर्थोत्तमत्वं कृष्णस्य ॥ सर्वदेवोत्तमत्वं न विचित्रमित्याह ॥ तीर्थं चक्रे इति ॥ पुनः परं
स्वः सरिद्देवसर्वतोधिकं तीर्थमित्यासीत् ॥ यदा तीर्थं यदुषु यदजनि ज्ञातं तीर्थं ॥ श्रीकृष्णस्य कीर्तिरूपं ॥ एत
त्स्वः सरिद्रूपं पादशौचं तीर्थं कृतमलं चक्रे ॥ स्वयमेव सर्वतीर्थोपरि विराजत इत्यर्थः श्रीकृष्णस्य विद्विषः
संख्यातं यादवानां कः करिष्यति महात्मनां ॥ यत्रायुतानामयुतलक्षेणास्ते सदाहुकः ॥ देवासुराहव
हता ये दैत्याः सुदारुणाः ॥ ते चोत्पन्ना मनुष्येषु प्रजा हत्वा बबाधिरे ॥ तन्निग्रहाय हरिणा शंसा देवा य
दोः कुले ॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ॥ तेषां प्रमाणं भगवान् प्रभुत्वेनाभवद्धरिः ये वा
नुवर्तिनस्तस्य ववृधुः सर्वयादवाः ॥ शाखास्वतारनाल्ला पर्कोञ्ज स्थाना शतादिषु ॥ तविडः संतमास्या
नेहस्यः कृष्णस्य चेतस ॥ अथ ॥ तीर्थं चक्रे न्यवोनं यदजनि पदशुक्लः सरित्पादशौचं विहितं स्त्रियाः सह
पं यद्गुरिति तथा श्रीर्यदर्थैस्तयतः ॥ यत्रामामंगलं ब्रह्मस्तपयादि तन्यपद्गतो गोत्रधर्मः कृष्णस्ये
स्त्रियाश्चस्वरूपं ॥ तत्स्वरूपं यदुरित्यपि न विंदत स्यपरमकारुणिकत्वात् ॥ तथा इदं न विचित्रं ॥ किं तत्र पराजितके श्रि
दण्डशासना परा सर्वतः परिहरणीः श्रीकृष्णस्यैव नान्यस्येति यदेवाह ॥ यद्यथमन्येषां ब्रह्मादीनां यतत्र इति ॥ तत्रुति
रपेक्षत मेवलक्षीः श्रयते इति विचित्रमेवेते वत्वादिपरमसंगलनामधेयत्वात् ॥ तस्येत्याहृयत्वा मतितद पि
तार्थं स्मरणापहमित्याह ॥ कृतपयगादितमिमि सर्वधर्माश्रयत्वादपीत्याह ॥ यत्कृतो गोत्रधर्म इति गो
त्रे पुत्रत्रदस्त्रिवं शोभधर्मो यत्कृतः येन प्रवर्तितस्तस्यापि तिमिरहरणं नैव विचित्रमित्याह ॥ कृष्णस्यैतदिति काल

य इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत् श्रावयेच्छृणुयाद्वापि सं विस्रोः पदवीं लभेत् ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः वैश्यः पठन्निधिपतिः स्या
च्छूद्रउत्तमतामियात् ॥ अन्य जनः सृंजनको निर्द्धनो धनवान्ततः अप्रसकीर्तिर्हि सुयशो मूर्खोभवति पंडितः ५३ । ५

श्री
भा॰ द॰
उ॰
२२०

न्तानां जीवानां यो निवासस्याश्रयः तेषु वा नित्यं वसति ॥ अन्तर्यामितया ॥ तथा सकृज्जोजयति ॥ देव
क्यां जन्मेति वादमात्रं यस्य सः यदुवराः पर्षत ॥ सभासेवकरूपा यस्य सः स्वभामात्रेणा निरसन समर्थोपि यः
स्वैर्दोर्भिरधर्ममस्यन् ॥ स्थिरचरवृजिनघ्नः अयिकारविशेषानपेक्षमेव वृन्दावनतरुल
तादीनां ॥ संसारदुःखहन्ता ॥ तथा विलासवैदग्ध्यानपेक्षेत व्रजवनितानां पुरवनितानां सु
स्मितेन श्रीमता मुखेनैव कामदेवं वर्धयन् ॥ कामस्याप्यसौ दीव्यति विजिगीषति संसारमिति देवः ॥ तभोगा

जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं ॥ स्थिरचरवृजिनघ्नः
सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन्कामदेवं ॥ ४८ ॥ इत्थं परस्य निजवर्त्मरिरक्षयात्त
लीलातनोस्तदनुरूपविडंबनानि ॥ कर्माणि कर्मकषणानि यदूत्तमस्य श्रूयादमुष्य पदयोरनु
वृत्तिमिच्छन् ॥ ४९ ॥ मर्त्यस्तयानुसवमेधितया मुकुंदश्रीमत्कथाश्रवणकीर्तनचिंतयैति
येति ॥ तद्धाम दुस्तरकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थाः ॥ ५० ॥ चिरंनवैतदुक्त
गायपवित्रलीलाविध्वस्तकल्मषकदंबकमुक्तिरूपं ह्वीणाख दुस्तरजकृतांतजवापवर्गं
ग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थाः ॥ ५१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे विस्त
लीलानुवर्णने नवतितमोध्यायः ॥ ९० ॥ ॥ द्वारामोक्तशब्दमित्यर्थः तमनत्कार्यविशेषैः
सीकृतमनस्कर्मादिनानामस्त्रैर्विशेषणेोयहनमस्यन्तदनुरूपानुकारीणि कर्मकषणानि कर्मा
णि च विनानिश्रूयात् ॥ श्रूयद्यादित्यर्थः ॥ अनुवृत्तेः फलमाह ॥ ४९ ॥ मर्त्य इति श्रीमत्याः कथाया
श्रवणकीर्तनयुक्तया चिंतया सवर्धितया नुसवं तयानुलिप्तत्वेन तस्य यामलोकस्येति लोकत्वेपि
कालेनाकलितमित्याह ॥ दुस्तरेति दुर्लभपुरुषार्थमाह ग्रामादिति ॥ ५० ॥ ॥ इति श्री परमानं

२२०

अनेनैवदृष्टांतेननित्यत्वानादित्वविभुत्वैकत्वादयोपिसिद्ध्यंतीत्याह निरोधेति यथादारुष्वंतःप्रविष्टोऽग्निः
तत्कृतान्नाशादीनाधत्तेनतुस्वतोनाशादिमान् एवंदेहगुणाननित्यत्वादीन्देहात्परोनित्यादिस्वरूपोप्या
त्मानुभवति ततश्चानित्यत्वादिभिरपिवैलक्षण्यादन्यत्वमितिभावः ८ नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वंघ
टते आत्मनस्त्वसंगत्वात्कथंदेहेनतद्धर्मैर्वासंबंधः संबंधेवाकुतस्तन्निवृत्तिस्तत्राह योसाविति पुरुषस्य
परस्याधीनैर्मायागुणैर्योसौसूक्ष्मः अयंचस्थूलोदेहोविरचितःपुंसोजीवस्यायंसंसारस्तन्निबंधनस्तद्

निरोधोत्पत्त्यणुबृहन्नानात्वंतत्कृतान्गुणान् अंतःप्रविष्ट आधत्तएवंदेहगुणान्परः ९ यो
सौगुणैर्विरचितोदेहोयंपुरुषस्यहि संसारस्तन्निबंधोयंपुंसोविद्याच्छिदात्मनः १० तस्माज्जि
ज्ञासयात्मानमात्मस्थंकेवलंपरं संगम्यनिरसेदेतद्वस्तुबुद्धिंयथाक्रमं ११ आचार्योरणिरा
द्यःस्यादंतेवास्युत्तरारणिः तत्संधानंप्रवचनंविद्यासंधिःसुखावहः १२

ध्यासकृतःहियस्मादेवं
तस्मादात्मविद्यातन्निवर्तिकेत्याह आत्मनोविद्याविज्ञानंतस्यछित्छेत्रीआछिदितिवापदच्छेदः ९ य
स्मादेवंतस्माज्जिज्ञासयाविचारेणआत्मस्थंआत्मनिकार्यकारणसंघातएवस्थितंसम्यक्ज्ञात्वाएत
देतस्मिन्देहादौवस्तुबुद्धिंस्थूलसूक्ष्मक्रमेणनिरसेत्त्यजेत् ११ गुरोर्लब्धाविद्यासाविद्यातत्कार्यंनि
रस्यन्तत्वमेतिस्फुटीकर्तुंविद्योत्पत्तिमग्न्युत्पत्तिरूपकेणनिरूपयति आचार्यइति आद्यः अधरःतत्संधा
नंतयोर्मध्यममंथनकाष्ठंप्रवचनमुपदेशः विद्याग्निसंधिःसंयोगोभवत्यग्निरिव तयाचश्रुतिः आचार्यःपू

किंतयमानहिंसादीनभीक्ष्णमादरेणसेवेत शौचादींस्तुनियमान्क्वचिद्यथाशक्ति तदाप्यात्मत्त्वा
नाविरोधेनयमान्द्वादशनियमांश्चैकादशविशेषायेवक्ष्यति किंच यमेष्वप्यादरंपरित्यज्यगुरुमुपासी
तेत्याह मदभिज्ञमिति मदात्मकंमद्रूपं ५ गुरुसेवकस्यधर्मानाह अमानीति दक्षः अनलसः नि
र्ममः जायादिषुममताशून्यः गुरौतदृढसौहृदः असत्वरः अव्यग्रः अमोघवाक्तथ्यालापरोह्यतःएता
न्येवशिष्यलक्षणानिज्ञेयानि ६ ननुस्वजायादिषुकथंनिर्ममःस्यात्तत्राह जायेति औदासीन्यहे१

यमानभीक्ष्णंसेवेतनियमान्मत्परःक्वचित् मदभिज्ञंगुरुंशांतमुपासीतमदात्मकं ५ अ
मान्यमत्सरोदक्षोनिर्ममोदृढसौहृदः असत्वरोर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायाप
त्यगृहक्षेत्रस्वजनद्रविणादिषु उदासीनःसमंपश्यन्सर्वेष्वर्थमिवात्मनः ७ विलक्षणःस्थू
लसूक्ष्माद्देहादात्मेक्षितास्वदृक् यथाग्निर्दारुणोदाह्याद्दाहकोन्यःप्रकाशकः ८ ॥

तुंविवेकंदर्शयति आत्मनोर्थंप्रयोजनंसर्वत्रसममेवपश्यन्निति अयंभावः सर्वदेहेष्वात्मनएकत्वान्मम
यादिदेहेस्मिंश्चदेहेआत्मनोर्थःस्रक्चंदनादिःसमएवकेनविशेषेणतेष्वेवममत्वाभिनिवेशउच्यतेवमुदासीनः
सन्गुरुंप्रपद्येतेति ७ ननुकोसौदेहव्यतिरिक्तआत्मायस्यैक्यादर्थःसर्वेष्वसमःस्यात्तत्राह विलक्ष
णइति स्थूलसूक्ष्माद्देहद्वयादात्मान्यः यतोविलक्षणः तद्वैलक्षण्यंदर्शयति ईक्षिताद्रष्टा स्वदृगिति द्रष्टा
द्दृश्याद्विलक्षणःस्वप्रकाशश्चजडत्वात् विलक्षणस्तयोरन्यत्वेदृष्टांतः यथाग्निर्दाहकःप्रकाशकश्चदा१

श्री
भा॰ए॰
टी॰
५३

चतुर्विंशतिगुर्वाख्यालब्धसंभावनाभुवः उद्धवस्यात्मतत्त्वाभि साधनोक्तिरतः परैः दशमे देहसंबंधात्संस-
तिर्नात्मनः स्वतः इत्येतद्वर्णयामास समतां नरनिरासतः तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकस्या-
नतत्त्वज्ञानायाहितव्यारभ्य साधनान्युपदिशति भगवान् मयेति मया पंचरात्रादिषूक्तेष्वेव स्वधर्मेष्वव-
हितः अप्रमत्तः सन् तदविरोधेन वर्णाश्रमाचारमनुतिष्ठेत् १ कथमकामात्मता संभवति तत्राह अ-
न्वीक्षेतेति स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषयेषु सत्यत्वाभिनिवेशेन ये सर्वे आरंभास्तेषां फल-

श्रीभगवानुवाच॥ मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः वर्णाश्रमकुलाचारमकामा-
त्मा समाचरेत् १ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां गुणेषु तत्त्वध्यानेन सर्वा-
रंभविपर्ययं २ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः नानात्मकत्वाद्विफल-
स्तथा भेदात्मधीर्गुणैः ३ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् जिज्ञासायां संप्रवृत्तो ना-

वैपरीत्यं पश्येत् एवं फलवैपरीत्यदर्शनादकामः स्यात् २ किंच काम्यविषयाणामनित्यत्वादपीत्या-
ह सुप्तस्येति विफलः अर्थशून्यः अत्रैव प्रयोगः इंद्रियैर्वा देहिनां बहिः सा विफला नानात्मकत्वात् दे-
हिषयकत्वाच्च मनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः नित्यनैमि-
त्तिके कुर्यात् प्रत्यवायजिहासया इति स्मृतिः अतः प्रवृत्तं काम्यकर्म त्यजेत् निवृत्तं नित्यनैमित्तिक-
मेव कुर्यात् आत्मविचारे तु सम्यक्प्रवृत्तो निवृत्तकर्मचोदनामपि नाद्रियेत् ४ श्रीरामायनमः

ननुकिंबहुभिर्गुरुभिः नहिस्वेनकेवलभगवत्प्रमुखैर्वेदव्यासगुरवश्चाश्रिताः तत्राह नह्येकस्मादितिबहुधासं प्रपंचोनिःप्रपंचभेदादिभिः अयंभावः नैतेपरमार्थोपदेशगुरवः किंत्वन्वयव्यतिरेकाभ्यासात्मन्यसंभावनादिमात्रनिवर्तकाः तेषांचबहुत्वयुक्तमेवेति ज्ञानप्रदंतगुरुमेकमेववदन्ति मदभिज्ञंगुरुंशांतमुपासीतेति उक्तंच तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तममिति ३१ विप्रोदत्तात्रेयःयोगेहिमाद्गुरु

नह्येकस्माद्गुरोर्ज्ञानंसुस्थिरंस्यात्सुपुष्कलं ब्रह्मैतदद्वितीयंवैगीयतेबहुधर्षिभिः ३१

श्रीभगवानुवाच ॥ इत्युक्त्वासयदुंविप्रस्तमामंत्र्यगभीरधीः वंदितोभ्यर्चितोराज्ञाययौप्रीतोयथागतं ३२ अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः सर्वसंगविनिर्मुक्तःसमचित्तोबभूवह ३३ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेनवमोध्यायः॥९॥रामायनमः॥

मंत्र्यपृष्टेष्टयायायाभ्युतकत्वात् यथागतंतथैवयदृच्छयायायावित्यर्थः ३२ भगवान्स्वीयंब्रह्मवित्कुलमितिस्मावतेनःपूर्वेषामपूर्वजइति चतुर्विंशतिगुरुसंग्रहश्लोकाः कपोतमीनहरिणकुमारीगजपन्नगाः पतंगाःकुररश्चाश्चेहयास्तेगुरवोमताः १ मधुहन्मधुकृन्नाचपिंगलाचक्षुयोस्तयः उपादेयार्थविज्ञानेशेषाःस्युर्बाद्योमताः तदेवावरभेदस्थतत्रतत्रस्फुटीकृतः अध्यायत्रितयेचाष्टनवाष्टावीरिताःक्रमात् ३३ ॥भा॰टी॰९॥

तदेवशिक्षितमर्थंसङ्कलय्यदर्शयन्नाह यथेति हृदयाङ्कितोवक्त्रतः वक्त्रेणसंतत्यप्रसार्यविहृत्यक्रीडि
त्वा २१ भगवद्ध्यानपरायणोऽतत्सारूप्यंनचित्रमिति पेशस्कृतोभ्रमरविशेषात्तज्ज्ञातमित्याह यत्रय
त्रेति सकलंएकाग्र २२ कुड्यांप्रवेशितःनिरुद्धः भयेनध्यायन्सात्मतांतत्सारूप्यं साम्यतामिति
पारित्यजता पूर्वरूपमसंत्यजन्नित्यस्यायमभिप्रायः यदातेनैवदेहेनान्यस्यसारूप्यंदृश्यतेतदाकिं
वक्तव्यंदेहान्तरेणसारूप्यंभवतीति २३ स्वदेहादेवशिक्षितमाह स्वात्मेति स्वात्मनोदेहाच्छिक्षिते

यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः २१ यत्रयत्र
मनोदेहीधारयेत्सकलंधिया स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्स्वरूपतां २२ कीटःपेश
स्कृतंध्यायन्कुड्यांतेनप्रवेशितः यातितत्सात्मतांराजन्पूर्वरूपमसंत्यजन् २३ एवंगुरु
भ्यएतेभ्यएषामेशिक्षितामतिः स्वात्मोपशिक्षितांबुद्धिंशृणुमेवदतःप्रभो २४ देहोगुरु
र्ममविरक्तिविवेकहेतुर्बिभ्रत्स्मसत्वनिधनंसततार्त्युदर्कं तत्वान्यनेनविमृशामियथात
थापिपारक्यमित्यवसितोविचराम्यसंगः २५

२५ गुरुत्वेहेतुः विरक्तिविवेकयोर्हेतुः विरक्ति
हेतुत्वमाह सत्वनिधनंउत्पत्तिविनाशौविभ्रत्स्मसततंआर्त्युदर्कंदुःखमेवोत्तरफलंविभ्रत्यहासत
तार्तिरेवउदर्कउत्तरफलंयस्यतत्सत्वनिधनंविभ्रत् विवेकहेतुत्वमाह तत्वानीति यथायथावत्
एवमत्युपकारित्वेपिदेहेनैवास्थाकर्त्तव्येत्याह तथापीति पारक्यंश्वशृगालादिभक्ष्यमितिनिश्चि

एक एवाद्वितीयः सजातीयविजातीयभेदशून्यो भूत कारणभूतासु सत्त्वादिषु शक्तिष्वपि साम्येनोतास
मतीषु १७ गुणसाम्यप्रधाने तदुपाधिः पुरुषः तयोरीश्वरः परावराणां परे ब्रह्मादयः अवरे अन्ये च मुक्ता
जीवास्तेषां परमः प्राप्य आस्ते अतः कैवल्यसंज्ञितः मोक्षशब्दाभिधेयः तत्र हेतुः केवलेति निर्विषयः स्व
प्रकाशः आनन्दानां संदोहः समूहः परमानन्द इत्यर्थः अतः निरुपाधिकः १८ अतः केवलादेव सूत्रादिसृ
ष्टिं दर्शयति केवलेनात्मानुभावेन सूत्रे क्रियाशक्तिप्रधाने महत्तत्त्वे सृजति जीवसंसारहेतुभूते सूत्रे सर्वेष

एकमेवाद्वितीयोभूदात्माधारोखिलाश्रयः कालेकात्मानुभावेन साम्येनोतासु शक्तिषु १७
सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः परावराणां परम आस्ते कैवल्यसंज्ञितः १८ केव(
लानुभवानन्दसंदोहो निरुपाधिकः केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकां १९ सं
क्षोभयन्सृजत्यादौ तया सूत्रमरिंदम तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखं यस्मि
(न्प्रोतमिदं विश्वं येन संसरते पुमान् २०

त्वं माभैररिति संबोधयति श्रीरिदम अरीन् रागादीन्(
दमयितुं समर्थः २१ सूत्रस्यैव व्यक्तिशब्देनोच्यमानस्य ताम् इति स्त्रीलिङ्गेन परामर्शः त्रिगुणव्यक्तिं त्रिगु(
णत्रयस्य कार्यं अत एव विश्वतोमुखं नानाविधं त्रिगुणात्मकं विश्वमहंकारद्वारेण सृजन्तीं त्रिगुणका
र्यस्य सूत्रस्य तादर्थ्यं कारणमाह यस्मिन्निति कारणभूते समष्टिरूपे यस्मिन् इदं विश्वं प्रोतं ग्रथितं वायु
र्वै गोतम तत्सूत्रं वायुना वै गोतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानीति श्रुतेः

ननुब्रह्मादीन्हित्वाप्यमुंनैवंवक्तिकोयंनियमः तत्राह संसारेति मुषितेक्षणं अपहृतविवेकं ४० तर्हिकिमा त्मत्राणोपायेनाभजिष्यसि नतत्र सर्वतोनिर्विद्यभगवद्भजनेप्रवृत्तस्यात्मनएवसामर्थ्यंत्वादित्याह आत्मै वेति यदाएवंजगत्पश्येत्तदाअप्रमत्तःसन्अखिलात् इहामुत्रभोगान्निर्विद्येततदाहि आत्मैवात्मनो गोप्तेत्यन्वयः अतःकेवलंप्रेमाणंभजामीतिभावः कांतस्यतर्षोभिलाषस्तस्माज्जातां ४२ फलितमाह

संसारकूपेपतितेविषयैर्मुषितेक्षणं ग्रस्तंकालाहिनात्मानंकोन्यस्त्रातुमधीश्वरः ४० आ त्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखिलात् अप्रमत्तइदंपश्येद्ग्रस्तंकालाहिनाजगत् ४१

ब्राह्मणउवाच॥ एवंव्यवसितमतिर्दुराशांकांततर्षजां छित्वोपशममास्थायशय्यामुपवि वेशसा ४२ आशाहिपरमंदुःखंनैराश्यंपरमंसुखं यथासंछिद्यकांताशांसुखंसुष्वापपिं गला ४३ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेअष्टमोध्यायः ॥८॥ ब्राह्मणउवाच॥

परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणां अनंतंसुखमाप्नोतितद्विद्वान्यस्त्वकिंचनः १ सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः तदामिषंपरित्यज्यससुखंसमविंदत २ श्रीराम

आयाहीति ४३ ॥इत्येकादशस्कंधेअष्टमोध्यायः ॥८॥ नवमेकुररादिभ्योदेहतश्चोपशिक्षिते श्रुत्वायदुः हेताद्योभूदितिश्लोकेनकथ्यते कुररादिकीर्तितमाह परिग्रहोहीति यद्यत्प्रियतमंतस्यतस्यपरिग्रहः तद्विद्वानपरिग्रहोदुःखमितिविद्वान्यस्त्वकिंचनःत्यक्तपरिग्रहःनतुदरिद्रः १ तत्राह सामिषमिति २

अर्भकशीलत्वमाह नेति गेहपुत्रिणां गृहिणां या भवति सा चिन्ता च मे नास्ति आत्मनैव क्रीडा यस्य आत्म निरतिः प्रीतिर्यस्य ३ नन्वज्ञसर्वज्ञयोः किं सादृश्यं येन नैश्चिंत्यं परमसुखमित्याह द्वाविति विमुग्धः अ ज्ञः जडः अनुद्यमः एवंभूतो यो बालः यश्च प्रकृतेः परमीश्वरं प्राप्तः तौ द्वौ ४ कुमार्याः शिक्षितं वक्तुमा

नेमे मानावमानौ स्तो न मे चिन्ता गेहपुत्रिणां आत्मक्रीड आत्मरतिर्विचरामीह बालवत् ३
द्वावेव चिन्तया मुक्तौ परमानंद आप्लुतौ यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः ४ क्व
चित्कुमारी त्वात्मानं वृणानान् गृहमागतान् स्वयं तानर्हयामास क्वापि यातेषु बंधुषु ५
तेषामभ्यवहारार्थं शालीन् रहसि पार्थिव अवघ्नन्त्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत्
६ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः बभंजैकैकशः शंखान् द्वौ द्वौ पाण्योरशेषय
त् ७ उभयोरप्यभूद्घोषो ह्यवघ्नन्त्याः स्म शंखयोः तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ८
अन्वशिक्षमिमं तस्या उपदेशमरिंदम लोकाननुचरन्नेताल्लोकतत्त्वविवित्सया ९ राम

ख्यायिकामाह क्वचिदित्यादिना वृणानान् स्ववरणाय आगतान् बंधुषु मित्रादिषु ५ शंखाः शंखव
लयाः महद्यथा भवति तथा स्वनं चक्रुः ६ सा महती बुद्धिमती तत्स्वनं शाल्यवहननं जुगुप्सितं दारिद्र्य
द्योतकं एकैकशः क्रमेणैकमेकं बभंज स्वकरादपसारितवती ७ निरभिदत् पृथक्कृतवती ८ न
नु कुमार्यास्तव च कथं संगतिः तत्राह लोकानिति ९

ततश्चनद्वैतस्फूर्तिरित्याह तदेति वहिर्दृशोनादिनाभ्यंतरंस्मृत्यादइषौगतात्मातस्मिन्ननुकरणोद्यतचि
त्तः भेरीघोषैरंतिके व्रजंतंनृपतिमपिनवेदतद्वत १३ सर्पात्शिक्षितमाह एकचारीति योगिसे
मद्ध्यापित्यागेकुमारीगुरुः जनसंगत्यागेसर्पः सयथाजनाच्छंकमानएकाकीविचरति नियत
निकेतरहितश्चसदाऽप्रमत्तश्चएकांतवासीच आचारैर्गतिभिःसविषोनिर्विषोवेतिनलक्ष्यतेच

तदेवमात्मन्यवरुद्धचित्तोनवेदकिंचिद्बहिरंतरंवा यथेषुकारोनृपतिंव्रजंतमिषौगता
त्मानददर्शपार्श्वे १३ एकचार्यनिकेतःस्यादप्रमत्तोगुहाशयः अलक्ष्यमाणआचा
रैर्मुनिरेकोल्पभाषणः १४ गृहारंभोतिदुःखायविफलश्चाध्रुवात्मनः सर्पःपरकृ
तंवेश्मप्रविश्यसुखमेधते १५ एकोनारायणोदेवःपूर्वसृष्टंस्वमायया संहृत्यकाल
कलयाकल्पांतइदमीश्वरः १६ ॥

असहायश्चमितभाषीचतद्वत्मुनिर्वर्तेतेत्यर्थः १४ किंच गृहारंभइति अध्रुवात्मनः नश्वरदेह
स्य सुखंयथाभवतितथावर्तेत १५ कारकसामग्रीनिरपेक्षत्वात्केवलादीश्वरादिहविश्वसृष्टिसंहारौ
ऊर्णनाभिदृष्टांतेनमयासंभावितावितिवक्तुंप्रथमंसंहारप्रकारमाह एकइतिसार्द्धत्रयेण एकः
कारकनिरपेक्षः पूर्वंसृष्टमिदंजगत कालयाकलयाकालशक्त्यासंहृत्य १६ रामायनमोनमः

वासइति प्रथमांतपाठेकलहहेतुः वार्तागोष्ठीहेतुर्भवेदित्यर्थः चित्तैकाग्रताहेतोःस्फूर्तिलक्षणाम्
मपिदेहतोरिति शरकाराच्छिक्षितमित्याह मनइति तत्रोपायमाह जितेति आसनंजयेत्तस्मात्श्वासं
जयेत्तस्मात्साधीनंमनोनिश्चलंभवति नतुक्षणंनिश्चलंसदपिमनोविषयवासनयापदिविक्षिप्ये
तस्मात्साविवसर्वथालीयेततदाकिंतत्राह वैराग्येति वैराग्येणाविक्षिप्यमाणंअभ्यासयो
गेनलक्ष्येधियमाणंस्थिरीक्रियमाणं ११ एकत्रेति उक्तंतदाह यस्मिन्निति यत्तल्लयविक्षेपात्म

वासेबहूनांकलहोभवेद्वार्ताद्वयोरपि एकएवचरेत्तस्मात्कुमार्याइवकंकणः १० म
नएकत्रसंयुञ्ज्याज्जितश्वासोजितासनः वैराग्याभ्यासयोगेनध्रियमाणमतंद्रितः ११
यस्मिन्मनोलब्धपदंयदेतच्छनैःशनैर्मुंचतिकर्मरेणून् सत्वेनवृद्धेनरजस्तमश्च
विधूयनिर्वाणमुपैत्यनिंधनं १२

कंमनः एतद्यस्मिन्परमानंदरूपेभगवतिलब्धास्पदंसत्कर्मरेणून्कर्मवासनामुंचेतितस्मिन्नत्र
कर्मवासनात्यागोपिसुषुप्तिवल्लयोदुर्वारः नासत्वेनेतिवृद्धेनउपशमात्मकेनरजस्तमसोःस्वभा
वेविक्षेपलयात्मकौ विधूयनिर्वाणंस्वस्थतिंकंध्येयाकारेणावस्थानमुपैतिकुतः अनिंधनं इंधनंगुणाः
तत्कार्यैश्चनरहितं तदुक्तंयोगशास्त्रे मनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः यासंप्रज्ञातनामा

अविजितात्मनो देखः याऽहं वालिशा विवेकशून्या तस्याः कुतः येन कारणेन असतः तुच्छान्नरात् कामं का॥
मये २९ वालिशात्वं प्रपंचयति संतमिति चतुर्भिः समीपे संतं अंतर्यामित्वात् इमं अपरोक्षमीश्वरं ३०
अतिविगर्ह्यां अतिनिंद्या या वार्ता जीविका तया कुतः सांकेत्यवृत्त्याहृतिः तया बहुव्रीहिणा सर्वविशेषणानां वा
परितापं प्रपंचयति स्त्रैणादिति स्त्रीलंपटात् अथ च अर्थतृष्णालजात् अतएव अनुशोच्यान्नरात् या
हं वित्तं रतिं च इच्छति तयाऽहं यात्मा परितापितः केन वित्तमिच्छती तेन नरेण क्रीतेन स्वयं विक्रीतेनात्म

पिंगलोवाच॥ अहो मे मोहवितर्तिं पश्यताविजितात्मनः या कांतादसतः कामं कामये ये-
न वालिशा २९ संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय अकामदं दुःखभयाधि
शोकमोहप्रदं तुच्छमहं भजेऽज्ञा ३० अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया
स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ३१ यदस्थिभिर्निर्मितवंशवं-
श्यस्थूणं त्वचा रोमनखैः पिनद्धं क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ३२

नादेदेन ३१ अहो धिक् ममायात् मति वीभत्सिते भजामीत्याह यदिति वंशो नाम स्थूणा अस्थिनिर्मितस्थिर्यं
वंशाः वंश्यास्तस्मिन्नुभयतो निर्मिता वंशाः अस्थिभिरेव निर्मिता वंशादयो यस्मिन् तत्तत्र पृष्ठे दीर्घम
स्थि पृष्ठवंशः पार्श्वास्थीनि वंश्यानि स्थूणा हस्तपादास्थीनि तथा रोमभिर्नखैश्च पिनद्धं छादितं त्वचापि।
द्वाराणि नव द्वाराणि यस्मिन् तत् एवंभूतागाररूपं शरीरं मत्तः अन्या का कांतबुद्ध्या उपैति सेवते ३२

श्रीः
भा० ए०
टी०
४२

सत्संगतोसत्यामप्यहोममभोदइत्याह विदेहानामिति याहमसतीअच्युतादन्यंकामंभोगमिच्छतीसा ३३ एवंनिर्विण्णासती अतःपरमेवंकरिष्यामीत्याह सुहृदिति अयमीश्वरः आत्मनैवआत्मानमेवनिवेद्यतंवि क्रीयविशेषेणक्रीत्वा अनेनैवसहरमे रमालक्ष्मीर्यथा ३४ अन्येषामेवमत्वंदर्शयति कियदिति आ द्यंतवंतोयेकामाविषयाःकामदानरावादेवावाकालकलिताःभार्यायाःकियत्प्रियंकृतवंतोनकिंचित्

विदेहानांपुरेह्यस्मिन्नहमेकैवमूढधीः यान्यमिच्छत्यसत्यस्मादात्मदात्काममच्युतात् ३३ सुहृ त्प्रेष्ठतमोनाथआत्माचायंशरीरिणां तंविक्रीयात्मनैवाहंरमेनेनयथारमा ३४ कियत्प्रियं तेव्यभजन्कामायेकामदानराः आद्यंतवंतोभार्यायादेवावाकालविद्रुताः ३५ नूनंमेभगवान्प्री तोविष्णुःकेनापिकर्मणा निर्वेदोयंदुराशायायन्मेजातःसुखावहः ३६ मैवंस्युर्मंदभाग्यायाः क्लेशानिर्वेदहेतवः येनानुबंधंनिर्हृत्यपुरुषःशममृच्छति ३७ तेनोपकृतमादायशिरसाग्राम्य संगताः त्यक्त्वादुराशाःशरणंव्रजामितमधीश्वरं ३८ संतुष्टाश्रद्दधत्येतद्यथालाभेनजीवती वि

अतोनेनआमुत्रचतद्व्यतिरिक्तःकोपिसेव्योस्तीत्यर्थः ३५ एवंनिश्चित्यस्वभाग्यमभिनंदति नूनमिति दुराशाया आशायास्त्यागस्यामे ३६ ननुधनाप्राप्त्याक्लिश्यासिकथंविष्णुःप्रीतस्तत्राह मैवमिति मंदभाग्यायाचेदक्लेशाःस्युस्तर्ह्ये वंनिर्वेदहेतवःक्लेशानस्युरित्यर्थः येननिर्वेदेनअनुबंधंगृहादिकंनिर्हृत्यपरित्यज्य ३७ अतःतेनश्रीवि ष्णुनाउपकृतंकृतमुपकारंनिर्वेदलक्षणं ग्राम्येषुनरेषुविषयेषुवासंगताः ३८ कथंव्रजामितत्राहसंतुष्टे

११
अ

४२

सोद्यमंविनापिभोगाःसंभवंतीत्यत्रापिसर्पवद्गुरुरित्याह सुदुःखेति आशासानामितिवक्तव्येवर्णलोपः आर्षः पतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ तयोरन्नमदत्वातद्भुंक्त्वाचांद्रायणंचरेदिति गृहिणामावश्यकत्वेनदानविधानात् १६ हरिणाच्छिक्षितमाह ग्राम्येति भगवद्गीतेतरन्नशृणुयादेव मृगयोर्लुब्धकस्य १७ हरिणाद्धाद्देवहरिणीसुतऋष्यशृंगोपिग्रस्तोऽतव्यइत्याह नृत्येति वश्योबभूवेतिशेषः १८

सुदुःखोपार्जितैर्वित्तैराशासानांगृहाशिषः मधुहेवाग्रतोभुंक्तेपतिर्वैगृहमेधिनां १६ ग्राम्यगीतंनशृणुयाद्यतिर्वनचरःक्वचित् शिक्षेतहरिणाद्बद्धान्मृगयोर्गीतमोहितात् १७ नृत्यवादित्रगीतानिजुषन्ग्राम्याणियोषितां आसांक्रीडनकोवश्यऋष्यशृंगोमृगीसुतः १८ जिह्वयातिप्रमाथिन्याजनोरसविमोहितः मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तुबडिशैर्यथा १९ इंद्रियाणिजयंत्याशुनिराहारामनीषिणः वर्जयित्वातुरसनंतन्निरन्नस्यवर्धते २०

साशक्तिर्नाशहेतुरिति मीनाच्छिक्षितमाह जिह्वयेति अतिप्रमाथिन्याअतिलोभकयाअडनेययारसक्लृप्तिमाप्नोति बडिशैः आमिषलिप्तलोहकंटकैः १९ दुर्जयत्वमुपपादयति इंद्रियाणीतिद्वाभ्यां अयंभावः यथाहारमत्यजंतलक्ष्येंद्रियतर्षःकेवलंभवति रसनेंद्रियंवर्धतेयदितद्भुज्यतेतर्हिपुनरसासक्त्यासर्वेंद्रियलोभःस्यात् अतोरसासक्तिपरित्यज्यैवयथावर्धनीतीतिप्राणाहारेण्यवसंततमेदित्यजेत्क्रमोपरसनस्यापिदुर्जयत्वज्ञापनायोच्यते २१

श्री॰
भा॰ पु॰
टी॰
४१

२१ पिंगलायावेश्यायाःशिक्षितमितिवक्तुंतदाख्यानमाह पिंगलेत्यादिना मेमयाशिक्षितं २२ स्वैरिणीका
मचारिणी संकेतरतिस्थाने २३ तान्वीक्ष्यवित्तवतःसधनान् अतएवशुल्कदान्मूल्यदान्कांतान्सुरतार्हान्
२४ अपिसंभावनायामन्योपिमामुपैष्यतीत्येवंदुराशयेत्युत्तरेणान्वयः २५ द्वार्यवलंबमानापुनःप्रवि

तावज्जितेंद्रियोनस्याद्विजितान्येंद्रियःपुमान् नजयेद्रसनंयावज्जितंसर्वंजितेरसे २१ पिंगला
नामवेश्यासीद्विदेहनगरेपुरा तस्यामेशिक्षितंकिंचिन्निबोधनृपनंदन २२ सास्वैरिण्येक
दाकांतंसंकेतउपनेष्यती अभूत्कालेबहिर्द्वारेबिभ्रतीरूपमुत्तमम् २३ मार्गआगच्छतोवीक्ष्य
पुरुषान्पुरुषर्षभ तान्शुल्कदान्वित्तवतःकांतान्मेनेर्थकामुका २४ आगतेष्वपयातेषुसासं
केतोपजीविनी अप्यन्योवित्तवान्कोपिमामुपैष्यतिभूरिदः २५ एवंदुराशयाध्वस्तनिद्राद्वा
र्यवलंबती निर्गच्छंतीप्रविशतीनिशीथंसमपद्यत २६ तस्यावित्ताशयाशुष्यद्वक्त्रायादीन
चेतसः निर्वेदःपरमोजज्ञेचिंताहेतुःसुखावहः २७ तस्यानिर्विण्णचित्तायागीतंशृणुयथाम
म निर्वेदआशापाशानांपुरुषस्ययथाह्यसिः नह्यंगाजातनिर्वेदोदेहबंधंजिहासति २८ ॥

शतिपुनर्निर्गच्छति एवंकुर्वतीनिशीथंअर्द्धरात्रंप्राप २६ निर्वेदःअलंबुद्धिःवित्तचिंतैवहेतुर्यस्यसः य
थाययावत् ममसमत्तःशृणु २७ ननुकिंनिर्विण्णायागीतश्रवणेनतत्राह हियस्मात्पुरुषस्याशापा१- ४।
शानांनिर्वेदोसिर्यथातथाछेत्तातत्रहेतुः नहीति अंगहेराजन् २८ ॥

किंच वर्षासु सरिद्भिः समृद्धोपि सागरो यथा नोत्सर्प्येत ग्रीष्मे तद्धीनोपि न शुष्येत तथा समृद्धकामस्तद्धीनो वा न हृष्येत न शोचेदित्यर्थः अत्र हेतुः नारायणपरः नतु विषयपर इति ॥६॥ रूपगंधरसस्पर्शशब्दैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीना हताः अतस्तेष्वनासक्तो पंचैते गुरवः तदुक्तं पतंगमातंगकुरंगभृंगमीना हताः पंचभिरेव पंच एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंच

समृद्धकामो हीनो वा नारायणपरो मुनिः नोत्सर्प्येत न शुष्येत सरिद्भिरिव सागरः ॥६॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ॥७॥ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ॥८॥ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ॥९॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥१०॥

इति तद्रूपविलासमोहितेन न पश्यतीति पतंगाच्छिक्षितमाह दृष्ट्वेति तद्भावैः प्रलोभितः ॥७॥ वियस्तु पलक्षणाभरणैस्तत्प्रपंचयति योषिदिति ॥८॥ मधुकराच्छिक्षितमाह स्तोकमिति गृहानहिंसन् स्यात् अहिंसन्नपीडयन् अयं भावः यथा मधुकरो विशिष्टगंधलोभेनैकस्मिन्नेव पद्मे वसन् सायंसमये संकुचितेन तस्मिन्वध्यते एवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रित्य तत्स्नेहेन बध्यते इति ॥९॥

द्विविधो मधुकृत्तत्र मधुकृतेति पुष्पाद्याळिग्रशृह्णातीति मधुकृद्भ्रमरः मधुकरोतीति आहारत्वेन स्वरूपेणाचेतिम
धुमक्षिका च तत्र प्रथमाच्छिक्षितमुक्तो द्वितीयाच्छिक्षितमाह सायमिदं भोक्ष्यामि श्वःइदं भोक्ष्यामीति
भिक्षितमन्नादि न संगृह्णीत किंतु पाणिपात्रस्तन्मात्रग्राही वा उदरमेवामत्रं पात्रं यस्य सः एकभिक्षा
याउदरमात्रग्राही भवेत् संग्रहीता मक्षिकेव न भवति तेन जीवतीत्यर्थः ११ एतद्भिक्षूणामेव पुनः सायंत
नमिति १२ स्पर्शो सक्तिनाशहेतुरिति गजाच्छिक्षितमित्याह पदापीति पादेनापि दारवीं दारुमयीं

सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ११ सायंतनं
श्वस्तनं वा न संगृह्णीत भिक्षुकः मक्षिका इव संगृह्णन् सह तेन विनश्यति १२ पदापि युवतीं
भिक्षुर्न स्पृशेद्दारवीमपि स्पृशन्करीव बध्येत करिण्या अंगसंगतः १३ नाधिगच्छेत्स्त्रियं प्राज्ञः
कर्हिचिन्मृत्युमात्मनः बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा १४ न देयं नोपभोग्यं च
लुब्धैर्यद्दुःखसंचितं भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु १५ ॐ नमो नारायणाय॥

मपि गजो हि करिण्याः स्पर्शेन निखाते पिहितगर्ते निपात्य बध्यते १३ किंच नाधिगच्छेदिति नोपगच्छे
त् १४ त्यागभोगविहीनो धनसंचयः परगामी भवत्यत्र मधुहा गुरुरित्याह न देयमिति तदन्यो बल
वान् भुंक्ते तदप्यन्यस्तच्चान्यः मधुहा मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ननु संग्रहधनं कथम
न्योऽत्ता स्यादिति चेत्तत्राह अर्थविन्निलिंगैरर्थं तदुपायं च वेत्तीत्यर्थः यथा मधुहा तरुकोटरा
दिगतं मधु वेत्ति कथं तद्वच्च १५ ॐ नमः शिवाय ॥

उलूखलेनवाश्मनावाकुट्टयतीतितथासंचिनुयात्प्राहरेत् अन्यदाकालांतरेप्राहृतंकालांतरेनाद
दीतनवत्वेनवन्यैःन्नाद्यैःपुराणानिपरित्यजेदितिनादशकैःकालचोदितानाग्रयणादीन्किंच अ
ग्निहोत्रमिति मुनेश्चनैगमैःवेदवादिभिः अस्यनिष्कामस्यफलमाह एवंमिति धमनिभिःव्याप्तःया
वज्जीवंकृतेनतपसाशुष्कमांसइत्यर्थः ऋषिलोकान्महर्लोकादिक्रमेणमांप्रपैतिभावः अंतःकरण

अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा उलूखलाश्मकुट्टोवादंतोलूखलएवच स्वयं
संचिनुयात्सर्वमात्मनोवृत्तिकारणं देशकालबलाभिज्ञोनाददीतान्यदाहृतं वन्यैश्च
रुपुरोडाशैर्निर्वपेत्कालचोदितान् नतुश्रौतेनपशुनामांयजेतवनाश्रमी अग्निहोत्रंच
दर्शश्चपौर्णमासश्चपूर्ववत् चातुर्मास्यानिचमुनेराम्नातानिचनैगमैः एवंचीर्णेनतप
सामुनिर्धमनिसंततः मांतपोमयमाराध्यऋषिलोकादुपैतिमां यस्त्वेतत्कृच्छ्रतश्चीर्णं
तपोनिःश्रेयसंमहत् कामायाल्पीयसेयुंज्याद्बालिशःकोपरस्ततः ॥

शुद्धिभक्तिद्वाराऽत्रैवतान्मुच्यते प्रतिबंधकबाहुल्येत्वनेनक्रमेणामुच्यतइति तंसकामंनिंदति य
स्त्विति निःश्रेयसंमोक्षफलं अल्पीयसेस्वर्गादिसुखाय अल्पमेवतस्मै एवंयावज्जीवंवर्तमानस्य
मोक्षः तृतीयभागावसानेतुमंदविरागेपिसंन्यासाधिकारः यदितुततोवाऽरोगःस्वधर्मेऽशक्तोभवेत्
तदापिसम्यग्विरक्तःविरक्तोवा ॥

तत्रा विरक्तस्य कृत्यमाह यदेति जातो वेपथुः कंपो देहे यस्य सः विरक्तं प्रत्याह यदेति तत्रादौ कृत्यमा
ह इष्ट्वेति यथोपदेशं श्राद्धाष्टकं वैकं प्राजापत्यम्या मामिष्ट्वा स्वप्राणे आत्मनि संन्यासे विघ्ना भवंति तान्
विगणय्य संन्यसेदेव त्वाशयेनाह विप्रस्येति केनाभिप्रायेण कुर्वंति तमाह अयमिति परं ब्रह्म प्राप
वे प्रव्रजितस्य धर्मानाह बिभृयाच्चेदिति परं कौपीनादन्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनम्

यदासौ नियमेऽकल्पो जरया जातवेपथुः आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत् यदा
कर्मविपाकेषु लोकेषु निरयात्मसु विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः इष्ट्वा यथोप
देशं मां दत्वा सर्वस्वमृत्विजे अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् विप्रस्य वै संन्यस
तो देवा दारादिरूपिणः विघ्नान्कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परं बिभृयाच्चेन्मुनिर्वासः
कौपीनाच्छादनं परं त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं
पिबेज्जलं सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् मौनानीहानिलायामा दंडा वाग्देहचेतसां
न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः ॥

छादयेत् यावता तावन्मात्रं धारयेदित्यर्थः त्यक्तं शेषो
चापत्सर्वमेव अतोऽन्यत्किंचिदपि न बिभृयात् दंडपात्राभ्यामित्यावश्यकजलपवित्रादेरुपलक्षणं म
नःपूतं मनसा सम्यग्विचार्य यद्युक्तं तदाचरेत् मौनं वाचो दंडः अनीहा काम्यकर्मत्यागो देहस्य प्राणा
यामश्चेतसः एतेऽंतरंगा दंडा यस्य न संति अंग हे उद्धव अंगोऽप्येतैर्वेणुभिर्यतिर्न ॥ रामाय नमः

चतुर्ष्विति ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु एवं सर्वासंभवे वा विगर्ह्यान् अभिशस्तपतितान् असंक्लृ
प्तान् अत्राशयेल्लाभो भविष्यतीति पूर्वमनुद्दिष्टान् वा सप्तसंख्याकान् पावितं प्रोक्षणादिभिः शोधितं विभज्य
विष्णुब्रह्मार्कभूतेभ्यः शेषमित्यधिकाद् ग्रासो निरस्तः याचितमिति पाठे माधुकरेणायाचितमन्ने
चेत् तदपि विभज्य भुंजीत न त्वयाचितादिभेदेन चतुर्थमित्यर्थः माधुकरेण नैवेद्यभेदेनान्यत्र सवि\

भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता ब
हिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः विभज्य पावितं शेषं भुंजीताशेषमाहृतं ए
कश्चरेन्महीमेतां निःसंगः संयतेंद्रियः आत्मक्रीड आत्मरत आत्मवान्समदर्शनः विवि
क्तक्षेमशरणो मद्भावविमलाशयः आत्मानं चिंतयेदेकमभेदेन मया मुनिः अन्वीक्षे
तात्मनो बंधं मोक्षं च ज्ञाननिष्ठया बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः तस्मान्निय
म्य षड्वर्गं मद्भावेन चरेन्मुनिः विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥ ग्राम

यते नैवेद्यकं दिव्यपदस्थितं यं भौतिकं वा हरिति समस्ते यद्वा तदानीं केनापि याचितं चेत् तन्मध्ये त
स्मै किंचिद्विभज्य दत्त्वेत्यर्थः किं च एकश्चरेदिति आत्मन्येव क्रीडा कौतुकं यस्य सः आत्मन्येव च र
तः संतुष्टः आत्मवान् धीरः विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः बंधमोक्षं चैकेन बंधः के

पुराणिहहासंतिग्रामासद्दित्तः व्रजागोष्ठानितान मार्योनयात्रिकजनसमूहान यतः शिलवृत्त्यशा
सेनतद्दोयनोपमायनेनक्षुद्रसद्रूपः सन्निहतमोहः सोसिध्यतिमुच्यते ननुवृक्षान्त्वविहायकथं।
शिलान्वप्रवृत्तिः स्यादतआह नेति एतद्दृश्यमानंवृक्षात्वाद्दिवस्तुतयापश्येत यतोविनश्यति
यतः इहामुत्रचलोकेग्रसक्तचित्तः सन चिकीर्षितानतदर्थंकृत्याद्दिरमेत नतुतथापियावीदिना।

पुरग्राममव्रजानमार्योभिक्षार्थंप्रविशंश्चरेत पुण्यदेशसरिच्छैलवनाश्रमवतीमहीं वा
नप्रस्थाश्रमपदेष्वभीक्ष्णंभैक्षमाचरेत संसिध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलांधसा
नैतद्वस्तुतयापश्येद्दृश्यमानंविनश्यति असक्तचित्तोविरमेदिहामुत्रचिकीर्षितात् य
देतदात्मनिजगन्मनोवाक्प्राणसंहतं सर्वंमायेतितर्केणस्वस्थस्त्यक्त्वानतत्स्मरेत ॥

सेसम्वदेहत्वात तच्चिन्तावतः कुतोविरागः स्यात्तत्राह यदेतदिति एतज्जगतसर्वमनात्मस्वदंमनोवा
क्प्राणैः संहतंसहितमहंकारास्पदंशरीरंचसर्वंतत्तज्जन्तंसर्वंचआत्मनिमायामात्रमितितर्केणास्व
मादिदृष्टांतेनतत्त्यक्त्वास्वस्थआत्मनिष्ठः सन्पुनः तन्नस्मरेत्नचिन्तयेत ॥ ॐनमोनारायणाय ॥

ज्ञानादेर्निर्णयः पूर्वं कृतो ह्याश्रमधर्मतः । अथैकोनविंशतितमे ज्ञानादेस्त्याग उच्यते ॥ तदेवं तर्कतो बाधि-
तोपि देहादिप्रपंचो यावद्दृढपरोक्षानुभवेन दिङ्मोहादिवन्न लीयते यावन्न तज्ज्ञानाभ्यासस्तेनाशक्तिरस्त्व-
क्तं आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मयेत्यादिना यस्मात्त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य
न किंचित्कृत्यमस्तीत्याह ॥ यइति ॥ विद्याऽनुभवः तात्पर्येण श्रुतेन संपन्नः अतएवात्मवान्प्रशान्तात्म
ततः नानुमानिकः केवलपरोक्षज्ञानवान्न भवति अनकारपाठे प्राक्श्रुत्यनुकूलतर्केण निर्णीता
र्थ इत्यर्थः स इदं द्वैतं तन्निवृत्तिसाधनमपि मायामात्रमिति ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् अयमेव

श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः । मायामात्रमिदं ज्ञात्वा ज्ञानं च म-
यि संन्यसेत् १ ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः । स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते
प्रियः २ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम । ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति मां
३ तपस्तीर्थं जपो दानं पवित्राणीतराणि च । नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४
तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव । ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ५ ॥

विद्वत्संन्यासो नाम १ अत्र हेतुमाह ज्ञानिनस्त्विति यस्मादहमेव तस्येष्टः अपेक्षितः स्वार्थः फलं
हेतुः तत्साधनं च सम्मतः स्वर्गोऽभ्युदयश्च अपवर्गः संसारनिवृत्तिश्च अतस्तस्य न प्राप्यं कृत्यं वा किंचि-
दस्तीत्यर्थः २ अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति यथोक्तं ज्ञानिनमभिनंदति ज्ञानीति यतोऽसौ
ज्ञानेन मां धारयति ३ तस्य ज्ञानं स्तौति तपइति अलमर्थं ज्ञानस्य कलया लेशेन ज्ञानेन सहितं
तत्पर्यंतं यथा भवति तथा ज्ञात्वा तत्संपन्नः सन् मामेव भजन् अन्यत्सर्वं त्यजेदित्यर्थः ५ रामाय नमः

तस्यप्रत्ययार्थंपूर्वेषांवृत्तमाह ज्ञानेति मामेवसिद्धिंप्राप्ताः तदेवज्ञानंसंक्षेपतउपदिशतित्वयीति त्रिविधःआध्यात्मिकादिविकारः देहादिःसःमायानतुपरमार्थः यतयस्मात्अंतरामध्यएवापतति रज्जौसर्पमालादिवत् नाद्यपवर्गयोः नत्वादावंतेचास्तिअतःयत्यदाअस्यविकारस्यामीजन्मादयस्सः तदातस्यतवाधिष्ठानभूतस्यकिंनकिंचिदित्यर्थः तस्यापिवस्ततोनस्तीति तस्मात्सत्वादि

ज्ञानविज्ञानयज्ञेनमामिष्ट्वात्मानमात्मनि सर्वयज्ञपतिंमांवैसंसिद्धिंमुनयोऽगमन् त्वय्युद्धवाश्रयतियस्त्रिविधोविकारोमायांतरापततिनाद्यपवर्गयोर्यत् जन्मादयोस्यपदमीतवतस्यकिंस्युराद्यंतयोर्यदसतोस्तितदेवमध्ये ॥७॥ श्रीउद्धवउवाच ॥ ज्ञानंविशुद्धंविपुलंयथैतद्वैराग्यविज्ञानयुतंपुराणं आख्याहिविश्वेश्वरविश्वमूर्तेत्वद्भक्तियोगंचमहद्विमृग्यं ८ तापत्रयेणाभिहतस्यघोरेसंतप्यमानस्यभवाध्वनीश पश्यामिनान्यच्छरणंतवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ९

न्याह आद्यंतयोरिति असतःसर्पादेःआद्यंतयोर्यदस्तितन्मध्येऽप्यस्त्येवनतस्यजन्मादयःसंतिअतस्त्वंनिर्विकारंब्रह्मेति ज्ञानादेर्विशेषणितासंगृह्णाति ज्ञानमितिविशुद्धमेतत्ज्ञानंविपुलंनिश्चितंयथाभवतितथाकथयेति महद्भिःब्रह्मादिभिर्विमृग्यंमहद्विमृग्यंतमभिनयेनाह तापत्रयेणाभिहतस्यअतःसंतप्यमानस्यत्वदंघ्रिद्वंद्वमेवातपत्रंतस्मात् नकेवलमातपत्रात्किंतुअमृतमप्यभिवर्षतियत्तस्मात् ९ श्रीरामजी

एवं बहूदकादिधर्मानुक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति सार्धैर्दशभिः वहिर्विरक्तो मुमुक्षुः सन् योऽज्ञा
ननिष्ठो वा मोक्षेऽप्यनपेक्षो मद्भक्तो वा सलिंगान् त्रिदंडादिसहितान् आश्रमान् धर्मांस्त्यक्त्वा सदाश्र
मित्यक्त्वा यथोचितं धर्मं चरेदित्यर्थः न पुनरत्यंतत्यागएव विवक्षितः पुनर्धर्मविधानात् भिक्षुध
र्माध्याये वक्ष्यमाणत्वाच्च तर्हि एवं स्यात्को विशेषः तमाह अविधिगोचरः विधिकिंकरो न स्यादिति
एतदेव स्फुटीकरिष्यति शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादिना कथं चरेत्तदाह बुधः विवेक

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः बुधो
बालकवत्क्रीडेत् कुशलो जडवच्चरेत् वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् वेदवा
दरतो न स्यान्न पाषंडी न हैतुकः शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् नोद्विजेत जना
द्धीरो जनं चोद्वेजयेन्न तु अतिवादांस्तितिक्षेत नावमन्येत कंचन देहमुद्दिश्य पशुवद्वैरं कु
र्यान्न केनचित् एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः यथेंदुरुदपात्रेषु भूतान्येकात्मका

वानपि बालकवत् मानावमानविवेकशून्यः कुशलः निपुणोऽपि जडवत् फलानुसंधानाभावेन विहरेत् वि
द्वानपि उन्मत्तवत् लोकरंजनाभावेन निगमः वेदार्थनिष्ठोऽपि गोचर्यां अनियततामिव वेदवादरतः क
र्मकांडव्याख्यानादिनिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादे निःप्रयोजनगोष्ठ्यां यो विवादस्तस्मिन् अति
वादान् दुरुक्तानि आत्मदृष्ट्या तावद्वैरकारणं नास्तीत्युक्ते एक एवेति देहदृष्ट्यापि नास्तीत्याह भूतानि

वेदवादरतो न स्यान्न पाषण्डी न हैतुकः ॥

श्री·
भा·पु·
टी·
८८

दैवतंत्रितं दैवाधीनं यतः अलं तर्हि भिक्षाप्रयत्नेनापि तत्राह आहारार्थं समीहेतैव यतः तस्य प्राणधा-
रणं युक्तं यस्य का कथं तेन प्राणधारणेन तत्त्वं विचार्यते किं तेनापि तत्राह तद्विज्ञायेति तर्हि किं स्वस्थ
न्नादिकमयाच्यमेव केनेव भुक्तमित्याह यदृच्छयेति यथाहमीश्वरो लीलया चरामि तथा ज्ञानी ज्ञाननि-
ष्ठः अनासक्तः कुर्यात् न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः कुतो विधिकिंकरत्वा-

मल्लब्धानो विषीदेत काले कालेऽशनं क्वचित् लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं आहारार्थं
समीहेत युक्तं तत्प्राणधारणं तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते यदृच्छयोपपन्नान्नम
द्याच्छ्रेष्ठमुतापरं तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः शौचमाचमनं स्नानं न तु चो-
दनया चरेत् अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः नहि तस्य विकल्पाख्या या च
मद्वीक्षया हता आदेहान्तात् क्वचित् ख्यातिस्ततः संपद्यते मया दुःखोदर्केषु कामेषु जातनि
र्वेद आत्मवान् अजिज्ञासितमद्धर्मो गुरुं मुनिमुपव्रजेत् ॥

भावस्तस्य तत्राह नहि तस्य विकल्पाख्या भेदप्रतीतिः नश्चलिसा सत्यं या वासीत्सापि मद्वीक्षया हताने
नहतानन्तु न हता पुनर्दृश्यमानत्वात् तत्राह आदेहात् क्वचिद्बाधितैव ख्यातिर्भवति तदेवं विरक्तस्य
यदोक्तज्ञानवतः संन्यासं तद्धर्मांश्चोक्त्वा केवलवैराग्यवतो विविदिषुं प्रत्याह दुःखोदर्केष्विति न
जिज्ञासितो मद्धर्मो मत्साधनं येन सः ॥

८८

मामेवमदृष्ट्यैवगुरुंपरिचरेत् ततःपरमेकश्चरेदित्यादिधर्म्मैर्वर्त्ततेतिभावः अनधिकारिणःसंन्या
सेनिदर्शनद्वाभ्यां यस्त्विति प्रचंडोत्यासक्तइंद्रियसारथिर्बुद्धिर्यस्यसः सुरानंशस्थान्देवान्स्वात्मा

तावत्परिचरेद्भक्तःश्रद्धावाननसूयकः यावद्ब्रह्मविजानीयान्मा
मेवगुरुमादृतः यस्त्वसंयतषड्वर्गःप्रचंडेंद्रियसारथिः ज्ञानवै।
राग्यरहितस्त्रिदंडमुपजीवति सुरानात्मानमात्मस्थंनिह्नुतेमां
चधर्म्महा अविपक्वकषायोस्मादमुष्माच्चविहीयते भिक्षोर्ध
र्मःशमोहिंसातपईक्षावनौकसः गृहिणोभूतरक्षेज्याद्विज।
स्याचार्य्यसेवनं ब्रह्मचर्य्यंतपःशौचंसंतोषोभूतसौहृदम् गृ
हस्थस्याप्यृतौगंतुःसर्वेषांमदुपासनम् ॥ ॐनमोहरये ॥

नेवयात्मस्थंमांचनिह्नुतेप्रतारयति निह्नवफलमाह अस्मादिति चतुर्णांप्रधानधर्मानाह
भिक्षोरिति अन्यधर्मांश्चगृहस्थेऽप्यतिदिशति ब्रह्मचर्य्यमिति शौचेरागादिराहित्यंतस्य
ब्रह्मचर्य्यप्रकारमाह ऋतौगंतुरिति ॥

एवंभूतवर्णाश्रमफलमाह इतिमामिति द्वाभ्यां मद्भक्तिंविंदते ततःकिमित्यतआह भक्त्येति महेश्व
रत्वाद्देवः सर्वोत्पत्तिप्रलययोः सर्वस्योत्पत्त्यप्ययौयस्मात् अतएवतत्कारणंमांब्रह्मरूपंवैकुंठनि
वासिनं यद्वाब्रह्मणोवेदस्यकारणंमांउपयातिसामीप्येनप्राप्नोति ततश्चासौसुक्रमएवेत्याह इ

इतिमांयःस्वधर्मेणभजन्नित्यमनन्यभाक् सर्वभूतेषुमद्भावोमद्भक्तिंविंदतेदृढाम् भ
क्त्योद्धवानपायिन्यासर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययंब्रह्मकारणंमोपयातिसः इति
स्वधर्मनिर्णिक्तसत्त्वोनिर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नोनचिरात्समुपैतिमां व
र्णाश्रमवतांधर्मएषआचारलक्षणः सएवमद्भक्तियुतोनिःश्रेयसकरःपरः एतत्ते
ऽभिहितंसाधोभवान्पृच्छतियच्चमां यथास्वधर्मसंयुक्तोभक्तोमांसमियात्परं इति भा
गव एका दस्कं अष्टा दशोध्यायः १८

तिएवंभूतेनस्वधर्मेणनिर्णिक्तंशुद्धंसत्त्वं
यस्यसः अतएवनिर्ज्ञाताममगतिरैश्वर्यंयेनउक्तमर्थंसंक्षिप्याह यएषआचारलक्षणः पितृ-
लोकप्राप्तिफलःमद्भक्तियुतःमदर्पणेनकृतःप्रकरणार्थमुपसंहरति एतच्चतेऽभिहितं य
थाभक्तोभूत्वामांपरंसमाप्नुयादिति ॥ इति भावा दीपि याए दशे ष्टादशः १८

धर्मादीनां महाजनप्रसिद्धानामन्यथा व्याख्यातत्वाद्यमादिष्वपि मे व्याख्यातः स्वरूपतो वा किंचिद्वैलक्षण्यं स्यादिति संभावनया तद्विशेषजिज्ञासुः पृच्छति यम इति पंचभिः ॥ उत्तरग्रंथस्थितेन च अध्वनेचा किं परीति विद्यादीनां विशेषणं ॥ अथ मे उत्तरं प्रश्नान्स्पष्टान् यथा न विपरीतान् तु अशमादीन् अयमनियमानाह ॥ अहिंसेति त्रिभिः ॥ अस्तेयं मनसापि परस्वाग्रहणं ॥ आस्तिक्यं धर्मे विश्वासः ॥ शौचं बाह्य

॥ उद्धव उवाच ॥ यमः कतिविधः प्रोक्तो नियमो वारिकर्शन ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो २८ किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा २९ पुंसः किं स्विद्बलं श्रीमन्भगो लाभश्च केशव ॥ को विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव वा ३० कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं ३१ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥ ३२ ॥ श्रीभगवानुवाच ॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं ३३ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ३४ एते यमाः सनियमा उभ

माभ्यंतरं चेति द्वयं मतो द्वादश नियमाः श्रद्धा यमो द्वे उभयोः श्लोकद्वयोर्ये स्मृताः ते यमा नियमाश्च पंच उभयोः प्रवृत्तनिवृत्तयोः मुमुक्षोर्यमा मुख्याः सकामस्य नियमा मुख्याः स्मृता इत्यर्थः ॥ पुंस इदं नमाह ॥ द्विषयस्मात् उपासिताः सेविताः संतः ते सो प्रवृत्तानां निवृत्तानां च यथाकाममभिमतं सा

मुमुक्षोरुपादेयान्शमादीन्हेयांश्चदुःखादीन्महाजनप्रसिद्धेभ्योविलक्षणानाह शमइत्यादिनाय
त्सप्तभिः एतेनैवतद्विपरीताअशमादयोऽप्युन्नेयाः शमोमन्निष्ठताबुद्धेः नतुशांतिमात्रं दम
इंद्रियसंयमः नचोरादिदमनं तितिक्षाविहितदुःखस्यसंमर्षःसहनंनभारादेः जिह्वोपस्थ
योरेवजयोधारणंधृतिः नत्वनुद्वेगमात्रं दंडोऽमुतद्रोहः तस्यत्यागोदानंनतुधनार्पणं कामत्यागः
भोगापेक्षातपः नकृच्छ्रादिस्वभावोवासनातस्यजयःप्रतिरोधः शौर्यंनतुविक्रांतिः समंब्रह्मत
द्दर्शनंमदालोचनंसत्यंविषयत्वात्सत्यंनयथार्थभाषणमात्रं ऋतंचसत्यंसूनृतासत्यासमप्रिया

शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः तितिक्षादुःखसंमर्षोजिह्वोपस्थजयोधृतिः ३६
दंडन्यासःपरंदानंकामत्यागस्तपःस्मृतः स्वभावविजयःशौर्यंसत्यंचसमदर्शनं ३७
ऋतंचसूनृतावाणीकविभिःपरिकीर्तिता कर्मस्वसंगमःशौचंत्यागःसंन्यासउच्यते
३८ धर्मइष्टंधनंनृणांयज्ञोहंभगवत्तमः दक्षिणाज्ञानसंदेशःप्राणायामःपरंबलं ३९

प्रियाचवाक् एवंचसत्यर्तयोः स्फुटएवविवेकः अतःऋतमेवसत्यमितिस्फुटंव्याख्यातमादौततोभेदेनशौचं
त्याचष्टे तस्यापिमलत्यागरूपत्वेनत्यागादभेदप्रतीतिः कर्मस्वसंगमः अनासक्तिःशौचंत्या
गस्तुसंन्यासइतितयोर्भेदइत्यर्थः नृणांइष्टंधनंधर्मः नतुपश्वादिसाधारणंभगवत्तमःपरमेश्वरो
ऽहमेवयज्ञः मद्ध्यायतोऽनुइष्टः नक्रियाबुध्येत्यर्थः यज्ञार्थेदानंदक्षिणासाचज्ञानोपदेशः न
हिरण्यादिदानंतेनहियज्ञरूपोविष्णुःप्राप्यतेऽदमनंबलं तच्चमनोदमनहेतुत्वात्प्राणायाम

अतिकृपामुत्पादयन्नाह दृष्टमिति अस्मिन्बिले संसारकूपे पतितं तत्र च कालाहिना दष्टं एवमपि क्षुद्रसु
खेषु उरुस्तर्षः तृष्णा यस्य तं दह्यमानः कथं समुद्धराणीय इति चेत्तत्राह आपवर्ग्यैः अपवर्गबोधकैः
वागमृतैरासिंचेति १० तदिच्छासामर्थ्ये विहस्य भगवान्प्रीतमद्देवव्यासीत्याह इत्थमिति ज्ञानादिभि
रुपबृंहितान्वर्द्धितानित्यर्थः तत्र ज्ञानं कथयति नवेति प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणि

दृष्टं जनं संपतितं बिलेस्मिन्कालाहिना क्षुद्रसुखोरुतर्षं समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरा।
सिंच महानुभाव ॥१०॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं अजातशत्रुः प
प्रच्छ सर्वेषां नोनुशृण्वतां ११ निवृत्ते भारते युद्धे सुहृन्निधनविह्वले श्रुत्वा धर्मान्बहून्पश्चा
न्मोक्षधर्मानपृच्छत १२ तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रुतान् ज्ञानवैराग्यविज्ञानश्र
द्धाभक्त्युपबृंहितान् १३ नवैकादश पंच त्रीन्भावान्भूतेषु येन वै ईक्षेताथैकमप्येषु तज्ज्ञा
नं मम निश्चितं १४

एकादशेंद्रियाणि पंच महाभूतानि त्रयो गुणाः एतान्मासान्यष्टावि
शतितत्त्वानि भूतेषु ब्रह्मादिस्थावरान्तेषु कार्येष्वनुगतानि येन ज्ञानेनेक्षेत अथ एष्वपि भावेषु एकं प
रमात्मतत्त्वमनुगतं येनेक्षेत कार्यं कारणात्मकं जगत्पश्यन् परमकारणात्मकमेवैतत् न तु
ततः पृथगिति येन पश्येत्तत्ज्ञानमित्यर्थः १४

विज्ञानमाह एतदेवेति श्लोकद्वयेन यत् यदा येनैकेनानुगतानेकात्मकान्भावान् पूर्वमैक्षत ज्ञानेन त
थाएवैवनेक्षते किंतुतदेकंपरमकारणंब्रह्मैव तदाएतदेवविज्ञानमुच्यते एतदुक्तंभवति परोक्ष
ज्ञानेनापरोक्षभ्रमसंपादितमोहादिदोषविनिवृत्त्यभावात् तदाजगत्प्रपञ्चस्यात्मनः पृथक्त्वमस्तीतिम
न्यते अपरोक्षज्ञानेनतुबाधितमेवजीवन्मुक्तः संस्कारशेषंपश्यतिच अतः परोक्षापरोक्षज्ञानेज्ञानवि
ज्ञानशब्दाभ्यामुच्यतेइति एकेनसर्वकार्याणामनुगतिंकार्याणांकारणात्पृथक्त्वंचोपपाद्य

एतदेवहिविज्ञानंनतथैकेनयेनयत् स्थित्युत्पत्त्यप्ययान्पश्येद्भावानांत्रि
गुणात्मनां १५ आदावंतेचमध्येचसृज्यात्सृज्यंयदन्वियात् पुनस्तत्प्र
तिसंक्रामेयच्छिष्येततदेवसत् १६ ॥

तिसार्द्धेन तत्रयदिनकदाचिदनीदृशंजगदिदमतेनतेषांभावानामुत्पादयोनस्युः तर्हिकारणस्यै
कस्यभावादेकात्मतामिथ्यात्वंचनस्यात् अतस्तेषामुत्पत्त्यादीन्साधयति स्थितीति त्रिगुणात्मना
सावयवानामित्यर्थः विमताभावाउत्पत्त्यादिमंतः सावयवत्वात्घटादिवदितिपश्येदित्य तत आ
दौउत्पत्तौअंतेप्रलयेस्थितौचकारणत्वेनमध्येवाअन्वयत्वेन सृज्यात्सृज्यंकार्यात्कार्यांतर
प्रतियदन्वियात् अनुगच्छेत् तत्प्रतिसंक्रामेतेषांप्रलयेचयदवशिष्येततदेवसदितिपश्येदित्य

वैराग्यमाह श्रुतिरितिद्वाभ्यां श्रुतिः नेहनानास्तिकिंचनेत्यादि प्रत्यक्षेघटादिकार्यंतत्त्वादिव्यति
रेकेणानदृश्यते चैतन्यव्यतिरेकेणचनकिंचिद्दृश्यतइति ऐतिह्यंमहाजनप्रसिद्धिः अनुमानंविम
तोमिथ्यादृश्यत्वात्शुक्तिरजतवदित्यादिएवंप्रमाणचतुष्टये एतेष्वनवस्थानात् एतद्बाधित
त्वात् सएवंसर्वानुगतेसत्यमात्मतत्त्वंपश्यन् विकल्पस्यचमिथ्यात्वात्ततोविरज्यतेविरक्तोभव

श्रुतिःप्रत्यक्षमैतिह्यमनुमानंचतुष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्सविरज्यते क
र्मणांपरिणामित्वादाविरिंच्यादमंगलं विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् १८
भक्तियोगःपुरैवोक्तःप्रीयमाणायतेनघ पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरं १९
श्रद्धामृतकथायांमेशश्वन्मदनुकीर्तनं परिनिष्ठाचपूजायांस्तुतिभिःस्तवनंमम २०
आदरःपरिचर्यायांसर्वांगैरभिवंदनं मद्भक्तपूजाभ्यधिकासर्वभूतेषुमन्मतिः २१ ॥

तीत्यर्थः नचवेदोक्तस्वर्गादिसुखाशयानविरज्यतेत्याह कर्मणामिति आविरिंच्यात्ब्रह्म
लोकपर्यंतंअदृष्टमपिसर्वं अमंगलंदुःखरूपंनश्वरंचपश्येत् भक्तियोगस्यकारणमाह
भक्तियोगः पूर्वमुक्तएवतथापितस्मिन्प्रीतिंप्राप्नुवतेतुभ्यंपुनश्चकथयिष्यामि श्रद्धाश्रवणा
दरः शश्वदितिसर्वत्रानुषज्यते मदनुकीर्तनंश्रवणानंतरंमत्कथा
व्याख्यानमित्यर्थः २१ ॥

श्री
भा०प०
ए०
४४

अंगचेष्टालौकिकीक्रियावचसालौकिकेनापिमद्गुणानामीरणंकथनं मदर्थेमद्भजनार्थेतद्विरोधिनो
र्थस्यपरित्यागःभोगस्यतत्साधनस्यचंदनादेःसुखस्यपुत्रोपलालनादेः इष्टादिवैदिकंयत्कर्मतत्
दपिमदर्थेकृतंभक्तेःकारणमित्यर्थः भक्तिःप्रेमलक्षणासंजायते अस्यभक्तस्यअन्यःकोऽर्थः
साधनरूपःसाध्यरूपोवावशिष्यते सर्वोपिस्वतएवभवतीत्यर्थः किंबहुनाचित्तमेवांतर्बहिर्निष्ठ

मदर्थेंगचेष्टायांवचसामद्गुणेरणं मय्यर्पणंचमनसःसर्वकामविवर्जनं २२ मद
र्थेर्थपरित्यागोभोगस्यचसुखस्यच इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंतपः २३ एवंधर्मै
र्मनुष्याणांउद्धवात्मनिवेदिनां मयिसंजायतेभक्तिःकोन्योर्थोस्यावशिष्यते २४ य
दात्मन्यर्पितंचित्तंशांतंसत्वोपबृंहितं धर्मंज्ञानंसवैराग्यमैश्वर्यंचाभिपद्यते २५
मदर्पितंतद्विकल्पेइंद्रियैःपरिधावति रजस्वलंचासन्निष्ठंचित्तंविद्धिविपर्ययं २६
धर्मोमद्भक्तिकृत्प्रोक्तोज्ञानंचैकात्म्यदर्शनं गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः
२७

सर्वार्थानर्थयोःकारणंतदेवाह यदात्मनीतिद्वाभ्यां यदाआत्मनिमय्यीश्वरेचित्तमर्पितंतदाउ
मान्धर्मादीन्प्राप्नोत्येवएतदेवव्यतिरेकेणाइदर्शयति यद्यदातच्चित्तंविकल्पेदेहगृहादावर्पितं
सत्परिधावतितदापिकंरजस्वलमसन्निष्ठंचभवति तत्तच्चविपर्ययंअधर्मादिकंविद्धि स्वाभि
प्रेतान्धर्मादीन्त्याचष्टे धर्मोमद्भक्तिकृत् ततस्मएवप्रोक्तःप्रकृष्टउक्तःशास्त्रेषु २७ ॥

अप्रमत्तो मुमुक्षुर्योगः सर्वं प्राप्नोतीत्यत्र दृष्टान्तः छिद्यमानमिति यमैः यमवन्निर्दयैः पुरुषैः कृतं स्वस्याश्र
यं यत्र तत्पदः प्रनासक्तः दार्ष्टान्तिकमाह अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेनैव वेपथुः कम्पो यस्य सः
एवमश्यतमाने प्रमत्ते निदाने तु देहसवेनावेप्राप्येत्यध्याहारः यो भवाब्धिं न तरेत्स आत्महा तत्रैतवः
अयं सर्वफलानां मूलं एतदुपार्जितकर्मभिः सर्वं प्राप्नोति किंच सुदुर्लभं उद्यमकोटिभिरपि प्राप्तुम
शक्यं तथापि सुलभं यदृच्छया लब्धत्वात् तं च सुकल्पं प्लवं दृढं किंच गुरुः सोऽत्र तत्र कर्णधारः

छिद्यमाने यमैरेतैः कृतनीडे वनस्पतौ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलम्पटः १५ अहो
रात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति १६ नृदेहमा
द्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं
न तरेत्स आत्महा १७ यदारंभेषु निर्विण्णो विरक्तः संयतेन्द्रियः अभ्यासेनात्मनो योगी धार
येदचलं मनः १८ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं अतन्द्रितोऽनुरोधेन मार्गेण

रोनेतायस्मृते मयाच मस्तत्साद्वेराणानुकूलमारुतेन प्रेरिते एवं तावद्विरक्तस्य वैराग्यद्वारा ज्ञानभक्ति
साधककर्मयोगमुक्त्वेदानीं समप्यविरक्तस्य ज्ञानयोगेन स्वचज्ञानप्रमैः शुभैः किंचित्कर्म वर्जनीयं
चाह यदारंभेषु त्रिभिः यदा त्वारंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्तश्च तदा संय
तेंद्रियः सन् आत्मनोऽभ्यासेन आत्मविषयं संततं अचलं यथा भवति तथा मनो धारयेत्
तत्र प्रथममेवात्यंतधारणासंभवात् तत्स्वभावानुसारेणावशीकरणमाह यर्हि भ्राम्यत् परिभ्रम

ननु तर्हि यथापूर्वमेव स्यात्तत्राह मनोगतिं न विसृजेत् नोपेक्षेत किंतु अप्रमत्तः सन् लक्षयेदित्य
र्थः अनुरोधमार्गे सदृष्टांतं स्तौति एषः अनुरुद्धेति मार्गेण मनसः संग्रहः परमो योगः तत्साधनत्वात्
उपचारेणास्तुतिः तथा अदांतस्य दमनीयस्य अर्वतः अश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गतिमन्विच्छन्
अपेक्षमाणः अश्वधारणः प्रथमं किंचित्कालमनुवर्तते तदा च रश्मिन् गते अश्वस्यैव गच्छति न तूपेक्ष
ते तद्वदित्यर्थः एवमीषद्वशीकृतस्य मनसो ऽत्यन्तनैश्चल्योपायमाह सांख्येनेति त्रिभिः सांख्ये।

मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः सत्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् २०
एष वै परमो योगो मनसः संग्रहः स्मृतः हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः २१ सां
ख्येन सर्वभावानां प्रतिलोमानुलोमतः भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति २२
निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया २३

तत्त्वविवेकेन सर्वभावानां महदादिदेहांतानां अनुलोमतः प्राकृत्यादिक्रमेण भवं प्रतिलो
मतः पृथिव्यादिक्रमेणाप्ययं चानुध्यायेत् प्रसीदति निश्चलं भवति ततश्चागमापायि
तेष्वपि भूतात्मदर्शनात् तदविवेकापन्ने संसारे निर्विण्णस्य अतो विरक्तस्य ततश्च उक्तवेदिनः गु
रूपदिष्टार्थालोचकस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमा

किंच यमादिभिर्योगमार्गैः आन्वीक्षिक्या पदार्थद्वयशोधनेन ममार्चनध्यानादिभिर्वा वाशब्देन नास्य प-
त्तस्य स्वातंत्र्यं दर्शयति एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत् नान्यैः अतोऽन्यन्न कुर्यादित्यर्थः नन्व
पापापत्तौ प्रायश्चित्तं कार्यमेव तत्राह यदीति योगेन ज्ञानाभ्यासेनैव एतच्च भक्तस्यापि नामकीर्तना-
द्युपलक्षणार्थं नान्यत् कृच्छ्रादि न तु नित्यनैमित्तिके कर्मसत्त्वशोधकत्वाद्गुणाः हिंसादिकं त्वशुद्धिहेतुत्वा-
द्दोषः तत्र च तेन निवर्तकत्वात् कृच्छ्रादिप्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात् प्रायश्चित्तं विना यो-
गेनैव कथं पापं दहेत्तत्राह स्वे स्वे इति सार्धेन स एव गुणः नेतरः तदुपपादयति यस्माद्विधिप्रतिषेधा

यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः
२४ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २५
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः कर्मणां जात्यशुद्धानामनेन नियमः कृतः
गुणदोषविधानेन संगानां त्याजनेच्छया २६

भ्यामनेन गुणदोषविधानेन कर्मणां नियमः
संकोचः कृतः कुतः अत आह जात्या उत्पत्त्यैवाशुद्धानां स च प्राप्तानां संगानां त्याजनेच्छया अयं भावः
पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् न च सद्यस्सा सर्वतो निवृत्तिः
कर्तुं शक्यते अतः इदं न कर्तव्यं इदमेव कर्तव्यमिति स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रिय-
ते यथा न प्रवृत्तिपरो वेदस्तथोत्तराध्याये वक्ष्यामः उत्पत्त्यैव हि कामेषु इत्यादिना अतो योगिनः स्वा-
भाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगोचरतेति २६

भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति त्रिभिः मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु उद्वि-
ग्नः न तु तत्फलेषु विरक्तः तदाह वेदेति यद्यपि वेद तथापि तत्परित्यागे अनीश्वरः अशक्तः एवंभूतोयः स
श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततः तदनन्तरं मां प्रीत्या भजेत विषयांस्तु सेवमानो-
पि तेषु प्रीतिं न कुर्यादित्याह गर्हयन्निति कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां श्र-
द्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना तत्र तत्रोक्तेन मां असकृन्नित्यं भजतः हृदय्याः हृ-

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान्परित्यागे-
प्यनीश्वरः २७ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः जुषमाणश्च तान्कामा-
न्दुःखोदर्कांश्च गर्हयन् २८ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः का-
मा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते २९ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसं-
शयाः क्षीयंते चास्य कर्माणि मयि दृष्टे खिलात्मनि ३० तस्मान्मद्भक्तियुक्त-
स्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ३१ श्रीराम

ताः कामा नश्यंति हृदयमेव ग्रंथिरहंकारः तत्सर्वकाश्च सर्वे संशयाः असंभावनादयः कर्माणि अनारब्धफ-
लानि संसारहेतुभूतानि तदेवं व्यवस्थया अधिकारत्रयमुक्तं तत्र च भक्तेरन्यनिरपेक्षत्वादन्यस्य च
तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं य-
स्य तस्य श्रेयः श्रेयःसाधनम् ३१ हरये नमः ॥

विशेषोगत्रयंप्रोक्तंभक्तिस्तानंक्रियात्मकं गुणदोषव्यवस्थार्थमधिकारिविभागतः गुणदोषदृशि
दोषोगुणस्तूभयवर्जितस्तत्रोक्तंतदाविधिप्रति विधिश्चेतिपंचभिः विधिश्चप्रतिषेधश्चेश्वरस्यतत्रविनिग
मस्यात्मरूपोवेदः सचविधेयानांनिषेध्यानांचकर्मणांगुणदोषंचपुण्यपापफलरूपमेववक्ति उ
त्तमाधमभावेनतदधिकारिणांवर्णानामाश्रमाणांविकल्पभेदंचगुणदोषरूपमेववक्ति प्रति
लोमानुलोमजंचगुणदोषंतथैवावक्ति प्रतिलोमजाः उत्तमवर्णास्त्रीषुहीनवर्णेभ्यः पुरुषेभ्यो

उद्धवउवाच विधिश्चप्रतिषेधश्चनिगमोहीश्वरस्यते अवेक्षतेऽरविंदाक्षगुणंदोष
चकर्मणां १ वर्णाश्रमविकल्पंचप्रतिलोमानुलोमजं द्रव्यदेशवयः
कालान्स्वर्गंनरकमेवच २ ॥

जाताः सूतवैदेहकादयः अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्योहीनवर्णासुस्त्रीषुजाताः मूर्द्धा
वसिक्ताम्बष्ठादयः तेषांच असत्संतत्वंविज्ञेयाः प्रतिलोमानुलोमजाउक्तागुणदोषौद्रव्यादीनां
कर्मदिनानदिनाभ्यांस्वर्गंनरकंचतत्फलतयागुणदोषरूपमेवावक्ति एतत्सर्वंतत्राध्यायेप्र
पंचयिष्यते २ श्रीरामायनमः ॥

श्री· भा· पं· टी· ११

तथापिप्रस्तुतेकिमायातेत्यतआह गुणदोषेति गुणदोषदृशिर्दोषइतिनिराकृतत्वात् गुणदोष-
भिदादृष्टिमंतरेणतांविनानिषेधविधिलक्षणंकर्मकांडरूपंतववचः कथंतत्तववचोंतरेणनृणांनिः-
श्रेयसंकथंस्यात् तत्रापिश्रोतव्योमंतव्यइत्यादिसाधनविधेःनानुध्यायाद्बहून्शब्दान्वाचोविग्लापनं
हितदित्यादिनिषेधस्यचावश्यकत्वादितिभावः यद्वागुणदोषभिदादृष्टिमंतरेणनिषेधविधिलक्षणं
तववचोविनेतिसामानाधिकरण्यमेवास्तुयद्वागुणदोषभिदादृष्टिमंतरेणनिषेधविधिलक्ष(

गुणदोषभिदादृष्टिमंतरेणवचस्तव निःश्रेयसंकथंनृणांनिषेधविधिलक्षणम् ३
पितृदेवमनुष्याणांवेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेर्थेसाध्यसाधनयोरपि ४ गुणदो
षभिदादृष्टिर्निगमात्तेनहिस्वतः निगमेनापवादश्चभिदायाइतिहभ्रमः ५ श्रीराम(

णामपिवचःकथंततत्वमस्यादिवाक्यवत्निःश्रेयसपरंस्यात्सर्वस्यवेदस्यतत्परत्वांगीकारादित्य-
र्थः नत्वपितरोदेवाश्चसर्वज्ञाः प्रत्यक्षतादृष्टामनुष्याश्चः कथंपिध्यतीतितत्राह पितृदीनांसर्वेषांत(
वत्वद्वाक्यरूपोवेदएवतत्श्रेयःश्रेष्ठंचक्षुःप्रमापकंकथंअनुपलब्धेर्थेमोक्षेस्वर्गादौचतथासाध्यसाध-
नयोःइदमस्यसाध्यंइदमस्यसाधनमित्यत्रापि तदेवंगुणदोषदृष्ट्यभावेनिःश्रेयसंनघटते
किंचशास्त्रेणैवविहितोभेददृष्टिस्तस्मिन्नेवविषयेशास्त्रंकथंनिवर्तयेदित्याह तेनियमान्नत्वदा-
ताद्रूपाहेहेदेवनहिस्वतः यस्मादयंशास्त्रतेनाननिवर्त्ततेहास्फुटंभ्रमोभवतितेननिवर्त्तयेति ५ ॥

११

विषयभेदप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह ५ योगा उपायाः ब्रह्मकर्मदेवताकांडैः प्रोक्ताः
कर्म चानिष्कामं श्रेयोविधित्सया मोक्षसाधनेच्छया अन्य उपायो नास्ति काम्यकर्मादिकं व्यासेव्यावर्तयति
तथा चोत्तराध्याये स्फुटीकरिष्यति यएतानित्यादिना तेष्वधिकारिभेदमाह द्वाभ्यां ६ तेषां मध्ये क
र्मसु निर्विण्णानां दुःखबुध्या तत्फलेषु विरक्तानामत एव तत्साधनभूतकर्मन्यासिनो ज्ञानयोगः सिद्धि
द उक्तत्रयेगान्वयः अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानामतः कामिनो तत्फलेष्वविरक्तानामित्य

श्री ग उ च योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ज्ञानं कर्म च भक्तिश्च
नोपायोन्योस्ति कर्हिचित् ५ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्व
निर्विण्णचित्तानां कर्मयोगस्तु कामिनां ७ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्
न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः ८ तावत्कर्माणि कुर्वीत न निर्विद्येत
यावता मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जायते ९

र्थः ७ यदृच्छया केनापि भाग्योद
येन तत्र काम्यकर्मसु प्रवर्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकारः उक्तस्तत्राध्याये वक्ष्यति निष्का
मकर्मयोगाधिकारिणस्तु यथाशक्ति सर्वे ज्ञानभक्तियोगात्मभावतदधिकृतयोः तल्यः सिद्ध
नो वा किंचिदिति सार्वाधिकर्मयोगमाह नवभिः कर्माणि नित्यनैमित्तिकानि यावता यावत्कर्म
योगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह ९

श्री॰
भा॰ ए॰
टी॰
९९

तथापिप्रश्नतेकिमायातेत्यतआह गुणदोषौति गुणदोषदृशिर्दोषइतिनिराकृतत्वात् गुणदोष॑
भिदादृष्टिमन्तरेणतांविनानिषेधविधिलक्षणंकर्मकाण्डंतववचःकथंतवैववचनंतरेणनृणांनिः
श्रेयसंकथंस्यात् तत्रापिश्रोतव्योमंतव्यइत्यादिसाधनविधेःनानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनं
हितदित्यादिनिषेधस्यचावश्यकत्वादितिभावः यद्वा गुणदोषभिदादृष्टिमन्तरेणनिषेधविलक्षण॑
तववचोविनेतिसामानाधिकरण्यमेवास्तुयद्वागुणदोषभिदादृष्टिमन्तरेणनिषेधविधिलक्ष॑

गुणदोषभिदादृष्टिमन्तरेणवचस्तव निःश्रेयसंकथंनृणांनिषेधविधिलक्षणम् ३
पितृदेवमनुष्याणांवेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेर्थेसाध्यसाधनयोरपि ४ गुणदो
षभिदादृष्टिर्निगमात्तेनहिस्वतः निगमेनापवादश्चभिदायाइतिमेभ्रमः ५ श्रीराम॑

णमपिवचःकथंतत्तत्त्वमस्यादिवाक्यवत्निःश्रेयसपरंस्यात्सर्वस्यवेदस्यतत्परत्वांगीकारादित्य
र्थः ननुपितरोदेवाश्चसर्वज्ञाःप्रत्यक्षेणादृष्टामनुष्यास्तुपःकथाचिदित्येतनेत्याह पित्रादीनांसर्वेषांत
वैतद्वाक्यरूपोवेदएवतच्छ्रेयःश्रेष्ठंचक्षुःप्रमापकंक्व अनुपलब्धेर्थेमोक्षस्वर्गादौचतथासाध्यसाध
नयोः इदमस्यसाध्यम् इदमस्यसाधनमित्यत्रापि ततएवगुणदोषदृष्ट्याभावेनिःश्रेयसंनघटते
किंचशास्त्रेणैवविहितोभेददृष्टिस्तस्मिन्नेवविषयेशास्त्रंकथंनिवर्तयेदित्याह तेनिगमात्त्वदु
क्तारूपाद्वेदादेवनहिस्वतःयस्मादर्थस्वभावतोनानिवर्ततेतदाखण्डंमेभ्रमोभवतिनानिवर्तयेति ५ ॥

९९

विषयभेदमधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह ५ योगाउपायाःब्रह्मकर्मदेवताकांडैःप्रोक्ताः
कर्मचान्यकामंश्रेयोविधित्सयामोक्षसाधनेच्छयाअन्यउपायोनास्तिकाम्यकर्मादिकंत्वासक्त्यावर्तयति
तथाचोत्तराध्यायेस्फुटीकरिष्यति यएतानित्यादिनातेष्वधिकारिभेदमाहद्वाभ्यां ६ इहैषांमध्येक
र्मसुनिर्विण्णानांदुःखबुद्ध्यातत्फलेषुविरक्तानामतएवतत्साधनभूतकर्मन्यासिनांज्ञानयोगःसिद्धि
दइत्युत्तरेणान्वयः अनिर्विण्णचित्तानांदुःखबुद्धिशून्यानामतःकामिनांतत्फलेष्वविरक्तानामित्य

श्री भ उ च योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ज्ञानंकर्मचभक्ति
श्चनोपायोन्योस्तिकुत्रचित् ५ निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु तेष्व
निर्विण्णचित्तानांकर्मयोगस्तुकामिनां ७ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान्
ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदः ८ तावत्कर्माणिकुर्वीतननिर्विद्येत
यावता मत्कथाश्रवणादौवाश्रद्धायावन्नजायते ९

यः ७ यदृच्छयाकेनापिभाग्योद
येनतत्रकाम्यकर्मसुप्रवर्तमानस्यसर्वात्मनाविधिप्रतिषेधाधिकारउक्तउत्तराध्यायेवक्ष्यतिनिष्का
मकर्मयोगाधिकारिणस्तुयथाशक्तिसर्वंज्ञानभक्तियोगात्मभावत्तदधिकृतयोःतत्त्यक्तःसिद्धा
नांतुकिंचिदितिसावधिकर्मयोगमाहनवाभिःकर्माणिनित्यनैमित्तिकानियावतायावत्कर्म
योगिनोज्ञानभक्तिभूमिकारोहप्रकारमाह ९

श्री॰
भा॰ए॰
टी॰
२५

अनाशीःकामअफलकामः अन्यतःनिषिद्धंनरकयानंहिविधेवविहितानिकर्माद्याचरणाद्वा अतःस्वध
र्मस्थत्वान्निषिद्धवर्जनाच्चनरकंनयातिअफलकामत्वान्नस्वर्गमपीत्यर्थः किंच १० अस्मिंल्लोकेअ
स्मिन्देहेअनघःनिषिद्धत्यागीअतःशुचिःनिहतरागादिमलःयदृच्छयेति केवलज्ञानादपिभक्तेर्दु
र्लभतांद्योतयति अनेनप्रकारेणज्ञानभक्तिसाधनत्वान्नरदेहेपरिसमाप्तिविशेषणइतिदृष्टांतेन

स्वधर्मस्थोयजन्यज्ञैरनाशीःकामउद्धव नयातिस्वर्गनरकौयद्यन्यन्नसमाचरेत् १०
अस्मिंल्लोकेवर्तमानःस्वधर्मस्थोनघःशुचिः ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवायदृच्छया
११ स्वर्गिणोप्येतमिच्छंतिलोकंनिरयिणस्तथा साधकंज्ञानभक्तिभ्यामुभयंतदसाध
कं १२ ननरःस्वर्गतिंकांक्षेन्नारकींवाविचक्षणः नेमंलोकंचकांक्षेतदेहावेशात्प्रमा
द्यति १३ एतद्विद्वान्पुरामृत्योरभवायघटेतसः अप्रमत्तइदंज्ञात्वामर्त्यमप्यर्थसिद्धिदं
१४

नोक्तंज्ञानभक्तिभ्यांज्ञानभक्त्योस्तुउभयंस्वर्गिनारकिशरीरं १२ अतोनरःस्वर्गतिंनकांक्षेतनन्नार
कीमितिदृष्टांतः यद्वानरकसाधनकर्माणिनकुर्यादित्यर्थः अस्यातिश्रेष्ठत्वात्तन्नरपिमनुष्योभ
वेयमितिनकांक्षेतयतोदेहावेशात्देहासक्त्याप्रमाद्यतिज्ञानशून्योभवतीत्यर्थः १३ अपितन्नदे
हेसाधकमितिविद्वान्तच्चार्थमपिमर्त्यंज्ञात्वाप्रमत्तस्नासक्तःसन्परेत्याःपूर्वमेवमोक्षायघटेतयत्ने
कुर्यात् १४ ॐनमोभगवतेवासुदेवाय ॥

२५

लाभं व्याचिख्यासुः प्रथमं भगं ततो भेदेन व्याचष्टे लोके तयोरभेदप्रसिद्धेः भगो भाग्यं तच्च मे ऐश्वरो भावो मदीयं ऐश्वर्यमणिमाद्यष्टगुणमित्यर्थः उत्तमो लाभस्तु मद्भक्तिः न पुत्रादिः विद्या वा आत्मनि प्रतीतस्य भेदस्य बाधः न ज्ञानमात्रं अकर्मसु जुगुप्सा हेयत्वदर्शनेन ह्रीः न लज्जामात्रं ४० गुणा एव श्रीर्मंडनं न त्वेकरीटादि दुःखसुखयोरत्ययः अतिक्रमः सुखं न तु मेध्यान्नसंविनभोगः विषयभोगापेक्षैव दुःखं न तु पित्तदाहादिबाधा

भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ४० श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ४१ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः ४२

मोक्षं हेयं वा यो वेत्ति स पंडितः न विद्वन्मात्रं ४१ अहं त्वं हि इत्युपलक्षणं देहगेहादिष्वहं ममेत्यभिमानवान्मूर्ख इत्यर्थः मन्निगमः मां नितरां गमयति प्रापयतीति यो निवृत्तिमार्गः स एव पंथाः सन्मार्गः न कंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः न तु चोराद्याकुलः सत्त्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ४२

श्रीः
भाः पः
टीः
६२

तमस्तउन्नाहउद्रेकः सनरकः नतामिस्रादिः गुरुरेवबंधुर्नभ्रात्रादिः सचाहमेव यथाहंजगद्गुरुः सकल
धर्मोत्पादकत्वात्किंचनगोहरिरिति सत्साधनभोगायतनंगृहं तच्चमानुष्यंमानुषरूपंशरीरमेवनतु
स्योदिगुणैः संपन्नः सआढ्यउच्यतेनधनी असंतुष्टोयः सदरिद्रः ननिस्वः योजितेंद्रियः सकृपणः शोच्य
नदीनः विषयेष्वनासक्तधीर्यः सईशः स्वतंत्रः नराजादिः गुणेषुसंगोयस्यसः अनीशः परत

नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४३ दरिद्रो
यस्त्वसंतुष्टः कृपणोयोजितेंद्रियः गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः ४४ एत
उद्धवतेप्रश्नाः सर्वेसाधुनिरूपिताः किंवर्णितेनबहुनालक्षणंगुणदोषयोः ४५ गुण
दोषदृशिर्दोषोगुणस्तूभयवर्जितः ४६ इति भा व तए ८ प न घः १९

चशमादिविपर्ययोपलक्षणार्थः उपसंहरति एतउद्धवतेसाधुमोक्षोपयोगितया एतच्चसर्वंगु
णदोषयोर्विवेकायोद्धवेनपृष्टमितितयोःसंक्षेपेतोलक्षणमाह किंबहुनावर्णितेनगुणदो
षयोर्लक्षणमेतावदेवतदाह गुणदोषयोर्दृशिर्दर्शनमेवदोषः गुणस्तुतदुभयदर्शनवर्जितः
स्वभावइति ४६ ३ श्री वाये पि याए ८ स्कं प न सो यः ॥ = १९

६२

तत्रहेतुः यत्कर्मभिरित्यादि ३ इतरैस्तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्ब्रह्मत्वंसत्वशुद्ध्यादितत्सर्वमञ्ज
साअनायासेनैवमपवर्गंमद्धामवैकुंठंलभतएव वांछातुनास्तीत्याह यदिवांछतीति तत्रहेतुमाह
नकिंचिदिति धीराः धीमंतः यतोममएकांतिनः मय्येवप्रीतियुक्ताः अतोमयादत्तमपिनगृह्णंतिकिं
वक्तव्यंनवांछंतीत्यर्थः अपुनर्भवंआत्यंतिकमपिकैवल्यंतदुपपादयति नैरपेक्ष्यमेवपरंउत्कृष्टं
अनल्पकंमहत्तनिःश्रेयसंफलंतत्साधनंचप्राहुः मेभक्तिःनिराशिषः प्रार्थनाशून्यस्यनिरपेक्षस्य

यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत् योगेनदानधर्मेणश्रेयोभिरितरैरपि ३२ सर्वंम
द्भक्तियोगेनमद्भक्तोलभतेंजसा स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछति ३३ नकिंचित्सा
धवोधीराभक्ताह्येकांतिनोमम वांछंत्यपिमयादत्तंकैवल्यमपुनर्भवं ३४ नैरपेक्ष्यं
परंप्राहुर्निःश्रेयसमनल्पकं तस्मान्निराशिषोभक्तिर्निरपेक्षस्यमेभवेत् ३५ नमय्येकां
तभक्तानांगुणदोषोद्भवागुणाः साधूनांसमचित्तानांबुद्धेःपरमुपेयुषां ३६ एवमेतान्म
यादिष्टाननुतिष्ठंतिमेपथः क्षेमंविंदंतिमत्स्थानंयद्ब्रह्मपरमंविदुः ३७ इति का शेवि

प्रार्थनाकारणापेक्षारहितस्ययाभक्तिःसानिराशिषोभवेदित्यर्थः अनेनचप्रकारेणसिद्धानांगुण
दोषादिनिरोधपरिहारमुपसंहरतिनमयीति गुणदोषैर्विहितप्रतिषिद्धैरुद्भवायेषां तेगुणाः पु
ण्यपापादयः साधूनांनिरस्तरागादीनांअतःसमचित्तानांअतएवबुद्धेःपरमीश्वरंप्राप्तानांकाम्य
कर्मनिरूपणोपसंहरति एवमिति मेपथः मत्प्राप्त्युपायान्येअनुतिष्ठं
ति तेक्षेमंकालमायादिरहितं भगवल्लोकंविंदंतियत्परंब्रह्मतच्चविदुः इत्ये द वि ध्यायः २०

जयतिस्वपरानंदःपरानंदनृकेसरी यत्कृपालवलेशेनश्रीधरःसत्कृतिःकृती ईक्षंतामिक्ष्यासंतः
क्षमंतांममसाहसं मयाहिस्वीयबोधायकृतमेतन्नसर्वतः एकविंशेक्रियाज्ञानभक्तिष्वनधिका
रिणां कामिनांद्रव्यदेशादिगुणदोषाःप्रपंचिताः तदेवंगुणदोषव्यवस्थार्थंयोगत्रयमुक्तं तत्रच।
ज्ञानभक्तिसिद्धानांनकिंचिद्गुणदोषौ साधकानांतुप्रथमतोनिवृत्तकर्मनिष्ठानांयथाशक्तिनित्य।
नैमित्तिककर्मसत्वशोधकत्वाद्गुणःतदकरणंनिषिद्धकरणंचतन्मलीमसकरणत्वाद्दोषःतन्नि
वर्तकत्वाच्च प्रायश्चित्तंगुणःविशुद्धसत्वानांतुज्ञाननिष्ठानांज्ञानाभ्यासएवसिद्धिहेतुत्वाद्गुणःभक्ति

श्री भ उ च यएतान्मत्पथोहित्वाभक्तिज्ञानक्रियात्मकान् क्षुद्रान्कामांश्चलैः
प्राणैर्जुषंतःसंसरंतिते १ स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्तितः विपर्ययस्तु
दोषःस्यादुभयोरेषनिश्चयः २

निष्ठानांपुनःश्रवणकीर्तनादिभक्तिरेवगुणःतद्विरुद्धस्
त्वुभयेषांदोषइत्युक्तं इदानींयेत्वसिद्धानापिसाधकाःकेवलकाम्यकर्मप्रधानाःतेषांसकल
गुणदोषान्प्रपंचयिष्यन्नादौतानतिबहिर्मुखान्निंदति यएतानिति मत्पथोमदुक्तमार्गान्क्षु
द्रान्तुच्छान्चलैःचंचलैःप्राणैःदेहवायुभिरिंद्रियैर्वाजुषंतःसेवमानाःभवंतितेसंसरंतिनिखिलगु।
णदोषभाक्त्वेननानायोनीःप्राप्नुवंतीत्यर्थः ननुतैरेवकर्मभिःकेचिद्गुणदोषभाजः केचिन्नेतिकुतो
वैषम्यंनह्यग्निनाकेचित्तप्यंतेकेचिन्नेतिसंभवतितत्राह स्वेस्वेइति अधिकारभेदेनकल्पितोगुणः।

तदाह शुद्धबुद्धीइति विचिकित्सार्थं योगपमयोगपं वेति संदेहद्वारा स्वाभाविकप्रवृत्तिप्रतिबंधार्थमि
त्यर्थः तत्र शुद्धबुद्धी योगपत्वायोगपत्वे रागादिदोषात्तन्निमित्तोपादेयत्वानुपादेयत्वे शुभाशुभौ तन्निमि
त्तावर्थानर्थौ तत्र शुद्धबुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धेनाधर्म इति रागादिदोषो व्यवहारार्थं अशुद्धाव
पि राजादीनां व्यवहारदर्शनाद्युपादेयेनान्यदिति शुभाशुभौ यात्रार्थं दोषत्वप्रापत्त्वशरीरनिर्वा
हमात्रोपादानेन पापं अधिकोपादानेन पापमिति मयामत्वादिरूपाणि धर्मरूपाण्युरभारेक।

शुद्धबुद्धी विधीयेते समानेष्वपि वस्तुषु द्वयस्य विचिकित्सार्थं रागादिदोषौ शुभाशुभौ ३
धर्मार्थं व्यवहारार्थं यात्रार्थमिति चानघ दर्शितोऽयं मया चारो धर्मसूक्ष्मतरोऽपरं ४
भूम्यंबुवह्न्यनिलाकाशा भूतानां पंच धातवः आब्रह्मस्थावरादीनां शरीराण्यात्मसंयु
ताः ५ वेदनं नामरूपाणि विषमाणि समेष्वपि धातुष्वेव कल्प्यंते पंचेषां धर्मसिद्ध
ये ६

मेजशानामित्यर्थः शुद्धबुद्धी प्रपंचापेक्षत्वेनोक्तत्वेन तदभिनिवेशो मा भूदिति समानेष्वपि व
स्तुष्विति पद्भ्युक्तं तत्र पंच यति भूमीति त्रिभिः भूतानां प्राणिनां धारयंतीति धातवः कारणानि श
रीराः शरीरारंभकाः देहतः साम्यमुक्तं जीवतो व्याह आत्मसंयुता इति धातुषु देहे नामरूपाणि
वर्णाश्रमादीनि कल्पनायाः प्रयोजनमाह एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वाराय

नकेवलं देहेष्वेवापितु देशकालादिभावानामपि आदिशब्देनोपादेयस्य नोफलनिमित्ताधिकारि
णां च द्रव्याणां वस्तूनां उपादेयानां व्रीह्यादीनामपि मम मया नियमार्थं मे कोचार्थमित्यर्थः एवं गुणदो
षविषयं परिशोध्य तयोः शुद्ध्यशुद्धीः प्रपंचयति अकृष्णसार इत्यष्टभिः देशानां मध्ये कृष्णसारहरिणरहि
तोऽशुचिः तत्रापि अब्रह्मण्यः ब्राह्मणभक्तिशून्यो देशोऽत्यन्तमशुचिः कृष्णसारोऽपि कृष्णेन मृगेन सारः श्रे
ष्ठयः सोऽपि असौवीरः कीकटः सवीराः सत्पुरुषाः तद्धीनः असौवीरः कीकटोऽपि शुचिः तदुक्तं सर्वे

देशकालादिभावानां वस्तूनां मम सत्तम गुणदोषौ विधीयेते नियमार्थं हि कर्मणां ७
अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत् कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणं
८ कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा यतो निवर्तते कर्म स दोषोऽकर्मकः स्मृतः

पुण्यतमो देशः सत्यां च यत्र लभ्यत इति तद्धीनो यः कीकटः अंगवंगकलिंगादिः असंस्कृतः सं
भावेनादिशून्यः म्लेच्छबहुलः ऊरिणमुषरं एकवद्भावः तत्र अशुचिः तदन्यः शुचिरित्यर्थादुक्तं भवति
कालस्य शुद्ध्यशुद्धी दर्शयति कर्मण्य इति द्रव्यतः द्रव्यसंपत्त्या स्वतो वा एवोक्तादिर्यः कर्मण्यः क
र्माहः स कालस्तस्मिन् कर्माणि गुणवान् यतः यस्मिन् द्रव्यालाभेन वा राष्ट्रविप्लवादिना कर्म निव
र्तते यश्च सूतकादौ दशाहादिलक्षणः अकर्मकः कर्मानर्हः स्मृतः स कालो दोषः अशुद्ध इत्यर्थः ९

श्री॰ भा॰ टी॰ १८

१८

अस्त्रशाखोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति द्रव्यस्येति चतुर्भिः द्रव्येण तोयादिना शुद्धिः मूत्रादिना
त्वशुद्धिः वचनेन शुद्धमशुद्धं वेति संदेहे शुद्धमित्येवं रूपेण ब्राह्मणवचनेन शुद्धिः विपरीतेनाशुद्धिः संस्का
रेण प्रोक्षणादिना पुष्पादेः शुद्धिः अवघ्राणादिना त्वशुद्धिः कालेन कालमेघोदकं ग्राह्यं वर्ज्येतरमहमेव
हि [illegible] अकाले दशरात्रं स्यान्ततः शुद्धिर्विधीयते दशाहादिना नवोदकादेः शुद्धिः विपरीतेनाशुद्धिः पर्यु
षितान्नादेरशुद्धिः प्रेतजातशुपहतानां तडागाद्युदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी शक्त्या सूर्योपरा
गादिसूतकान्नादेः शक्तानां तस्य शुद्धिः अशक्तानां तस्य शुद्धिः पर्युषितान्नादेरशुद्धिः बालवृद्धातुराणां व

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च संस्कारेणाथ कालेन महत्त्वाल्पतयाथवा ॥ १० ॥
शक्त्याशक्त्याथवा बुद्ध्या समृद्ध्या च यदात्मने अपवर्जयन्तीति हि यथादेशावस्थानुसारतः ॥ ११ ॥

या प्रजन्मादौ दशाहादिहस्त्रानेन शुद्धिः अन्तस्नानेनाशुद्धिः समृद्ध्या जीर्णजीर्णमलवद्वस्त्रादेः अ
त्यशुद्धिः दरिद्रस्य तिशुद्धिः तत्रापि विशेषमाह यदीति एतच्च द्रव्यवचनादयो द्रव्याशुद्धिहारा आ
त्मने यदहं कुर्वन्तीति तद्देशमवस्थानुसारत एव यथावत् कुर्वन्तीति न सर्वतः तथाहि निर्भय एव देशे कु
र्वन्ति न तु चाराद्याकुले तथा रोगादिव्यतिरिक्त एवावस्थायामेवं कुर्वन्ति न वाल्पराणाद्यवस्थाय
मिति स्मृतिः देशकालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति

श्री॰ भा॰ ए॰

द्भ्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादि शुद्धिरेकरूपैव द्रव्यतस्य शुद्धिर्बहुरूपेति तां प्रपंचयति धा
न्येति दारु लौकिकं यद्वच मसादिव शृंगादि गजदंतादि रसास्तैलघृतादयः तैजसाः सुवर्णादयस्ते
षां पार्थिवानां च रथ्याकर्दमचंदनष्टकादीनां यथा यथं कालादिभिः शुद्धिः तत्रापि कालात्यत्नाद्युप
वातनस्य तत्प्यन देशकालाद्यवस्थाद्यनुसारेण च पतेरत्येभ्यः युता युते मिलितैः केवलैश्च कालस्य
प्रत्येकं हेतुत्वप्रदर्शनार्थं द्रव्यस्वरूपस्य शोध्यशुद्धिमुक्त्वा लेपाविषयेऽप्याह यत्पीठपात्रवस्त्रादियेन

धान्यदार्वस्थितंतूनां रसतैजसचर्मणां। कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः १
अमेध्यलिप्तं यद्येन गंधलेपं व्यपोहति। भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते २
स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः मत्स्मृत्या चात्मनः शौचं शुद्धः कर्मचरो द्वि
जः ३

तद्व्याचष्टे अमेध्योदकादिना गंधं च लेपं च व्यपोहति त्यजति स्वगतं च मलं तत्का प्रकृतिं स्वमेव
रूपं भजते तस्य सतः शौचं येन च केयावता वत लक्षणादिना व्यपोहति तावत्प्रमाणं स्वरूपग्राह
ति तावानं तर्कं निर्व्यमिष्यते एवं तावद्द्रव्यशुद्धिरुक्ता इदानीं कर्तृशुद्धिमाह स्नानेति अवस्था कौ
मारादिः वीर्यं शक्तिः संस्कार उपनयनादिः कर्म संध्योपासनदीक्षादिलक्षणं आत्मनः सांहंकार
स्य कर्तुः एतैः स्नानादिभिर्यथायथं तत्कार्यानुसारेण शुद्धिः इयं च शुद्धिर्व्यवहाराय यथा कि विवि

मंत्रशुद्धिमाह सद्गुरुमुखाद्यथावत्परिज्ञानेमंत्रस्यशुद्धिः कर्मशुद्धिमाह ईश्वरार्पणात्कर्मणःशुद्धिः ध
र्मार्थंशुद्धद्रव्यप्रपंचतःप्रदर्श्योपसंहरति धर्मइति देशकालद्रव्यकर्तृमंत्रकर्मभिःषड्भिःशुद्धैर्ध
र्मःसंपद्यते एतेषांयोविपर्ययःसोधर्मःतद्धेतुरित्यर्थः अयंचगुणदोषविभागोनवास्तवइत्याह
क्वचिदिति अप्रतिग्रहादेर्गुणःस्यादापदितुविहितत्वाद्दोषःपरधर्मस्यपरस्यगुणोऽपिस्वस्य
दोषःदोषोपिफलंकर्तुत्यागादिविरक्तादेर्दोषःअपितुविधिबलेनगुणःएवंचायंगुणदोषयोरेक

मंत्रस्यचपरिज्ञानंकर्मशुद्धिमदर्पणं धर्मःसंपद्यतेषड्भिरधर्मस्तुविपर्ययः १५ क्व
चिद्गुणोपिदोषःस्याद्दोषोपिविधिनागुणः गुणदोषार्थनियमस्तद्भिदामेवबाधते १६
समानकर्माचरणंपतितानांनपातकं औत्पत्तिकोगुणःसंगोनशयानःपतत्यधः १७

स्मिन्नेवार्थेनियमःगुणदोषार्थेवायोनियमःनियामकंशास्त्रंसतयोर्भेदमेवबाधतेदोषस्यक्वचि
त्दोषत्वाभावेगुणत्वेवोदाहरणंदर्शयति समानस्यतस्यैवकर्मणःसुरापानादेराचरणंअप
तितानांपतनहेतुरपिजातंकर्मणावापतितानांपुनःपातकमधिकारभ्रंशकंनभवति एवंम
वपतितत्वात् अतोत्रदोषस्यापिदोषतानास्तीत्यर्थः तथासंगोपिपितृयोयतेदोषःसगृहस्थस्यौत्पत्ति
कःएवंस्वीकृतेनदोषःअपितुगुणःऋतौभार्यामुपेयादितिविधानात् अधपतनशंकातःएवमबाधः

यतो गुणदोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह यतो यत इति
यथाश्रुतप्रवृत्तिपरतां वेदस्य निराकर्तुं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति विषयेष्विति चतुर्भिः
संगः आसक्तिः तत्रैतेषु विषयेषु येन प्रतिहन्यते कामः तेन सह कामादेव कलिः कलहो विवादः दुर्वि
षहो तीव्रः तमः संमोहः तं क्रोधं चेतना कार्याकार्यस्मृतिः द्रुतं शीघ्रं शून्याय कल्पते असत्कल्पो भवती
त्यर्थः स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्छितमृततत्तुल्यस्य तत्तुल्यत्वं प्रपंचयति विषयेति व्यर्थं हे।

यतो यतो निवर्तेत विमुच्येत ततस्ततः एष धर्मो नृणां क्षेमः शोकमोहभयापहः १८ वि
षयेषु गुणाध्यासात्पुंसः संगस्ततो भवेत् संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां १९
कलेर्दुर्विषहः क्रोधः तमस्तदनुवर्तते तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं २० तया च
रहितः साधो जंतुः शून्याय कल्पते ततोस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च २१ विष
याभिनिवेशेन नात्मानं वेद नापरं वृक्षजीविकया जीवन् व्यर्थं भस्त्रेव यः श्वसन् २२ फलश्रु
तिरियं नृणां न श्रेयो रोचनं परं श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनम् २३ श्रीः॥

वृक्षजीविक एव या वयो भस्त्रेव श्वसन्वर्तते स मृततुल्यः अतः स्वार्थनाश इत्यर्थः ननु प्रवृत्तस्य स्वर्गादिफ
लश्रवणात्कथं स्वार्थविभ्रंशः तत्राह इयं फलश्रुतिः नृणां श्रेयः परमपुरुषार्थपरा न भवतीत्यर्थः किं
तर्हि बहिर्मुखानां नृणां मोक्षविवक्षया अवांतरफलैः कर्मसु रुच्युत्पादनमात्रं यथा भैषज्ये औषधे रो
चने रुच्युत्पादनं तथा हि पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान् पित्रैवमुक्तः पिबति न फलं तावदे

तेषु कानिचिच्छंदांसि दर्शयति गायत्रीति तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्योष्णिगादि
छंदांसि अत्यष्टिः अतिजगती अतिविराडित्यर्थः एतैः छंदोभिरुपलक्षितामिति पूर्वेणैवान्वयः
एतो ह्यस्यापि प्रमाकल्पेन स्वरूपतोऽज्ञेयत्वमुक्तं अर्थतोऽपि दुर्ज्ञेयत्वमाह किमिति कर्मकांडे विधिवा
क्यैः किं विधत्ते देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति ज्ञानकांडे च किमनूद्य विकल्पयेत्
निषेधार्थमित्येवमस्या हृदयं तात्पर्यं मत्तोऽन्यः कश्चिदपि न वेद ननु तर्हि त्वमेव कृपया कथयाऽऽ
मिति कथयति मामेव यज्ञरूपं विधत्ते मामेव तत्तद्देवतारूपमभिधत्ते न मत्तः पृथक् यच्चाकाशादि

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च त्रिष्टुब्जगत्यतिच्छंदो ह्यत्यष्ट्यतिजगद्विराट् ॥४१॥ किं
विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥४२॥
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहं एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां मा
यामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ॥४३॥ इति श्री॰ प॰ का॰ दशे॰ प॰ कविंशोऽध्यायः ॥२१॥

प्रपंचजातं तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्यते तदप्यहमेव न मत्तः
पृथगस्ति कृतत्र्यपेतासां सर्ववेदार्थं संक्षेपतः कथयति एतावानेव सर्वेषां वेदानामर्थः तमेवाह
शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य नेह नानास्ति किंचनेति प्रतिषिध्य प्र
सीदति निवृत्तव्यापारो भवतीत्ययं भावः यथायं क्रतोरसः स एव तद्विस्तारभूतनानाकांडशाखास्व
पि तथैव प्रणवस्यार्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकांडशाखानामपि संगच्छते नान्यत्र

ततो वैखर्याख्याया वाचः उत्पत्तिप्रकारं सदृष्टान्तमाह यथेति त्रिभिः हृदयात्सकाशान्मुखाद्वा
रात् उद्वमते बहिः प्रकटयति दार्ष्टान्तिकं दर्शयति आकाशादिति प्राणः तदुपाधिर्हिरण्यगर्भरूपः प्रभु
र्भगवान् तेन रूपेण छन्दोमयो वेदमूर्तिः स्वतस्त्वमृतमयः घोषवान् नादोपादानवान् मनसा निमित्त
भूतेन निमित्ततामेव दर्शयति स्पर्शादीन् वर्णान् रूपयति संकल्पयतीति स्पर्शरूपी तेन स्पर्शग्रहण
मुपलक्षणं हृदयाकाशाद्बृहतीं सृजतीति तृतीयश्लोकेनान्वयः बृहतीशब्दार्थं व्याख्यानाय विशेष

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा
३८ छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः ओंकाराद्व्यञ्जितस्पर्शस्वरोष्मान्तस्थभूषितां ३९
विचित्रभाषाविततां छन्दोभिश्चतुरुत्तरैः अनन्तपारां बृहतीं सृजत्याक्षिपते स्वयम् ४०

णानि सहस्रपदवीं वर्णमार्गीं तदेवाह ओंकारात् उरः कण्ठादिसंयोगेन व्यञ्जितैः स्पर्शादिभिर्भूषितां ओं
कारस्यात्र ग्रहणं सूक्ष्माभिप्रेतः ननु अकारादिवर्णरूपः तस्य व्यंजककोटित्वात् तत्र स्पर्शाः कादिपंचव
र्गाः स्वराश्च अकाराद्याः षोडश ऊष्माणः शषसहाः अन्तस्थाः यरलवाः विचित्राभिर्वैदिकलौकिकभाषा
भिर्विततां यथोत्तरं चत्वारि चत्वार्यक्षराणि उत्तराणि अधिकानि येषां तैश्छन्दोभिरुपलक्षितां ए
वमनन्तपारां सृजति स्वयमेवाक्षिपति उपसंहरति ४० ॥

ननुवेदस्तात्पर्येणेमित्यादयः किमितितथानवर्णयेति मैवंविनातत्त्वतोवेदंतदर्थंवानकोपिवेदेत्या
शयेनाह शब्दब्रह्मेतियावत्समासेनस्वरूपतोऽर्थतश्चदुर्विज्ञेयं तच्चसूक्ष्मंस्थूलंचेतिद्विविधं तत्रसू
क्ष्मंतावत्स्वरूपतोऽपिदुर्विज्ञेयमित्याह प्राणेंद्रियमनोमयं प्रथमंप्राणमयंपराख्यं ततोमनोमयं
पश्यंत्याख्यंततइंद्रियमयंमध्यमाख्यं तस्यवाग्व्यंजकत्वेनवागिंद्रियप्रधानत्वात् किंचअनंतपा
रंसमष्टिप्राणादिमयस्याविशेषस्यतस्यकालतोदेशतश्चापरिच्छेदात् अर्थतोपिदुर्ज्ञेयत्वमा
ह गंभीरंनिगूढार्थं अतोदुर्विगाह्यंमतिप्रवेशानर्हं तथाचश्रुतिः चत्वारिवाक्परिमितापदानिता
निविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंतीति अ

शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयं अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत् ३६ मयो
पबृंहितंभूम्नाब्रह्मणानंतशक्तिना भूतेषुनादरूपेणविसेषूर्णेवलक्ष्यते ३७ ॥

यमर्थः वाचाशब्दब्रह्मणः परिमितानिगणितानिपद्यंतेज्ञायंतेपरंतत्त्वमेभिरितिपदानिरूपाणि
चत्वारितानिचत्वार्यपियेमनीषिणस्तद्रष्टारः तेविदुर्नान्ये यतोगुहायांदेहमध्येत्रीणिनिहितानिनें
गयंतिस्वरूपेणप्रकाशयंति अतःकेवलंवाचः तुरीयंचतुर्थंभागंवैखरीरूपंमनुष्याःप्राणिनोव
दंति तमपिवदंत्येवनतत्त्वतोजानंतितच्चमनीषिभिरेवज्ञेयंस्थूलरूपंदर्शयति मयेति मयांत
र्यामिणाउपबृंहितं अधिष्ठितंतेनतस्यस्वतोऽप्यपरिच्छेदमाह भूम्नेति अधिष्ठातृत्वेप्यविकारित्वमा
ह ब्रह्मणेति अविकृतस्यापिनियंतृत्वंद्योतयति अनंतशक्तिनेति भूतेषुसर्वप्राणिषुघोषरूपेण

किंच तेनिमंदबुद्धयइत्याह स्वप्नोपममिति अमुंपरलोकं आशिषश्चास्मिंल्लोकेसंकल्प्यमनसानिश्चित्य विप्रवाक्यात्तत्यजंतिकर्मसुविनियोजयंति यथावणिक्शुद्धाणकुडस्तरसमुद्रादिलंघनेनवक्रधना नैनच्छयासिद्धधनेत्यजन्नुभयभ्रष्टोभवतितद्वदित्यर्थः अतोरजःसत्वतमोनिष्ठास्तेरजःसत्वतमोजुषःस्वानुरूपानिंद्रादीनेवोपासतेनतुमांयद्यपींद्रादीनामपिमदंशत्वान्मदुपासनमेवतत्तथापि यथावन्नोपासतेभेददर्शित्वादित्यर्थः हृदिसंकल्प्येत्युक्तंतमेवसंकल्पंदर्शयति इष्ट्वेति तस्यभोगा।

स्वप्नोपमममुंलोकमसंतंश्रवणप्रियं आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक् २७
रजःसत्वतमोनिष्ठारजःसत्वतमोजुषः उपासतइंद्रमुख्यान्देवादीन्नतथैवमां २८ इष्ट्वेहदेव
तायज्ञैर्गत्वारंस्यामहेदिवि तस्यांतइहभूयास्ममहाशालामहाकुलाः २९ एवंपुष्पित
यावाचाव्याक्षिप्तमनसांनृणां मानिनांचातिस्तब्धानांमद्वार्त्तापिनरोचते ३० वेदाब्रह्मात्म
विषयास्त्रिकांडविषयाइमे परोक्षवादाऋषयःपरोक्षंममचप्रियं ३१ ॐनमःशिवाय

स्यांतेमहाशालामहाकुटुंबाः २९ ततःकिमित्यतआह एवमिति अतोमद्वार्त्ताभावान्नित्यसंसारएवभवतीतिभावः तदेवंप्रवृत्तिपरत्वंनिराकृत्यफलतोनिवृत्तिपरत्वमेवोपसंहरति वेदाइति। कर्मकांडविषयाइमेवेदाःब्रह्मात्मविषयाः ब्रह्मैवात्मानसंसारीत्येतत्पराः तत्परत्वाप्रतीतौचफलश्रुतीनांरोचनानुसारेणश्रेयोरोचनपरं श्रेयोविवक्षयाप्रोक्तं यथाभैषज्यरोचनमित्युक्तमेवकारणमनुस्मारयति परोक्षेति ऋषयोमंत्राःतद्द्रष्टारोवा तत्किमिति यतःपरोक्षमेवममचप्रियं अयंभावःशुद्धांतःकरणैरेवतद्बोधव्यंनान्यैरनधिकारिभिःवृथाकर्मत्यागेनभ्रंशप्रसंगादिति ३१ रामायनमः॥

मायामये मायाप्रवर्तके तेनान्मयेवा अतएव जीवयतीति जीवस्तस्मिन्महापुरुषे प्रभावः विश्व
स्रष्टुमहापुरुषस्यापकरणारूपः कालोहेत्वंशेन सृज्यश्च अतस्तदात्मनावतिष्ठत इति तद्वक्रम
मेव कालश्चेतनस्ततो जीवस्तज्जः प्रधानपुंभ्यामीश्वरदेवसत्पकृदिति दशमेच योऽयं कालस्तस्य
तेव्यक्तवेधोचेष्टामाहुश्चेष्टते येन विश्वं निमेषादिर्वत्सरान्तो महीयांस्तमीशानं क्षेममधाम प्रप
द्यइति जीवश्चात्मनि प्रकृतेर्लीनत्वेन प्रतियोगयभावावपरिशेषो सद्रूपेणावतिष्ठते आत्मा

कालो मायामये जीवे जीव आत्मनि मय्यजे आत्मा केवल आत्मस्थो विकल्पापायल
क्षणः एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये
तमः एष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः प्रतिलोमानुलोमाभ्यां परावरदृशा
मया इति श्री भव महा पुरा काद स्कंधे भगवउ व वा चतु ध्याः २४

त्वात्मस्य एव नान्यत्र लीयते यतः केवलो निरुपाधिः अतएव तः विकल्पापायाभ्यां लक्षते अ
धिष्ठानत्वेनावधित्वेन चेति तस्याः सांख्यकथनस्य प्रस्तुतोपयोगमाह एवमिति मनसाः क
शंभवेदिमितो भ्रमः स्यात् नातो वा कथं हृदि तिष्ठेदिति उपसंहरति एषइति प्रत्यक्षमिव
येन दर्शितं तत्त्वमात्मनः सांख्यं प्रख्यातवतस्तस्मै द्वयेश्वरवेनमः ३ का शे त्र स्पः

२४

पंचविंशत्त्वैर्गुणप्रतिपत्त्यैर्निरूप्यते चित्तप्रभवसत्त्वादिगुणाद्वृत्तिरनेकधा प्रकृतिपुरुषविवेक
ज्ञानवतोपि यावत्प्रयत्नविशेषाणां गुणत्रयप्रवृत्तिर्न योनस्यात् न तावद्देहोपरमः अतस्तज्ज
योपायकथनाय गुणप्रवृत्तिनिरूपणार्थमाह गुणानामिति सद्भिर्मिश्रीभूय वर्तमानाः समि
श्रा असम्मिश्रा अन्येषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत् तदिदं कथयतो।
मतो निबोधत्वयः तत्र सत्त्ववृत्तेराह शम इति उद्भवविवेकः तपः स्वधर्मवर्तित्वं स्मृतिः श्वाप

श्री ग उ च गुणानामसम्मिश्राणां पुमान्येन यथा भवेत् तन्मे पुरुषवर्येदमुप।
धारय शंसतः १ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः तुष्टिस्त्यागोऽस्पृहा श्रद्धा
ह्रीर्दयादिः स्वनिर्वृतिः २ काम ईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं मदोत्साहो य
शः प्रीतिर्हास्यं वीर्यं बलोद्यमः ३

गतुसंधाने तुष्टिर्यथालाभसंतुष्टः त्यागो व्यय
शीलत्वं अस्पृहा वैराग्यं श्रद्धा आस्तिक्यं ह्रीः अनुचिते कर्मणि लज्जा दयादाने दयादानग
तिरत्नापाधितिस्मरणात् आदिशब्देनार्जवविनयादिः स्वनिर्वृतिः आत्मरतिः रजसो वृत्तिमाह
कामोऽभिलाषः ईहा व्यापारः मदो दर्पः तृष्णा लाभसत्त्वेप्यसंतोषः स्तंभो गर्वः आशीः धनाद्य।
भिलाषेण देवतादिप्रार्थनं भिदा अहमन्य इति भेदबुद्धिः सुखं विषयभोगः मदोत्साहः मदेन यु।
द्धाद्यभिनिवेशः यशःप्रीतिः स्तुतिप्रियता हास्यमुपहासः वीर्यं प्रभावाविष्कारः बलेनोद्यमः

नष्टरायः नष्टोरायः अर्थोयस्यतपस्विनःसंतप्तस्यमेमया आत्मादेहः वृथैवात्मानुतापनंप्रपंचयतिन
धर्मायेत्यादिना यस्यईदृशोअर्थायासस्तेनमयानरकायचमृत्यप्यर्थेधर्मोनानुष्ठितःखिन्नःखेदक्लि
ष्टः सिद्धेअर्थेतस्योत्कर्षेसंवर्धनेनाशोपभोगयोर्द्वंद्वैक्यंनाशउपभोगश्चेत्यर्थः साधनोत्कर्षयोरायास

एवंध्यायतोदीर्घंनष्टरायस्तपस्विनः खिद्यतोबाष्पकंठस्यनिर्वेदःसुमहानभूत् १३ सचा
हेदमहोकष्टंवृथात्मामेनुतापितः नधर्मायनकामाययस्यार्थायासईदृशः १४ प्रायेणा
र्थाःकदर्याणांनसुखायकदाचन इहचात्मोपतापायमृतस्यनरकायच १५ यशोयशस्वि
नांशुद्धंश्लाघ्यायेगुणिनांगुणाः लोभःस्वल्पोपितान्हंतिश्वित्रोरूपमिवेप्सितं १६ नाशोपभो
गआयासस्त्रासश्चिंताभ्रमोनृणां स्तेयंहिंसानृतंदंभःकामःक्रोधःस्मयोमदः १७ भेदोवैरम
विश्वासःसंस्पर्धाव्यसनानिच एतेपंचदशानर्थाह्यर्थमूलामतानृणां १८ तस्मादनर्थमर्था
ख्यंश्रेयोर्थीदूरतस्त्यजेत् भिद्यंतेभ्रातरोदाराःपितरःसुहृदस्तथा १९ एकास्निग्धाःकाकि
णिनासद्यःसर्वेरयःकृताः अर्थेनाल्पीयसाह्येतेसंरब्धादीप्तमन्यवः त्यजंत्याशुस्पृधोघ्नंतिसह

रक्षतःचिंताव्ययनाशेभ्रमइति किंच अर्थप्राप्त्यर्थस्तेयादयःषडनर्थाःसौख्येतमध्यविषयाणिगाणीणिभेदवै
रसंस्पर्धाःप्रपंचयतिद्वाभ्यां भिद्यंतेइत्येकेनेति कथंभूताएकास्निग्धाःएकप्राणाःतेचकेप्रतिस्निग्धाः
प्रीतिप्रियाअपीत्यर्थःकृताःकैश्चविनापुरुत्वमार्धविंशतिवराटिकाकाकिणीतयासद्यःसाक्षाभितःस्थः

सभिन्नः पूर्वं धनाढ्यः कृच्छ्रार्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन्प्रव्रज्य भिक्षुर्भवन्दुर्जनै
रुपद्रुतः प्रकृतोपयोगिनीं गाथामगायदिति वक्तुं तस्य चरितमाह अवंतिषु मालवेषु वार्ता कृषिवा
णिज्यादिरूपा वृत्तिर्यस्य कदर्यस्तु स्वतो वक्तुः आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् देवतातिथि
भृत्यांश्च स कदर्य इति स्मृतः तस्य ये ज्ञातयो बांधवा अतिथयो धनीनाश्च तेनार्चिता इत्यर्थः शून्यावस(

अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया वार्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ६
ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः शून्यावसथ आत्मापि काले कामैरनर्चितः
७ दुःशीलस्य कदर्यस्य द्रुह्यन्ते पुत्रबांधवाः दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ८
तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ९
तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः १०
ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् ११
स एवं द्रविणे नष्टे धर्मकामविवर्जितः उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययाम् १२ ॥

यधर्मकर्महीने गृहे देहे वा पतनानां भवितमिव केवलं रक्षणीयं वित्तं यस्य पंचभागिनः पंचयज्ञदेव
ताः तेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्कंधो यस्य लाभमात्रहेतुर्यशो यस्य तस्य ब
ह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन्नः दैवतः गृहदाहादिना कालतः निखातधन्यादित्रणं पा

श्री॰
भा॰ए॰
टी॰
१११

दुर्जनोपद्रवोऽनन्तरेऽः महतोपि महीयसां भिक्षुगीतेतिहासेन त्रिभिरध्यायैः सहनोपायवर्णने तत्र तावदस्मिन्न
ध्याये भिक्षुगीतया मनोविजयः उत्तरस्मिन्सांख्यतः प्रकृतिपुरुषविवेकः तदुत्तरस्मिन्गुणविजयः ततः ।
परस्मिन्नैलगीतया विषयसंगत्यागेन सत्संगः इति क्रमेणोपाया भगवता वर्ण्यन्ते आशंसितः प्रार्थि
तः भृत्यस्य वचः सत्कारेण तं भृत्यं प्रति आबभाषे तत्र तावद्दुर्जनकारस्तद्वचः सह्ययतेति द्वाभ्यां हे बार्हस्प

बा रा णि वाच स एवमाशंसित उद्धवेन भागवतमुख्येन दशार्हमुख्यः सभाजयन्भृ
त्यवचो मुकुंदस्तमाबभाषे श्रवणीयवीर्यः १ श्री भ उ च बार्हस्पत्य स वै नात्र सा
धुर्वै दुर्जनेरितैः दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः २ न तथा तप्यते विद्धः पुमान्बा
णैः सुमर्मगैः यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ३ कथयंति महत्पुण्यमितिहा
समिहोद्धव तमहं वर्णयिष्यामि निबोध सुसमाहितः ४ केनचिद्भिक्षुणा गीतं परिभू
तेन दुर्जनैः स्मरता धृतियुक्तेन विपाकं निजकर्मणाम् ५

त्य बृहस्पतेः शिष्य अत्र लोके स साधुर्नास्ति यो दुर्जनोक्तैर्भिन्नं व्यथितं मनः शमयितुमीश्वरः स्यात्
कुतद्धेतुमाह नेति यथा मर्मस्था मर्मस्वेवान्तः स्थिताः असतां परुषोक्तिरूपा इषवस्तुदंति व्यथयंति न त
था उपरि बाणा न तुदंति अतस्तथा न तप्यत इत्यर्थः तथापि मया वक्ष्यमाणैरुपायैः सर्वं सोढुं शक्य
मित्यभिप्रायेणेतिहासं प्रस्तौति महदिति यथा भवति तथा पुण्यमितिहासं गाथां कथयंति ५ ॥

१११

प्रतोभोगोद्यमोनकर्तव्यइत्याह तस्मादिति दुःखप्रतीकारोद्यममपिपरित्यज्यपरमेश्वरनिष्ठैनै
वभाव्यमित्याह त्रिभिश्चितिहाभ्यां त्रिभश्चादिभिःजनइतिवा प्रलयश्चउपहसितःनिष्ठितःनिष्ठी
वनेनविषयोकृतः मूत्रितःमूत्राणाद्रीकृतःप्रकोपितःपरमेश्वरनिष्ठातःप्रच्याविततोपि कृच्छ्रगतः
कृच्छ्रप्राप्तोपिपुवेत्वउक्तंयथावबुध्येयतथानःसर्वात्मातिवदन्वहमेनिरतानन्दतेविदुषामपिग्र

तस्मादुद्धवमाभृत्वविषयानमदिंद्रियैः आत्मायहणानिर्भातंपश्यवैकल्पिकंभ्रमं
दिष्मावमानितोसद्भिःप्रलब्धोसूयतोथवा ताडितःसंनिरुद्धोवाहृत्यावापरिहापितः
५० विष्ठितोमूत्रितोवासत्वंकृधेवप्रकोपितः श्रेयस्कामःकृच्छ्रगतःआत्मनात्मानमु
द्धरेत ५८ उ वउ च यथैवमनुबुध्येयवदतोवदतांवर सुडस्सहमिमंमन्यआ
त्मन्यसदतिक्रमं ५९ विडषामपिविश्वात्मनप्रकृतिर्हिवलीयसी ऋतेत्वद्धर्मनि
रतान्शान्तांस्तेचरणालयान् ६० इति भा वेत का श धे विशो यः २२
सद्भिःकृतमतिक्रमोअपराधेसुडस्सहंमन्यइत्यन्वयःप्रकृतिःस्वभावःनिरस्यसर्वसंदेहानेकी
कृतसदर्थेनंप्रकाशितरहस्येतेभजामिगुरुमीश्वरम् ६० इति भा येदी का प्र
का श धे वि ध्यायः २२ त्रयोविंशेतिरस्कारसहनासाध्यमीरिते भिक्षुगीतप्रकारे
णमनसःसंयमोधिया १ ॥

अविवेकिनः संसारं प्रपंचयति प्रकृतेरिति पंचभिः तत्वेन तत्वतो विविच्य तत्वदृष्ट्या स्पर्शेषु संमू
ढ इति वा गुणभेदेन त्रिविधतामपि तत्तारतम्येनानेकविधं संसारमाह सत्वेति नन्वकर्तुरा
त्मनः कुतः कर्मभिर्भ्रमणं तत्राह नृत्यतो गायतो जनान् पश्यन् अनुकरोति तद्वत्स्यताल्ला
द्वितिस्फारकरुणादिरसं च मनस्यनुतयतीत्यर्थः अनुकार्यते गुणैर्बलादित्यर्थः दृष्टा
तेन दृश्यधर्मा द्रष्टरि स्फुरतीति दर्शिते उपाधिधर्माध्यापशूदितावभासंत इत्यत्र दृष्टांतमाह य

प्रकृतेस्थ एवात्मानमविविच्याबुधः पुमान् तत्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते सत्व
संगादृषीन्देवान्रजसासुरमानुषान् तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः नृ
त्यतो गायतः पश्यन्यथैवानुकरोति तान् एवं बुद्धिगुणान्पश्यन्ननीहोप्यनुकार्य
ते यथांभसा प्रचलता तरवोपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव
भूः यथा मनोरथधियो विषयानुभवो मृषा स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्म
नः अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा

थांभसेति तीरस्थास्तरवो धावंत इव दृश्यंते जले प्रतिबिंबिता वा चेचला इवेति विषयद्वयमाह केन म
नसा परिकल्पिता एव ते धुलावणादयो गुणाः न वस्तुतः संतीति अतो मनोनिबंधन एव संसा
र इत्यभिप्रेत्याह कगुणायाध्येवभासंत इत्यत्र दृष्टांतमाह चक्षुषेति भोगस्यापि मिथ्यात्वे
दृष्टांतद्वयमाह यथेति यथा एते प्रसिद्धा मनोरथधियः स्वप्नदृष्टाश्च विषयाध्यामृषा एव
मात्मनो विषयानुभवः संसारो मृषा तर्हि किं तन्निवृत्तिश्रमेण तत्राह अर्थेहीति

सिद्धवत्कृत्योक्तावयवस्थाः प्रपंचयति निषेके जठरे प्रवेशः गर्भस्तत्रस्थे वृद्धिः बाल्यं आपंचमस्हा
नं कौमारं आषोडशवर्षान् ततो यौवनमापंचचत्वारिंशतः ततो वयोमध्यमाषष्टिवर्षान्
देहसंबंधाज्जन्ममरणादीनां त्वमुपपादितमर्थमुपसंहरन्ति एता इति द्विस्फुटे अन्यस्य देहस्य न
हेः अवस्थाः गुणसंगात् स्वकृताविवेकात् कश्चित्परमेश्वरानुगृहीतः कश्चिन्जहाति अवस्थावतो
देहस्य द्रष्टा नावस्थावानिति विवेकज्ञानेन ननु तदानीमूर्छितत्वेन जन्ममरणवान्देहो न दृश्य

निषेकगर्भजन्मानि बाल्यकौमारयौवनं वयोमध्यं जरामृत्युरित्यवस्थास्तनोर्नव
एतामनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च
आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्ष
णः तरोर्बीजविपाकाभ्यां यो विद्वाञ्जन्मसंयमौ तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः
पृथक् ॥

तेनवाह आत्मन इति पितृदेहस्याहंदेहिकं ऊर्ध्वं नाप्ययदर्शनात् पुत्रदेहस्य च जातकर्मणा ज
न्मदर्शनादात्मनः स्वदेहस्यापि नाशाप्ययावनुमेयौ एवं च देहरूपत्वे सति भवाप्ययन तौ वस्तूनां
देहानां समभिज्ञोऽद्रष्टा द्वयलक्षणः भवाप्ययधर्मको न भवति एतदेव दृष्टांतेन स्पष्टयति तरोरिति
तरुशब्देनात्र छिन्नमात्रस्यापलक्षणं अंकितफलपाकात् तस्य ब्रीह्यादेरित्यर्थः यद्वा तरोरेवास्तु प
रिणामो विपाकः तो व्याप्त जन्मविकोपात् तस्य मनननाशश्चावविद्वान् ॥ ॐ नमो नारायणाय

मतोजन्ममरणयोरज्ञानेकारणमेतद्भवेत् सत्यमेवतयोः कुतस्त्याशंक्यानुमानेनसाधयति स्र
विषोर्मरणमादिभिःस्रोतसोगत्यादिभिःफलानांरूपादिभिर्यथावस्थाविशेषाःकृताःकालेने
तिएवंसर्वस्यान्वयः आदिशब्देनतेजोबलकामकौशलादीनामुपादानंविमलप्रतिक्षणोत्पत्ति
विनाशवत् अवस्थाभेदवत्त्वात्दीपज्वालादिवदित्यनुमानंकथंतर्हिप्रत्यभिज्ञातत्राहदेवमादर्शयाव
लविनीत्याह सोयमिति सोऽर्चिषांदीपादर्चिषामेवयथासोयंदीपइतिप्रत्यभिज्ञा यथाचस्रोतसोप्र
वाहजलानामेवतदिदंजलमिति तथासोयंपुमानितिधीर्गीश्चमृषानृणांवहूनांशरीराणांमृषा

यथाह्विषोस्रोतसोचफलानांवावनस्पतेः तथैवसर्वभूतानांवयोव
स्थादयःकृताः सोयंदीपोर्चिषांयद्वत्स्रोतसांतदिदंजलं सोयंपु
मानितिनृणांमृषागीर्धीर्मृषायुषां मास्वकर्मबीजेनजायते
सोप्ययंपुमान् म्रियतेवामरोभ्रांत्यायथाग्निर्दारुसंयुतः ॥ २२

यथेयंमाभूदेषामविवेकिनांतेषांभवति ननुकथंदेहाध्यासवतःपुंसःकर्मजन्ममरणानिसंतिना
त्मनइतिव्यवस्थानोक्तेस्तदेतत्पुरुषभेदेनसत्यमसत्त्वंचात्मनश्चस्यापिवस्तुतस्तदभावादि
त्याह मास्वस्यैवात्मनःकर्मणावीजभूतेननसोपिपुत्रोपिपुमान्जायतेम्रियतेवाकिंतुभ्रांत्यो
त्याजन्मापिजायतेएवममरोपिम्रियतेएवयथाअग्निस्तेजोरूपोपिपराकल्पांतमवस्थितोपिदा
रुयोगवियोगाभ्यांजन्मनाशौप्राप्नोतितद्वत् ॥

जन्मतत्विषयस्यदेहस्यआत्मतयास्वीकृतिंअभिमानंप्राहुः ननुदेहवदुत्पत्तिनचपुत्रादिदेहवत्प्रोत्पत्ति
श्रपमात्रेणकिंतसर्वभावेनअभेदेन अभिमानेणात्यक्तिमरणोदृष्टांतद्वयं यथास्वप्नमनोरथश्च
त्यर्थः दृष्टांतौविवृणोति स्वप्नमितितद्वर्तमानेस्वप्नादौपूर्वंचेतिअपूर्वमिवेतिचान्वयः पूर्वमि
द्वयमात्मानमपूर्वमिवाद्यजातमिवपश्यतीत्यर्थः उपसंहरतिइंद्रियाणामयनंमनःतस्यदेहांत
राभिनिवेशनयाप्रवृत्तिरूपस्तयावस्तूनिआत्मनितदभिमानेनदेहैर्विध्यंउत्तममध्यमनीचत्वेश्च सदे
वभातीत्यन्वयः एवंभूतआत्मावाह्यंभेतरभेदहेतुश्चभवति वाह्यविषयान्सर्वादीश्चपश्यतीत्य

जन्मत्वात्मतयाप्रेम्णःसर्वभावेनभूरिद विषयस्वीकृतिंप्राहुर्यथास्वप्नोमनोरथः स्व
प्नेमनोरथेचैत्यप्राकृतेननस्मरत्यसौ तत्रपूर्वमिवात्मानमपूर्वंचानुपश्यति इंद्रियाय
नस्थेदंदैर्विध्यंभातिवस्तुनि वाह्यंतभिदाहेतुर्जनोसज्जनकृद्यथा नित्यदाह्यंग
भूतानिभवंतिनभवंतिच कालेनालक्ष्यवेगेनसूक्ष्मत्वात्तन्नदृश्यते ॥ शिवायनमः

र्थः यथाजनोजीवःस्वप्नेवहून्जनान्पश्यन्वहुरूपोभावितद्वत्परद्वाद्देहैर्विध्यंअध्यात्मादिरूपं
भाति अथसज्जनकृदुदृश्यजात्पादकः जनःअपितास्वयंसमोपिपुत्राभिमानेनसदरिमित्रादिषुयथा
भेदहेतुर्भवतितद्वदित्यत्यंतमानेतदेवलोकप्रसिद्धोजन्मरत्यानिरुप्यसूक्ष्मावस्थावर्षितोवैरा
ग्यायनिरूपयति नित्यदाप्रतिक्षणंभूतानिशरीराणिउत्पद्यंतेनश्यंचयति कालस्यातिसू
क्ष्मत्वात्तत्कृतंभवनंनभवनंचाविवेकीभिनेलक्ष्यते ॥

तामेवाष्टादशश्लोकीं गाथयामाह नायमिति नचात्मनापि ग्रहादयः मनः परं केवलं सत्त्वरजःस्वयोः कारणं॥
वदंति मनसा ह्येव पश्यति मनसा शृणोतीत्याद्याः श्रुतयः परिवर्तनप्रकारमेवाह मन इत्यादि गुणा
न् गुणवृत्तीः सृजति ततश्च तेभ्यो गुणेभ्यः शुक्लानि सात्विकानि कृष्णानि तामसानि लोहितानि राजसा
नि सवर्णानि तत्तत्कर्मानुरूपाः सृतयः देवतिर्यगादिजातयः तदिदं मनस एव संसारः स्यान्नात्मन इत्या
शंक्याह अनीह इति अयमर्थः अविद्यया मनोध्यासेनेयमात्मनः संसृतिर्नतु स्वतः यतस्तद्दृष्टि न स्पृश

द्विज उवाच नायं मनो मे सत्त्वरजःस्वहेतुर्न देवतात्मा ग्रहकर्मकालाः मनः परं कारणमामनं
ति संसारचक्रं परिवर्तयेत्पदा ॥४॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणा
नि शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति ॥५॥ अनीह आत्मा मनसा
समीहिता हिरण्मयो मत्सख उद्विचष्टे मनः स्वलिंगं परिगृह्य कामान्जुषन्निबद्धो गुणसंगतो
सौ ॥६॥

रसमानोस्ति किं तत्तत्तो जीवस्यैवेति तदेवाह मनसा समीहमानेन सद्दनियंतत्तेन वर्तमानोपि परमात्मा अ
नीहः तत्क्रियासंगरहितः यतो हिरण्मयो विद्याशक्तिप्रधानः कुतः यतो मत्सखः मम जीवस्य सखा नियंता
अतउत्तद्वै विचष्टे प्रतिरोहितज्ञानेन केवलं पश्यतीत्यर्थः असौ पुनरहं जीवः स्वस्मिन्नात्मनि लिंगयति ये
तयाति संसारमिति तथा तन्मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः संबद्धः गुणा

अन्नं मूत्रयंतीति मूर्द्धि ष्ठीवंति निष्ठ्यूतकारेणाभ्यक्ष्य आननं प्रलिपंतीति निंदामेवाह एष धर्मध्वजः त्रिदंडलिंगोप-
जीवी शठो लोकवंचकः तदेवाह क्षीणवित्त इति महासारः धृतिबलो दुर्वातयंतीति तन्नडुपर्यधोवा-
यं मुंचंति बबंधुः रज्ज्वा निरुरुधुः कारागृहादिषु द्विजं शुकसारिकादिवत् यथा भौतिकं दुर्जनादिकृतं

प्रदत्तं वैठं त्वसंपन्नं भुंजानस्य सरित्तटे मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च मूर्द्धनि ३४ यत-
वाचं वाचयंति ताडयंति न वक्ति चेत् तर्जयंत्यपरे वाग्भिः स्तेनोऽयमिति वादिनः ३५ बध्न-
ति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति क्षिपंत्येके वजानंत एष धर्मध्वजः शठः ३६ क्षीण-
वित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः अहो एष महासारो धृतिमान्गिरिराडिव ३७ मौनेन
साधयत्यर्थं बकवद्दृढनिश्चयः इत्येके विहसंत्येनमेके दुर्वातयंति च ३८ तं बबंधुर्निरुरु-
धुर्यथा क्रीडनकं द्विजं एवं स भौतिकं दुःखं दैविकं दैहिकं च यत् ३९ भोक्तव्यमात्मनो दि-
ष्टं प्राप्तं प्राप्तमबुद्ध्यत परिभूत इमां गाथामगायत नराधमैः पातयद्भिः स्वधर्मस्थो धृतिमा-
स्थाय सात्त्विकीं ४०

तद्दैविकं ज्वरादिनिमित्तं दैहिकं शीतोष्णादिप्रभवं धर्मान्पातयद्भिः
परिभूतोऽपि सात्त्विकीं धृतिमास्थाय स्वधर्मे एव स्थितः इमां वक्ष्यमाणां गाथामगायत सात्त्विकीं धृ-
तिं स्पष्टयति यया धारयते मनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी इति स्म-

श्री॰
भा॰ ए॰
टी॰
११३

इदानीं संपन्नविवेकः सहर्षमाह नूनमिति त्रिभिः येन प्रीतेनात्मनः प्लवरूपो निर्वेदश्च भवति स मे हरि
र्मे नूनं प्रीत इति अंगं शोषयिष्ये ततः प्रमादरहितः विद्यया लयं नेष्यामि यदि स्यात् कालावशेषः स्वल्पो
त्मानं वा सिद्धस्तस्मिन्न अखिले स्वार्थे धर्मादिसाधने अप्रमत्तः सन् अनुमोदेरन् अनुमोदनं तु दे
वैरनुमोदितोऽपि जठरः कालेन किं साधयेत्तत्राह मुहूर्तेनेति अभिप्रेत्य निश्चित्य आवन्त्यः अवन्तिदे

नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः येन नीतो दशामेतां निर्वेदश्चात्मनः प्लवः २७ सोऽहं का
लावशेषेण शोषयिष्येंगमात्मनः अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि २८ त
त्र मामनुमोदेरन्देवास्त्रिभुवनेश्वराः मुहूर्तेन ब्रह्मलोकं खट्वांगः समसाधयत् २९ श्रीभ
गवानुवाच इत्यभिप्रेत्य मनसा ह्यावन्त्यो द्विजसत्तमः उन्मुच्य हृदयग्रंथीं शांतो भिक्षुरभून्मु
निः ३० स चचार महीमेतां संयतात्मेंद्रियानिलः भिक्षार्थं नगरग्रामानसंगोऽलक्षितोऽविश
त् ३१ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः
केचित्त्रिवेणुं जगृहुरेके पात्रं कमंडलुं पीठं चैकेऽक्षसूत्रं च कंथां चीराणि केचन प्रदाय च
पुनस्तानि दर्शितान्याददुर्मुनेः ३३

शभवाः हृदि ग्रंथयोऽहंकारममकारा नास्य संगः आसक्तिः
र्यस्य अलक्षितः अहं समर्थ इति न प्रवयसं वृद्धं अवधूतं मलिनं पर्यभवन् अवमेनिरे हे भद्र परिभूति
भिस्तिरस्कारैः परिभवानेव दर्शयति केचिदिति सप्तभिः भो भगवन् गृहाणेति दर्शितानि संनिपदा

भागवत॰
११३

इहतावदर्थनिष्ठानामेवानर्थोमरलोकेप्यनर्थएवतेषामित्याह लब्ध्वेतित्रिभिः मानुष्यंतत्रापिहि
जात्यंतात्ब्राह्मण्यंस्वार्थंघ्नंतिस्वात्महितंनकुर्वंतिपतेयांति अमरप्रार्थ्यमितोदर्शयन्नाह स्वर्गेति लो
केदेहंप्राप्यजन्मतस्यासक्तिंकुर्यात् ऋषयोमनुष्ययज्ञब्रह्मयज्ञपादेवताः देवपितृभूतानीतरेषब्रह्म
तयःसगोत्राः बांधवाविवाहादिनासंबंधःतानन्यांश्चभागिनःभागादरःआत्मानंच असंविभज्य

लब्ध्वाजन्मामरप्रार्थ्यंमानुष्यंतद्द्विजाग्र्यतां तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांगतिं
३१ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान् द्रविणेकोनुसज्जेतमर्त्योनर्थस्यधामनि
३२ देवर्षिपितृभूतानिज्ञातीन्बंधूंश्चभागिनः असंविभज्यचात्मानंयक्षवित्तःपतत्यधः
३३ व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलं कुशलायेनसिध्यंतिजरठःकिंतुसाधये ३४
कस्मात्संक्लिश्यतेविद्वान्व्यर्थयार्थेहयासकृत् कस्यचिन्माययानूनंलोकोयंसुविमोहितः
३५ किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत मृत्युनाग्रस्यमानस्यकर्मभिर्वोतजन्मदैः ३६

अत्रादिभिरसंतप्यएवंविमृशन्ननुतप्यमानआह व्यर्थयार्थेहयाप्रमत्तस्यममवित्तादिगतमिति
शेषः येनवित्तादिनाकुशलाःविवेकिनःसिध्यंतिविमुच्यंते जठरोवृद्धः अन्यमपिस्वसदृशंशोच
ति कस्मादेवमनर्थंविद्वानपिसंक्लिश्यति कारणंसंभावयति कस्यचिदिति नूनमनायंविमोहितः
क्लिश्यति किंतुधनादिभिर्भोगादिविवक्षयाअतआह किंधनैरिति उतअपिनरपि ३६ श्रीराम

कर्महेतुत्वेन आत्मनस्सुखोपगमः कर्मैव नास्ति कुतस्तस्य हेतुत्वमिति तदाह द्विपक्षात् तत्कर्म एक
स्य जडत्वे संभवति स्यात् जडत्वाद्यकारित्वायपत्तेः अजडत्वाच्च हिताहितानुसंधानतः प्रवृत्तिसंभवात् अचि
त्त्वज्जडो देहः अतस्तस्य प्रवृत्तिर्न संभवति पुरुषस्तु सुपर्णो शुद्धज्ञानस्वरूपः अतः कस्मै क्रुध्येत यतः सु
खदुःखयोर्मूलभूतं कर्मैव नास्तीति तत्र कालपक्षेऽपि आत्मनः किं यतोसौ कालात्मक एव ब्रह्मणो।

कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे देह
स्त्वचित्पुरुषोऽयं सुपर्णः क्रुध्येत कस्मै न हि कर्म मूलम् ५३
कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोसौ
नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुध्येत कस्मै न परस्य द्वंद्वम् ५४

शत्वात् स्वांशस्य स्वतः पीडा नास्तीत्यत्र दृष्टान्तः नाग्नेर्हितोस्तदंशस्य ज्वालादेस्तापो दाहको।
नास्तीति तत्रोपाधिभूतकाष्ठांशादाहान्नाशः स्यादिति दृष्टान्तान्तरमाह हिमस्य तदंशाद्यपाक
रकाश्च नाशकं न स्यादित्यर्थः किंच आत्मांशत्वस्ततः परत्वाय न च परस्य द्वंद्वं सु।
खदुःखादिकमस्तीति ५४ ॥

200

आत्मनः सुखदुःखाद्याकारः परिणामः अतः स एव हेतुर्यदि स्यात्तत्र तस्मिन्पक्षे अन्यतः किं न किंचिदन्य
तो भवति यस्मिन्कोप्यादित्यर्थः यतो निज एव स्वभावः सः नन्वात्मनस्तथापरिणामोन्यनिमित्तको भव
ति अतो निमित्तकोपि विषय इति चेत्तत्राह नहीति आत्मव्यतिरिक्तं नास्त्येव यदि स्याद्दस्तीति प्रतीयेत
तर्हि तन्मृषैव अतः कस्माद्धेतोः क्रुध्येत यतोन्यो नास्ति निमित्तेन च सुखदुःखं चेत्यर्थः ग्रहपक्षेप्यजस्या

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः न
ह्यात्मनोन्यद्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखं ५१
ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोन्यस्य जनस्य ते वै ग्रहै
र्ग्रहस्यैव वदंति पीडां क्रुध्येत कस्मै पुरुषस्ततोन्यः ५२ ग्रमः

त्मनः किं यतः जन्यत इति अतो देहस्यैव तन्मलग्नापेक्षया द्वादशाख्यमादिराशिस्थास्ते सुखदुःख
योर्निमित्तं भवं किंच अतीतस्य ग्रहस्य ग्रहस्यैव पादाद्यांघ्रि हस्तादिभेदैः पीडां वदंति दैवज्ञा
न तु ग्रहकोणादिस्थितस्य तस्य तद्दृष्टिगोचरस्य पुरुषस्य अहं गतेवत पीडा तत्फलं तौ देहजस्याभि
मानाद्भवति अतः पुरुषस्ततो ग्रहा देहाच्चान्यः कस्मै क्रुध्येत ५२ ॥

श्री॰
भा॰ए॰
टी॰
२८५

ततश्चानेन प्रकारेण संसारे भ्रमंतीत्याह देहमिति मनोमात्रपरिकल्पिते स्वदेहमिति पुत्रादिदेहे च ममेति स्वीकृत्य तमःसंसारे तदेवं मन एव सुखदुःखकारणत्वमुपपाद्येदानीं जनादीनां षण्णामकारणत्वं प्रपंचयति जनस्त्विति षड्भिः अत्र पक्षेपि न त्वात्मनः किं न किंचित सुखदुःखकर्तृत्वं तत्कर्तृत्वं चेत्यर्थः कुत इत्यत आह हि निश्चितं भौमयोर्भौमविकारयोर्देहयोस्तत न त्वात्मनः अमूर्तस्याक्रियस्य च हननादिकर्मत्व कर्तृत्वानुपपत्तेः तथापि दुःखमात्मन्येव मायेवेति चेत एवमपि परमात्मनः उभयत्राप्येकत्वान्न कोपः

देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यंधधियो मनुष्याः एषोहमन्योयमिति भ्रमेण दुरंतपारे तमसि भ्रमंति ४८ जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् जिह्वां क्व चित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत ४९ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् यदंगमंगेन निहन्यते क्वचित्क्रुध्येत कस्मै पुरुषः स्वदेहे ५० श्रीराम

विक्षेपोस्तीति स्वदृष्टांतेन दर्शयति जिह्वामिति यदि देवतास्तु नाम तत्रापि पक्षे आत्मनः किं यतो विकारयोः विक्रियमाणयोर्देवतयोस्तत् हस्तेन मुखे भिहते तेन वा हस्ते दष्टे तदभिमानिनोरिंद्राग्न्योरेव तत् न तु विकल्पस्यानहंकारस्य चात्मनो देवतानां च सर्वदेहेष्वभेदान्न कोपविषयोस्तीति स्वदेहदृष्टांतमाह यदंगमिति यत्र यदंगं देवताधिष्ठानं हस्तमुखादि अत एव पूर्वेणदेवतानाधिष्ठानरूपं भ्रू विकारदंतोदादद्रेणा ५० श्रीकृष्ण

२८५

अतो मनोनिग्रहे कृते सर्वं कृतं स्यात् तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां स्वधर्मो नित्यनैमित्तिकाः सद्व्र
तानि एकादश्युपवासादीनि अन्यानि च यावंति कर्माणि एते सर्वे उपाया मनोनिग्रहलक्षणः अंतो निष्ठा फ
लं येषां ते तथा ननु ज्ञानं योगत्वं तेषां प्रसिद्धं तत्राह मनसः समाधिर्निग्रह एव परो योगः ज्ञानं अतो यस्य मनः स
माहितं भवति तस्य किं कृत्यमस्ति वद इति परं प्रत्युपदिशन्निव स्वयमेवाह असंयतमिति चेत् यद्यवि
नश्यत् आलस्यादिना लीयमानं चेद्भवेत् तर्हि एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् न किंचिदित्यर्थः न

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि सर्वे मनोनिग्रहलक्षणांताः परो हि योगो
मनसः समाधिः ४४ समाहितं यस्य मनः प्रशांतं दानादिभिः किं वद तस्य कृत्यं असंयतं यस्य
मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ४५ मनोवशेन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं
समेति भीष्मो हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः ४६ तं दुर्जयं शत्रुमसह्यवेगम
रुंतुदं तन्न विजित्य केचित् कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४७ सम

न्विते इंद्रियजयः प्रयोजनं स्यान्नेत्याह मनोवश इति देवा इंद्रियाणि तदधिष्ठातारो वा भीष्मः योगिनामपि
भयंकरो मनोलक्षणो देवः कृतः सहसः बलादपि बलिनोपि वा सहीयान् बलीयान् अतस्तं यो वशे वर्ति
नं कुर्यात् स एव देवदेवः सर्वेंद्रियजेता भवति नान्यः तथा च श्रुतिः मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशम
न्वियाय भीष्मो हि देवः सहसः सहीयानिति अतः असह्या रागाद्या वेगा यस्य तम् अत एवारुंतुदं मर्म तुदतीत्यरुंतु
दः ततस्तं नैति स्वस्य तं न विजित्य अजित्वा ततः ये केचिन्मर्त्यैः कश्चिदसद्विग्रहं कुर्वंति ते तथा वाऽकूलप्रति

श्री० भा० ए० टी० ११

चेतर्विशेषतःसांख्येनमनोमोहोनिवार्यते आत्मनःसर्वभावानांआगमापायिचिन्तया १ स्वपदेहेभ्रमक्रान्तो
महेहत्वायसंयुग्म चित्तस्थोक्तापुनःक्रमः सांख्यमत्राहतत्कृते २ अद्वितीयात्परमात्मनोमाययाप्रकृति।
पुरुषद्वारासर्वंद्वैतमुपैति पुनस्तत्रैवलीयते३तत्प्रसंदधानस्यद्वैतभ्रमोनिवर्ततइतिवक्तुंसांख्यंप्रस्तौति
अथेति पूर्वैःकपिलादिभिर्विनिश्चितं वैकल्पिकंभेदनिमित्तंभ्रमंस्वप्नवद्दुःखादिरूपं अथोआद्येकृतयुगे
नेदृशंतेनदृश्यःकृत्स्नोप्यर्थःसअविकल्पिकंविकल्पशून्यमेकमेवब्रह्मण्येवलीनमासीदित्यर्थः क

श्री भ उ च अथतेसंप्रवक्ष्यामिसांख्यंपूर्वैर्विनिश्चितं यद्विज्ञायपुमान्सद्योजह्याद्वैक।
ल्पिकंभ्रमं १ आसीज्ज्ञानमथोअर्थएकमेवाविकल्पितं यदाविवेकनिपुणाआदौकृतयुगे।
युगे २ तन्मायाफलरूपेणकेवलंनिर्विकल्पितं वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत् ३
तयोरेकतरोह्यर्थःप्रकृतिःसोभयात्मिकाः ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते ४
तमोरजःसत्त्वमितिप्रकृतेरभवन्गुणाः मयाप्रक्षोभ्यमाणायाःपुरुषानुमतेनच ५ राम

देन्येपलायामाह अयुगेयुगेभ्यःपूर्वंप्रलयइत्यर्थः तथाआदौयत्कृतयुगंतस्मिंश्चअन्यदापियदावि
वेकनिपुणाजनाभवंतितदापितेषांभेदास्फूर्तेः तद्ब्रह्मवाङ्मनोगोचरं यथाभवतितथामायाद
रूपफलेनतत्प्रकाशःतद्रूपेणमायाविलासरूपेणचद्विधाभूत् तयोर्द्विधाभूतयोरंशयोर्मध्येउभया
त्मिकाकार्यकारणरूपिणीअभवत्उभयव्यक्ताव्यक्ताः मयापरमेश्वरेणतत्रपुरुषस्यकःसंबंधःजी।
वादृष्टरूपकत्वात्स्पष्टःपुरुषानुमतेनयद्यस्तस्यैवप्रकृतौलयाद्रूपायाःपुरुषावस्थानादनुमतेनतद्द्वारे

५ सांख्ययोगे ११

तदेवं परेतेद्वैतैः प्रसिद्धानिरस्ताः पादकाश्रिद्वैत्वं तरमज्ञावयेत् तदीपवस्तुमदिमावेलायां न संभवतीत्याह न केनचिदिति नन्वपरोक्षः कथमपह्नूयतेतत्राह यथेति संसृतिमविद्यमानामेवरूपयतिप्रकाशयतीतित था ग्रस्तग्रहमः अहंकारस्यपर्यासात् नतथापरतः प्रकृतेः परस्यात्मनोद्वंद्वसंबंधः अहंकारनिमित्तासो नवास्तवइत्यर्थः एवंप्रबुद्धोयः सम्भूतैः कृत्वानविभेति अतोहमप्युत्तयैवपरमात्मनिष्ठयातरिष्यामीत्या ह एतामिति सोऽहमित्यन्वयः नन्वियंनिष्ठैवकथंभवत्ततदाहमुकुंदेति प्रस्तावेनमद्गाथायाअर्थमेवोपसंहरतोद्वयेः

नकेनचित्क्वापिकथंचनास्यद्वंद्वोपरागःपरतःपरस्य यथाम्बरःसंसृतिरूपिणःस्यादेवंप्रबुद्धोनविभेतिभूतैः ५५ एतांसमास्थायपरात्मनिष्ठामध्यासितांपूर्वतमैर्महर्षिभिः अहंतरिष्यामिदुरंतपारं मनोमुकुंदांघ्रिनिषेवयैव ५६ श्रीभगवानुवाच निर्विद्यनष्टद्रविणोगतक्लमः प्रव्रज्यगांपर्यटमानइत्थं निराकृतोऽसद्भिरपिस्वधर्मादकंपितोमूंमुनिराहगाथां ५७ सुखदुःखप्रदोनान्यः पुरुषस्यात्मविभ्रमः मित्रोदासीनरिपवः संसारस्तमसः कृतः ५८ तस्मात्सर्वात्मनातातनिगृहाणमनोधिया मय्यावेशितयायुक्तएतावान्योगसंग्रहः ५९ यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः धारयञ्छ्रावयञ्छृण्वन्द्वंद्वैर्नैवाभिभूयते ६० ३ श्री का श घे यो शो पः १३

यतिद्वाभ्यांइत्थंनष्टद्रविणोनिर्विद्यगतक्लमःप्रव्रज्यगांपर्यटन्नसद्भिर्निराकृतोपिस्वधर्मादकंपितःसन्मुनिरमंगाथामगायदित्यन्वयः मित्रोदासीनारिपवःसर्वोपिचसंसारःतमसःअज्ञानतःआत्मनोमनसोविभ्रममात्रेणकृतः नतुमात्विकइत्यर्थः उक्तंद्वंद्वसहनोपायमुपसंहरति तस्मादिति मनोनिग्रहाशक्तोऽप्येतच्छ्रवणादिनिष्ठस्तत्फलंप्राप्नोतीत्याह यइति द्वंद्वैः सुखदुःखादिभिः भिक्षुगीतेभिक्षुरूपेक्षत्वाभक्तचित्तगतंद्वैरिः मोदीनग्नंधिद्धाभातिपरमानंदरूपतः ६० ३ श्री वा दी का प द स्कं ३ द्विशो पः १३

श्री॰
भा॰ ए॰
टी॰
११८

तन्मात्रिविधात्त्रिविधप्रपंचोत्पत्तिं दर्शयति अथेति तन्मात्रिकान् शब्दादितन्मात्रकारणान् तामसा।
त्तेन हास्यार्थं महाभूतरूपाणां यत्तेव भवेव भूतानामावरणस्वभावत्वात् इंद्रियाणि दश तैजसात् राजसा।
त्तेषां प्रवृत्तिस्वभावत्वात् वैकृतान् सात्विकान् देवताः दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः
चंद्रश्चेत्येकादश चशब्दान्मनश्च तेषां प्रकाशस्वभावत्वात् ममवैराजात् तयोर्मिणः सलिलसंस्थिति
यस्यां तत्र सलिलसंस्थिते तस्मिन् सलिलसंस्थितौ चेदं श्रीनारायणरूपो लीलाविग्रहेण समभवं ।

अथैतत्तन्मात्रिकान् सृष्ट्वा तामसादिंद्रियाणि च तैजसाद्देवता आसन्नेकादश च वैकृतात् ८
मया संचोदिता भावाः सर्वे संहत्यकारिणः अंडमुत्पादयामासुर्ममायतनमुत्तमं ९
तस्मिन्नहं समभवमंडे सलिलसंस्थितौ मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः
१० सोसृजत्तपसा युक्तो रजसा मदनुग्रहात् लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रि
धा ११ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्प
रं अधोसुराणां नागानां भूमेरोकोसृजत्प्रभुः ॥

स्थिते तस्मिन्नाविर्भूत इत्यर्थः रजसा युक्तो म
दनुग्रहात्तपसा सृजत् भूः पातालादिसहिता भुवः अंतरिक्षलोकः स्वः स्वर्गलोकः महर्लोकादेरप्यु
पलक्षणं लोकसृष्टिप्रयोजनमाह देवानामिति साहेन ओकोनिवासः पदं स्थानं त्रितयात्परं महर्लो
कः अत्यर्थः विश्वाख्यं लोककारणभूतं तत्र चात्मभूः चतुराननरूपभोगविग्रहेण अनेनैव राजस एव ॥ अ० ॥

११८ कादिभूमेरधः अतलादि ॥

सूते क्रियाशक्तिमान्प्रथमो विकारः ततो महान्ज्ञानशक्तिः ननु अयं महानेव प्रथमो विकारः प्रसिद्धः
तत्राह सच ज्ञानक्रियागर्भत्वात्सूत्रात्संयुतः न पृथक् एकमेव तत्त्वं क्रियाज्ञानशक्तिभ्यां द्विधोच्यत
इत्यर्थः विमोहनः जीवस्य स्वमदेहतः संजातः एतत्तन्मात्रादीनां कारणं मनःशब्देन देवानामप्यु
पलक्षणं चिदचिन्मयः चिदाभासव्याप्तत्वादुभयं ग्रन्थिरूप इति जीवोपाधित्वं दर्शितं यद्यपि त
स्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः अन्नमयं हि सोम्य मन इत्यादिश्रुतेश्च प्रथमं भूता

तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः ततो विकुर्वतो जातो
योऽहंकारो विमोहनः ६ वैकारिकस्तैजसश्च तामसश्चेत्य
हं त्रिवृत तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः ७ ॥

निर्वार्यते तेभ्यश्चापञ्चीकृतेभ्यः प्राणादिक्रमेण समस्त्यात्मकं लिङ्गशरीरं पञ्चीकृतेभ्यश्च ब्रह्माण्डं
तस्मिन्वैराजस्तदन्तर्यामी लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणः तन्नाभिपद्मं च वैराजस्य भोग
विग्रहः चतुराननः ततो यथावसरमन्येषां जीवानामाविर्भाव इति प्रक्रिया तथापि चिन्ताभिव्यक्ति
पूर्वकोऽहंकारस्ततो भूतेन्द्रियादिव्यवहार इत्येतावता भस्त्रादिक्रमेण सृष्टिरुच्यते सत्योऽहविस्फु
लिङ्गाद्यैः सृष्टिर्या चोदितान्यथा उपायः सोऽवतारायनास्ति भेदः कथंचनेति ८ ॥ २

किंच विशेषतोपि त्वत्तो मम जन्म प्रसिद्धमित्याह ॥ जगत्त्रयेति जगत्त्रयांते प्रलये य उदधीनां संप्लवः संप्लोषस्तस्मिन्नुदके नारायणस्योदरे नाभिस्तस्या नालात्तदजो निर्गत इति या वाक् सा न वै मृषा न भवति वै निश्चितं ॥ किंतु तथापि तु हे ईश्वर त्वत्तः अहं किं न विनिर्गतः नोऽपि त्वत्तो निर्गतोस्मि अपितु त्वत्त एवोत्पन्न इत्यर्थः ॥ १३ ॥ नहि नारायणस्य पुत्रः स्यात्त्वं मम किं मातेत्यत आह ॥ नारायणस्त्वमिति ॥ नहीति काक्वा त्वमेव नारायण इत्युपपादयति कुतो नारायण इति चेदत आह ॥ सर्वदेहिनामात्मासि एवमपि किं नारायणो न भवसि ॥ नारं जीवसमूहः ॥ अयनमाश्रयस्तत्प्रेतित्वमेव सर्वदेहिनामात्मत्वान्नारायण

जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् विनिर्गतोऽजस्त्विति वाङ् न वै मृषा किंत्वीश्वर त्वन्न विनिर्गतोस्मि ॥ १३ ॥ नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी नारायणोऽङ्गं नरभूजलायनात्तच्चापि सत्यं न तवैव माया ॥ १४ ॥ ॐ नारायणाय नमो नमः ॥ ॐ कृष्णाय नमः ॥

इति भावः हे अधीश त्वं नारायणो न हीति पुनः काकुः ॥ अधीश प्रवर्तक तया तत्प्रवर्तकत्वात्स नारायणः अयनं प्रवृत्तिर्यस्मात्तस्मान्नारायण इति पुनस्त्वमेवासावित्यर्थः ॥ किंच त्वमखिललोकसाक्षी अखिललोकं साक्षात्पश्यसि अतो नारानयं जानासीति त्वमेव नारायण इत्यर्थः ननु एवं नारायणशब्दस्य त्वत्प्रवृत्तौ भवेदेवं न तत्त्वन्यथा प्रसिद्धमित्याशंक्याह ॥ नारायणो नाममिति ॥ नरउद्भूतानि तत्त्वानि नाराणि तत्त्वानि विशन्ति त्वामिति जलानि नाराणि तेषामयनादयनाच्चो नारायणः प्रसिद्धः सोपि नवांगमूर्तिः तथा च स्मर्यते नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः तस्य तान्ययनं पूर्वं तेन नारायणः स्मृत इति तथा आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ॥ ननु मत्स्य एवं परिच्छिन्नाया काय्यजलाश्रयत्व

रजोभव॰ जनसो जातस्य अत॥ अज्ञानतः॥ अतएव अजावलेपांधतमोंधचक्षुषः अजो जगत्कर्ताहमि
तिमदेन गाढतमोरूपेणांधीभूते नेत्रे यस्य अतस्त्वमे॥ पृथगीशमानिनः आत्मप्रभुत्वेन वर्तमानोपि
मयि नाथवानमनुकंप्य एव अतएव पद्य अनुकंप्य इति मत्वा आत्मक्षेत्यर्थः॥ १०॥ ननु ब्रह्मांडविग्रहस्त्व
मपीस्वरूपवेति तत्राह। क्वाहमिति तमः॥ प्रकृतिः महानहंतत्वं खं॥ आकाशः चरः वायुः अग्निः वाःभ
भूः प्रकृत्यादि पृथिव्यंतैः संवेष्टितो योऽण्डघटः सप्तवितस्तिप्रमाणेन सप्तवितस्तिकायो यस्य

अतंक्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः॥ अजावलेपांधतमोन्धचक्ष
षएषोनुकंप्यो मयि नाथवानिति॥ १०॥ क्वाहं तमोमहदहंखचराग्निवार्भूसंवेष्टितांड
घटसप्तवितस्तिकायः क्वेदृग्विधाविगणितांडपराणुचर्यावाताध्वरोमविवरस्य च ते
महित्वं॥ ११॥ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे॥ किमस्ति ना
स्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनंतः॥ १२॥ सोऽहं क्व क्व च ते महित्वं कथंभूतस्य

ईदृग्विधा नियानि अविगणितानि यानि ब्रह्मांडानि तान्येव परमाणवः तेषां परिचर्या भ्रमणं तद
र्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव॥ अतो अतितुच्छत्वात्त्वयानुकंप्योहमि
ति॥ ११॥ अपि च॥ गर्भगतस्य शिशोः पादयोः उत्क्षेपणं मातुः किं अपराधाय भवति लोके॥ १२॥ अ
स्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां सदसत्कार्यकारणाभ्यां वा भूषितं अभिहितं यत्तेषां श
क्षानां विविधविषयं उपहितं स्थितमिति वा सर्वं वास्तीत्यर्थः॥ ह्यथो तज्जनतवकुक्षेः॥ अनंत॥ बहिः॥ कि
यदपि किमस्ति न किंचिन्मात्रमपि किंचिदस्तीत्यर्थः॥ अतः सर्वस्यत्वत्कुक्षिगतत्वेन ममापि तव

श्री॰
भा॰द॰
टी॰
५२

गुणात्मनः गुणानात्मात्मनः गुणाधिष्ठातुस्तेतवपुनर्गुणान्विमातुं एतावंत इतिगणयितुमपि॥ केईशि-
रेसमर्थाबभूवुः हरंतस्तद्विशेषवार्त्तां कथंभूतस्यतव अस्यविश्वस्यहितायपालनाय॥ बहुधा॥ बहुगुणा
विष्कारेणावतीर्णस्य॥ ननुकालेननिपुणैः किमशक्यमतआह॥ कालेनेति॥ यैर्वाक्वचित्तैः॥ सुकल्पैर
तिनिपुणैर्बहुजन्मनाकालेनभूपरमाणवोविमिताः॥ विशेषेणगणिताभवेयुः तथाखेमिहिकाहि
मकणाअपि॥ तथाद्युभासः दिविनक्षत्रादिकिरणपरमाणवोपि॥७॥ तस्माद्भक्तिरेवसंगच्छतइ

गुणात्मनस्तेपिगुणान्विमातुंहितावतीर्णस्यकईशिरेस्य॥ कालेनयैर्वाविमिताःसुकल्पैर्भू
पांसवःखेमिहिकाद्युभासः॥७॥ तत्तेनुकंपांसुसमीक्षमाणोभुंजानएवात्मकृतंविपाकं
हृद्वाग्वपुर्भिर्विदधन्नमस्तेजीवेतयोमुक्तिपदेसदायभाक्॥८॥ पश्येशमेनार्यमनंतआ
द्येपरात्मनित्वय्यपिमायिमायिनि॥ मायांवितत्येक्षितुमात्मवैभवंह्यहंकियानैच्छमिवा-
(र्चिरग्नौ॥९॥

त्याह॥ तत्तेनुकंपामिति॥ सुसमीक्षमाणः कदाभविष्यतीति॥ बहुमन्यमानः स्वा
र्जितंचकर्मफलमनासक्तः संभुंजानएव॥ ततावन्नमस्कारादिनास्मिन्प्रपन्नेवंयोजीवेत्॥ समुक्तौदाय
भाग्भवति॥ भक्तस्यजीवनव्यतिरेकेण॥ दायप्राप्ताविवमुक्तौनान्यदपेक्ष्यतइतिभावः॥८॥ तदेवं
स्तुत्वाभगवतेस्वमायापत्तिंस्वापराधंनिवेदयति॥ पश्येतिहेईश॥ मेअनार्यंदौर्जन्यंपश्य॥ यदहंमायि
नामपिमायिनि॥ विमोहकेत्वय्यपिमायांप्रसार्य॥ आत्मैश्वर्यमीक्षितुमैच्छं अभिलषितवान्॥ अग्नौ
एवंकर्तुंनपिस्फुलिंगाःकियानननकिंचित्॥ यथाग्नेरुद्भूताज्वालाग्नौनकिंचित्हदिति॥९॥ ५

एवंतावत्सगुणनिर्गुणयोरुभयोरपिज्ञानंदुर्घटमितित्वत्कथाश्रवणादिनैवतत्प्राप्तिर्नान्यथेत्युक्तं ॥ इदानींयद्य
प्युभयोरविशेषेणदुर्ज्ञेयत्वमुक्तंतथापिगुणातीतस्यज्ञानंकथंचिद्भवेत् ॥ नतुसगुणस्यतवअचिंत्यानंतगुणा
त्वादितिस्तौतिश्लोकद्वयेन ॥ तथापीतिहेभूमन् ॥ अपरिच्छिन्नअगुणस्यतेमहिमाअमलैरंतरात्मभिः शुद्धाहृतैरि
वैः विबोद्धुंबोधगोचरीभवितुमर्हतियोग्योभवति ॥ अथवाविबोद्धुंज्ञातुमर्हति अर्हतेःशक्नोतेरित्यर्थः यद्वामहि
मेतिमहिमानंकश्चिद्बोद्धुमर्हतीत्यर्थःकथंस्वानुभवात् ॥ आत्माकारांतःकरणसाक्षात्कारात् नत्वंतःकरणमपि

तथापिभूमन्महिमागुणस्यतेविबोद्धुमर्हत्यमलांतरात्मभिः अविक्रिया
त्स्वानुभवादरूपतोह्यनन्यबोध्यात्मतयानचान्यथा ॥६॥

सविकारमेवविषयीकरोति ॥ इति ॥ कथमात्माकारत्वात्तस्येत्यतआह ॥ अविक्रियादिति ॥ विक्रियावि
शेषाकारःतद्रहितत्वात् ॥ विशेषपरित्यागएवात्माकारत्वेनेत्यर्थः ॥ नन्वंतःकरणसाक्षात्कारस्यविषयत्वेनाना
त्मत्वप्रसंगःस्यादतआह ॥ अरूपतइति ॥ रूपंविषयः अविषयात् हृनिविषयत्वमेवात्मनोनफलविषयत
मतोनायदोषइतिभावः ॥ कथंतर्हिस्फूर्तिः ॥ अनन्यबोध्यात्मतयास्वप्रकाशत्वेनैव ॥ नत्वन्यथाइदंनोदितिविष
तेनेत्यर्थः ॥ अथवा ॥ मासर्वतोनितरंगलक्ष्मीरपि ॥ अगुणस्यतेमहिमानं ॥ अमलतहृतिभिरिंद्रियैरपितथाथा
हावस्तुतस्तेनरूपेणविबोद्धुंकिमर्हतिनार्हत्येवेत्यर्थःकथंतर्हीतिनत्राहस्वानुभवादिना ॥ उक्तार्थमेवेनत ॥६

श्री
भा.टी.
पृ.
५२

दुरपास्य ईषदप्यहत्वा सद्भिर्मुखरितां स्वतएव नित्यं प्रकटितां भवदीयवार्तां स्थान एव स्थिता स्तन्वस्त्रि
धिमात्रेण स्वतएव श्रुतिगतां श्रवणप्राप्तां तनुवाङ्मनोभिर्नमंतः ॥ सत्कुर्वंतो ये जीवंति केवलं यद्यपि
नान्यत्कुर्वंति तैः प्रायशस्त्रिलोक्यामजितोपि त्वं जितः सोमासीति ॥ किंज्ञान श्रमेणेत्यर्थः ॥ भक्तिंवि
नाज्ञानेनसिद्ध्येदतआह श्रेयः श्रुतिं ॥ ३ ॥ श्रेयसामभ्युदयापवर्गलक्षणानां श्रुतिः श्रवणंयस्याः सर
सरखवनिर्झरणानांतेभक्तिंमुदस्यत्यक्त्वा श्रेयसांमार्गमभ्‍नामिनिवा ॥ तेषांक्लेशलः क्लेशएवशिष्यते

ज्ञानेप्रयासमुदपास्यनमंतएवजीवंतिसन्मुखरितांभवदीयवार्त्तं ॥ स्थानेस्थिताः श्रुति
गतांतनुवाङ्मनोभिर्येप्रायशोजितजितोप्यसितैस्त्रिलोक्याम ॥ ३ ॥ श्रेयः श्रुतिंभक्तिमु
दस्यतेविभोक्लिश्यंतियेकेवलबोधलब्धये ॥ तेषामसौक्लेशलएवशिष्यते नान्यद्यथा
स्थूलतुषावघातिनां ॥ ४ ॥ पुरेहभूमन्बहवोपियोगिनस्त्वदर्पितेहानिजकर्मलब्धया
विबुध्यभक्त्यैवकथोपनीतयाप्रपेदिरेंजोच्युततेपरांगतिम् ॥ ५ ॥ ॥

अयंभावः ॥ यथाल्पप्रमाणंधान्यंपरित्यज्यअन्तःकरणहीनानां स्थूलानांधान्याभासानांतुषानांयेवघ्नंति
तेषांनकिंचित्फलं ॥ एवंभक्तिंतुच्छीकृत्यकेवलबोधायप्रयतंतेतेषामपीतिभक्त्यैवज्ञानेनात्मप्राप्तिरित्य
त्रसदाचारंप्रमाणयति ॥ ५ ॥ पुरेतिहेभूमन् ॥ इहलोकेपूर्वंयोगिनोपिसंतः योगेनज्ञानमप्राप्यपश्चात्त्व
दर्पितेहाः ॥ त्वय्यर्पितालौकिकापीहाचेष्टायैस्तेनिजकर्मलब्धयात्वय्यर्पितेनिर्जितः ॥ कर्मभिर्लब्धया
त्वय्यर्पिताईहानिजकर्माणिचतैर्लब्धयापकंपदवाकथोपनीतयात्वत्समीपंप्रापितयाभक्त्यैवविबु
ध्यात्मानंज्ञात्वाअंजःसुखेनैवपरांगतिंप्राप्ताः ॥ ५ ॥ ~~~ ॥ ॥

५१

वपुषो नन्दसूनोः पशुपाङ्गजाय पशुपत्यानि पशुपाः देवा ... पशुपाङ्गजाय ... पथवा पशुपो नन्दः
तस्य अङ्गजः प्रियवत्सः देवः तस्माज्जातः तस्मै ... पशुपाङ्गजाय ... ५टी

वपुर्दर्शनोद्गतं हृष्ट्वा सर्वाङ्गं तु कम्पितं ॥ अधीशः कर्तुमस्तोषीत्सर्वं ब्रह्मा विमोहितः ॥१॥ स्वकृतापराधेन
भियास्खलत्पदं यो भगवन्महिमानमनवगाहमानो यथादृष्टस्वरूपमेव कीर्त्तयन्नाह ॥ नौमीति ॥ हे ईड्य
स्तुत्य ते तुभ्यं नौमि द्वितीयार्थे चतुर्थी ॥ अथवा नौमि स्तुत्याप्रस्तुतस्य भगवतः कर्मत्वे ज्ञाने प्रयोजनाय
तायामेवंभूतो भवानेव प्रयोजनमिति तादर्थ्ये चतुर्थी यद्वा तुभ्यं त्वामेव प्रसादयितुं त्वामेव स्तौमि
अभ्रवद्वपुर्यस्य तडिद्वदम्बरं यस्य तस्मै ॥ गुञ्जाभिरवतंसः कर्णाभरणं यस्य परिस्तः पिच्छं बर्हाणि
इतैर्लसन्मुखं यस्य तस्मै ॥ वन्याः स्रजो यस्य तस्मै कवलादिभिर्लक्ष्मभिः श्रीः शोभा यस्य तस्मै मृदू पा
दौ यस्य तस्मै पशुपस्याङ्गजाय ॥ ननु नौमीति प्रतिज्ञाय ॥ किं स्वरूपानुवादमात्रं क्रियते तत्राह ॥ अ १

श्रीब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदम्बराय गुञ्जावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे
कवलवेत्रविषाणवेणु ॥ लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥१॥ अस्यापि देव वपुषो मद
नुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि ॥ नेशे महि त्ववसितुं मनसान्तरेण साक्षात्तवैव
किमुतात्मसुखानुभूतेः ॥२॥

स्यापीति ॥१॥ भो देव अस्यापि सलीलभवत्वेन प्रकाशितस्यापि ॥ न
तव वपुषोऽवतारस्य महिमानं अवसितुं कोऽपि ब्रह्मा समपि न ईशो न शक्नोमि ॥ यद्वा कश्चिद
पि न ईशो न समर्थ आसीत् ॥ सलीलभवाय विशेषणद्वयं मदनुग्रहस्य ममानुग्रहो यस्मात्तत् ॥ मदनु
ग्रहस्तस्य किं च स्वेच्छामयस्य स्वीयानां भक्तानां यथा यथेच्छा तया विभावितः ॥ तर्हि किमिति ज्ञात्वेन
शाकाने ॥ अत आह ॥ ननु भूतमया विम्भ ... मत्वात्मकस्य यदा स्वेवं तदा कथं पुनः साक्षात्त्वं केवल
स्यात्मसुखानुभूतेरेव ॥ स्वसुखानुभवमात्रस्यावतारिणो गुणातीतस्य महिमानं मनसान्तरेण निरुद्धेना
पि मनसा कोऽवगाढुं समर्थो भवेत् ॥ अथवा भूतमयस्यापि विराड्रूपस्य न तव निर्विषयस्य स्ववपुषः
महिमवसितुं कोऽपि न ईशो न तदा साक्षात्तवैवासाधारणस्यानियम्यस्य नियन्तुर्भेदरहितस्य केवलस्य

...स्य महिमानमवसितुं कोऽपि नेशे इति किमुत वक्तव्यमित्य
र्थः नतु ब्रह्मा कथं समाप्तं नरे ... तत्राह २

जीवस्तीव्रेणापस्थापितं वर्त्तमानं देहं पश्यति ॥ न तत्पूर्वमपरं चेत्याकूतः ॥ यथेति ॥ अविद्योपाधिर्जी
वस्तत्कर्मसेव प्राचीनकर्माभिव्यक्तं वर्त्तमानमेव देहमुपास्ते अहमिति मन्यते ॥ पूर्वमपरं वा न वेद अ
त्र हेतुः ॥ नष्टा जन्मनोऽस्य स्मृतिर्यस्य ॥ अत्र दृष्टान्तः ॥ तमसा निद्रया युक्तो यथा स्वप्ने अभिव्यक्तमेव दे
हमुपास्ते ॥ न तु जाग्रद्देहादि पूर्वं वस्तु स्वप्नादिगतं वा तदर्थादित्यर्थः ॥ ४९ ॥ एवंभूतस्य जीवस्य संसारं प्रपंच
यति पंचभिः श्लोकैः ॥ पंचभिः ॥ कर्मेंद्रियैः स्वार्थान्भाषणादानादीन् ॥ पंच शब्दादीन्वेद ॥ पंचभिर्ज्ञाने
न्द्रियैः षोडशेन मनसा सप्तदशः षोडशोपाध्यन्तर्गतोऽपि स्वयं त्वेक एव सर्वेन्द्रियविषयप्रतिसं

यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ पंचभिः कु
रुते स्वार्थान्पंच वेदाथ पंचभिः ॥ एकस्तु षोडशेन त्रीन्स्वयं सप्तदशोऽश्नुते ॥ ५० ॥ तदेतत्षोडश
कलं लिंगं शक्तित्रयं महत् ॥ धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्तिदां ॥ ५१ ॥ देह्यज्ञोऽजितष
ड्वर्गो नेच्छन्कर्माणि कार्यते ॥ कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति ॥ ५२ ॥ न हि कश्चि
त्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥ लब्ध्वा नि

धानात् ॥ त्रीन्ज्ञानकर्मेंद्रियमनोविषयान्प्राप्नोति ॥ ५० ॥ तदेतल्लिंगशरीरं शक्तित्रयं गुणत्रयकार्यं म
हत् नाशरहितं संसृतिं धत्ते ॥ ५१ ॥ नेच्छन्नपि अनिच्छन्नपि अज्ञत्वेनैव कर्माणि कार्यते कोशकारः
कीटविशेषः सृजति निर्गमोपायं न जानाति ॥ ५२ ॥ कार्यत इत्यत्रानुभावम् ॥ प्रमाणयति ॥ नहीति
गुणैर्गुणकार्यै रागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ॥ ५३ ॥ कर्मवशेन च तद्वद्रूपादेह
भवतीत्याह लब्ध्वेति ॥ अव्यक्तमदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं च शरीरं भवति ॥ यथा

स्यात्तदाहुः मा ॥ एतैर्निमित्तभूतैर्विज्ञातः दंडमानाहुः ॥ सर्वज्ञेति ॥ ४३ ॥ विपरीतानि च अभद्राण्यपि कर्मिणां संभवंति ।
यतस्तेषां गुणसंयोगोस्ति यदि कश्चिदकर्ता स्यात्तर्हि तस्याभद्राणि न स्युः तत्तु नास्तीत्याहुः नहि देहवान्
कर्मकृत् नास्तीति अतः सर्वकर्मिणः कर्मिणां च पापस्यावश्यंभावित्वात् ॥ ते सर्वे दंडमर्हंतीत्यर्थः ॥ ४४ ॥ कथं
विज्ञायते दंडभूतस्योत्तरं येनेति ॥ धर्मो वेति दृष्टांतः अधर्मानुसारेण दंडो धर्मानुसारेण मानं च वेत्यर्थः ४५
न केवलस्य सूर्योदय एव ज्ञापकाः किं तर्ह्यपमित्रवर्गीत्याहुः यथेति ॥ यद्वज्जन्मनि सांतवारमृदत्वेन वास्तविडः
विमिश्रत्वेन वा ॥ धार्मिकत्वादिना त्रैविध्यं भूतेषु पृथग्योपलभ्यते ॥ तथा मत्रजन्मांतरेप्यनुमीयते ॥ त्रैविध्या

एतैरधर्मो विज्ञातः ॥ स्थानं दंडस्य युज्यते ॥ सर्वे कर्मानुरोधेन दंडमर्हंति कारिणः ॥ ४२ ॥ संभवंति हि भ
द्राणि विपरीतानि चानघाः ॥ कारिणां गुणसंगोस्ति देहवान्न ह्यकर्मकृत् ॥ ४३ ॥ येन यावान्यथा
धर्मो धर्मो वेह समीहितः ॥ स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ॥ ४४ ॥ यथेह देवप्रवरास्त्रैविध्य
मुपलभ्यते ॥ भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ४५ ॥ वर्तमानोन्ययोः कालो गुणाभिज्ञाप
को यथा ॥ एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ४६ मनसैव पुरे देवः पूर्वरूपं विपश्यति अ
नुमीमांसते पूर्वं मनसा भगवानजः ४७ ॥ त्यथानुपपत्त्या कल्प्यते ४६ वर्तमानजन्मना पूर्वापरज
न्मधर्माधर्मज्ञानं भवतीति सदृष्टांतमाहुः वर्तमानो वसंतादिकालः अन्ययोर्भूतभविष्ययोः वसंतयो
र्गुणाः पुष्पफलादयः तेषामभिज्ञापको यथा एवमेतज्जन्म अन्ययोर्भूतभाविजन्मनोर्धर्माधर्माविति
दर्शयतीति तथा ४७ अयं च धर्माधर्मज्ञानप्रकारो न बोधमराजस्य मनसैव सर्वं पश्यतीत्याहुः पुरे संय
मिन्यां स्थित एव देवो यमः देहे स्थितोन्तर्यामी वा जीवस्य पूर्वरूपं धर्माधर्मादि पुनर्विशेषेण पश्यति अ

टीका: २८ ॥

श्री. भा. ष. ५

कथंस्विदिति केन प्रकारेण स्थानं विषयः कारिणः कर्मिणः॥ नृणांमितिनसर्व्वनपप्रमादयः॥ तेषुपिकतिः विदेवेत्यर्थः॥ ३९॥ वेदेनप्रणिहितो विहितोधर्मः वेदप्रमाणकस्त्वधर्मः॥ अनेनतयोर्वेदप्रमाणकः स्वधर्मः॥ योधर्मः॥ सवेदप्रमाणक इतिस्वरूपेप्रमाण॥ वाक्योयथाहजैमिनिः चोदनालक्षणोऽर्थोधर्म इति व्याख्यातंचभट्टैः॥ इयमेकेनसूत्रेणास्मात्तयोर्भागानिरूप्यत इति॥ अदृष्टस्याप्यधर्मस्यस्वरूपलक्षणंचइदं स्थानकथनायाह॥ तद्विपर्ययोवेदनिषिद्धःसोऽधर्मः निषेधश्चतस्मिन्प्रमाणानिमर्थः॥ वेदस्यप्रामाण्ये हेतुः वेदोनारायणाद्भूतः स्वपवसात्वादिस्वपचारः स्वयंभूरितिचश्रुतिः॥ स्वामप्रामाण्येनस्वयमेवभवती

कथंस्विद्ध्रियतेदंडः किंवास्यस्थानमीप्सितं दंड्याःकिंकारिणःसर्वेआहोस्वित्कतिचिन्नृणां॥ ३९॥ यमदूताऊचुः॥ वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः॥ वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुमः॥ ४०॥ येनस्वधाम्न्यमीभावारजःसत्त्वतमोमयाः॥ गुणनामक्रियारूपैर्विभाव्यन्तेयथातथं॥ ४१॥ सूर्योग्निःखंमरुद्गावःसोमःसंध्याहनीदिशः॥ कंकुःकालो धर्मइतिह्येतेदैह्यस्यसाक्षिणः॥ ४२॥

नि॥ तथाचश्रुतिः॥ अस्यमहतो भूतस्यनिःश्वसितमेतद्यदृग्वेद इति ४०॥ कोसौनारायणस्तत्राह॥ येनस्वधाम्निस्वस्वरूपेअमीभावाः प्राणिनः गुणाः शांतत्वादयः॥ नामानि ब्राह्मणइत्यादीनि॥ क्रियाःस्वाध्ययनाद्याः॥ रूपाणिवर्णाश्रमादयः तैर्विभाव्यन्तेविविच्यन्ते॥ यथातथं यथावत्सनारायणः॥ ४१॥ तथाधर्मोनेनकृतइतिकथंज्ञायतेतत्राह॥ सूर्य इति॥ अहनीअहश्च रात्रिश्च॥ कंउदकं॥ कुः पृथ्वी दैह्यस्यजीवस्यतथाह॥ आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोहृदयं यमश्च॥ अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति॥ ४२॥

५

वक्रतुण्डानितरानिमान्दृष्ट्वा नियेषां ॥ ऊर्ध्वानि रोमाणि येषां तान् ॥ २८ ॥ प्लावितेन स्वनन्तं तीनेन ॥ २९ ॥ हरि
कीर्तनं निशम्यापतन ॥ यतस्तद्भर्तुर्नाम ॥ ३० ॥ ऊचुः सगर्भस्याः ॥ ३२ ॥ अस्य तच्छ्रुत निषेधथ ॥ ३३ ॥ वयं
मात्मजानीमः इति न कोपः कार्यः ॥ यतो लोकिकानुवर्णयमिस्माकः ॥ सर्वे इति सार्द्धाभ्यां ॥ लसत्
पुष्करमालाः सन्ति येषां ॥ ३४ ॥ नूतनं वयो येषां ॥ निषंगः तूणीर ॥ धनुर्निषंगादिभिः शोभा येषां ते ॥ ३५ ॥
स पाशहस्तांस्त्रीन्दृष्ट्वा पुरुषान्भृशदारुणान् ॥ वक्रतुंडानूर्ध्वरोमण आत्मानं नेतुमागतान् ॥ २८ ॥ दू
रे क्रीडनकासक्तं पुत्रं नारायणाह्वयं ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥ २९ ॥ निशम्य म्रियमाणस्य मुखतो हरिकीर्तनं ॥ भर्तुर्नाम महाराज पार्षदाः सहसापतन ॥ ३० ॥ विकर्षतोन्तर्हृदयाद्दा
सीपतिमजामिलं ॥ यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥ ऊचुर्निषेधितांस्तांस्ते वैवस्वतपुरःसराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ॥ ३२ ॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ ॥ किं
देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ ३३ ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥ किरीटिनः
कुंडलिनो लसत्पुष्करमालिनः ॥ ३४ ॥ सर्वे च नूतनवयसः सर्वे चारुचतुर्भुजाः ॥ धनुर्निषंगासिग
दाशंखचक्राम्बुजश्रियः ॥ ३५ ॥ दिशो वितिमिरालोकाः कुर्वंतः स्वेन तेजसा ॥ किमर्थं धर्मपा
लस्य किंकरान्नो निषेधथ ॥ ३६ ॥ श्रीशुकः ॥ इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुः
प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥ विष्णुदूता ऊचुः यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत
वितन्वन्तीति तिमिरं आलोकस्यात्मस्य प्रकाशो यासु तथाभूता दिशः कुर्वंतः भवता मेतदनुचिन्तितमित्याहुः कि
मर्थमिति ॥ ३६ ॥ प्रहस्येदं ग्रादेशाद्दिशानन्यत्वा पुनेचौरापत्वास्त्कियाधर्मराजस्य किंकरा इत्युक्तेवदंती
ति विस्मयेन विहसन्तो ॥ उचुः मेघस्येव निर्ह्रादो ध्वनिर्यस्याः तया ॥ न तत्त्वं ॥ लक्षणं प्रमाणं ॥ ३८

एतदेव विशदयति द्वाभ्यां ॥ तपसा ऐकाग्र्येण मनसश्चेंद्रियाणां च ॥ ऐकाग्र्यं परमं तप इति स्मृतेः ब्रह्मचर्येणाष्टांगेन ॥ तद्उक्तं ॥ स्मरणं कीर्तनं केलिः ॥ प्रेक्षणं गुह्यभाषणं ॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं इति ॥ शमो मनसो नियमनं ॥ दमो बाह्येंद्रियाणां त्यागो दानम् ॥ यमोऽहिंसादिः ॥ नियमो जपादिः ॥१३॥ अस्यापि तु दुष्करत्वात्सुखमेवान्यत्प्रायश्चित्तमाह केचिदिति नैवंभूता भक्तिः प्रथानामविरहात् सुनिदर्शयति ॥ केवलया तपआदिनिरपेक्षया ॥ वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् ॥ किं त्वेतेषामश्रद्धया ॥ तथा प्रवृत्तेरर्थाज्ञेष्टेव पर्यवसानाद॥

तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥१३॥ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥१४॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥१५॥ न तथा ह्यघवान्राजन्पूयेत तपआदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया ॥१६॥ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः ॥ सुशीलाः साधवो यत्र नारायणपरायणाः ॥१७॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं ॥ न निष्पुनंति राजेंद्र

तुवादमाह ॥१५॥ एतद्वृत्तान्तमार्गादपि श्रेष्ठमित्याह ॥ न तथा हि पूयेत शुद्ध्येत ॥ तत्पुरुषनिषेवया कृष्णसेविताः प्राणा येन ॥१६॥ तत्र हेतुः सध्रीचीनः अयं पंथा भक्तिमार्गः यतः क्षेमः अत्र हेतुः अकुतश्चिद्विघ्नादेर्भयं यस्मिन्निति च देवाह ॥ सुशीलाः ॥ सुशीलाः साधवो निष्कामाः ॥ यत्र यस्मिन्पथि ॥ प्रवृत्ता ॥ एतान्मार्गाद्वासुदेवायत्तानि निष्क्रियं भयं नास्तिकर्ममार्गवत्सत्वरादिग्विकेभ्यो भयमिति भावः ॥१७॥ भक्तेरन्यनिरपेक्षत्वमुक्त्वा तत्कृच्छ्रादीनि तु भक्तिं विना न शोधयंत्यतीह ॥ प्रायश्चित्तानीति महता मध्यशोधकानेहेष्टानमाह ॥ सुराकुंभमापगा इवेति ॥१८॥

भा॰ षं॰ ६

भक्तिस्त्वल्पापि पुंसां स्यादेवेत्याह ॥ सकृदिति ॥ तस्य गुरोर्गुणानां मात्रमस्ति ॥ नहं ज्ञातं यस्य तन्मनः ॥ ताव
नैव चीर्णानि निष्कृतं पापयुक्तं तैः ॥१९॥ इममर्थमितिहासेनोपपादयति ॥ अत्रचेति मेमत्रः ॥२०॥ कन्या
कुब्जपुरे दास्याः पतिर्नाम्नाजामिलः ॥२१॥ वेदाग्रे हणात्र देशभ्रष्टः तेन केतवैवैंचनादिभिश्च वृत्तिं
जीविकां विभ्रत् ॥ पुल्लन ॥ यातयामा सपीडयामास ॥२२॥ आयुषः संबंधी महान्कालोत्यगात् ॥ सकिया

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटा
न्स्वप्नेऽपि पश्यंति हि चीर्णनिष्कृताः ॥१९॥ अत्र चोदाहरंतीममितिहासं पुरातनं ॥ दूतानां वि
ष्णुयमयोः संवादस्तं निबोध मे ॥२०॥ कन्याकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥ नाम्ना
नष्टसदाचारो दास्याः संसर्गदूषितः ॥२१॥ बंद्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बि
म५ भ्रत्कुटुंबमशुचिर्यातयामास देहिनः ॥२२॥ एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥ का
लोत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥२३॥ तस्य प्रवयसः पुत्रा दश तेषां तु योवमः ॥
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं ॥२४॥ स बद्धहृदयस्तस्मिन्नर्भके कलभाषि
णि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं ॥ भुंजानः प्रपिबन्खादन्बालकस्नेहयंत्रितः ॥
भोजयन्पाययन्मूढो न वेदागतमंतकं ॥२५॥ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ॥ मतिं च
कार तनये बाले नारायणाह्वये ॥२६॥

नितिपैत्यन्नयामाह ॥ अष्टाशीत्यासंख्यायायुक्ताः समाः
संवत्सराः ॥२३॥ प्रवयसः वृद्धस्य ॥२४॥ बद्धहृदयत्वे तज्जरठो वृद्धः ॥२६॥ एवं सुतलालनादिना नाराय
णनाममाहात्म्येन तद्भक्तिरेवाभूदिति सिद्धांतपयोगितेनापि द्रष्टव्यम् ॥२७॥

ननु स्वल्पपापिनो दण्डे किमर्थं महाक्रोशः क्रियते । तत्राहुः अयं चेति । यद्यस्माद्विवशोऽपि हरेर्नाम व्याजहार उच्चारि-
तवान् न केवलं प्रायश्चित्तमात्रं हरेर्नाम व्याजहार उच्चारितवान् ॥ न केवलं प्रायश्चित्तमात्रं हरेर्नाम अपि तु स्व-
स्त्ययनं मोक्षसाधनमपि ॥ सकृदुच्चारितं येन हरिरित्यक्षरद्वयं ॥ बद्धः परिकरस्तेन मोक्षाय गमनं प्रती-
ति स्मृतेः ॥ ७ ॥ ननु साङ्केत्यपकमेकं हरेर्नामेति युक्तं ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं सं-
पूर्णतां याति सद्यो वन्दे तमच्युतमित्यादिवचनात् ॥ स्वांतं यन्मेण तत्र निवर्तकं हरेर्नाम कथं तत्राहुः ॥ एतेनैवे-
ति ॥ अघोनः अघवतः ॥ मघवद्बहुरूपं ॥ यतश्चाश्रुतिश्छेदः आईयत ॥ आभासमात्रं चतुरक्षरं नाम उज्जगाद ॥ एतेः
नैव केवलेन ॥ चतुरक्षरं अन्यूनाधिकं च दर्शितं ॥ कथं उज्जगाद म्रियमाणः आयश्च आगच्छेत्येवं विक्रोशन् पुत्र सा-
उपाक्रान्तेन ॥ अयं भावः कर्मांगत्वेऽपि हरिनाम्नः स्वादिरत्वादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं ।

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥ एतेनैव
ह्यघोनोस्य कृतं स्यादघनिष्कृतम् ॥ यदा नारायणायेति जगाद चतुरक्षरम् ॥ ८ ॥ ॥ ॥

कमेव तथाद्विविवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादि-
भिः ॥ पुराणेनावन्महस्रशोनाम्नः स्वातंत्र्यमवगम्यते ॥ विरोधे गुणवादः स्यादनुवादोऽवधारिते ॥ भूतार्थवाद-
स्तद्धानादर्थवादस्त्रिधा मतः ॥ न चैते अर्थवादा इति शंकनीयं ॥ विधिशेषत्वाभावात् ॥ न च विध्यश्रवणाद-
र्थशेषता कल्पनीया ॥ तदाग्नेयोऽष्टाकपालो भवतीत्यादिवदप्राप्तार्थत्वेन विधिकल्पनोपपत्तेः ॥ मंत्रेषु
च ॥ मन्त्रा मन्त्रस्य ते भूरि नाम मन्तामहे ॥ विप्रासो जातवेदः आस्य जानन्तो नाम चिद्विवक्तनेत्यादिषु तावत्
त्तोपादानादि सर्वधर्मोपि वकामवगम्यते ॥ उपपादितं च ॥ मंत्रार्थवादानामपि स्वार्थे प्रामाण्यं देवताधिकर-
णे ॥ तस्मात् ॥ श्रीनारायणनामाभासमात्रेणैव सर्वपापनिष्कृतं भवतीत्यादि ॥ ८ ॥ ॥ ॥

भा० षं० ८

तत्र कामकृतानां बहूनां महापातकानां सहस्रशः प्रायश्चित्तानां द्वादशाब्दादिकोटिभिरप्यनिर्विष्टानां कथमिदमेकमेव प्रायश्चित्तं स्यादित्याशङ्क्याह स्तेन इति द्वाभ्यां ॥९॥ सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव तत्र हेतुः। यतो नामव्याहरणात् तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयमतः सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति ॥१०॥ श्रेष्ठत्वमेवोपपादयति न निष्कृतैरिति द्वाभ्याम्। ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैः। तथा न शुद्ध्यति। उदाहृतैरुच्चारितैर्यथा नामपदैरित्यनेन नामाभासादिकियायोगोऽपि नापेक्षित इति दर्शितम्। किं च तन्नामपदोच्चारणम्। उत्तमश्लोकस्य गुणानां चोपलम्भकं ज्ञापकं भवति। न तत्कृच्छ्र

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥९॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतं। नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥१०॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः। यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकं ॥११॥ नैकान्तिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे। तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः ॥१२॥ अथैनं मापनयत कृताशेषाघनिष्कृतं। यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥१३॥

चान्द्रायणादिव्रतायनिष्कृतिमात्रोपहीनमित्यर्थः ॥११॥ नैकान्तिकं नात्यन्तशोधकं तन्निष्कृतं यस्मात् कृतेऽपि असत्पथे पापमार्गे मनो धावति चेत्। कर्मणां पापानां निर्हारं आत्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं। यतो सौ खलु सत्त्वभावनः चित्तशोधकः ॥१२॥ अथ तस्मादेनं मापनयत मा गृह्णीत। कृतमशेषाणामघानां निष्कृतं येन। यद्यस्मात् समग्रहीत् संपूर्णमुच्चारितवान्। नामैकदेशो नाम्नां लमिति भावः। म्रियमाणः इत्यनेन पुनः पापान्तरासंभव उक्तः। न तु तत्कालत्वमेव विवक्षितं। तदानीं कृच्छ्रादिविधिव

भा० ष० ९

यावता समयेन ॥ ६४ ॥ लंभितां परिणीतां ॥ ६५ ॥ अवरुप मातुर्य स्मलमेव तदीयमन्नादिकमश्नीतिमलात् ॥ ६६ ॥ अकृतनिर्वेशं अकृतप्रायश्चित्तं ॥ अस्यैव हितार्थं तेषामदर्शनमाहुः ॥ ६८ ॥ इति षष्ठस्कंधे दीपिकायां प्रथमोध्यायः ॥ १ ॥ द्वितीये वै स्ववैयर्थ्यान्नाममाहात्म्यमद्भुतम् श्रावयित्वा द्विजो विष्णोर्लोकं नीतस्तु नीयते ॥ १ ॥ नयकोविदाः न्यायनिपुणाः ॥ १ ॥ धर्मदृशां सभामधर्मः स्पृशतीति ॥ तदाहुर्यत्र सभायामधर्मेट

तामेव तोषयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥ विप्रां स्वभार्यामप्रौढां कुले महति लंभितां विससर्ज चिरात्पापः स्वैरिण्यापाङ्गविद्धधीः ॥ ६५ ॥ यतस्ततश्चोपनिन्ये न्यायतोन्यायतो धनं ॥ बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ॥ ६६ ॥ यदसौ शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः ॥ अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥ तत एनं दंडपाणेः सकाशं कृतकिल्बिषं नेष्यामोकृतनिर्वेशं यत्र दंडेन शुध्यति ॥ ६८ ॥ इति श्रीभागवते षष्ठस्कंधे प्रथमोध्यायः ॥ १ ॥ शुक उ० ॥ एवं ते भगवद्दूता यमदूताभिभाषितं ॥ उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः ॥ १ ॥ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां ॥ यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा ॥ २ ॥ प्रजानां पितरो ये च शास्तारः साधवः समाः ॥ यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ॥ ३ ॥ यद्यदाचरति श्रेयानितरस्तत्तदीहते ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ४ ॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥ स कथं न्व

मिः तेषां संभवे ॥ १ ॥ पितरः पित्रवत्पालकाः शास्तारश्च अनुशिक्षकाः वैषम्यं अदंड्यदंडनं ॥ ३ ॥ एतत्प्रवर्तितमधर्ममन्योपि करिष्यतीति महदनिष्टमभूदित्याहुः ॥ यद्यदिति ॥ श्रेयाञ्श्रेष्ठः ॥ ४ ॥ विस्रम्भस्तत्यागस्तादपीमा

संसारचक्रमुपसंहरंतो मुक्तिप्रकारमाह ॥ एवमिति ॥ ईशासंगात् ॥ परमेश्वरभजनात् ॥ ५५ ॥ तदेवं सामान्यतो धर्मा
दिनिर्णयमुक्त्वा प्रस्तुतमजामिलस्य धर्मप्रपंचयंतो दृष्टांतमाह ॥ अयं हीति ॥ यावदध्यायसमाप्तिः ॥ तत्र ह्याभ्या
तस्य वृत्तांतोनानाश्रवादेसायामतिरेकप्रदर्शनार्थः ॥ शीलं सत्स्वभावः ॥ वृत्तं सदाचारः गुणाः क्षमादयस्तेषामा
लयः ॥ ५६ ॥ निरहंकृतो निरहंकारः ॥ ५७ ॥ आहृतः वनाल्लाहृतः भुजिष्यया भोगपत्निया दास्या ॥ मैरेयं मधु

एवं प्रकृतिसंगेन पुरुषस्य विपर्ययः ॥ आसीत्स एव नचिरादीशसंगाद्विलीयते ॥ ५५ ॥ अयं हि श्रुतसं
पन्नः शीलवृत्तगुणालयः ॥ धृतव्रतो मृदुर्दान्तः सत्यवाङ्मंत्रविच्छुचिः ॥ ५६ ॥ गुर्वग्न्यतिथिवृद्धानां शु
श्रूषुर्निरहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥ एकदासौ वनं यातः पितृसंदेश
कृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥ ददर्श कामिनं कंचिच्छूद्रं सह भुजि
ष्यया ॥ पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपं ॥ क्रीडंतम
नुगायंतं हसंतमनयांतिके ॥ ६० ॥ दृष्ट्वा तां कामलिप्तेन बाहुना परिरंभितां ॥ जगाम हृच्छयवशं सद्य
एव विमोहितः ॥ ६१ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतं ॥ न शशाक समाधातुं मनो मदन
वेपितम् ॥ ६२ ॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्यायन् स्वधर्माद्विरराम ह ॥ ६३

सीधुसुरां पीत्वा मदेनाघूर्णिते भ्रांते नेत्रे यस्याः ॥ ५९ ॥ विशेषेण श्लथंती नीवी यस्याः तया सह व्यपेतं ॥ स्वाचारा
त् भ्रष्टं ॥ ६० ॥ कामोद्दीपकेन चंदनरागेण हरिद्रादिना लिप्तेन ॥ ६१ ॥ सत्त्वं धैर्यं श्रुतं ज्ञानं तद्बलेन स्तंभय
न्नपि मदनेन कंपितं मनः समाधातुं न शशाकेत्यर्थः ॥ ६२ ॥ तद्दर्शनमेव निमित्तं यस्य स्मरव्याजस्य ग्रहस्य
तेन ग्रस्तः विचेतनो गतस्मृतिः ॥ ६३ ॥

तमेवधर्ममाह ॥ एतावानिति ॥ २२ ॥ नचात्रप्रमाणंवक्तव्यंदृष्टत्वादित्याह ॥ नामोच्चारणेतियेनैवकेवलेन ॥ २
३ ॥ ननुसंकेतद्योतितेनानामाभासेन ॥ कथंसर्वपापक्षयःस्यात् ॥ अज्ञाभक्त्यावृत्रादेरपिविधानात् ॥ तथाहि ॥
सायंप्रातर्हितान्यजस्राड्ःस्वयामाहिस्वच्यतइति ॥ अनुदिनमिदमादरेणशृण्वन्निति ॥ श्रवणकीर्तनध्यानैर्ह
रेरद्भुतकर्मणः ॥ जन्मकर्मगुणानांचतदर्थेऽखिलचेष्टितमित्याद्यस्मिन्नेवपुराणे ॥ तत्रतत्रपश्यतेपुराणान्त
रेषु ॥ पापक्षयश्चभवतिस्मरतांतमहर्निशमिति ॥ अत्रैवच ॥ तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसां ॥ महता
मपिकौरव्यविद्ध्यैकांतिकनिष्कृतमित्यादिना ॥ सम्यक्कीर्तनादेवमन्यते ॥ किंचतथामत्तेतिकिमितिमत्वादया

एतावानेवलोकेस्मिन्पुंसांधर्मःपरःस्मृतः ॥ भक्तियोगोभगवतितन्नामग्रहणादिभिः
२२ ॥ नामोच्चारणमाहात्म्यंहरेःपश्यतपुत्रकाः ॥ अजामिलोपियेनैवमृत्युपाशादमुच्य
त २३ एतावतालमघनिर्हरणायपुंसांसंकीर्तनंभगवतोगुणकर्मनाम्नां ॥ विक्रु
श्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणइयायमुक्तिम् ॥ २४ ॥

हादशाद्यादीन्स्मरेयुः ॥ तस्मादिदमनुपपन्नमिव ॥ तत्राह ॥ एतावतेति ॥ भगवतोगुणानांकर्मणां ।
चनाम्नांचसंकीर्तनमितियत् ॥ एतावतापुंसामघनिर्हरणायपापक्षयमात्रायअलमुपयोगोना
स्ति ॥ अलशब्दोवारणे ॥ तथाहामरसिंहः ॥ अलंभूषणपर्याप्तिशक्तिवारणवाचकमिति ॥ उपयोगा ।
भावमेवाह ॥ अजामिलोमहापातक्यपि ॥ नारायणेतिविक्रुश्य ॥ नतुसम्यक्कीर्तयित्वा ॥ तत्रापिपुत्रंविक्रुश्यन ।
तुहरिं ॥ मघवानशुचिरपिम्रियमाणःस्वस्थचित्तोपिमुक्तिमवाप ॥ नतुवेदनिर्हरणमात्रं ॥ अतोनामाभासे
नापिसर्वपापक्षयइत्येवतत्त्वं ॥ अत्रहिनिःश्वडादिरवैयस्तपापवासनात्यागोयस्तसकमेवहरेर्गुणानुवा
दःखलुसत्वभावनइत्यत्र ॥ २४ ॥

तन्मायामोहितत्वान्न जानंतीत्युक्तं ॥ अविषयत्वाच्च तस्येत्याह ॥ यमिति ॥ गोभिरिंद्रियैः हृदा चित्तेन ॥ न विचक्षते न पश्यंति ॥ यद्वा वाचा न भाषंते यन्मनो न मनुत इत्यादि श्रुतेः ॥ आत्मनां जीवानामात्मानमीश्वरं आकृतयो रूपाणि ॥ चक्षुर्यथा कर्मभूतं न जानंति ॥ ततः परमात्मनां नाप्रकाशकं न हि प्रमाणस्य विषयत्वाभावः ॥ एवंभूतः परमेश्वरोस्तीति पूर्वेणैव संबंधः ॥ १६ ॥ भवत्वेवंभूतोन्यः परमेश्वरः ॥ ये पुनरस्मान्निर्भर्त्सयंति ते तल्लोके

यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ॥ आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्ततः परं ॥ १६ ॥ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ॥ प्रायेण दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः ॥ १७ ॥ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि ॥ रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥ १८ ॥ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः ॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥ १९ ॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः ॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं ॥ २० ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः ॥ गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते ॥ २१ ॥

तानाह तस्येति द्वाभ्यां ॥ तस्यैव रूपं गुणाः प्रभावादयः स्वभावो भक्तवात्सल्यादिर्येषां ते ॥ १७ ॥ विष्णोर्भूतानि भृत्याः दुर्दर्शानि लिंगानि रूपाणि येषां तानि तद्भक्तिमतः विष्णुभक्तान् ॥ परेभ्यः शत्रुभ्यः ॥ सर्वतः अग्न्यादिभयेभ्यश्च रक्षंति ॥ १८ ॥ ननु विष्णुभक्तानामप्यस्य धर्मपक्षपाते कृतं चेत्तत्राह धर्ममिति ॥ ऋषयो भृग्वादयः ॥ १९ ॥ ननु केपि चेन्न जानंति ॥ तस्मिन्नेव किं प्रमाणं तत्राह ॥ स्वयंभूरिति ॥ कुमारः ॥ वयमित्यात्मानमेव वक्तृ मन्यमानो निर्दिशति ॥ २० ॥ हे भटाः ॥ २१ ॥

यतत्त्वंवर्थः॥ नद्विद्वादशशास्त्रादिस्मरणमिति॥ तत्राहप्रायेणेति॥ महाजनो मन्वादिः॥ अयंभावः॥ यथाऽमृतम्
जीवतौषधीमजानन्तो वैद्या रोगनिर्हरणाय त्रिकटुकनिंबादीनि स्मरन्ति॥ तथाऽस्वयम्भु शंभुप्रभृतिद्वादशव्य
तिरेकेणायंमहाजनो॥ ति गुह्यमिदमज्ञात्वाद्वादशप्रायश्चित्तिकं स्मरन्तीति॥ किंचमायया देव्याऽमूलमोहितमति
यजनः॥ मधुमधुरंयथाभवत्येवंपुष्पितायां प्रशस्तपुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यांजडीकृतात्मा भिनिवि
ष्टमतिर्यस्य अतोमहत्येवकर्मणि॥ अइयायुज्यमानोनाल्पेप्रवर्तते॥ इदमपनेहिशास्त्रं तस्यलोकस्य महतिमंचाग्
दोषज्ञानेऽल्पेवाश्रद्धा॥ तस्मादस्मयादृको नास्तीति॥ नैनीकंयद्वासाधीनः सिद्धोऽस्तियेनावना॥ स्सहृगालादि

प्रायेणवेदतदिदंनमहाजनोयंदेव्याविमोहितमतिर्वतमाययालं॥ त्रय्यांजडीकृतमतिर्मधुपुष्पि
तायांवैतानिकेमहतिकर्मणियुज्यमानः॥२५॥ एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मना
विदधतेखलुभावयोगं॥ तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः॥२६॥
तेदेवसिद्धपरिगीतपवित्रगाथायेसाधवःसमदृशोभगवत्प्रपन्नाः॥ तान्नोपसीदतहरेर्गदयाभिगु
प्तान्नैषांवयंनचवयःप्रभवामदंडे॥२७॥

निवारणायतेयथानप्रयुंजते॥ तथानितत्कृत्वा
स्याप्यसनननिरसनायपरमंगलंहरेर्नामस्मरन्ति॥ यथानाममाहात्म्यज्ञानेसर्वंमुक्तिप्रसंगादित्येषा
दिक्॥ ग्रंथविस्तारभयात्तुनातिप्रपंच्यते॥२५॥ भावयोगंभक्तियोगं अमीषांपातकंतस्माद्वत्यदिस्यात्तु
रुगायसंवादःकीर्तनं॥२६॥ तदेवंयमेनतेनिर्णीयमभृत्यानतुशास्तितःइति॥ येभगवंतंप्रपन्नाः तेदेवैः
सिद्धेश्चपरिगीतपवित्रगाथाः॥ परिगीतपुण्यकथाः॥ अतस्तान्नोपसीदततत्समीपमपिनगच्छत॥ व
यः कालोऽपिनप्रभवति॥२७॥ रामानुजायनमः॥ २७ ॥ रामानुजायनमः॥२७॥

श्री
भा॰
२३

केत दिंदेशार्थमानेयाह त्यत्राह ॥ तानिविहाभ्यां ॥ असतोड शंस्लानेवाह ॥ मकुंदपादारविंदयोर्यो मकरंद इपोर
सुसस्माहिसुखान्कथंभ्रतात ॥ निष्किंचनैवजनसंतुष्टान् ॥ तेषां ज्ञायकमाह ॥ निरयवर्त्मनिस्रथ र्मप्रप्त्येगर
देवहातल्मायैस्नान् ॥ १८ ॥ किंचजिह्वस्यादि ॥ यद्येषां ॥ जिह्वे त्याद्यन्वयः ॥ नह्रतंविस्मृतंस्यभगवद्रूतंयेः
॥ १९ ॥ भगवंतनमापयति ॥ तदिति ॥ अयंभावः ॥ नः सपुरुषैरस्मदीयत्वेन स्थितैः सीयैरेवपुरुषैर्यस्मा

तातानयद्ध्यस्मतोविमृग्यतांमुकुंदपादारविंदमकरंदरसादजस्रं ॥ निष्किंचनैःपरमहं
सकुलैरसज्ञैर्जुष्टंगृहेनिरयवर्त्मनिबद्धतृष्णान् ॥ २० ॥ जिह्वानवक्तिभगवद्गुणनामधे
यंचेतश्चनस्मरतितच्चरणारविंदं ॥ कृष्णायनोनमतियच्छिरएकदापितानानयधम
सतोकृतनविस्मृतस्यात् ॥ २१ ॥ तत्तस्यनासभगवानुरुतपः पुराणोनारायणः स्वपुरु
षैर्यदसत्कृतैनः सानामहोनविदुषांरचितांजलीनांक्षांतिर्गरीयसिनमः ॥ पुरुषाय
भूम्ने ॥ २२ ॥ श्रीशुक उवाच ॥ तस्मात्सकीर्तनविस्मृतंजगन्मंगलमंहसां ॥ महतामपिं
कौरव्यविद्ध्यैकांतिकनिष्कृतिं ॥ २३ ॥ शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः य
थासुजातयाभक्त्याशुद्ध्येन्नात्माव्रतादिभिः ॥ २४ ॥ रामानुजाय नमः ॥ २३ ॥

त ॥ असत ॥ अन्याय्यंकृतं ॥ तत्तस्मात्सयमेवचन्मपतांसहतां ॥ स्वानांसीयानांनः नविदुषांअज्ञानां ॥ यदोगरी
यसितस्मिन्ज्ञांतिर्पुरुषैव ॥ महदृत्तिपापे ॥ सीयानांमाहात्म्यमविदुषांत्वं क्षमाकरोतित्यर्थः ॥ २० ॥ तस्मादि
तिशुकोक्तिः ॥ जगतोपिमंगलरूपं ॥ २१ ॥ एकांतिकत्वमेवाह ॥ शृण्वतामिति ॥ व्रतादिभिस्तथा नशुद्ध्येत ॥ २२

प्रत्याहृतं इंद्रियग्रामो येन ॥३९॥ गोभ्यो देहेंद्रियादिभ्यः आत्मानं विमुच्य विशोध्य ॥ आत्मसमाधिना वि
वेकाग्रेण भगवतो याम्निरूपे ॥४०॥ तस्मिन्नेव भगवद्धाम्नि ॥ उपरतानि अखिलार्थीर्यस्मात् ॥ तस्मिन्काले द्र
ष्टा दिदिवा ॥ पुरः स्वरतस्तत्र भगवदुपलब्धानेव तात्रुपलभ्य प्रत्यभिज्ञाय तद्वदे ॥४१॥ उपसंहरति ॥ एव

श्रीबादरायणिरुवाच ॥ स तस्मिन्देवसदन आसीनो योगमास्थितः ॥ प्रत्याहृत्येंद्रियग्रामं युयो
ज मन आत्मनि ॥४२॥ ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभ
वात्मनि ॥४३॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्वि
जः ॥४४॥ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु ॥ सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां ॥४५॥ सा
कं विहायसा विप्रो महापुरुषकिंकरैः ॥ हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥४६॥ एवं स विप्ला
वितसर्वधर्मा दास्याः पतिः ॥ पतितो गर्ह्यकर्मणा निपात्यमानो निरये हतव्रतः ॥ सद्यो विमुक्तो
भगवन्नाम गृह्णन् ॥४७॥ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात् ॥ न यत्पु
नः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोन्यथा ॥४८॥ य एवं परमं गुह्यमितिहासमघा
पहं ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥४९॥ ॥

मितिहासाभ्यां विप्लावितः सर्वधर्मो येन ॥ हतं व्रतं स्वदारनियमादि यस्य ॥४७॥ कर्मनिबंधस्य पापमूल
स्य कृंतनं छेदकं दमतः परं नास्ति ॥ कस्मात्परं ॥ तीर्थपदस्यानुकीर्तनात् अत्र हेतुः ॥ यत्त यतोनुकीर्तना
त् ॥ ततोनुकीर्तनादन्यथा प्रायश्चित्तांतरैः ॥ रजस्तमोभ्यां कलिलं मलिनमेव तिष्ठति ॥ यतस्ततः

५८

भा० पं० ९

वेवेत्तितो भवति ॥ ४९ ॥ स्रियमाणाः प्रवशात्तेन श्रद्धाविहीनोपि ॥ ५० ॥ इति श्रीभागवते पष्ठे द्वितीयोध्यायः ॥ २ ॥ तृतीयेत यमेनापि वैसवोन्तर्षवर्णितैः ॥ सांत्वयित्वास्वहतांस्तैर्वस्वैर्वकिंकरीहृत्ममाः ॥ १ ॥ विसृष्टैते निर्गतीं तेषां तार्थयम सुखेनदृष्ट यितं तृतीयाध्यायारंभः ॥ तत्रयदुक्तंयमराज्ञे तेनतथा सर्वमाचक्षतिति ॥ ततः किंत गृहत्रमितिष्टच्छति ॥ निशाम्येति ॥ सुरावैर्तैर्देशिकैः किंकरैः एवं विहतान् ॥ अतएवहृताआज्ञाम स ॥ यस्य वशाव्तीश्र यंत्रतः सोपितान्प्रतिकिमाह ॥ १ ॥ अत्याश्चर्यमेवदित्याह ॥ १ ॥ अत्याश्चर्यमेवदि

नवैसन्तरकंपातिनेत्तितोयमकिंकरैः ॥ यद्य प्रमंगालो मर्त्ये गविसुलोके महीयते ॥ ४९ ॥ स्त्रि यमाणोहरेनां मगृणन्तत्पुत्रोपचारितं ॥ अजामिलोप्यगाद्धाम किंपुनः श्रद्धयागृणन् ॥ ५० ॥ इति श्रीभागवते पष्ठस्कंधे द्वितीयोध्यायः ॥ २ ॥ राजोवाच ॥ निशम्यदेवः स्वभटोपवर्णितं प्र त्याह किंतान्प्रतिधर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्यवशे जनोयं ॥ १ ॥ यम स्यदेवस्यनदंडभंगः कुतश्चनर्षेश्रुतपूर्वआसीत् ॥ एतन्मुने वृश्चतिलोकसंशयं नहित्वदं न्य इतिमेविनिश्चितं ॥ २ ॥ श्रीशुक उवाच ॥ भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः ॥ पतिंविज्ञापया मासुर्यमंसंयमनीपतिं ॥ ३ ॥ यमदूता ऊचुः ॥ कतिसंतीहशास्तारो जीवलोकस्यवैप्रभो ॥ त्रैवि ध्यंकुर्वतः कर्मफलाभिव्यक्तिहेतवः ॥ ४ ॥

त्याह यमस्येति ॥ देवस्य यमस्य दंडभंगः कुतश्चन कुतश्चित् श्रुतपूर्वो नासीत् ॥ एतस्मिन्नर्थे यद्यपि श्रुतपूर्वः ॥ एतद्यमदूतनिराकरणवासी कस्मादिदमपि श्रुतपूर्वो नासीत् ॥ एतस्मिन्नर्थे यद्धात ॥ अतः कथयेति त ॥ अतः सर्वस्यापि लोकस्य संशयोवर्तते न त्वत्तो न्यो न छिनत्तीति मे निश्चितं ॥ अतः कथयेति शापः ॥ भगवतः ॥ पुरुषैः प्रतिहतउद्यमो येषां ते याम्याः पुरुषाः ॥ ३ ॥ कतिसंतीत्यादि त्रयो विधं स्वार्थैष्वाज्ञ ॥ यदा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः ॥ तस्यैव कर्मफलस्याभिव्यक्तिहेत

पं० कि० टी० अ० २

९

दृष्टान्तीतस्य द्विजर्षेः पूर्वकं मोदकं समाह ॥ किमिदमित्यष्टभिः साक्षात्प्रत्यक्षमिह दृष्टमेतेन वहूष्टं ॥२५॥ ये मां
अमोचयत ॥ ते च क्व गताः यद्यप्यहमस्मिन् जन्मनि दुर्भगः पापीयान् ॥ अथापि तत्कर्मान्तरे नूनं शुभं वा-
निमाह ॥ विबुधोत्तमदर्शनेनेति निमित्तमस्मीतेषां दर्शनार्थं पूर्वं मंगलेन महता पुण्येन भवितव्यं

किमिदं स्वप्न आहो स्वित्साक्षाद्दृष्टमिहाद्भुतं ॥ क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः ॥२६॥ अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः ॥ व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः ॥२७॥ अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ॥ भवितव्यं मंगलेन येनात्मा मे प्रसीदति ॥२८॥ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ॥ वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति ॥२९॥ क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ॥ क्व च नारायणेत्येतद्भगवन्नाम मंगलं ॥३०॥ सोऽहं तथा यतिष्यामि यतचित्तेंद्रियानिलः ॥ यथा न भूय आत्मानमंधे तमसि मज्जये ॥३१॥ विमुच्य तमिमं बंधमविद्याकामकर्मजम् ॥ सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान् ॥३२॥ मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया ॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥३३॥ ममाहमिति देहादौ हित्वामिथ्यार्थधीर्मतिं ॥ धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ॥ श्रीशुक उ० ॥ इति जातसुनिर्वेदः क्षण-संगेन साधुषु ॥ गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः ॥३५॥

येन दर्शनेन ॥२९॥ अन्यथा पूर्वं पुण्यं वि-
ना कथं मृतं वैकुंठनाम ॥ तदुत्तेन वशीक्रियते अनेनेति यत्र इन्द्रियाणां ॥३२॥ ब्रह्मघ्नः विप्रत्वनाशकः ॥३३॥ अभि-
ध्यामृते ये धीर्यस्य तथाभूतः ॥ सन् देहादौ ममाहमिति मतिं हित्वा धास्ये ॥३५॥ मुक्तं सर्वमनुबंधनं बंधनं येन तथा

तं विप्रं मृत्योरमूमुचन् मोचयामासुः ॥१९॥ प्रत्युदिताः निराकृताः सन्तः यात्वा गत्वा यमराजाय यथावत्कथयामासुः ॥२१॥ दर्शनेनोत्सवो यस्य ॥ विवक्षुं वक्तुमिच्छुं तं ज्ञात्वा ॥२३॥ त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं ॥ कृष्णदूतानां च भागवतं भगवत्प्राप्तिनिष्ठं शुद्धं निर्गुणं धर्मं समाकर्ण्येति योज्यं भक्तिमानासीदित्यनुवर

शुक उ० ॥ त एवं सुविनिर्णीय धर्मं भागवतं नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥२०॥ इति प्रत्युदिता याम्या दूता यात्वा यमान्तिके ॥ यमराज्ञे यथा सर्वमाचचक्षुररिंदम ॥२१॥ द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववंदे शिरसा विष्णोः किंकरान्दर्शनोत्सवः ॥२२॥ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेनघाः ॥२३॥ अथाजामिलश्चाकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं ॥२४॥ भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महानासीत्स्मरतोशुभमात्मनः ॥२५॥ अहो मे परमं कष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥२६॥ धिग्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलं ॥ हित्वा बालां सतीं योहं सुरापामसतीमगां ॥२७॥ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ ॥ अहो मयाधुना त्यक्तावकृतज्ञेन नीचवत् ॥२८॥ सोहं व्यक्तं पतिष्यामि नरके भृशदारुणे ॥ धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः ॥२९॥ ॥

स्यानुबंधः ॥२५॥ अनुतापं प्रपंचयति अहो इति चतुर्भिः ॥ येनात्मना मया वृषल्यां पुत्ररूपेण जायमानेन ॥ ब्रह्म ब्राह्मण्यं जातिः विप्लावितं नाशितं ॥२६॥ दुष्कृतं दोषकर्तारं कुलस्य कज्जलं कलंकं ॥२७॥ नान्यो बंधुः पुत्रादिर्ययोः तपस्विनौ संतप्तौ ॥ अधुना तत्क्षणमेव ॥२८॥ ॥

नन्वयं पुत्रनामाग्रहीत् ॥ न तु भगवन्नाम ॥ तत्राह ॥ सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनेति सावज्ञमपि च वैकुंठनामोच्चारणं ॥१४॥ ननु नायं संकल्पपूर्वकं वैकुंठनामाग्रहीत् किंतु ॥ पुत्रस्नेहपरवशः सन् तत्राह ॥ पतित इति ॥ अवशेनापि यो हरिरित्याह ॥ स यातनां नार्हति पुमानित्यनेन तु नाम्न वर्णाश्रमादिनियमश्चोक्तः ॥ अवशत्वमेवाह पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नः भग्नगात्रः संदष्टः सर्पादिभिः ॥ तप्तो ज्वरादिना आहतो दंडादिना ॥१५॥ ननु महतः पापस्य महदेव प्रा

सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषाघहरं विदुः ॥१४॥ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥१५॥ गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥१६॥

यश्चित्तं युक्तं न तु स्वल्पं नामग्रहणमात्रम् ॥ पापतारतम्येन कृच्छ्रादितारतम्यवत् ॥ तत्राह द्वाभ्यां ॥ गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनीति तारतम्यं ज्ञात्वा ॥ मन्वादिभिरुक्तानि यतस्तत्र यथैव व्यवस्था हरिनामस्तुते यथा व्यवस्थोक्ता ॥ श्रुतेत सर्वपातकेभ्य इति वचनात् ॥ न च गुरुपापानां बिंडपानेन महापातकत्वं स्मरणवन्नामसत्त्या प्रायश्चित्तत्वं स्मरणस्याप्यतिभारः ॥१६॥ ॥

किंच तैस्तपोदानादिभिस्तान्यघानि पूयंते नश्यंति ॥ अधर्मजं तन्मलिनं तु तस्य पापकर्तुर्हृदयं ॥ य
ज्ञानेयात्मघानां हृदयं स्वरूपं संस्कारास्तेन शुध्यति ॥ तदपीशांघ्रिसेवया कीर्तनादिना शुध्यतीत्य
र्थः ॥ अयंभावः ॥ महांत्यपि पापानि सकृदुच्चारितेनैव नाम्ना नश्यंति सकृत्प्रवर्तितेन दीपेनेव गा
ढांधकाराः ॥ तदाह्यमात्तपापानि रस्मात्तु न्यायिः ॥ दीपधारणाद्येव तमोंतरस्य ॥ ततश्च वासनात्त्वया
हृदयशुद्धिः ॥ एतदर्थमेव तत्र तत्राहृतिविधाने ॥ पापक्षयश्च भवति स्मरतां तमहर्निशमित्यादि
षु नदेवाचाप्युक्तं गुणानुवादः खलु सत्वभावनः ॥ तदपीशांघ्रिसेवयेति च ॥ अतोस्मदुरितान्येव ॥

तैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥ १६ ॥
अज्ञानादथवाज्ञानादुत्तमश्लोकनाम यत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥
१७ ॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतोप्यात्मगुणं कुर्यान्मंत्रोप्युदाहृतः ॥ १८ ॥

सर्वपापक्षयः वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति १६ तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा
नोच्चारितमिति चेत्तत्राह ॥ अज्ञानादिति बालकेनाज्ञानादपि प्रक्षिप्तोग्निर्यथा काष्ठराशिं दहति तद्व
त् १७ नन्वेवमपि पर्षदनुपदिष्टं श्रद्धाहीनं च कथं प्रायश्चित्तं स्यात् तत्राह ॥ यथेति अगदमौष
धं वीर्यवदुत्तममिति वक्तव्ये वीर्यतममित्युक्तं यदृच्छया श्रद्धादिहीनमुपयुक्तं भक्षितं यथेन्मावादं
ज्ञानतोपि स्वगुणमारोग्यं कुर्यात् मंत्रो नामात्मकस्तथा स्वकार्यं कुर्यादेव तद्वस्तुशक्तिः श्रद्धादि

स्मृतः अतिशुद्धानामपि ... वरिष्णवकः ॥ १८ ॥

भा० ष० ४

श्री भा° ६

ननु यदि केवलत्वात्प्रतीयते । तर्हि सर्वनामत्वं विश्वरूपत्वं वानुपपन्नं वागाद्यगोचरत्वादित्याशंक्य सर्वैर्नामभिर्वाच्यं प्रपञ्चादिरूपं च तत्स्वरूपं वस्तुतो मा भूत् । तथाभिप्रायं याचक्षत इति श्लोकत्रयेणोपपादयन्नमस्करोति । यद्यदिति । यद्यद्वचसा निरुक्तं अभिहितं धिया निरूपितमवसितं । अक्षभिर्वा इन्द्रियैर्निरूपितं । गृहीतं उतापि मनसा परिनिरूपितं संकल्पितं । यस्य प्रकाशात्तत्तस्य तत्स्वरूपं मा भूत् । स्वरूपत्वाभावे हेतुः । हि यस्मात्तत्तद्गुणानामेव रूपं । पाठांतरे गुणैर्वर्धितं । स तु गुणानामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा चेतनाधिष्ठानं विना । तयोरसंभवात् । यद्वा । यस्य स्वरूपं मा भूत्त्वं भवति । तस्मै नम इति वक्ष्यमाणेनान्वयः ॥ २९ ॥ तदेवं वस्तुतो गुणस्वरूपत्वाभावमंगीकृत्य सर्वनिरुक्तात्मशक्तित्वेनत्योतिते

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसोत यस्य । मा भूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणा-
पायविसर्गलक्षणः ॥ २९ ॥ यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च । परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं ॥ ३० ॥

नधिकरणेन यतो पादानात् येन करणेन यस्य संबंधि । यस्मै संप्रदानाय । यदीप्सितं कर्म यः कर्ता कुरुते स्वयं । कार्यते चान्येन प्रयोज्यकर्ता तद्ब्रह्मेति प्रत्येकं संबंधः । अत्र च सप्तभिर्विभक्तिभिः सप्त विभक्त्यर्था दर्शिताः । यथेति च क्रियाकारकसंबंधप्रकारवाचिनामव्ययानामर्थः । कुरुते कार्यते चेति । स्वार्थे परार्थे क्रियाद्वयं सर्वेषां दर्शितं । चशब्देन भावकर्मादिविहितप्रत्ययार्थाः संगृहीताः । तद्ब्रह्मैवेति कुतस्तत्राह । तदेव तेषां कारणं । तत्कुतः । सर्वेभ्यः प्राक्प्रसिद्धं । ननु ब्रह्मादयस्तद्धेतवः श्रूयते स्ववरेच ह्युपपते । तत्कथं ब्रह्मैव तद्धेतुः तत्राह । परेषामवरेषां च हेतूनां परमकारणं । ननु सर्वेका

ग्रहस्थामनसमुक्तास्वप्रकाशत्वमाह ॥ यदामनस उपरामः समाधिः ततः सुषुप्तौ विलयः ॥ न च तत्राप्य स्वप्नयोरिव विक्षेपः तदाह नामरूपे रूप्यते येन तत्तथा तस्य ॥ उपरमे हेतुः दृष्टं दर्शनं स्मृतिश्च ॥ तयोः संप्रमोषान्नाशात् ॥ तदा यः ॥ केवलेन स्वरूपज्ञानेन प्रतीयते इत्यपेक्षायामाह ॥ मनीषिण इति द्वाभ्यां विवेकिनो यं निष्कर्षंति ॥ विविच्य ध्यायंति ॥ स निर्वाणसुखानुभूतिर्मम प्रसीदतामिति द्वयोरन्वयः ॥ एवं निष्कर्षतोऽपतीयत इति भावः ॥ किमिति निष्कर्षंति स्वशक्तिभिः स्वप्रकाशमानं ॥ कातिभिर्नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः ॥ सप्तविंशत्युपाधिभिरस्पृष्टं स्वविंशं निकर्षंतीत्यर्थः ॥ यद्वा नवभिः प्र

यदोपरामो मनसो नामरूपरूपस्य दृष्टिस्मृतिसंप्रमोषात् ॥ य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥ २६ ॥ मनीषिणोंतर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ॥ वह्निं यथा दारुणि पांचदश्यं मनीषया निष्कर्षंति गूढं ॥ २७ ॥ स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८

कृतिपुरुषमहदहंकारपंचतन्मात्ररूपाभिः त्रिवृद्भिः त्रिगुणात्मिकाभिः ॥ चकारात्षोडशविकाररूपाभिश्च कथंभूतं निष्कर्षंति ॥ मनीषया तर्हृदि संनिवेशितं निश्चलीकृतं पांचदश्यं ॥ पंचदशसामिधेनीमंत्रैः ॥ प्रकाश्यं ॥ अलौकिकं वह्निमिवाहंकारास्पदात्मनोऽपरमात्मानं निष्कर्षंतीत्यर्थः ॥ २७ ॥ अशेषविशेषायस्याः ॥ तस्या मायायाः निषेधेन ॥ निर्वाणसुखानुभूतिर्यस्य ॥ स सर्वनिषेधासंभवात् ॥ प्रसक्तिमाह स एव सर्वनामा स एव विश्वरूप इति ॥ तद्रूपत्वेपि वास्तवत्वाभावान्निषेधः

प्रजानां प्रजापतिरेव बंधुरत स्तज्जीविकानाशो न कर्त्तव्य इति श्लिष्टं तं पंचके नाह ॥ लोकानां बालकानां मा
तापितरौ यज्ञानां ज्ञानदो बुधप एव सुहृत् ॥१२॥ ईश्वराधिष्ठानत्वाच्च भक्तप्रादोनयुक्तं श्रुत्वा स ॥ यत इदं देहेषिति ॥ वः
शुश्रूषाभिः ॥१३॥ आकाशादेहेऽसमुत्पत्तित्वे आकस्मिकमित्यर्थः ॥ आत्मविचारेणायोनियज्ञेन ॥१४॥ किलानां
दोषाणां वः शुभाकांच शिवमस्तु ॥ ब्रूत रत्नार्थं नदीयां कन्यां ददाति ॥ वार्क्षी वृक्षैः पालिता ॥१५॥ आसम्य

लोकानां पितरौ वंधुरीशः पत्न्यास्त्रियः पतिः ॥ प्रतिप्रजानामपि त्वं गदसज्जानां बुधः सुहृत् ॥१२॥
यत इदं देहेषु भजानां सामान्यालोहृदिरीश्वरः ॥ सर्वतद्विस्मयमीदृशं धर्मेवं वस्तोषितो यस्मै ॥१३॥ यः समुत्प
तितं देहं आकाशान्मनुस्वलक्षणं ॥ आत्मजिज्ञासया यज्ञेन स्वगुणानतिवर्तते ॥१४॥ अलंदायैर्द्रुमै
र्दीनैः किलानाशिवमस्तु वः ॥ वार्क्षीयं वो वराकन्या पत्नीत्वे प्रतिगृह्यतां ॥१५॥ इत्यामंत्र्य वरांस्त
ां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे ॥१६॥ तेभ्यस्तस्यां समभव
द्दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥१७॥ यथा ससर्ज भूतानि
दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः शृणु ॥१८॥ मनसैवासृजत्पूर्वं
प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभःस्थलजलौकसः ॥१९॥ तमबृंहितमालोक्य
प्रजासर्गं प्रजापतिः ॥ विंध्यपादानुपव्रज्य सोचरद्दुष्करं तपः ॥२०॥ तत्राघमर्षणं नाम तीर्थं
पापहरं परं ॥ उपस्पृश्यानुसवनं तपसा तोषयद्धरिं ॥२१॥ अस्तौषीद्धंसगुह्येन भगवंतमधोक्ष
सांत्वयित्वाप्सरसीमप्सरसः प्रम्लोचाजं तुभ्यं ददमि थाप्यामि कस्यात्म्यघ्नतो हरेः ॥२२॥
ष्याः ह्मृता ॥१२॥ दुहितृवत्सल इति तस्य कन्यावं प्राय वेत्तुकं समम नः ॥१८॥ प्रजापतिर्दक्षः ॥१९॥ अ
बृंहितं असंवृद्धं विंध्यस्य पादान् सन्निहितपर्वतान् ॥२०॥ हंसगुह्याख्येन स्तोत्रेण ॥ कस्य दक्षस्य

CC-0 Shri Krishna Museum. An eGangotri-Vedic Bharat Inititative

श्री
भा॰ष
२५

परायसर्वोत्तमाय नमो दधे नमनं करोमि ॥ एषु हेतुः अवितथा ॥ अनुभूतिः चिच्छक्तिर्यस्य अतो गुणत्रयाभासो जीवः ॥ तन्निमित्तं माया च ॥ तयोर्बंधवे नियंत्रे ॥ एवमपि गुणेषु तत्वबुद्धिर्येषां तैर्जीवैरदृष्टं धाम स्वरूपं यस्य ॥ तत्र हेतुः निवृत्तमानं यस्मात् ॥ पाठांतरे निवृत्तमानमवधिः प्रमा यस्मात् ॥ ननु तर्हि कथं तत्सिद्धिस्तत्राह ॥ स्वयंभुवे स्वप्रकाशाय ॥ २३ ॥ अदृष्टधामत्वं दर्शयन्नाह ॥ नेति ॥ पुरुषः सखा जीवः अस्मिन्पुरे देहे वसन्नपि ॥ तत्रैव संवसतः सांख्यकरणप्रवर्तकत्वादिकं नावैति न जानाति ॥ नत्से ऊतःख्य

प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे ॥ २३ ॥ न यस्य सख्यं पुरुषो वैति सख्युः सखा वसन्संवसतः पुरेस्मिन् ॥ २४ ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥ देहोसवोक्षा मनवो भूतमात्रानात्मानमन्यं च विदुः परं यत् ॥ सर्वंपुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ २५ ॥

तदृष्टेः प्रपंचद्रष्टुर्नेदि द्रष्टृरूपो भवतीति ॥ प्रथमांतपाठे व्यक्ते प्रपंच एव दृष्टिर्यस्य सः ॥ गुणो विषयो गुणिनो विषयिणः ॥ इंद्रियादेः स्वप्रकाशकत्वं यथा नावैति ॥ २४ ॥ ननु गुणो जडत्वान्न जानाति ॥ जीवस्तु चेतनात्मकः किमिति न जानातीत्यत आह देह इति ॥ देहः असवः प्राणाः अक्षाणींद्रियाणि मनवः अंतःकरणानि भूतानि च ॥ मात्राश्च तन्मात्राणि ॥ आत्मानं स्वरूपं स्वरूपं ॥ अन्यं इंद्रियवर्गं ॥ तयोः परं देवतावर्गं च न विदुः ॥ पुमान् जीवस्तु सर्वमेतत्त्रयं वेद ॥ गुणांश्च तन्मूलभूतान्वेद ॥ तज्ज्ञोपि सन् ॥ यः सर्वज्ञं न वेद तम

६
श्रीधरी
२५

एतदुपपादयति ॥ कर्मणोस्त्रिपक्षयोर्मधुलेढि आस्वादयतीति तथा मधुलिहतानितिचितेन विसृष्टायै मायया गुण
विषयास्तेषु पुनर्नैर मते ॥ अन्यस्तु तत्त्वमधास्याद्रदति तः ॥ अत एव कामाभिभूतः सन् ॥ आत्मनो रजः पाप धर्मा ष
मपि कर्मैव प्रायश्चित्तरूपमीहते यतः कर्मणः पुनरपि रजः पापस्यादेव कुंजरशौचवत् ॥ सत्त्व एवाथ कर्त्ता
भावात् ॥ २३ ॥ नैवं विस्मितधियो बभूवुः किं तु समनुक्तमिममेवमेतिरे ॥ ततः प्रभृति प्रशोकमानाः अस्मान्ने
वैष्णवादिति शंकावदनः तद्दृष्टमपि बिभ्यति स्म ॥ पाठान्तरेण विस्मितधियो जाताः ॥ ते च ततः प्रभृति बिभ्य

कुर्मणा त्रिपक्षमधुलिट् पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ॥ अस्य स्तुकामस्य नत आत्मरजः प्र
मार्ष्टुमीहेत कर्मयतते परं जः पुनः स्यात् ॥ २३ ॥ इत्थं चमरे गदितं भगवन्महिम्नं स्मृत्य विस्मितधि
यो यमकिंकरास्ते ॥ नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ॥ २४
इतिहासमिमं गुह्यं भगवान् कुम्भसंभवः ॥ कथयामास मलय आसीनो हरिमर्चयन् ॥ २५ ॥ इति श्री
षष्ठस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ राजोवाच ॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ॥ सामासि

तिस्मेत्यर्थः ॥ २४ ॥ कुंभसंभवोऽगस्त्यो मलयप (कस्त्वया प्रोक्तो यस्तु स्वायंभुवान्तरे ॥ १ ॥
र्वते आसीनः वशीर्हरिमर्चयन् ॥ पुनः पुनर्विस्तारार्थं हरेः पादोऽस्य शान्तिसर्गः ॥ २६ ॥ इति षष्ठे तृतीयः
चतुर्थादि विंशतिश्लोकसिद्धरूपजन्मविवृत्या ॥ प्रचेतः सुतदक्षस्य वंशालावत्र तन्यते ॥ १ ॥ चतुर्थे तु प्रजासृष्ट्यै दः
तेनाराधनं हरेः ॥ तपसा दक्षहंसगुह्याख्यस्तोत्रेण च निरूप्यते ॥ २ ॥ प्रसक्तानुप्रसक्तेन स्वायंभुवसुतान्वये ॥ ते
षां प्रभावमाकर्ण्य वंशं व्याससंबुभुत्सते ॥ देवासुरेति श्लोकाभ्याम्
मासिकः संक्षिप्तो यः प्रोक्तः तृतीयस्कन्धे ॥ १ ॥

श्री. भा. ष. ६

ख्यासंविस्तारं तेनत्रः ॥ यथा शक्त्या यथा ससर्ज ॥ तां शक्तिं ॥ तं च प्रकारं ज्ञातुमिच्छामि ॥ अनुसर्गमनुवृत्तं स-
र्गं ॥ २ ॥ दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह ॥ यदेति ॥ प्राचीनबर्हिषः पुत्रा यदा समुद्रादुन्म-
ग्ना निर्गताः ॥ तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः नारदोपदेशात ॥ प्राचीनबर्हिषो निवृत्त्या अराजके सति कृष्या-

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः ॥ ३ ॥ सूत उवा-
च इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमाः ॥ ४ ॥ श्रीशु-
क उवाच ॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ॥ अंतः समुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां ॥ ५ ॥ द्रु-
मेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ६ ॥ ताभ्यां
निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥ ७ ॥ मा द्रु-
मेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ८ ॥ अ-
हो प्रजापतिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ९ ॥ अन्नं
चराणामचरा ह्यपदः पादचारिणां ॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ १० ॥ यूयं च
पित्रान्वादिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ ११ ॥ आति-
ष्ठत सतां मार्गं कोपं यच्छत दीपितं ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ १२ ॥

द्यभावात ॥ ४ ॥ तपसा दीपितो मन्युर्येषां ते ॥ तेषां द्रुमाणां दग्धुमिच्छया ॥ ५ ॥ ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तानु-
द्रुमान् ॥ वनस्पतीनां राजा सोम उवाच मा द्रुमेभ्य इति नवभिः ॥ ६ ॥ हे महाभागाः विवर्धयिषवो वर्धयितुमिच्छ-
वः ॥ ७ ॥ प्रजापतीनां तदृश ... भोज्यदानेनानुचिन्त्य आह अहो इति त्रिभिः ॥ ऊर्जं भक्ष्यं इषं अन्नं ॥ ८ ॥ १०

भा॰
ष॰
११

संयमयतीति तथा ॥११॥ मत्तोन्यो जगतः तस्थुषश्च परोधीश्वरोस्ति । अहं तु अंशमात्रमेव तत्रापि नृणामेव तत्रापि पापिनामेव तत्किंकराः सन्तः ईश्वरः सतः सर्वेश्वरः कोसौ । यत्र यस्मिन् विश्वमोतं प्रोतं च ऊर्ध्वं तिर्यक् तंतुषु पटवत् । यस्यांशेभ्यो विरिंच्यादिभ्योस्य स्थित्यादयो भवंति । यस्य च वशे लोको वर्तते नसि काष्ठाप्रोत बलीवर्दवत् ॥१२॥ एतत्प्रपंचयति । वाक्सामादिनामभिर्वाचायां निजायां तंत्यां दाम्न्या जनं यो बध्ना-

श्रीबादरायणिरुवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः । प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः ॥११॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं । यदंशतोस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥१२॥ यो नामभिर्वाचि जनं निजायां बध्नाति तंत्र्यामिव दामभिर्गाः । यस्मै बलिं त इमे नामकर्मनिबंधबद्धाश्चकिता वहंति ॥१३॥ अहं महेंद्रो निरृतिः प्रचेताः सोमोग्निरीशः पवनो विरिंचिः । आदित्यविश्वे वसवोथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥१४॥ अन्ये च ये विश्वसृजोमरेशा भृग्वादयोस्पृष्टरजस्तमस्काः । यस्येहितं न विदुः स्पृष्टमायाः सत्वप्रधाना अपि किं ततोन्ये ॥१५॥

ति दामभिर्गाः बलीवर्दानिव । त इमे जीवाः । नामकर्मभिर्निबंधैर्बद्धाः । यस्मै बलिं वहंति यदर्थीनाः इति कर्म कुर्वंतीत्यर्थः ॥१३॥ यस्य चलीलादुर्विभाव्यत्वमाह अहमिति द्वाभ्यां । न स्पृष्टं रजस्तमश्च यैः ईहितं चेष्टितं । वा न विदुः स्पृष्टमायाः मायया स्पृष्टाः ततस्तेभ्योन्ये न विदुरिति किं पुनर्वक्तव्यं ॥१५॥ ॥ ॥

११

संतु बहवः कोवायमत्राहुः ॥ यदीति मृत्युर्दुःखं अमृतं सुखं ॥ तेषां विप्रतिपत्तौ ते उभे कस्य स्यातां ॥ न कस्यापि
परस्परविरोधेनोभयोरपि प्रतिबंधात् ॥ ऐकमत्ये त्वेकस्यैव न स्यातां ॥ एकः स्वीकर्तुमिच्छति द्वितीयस्त्वन्यः
ऐकमत्येवतयोः परस्परकार्यानुमोदनेनोभयोरपि प्राप्तेः कस्य वा ते उभे अपि न स्यातामित्यर्थः ॥ ४ ॥ ननु ब
हूनां कर्मिणामवस्थया बहवः शास्तारो भवंतु तथा सति नायं दोषः स्यात्तत्राहुः बहूनां कर्मिणामव
स्थया ॥ शास्तृबहुत्वे शास्तृत्वं स्यात् ॥ वदेति ॥ किंतु तदायत्तं विशास्तृत्वमिष्टमयं शास्तृत्वेन ॥ न ह्येकदेशे उ

यदि स्युर्बहवो लोके शास्तारो दंडधारिणः ॥ कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ॥ ५ ॥ किं
तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणां ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्तिनां ॥ ६ ॥ अतस्त्व
मेको भूतानां सेश्वराणामधीश्वरः ॥ शास्ता दंडधरो नृणां शुभाशुभविवेचनः ॥ ७ ॥ तस्य ते विहि
तो दंडो न लोके वर्ततेधुना ॥ चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ॥ ८ ॥ नीयमानं तवादेशाद
स्माभिर्यातनागृहात् ॥ व्यमोचयन्पातकिनं छित्वा पाशान्प्रसह्य ते ॥ ९ ॥ तांस्ते वेदितुमिच्छामो य
दि नो मन्यसे क्षमं ॥ नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतम् ॥ १० ॥ ॥

पचारमात्रमेव स्यात् ॥ यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं । मंडलवर्तिनामुपचारमात्रमिति क्लृप्ताभावा
त् ॥ ६ ॥ यस्मादेवं शास्तृबहुत्वं न घटते ॥ अतस्त्वमेक एव शास्ता शुभाशुभे विविनक्तीति तथा ॥ ७ ॥ विप्रलं
भिता वंचिता लुप्तेत्यर्थः ॥ ८ ॥ तदेवाहुः नीयमानमिति ॥ ९ ॥ तत्र ॥ यदि नोस्माकं क्षमं हितं मन्यसे त्व
या श्रुत्वा न तत्सदवधानेन वाप्यनर्थं स्यात् ॥ अतः केषांचिदितेषां प्रभावः ॥ यतो नारायणेति केवल
मभिहिते मा भयं कुर्वित्ति वदंतः शीघ्रमागताः ॥ १० ॥ ॥

श्री
भा०ष०
१८

विश्वसृष्ट्यर्थं तत्तपसा दृष्टो तरसंस्तुतः तदेव तपः स्तुवन् ॥ प्रसंगादन्यान्यपि हृदिकाणि विद्यादीनि स्तौति ॥ तपः यस्मादिदं सदितं ध्यानं मे हृदयं विद्या सारा मंत्रजपः साध्यानेन तनोतीति तनुर्देहः ॥ क्रिया ध्यानादिविषयः ७ व्यापारो भावनाख्यः सा च वाच्यः ॥ तेन हि ध्यानादिकमा क्रियते इत्याकृतिः जाताः ॥ सुनिष्पन्नाः क्रतवो यागानि ॥ शिरो वापः तद्यथा वर्षाः ॥ उपमदर्श्यन्तुषी आत्मभागा विस्यादिस्थातः धर्मः कलाघपर्वः ॥ आत्मामनः हृदयास्त्रवत्वात्

तपोमेहृदयंब्रह्मंस्तनुर्विद्याक्रियाकृतिः ॥ अंगानिक्रतवोजाताधर्मआत्मासवःसुराः ॥ ४६ ॥
अहमेवासमेवाग्रेनान्यत्किंचांतरंबहिः ॥ संज्ञानमात्रमव्यक्तंप्रसुप्तमिवविश्वतः ॥ ४७ ॥ म
य्यनंतगुणेनंतेगुणतोगुणविग्रहः ॥ यदासीत्तपवाद्यः स्वयंभूः समभूदजः ॥ ४८ ॥ सवै
यदामहादेवोममवीर्योपबृंहितः ॥ मेनेखिलमिवात्मानमुद्यतः स्वर्गकर्मणि ॥ ४९ ॥ अ
थमेभिहितोदेवस्तपोतप्यतदारुणं ॥ सचविश्वसृजोयुष्मान्येनादावसृजद्विभुः ॥ ५० ॥

सुरा यतस्म्भूजस्तपवश्रवः प्राणाः संतर्पणीयत्वात् ॥ ४६ ॥ तपसः संतानवृद्धिहेतुत्वं दर्शयितुं द्वितीयतृतीयोक्तमिति द्वासमाह चतुर्भिः ॥ अहमेवेति वस्तंतरस्याभाव इति ॥ आसमेवेति वस्तुतरस्याभाव इति ॥ आसमेवेति क्रियांतरस्याभाव इति ॥ अग्रे अंतरं ग्राहकं बहिर्ग्राह्यं ॥ संज्ञानमात्रं चैतन्यमात्रं ॥ अव्यक्तं ॥ इंद्रियवृत्तिभिरनभिव्यक्तं ॥ अत एव प्रसुप्तमिव विश्वतः सर्वत्र ॥ ४७ ॥ गुणतः मायातः गुणमयो विग्रहो ब्रह्माण्डं ॥ ततः तदेव अजः अयोनिजः ॥ ४८ ॥ खिलमसमर्थमिव ॥ ४९ ॥ मे मया तपप्येति अभिहितः सन् येन तपसा ॥ ५० ॥

त्रैलोक्यमोहनं श्रीपुरुषोत्तममाख्यं ॥ स्तूयमानं स्वयं लोकपालैः ॥ ३९ ॥ आश्रित्य विनानि मनो द्वाराणीन्द्रियाणि तैः ॥ य
थाहृदिस्थोऽज्ञयोनिरुके राष्ट्रं यतेतया महानंदापूर्णत्वेनानिकतां द्वारेणादीशानां न किंचिदकं क्षोभः दिम
धः ॥ ४० ॥ यद्यप्यसौ नावोचन्न यापि विनतस्तु त्वंस्तमारणमाह ॥ ४२ ॥ भावभक्तिंगतः प्राञ्जः ॥ ४३ ॥ यद्यतः ते

त्रैलोक्यमोहनं रूपं विभ्रत्त्रिभुवनेश्वरः ॥ वृतो नारदनंदाद्यैः पार्षदैः स्तूयमानैः ॥ स्तूयमानो नु
गायद्भिः सिद्धगन्धर्वचारणैः ॥ ३९ ॥ रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ॥ ननाम दण्डवद्भूमौ प्रहृ
ष्टात्मा प्रजापतिः ॥ ४० ॥ न किंचनोदीरयितुमशकत्तीव्रया मुदा ॥ आपूरितमनोद्वारैर्ह्रदिन्य
इव निर्झरैः ॥ ४१ ॥ तं तथावनतं भक्तं प्रजाकामं प्रजापतिं ॥ चित्तज्ञः सर्वभूतानामिदमाह ज
नार्दनः ॥ ४२ ॥ श्रीभगवानुवाच ॥ प्राचेतस महाभाग संसिद्धस्तपसा भवान् ॥ यच्छ्रद्धया म
त्परया मयि भावं परं गतः ॥ ४३ ॥ प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः ॥ ममैष कामो भूता
नां यद्भूयासुर्विभूतयः ॥ ४४ ॥ ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ॥ विभूतयो मम ह्येता
भूतानां भूतिहेतवः ॥ ४५ ॥

तपः ॥ ब्रह्मन्विश्वमसौ उद्दिष्टं दर्णाद्ध्यदिकरमतस्तेहं प्रीतः ॥ मत्तपसो लोकसमृद्ध्यर्थं त्वेन तन्यतीतेः किंकार
णं तवाहमस्मीति ॥ भूतानां विभूतयः समृद्ध्येयामयाभविवेतिपत्न ॥ यत एष एव मम कामः ॥ अनोम
त्कामपूरणाद्देवाहं प्रीतोऽस्मीत्यर्थः ॥ ४४ ॥ भूतविस्तारश्चयत्नश्च तवोचितएवे
त्याह ॥ ब्रह्मेति ॥ भवन्तः प्रजापतयः भूतेन्न
द्भवस्यहेतवः ॥ ४५ ॥ ॥

यज्ञो वीर्यं स्वर्गादिफलजननता यस्य सामर्थ्यं यस्य तस्मै नमः॥ वयसे उत॥ तत्फलपरिच्छेदकालात्मनेपि॥ तद्विबा
तकेष्वस्तं प्रतिहतं चक्रं येन॥ एवंभूतैः प्रभावैः सुपुरुहूतये शोभनबहुनाम्ने॥ ३८॥ ननु मम गुणातीतस्य रू
पं विहाय गुणोपाधिकं यज्ञवीर्यत्वादिकिमिति वर्णयत इत्यत आहुः॥ यत्र न गुणा यस्य स्थितिर्नियंतृत्वं त्रिगुणात्मि
कानां तिसृणां गतीनां परमं पदं निर्गुणं स्वरूपं तद्वत् विसर्गस्यार्वाचीनः॥ इदानींतनः हे धातः वेदितुं नार्ह
ति अतः केवलं॥ तस्मै ते नमोस्तु॥ ३९॥ मिलित्वा सगुणोपाधियानि नमीयंते हरेर्गुणाः इति॥ पद्येरत्र यंतः स
यामा येन तत्त्वहशुः भक्त्युद्रेकेण बहुधा संबोधयंतो ऽर्हतैय तत्प्रपंचयंति भगवन्नित्यादिना॥ परमं मंगलं

देवा ऊचुः॥ नमस्ते यज्ञवीर्याय वयसे उत ते नमः॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये॥ ३८॥ यत्ते
गतीनां तिसृणामीशितुः परमं पदं॥ नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति॥ ३९॥ नमस्तेस्तु भ
गवन्नारायण वासुदेवादिपुरुष महापुरुष॥ महानुभाव परममंगल परमकल्याण परम
कारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमे
णात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽ
पावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान्॥ दुरवबोध इव तवायं विहारयोगो
यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय॥ आत्मनैवाविक्रियमाणेन सगुणमगुणः सृ

पुरुहो धर्मो यस्मिन्॥ आत्मयोगेनात्मध्यानेन यः समाधिः चित्तैकाग्र्यं तेन परिभावितः सम्यक्शीलितः परि
स्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेन उद्घाटितं तमोरूपं कपाटं यस्मिंस्तस्मिंश्चित्ते॥ द्वारभूते चित्ते अ
पावृते प्रकटे आत्मलोके स्वरूपे स्वयमेवोपलब्धं स्वभिव्यक्तं॥ यन्निजं सुखं तदनुभवरूपो भवा
न्॥ ॥ ननु केवलानुभवरूपस्य मम सृष्ट्यादिकर्तृत्वं कथं तत्राहुः॥ दुरवबोध इव तवायं विहारयोगः क्री

किंच। वयं भवते च सृष्टाः पालिताश्च वकुशः अतस्तमेव शरणं व्रजामेत्याहुः। य एक इति त्रिभिः। येनानु
गृहीताः संतो विश्वं सृजाम तन्तु स्वयमेव सृष्टारः। नान्यो युष्माकमनुग्राहकोऽस्ति। तस्माद्दर्शनान्नत्याहुः
अस्मत्तः पुरः पूर्वमेवान्तर्यामितया समीहमानस्यापि यस्य लिंगं रूपं न पश्यामः। तत्र हेतुः। पृथगीश
मानिनः ॥२५॥ देवादिषु उपेन्द्र परशुराम मत्स्य राम आदि तनुभिः कृतावतारः सन् आत्म
सात्कृत्वा पाति च ॥२६॥ आत्मभूतं देवतं कुतो विश्वं विश्वात्मकं। तथापि विकारं वारयति। अन्यं विश्वात्म

य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं। वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगीशमानिनः ॥२५॥ यो नः सपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषु नित्य एव। कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥२६॥ तमेव देवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यं। व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥२७॥ श्रीशुक उ०। इति तेषां महाराज सुराणामुपतिष्ठतां। प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः ॥२८॥ आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ। पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं ॥२९॥ दृष्ट्वा तमवनौ सर्व ईक्षणाह्लादविक्लवाः। दंडवत्पतिता राजञ्छनैरुत्थाय तुष्टुवुः ॥३०॥

कस्ते हेतुः परं कारणं न तु प्रधानं। पुरुषश्च विश्वस्य कारणं तत्राहुः प्रधानं पुरुषं। तदात्मकोऽपि स
एवेत्यर्थः। स एव नः शं विधास्यति ॥२७॥ प्रतीच्यां दिशि हृदि स्वयममाविरभूत्। पुनश्च तं पुरो दृष्ट्वा ई
क्षणाह्लादेन विवशा अवनौ दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुरित्यन्वयः ॥२८॥ कथंभूतं श्रीव
त्सकौस्तुभौ विना आत्मतुल्यैः षोडशभिः सुनंदादिभिः पार्षदैः सेवितं। उन्निद्रशरदंबुरुहवदीक्षणे यस्य

इत्येवमनंतरमाह ॥ अयतत्रेति ॥ ययेदं देवदत्तोरव्यादिनिमीय ॥ तत्र सुकृतस्य शुभाशुभयोः फलमुपादत्ते
एवं भवान् ॥ अयमस्वरूपोजीवस्वरूपेण गुणविसर्गोपतितः ॥ सम्युपादत्ताति ॥ रागद्वेषसमंजसस्वप्रभृतं दर्शनं
विछत्तियस्य सचानुद्गमेउदासीनः साक्षितयावर्ततइति ॥ ३ ॥ तदेवं विरोधेनद्वैत्येयत्नमुक्ता तत्परिहारेण
ज्ञानप्रकारमाह ॥ नहीति ॥ विरुध्यतइतिविरोधः ॥ उभयंतद्विरुद्धमित्यर्थः ॥ नयन्त्यहष्टांते ॥ ननुयथविक
ल्पोपुरुषते ॥ अतर्कैश्वर्यत्वादित्याह ॥ भगवतीति ॥ अपरिमिताशुणगणाय स्यतस्मिन् ॥ ईश्वरेस्वतंत्रे ॥ नन्व
वगासमनर्के ॥ माहात्म्ययस्यतस्मिन् ॥ विकल्पएवंवापवंवेतिवितर्कः ॥ किमत्रयुक्तमिति ॥ विचारइत्यमे

अयतत्रभवान्किं देवदत्तवदिह गुणविसर्गपतितः ॥ पापलेपेनस्वकृतकुशलाकुशलंफलमु
पादत्ताति ॥ अहोस्विदात्मारामः उपशमशीलः समंजसदर्शनउदास्तइतिहवाव न विदाम ॥ ३ ॥ न
हिविरोधउभयंभगवत्यपरिगणितगुणगणईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्क
विचारप्रमाणाभासकुतर्कशास्त्रकलिलांतःकरणाश्रयदुरवग्रहवादिनांविवादानवसरेउप
रतसमस्तमायामयेकेवलएवात्ममायामंतर्धायकोन्वर्थोदुर्घटइवभवतिस्वरूपद्वयाभावात् ॥ ४ ॥
समविषममतीनांमतमनुसरसियथारज्जुखंडः सर्पादिधियाम् ॥ ५ ॥ वेति तत्रप्रमाणमाहन्नः
ग्राहकाः अनेकांश्चार्वाचीनानवलस्वरूपा ॥ समस्तीनांये विकल्पादयस्तैर्धर्मग्राहकैः कलिल
व्याकुलं ॥ अंतःकरणमाश्रयोयस्यदुरवग्रहस्यतेनवादिनांविवादस्यानवसरेःगोचरे ॥ ननुअज्ञामायम
तेन ॥ युक्तिकृत्यमतातत्राह ॥ उपरतोमायामयः ॥ संसारोयस्मिन् ॥ तस्मिन्केवलेप्यात्ममायांमध्येनि
धायकोन्वर्थः कार्यत्वादिनसंभवति ॥ यदिवस्ततःकार्यत्वादिभवेन्नहि विरोधः स्यात्तत्रनदृष्टी

श्री
भाग०
३३

तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाहुः ॥ स एव हि नानारूपेण प्रतीतः वस्तुस्वरूपः सद्रूपः सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैरुपलक्षितः ॥ ननु तर्हि जीव एवोपलभ्यते ॥ सर्वप्रत्यगात्मत्वात् ॥ सर्वजीवान्तर्यामित्वात् ॥ जडतादात्म्याध्यासेन जीवस्यापि जडप्रायत्वात् ॥ तेन विना प्रकाश इति भावः पर्यवशोषितः नेति नेतीत्यादिश्रुतिभिः ॥ ८ ॥ अतस्त्वद्भक्तिरेव परमपुरुषार्थ इत्याहुः ॥ अथ हेति ॥ पर्यावर्ते इत्यन्तेन ॥ यस्मादेवं भगवंस्त्वं परमेश्वरः ॥ अथ वाव ॥ अत एव हि देव मधुमथन ॥ परमभागवता एते त्वम

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः ॥ सर्वेश्वरः सकलजगत्कारणकारणभूतः ॥ सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षितः ॥ एक एव पर्यवशेषितः ॥ ८ ॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरं निर्वृतमनसः ॥ कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः ॥ साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति ॥ न यत्र पुनरयं संसारपर्यावर्तः ॥ ९ ॥

दांभोजानुसेवां कथं मुमुक्षुर्भजं विसृजंतीत्यन्वयः ॥ हि यस्मात्स्वार्थे पुरुषार्थे कुशलाः निपुणाः अत आत्मा त्वमेव प्रियः सुहृच्च येषां ते साधवो रागादिशून्याः तत्र हेतुः तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिंदुमात्रेण सकृदपि लीढया ॥ आस्वादितया स्वमनसि निःष्यंदमानं अतिशायेन स्रवत् निरंतरं सुखं तेन विस्मारिता दृष्टश्रुता विषयाः सुखलेशाभासा येषां ते ॥ अत एव भगवति त्वय्येकांतिनि नितरां रतं निर्वृतं च मनो येषां ते यत्र यस्यामनुसेवायां सत्यां ॥

मदात्मकं वर्म श्रीनारायणकवचं अधिगतः इति पूर्वस्यानुषंगः ॥ यद्यस्मात्त्वष्ट्रे प्रादात् ॥ किं तत् ॥ यत्त्वष्टा विश्वरूपाय पुत्राय प्रादात् ॥ कीदृशं यत् ॥ तं तत्तो विश्वरूपात् ॥ त्वम् अधाः धृतवानसि ॥ तदेवं विद्यया सारं गात्रं याचध्वमित्यर्थः ॥५२॥ ननु मेष्टं देहं कथं दास्यतीत आह ॥ युष्मभ्यमंगानि ॥ अस्थीनि याचितः सन् ॥ दास्यतीत्यन्वयः धर्मज्ञः ॥ विशेषतो ऽश्विभ्यां शिरोऽप्यश्वीत्या दास्यति ॥ अस्थीनीत्यतेन दत्तं यत् ॥ दर्शितं ॥ तैर् अस्थिभिः विश्वकर्मणा विनिर्मित आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः येन भवान् ॥ वृत्रस्य शिरो हर्ता हरि

दध्यंङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकं ॥ विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ॥५३॥ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोंऽगानि दास्यति ॥ ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः ॥ तस्मिन्विनिहते यूयं तेजोऽस्त्रायुधसंपदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ॥५४॥ इति श्रीभागवते षष्ठस्कंधे नवमोऽध्यायः ॥९॥ शुक उ० ॥ इंद्रमेवं समादिश्य भगवान्विश्वभावनः ॥ पश्यतामनिमिषाणां तत्रैवांतर्दधे हरिः ॥१॥

ष्यति ममतेजसा उपबृंहितास्त्वं ॥५४॥ तेजांस्यस्त्राण्यायुधानि च संपदश्च भूयः प्राप्स्यथ ॥ महाकाय ... मत्परांश्च केपि न हिंसंति ॥ त्रिभुवनयासी ॥ तथा स्यात् ॥ इत्यादि निःशंकाकुलवितान ॥ ॥ तत्पाह ॥ मत्परांश्च केपि न हिंसंति ॥ त्रिभुवनयासी ॥ इति श्रीभावार्थदीपिकायां षष्ठस्कंधे नवमोऽध्यायः ॥९॥ दशमे केशवादेशात्सुराः याचकभद्रमेवेति ॥ ॥ दिष्टदध्यङ्ङस्थिजवज्रभृत वृत्रेणायुध्यत हरेर्गणाः सावधेरणास निर्जरैः ॥ ॥

भा॰
ष॰
३४

मोदमान एवं तन्मुखादिमं श्रोतुकामः प्रत्याचष्टेत्याह वो वाच अपीति द्वाभ्यां ॥४॥ हे वृंदारकाः अपि किं मे स्था यां नस्यो यो अभिद्रोहः दुःखं तन्न जानीथ ॥३॥ आत्मा देहः वयं जानीम एव किं तु श्री विष्णवे समस्तु खिन्नया च नते इ ति वेत्याह ॥ विष्णवे विपदा नं क उत्सहेत ॥४॥ पुण्यश्लोकैरीड्यानि कर्माणि येषां ॥५॥ याचको यदि वेद त र्हि न याचेत यदीश्वरः दानसमर्थश्चेत् तर्हि सोपि नेति नाह ॥ अतो यथा तव ॥ संकटं वयं स्वार्थपरा न जानी

तथाभियाचितो देवैर्ऋषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥२॥ ऋषिरुवाच ॥ अपि वृंदारका यूयं न जानीथ शरीरिणाम ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥३॥ जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ४ ॥ देवा ऊचुः ॥ किं नु तद् दुस्त्यजं ब्रह्मन् पुंसां भूतानुकंपिनां ॥ भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणां ॥५॥ नूनं स्वार्थपरो लोको न वेद परसंकटं यदि वेद न याचेत नेति नाह यदीश्वरः ॥६॥ ऋषिरुवाच ॥ धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ॥ एष वः प्रियमात्मानं त्यजंतं संत्यजाम्यहम् ॥७॥ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् ॥ ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥८॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ॥ यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥९॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः ॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥१०॥

मा

मः ॥ एवं प्रत्याचक्षाणान् समसंकटं न जानासीति भावः ॥५॥ मम याचमाना प्रत्युदाहृताः प्रत्युक्ताः सोत्यजंतं त्यक्तुकामं तमात्मानं देहं ॥७॥ अध्रुवेणात्मना देहेन हे नाथाः ॥८॥ भूतानां शोकेन शोचति हर्षेण हृष्यति य आत्मा एतस्य धर्मः ॥ एतावानेवाव्ययो धर्म इत्यर्थः ॥९॥ पारक्यैः श्वशृगालादिभक्ष्यैः अस्वार्थैः आत्मोपयोगशून्यैः स्वज्ञातयः विग्रहा देहाः तैर्नोपकुर्यादिति यत् ॥१०॥

सवं

दध्यंचं समुपागम्य तमूचतुरथाश्विनौ भगवन्देहि नौ विद्यामिति श्रुत्वा चाब्रवीत् कर्मणि. ?स्थि
तो ... पश्चाद्दास्यामि गच्छतं तयो ४ टी.

कर्मनवकि दिश्य मुनि मार्गनिवकि दि ॥ अपथ्यं यथा नरा निन दरा तिभिषक्तमः महेद्यः ॥१९॥ एवं तन्न कथयते
नावेति स्यपरिद्रत्य तदभिप्रायमनुसरन्नाहमन्त्र वत्रिति ॥ विद्यया व्रतेन तपसा च सारं श्रेष्ठं गात्रं शरीरं याचध्वं ॥२०॥ नतु तदीयविद्यायाश्रयमारुह्म वाऽश्विनौ हाभ्यां ॥ एवं स इशमि ज्ञाकथ्याति शाम्यायर्वणा इत्त प्रवर्ग्य
ब्रह्मविद्यावौ निगीतयोरेव शाक्ताप्रागत्य तन्मुनिम् ॥ उवाच भिषजो विद्यामावदी राश्विनोर्मुने ॥ यदि महाकाम
मल्लेच्छ ब्रवीषि मदसैवनो ॥ शिरश्छिंद्यां न सदेह इन्द्र कामयथाह रि ॥ इइगते नेन थाम्पमना मत्या वृच

...मयं निःश्रेयसं विद्वान्त्वष्टा यत्कर्महि ॥ नवाति रोगिणो पथ्यं वाञ्छितो पि भिषक्तमः ॥१९॥ म
एवं त्वा तं भद्रं वो दध्यञ्च ऋषिसत्तम ॥ विद्याव्रततपःसारं गात्रं याचत मा चिरम् ॥२०॥ अश्विनावथि ग
तो दध्यङ् ऽश्विभ्यां ब्रह्म निष्कलं ॥ यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥२१॥

मुदिर्ज ॥ तत्तस्त्वादिश्य ...दितं श्रुत्वा ताववतुः पुनः ॥ आवां तव शिरश्छित्वा एवं मस्तकं संधा स्या
मस्ततो ब्रूहि तेन विद्यां च नौ द्विज ॥ तस्मिन्निर्दिष्ट संच्छिन्ने पुनः संधाय मस्तके ॥ निजं ते दक्षिणा दन्ता
विद्या वो यथा गतं ॥ एतच्छ्रुत्वा तयोर्वाच दध्यङ्‌ ऋषिर्वरणालयोः ॥ प्रवर्ग्य ब्रह्म विद्यां च सत्कृतो सत्य ...
किन इति ॥ ततस्तायमर्थः ॥ दध्यङ् निष्कलं शुद्ध ब्रह्म ... प्रापितः ॥ ज्ञानवान् ॥ पादान्त राक्षो न भवति ॥ यत
तेप्रवर्ग्य चाधिगतः ज्ञानवान् निरस्य ... ॥ ततोऽश्विभ्यां ... ॥ उपदिदेश नस्यर्थः कथं
तं ब्रह्म यद्वै अश्वशिरसा प्रोक्तत्वाद् अश्वशिरो नाम प्रसिद्धं ॥ तयोरमरतां ... व्यधात् ॥ तथा च श्रुतिः

श्री० भा० ष० ३५

३५

पूर्वं भक्तेन तत्कर्षो भिक्षै स्वकामं सका मा भूदिति स्वकामं कथयंति ॥ अथो नेतरमेव ॥४२॥ श्रीवृत्रं तदथायुष
नः प्रणमंति ॥ हंसाय शुद्धाय हरये आर्तिहराय तेनमः । शुद्धत्वे हेतवः दह्रनिलयाय हृदयाकाशनिके॰
ताय निरीक्षकाय । बुद्ध्यादिसाक्षिणे कृष्णाय सदानंदरूपाय कृषिर्भूवाचकः णश्च निर्वृतिवाच
कः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति स्मृतेः ॥ आर्तिहरत्वे हेतवः मृष्टं शुचि करं यशो यस्य
निरुपक्रमाय आदिशून्याय सद्भिः संगृह्यंते इति तथा तस्मै भवपाथः भवरूपे पथि वर्तमानः तस्य जनस्य निजा

अयोरीश जहि त्वाष्ट्रं ग्रसंतं भुवनत्रयं ॥ ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च ॥४३॥ हंसाय दह्र
निलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ॥ सत्संग्रहाय भवपांथ निजाश्रमाप्ता
वंते परीष्टगतये हरये नमस्ते ॥४४॥ **शुक उवाच** ॥ अथैवमीडितो राजन् सादरं त्रिदशैर्हरिः ॥ स्व
मुपस्थानमाकर्ण्य प्राह तानभिनंदितः ॥४५॥ **श्रीभगवानुवाच** ॥ प्रीतोऽहं वः सुरश्रेष्ठा मदुप
स्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥४६॥ किं दुरापं मयि प्रीते तथापि
विबुधर्षभाः ॥ मय्येकांतमतिर्नान्यन्मत्तो वांछति तत्त्ववित् ॥४७॥ न वेद कृपणः श्रेय आत्मनो
गुणवस्तुदृक् ॥ तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ॥४८॥

आश्रमाप्तौ मोक्षशरणप्राप्तौ सत्यां संसारस्यांते परीष्टा सर्वतः प्रार्थिता गतिः फलं यस्मात्तस्मै ॥४४॥ अ
भिनंदितः संतोषितः ॥४५॥ मदीयमुपस्थानं स्तोत्रं तत्संहितया विद्यया ज्ञानेन ॥ आत्मन ऐश्वर्यं मम
स्मारितं त्वं तस्य स्मृतिर्यया ॥ नहि विरोध उभयं क्षिप्यादिना कार्ष्णेन भोक्तृत्वादेर्मोपिकल्पनाकेः ॥ भक्तिः

किंचास्मदभिप्रायस्त्वयाज्ञायत एव ॥ किमस्माभिर्विज्ञापनीयमित्याहुः अथेति हे भगवन् ॥ तवास्माभिरि
ह ॥ क्रियमाणार्थविशेषो विज्ञापनीयः स्यात्किमत्र यः ॥ यथा हिरण्यरेतसोऽग्रेस्तद्देशभूतैर्विस्फुलिंगादिभिः प्र
काशो न क्रियते ॥ तथा तवास्माभिः कार्यार्थप्रकाशनेन कार्यमित्यर्थः ॥ अत्र हेतुगर्भाणि विशेषणानि ॥ अ
खिलजगतामुत्पत्त्यादिषु निमित्तायमानया दिव्यमायया विनोदो यस्य ॥ अत एव सर्वेषां जीवनिकायानामंत
र्हृदयेषु ब्रह्मस्वरूपेण ॥ प्रत्यगात्मान्तर्यामीतिरूपेण च ॥ बहिरपि च प्रधानरूपेणावे ॥ बहिरपि च प्रधाने

अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकल
जीवनिकायानामंतर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशका
लदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः ॥ सर्वप्रत्ययसाक्षिण आकाशश
रीरस्य साक्षात्परब्रह्मणः ॥ परमात्मनः कियानिह वार्थविशेषो विज्ञापनीयः स्यात् विस्फुलिं
गादिभिरिव हिरण्यरेतसः ॥ ३० ॥ अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चर
णशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोप
सादिताः ॥ ३१ ॥

न विशेषाननुल्लंघ्यानुभवतः कथं तेषामुपादानतयानुलंभकतयेति वा ॥ अ
त एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः साक्षित्वे हेतुः ॥ आकाशवत् ॥ अलिप्तशरीरस्य ब्र
ह्मस्वरूपस्य अलिप्तत्वे हेतुर्द्वयं ॥ साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्धस्वरूपस्य ॥ ३० ॥ अत एव
सर्वज्ञत्वादेव वयं यत्कामेन त्वया स्वकार्यस्य कामेनोपसादिताः प्रापिताः तदस्मदीयं स्वयमेवोप
कल्पय संपादयेति ॥ चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैः यः संसारपरिश्रमः
तस्योपशमकरीं उपसृतानां प्राप्तानां ॥ ३१ ॥

मस्ततं विज्ञापयंति ॥ त्रिभुवनेत्यादिनायावत्समाप्ति ॥ त्रिभुवनमात्मा स्वरूपं भवनं च यस्य स त्रिभुवनस्या
त्मा भवनं चेति वा ॥ त्रयो विक्रमा ॥ यस्य त्री त्रिलोकान्नयतीति तथा त्रयाणां लोकानां मनोहरोऽनुभावो यस्य
एवं च तव धीसंबोध्याकुः तेषामनुक्रमसमयः ॥ उद्यमकालोऽयं न भवतीति मत्वा हे दंडधर ॥ सर्वं यथा
दंडदधर सर्वं यथा दंडं दधर्थ धृतवानसि ॥ एवमेनं त्वाष्टमपि जहि ॥ यदि मन्यसे हंतुं यदीच्छसि ॥

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव ॥ तवैव विभूतयो दितिजदनुजाद
यश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृति
भिर्यथापराधं दंडं दंडधर दधर्थ ॥ एवमेनमपि भगवन्जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ८ ॥ अस्माकं
तावकानां ततततनतानां तात पितामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगड
नां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलो
केन विगलितमधुरमुखरसामृतकलया ॥ चांतस्तापमनघार्हसि शमयितुम् ॥ ९ ॥

अथ मंतावत्त्वदीयानामस्माकं अंतस्तापं शमयितुमर्हसि ॥ तावकानामित्यत्र हेतुः हे पितः हे पिता
मह तव चरणनलिनयुगलध्यानेनैवानुबद्धो हृदये निगडः शृंखला येषां स्वलिंगविवरणेन नि
जमूर्तिप्रकटनेनात्मसात्कृतानां केन अनुकंपयानुरंजितं सानुरागं च तद्विशदं रुचिरं च शिशिरं च
स्मितं तत्सहितेनावलोकेन तथानुकंपयैव विगलितो मधुरो मुखरसः प्रियावाक्सैवामृ
तकलातया ॥ ९ ॥ ॥ २७

रजस्तमस्स्वभावोयस्य ॥१॥ भक्तेर्दुर्लभत्वं प्रपंचयति त्रिभिः ॥ पार्थिवै रजोभिः परमाणुभिः समाः संख्याता अनंतास्तावत्यर्थः जंतवो जीवास्तेषां मध्ये ये केचन कर्मनि प्रायो श्रेयो धर्ममीहंते कुर्वंति ॥३॥ मुच्यते नष्टहार्दसंगाः मुच्यते ॥ सिद्ध्यति तत्त्वं जानाति ॥४॥ तत्रैवं दुर्भिया कृत्संशयं सामान्यं स्पष्टयः पौरुषेणेति ॥७॥ यथा यथा

परीक्षिदुवाच ॥ रजस्तमः स्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः ॥ नारायणे भगवति कथमासीद्दृढा मतिः ॥१॥ देवानां शुद्धसत्त्वानामृषीणां चामलात्मनां ॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥२॥ रजोभिः समसंख्याताः पार्थिवैरिह जंतवः ॥ तेषां ये केचनेहंते श्रेयो वै मनुजादयः ॥३॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तमः ॥ मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥४॥ मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ॥५॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्बणे ॥६॥ अत्र नः संशयो भूयाञ्छ्रोतुं कौतूहलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥७॥ सूत उवाच ॥ परीक्षितोथ संप्रश्नं भगवान्बादरायणिः ॥ निशम्य श्रद्दधानस्य प्रतिनंद्य वचोब्रवीत् ॥८॥ श्रीशुक उ० ॥ शृणुष्वावहितो राजन्निति हासमिमं यथा ॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥९॥ आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप ॥ चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्मही ॥१०॥ तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ॥ सांतानिकश्चापि नृपो न लेभे तासु संततिं ॥११॥ रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ॥ संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापतेरभूत् ॥१२॥ ॥

वृत्र ॥९॥ भार्यासहस्राणां दशसहस्राणां दशसहस्राणि कोटिरित्यर्थः ॥ सांतानिकः ॥ स्वयं संतानोत्पादनसमर्थोपि तासु संततिं न लेभे सर्वासां वंध्यात्वं दैवयोगेन मिलितमित्यभिप्रायः ॥११॥ तदेवाह वंध्यापतेरिति १२

श्रीभा०
टी०
४४

उपासीदत ॥ तस्य समीपे ॥ उपविवेश ॥ समाहितः संयतः ॥ ८ ॥ अपि किं ॥ अनामयमारोग्यं स्वस्ति शुभं प्रकृतयो अमेवद्दि राज्यमिति ॥ सहष्टोतमा ॥ पृष्यामहदादिभिः सप्तभिः प्रकृतिभिः शुभावली वो नित्यं शुभो भवति ॥ न व तद्व निरोकेणात्तामयितिष्ठते तथा राज्ञापि सप्तभिः ॥ स्वाम्यमात्यो जनपदङुर्गद्रविणसंचयः दंडो मित्रं च तस्येनाः सप्तप्रकृतयो मनाउस्कलत्वाणाभिर्नित्यं शुभः सप्तकामीशुरुः स्वयंवा मंत्रसहायोः मात्यः मित्रं कर्मसहायइति भेदः ॥ ९ ॥ आत्मानं प्रकृतिषु प्रद्दामात्माविधायतदनुवर्तिनं कृत्वा

न तस्यसंपदः सर्वा महिष्यो वामलोचनाः ॥ सार्वभौम सम्यग्भ्रेयसभवत्मीति हेतवः ॥ ३ ॥ तस्यैकदा तु भवनं अंगिरा भगवानृषिः ॥ लोकाननुचरन्नेता नृपाणामुपययौ किल ॥ ४ ॥ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीदत्सुखासीनं समाहितः ॥ ५ ॥ महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ॥ प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् ॥ ६ ॥ अंगिरा उवाच ॥ अपि तेनामयं स्वस्ति प्रकृतीनां तथात्मनः ॥ यथा प्रकृतिभिर्गुप्तः पुमान्राजा च सप्तभिः ॥ ७ ॥ आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ॥ राज्ञा तथा प्रकृतयो नरदेवाहिताधयः ॥ ८ ॥ अपि दाराः प्रजामात्या भृत्याः श्रेण्योथ मंत्रिणः ॥ पौरा जानपदा भूपा आत्मजा वशवर्तिनः ॥ ९ ॥ ॥

श्रेयो राज्यसर्वंवशानुयादित्यर्थः ॥ प्रकृतीनां च सर्वं राजाधीनमेव स्यात् ॥ हे नरदेव ॥ तथा प्रकृतयोपि राज्ञा आहिताधयः निहितनिद्दोषाः धतैः समस्ता भवंति ॥ पादांतरे आसमंतताद्दत्ताधयोतिरक्षितः मनो येषुः स्वामिभवंतीत्यर्थः ॥ ८ ॥ अमात्या स्त्र ॥ श्रेण्यस्त्र समय विशेषेण संघशो वर्तमाना वणिकादयः नयः पौराः पुरवासिनः ॥ जानपदा जनदेशाधिकारिणः ॥ ९ ॥ ॥ ॥

॥

ननु तावद्दशाः सकामा गोपादीन् प्रार्थयंते ॥ त्वं तान्विहाय किमिति ॥ भगवंतं प्रार्थयसे ॥ तत्राह ॥ प्राकृ-तैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैर्यथाशयं ॥ तत्तदुपासनानुसारेणायं देहगतोंतर्यामीति नृदेवताद्रूपेण विविधो भाति ॥ यथा वायुः पार्थिवं चंपकादिगंधभेदमाश्रित्य नानागंधवानिव भाति ॥ विशेषगुणांश्चू सरूवा-दिकमाश्रित्य नानारूपो वा प्रतीयते ॥ तद्वत्सैव ॥ तत्तद्देवतारूपेण फलदातृत्वात् ॥ स ईश्वर एव सममभूतो वेत्यर्थं सम्यक् एव तु किमिति तत्तदभिर्देवतांतरैरेवेत्यर्थः ॥ तदुक्तं गीतासु ॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चितु-मिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते

प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ई-श्वरो मे कुरुतान्मनोरथं ॥ ३४ ॥ श्रुक उ० ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ॥ आविरासीत्कु-रुश्रेष्ठ भगवान्भक्तवत्सलः ॥ ३५ ॥ कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मे-षुधनुःपाशगदाधरः ॥ ३६ ॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ॥ वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥ महाकिरीटकटकः स्फुरन्मकरकुंडलः ॥ कांच्यंगुलीयवलय-नूपुरांगदभूषितः ॥ ३८ ॥

वनतः कामान्स्यैव विहितान्हि तानिति ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति चेति ॥ ३४ ॥ संस्तुवतो दक्षस्य भगवानाविर्भूत ॥ ३५ ॥ तं वर्णयति सार्धैश्चतुर्भिः सु-पर्णांसे स्कंधे कृतौ पादौ येन ॥ प्रलंबा अष्टौ महांतो भुजा यस्य ॥ चक्रादीन्धरतीति धरः ॥ ३६ ॥ प्रसन्ने वदने ईक्षणे च यस्य ॥ वनमालया निवीतं ॥ कंठपादांतमानसं गं यस्य ॥ लसंतौ श्रीवत्सकौस्तुभौ य-स्य महांति किरीटकटकानि यस्य ॥ स्फुरंती मकरकुंडले यस्य कांच्यादिभिर्विभूषितः वलयमं-नुपादस्थ यो वाङ्गदं चेत्य कटकस्योक्तत्वात् ॥ ३८ ॥ ॥

नन्वेवं ब्रह्मवेदविषयस्येतः॥ तर्हि न कदाचिदनीदृशं जगदिति वदन्तो मीमांसकाः॥ कुतोऽत्र विवदन्ते नैयायिके
स्वभाववादिनः॥ संवदन्ते॥ ते च ते च तत्त्वविद्भिर्बोधिता अपि कुतः पुनः पुनर्मुह्यन्ति॥ तत्राह॥ यस्य माया
विद्यायाः प्राक् यो विवादसंवादचित्तवादस्य भुवः स्थानानि भवन्ति तस्मै नमः॥३१॥ ननु किं तद्ब्रह्म यस्य स्वा
शक्तयो विवादादिभुवो भवन्ति॥ अत्राह॥ अस्तीति योग उपासनाशास्त्रं॥ तत्र हि विराड्रूपेणोपासनायोग्य
तालपादिकमस्तीत्युपासनत्वेन विधीयते॥ नास्तीति सांख्यज्ञानं॥ न शास्त्रं॥ तत्र सर्वाणि पादः॥ अत्र च द्व
श्रोत्रमिति च पादादिनास्तीति निषिध्यते॥ तयोर्योगसांख्ययोर्यत्किंचित्समं अनुवर्तमानं॥ अवेक्षितं भ

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति॥ कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्त
गुणाय भूम्ने॥३१॥ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः॥ अवेक्षितं किं
चन योगसांख्ययोः समं परं ह्यनुकूलं बृहत्तत्॥३२॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भग
वाननन्तः॥ नामानि रूपाणि च जन्मकर्मभिर्भेजे स ममस परमः प्रसीदतु॥३३॥

तीतं॥ तद्बृहद्ब्रह्म॥ विवादेऽप्यविवादास्पदं ब्रह्मेत्यर्थः॥ विवादस्तु दर्शयति भिन्नो॥ अस्तिनास्तीत्येवंभूतो विरु
द्धौ धर्मौ ययोः तयोर्भिन्नविषयत्वे विरोधो न स्यात्॥ अत एकस्थयोरिति मुख्यैकविषययोः कुतः वस्तु
निष्ठयोः पादादिविधिप्रतिषेधयोरेकवस्तुनिष्ठत्वात्॥ सममवेक्षितं॥ परं हि सत्ताविधिप्रतिषेधयोरविष
यः॥ तयोः पादादिविषयत्वात्॥ तर्हि तस्याविषयस्य सद्भावे किं प्रमाणं॥ तत्राह॥ अनुकूलं॥ मधिष्ठानं विना
पादादिकल्पनायोगात्॥ अवधिं विना तन्निषेधायोगाच्च तयोरुपपादकत्वेन सिद्धमित्यर्थः॥ तस्मै नमः इ
ति पूर्वस्यानुषङ्गः॥३२॥ ननूदासीनस्य समस्य नमस्कारे को लाभस्तत्राह॥ य इति॥ पादमूलं भजतामनु
ग्रहार्थं प्राकृतनामरूपरहितोऽपि निजमहिम्ना रविंदाद्यर्जितस्वानि रूपाणि कर्मभिर्भेजे नामानि च यो

भजे नक्तो भगवानविशेषपूर्णः सम्प्रसीदतु ३३ ॥

वाह्यादीनि पंचमहाभूतानि तैर्निर्मिता स्त्रयो लोकास्तेषामधिपतयो ब्रह्मादयस्ततो वीचीनां वयं
च सर्वे यस्मै श्रेतकायकालायो हि जंतः ॥ सतो वलिं हरामः ॥ असौ च पिय स्माद्धिभेति ॥ ततः ॥ परमेश्वरादे
व लोकमाकं अरणं रक्षणमस्तु ॥ २१ ॥ तत एवेत्यवधारणो हेतुमाहुः ॥ अविविसिनेति रहं कारकं ऊर्ध्वल
मूलं वाऊतः अशांतेरागादिशून्यं तत्र ऊतः ॥ स्वेनैव लाभेन परिपूर्णकामं ॥ तच्च ऊतः समं उपा
धिपरिच्छेद शून्यं ॥ एवंभूतं परमेश्वरं विना ॥ अपरं शरणार्थं समुपसर्पति सह्हिवालिशोऽज्ञः य

देवा ऊचुः ॥ वायं वराग्न्यस्त्रितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः ॥ हरामयस्मै वलिमंतः ॥
को सौ विभेतियस्मादरणं ततो नः ॥ २१ ॥ अविविसितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशां
तं ॥ विनोपसर्पत्य परं हि वालिशः स्वलांगूलेनातितितर्ति सिंधुं २२ यस्मोरुसंगे जगती
स्वनावं मनुर्यथावध्नात तत्र दुर्गं स एव नस्त्वाष्ट्रभयाद्दुरंताज्ञाताश्रितानां चरोपि नूनं
२३ पुरा स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराले ॥ एकोरविंदात्पतितस्ततार
तस्माद्भयायेन स तोऽस्तु पारः ॥ २४ ॥ ॥ ॥
तो सौ स्वतो लांगूलेन पुच्छेन ॥ अतितितर्ति अति
तर्तुमिच्छतीत्यर्थः ॥ यथा तेन समुद्रतरणं न भवति ॥ तथा ईश्वराश्रयेणान्यस तारणं न भवति ॥
न भवतीति भावः ॥ २२ ॥ मदाभये स एव रक्षक इति दृष्टांतमाहुः यस्येति द्वाभ्यां यस्य मत्स्यरूपस्यो
रुसंगे जगतीं पृथ्वीमेव स्वनावं स्वनावं वध्ना मनुः ॥ सत्यव्रतो यथा वद्दुर्गं संकटं ततार स एव वाष्ट्र चरोमत्स्य
मूर्तिर्नोस्मात् ॥ अप्याश्रितानां मनः ॥ नूनं तारयिष्यति ॥ २३ ॥ संयमांभसि प्रलयोदके ॥ उदीर्णोरु
भिर्वातैः वातैर्ये ऊर्मयः ॥ तेषां रवैः ॥ करालेभयंकरे अरविंदात्नाभिकमलात्पतितप्रायः ॥ एको असहायः

तेवीत्यर्थवत्रस्तालोकादिशोविद्रुद्रुवुरितिपंचमेतान्वयः कथंभूतंविषकसमंततः उग्रविलेपमानंप्र
तिदिनंवर्धमानंदग्धशैलप्रतीकाशंप्रकृसवर्णसंध्याभ्रान्तीकवद्दर्चोदीप्तिर्यस्यतं ॥३॥ तस्मतामवत
शिखाः यस्यश्रृंगाणिचयस्य ॥ मध्याह्नार्कवदुग्रेलोचनेयस्य ॥४॥ रोदसीआरोप्यवेत्यर्थः ॥५॥ दरीवद्गंभी
रेणावक्त्रेणसृक्कगुंद्रुतंभमाणमित्यन्वयः ॥ कथंभूतेननभस्तलेपिवता ॥ स्वस्तानिजिह्वयालिहता ।

विषमिववर्धमानंतमिषुमात्रंदिनेदिने ॥ दग्धशैलप्रतीकाशंसंध्याभ्रान्तीकवर्चसं ॥३॥ तप्तताम्र
शिखाश्मश्रुमध्याह्नार्कोग्रलोचनं दैदीप्यमानेशिखिविशूलत्रारोप्यरोदसी ॥ नृत्यंतमुन्नदंतंच
चालयंतंपदामहीं ॥५॥ दरीगंभीरवक्त्रेणापिवताचनभस्तलं ॥ लिहताजिह्वयर्क्षाणिग्रस्ताभु
वनत्रयं ॥६॥ महतारौद्रदंष्ट्रेणजृंभमाणंमुहुर्मुहुः ॥ वित्रस्ताउद्रुवुर्लोकावीक्ष्यसर्वेदिशोदि
शः ॥७॥ येनाहृताइमेलोकास्तपसानाहृमूर्तिना ॥ सवैहन्यतिप्रोक्तः पापः परमदारुणः ॥८॥
तेनितज्वरमिङ्त्पृस्मणाविद्वुषर्षभाः ॥ स्वस्तिर्दिव्याद्ब्रुशाक्षेोचैः सोयसत्वानिहन्त्वशः ॥९॥
ततस्तेविस्मिताः सर्वेविषस्मायस्तेतेजसः ॥ प्रपंचमादिपुरुषमुपतस्थुः समाहिताः ॥१०॥

॥ राम० ॥२०॥ ॥

भुवनत्रयंयस्ताः ॥६॥ महतीविस्तीर्णारौद्रदंष्ट्रायस्मिन् ॥७॥ हृतनामनिरुक्तिंवक्तियेनाहृताइति
नाहृमूर्तिर्यस्तपसः तेन ॥ तथाचश्रुतिः ॥ सइमांल्लोकानाहरणात्तहृत्वस्यहृत्वमिति ॥८॥ अग्र
सद्दृष्टितवान ॥९॥ ग्रस्तंतेजोयेषां ॥ प्रपंचवमंतर्यामिणंत्रिभुवनस्यतेनआमनात् ॥ क्वापितामनासं
भवात्तैवस्थितात्तदृष्टुवुरित्यर्थः ॥ महाभयेपरित्राणमन्यतोनभवेदिति ॥ हरिमेवप्रपद्येतेस्तदाः स्था

छेदे समति पुनर्विरोहः प्ररोहो भवत्विति विवेरणा निर्यासरूपेण ब्रह्महत्याया दृष्ट्वा निर्यासो न भक्ष्यः ॥८॥ आस्य
त्कामवरेणाय यावत्प्रसवं गर्भी नु पवानाते नैव संभोगा वरेण ॥ अत एव वज्रोदरी ते न तस्मादितं कार्यं ॥९॥ द्र
व्यभूयो वरेणायस्मिन्हर्वे हतीत्वादावापो मिश्रा अभवन्पुः तस्माद्भूयस्त्वं माधिकयस्मादिति वरेण ॥ यद्वा स्वस्यैव
निर्क्रोडमादि भूयस्त्ववरेण ॥ द्रवभूय इति ॥ पौढ व्ययमवार्यः ॥ यद्वा द्रवभूयस्त्वं मामिति कद्रवत्वं ते
न वरेण ॥ अस्य विभागस्य विश्वरूपो वेत्ताह्वं उत्तस्याकृता वक्तृत्वं ॥ तदिह सा मातृतमाह ॥ तस्यापं हरति ॥
निराकरोति ॥ कः तिपत ॥ वृद्धदादि जलोदहिः ॥ प्रक्षिपति समर्थः ॥ यद्वा तिमज्जलं पापं हरतीति हन्ति ॥

तस्य च्छेदविरोहेण वरेण जगृहुर्द्रुमाः ॥ तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ ॥ आस्यकामवरे
णाद्धस्तुरीयं जगृहुः स्त्रियः ॥ रजोरूपेण तासां हि मासि मासि प्रदृश्यते ॥ ॥ द्रवभूयो वरेणाप
स्तुरीयं जगृहुर्मलं ॥ तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपत ॥१०॥ इत्थं च ब्रह्महत्यायाः
वेत्तायथा त्रेव ॥ इंद्रशत्रोर्विवर्द्धस्व मा चिरं जहि विद्विषम् ॥११॥ अथ यानादार्थ पचताड स्ययतो वोर
दर्शनः ॥ कृत्वा तद्वलोकानाम् पुगांत स समयेययाः ॥१२॥ ॥ स्वर्थः स्वयं चन तस्माद्यापो न परिवर्ज्यां इ
स्यादि प्रत्यर्थ उक्तः ॥ पाहां तदेहरि किल्बिषं इंद्रपापं ॥१०॥ इंद्रायं इंद्रं हंतु शत्रुर्वशानृत्यमे ॥ तदा हइंद्र
शत्रो विवर्धस्वेति ॥ अत्र चेंद्रशत्रुपदस्य ॥ आद्युदात्तत्वाद्बहुव्रीहिः प्रकृत्या पूर्वपदमिति स्वरेण बहुव्रीहि
लक्षणा प्रत्या ॥ इंद्र एव तस्य शत्रुरभूत् ॥ तदेवं कृत्वा ॥ यदब्रवीत्स्वाहेंद्रं वर्धस्वेति ॥ तस्मादस्येंद्रः शत्रु
रभवदिति ॥ तथा च शिक्षायां ॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो
यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति ॥११॥ अत्वादार्थपचनादतिगाणे ॥१२॥ ॥

नाम्ने विश्वरूपेण इन्द्रेण शक्रेणाकोपतः ॥ तथा चोक्तमदितेः पुत्रैभीतैर्देवैर्हविः स्तुतिः ॥ १ ॥ सोमस्य पीथं पानं
यस्मिन् ॥ एवं सुरापीथं ॥ अन्नमत्तीत्यन्नादः ॥ अत्र विश्वरूपो देवानां पुरोहितो देवानामासीदित्यादिश्रु-
तिस्तु संधेया ॥ २ ॥ तस्माभ्यः प्रत्यक्षमाह ॥ स वा इति द्वाभ्याम् ॥ प्रत्यक्षं प्रकटं यथा भवति ॥ तथा स वितन
यं देवेभ्यो हविर्भागं ॥ इन्द्राय इदमग्नये इदमित्युच्चैरवदत् ॥ अत्र हेतुः ॥ यस्य पितरो देवाः सः ॥ ३ ॥ अस्
रेभ्यस्तु परोक्षं गुप्तं भागं ददौ तद्देवाह ॥ देवान्यजमानो मातृस्नेहवशात्प्रतिभागमवहत् ॥ ४ ॥ तं वा इति

श्रुक ३ ॥ तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥ १ ॥
स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ॥ २ ॥ स एव हि ददौ
भागं परोक्षमसुरान्प्रति ॥ यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ३ ॥ तद्देवहेलनं तस्य धर्मालीक
कं सुरेश्वरः ॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥ ४ ॥ सोमपीथं तु यत्तस्य शिर आसीत्क
पिञ्जलः ॥ कलविङ्कः सुरापीथमन्नादं यत्स तित्तिरिः ॥ ५ ॥ ब्रह्महत्यामञ्जलिना जग्राह यदपीश्व
रः ॥ ६ ॥ संवत्सरान्ते तदघं भूतानां स विशुद्धये ॥ भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ७ ॥ भू
मिस्तुरीयं जग्राह खातपूरवरेण वै ॥ ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ ८ ॥

तं समर्थोऽपि जग्राह ॥ ६ ॥ संवत्सरं तथैव स्थित्वा संवत्सरान्ते भूतानां कोपाभीतः सन् भूतानां मध्ये वि
शुद्धये लोकापवादपरिहाराय ॥ महर्षिविद्रोहमुख्यादि [illegible] तदघं विभज्य ददौ ॥ ७ ॥ तुरीयं चतुर्थभागं खा
तस्य गर्तस्य पूरः पूरणं तेन वरेण यदि खातं पूर्णं स्वत एव भविष्यतीति तद्ईरिणं [illegible] मीत्येवं भाषां बंधे
न जग्राहेत्यर्थः ॥ ईरिणमूषरं अत एवोषरे ध्ययनादि निषिध्यते ॥ ७ ॥ ॥

दंसितः ॥ ३३ ॥ सोपि साध्वसाद्भयाद्विमुच्यते ॥ ३४ ॥ तस्य तु भयं न भवेदेव ॥ ३५ ॥ एतद्विद्याप्रभावमितिहासेनाह इमामिति सार्धैस्त्रिभिः ॥ मरुधन्वनि निरुदके देशे ॥ अनेन तु विद्यायास्तेजस्वितीर्थानपेक्षत्वं दर्शितम् ॥ ३६ ॥ यत्र द्विजस्य क्षयो देहत्यागः ॥ तस्योपरि ॥ ३७ ॥ सद्य स्तत्क्षणमेव गगनात् ॥ न्यपतत् ॥ पाठांतरे ऽंगनाभिः सह ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकं ॥ विजेष्यस्यंजसा येन दंसितो ऽसुरयूथपान् ॥ ३३ ॥ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥ ३४ ॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ ३५ ॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः ॥ योगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३६ ॥ तस्योपरि विमानेन गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३७ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ ३८ ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ३८ ॥ श्रीशुक उवाच ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥ ३९ ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४० ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे नारायणवर्मनामाष्टमोऽध्यायः

रामानुजाय नमः ॥ ८ ॥

वालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् ॥ स्वं धाम गंधर्वलोकं जगाम ॥ ३९ ॥ अधिगतः प्राप्तः सन् ॥ ४० ॥ इति श्रीभागवते भावार्थदीपिकायां षष्ठस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ रामानुजाय नमो नमः ॥ ८ ॥

तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि ॥ चंद्रकाराणि मंडला
नियुस्सिन ॥ देघातं च इ चर्मन ॥ ग्रहो नाम यवनां द्विषां च ह्रूं षि च्छादय ॥ पापचक्षुषां च उ यहष्टीनां च
त्त्रूषिहर ॥ २४ ॥ यन्नो भयं ग्रहेभ्यो भूत्केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंहोभ्य एव च ॥ २५ ॥ श्रेयः प्रतीपकाः उग्रव्याघातकाः ॥ २६ ॥ त्वां
ग्राणि हृद इत्यंतराद्वि सामानि तैः ॥ त्वां स्तुते मंत्व यत उ नि त्वां त्र त्वां भः ॥ छंदोमयो वेदमूर्तिः ॥ स्वपर्णा क्षित
तत्त्वानि नादिष्कृनेः ॥ एकपद्यपाठे त्वां भाः मीति श्रूरकालत राणि ॥ त्वां त्र त्वां मेति पाठे सामाधारभ्य तस्कृ

त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि ॥ चक्षूंषि चर्मञ्छतचंद्र छादय द्विषा
मघोनां हर पापचक्षुषां ॥ २४ ॥ यन्नो भयं ग्रहेभ्योभूत्केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो
भूतेभ्योंहोभ्य एव च ॥ २५ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयांतु संक्षयं सद्यो ये
नः श्रेयः प्रतीपकाः ॥ २६ ॥ गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो
विष्वक्सेनः स्वनामभिः ॥ २७ ॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ॥ बुद्धींद्रियमनःप्राणा
न्पांतु पार्षदभूषणाः ॥ २८ ॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यांतु
नाशमुपद्रवाः ॥ २९ ॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ॥ भूषणायुधलिंगाख्या धत्ते शक्तीः
स्वमायया ॥ ३० ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३१ ॥
विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः ॥ प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्त ॥ इ

स्तोमः ॥ ३२ ॥ नामानि च रूपाणि च यानानि वाहनान्यायुधानि च ॥ नाभ्वुज्ञादीन्यांतु पार्षदस्वरूपाणः पार्षद
स्वरूपाश्च पांतु ॥ २८ ॥ सद्वासच्च सर्वं नाम तं यत स्तेन सर्वं जगत् ॥ २९ ॥ एकात्म्यस्यानुभावोनुध्यानं येषां तेषां विक
ल्पो भेदस्तद्रहितोपि ॥ ३० ॥ सत्यमानेन सत्यभूतेन प्रमाणेन ॥ ३१ ॥ पुनरपि श्रीनृसिंह एव प्रार्थ्यते विदिक्षि
तिपा विदिक्ष्वनुषंगः ॥ प्रहापयन्नारसिंहः प्रह्लादः स्वनेन नृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेन ग्र ।

दिनस्य पंचभागो भागक्रमेण प्रातरादिसंज्ञो भवति प्रदोषादिसंज्ञो भवति तत्र प्रार्थितं मां केशव इति त्रिभिः आसंगवं संगवमभिव्याप्य ।।१८।। त्रिधामा ब्रह्मादित्रिमूर्तिः श्रीमाधवः दोषे प्रदोषे अर्धरात्रे अर्धरात्रिपर्यन्तकाले निशीथे एक एव पद्मनाभोऽवतु ।।१९।। अपररात्रे ईशः श्रीवत्सधामावतु प्रत्यूषे ईशः श्रीजनार्दनः श्रीदामोदरः प्रभाते श्रीविश्वेश्वरोऽनुसंध्यं प्रतिसंध्यं ।।२०।। युगान्तानलवत् तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत् अरिसैन्यं दंदग्धि अतिशयेन दह इति तस्यायं स्वभाव एव ततस्तस्मात् प्रार्थनीयमित्यर्थः

मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः । नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ।।१९।। देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां । दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ।।२०।। श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः । दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः ।।२१।। चक्रं युगान्तानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तं । दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ।।२२।। गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि । कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ।।२४।। त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् । दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ।।२३।।

यद्वा इदं दग्धीति लोण्मध्यमपुरुषः । अस्त्वेवमेवंभूतं च कमिति स्वरूपस्मृता संबोधनमार्थे ते । अतिशयेन दहेति कक्षं शुष्कतृणं । अशनिवत्स्पर्शो येषां ते विस्फुलिंगा यस्याः तत्स्याः संबोधनं हे गदे त्वमजितस्य प्रियासि अहमपि तस्य दासः अतः कूष्मांडादीन् निष्पिंढि निष्पिंढि संचूर्णय संचूर्णय सर्वत्र वीप्सातिशयार्था ।।२४।। हे दरेंद्र पांचजन्य त्वं यातुधानादीन् विद्रावय विप्रग्रहाः ब्रह्मराक्षसाः येनैव वी

गादसंगाणां एव बहुसंगपापात्तस्मात् ॥१३॥ अदेवी श्रान्तिसुतं संग्रामो विग्रहस्तु श्रादिर्यैवांते सुसंकटस्था
नेषु ॥१४॥ असौ प्रसिद्धो वराहो मामध्वनि रक्षतु यज्ञैरवयवरूपैः कल्प्यते निरूप्यत इति तथा ॥ उन्नीता उध्य
ताधरा येन सः ॥ अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः ॥१५॥ उग्रधर्मोऽभिचारादिलक्षणात् हास
कुर्वीत नरः अवतु दत्तो दत्तात्रेयः अयोगात् योगभ्रंशात् ॥१६॥ पथि देवानां हेलनं नमस्कारमकृत्वा गम

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायावटुवामनोव्यात्त्रिविक्र
मः खेवतु विश्वरूपः ॥१३॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोसुरयूथपारिः ॥ विमुंचतो
यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥१४॥ रक्षत्वसौ माध्वनि यज्ञकल्पः ॥ स्वदंष्ट्रयोन्नीत
धरो वराहः ॥ रामोद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोव्याद्भरताग्रजोस्मान् ॥१५॥ मामुग्रधर्मादखि
लात्प्रमादान्नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपि
लः कर्मबंधात् ॥१६॥ सनत्कुमारोवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिव
र्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात् ॥१७॥ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृष
भो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोधवशादहींद्रः ॥१८॥ द्वैपायनो भग
वानप्रबोधाद्बुद्धस्तु पाखंडगणात्प्रमादात् ॥ कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृ
तावतारः ॥१९॥

नं ॥ तस्मात्पुरुषार्चनस्यांतरायात् ॥ देवहेलनाच्छिद्रात् ॥ द्वात्रिंशदपराधरूपात् नारदः ॥१७॥ लो
काज्जनापवादाद्यज्ञः जननिमित्तेभ्यो नः उपघातुस्तस्मात् ॥ बलभद्रः अवताज्जनान्तादिति पाठे ह
नानाकालाद्रुद्रात् ॥ क्रोधवशात्सर्पाणां गणाद्दहीन्द्रः शेषः ॥१८॥ कालमलमृतात्कलेः कल्किः धर्म
रक्षणाय उरुर्महान् ॥ कृतोवतारो येन ॥१९॥ ॥

भा॰
ष॰
२२

तत्राष्टाक्षरेणापादाग्रष्टांगेषु न्यासमाह। पादयोरिति सार्धेन। प्रणवसंपुटितमोंकाराद्येकैकं मंत्र
वर्णं विन्यसेत्। विपर्ययं यथा भवेत् एवं शिरआदि पादांतं वा विन्यसेत्। उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्य
र्थः॥४॥ द्वादशाक्षरन्यासमाह॥ प्रणवादियकारांतमिति। प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनी
मारभ्य वामतर्जनी पर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोरग्रपर्वसु न्यसेत्॥५॥ मंत्रो
पादयोर्जानुनोरूर्वोरुदरे हृदयोरसि। मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत्॥५॥ ओंन
मोनारायणायेति विपर्ययमथापि वा॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया प्रणवा
दियकारांतमंगुल्यंगुष्ठपर्वसु॥६॥ न्यसेद्धृदय ओंकारं विकारमनुमूर्धनि। षकारं तु भ्रुवोर्म
ध्ये णकारं शिखया दिशेत्॥८॥ वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु। मकारमस्त्रमुद्दिश्य
मंत्रमूर्तिर्भवेद्बुधः॥९॥ सविसर्गं फडंतं तत्सर्वदिक्षु विनिर्दिशेत्। आत्मानं परमं ध्यायेद्ध्येयं
षट्शक्तिभिर्युतं॥ विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत्॥१०॥ ओं हरिर्विदध्यान्मम सर्वरक्षां न्यस्ता
ङ्घ्रिपद्मः पतगेंद्रपृष्ठे। दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः॥११॥

तत्र न्यासमाह। न्यसेदिति। षकारणकारयोर्विश्लेषेण षट्तत्त्वाणि हृदयादिषु न्यसेत्। मकारमस्त्रमुद्दि
श्य ध्यात्वा ततस्मकारांतं मः अस्त्राय फडित्येवं विसर्गं दिक्षु विनिर्दिशेत्॥९॥ ध्येयं मंत्रस्वरूपमात्मानं ध्यायेत्
षट्शक्तिभिः ऐश्वर्यवीर्यादिरूपाभिः॥ विद्या चेतनत्वं प्रतपस्सर्वत्र रत्निर्यमनं॥ इमं वक्ष्यमाणं श्रीना
रायणकवचाख्यं॥१०॥ अष्टगुणः अणिमा

षष्ठस्कंधे युक्तः॥११॥

२२

कियदेतत्प्रार्थितमल्पमेव ॥ आभ्यधिकमपि करिष्यामीत्याह भवतामपि ॥ ३८ ॥ समाधिना परमो येन
३९ वैस्तस्मा श्रीनारायणकवचात्मिका विद्या ॥ ३९ ॥ अस्त्रसमूहः दैत्यसेनाः ॥ ४० ॥ इति श्रीभागवते भावार्थ
दीपिकायां षष्ठे सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे विश्वरूपस्तु वर्म नारायणात्मकम् । इन्द्राय शक्रद्येनेन्द्रो गुप्तो

तथापि तव प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् । भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३८ ॥ बादरा
यणिरुवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः । पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३९ ॥
सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया । आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥ य
या गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः । तां प्राह स महेन्द्राय विश्वरूप उदारधीः ॥ ४० ॥ इति श्रीभा
गवते महापुराणे षष्ठस्कंधे सप्तमोऽध्यायः ॥ ७ ॥ राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान्
रिपुसैनिकान् । क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥ भगवंस्तन्ममाख्याहि वर्म ना
रायणात्मकम् । यथाततायिनः शत्रून्येन गुप्तोऽजयन्मृधे ॥ २ ॥ बादरायणिरुवाच ॥ वृतः पु
रोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते । नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उ
वाच ॥ धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः । कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ।
नारायणपरं वर्म सन्नह्येद्भय आगते ॥ ४ ॥

दैत्यानयाजयत् ॥ १ ॥ त्रिलोक्याः संबंधिनीं श्रियम्
२ ॥ मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां ॥ कृतः स्वाङ्गयोः करयोश्च न्यासो येन ॥ नारायणमयं परं वर्म
सन्नह्येद्भये आगते ॥ ४ ॥ ॥ ॥

श्री॰
भा॰ ष॰
२९

परेभ्यः पराभवपर्वार्तिः तं॥ संदेशमाहुः॥ वृणीमहे यिति॥३१॥ ननु पाखायकत्वेन कनिष्ठस्य ममापि
वंदनं कथं करिष्यथेति॥ विगर्हितत्वात्॥ तत्राहुः नेति॥ अर्थेषु प्रयोजननिमित्तं यविष्ठानामभिवंद
नेन निंदंति॥ किंच छंदोभ्यो मंत्रेभ्यो न्यत्र वयोज्येष्ठस्य कारणं॥ न तु मंत्रेषु॥ अतोस्माभिर्मंत्रदातृत्वेन
त्वमेव ज्येष्ठो भविष्यसि॥ यद्वा छंदोभ्योन्यत्र वेदान् विहाय वय एव ज्येष्ठस्य कारणं न भवति॥ किंतु वे
दाकारणं॥ तस्मात्वं वयः॥ वेदज्ञत्वाद्बलसेव ज्येष्ठ इत्यर्थः॥३२॥ निंदितमध्येतॄन् प्रयाज्ञाभिगमभयेन

तस्मात्यित्वृणामातीनामर्पितिपरपराभवं॥ तपसा पुनर्यं स्नात संदेशं कर्तुमर्हसि॥३१॥ वृणीम
हे त्वा पाठ्यायेत्र प्रशिष्टं ब्राह्मणाशृतं यथा जसा विजेष्यामः॥ सपत्न्यान्सर्वतो जसा॥३२॥ न गर्हयं
ति स्वर्थेषु यविष्ठान्नभिवंदने॥ छंदोभ्यो न्यत्र न ब्रह्मन्वयो ज्येष्ठस्य कारणं॥३३॥ ऋषिरुवाच
अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा॥३४॥
विश्वरूप उवाच॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्चउपव्ययं॥ कथं नु मद्विधो नाथा लोकेशैरभि
याचितं॥३५॥ प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते॥३५॥ अकिंचनानां हि धनं शिलोंछ
नं तेनेह निर्वर्तितसाधुसत्क्रियः॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः

करिष्यामीत्याह सार्धेन॥ विगर्हितं पौरोहित्यं धर्मशीलैर्धर्महेतुत्वात्॥ किंच ब्रह्मवर्चउपव्ययं एवंविध
तस्य ब्रह्मवर्चसस्य व्ययकरम्॥ प्रत्याख्यातुं च माहशा नार्हतीत्याह॥ कथं न्विति॥ तेषां शिष्यः शिक्षणार्हः
स एव प्रत्याख्यानाभाव एव॥ शिष्यस्वार्थ उच्यते॥३५॥ ननु पौरोहित्येन धनलाभाद्धर्मः सिध्येत्॥ अन्यथा
निर्धनस्य कुतो धर्मः अत एव तेन लोको हृष्यति॥ तत्राह॥ अकिंचनानां शिलोंछनं धनं॥ तेन ब्रह्मा सुपरि
तकणाभिधानपादानं शिलं क्षेत्रादौ पतितव्रीह्यादेरुपादानमुंछनं॥ इह हहाश्रमे तेनैव निर्वर्तितसाध

२९

परेभ्यः ॥ शत्रुभ्यो वः पराभव इति यत् ॥ अनयस्यान्वयस्य संबंधी फलरूप आसीत् ॥ उवाच ॥ ब्राह्मणांकुलसंप
न्नं भक्तं विलासं महात्मनः ॥ प्रायान्तेवीक्ष्यते नाति श्रेष्ठस्तु रैः परिभूयते ॥ स्वयमेव वै विप्राणां दत्तारो येषां तेभ्यः ॥ २२
गुरुतिरस्कारस्य कारणं वद अपचयोपचयकारणमिमं स्वरहष्टांतेनाह ॥ मघवन्निति ॥ द्विषतः शत्रून्काव्यमभि
वं गुरुमेव वासे व्योपचिताद् ॥ उपचितत्वमेवाह ॥ आददीरन् ॥ रक्षीयुः ॥ अमोघो मशो येषाम् अनुशिक्षितार्थाः

तस्मादयमनयस्यासीत्परेभ्यो वः पराभवः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ॥ २१ ॥ मघव
न्द्विषतः पश्य प्रक्षीणानां व्यतिक्रमात् ॥ संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः ॥ २२ ॥ आ
ददीरन्निलयनं ममापि भृगुदेवताः ॥ २३ ॥ त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षि
तार्थाः ॥ न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्वराणां ॥ २४ ॥ तद्विश्वरूपं भजताशु वि
प्रं तपस्विनं त्वाष्ट्रमथात्मवंतं ॥ सभाजितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥
श्री शुक उवाच ॥ त एवमुदिता राजन्ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येद
मब्रुवन् ॥ २६ ॥ देवा ऊचुः ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः संपाद्यतां तात
पितॄणां समयोचितः ॥ २७ ॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां ॥ अपि पुत्रवतां ब्रह्मन्कि
मुत ब्रह्मचारिणां ॥ २८ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता
साक्षात्क्षितेस्तनुः ॥ २९ ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयं ॥ अग्नेरभ्यागतो मूर्तिः सर्वभू

शिष्यायतनः विप्रा गोविंदो गावश्चेश्वरा अनुग्राहका येषां ॥ तेषामेवाभद्राणि न भवंति ॥ अन्येषां तु भवं
ति ॥ २४ ॥ तत्तस्मात् ॥ अथानंतरमेव भजत ॥ अस्य कर्म स्वरूपपातं ॥ उदिता उक्ताः ॥ २६ ॥ अतिथयो ना पितृ
णां च पश्य साधयिमाऊ ॥ आचार्य उपनीय वेदाध्यापकः ॥ ब्रह्मणो वेदस्य मूर्तिः धर्मस्यात्मा मूर्तिरतिथिः ।

विबुधानां सात्विकानां देवानामीश्वरोऽप्यहं ॥१२॥ नतुसिंहासनस्थोराजाप्रस्तुत्थानंनकुर्यादितिहृद्धावदंति
तवादः ॥ य इति द्वाभ्यां धिषणमासनम् ॥ १३ ॥ कुपथं दिशंतीति ॥ उपदिशंतीति कुपथदेष्टारस्तेषां वचः ॥ अश्म
मयः प्लवो येषां ते ॥ यथा मज्जंति तद्वत् मज्जंतीति तद्वत् ॥ १४ ॥ अगाधधिषणाय सतं ॥ निशठः शाठ्यहीः

श्री
भाग
२५

कोगृध्येत्पंडितोलक्ष्मीं त्रिविष्टपपतेरपि ॥ ययाहमासुरंभावंनीतोद्यविबुधेश्वरः ॥१२॥ येपार
मेष्ठ्यंधिषणमधितिष्ठन्नकंचन ॥ प्रत्युत्तिष्ठेदितिब्रूयुर्धर्मंतेनपरंविदुः ॥ १३ ॥ तेषांकुपथदे
ष्टॄणांपततांतमसिह्यधः ॥ येश्रद्दध्युर्वचस्तेवैमज्जंत्यश्मप्लवाइव ॥ १४ ॥ अथाहममराचार्यमगा
धधिषणंद्विजं ॥ प्रसादयिष्येनिशठःशीर्ष्णातच्चरणंस्पृशन् ॥ १५ ॥ एवंचिंतयतस्तस्यमघोनोभ
गवान्गृहात् ॥ बृहस्पतिर्गतोऽध्यात्ममायया ॥ १६ ॥ गुरोर्नाधिगतःसंज्ञांपरीक्षन्भगवान्स्वराट् ॥
ध्यायन्धियासुरैर्युक्तःशर्मनालभतात्मनः ॥ १७ ॥ तच्छ्रुत्वैवासुराःसर्वआश्रित्यौशनसंमतम् ॥ दे
वान्प्रत्युद्यमंचक्रुर्दुर्मदाआततायिनः ॥ १८ ॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ॥ ब्रह्मा
णंशरणंजग्मुःसहेंद्रानतकंधराः ॥ १९ ॥ तांस्तथाभ्यर्दितान्वीक्ष्यभगवानात्मभूरजः ॥ कृपयापरयादे
वउवाचपरिसांत्वयन् ॥ २० ॥ अहोबतसुरश्रेष्ठाह्यभद्रंवःकृतंमहत् ॥ ब्रह्मिष्ठंब्राह्मणंदांतमै
श्वर्यान्नाभ्यनंदत ॥ २१ ॥

अंशोऽदृष्टांगतिं ५

ता

१

नः सन् ॥ १५ ॥ अधिकयात्ममायया ॥ १६ ॥ गुरोः संज्ञां ज्ञानोपायं परीक्षमाणोऽपि नाधिगतः ॥ अशामः
सन् ॥ १७ ॥ आततायिनः उद्यतास्त्राः ॥ १८ ॥ निर्भिन्नान्यंगानि शिरांसि ऊरवो बाहवश्च येषाम् ॥ २० ॥ वो युष्मा
कं कृतं करणं ॥ महदभद्रं ॥ न दान्तब्रह्मिष्ठमिति ॥ नाभ्यनंदत नाभिनंदितवंतः ॥ २१ ॥ ॥

सदसि यदा संप्राप्तं वाचस्पतिं नाभ्यनंदत ॥ नाद्रृतवान् ॥ तदा स आंगिरसः ततो निर्गत्य तूष्णीं स्वगृहमाय-
यौ इत्यन्वयः ॥ अनादरहेतुमदं दर्शयितुं तं विशिनष्टि त्रिभुवनैश्वर्यमदेनोल्लंघितः सत्पंथा
येन सः ॥ १ ॥ परिश्रितः परिवृतः ॥ ३ ॥ ४ ॥ आस्थाने सभायां तस्मिन्न ध्यासनं सिंहासनं तेन तदाश्रितः ५ पारमेष्ठ्यैः

श्रीबादरायणिरुवाच ॥ इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः ॥ मरुद्भिर्वसुभी रुद्रैरादित्यै-
रृभुभिर्नृप ॥ १ ॥ विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्म-
वादिभिः ॥ २ ॥ विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ॥ निषेव्यमाणो मघवान्स्तूयमा-
नश्च भारत ॥ ३ ॥ उपगीयमानो ललितमास्थानाध्यासनाश्रितः ॥ पांडुरेणातपत्रेण चंद्रमं-
डलचारुणा ॥ ४ ॥ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ विराजमानः पौलोम्या स-
हार्धासनया भृशम् ॥ ५ ॥ स यदा परमाचार्यं देवानामात्मनश्च ह ॥ नाभ्यनंदत संप्राप्तं प्र-
त्युत्थानासनादिभिः ॥ ६ ॥ वाचस्पतिं मुनिवरं सुरासुरनमस्कृतं ॥ नोच्चचालासनादिंद्रः
पश्यन्नपि सभागतं ॥ ७ ॥ ततो निर्गत्य सहसा कविरांगिरसः प्रभुः ॥ आययौ स्वगृहं तूष्णीं वि-
द्वाञ्श्रीमदविक्रियां ॥ ८ ॥ तर्ह्येव प्रतिबुध्येंद्रो गुरुहेलनमात्मनः ॥ गर्हयामास सदसि स्व-
यमात्मानमात्मना ॥ ९ ॥ अहो बत मयासाधु कृतं वै दभ्रबुद्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः

महाराजचिह्नैः ॥ आसनस्यार्धे स्थितया पौलोम्या सह विराजमानः सन् ॥ ५ ॥ उत्थानादिना नाभ्यनंद-
त नाद्रियत ॥ आसन एव स्थितो पि किंचिन्न चलितवान् ॥ ७ ॥ श्रीमदेन या विक्रिया तां विद्वान् ॥ जान-
न् ॥ ८ ॥ प्रतिबुध्य अनुस्मृत्य ॥ १० ॥ मम कृतं कर्म अहो असाधु ॥ यत् ॥ यस्मात् दभ्रबुद्धिना ॥ अल्पमति

श्री भाग २४

असूत अजनयत॥ भुवि वर्तमाना॥३९॥ ततो विवस्वतः॥४०॥ चर्षणयः कृताकृतज्ञानवंतः पश्यंति कर्मस्वेव
नियताश्च तेन यत्र येषु आत्मानं स्थानविशेषेण॥ मानुषीजातिर्ब्रह्मोपकल्पिता॥ तथा च श्रुतिः पुरुषत्वेचावि
स्तरामात्मेति॥४१॥ कुपितं दक्षं प्रति शेषः विवृतद्विजः प्रकाशितदंतः सन्॥४२॥ यद्यदा विमतेन अवज्ञानेन

विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः॥३९॥ विवस्वतः
श्राद्धदेवं संज्ञासूयत वै मनुं॥ मिथुनं च महाभागा यमं देवं यमीं तथा॥३५॥ सैव भूत्वाथ वडवा नासत्यौ
सुषुवे भुवि॥४०॥ छायाशनैश्चरं लेभे सावर्णिं च मनुं ततः॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिं॥
४१॥ अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता॥४२
पूषानपत्यः पिष्टादो भग्नदंतोऽभवत्पुरा॥ योऽसौ दक्षाय कुपितं जहास विवृतद्विजः॥४३॥ त्वष्टुर्दैत्या
त्मजा भार्या रचना नाम कन्यका॥ सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान्॥४४॥ तं वव्रिरे सुरग
णा स्वस्रीयं द्विषतामपि॥ विमतेन परित्यक्ता गुरुणांगिरसेन यत्॥४५॥ इति श्रीभागवते महापु
राणे षष्ठस्कंधे षष्ठोऽध्यायः॥ राजोवाच॥ कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः॥ ए
तदाचक्ष्व भगवञ्छिष्याणामक्रमं गुरौ॥१॥

दृढस्य निन्दा परित्यक्ताः॥ तदा द्विषतां शत्रूणां भागि
नेयमपि विश्वरूपं पौरोहित्ये वृतवंतः॥४५॥ षष्ठस्कंधटीकायां षष्ठमः॥६॥ सप्तमे विश्वरूपोऽसौ पौरो
हित्ये वृतः सुरैः॥ गुरुणा संपरित्यक्तैः पौरोहित्यमथाकरोत्॥१॥ कस्य हेतोः कस्माद्धेतोः आत्मनः शि
ष्याः सुराः परित्यक्ताः॥ अक्रमं अपराधं॥१॥ रामजीनमः॥ १ ॥

२४

अलत्वेन सरामत्वं घघ्याययं सुत्क्रमेण ॥ तासां वंशानाह ॥ तिमेरित्यादिना ॥ २६ ॥ सौरसाः सुरसायाः पुत्राः प्राधा
निकान्प्रख्यान श्रेष्ठान् शृणु ॥ २९ ॥ ३१ ॥ वैश्वानरो दनोः पुत्रः ॥ तस्य सुताः ॥ ३२ ॥ कः प्रजापतिः ॥ कश्यप उपयेमे

तिमेर्यादोगणा आसन्श्वापदाः सरमासुताः ॥ सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ॥ २६ ॥ ताम्रायाः
श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ दंदशूकादयः सर्पा राजन्क्रोधवशात्मजाः ॥ २७ ॥ इलाया भूरुहाः
सर्वे यातुधानाश्च सौरसाः ॥ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः ॥ २८ ॥ सुता दनोरेकषष्टिस्ते
षां प्राधानिकान्शृणु ॥ द्विमूर्धा शंबरोरिष्टो हयग्रीवो विभावसुः ॥ २९ ॥ अयोमुखः शंकुशिराः स्व
र्भानुः कपिलोरुणः ॥ पुलोमा वृषपर्वा च एकचक्रोनुतापनः ॥ ३० ॥ धूम्रकेशो विरूपाक्षो विप्रचि
त्तिश्च दुर्जयः ॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ ३१ ॥ वृषपर्वणस्तु शर्मिष्ठां ययाति
र्नाहुषो बली ॥ ३२ ॥ वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ॥ उपदानवी हयशिराः पुलोमा का
लका तथा ॥ ३२ ॥ उपयेमे स भगवान्कश्यपो ब्रह्मचोदितः ॥ पौलोमाः कालकेयाश्च दानवा युद्धशा
लिनः ॥ ३४ ॥ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ॥ जघान स्वर्गतो राजन्नेक इंद्रप्रियंकरः ३५
विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ॥ राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः ॥ ३६ ॥ अथातः
श्रूयतां वंशो यो दितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वांशेनावातरद्विभुः ॥ ३७ ॥ रामानुजायनमः
उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ॥ पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ॥ ३३ ॥ ४८

दानवीपरिणयने हेतुः ब्रह्मणा चोदित इति ॥ ३४ ॥ तयोः षष्टिसहस्राणि निवातकवचाः पुत्रा जाताः
तान्स्वर्गगतः सन् ॥ ते पितामहोऽर्जुनो जघान ॥ ३५ ॥ राहुर्ज्येष्ठो यस्य ॥ ३७ ॥ ॥

सरूपेति ॥ महानिति द्वयमेकादशरूपरुद्रस्य पार्षदाः प्रेतादयः अन्ये अन्यस्यां जाताः ॥१८॥ अंगिरसः स्व
धा सती चेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति ॥ स्वधानामपत्नी पितॄन् ॥ पुत्रत्वेऽकरोत् ॥ अथ सती च
अथर्वांगिरसनामवेदं ॥१९॥ कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोः ॥ वंशमाह कृशाश्व इति ॥२०॥ सुपर्णी

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥१७॥ अजै
कपादहिर्बुध्न्यो बहुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये घोराः प्रेतविनायकाः ॥१८॥ प्रजापते
रंगिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती ॥१९॥ कृशाश्वोर्चिषि भा
र्यायां धूमकेतुमजीजनत् ॥ धिषणायां वेदशिरो देवलं वयुनं मनुं ॥२०॥ तार्क्ष्यस्य विनता कद्रूः पतं
गी यामिनी इति ॥ पतंग्यसूत पतगान्यामिनी शलभानथ ॥२१॥ सुपर्ण्यसूत गरुडं साक्षाद्यज्ञेश
वाहनं ॥ सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥२२॥ कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु भारत
दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ पुनः प्रसाद्य तं सोमः कला लेभे क्षयेऽर्दिताः ॥२३॥
शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥२४॥
अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ॥२५॥

विनता ॥ अनूरुं अरुणं ॥२२॥ रोहिण्यामेव प्रेम्णातिशयेनान्यासामुपेक्षणात् ॥ कुपितस्य दक्षस्य शा
पात् ॥ यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् ॥ तासु नपत्योऽभूत् ॥ तं दक्षं प्रसाद्य ॥ केवलं कला एव लेभे ॥ न
तु अपत्यानि ॥ कृष्णपक्षे ॥ क्षये कृष्णपक्षेऽर्दिताः खंडिताः ॥ सतीः ॥ पाठांतरे क्षये सति पुनर्वर्धिताः ॥ तेनैव च

मनुसुतः साध्या मनोः सुताः ॥ ९ ॥ वसोर्वंशस्य भूयस्त्वादंते निर्देशः ॥ मेमतः ॥ १० ॥ अभिमतिर्नाम पत्नी ॥ तस्या हर्षादयः पुत्राः ॥ ११ ॥ सह आयुः पुरोजवश्च पुत्राः पुरः पुराणि ॥ १२ ॥ स्कंदश्च कृत्तिकासुतोऽग्नेः पुत्रः ॥ पा०

विश्वेदेवास्तु विश्वाया अप्रजांस्तान्प्रचक्षते ॥ साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥ मरुत्वांश्च जयंतश्च मरुत्वत्या बभूवतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ॥ ८ ॥ मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ॥ ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजं ॥ ९ ॥ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ १० ॥ द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वस्तुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ॥ ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ॥ १२ ॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ॥ १४ ॥ वस्तोरांगिरसीपुत्रो विश्वकर्माकृतीपतिः ॥ ततो मनुश्चाक्षुषोऽभूद्विश्वे साध्या मनोः सुताः ॥ १५ ॥ विभावसोरसूतोषा व्युष्टं रोचिषमातपं ॥ पंचयामोऽथ भूतानि येन जाग्रति कर्मसु ॥ १६ ॥ रामानुजाय नमो नमः ॥ १७ ॥

गमातर इति ॥ अग्निभूरिति च ॥ प्रसिद्धेः ततः स्कंदाद्विशाखादयः ॥ १४ ॥ आकृतीपतिः शिल्पाचार्यः ॥ १५ ॥ उषा भार्या ॥ अथ प्रातर्यात ॥ पंचयामो दिवसो जातः ॥ अनंतरं रात्रिस्त्रियामा ॥ प्रदोषप्रत्यूषयो

एकपुरुषमित्यस्यार्थमाह ॥ एकएवेति ॥ तर्यः सर्वसाक्षी ॥ स्वाश्रयः स्वाधारः ॥ अभवे नित्यमुक्तं ॥ असद्भिः ईश्वराः समर्पितैः कर्मभिः ॥ २२ ॥ बिलं वा हष्टनिर्गममित्यस्यार्थमाह ॥ यमात्मरूत्वा प्राप्य बिलस्वर्गपाताललक्ष तद्वनैवेति नावर्तते ॥ तत्स्यामज्योतीरूपं ब्रह्म अविदः अविदुषः ॥ असद्भिः ॥ नश्वरस्वर्गादिसाधनैः कर्मभिः ॥ २३ ॥ बहुरूपां स्त्रियमित्यस्यार्थमाह ॥ नानारूपेति सेविशाणि अलीवविमोहकैः ॥ रजआदिगुणैः अविदिता ॥ तन्निष्ठा ॥ तस्या अवसाने ॥ विवेकं ॥ अगतस्य अप्राप्तस्य ॥ असद्भिः अज्ञातैः ॥ २४ ॥ पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह ॥ तस्याः संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य कुत्सिता भार्या यस्य तद्वत् ॥ तस्या गामीः स्वबंधःख

एकएवेश्वरस्तुर्यो भगवान्स्वाश्रयः परः ॥ तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ २२ ॥ यमात्मनैवेति यद्गत्वा बिलस्वर्गं गतो यथा ॥ प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् ॥ २३ ॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता ॥ तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ २४ ॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् ॥ तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ २५ ॥ सृष्ट्याप्ययकरीं मायां वेलाकूलांतवेगिताम् ॥ मत्तस्य तदविज्ञस्य किमसत्कर्मभिर्भवेत् ॥ २६ ॥

लक्षणाः संसरंतं ......

तं जीवमबुद्धस्याजानतः ॥ असद्भिः बुद्धिविवेकशान्तैः ॥ २५ ॥ नदीमुभयतो वाहामित्यस्यार्थमाह ॥ सृष्ट्यप्ययौ करोतीत्युभयतः प्रवाहा दर्शितः ॥ वेलाकूलप्रवाहपतितानां निर्गमस्थाने ॥ तपोविद्यादि ॥ तस्यांतसमीपे वेगितां ॥ निर्गमप्रतिबधाय क्रोधाहंकारादिभिः कृतवेगां ॥ मत्तस्य तद्देशेन विवशस्य ॥ अतएव तां तथाभूतामविज्ञस्य अविचारयतः ॥ असद्भिर्मायिकैः ॥ यद्वा वेलाकूलसमुद्रस्य व्यवहारस्थानं ॥ तस्य समीपे समुद्रसंश्लिष्टाभ्यां यद्वा भयतो तद्वाद्भिः कृतवेगां नदीमिवेति ॥ एवं समुद्रवल्लस्यात्मनो व्यवहारस्थाने देहजन्म

श्री॰
भाग॰
२०

पंचपंचेमस्यार्थमाह ॥ पंचविंशतितत्वानां पुरुषोंतर्यामी अद्भुतदर्पणं ॥ आत्मस्वरूपप्रकाशकः ॥ अध्यात्मं कार्यकारण संघाताधिष्ठातारं तमबुधस्य असद्भिः मिथ्यास्तातैस्तत्कृतैः ॥ १७ ॥ काचिद्धंसमिमस्यार्थमाह ॥ ऐश्वरमीश्वरप्रतिपाद कं विविक्तपदं विजहत्पंवत्तयेनेतिहंसपदं व्याख्यातं बंधमोक्षावनुदर्शयतीति तथा अनेनविचाः कथायस्मे तिव्याख्यातं ॥ तदज्ञस्य ॥ अनभ्यस्याज्ञाय अविद्योसद्भिर्वेदिमत्तवे ॥ १८ ॥ क्षौरपव्यमिमस्यार्थमाह ॥ कालचक्रमि ति ॥ भ्रमिः भ्रमणात्मकं ॥ तीक्ष्णामिति निष्कर्षयदिति च क्षौरपव्यपदं व्याख्यातं ॥ तदबुधस्य ॥ अतएवाफलस्य नि

पंचविंशतितत्वानां पुरुषोद्भुतदर्पणं ॥ अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥ ऐश्वरं शास्त्र मुत्सृज्य बंधमोक्षानुदर्शनम् विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् १८ ॥ कालचक्रं भ्रमितीक्ष्णं सर्वं निष्कर्षयज्जगत ॥ स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥ शास्त्रस्य पितुरादेशं यो न वेद नि वर्तकं ॥ कथं तदनुरूपाय गुणविस्रंभ्युपक्रमेत् ॥ २० ॥ श्रीशुक उवाच ॥ इति व्यवसिता रा जन्हर्यश्वा एकचेतसः प्रययुस्तं परिक्रम्य पंथानमनिवर्तिनं ॥ २१ ॥

त्मवत्बुध्याकाम्यकर्मोत्सृष्टा नैवेष्प्रपञ्चबाह्यत्वादसद्भिः ॥ १९ ॥ स्वपितुरादेशमिमस्यार्थमाह ॥ शास्त्रस्य स्वपितुर्हितीयजन्महेतोः तदनुरूपाय निवृत्तस्य तु अनुरूपाय निवर्तकमादेशं यो न वेद स कथं गुणविस्रंभी गुणमयप्रवृत्तिमार्गविश्वासवान्सन् उपक्रमेत प्रवृत्तादौ प्रवर्तेत ॥ २० ॥ मोक्षे प्रावस्यबुद्धीनां जीवमायानरात्मनां ॥ शास्त्रकालोपदेशानामज्ञाने किं नु कर्मभिः इति वाचः कूटसंग्रहश्लोकः ॥ इति व्यवसिताः एवं निश्चितवंतः ॥ एकचेतसः ऐकमत्ययुक्ताः तं नारदं प्रदक्षिणी कृत्य मोक्षपुनरावृत्तिमार्गं प्रययुः ॥ २१ ॥ ओं नमः कमलदलविपुलनयनाभिरामाय नमो नमः ॥ २५

निर्भीतः स्वात्मात्मतोयो हृषीकेशः ॥ तस्य पदाम्बुजे ॥ अन्वभवत् ॥ अन्वचरदित्यर्थः ॥ २२ ॥ नाशमुदर्शनेसत्यमिंसंशो वा ॥ शीलेनशालतेशोभंतेइति ॥ तथातेषांकः दतः ॥ स्वप्रजस्त्वमतुत्रत्व ॥ शुचांशोकानांस्थान ॥ २३ ॥ अजेनप्रस्त णा ॥ मदान्तिणांमदस्तसंख्यात ॥ २४ ॥ परमब्रह्मप्रणवंवदस्मामांमंत्रंवा ॥ २५ ॥ रुजस्तंतिवाचामजाणांपतिविस्त

स्वत्रस्मणिनिर्भीतहृषीकेशपदाम्बुजे ॥ अखंडं चित्तमावेश्यलोकाननुचरन्मुनिः ॥ २२ ॥ नाशंनिशाम्य पुत्राणांनारदाच्छीलशालिनां ॥ अन्वतप्यतकः शोचन्सुप्रजस्त्वंशुचांपदं ॥ २३ ॥ सभूयःपांचजन्यायामजे नपरिसांत्वितः ॥ पुत्रानजनयद्दक्षः शवलाश्वान्सहस्रिणः ॥ २४ ॥ तेपिपित्रासमादिष्टाःप्रजासर्गेधृतव्रताः नारायणसरोजग्मुर्यत्रसिद्धाःस्वपूर्वजाः ॥ २५ ॥ तदुपस्पर्शनादेवविनिर्धूतमलाशयाः ॥ जपंतोब्रह्मपरमंते पुस्तत्रमहत्तपः ॥ २६ ॥ अब्भक्षाःकतिचिन्मासान् ॥ कतिचिद्वायुभोजनाः ॥ आराधयन्मंत्रमिममभ्यसंतइडस्पति ॥ २७ ॥ ओंनमोनारायणायपुरुषायमहात्मने ॥ विशुद्धसत्त्वधिष्ण्यायमहाहंसायधीमहि ॥ २८ ॥ इतितानपि राजेंद्रप्रतिसर्गधियोमुनिः ॥ उपेत्यनारदः प्राहवाचः कूटानिपूर्ववत् ॥ २९ ॥ दाक्षायणाः संशृणुतगद तोनिगमंमम ॥ अन्विच्छतानुपदवींभ्रातॄणांभ्रातृवत्सलाः ॥ ३० ॥ भ्रातॄणांप्रायणंभ्रातायोनुतिष्ठति धर्मवित् ॥ सपुण्यबंधुःपुरुषोमरुद्भिःसहमोदते ॥ ३१ ॥

मारायथामासुः ॥ २७ ॥ विशुद्धसत्त्वाश्रयायपरमहंसायनमोधीमहि ॥ २८ ॥ प्रतिसर्गेधीर्येषांतान् वाचःकू टानि ॥ अहष्ट्वांतंभुवइत्यादीनिपूर्वोक्तानिप्राह ॥ २९ ॥ हेदाक्षायणाःसंशृणुतेत्यादि ॥ पुनश्चगदपिप्राहानि गमसुपदेशंअनिच्छतावलोकत ॥ ३० ॥ प्रायणंप्रकृष्टंगमनं ॥ पुण्यमेवबंधुर्यस्य ॥ मरुद्भिर्मरुद्वत्स लैःदेवैः ॥ ३१ ॥ रामानुजायनमः

श्री·
भा·ष
२१

अस्मो त्वं दर्शनीयस्य देमादिति बभ्रार्य ॥३२॥ सध्रीचीनं समीचीनं प्रतीचीनं प्रत्यक्तिलभ्यं अनुपथं ॥ अनुशृणु ॥ पे९
यानं पश्चिमा यामिनीः रात्रीः रात्रय इव ॥३३॥३४॥ पुत्राणां नाशमदक्ष निशम्य शुभ्रुपेनात्त दक्षोऽपि प्रायशोविर९
कः स्यादिति ॥ तदुक्तं तु यद्यर्थं देवर्षिस्तत्रागतः तदा तमुपलभ्य दक्ष आह ॥ साधोरिव लिंगं वेषो यस्य तेन त्वया
नोऽस्मदीयानामर्भकाणां ॥ असाधु अकार्यं कृतम् ॥ तदेवाह ॥ साधूनां सत्यमेव कृतानां भिक्षोर्यो मार्गः संप्रद
र्शितः ॥३६॥ ननु सन्न्यासिनो मार्गः साधुरेव मा दत्त हेतुत्वात् सत्यम ॥ ऋणापाकरणं विना तु महाननर्थ एवेत्या

एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ॥ तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ॥३४॥ सध्रीचीनं प्रती
चीनं परस्यानुपथं गताः ॥ नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ॥३५॥ एतस्मिन्काल उत्पातान्बहू
न्पश्यन्प्रजापतिः ॥ पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥३६॥ चुक्रोध नारदायासौ पुत्रशोकविमू
र्छितः देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन न
स्त्वया ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥३७॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्म
णाम् ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥ ३८॥

८ ॥ ऋणैरिति ॥ जायमानो वै ब्राह्मणस्त्रिभि
र्ऋणैर्ऋणवाञ्जायते ॥ ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचा
रीवासीति श्रुतेः ॥ ऋणैरमुक्तानां अमीमांसितानि ॥ विचारितानि कर्माणि यैः ॥ तेषां तावदृणाद्विमोक्षो नास्ति
तदनवकालभावित्वाच्च ॥ पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन ॥ पितृदेवर्षिऋणाद्विमुक्तिर्नास्ति अतः हे
पाप ॥ विषयभोगत्यागात् इह लोके श्रेयसो विघातः कृतः मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो
विघातः कृत इत्यर्थः ॥ तथा च मनुः ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेव
मानो व्रजत्यधः इति ॥ ३८॥ ॥ रामानुजायनमः ॥ ३८॥ ॥ रामानुजायनमः ॥ रामजीनमः

५

बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा ॥ एवं निरनुक्रोशः निर्घृणः । हरेर्यशोनाशकः सन् । तत्पार्षदानां मध्ये कथं चरसि ॥ ३८ ॥ निर्लज्जत्वमेवाह । ननु त्वामृते भागवताः । सर्वे भूतानुग्रहपरवशाः । त्वं तु भूतविप्रियं कुर्वन् । कथं न लज्जस इति भावः ॥ ३९ ॥ ननु वैराग्यादुपशमः । उपशमात्स्नेहपाशच्छेदनं भवति ॥ न च विरक्तस्य स्वधर्माचरणापाकरणमावश्यकं ॥ यदहरेव विरजेत्तदहरेव प्रव्रजेत् ॥ यदि चेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतेः ॥ अतो वैराग्योपदेशेन तेषां मया त्वपराधः कृत इति चेत्तत्राह ॥ नेत्थं ॥ यद्यपि

एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः । पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥ ३८ ॥ ननु भागवता नित्यं भूतानुग्रहकातराः । ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणां ॥ ३९ ॥ नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा । मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनं ॥ ४० ॥ नानुभूय न जानाति पुमान्विषयतीक्ष्णतां । निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४१ ॥ यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनां । कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं ॥ ४२ ॥

त्वमेवं मन्यसे । तथापि त्वया केवलिना ज्ञानविज्ञानं विना वृथा न वेषेण त्वया ॥ इत्थं मतिचालनेनापि पुंसां विरागो न स्यात् । न च विरागं विनोपशमः ॥ न च तेन विना स्नेहपाशनिकृन्तनमित्यर्थः ॥ ४० ॥ इत्थं विरागो न स्यादित्यत्र हेतुमाह ॥ नानुभूयेति ॥ अननुभूय । विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जानाति ॥ तस्माद्धि विषयानुभवेन तीक्ष्णत्वज्ञानात् ॥ ४१ ॥ अतस्त्वयास्माकमप्रियमेव कृतं ॥ तथापि वर्जनं कुर्म इत्याह यदिति ॥ कर्मसंधानां कर्ममर्यादानां कर्तृमेधानामिति पाठे विप्रियकर्तृमजानतामित्यर्थः ॥ ४२ ॥ सहं यत्त्वं कृतवानसि त

श्री
भाग
२२

तथापि तव भद्रं भविष्यत्येवेत्याह॥ तंतुकृंतन संतानछेदक॥ यद्यस्मात् त्वमभद्रं प्रजानां स्थानं न भवेदिति घट्टकुट्टेन न्यायः॥४२॥ बाढं तथैवेति तत्स्वीकृतवान्॥ ईश्वरोपि प्रतिशापसमर्थोपि तितिक्षेत सहेतेति यत् एतावानेव॥४४॥॥ इति श्रीषष्ठस्कंधे पंचमोध्यायः॥५॥॥ षष्ठे दक्षेणासिक्न्यां कन्याः षष्टिः प्रकीर्तिताः॥ यथा वंशा यतो जातो विश्वरूपादितेः सुतात्॥१॥ नारदस्य शापेनाशमाः शकमानोऽदितिः

तंतुकृंतन यन्नस्त्वमभद्रमचरः पुनः॥ तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदं॥४३॥ श्रीशुक उ० प्रतिजग्राह तद्बाढं नारदः साधुसंमतः॥ एतावान्साधुवादो हि तितिक्षेतेश्वरः स्वयम्॥४४॥ इति श्रीभागवते षष्ठस्कंधे दक्षनारदशापः पंचमोध्यायः॥ श्रीशुक उवाच॥ ततः प्राचेतसोसिक्न्यामनुनीतः स्वयंभुवा॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः॥१॥ दश धर्माय कायादाद्द्विषट् त्रिणव चेंदवे॥ भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः॥२॥ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु॥ यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः॥३॥ भानुर्लंबा ककुद्यामिर्विश्वा साध्या मरुत्वती॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान्शृणु॥४॥ भानोस्तु देवऋषभ इंद्रसेनस्ततो नृप॥ विद्योत आसील्लंबायास्ततश्च स्तनयित्नवः॥५॥ ककुभः संकटस्तस्य कीकटस्तनयो यतः॥६॥ भुवो दुर्गाणि यामेयः स्वर्गो नंदिस्ततो

जनयामास॥२॥ कायकश्यपायादिषड्द्विगुणाः षट्द्वादश याम्या सताः त्रयोदश तस्य धर्मः इंद्वे सोमाय त्रिनव सप्तविंशति॥ तार्क्ष्याय नामांतरं कश्यपायैव॥ अपराः॥ चतस्रो ... ॥१२॥ सापत्यानामपत्यसहितानां॥ येषां प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ततो देवऋषभात्॥५॥ यतः कीकटात् भुवो दुर्गाणि दुर्गाभिमानिनो देवाः यामेयः॥ जाम्याः॥ पुत्रः॥ स्वर्गः॥ ६॥ रामानुजायनमः॥६

अहो मोत्तमा गाधिका विराः॥ संतप्यते प्रवृत्तिनिष्ठैः कर्मभिर्नष्टयेरत्रितिह्य पयानान्विरह्छार्थैर्वाक्येकप हिशातिस॥ तत्राह॥ उवाचेति॥ वत्सभिः॥ पालकाः॥ संतोपि वालिशाअज्ञाय यंकथप्रज्ञाः सत्स्थ॥ व ति खिदेवालकाइति पाठे॥ वालिशास्तेदेतः॥ ८॥ एकएवपुरुषो यस्मिन्॥ तत्राह॥ अहंष्टुल्यनुषंगः॥ ९ ति खिदेवालकाइत्यादि द्वितीयांतानां॥ अविज्ञाय॥ कथंसर्गक विष्णयेति तृतीयेनान्वयः॥ ७॥ पंचपंचानां पं विलं चेत्यादि द्विनीयांतानां॥ अविज्ञाय॥ कथंसर्गक विष्णयेति तृतीयेनान्वयः॥ चविशातेवहुतं॥ गदहज्ञोरपथ्य॥ त्वरैः पविभिर्वज्रेष्व निर्मितमिवातिती त्वां॥ इत्थं चेत्यर्थः स्वयंस

उवाचचाथहृदयस्थाः कथंत्वस्येवैप्रज्ञाः॥ अहंष्ठुंतंमुवोयूयं वालिशावनपालकाः॥ ९॥
तथैकपुरुषराष्ट्रं विलंवाहष्टनिर्गमं॥ बहुरूपाश्चियंचापिपुमांसंपुंस्त्वलीपतिं॥ ७॥
नदीमुभयतोवाहांपंचपंचाङ्गनागृहं॥ क्वचिदृष्टंविचत्र कथंदोषपथ्यं स्वयंभेमि॥ ८॥ क
थ्यस्वपित्तरादेशामविद्वांसोविपश्चितः॥ अनुरूपमविज्ञाय अहोसर्गकविष्णय॥ ९॥ श्रीसु
तनिशम्यायहृदयस्थौ ओत्पत्तिकमनीषया॥ वाचःकूटंतुदेवर्षेः॥ स्वयंविमम्शुर्धिया॥ १०
भः देहंजीवसंज्ञंयदनादिनिजवंधनं॥ अहंह्युतत्स्यानिर्वाणाकिमसत्कर्मभिर्भवेत॥ ११

तंचे भगिमममणस्वभावे॥ ८॥ विपश्चितः सर्वज्ञाः स्वपितृरादेशामात्मनोनुरूपमविद्वांसोऽजानंतः ए
वैके चैकपुरुषराष्ट्रमित्याद्यविज्ञाय॥ अहोकथसर्गकविष्णयेत्यन्वयः॥ ९॥ वाचःकूटंपूर्वोक्तवादे
नअर्थांतरमिवप्रतीयमानंवचनं॥ औत्पत्तिकी सहजा मनीषाविचारशक्तिर्यस्या॥ नयार्थियास्वय
मेवविमम्शुः विचारितवंतः॥ १०॥ नास्देकवाक्यानां तैर्विमृष्टपतिर्णीता नर्थानाह दशभिः॥ अहं
ह्युतमंवरस्वत्र मशाह्यार्थमाद॥ भवितितेनजीवसंस्य लिंगशरीरयंतन्निजवंधनमात्मनोवंधकाशिंग्न

संततिवृद्ध्युपायमाह ॥ पयेति ॥ अंगादेहं दत्त्वा जनानां स्वस्य प्रजापतेः ॥ ५१ ॥ मिथुनस्य यो व्यवायो रतिः स एव धर्मो यस्य सत्वं तथाभूतायां तस्यां ॥ ५२ ॥ मायया निमित्तभूतया स्त्रिया सह मिथुनीभूय भविष्यंति ॥ पु
त्रादिरूपेणोत्पत्स्यते ॥ ५३ ॥ इति श्रीभावार्थदीपिकायां षष्ठस्कंधे चतुर्थोध्यायः ४ ॥ पंचमे नारदे
नाथवाचः कूटैस्तनाशिता न ॥ सुतानां कर्पदक्षो मुंश शापेति निरूप्यते ॥ १ ॥ अपृथग्धर्मशीला

एषां पंचजनस्यांग दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ॥ ५१ ॥ मि
थुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ॥ मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५२ ॥
ततोऽधस्तात्प्रजाः सर्वा मिथुनीभूय मायया ॥ मदीयया भविष्यंति हरिष्यंति च मे बलिं ॥ ५३
श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवांतर्द
धे हरिः ॥ इति श्रीभागवते षष्ठस्कंधे चतुर्थोध्यायः ॥ श्रीशुक उवाच ॥ तस्यां स पांचजन्यां
वै विष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥ १ ॥ अपृथग्धर्मशीला
स्ते सर्वे दाक्षायणा नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं ॥ २ ॥ तत्र नारायणसर
स्तीर्थं सिंधुसमुद्रयोः ॥ संगमो यत्र सुमहन्मुनिसिद्धनिषेवितं ॥ ३ ॥ तदुपस्पर्शनादेव विनि
र्धूतमलाशयाः ॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥ तेपिरे तप एवोग्रं पित्रादेशेन
एकाचारस्वभावाः ॥ २ ॥ तत्र प्रतीच्यां दिशि यंत्रिताः ॥ प्रजाविवृद्धये यत्तान्देवर्षिस्तान्ददर्श ह ॥ ५
सिंधोर्नद्याः समुद्रस्य च यत्र संगमः तत्र स्थनारायणसरो नाम तीर्थं प्रययुरित्यन्वयः समहदिति
विशेषणं ॥ ३ ॥ विनिर्धूतो मलो रागादिर्येषां आशयो येषां ॥ ४ ॥ तान्पुत्रानपि पित्रादेशेन ॥

प्रधावतः पलायमानान् प्रेस्यादावेवतीव्रेण भयेन पलायितं भग्नं च तद् बलं सैन्यं तद् प्रेक्ष्य ॥ पतद् दृष्ट्वा सर्वाणि
बभाषे ॥ १० ॥ न दैवं विहितं नहि कालोपपन्नाम वमरो चितो मनस्वितो हविरो ॥ देमयदे प्रवर्तते ॥ एवं वाचेस्म
गुत ॥ ११ ॥ ततो मत्स्यः इह स्य यशः लोकः स्वर्गश्च यदि स्यात् ॥ प्रयतर्दि श्रेष्ठ मत्स्यपुरूं समीचीनं श्रामं वा ॥ १२ ॥ ब
ह्मसंधारणं वा कलेवरं जघादि तियत्समणको भरत्तः वीरशायी समभूमौ प्रतिहतः अपराङ्मुखः सञ्जयादि
जियत्समणकः नौ द्वाविह यासे सम्मतो मत्स्य ॥ तथा च स्मृतिः ॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ

वृषो ह्यरं स्नातनुगा मनस्वी प्रधावतः प्रेक्ष्य वृषभाषणतत ॥ पलायिते प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण
विदृष्यवीरः ॥ १० ॥ कालोपपन्नो हविरामनसा तदाप्युवाच वाचं पुरुषप्रवीरः ॥ देवे प्रविजितं सुधे वेलोम
मत्स्ययानंदे [illegible]सतां सम्मुखाणाधे ॥ ११ ॥ जातसमत्स्यपूर्वं च पवसर्वतः प्रतिक्रियायस्य न चेहलब्ध्वा ॥ लोकोय
शाश्वायत नायदियं पुंकोनाम मस्तुं न हृणीत पुक्ते ॥ १२ ॥ द्वौ समता विह मत्स्य[illegible] सधारणं
या जितासः ॥ कलेवरं यो भारतो विनयाय दृश्य[illegible] वीर शायिति हृतः ॥ १३ ॥ इति श्रीमहाभारते कर्णेमहा[illegible]
[illegible]ये दशमोऽध्यायः ॥ १० ॥ श्लोक ३० ॥ तपवं शमतोधर्मवचः पत्युरचेतसः नैवाथ ह त्वयन्तमाः
पलायन परान्तप ॥ १ ॥ विशीर्यमाणान् दृष्ट्वा तान् सर्वा मत्स्यर्षभः ॥ कालातकूलैस्त्रिदशैः कालमाना
मनायवत ॥ १ ॥ दृष्ट्वा तत्प्रतं स[illegible]रमर्षितः तान्निवार्यजम्[illegible] भर्त्से दसुवाच ह ॥ २ ॥

परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतस्तु ति ॥ १३ ॥ इत्येकादशो ध्यायः ॥ ११ ॥ एकादशेत्र[illegible]
नस्य वर्तनं ॥ भक्ति स्नानवलोद्वक्ता विग्रावाचानुवर्णितः ॥ १ ॥ संमतः कथयतः पत्येवः कालातक
लैः कालातु वर्तिभिः कालमानो विद्राव्यमानान् ॥ १ ॥ अमर्षितः असहमानः तांस्त्रिदशान् निवार्य ति
भर्त्स्य चेदं वक्ष्यमाणमुवाच ॥ २ ॥ ॥ ॥ ॥

श्री भा. ष. टी. ३६

तदा हृष्टाभ्यां ॥ मातुरुच्चरितैः पुरीषप्रायैः प्रथमं नगपादे देवानां संबोधनं ॥ पृष्ठतो हतैः दैत्यैः किं न किंचि त्ययशो नापि धर्मः तेदेवाहूतनदीति ॥४॥ प्रधने संग्रामे सारं धैर्यं हे क्षुल्लकाः क्षुद्राः मात्रं क्षणमात्रं ॥ अग्रे ति ष्ठत नेचादि हलोकभोगेस्पृहास्ति ॥५॥ सुरगणान् ॥ रिपून् स्तनहान्प्राणो बलं यस्य येन सो व्यनदत् ॥६॥ वृत्रस्य विस्फोटनेन नादेन ॥७॥ उद्यतं शूलं येन ॥ नालं नलानां वनं ॥ उद्धतो मदो यस्य सः यूथपतिर्गजो यथा ॥

किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ॥४॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥५॥ एवं सुरगणान् क्रुद्धो भीषयन्वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो येन लोका विचेतसः ॥६॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥७॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥८॥ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदां ॥ चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥९॥ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोरुविक्रमः ॥ जघान कुंभस्थल उन्नदन्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥१०॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ॥ अपासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक्सप्तधनुर्भृशार्तः ॥११॥ न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां महात्मा ॥ इंद्रोऽमृतस्यंदिकराभिमर्शवीतव्यथक्षतवाहोऽवतस्थे ॥१२॥

सहेंद्रपति ॥१०॥ सप्त धनुः प्रमाणादेशान ॥११॥ सन्नो वसन्नो वाहो यस्य तस्मै ... ॥ अमृतस्यंदी अमृ तस्रावी यः करः तेनाभिमर्शः स्पर्शस्तेन वीतव्यथो रागो ... सन्नो वाहो यस्य ... समन्याभनो

गेनग्रादिरूपेकालेतेरेहत्वमत्तायत्रविज्ञायनडंमतमात्मानंदेहंदेहेनमन्यते॥१०॥नतुसर्वारंभकस्मधातनुरुष्या
दितेवागीगनिशुर्कंगुणादपुप्यइसिद्धकमदहतत्वग्रात्मादंकारः॥५॥नतुसकर्मदारानीवपवस्त्याद्दिरेतुरि
तिमीमांसकाममन्यंते॥तत्राह॥एवमविद्वात॥प्रतीयामेवात्मानमीश्वरेसर्वतंत्रंमन्यते॥नतुपिनाहवः स्वष्ट
रीहरंमन्यते॥ग्रात्रदयस्तदेहतारसन्नाह॥भूतरिति॥स्वयमीश्वरः॥२॥नतुनयाजितेसमममनयादिशकेवना
स्ति॥किमितिमोवलात॥पुद्देप्रवर्तन्यमितग्राह॥ग्रापुरिति॥तत्कालेजयाद्दिकालेविपर्ययः ग्रकोसौहयः
शेत्रः सद्दोवलेष्वाणामसर्वतमस्तुरेवच॥तमतायजनोदेहत्वमात्मानंमन्यतेजडं॥१॥ययाद्दारूमयीता
रीयथाधंत्रमयोमगः॥एवंभूतानिमनुवन्तीयतंयाणिविद्दिभोः॥१०॥पुरुषः प्रकृतिर्मकमात्मा
भूतेंद्रियाशयः॥शक्तुवंयस्यसर्गादौनविनायदनुग्रहात॥११॥ग्रविद्वानेवमात्मानंमन्यतेनाश
मीश्वरं॥भूतैः सृजतिभूतानिग्रसतेत्तानितैःस्वयं॥१२॥ग्रायुःश्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्ययाः
भवंत्येवहितत्कालेयथानिच्छोविपर्ययः॥१३॥तस्मादकीर्तियशसोर्जयापजययोरपि समः स्यात्सु
खदुःखाभ्यांमृत्युजीवितयोस्तथा॥१४॥सत्वंरजस्तमइतिगुणाःप्रकृतेर्नात्मनोगुणाः॥तत्रसाक्षिणमा
त्मानंयोवेदसनवध्यते॥१५॥पश्यमांनिर्जितंशत्रुंवृक्णायुधभुजंमृधे॥घटमानंयथाशक्तितवप्रा
णजिहीर्षया॥१६॥प्राणग्लहोयंसमरइष्वक्षोवाहनासनः ग्रत्रनज्ञायतेमुष्यजयोमुष्यपराजयः १७

यस्मादेवंसर्वमीश्वराधीनंतस्मात समः स्याद्धर्षविषादहीनोभवेत॥१५॥समत्वदृष्टावुपायमाह॥सत्वमिति
हर्षादिभिर्नबध्यते॥१५॥हर्षविषादनिवृत्त्यै॥नवादमेवगुरुरित्याह॥पश्येति॥वृक्णमायुधंभुजश्रय
स्य॥१६॥ग्रनियतजयेभूतद्रूपकेणोपसंहरति॥प्राणाणवव्लहः पणोयस्मिन॥इषवअक्षावाहनं यस्मि
न्नवाहनमेवेनस्तनस्मात्समानानिग्रासनानिफलकायस्मिन॥१७॥ ॥ ॥

राम॰

श्री॰भा॰
ष॰टी॰
५१

गतालीकं निष्कपटं ॥१८॥ भक्तः सेवितवानसि ॥१९॥ यस्य तव खातकोदकैर्गर्तादिजलोपमैः स्वर्गादिभिः किं ॥२२॥ युद्धात्तौ संग्रामस्य पती श्रेष्ठौ ॥२३॥ हे मारिष श्रेष्ठ राजन् ॥२४॥ उत्कृत्तमूले ययोस्ताभ्यां रक्तं स्रवतीति तथा ॥ गोत्रः पर्वतः ॥२६॥ कृत्वाधरामित्यादेर्जग्रासेति तृतीयेनान्वयः ॥ नभोवद्गंभीरेण वक्त्रेण ॥ लेलिहः सर्पः ।

शुक उ॰ ॥ इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥१८॥ अहो दानव सिद्धोसि यस्य ते मतिरीदृशी ॥ भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरम् ॥१९॥ भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीं ॥ यद्विहायासुरं भावं महापुरुषतां गतः ॥२०॥ खल्विदं महदाश्चर्यं यद्रजः प्रकृतेस्तव ॥ वासुदेवे भगवति सत्वात्मनि दृढा मतिः ॥२१॥ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ॥ विक्रीडतोमृतांभोधौ किं क्षुद्रैः खातकोदकैः ॥२२॥ शुक उ॰ ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ॥ युयुधाते महावीर्याविंद्रवृत्रौ युधांपती ॥२३॥ आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः ॥ इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिष ॥२४॥ स तु वृत्रस्य परिघं करं च करभोपमं ॥ चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥२५॥ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोसुरः ॥ छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥२६॥ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं ॥ नभोगंभीरवक्त्रेण लेलिहानोल्बणजिह्वया ॥२७॥ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥२८॥ गिरिराट् पादचारीव पद्भ्यां निर्जरयन्महीं ॥ जग्रास स समासाद्य वज्रिणं सहवाहनं ॥२९॥ महाप्राणो महावीर्यो महासर्प इव द्विपं ॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ॥ हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥

लेलिहत उल्बणया जिह्वया ॥२७॥ कालकल्पाभिः कालतुल्याभिः ग्रसन्निवाक्षिपंश्चालयन् ॥२८॥ निर्जरयन् चूर्णयन् ॥२९॥ महाप्राणो महाबलः महावीर्यो महाप्रभावः ॥३०॥

८

एवं वृत्रः स्वाभिप्रायं निवेद्य भगवन्तं प्रार्थयते अहमिति । तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासः भूयो भविष्यामि भवेयं । असुपतेः प्राणनाथस्य तव गुणान्मम मनः स्मरतु । वागपि तानेव कीर्तयतु । कायस्त्वदेव कर्म करोतु ॥२४॥ ननु किं दास्येन तत्तु भवन्महत्फलानि दास्यामीति चेत्तत्राह नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं च । हे समञ्जस निखिलसौभाग्यनिधे त्वा त्वां विरहय्य त्यक्त्वान्यत् कांक्षे नेच्छामि तर्हि किमिच्छसि तदाह अजातपक्षाः खगाः क्षुधादिभिः पीडिता यथा मातरं । य

अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः । मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक् कर्म करोतु कायः ॥२४॥ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं । न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य कांक्षे ॥२५॥ अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः । प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥२६॥ ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः । त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥२७॥ इति श्रीभागवते ऽष्टमये एकादशोऽध्यायः ॥११॥ ॥

था च क्षुधार्ता वत्सतरा बालवत्साः स्तन्यं । यथा च व्युषितं दूरदेशं गतं प्रियं कामेन विषण्णा प्रिया । तथा मे मनस्तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते त्वामेव द्रष्टुमिच्छतीत्यर्थः ॥ उत्तमश्लोकजनेषु भक्तेष्वेव सख्यं भूयात् । त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोऽपि नेषामासक्तिर्न भूयात् ॥२७॥ इति श्रीभागवते भावार्थदीपिकायां षष्ठस्कन्धे एकादशोऽध्यायः ॥११॥ ॥

रामाय नमः ॥

श्री. म.
ध. टी.
५०

गेंद्रादशेति विषमेन स्वयमुक्ता हिनेत्रं तं ॥ महेंद्रगामहापुरे हत्वस्सवयईयते ॥ १ महापुरुषं श्रीविसं ॥ अप्त प्रत्यपाद के ॥ ॥ पुरांता शिवतन्‌ ॥ कठोरा निद्रा शिवायस्पतन ॥ आदिक्षभामयित्वा ॥ २ तत्र विज्ञायतदागाच्छ ता ॥ विपलत्वरिभमत ॥ यद्दस्थ उल्काच ग्रहो लंकेतहुडे ग्रेहं ॥ शतंपर्वाणि यस्पतन ॥ उरगाराजो वासुकिः तस्य देहस्सदाकारं ॥ ३ ॥ हतैनाक पोलमाते अमेरभमेराव तंच ॥ ४ ॥ पुनस्तनमा दहगोदेहरेड्द्र ॥ ५ ॥ सहातयोने

शषिफः ॥ एवंनिहासर्वपदेह माजेनो सस्वं वं विजयान्तमानः ॥ मूलं प्रश्स्याभपतन्तोरें द्वं यथा मदापु रुषं कैटभोप्स ॥ ५ ॥ ततोपुरांत्रात्रिकदोर जिह्मा विक्षपूर्तनरसाहरें द्व ॥ विनामसें द्राय विनयवी रोहनोसिपापेति रुषाजगाद ॥ ६ ॥ त्वप्रापतनाहिचलन्त्यरेलं त्रिरीरसड प्रेम्समजातवित्कवः ॥ वृत्रं गावद्धी शतपर्वणाहि नद्धं नचतत्स्यो रागरानभोगा ॥ ७ ॥ छित्वैतकबाहुः परिवेणहृत्रः संरथ्य आसाधर हीतवक्त्रं ॥ हत्वैततत्ताईद्रमयोमरे भवसेव हस्तान्यपतन्सवोतः ॥ ८ ॥ हयस्यकर्मीतिमहाद्भुतेनतस्यराग राज्ञारणेसिद्ध संचाः ॥ अप्रतनयस्नातु रुद्रन संकटं निरीस्वहादेतिविचुम्रुसुमर्षेशाम ॥ ९ ॥ इंद्रादतवज्र न गृहविलसिन अश्रुतं स्वहस्तादरिसस्त्रियोपुनः ॥ नमामहृत्योहरआत्मवन्तोन दिस शत्रुनविषादकाल ॥ १० ॥ पुपुरुत्सांकृतविद्दानतायितेजयः सदैकवनतेवपरात्मना ॥ विनैकमुत्पत्तिलयस्थितीश्वर सर्वज्ञमाद्यं पुरुषसनातनं ॥ ११ ॥ लोकाः सपाला यस्येमसंतिविवशावशे ॥ द्विजाद्वृवशि चावदाः स कालइहकारणम्‌ ॥ १२ ॥ ॥

वकिंतकृत्वविजयः एकवकृत्वचित्तवैयदाकृतवचिदपियपुरुसांसदान् योनैवकिंत्वेकत्रैवकदाचिदेवेत्यर्थः ॥ परोदेहआत्मा येषां ॥ पराधीनात्मनामिति वा ॥ आद्यमनादिं सनातनं नित्यं ॥ ११ ॥ पराधीनतामेवाह लोकाइति ॥ यस्यवशेस्थिताः सर्वं विवशाः सेनः ॥ सत्येनिवेशनेद्विजाः पतिताः शिवाप्ताले न ॥ कालकलयतीतिभगवान्‌ ॥ इहजयादौकारणं ॥ १२ ॥ ॥
॥ ॥ ॥ ॥

ह
५०

सद्बुद्धेहन्तपेंद्रप्राद्देवकाम्यया शुद्देच्छ यावस्थितं ॥ भ्रातद्दृगां भ्रातं विश्वरूपं हतवंतं ॥ त्वष्टा संक्रुद्धेन देवो हः पापे
तस्य कर्मसमेत ॥ ३ ॥ योब्रह्मद्दृग्ब्राह्मणां हतवान ॥ विशेषतः स्वगुरुं मम च भ्रातरं स भवानयतः सर्वेमस्थितः
एतद्धि ह्णाभं ज्ञातं ॥ द्विष्टेम मध्यमातं दायी ॥ द्व्य्रसत्तममम्मूलेन निर्भिन्नं दृष्टपतलस्पहृत ॥ हृदयं सप्य तेन
त्वपानिमित्त भूतेन ॥ यद्यप्रविरादेव भ्रातृ त्वष्टागोद्दृंसां पतच्चादिष्ट्या ॥ ४ ॥ स्वर्गकामो यो भवान ॥ ग्रहम्पत
स्वर्गकामो या त्रिकः पशो रिवेतिवा ॥ ५ ॥ मंत्रामस्य स्पष्टवह्निमदप्पदंदं सममदेति ॥ वर्द्धमानसमीप्य वर्द्धमान

स तं त्वपेंद्राद्देवकाम यारिपुवज्राघुधं भ्रातृद्दृगां विलोक्य ॥ स्वारंस्वतत्कर्मन्त्वष्टा सममदः शोकेन मोहे
न द्दृसञ्ज्ञमाद ॥ १ ॥ [illegible] ॥ द्विष्ट्या भवान्मे समवस्थितो रिपुर्यो ब्रह्मद्दा गुरुहा भ्रातृहा च द्विष्ट्या
त्वाणो याद्दृमसत्तमत्वया मन्मूलनिर्भिन्नहृदय हृदा चिरात ॥ ४ ॥ यो लोयज्ञस्याम विदोहि ज्ञाते श्रुरोपाप
स्य चदीतितस्य ॥ विसंभ्यादवेद्देणाशिरा स्पष्टब्रम्य शारिवाकरुणाः स्वर्गकामः ॥ ५ ॥ ह्रीश्रीद्यपाको
त्रिभिकृत्कृतं त्वा स्वकर्मणा गुरुपादप्रणाद्दी ॥ क्रूद्धेणामद्दूलविभिन्न देमद्दृस्पष्टवह्निसमदंतिद
ग्राः ॥ ६ ॥ प्रमेयवेनहन्त्वष्टा समस्त्वा पुष्युत्रलखाः प्रहद्देतिमम तैर्भूत नानायान्नरगणान्विशान त्रिशू
लनिर्भिन्नगालेर्यज्ञामि ॥ ७ ॥ प्रयोद्दरेमेजुलिशे नवीरद्दन्नो प्रमथ्यैव शिरोयदीह ॥ नयान्त्वष्टाणाम्भूतबलि
विधाय मनीखिनापादरजः प्रपत्स्ये ॥ ८ ॥ ॥ ॥

त्रिदेशाः ॥ १ ॥ प्रमेयिपियेज्ञाः इद ॥ त्वान्त्वंत्वष्टा समत्वमस्ययताह्णाः संतोयदि प्रद्दरं नितै भूतनाथान्मे रवा
दीव ॥ यद्यामिकयं भैते ॥ निशातेनीत्तोगिकृतेयन्समत्रिमूलेन नर्मिनिभोगलोपेषांतेः ॥ १ ॥ प्रथोप्रय
वाद्दृ वभोद्रं इदि भवानेव मम शिरोद्दर्त्ता हरिष्यति ॥ नत्वत्तयासनि प्रत्नणाविशक्तकर्मबंधः संस्तम्भो
बलिं देहेन विधाय मनास्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि ॥ ९ ॥ ॥ ॥

श्री॰भा॰
द॰टी॰
३९

जीविनादपि मृत्युरेव ममाभिमत इत्याशयेनाह। सुरेशेति। न हि तोषितं त्वयि पशि। गदेव विफलो या
स्यतीति। संशयं मा कार्षीः कृपणा दृष्टिः प्रयोजनं यस्य सा याङ्ञा याच्ञा निष्फला तथा न स्यात्॥१९॥ म
मोद्यतेदं त्वं वदन्। तं प्रोत्साहयति न निवर्तिति। ते त्वित्त्वाणि कृतः शत्रुं संग्रामदिविसुनायं श्रितः प्रे
रितः॥२०॥ इत्यनेन तमन्मपीडास्यादि त्वयि मा संशयिष्ठा इत्याह। अहमिति। संकर्षणो मन्यतिनियथा
ह। तथा तदीयचरणारविंदे मनः समाधाय। मुनेर्योगिनो गतिमहं यास्यामि। ननु वज्रप्रहारे इत्स्हसो
त्कलितः। छिन्नो ग्रामपाशो विषयभोगलक्षणो यस्य सा अपविद्धलोकः त्यक्तदेहः॥२१॥ ननु हि भगवा

नेरेयाक स्मान्नहितो पिवज्रं पुरः स्थिते वैरिणि मम्यमोचं। मा संशयिष्ठा न रादेव वज्रं स्यान्निष्फलं
कृपणाध्ये व याच्ञा॥२२॥ नन्वेवं वज्रस्तव शक्रतेनसाहादेर्धीचस्तपसा चतेजितः तेनैव शत्रुं
जहि हि विसृज्यं त्रिलोयतो हरि विजयः श्रीगुणास्ततः॥२४॥ अहं समाधाय मनो यथाह संक
र्षणस्तच्चरणारविंदे। त्वद्वज्ररंहो लुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः॥२५॥ पु
सां किल कांतधियां स्वकानां याः संपदो दिवि भूमौ रसातो॥ नराति यद्वेष उद्वेगाधिमदः
कलिर्व्यसनं संप्रयासः॥२६॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र। ततोनुमेयो

भगवत्प्रसादो योडलंभ्यो ह्यकिंचनगोचरोन्यैः॥२७॥ ॥
त॥ संकर्षणः स्वभक्तायमह्यमेव स्वर्गा
दिसंपदो दास्यतीत्त्वयि मा संशयिष्ठा इत्याहुः सामिति। स्वर्गे भूमौ रसातले च या। संपदस्ताः
किलनिष्किंचनराति न दद्याति। नन्वेर्हेतुः यत। यासु ह्यः हेषादयो भवंति॥२८॥ तर्हि स्वभक्तस्य किंवि
धत्ते तदाह। त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते। ननु ग्रायासो स्व
र्गादेवा तु मेयः। नन्वैश्वर्यादिना। अतः स्मभगवत्प्रसादाभावान्न व संपदामभविष्यतीति भावः

श्री·भा·
ष·टी·
४२

तमस्य हरेरिंद्रस्य दुःखहेतुं वक्तुं प्रस्तावकयामाह । वृत्रविक्रमेत्यादिना । अर्थयन् प्रार्थयंतः स्म बृहद्व
धात् ॥ ब्राह्मणवधाद्भीतः सन् ॥ ४ ॥ एनः पापं विभक्तं विभज्य गृहीतं ॥ मार्ज्मि शोधयामि ॥ ५ ॥ वृषाक
पिमिंद्रं ॥ १० ॥ तयादेवादिभिः कारितया स्वेच्छया वधाख्यो ॥ इंद्रस्य तापमसहत् नात्यः । अमुमिंद्रं निर्वृति
राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने । येनासन् सुखिनो देवा हरेर्दुःखं कुतोऽभवत्
॥ ३ ॥ श्रीशुक उवाच ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः । तद्वधायार्थयन्निंद्रं नैच्छद्भीतो बृहद्व
धात् ॥ ४ ॥ इंद्र उवाच ॥ स्त्रीभूद्रुमजलैरेनो विश्वरूपवधोद्भवं । विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्य
हं ॥ ५ ॥ श्रीशुक उवाच ॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् । याजयिष्याम भद्रं ते हयमेधेन मा स्म
भैः ॥ ६ ॥ हयमेधेन पुरुषं परमात्मानमीश्वरं । इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥ ७ ॥ ब्रह्म
हा पितृहा गोघ्नो मातृहाचार्यहाघवान् । श्वादः पुल्कसको वापि शुद्ध्येरन्यस्य कीर्तनात् ॥ ८ ॥ तमश्व
मेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन । हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं ख
लनिग्रहेण ॥ ९ ॥ श्रीशुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं । ब्रह्महत्या हते तस्मिन्नास
साद वृषाकपिं ॥ १० ॥ तयेंद्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत् । ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्य
पि नो गुणाः ॥ ११ ॥ तां ददर्शानुधावंतीं चांडालीमिव रूपिणीं । जरया वेपमानांगीं यक्ष्मग्रस्तामसृ
क्पटाम् ॥ १२ ॥ विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति वादिनीं । मीनगंध्यसुगंधेन कुर्वतीं मा
र्गदूषणं ॥ १३ ॥ नभो गतो दिशः सर्वाः सहस्राक्षो विशांपते । प्रागुदीचीं दिशं तूर्णं प्रविष्टो
नीविशात् । तत्तु धैर्यादिगुणा गुणकस्य कुतः निर्वृतिरित्याह । ह्रीमंतं वाच्यतां निंद्यतां ॥ ११ ॥ यक्ष्मग्रस्तां ह
परोगग्रस्तां ॥ मीनगंधो यस्य स मीनगंधिः । स चासावसुगंधश्च । तस्य गंधेन ॥ १३ ॥ प्रागुदीचीं दिशं

महापुरुषेणाश्रीनारायणेन तस्तत्वे दोदंसितः योगबलेन मायाबलेन च ॥ बलभिदिंद्रः ॥ उच्चकर्तविछेद ॥ ३२
तस्यं कं धरं कंधरां ॥ आसुवेगः ॥ अतिवेगवान् ॥ ज्योतिषां सूर्यादीनां ॥ अयने दक्षिणोत्तरगाति रूपे संवत्सरे
योहर्गणः षष्ठ्यत्रशतत्रयात्मकः तावताहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्यकाले न्यपातयत् ॥ महात्मा
यौवनदिनः ॥ वृत्रहत्यायां वृत्रहननार्थं परिवर्तमानस्य वृत्रस्य ॥ ३४ ॥ वृत्रब्रह्मलिंगोर्मिश्रैः वृत्रदेहतः वीर्यप्रकाश

निपीडितोस्य सुरेंद्रेणान समागतोऽहंगणः ॥ महापुरुषसन्नद्धो योगमायाबलेन च ॥ भित्त्वा वज्रेण ।
तत्कुक्षिं निष्क्रम्य बलभिद्विभुः ॥ ३१ ॥ उच्चकर्तशिरः शत्रोर्गिरिशृंगमिवौजसा ॥ ३२ ॥ वज्रस्तु तत्कं
धरमाशुवेगः कृंतन्समंतात्परिवर्तमानः न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये
॥ ३३ ॥ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रै
र्मुदा कुसुमैरभ्यवर्षन् ॥ ३४ ॥ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानामलो
कं समपद्यत ॥ ३५ ॥ इति श्री ष ष्ठस्कंधे वृत्रवधे द्वादशोऽध्यायः ॥ शुक उ० ॥ वृत्रे हते त्रयो लोका विना
शक्रेण भूरिद ॥ सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः ॥ १ ॥ देवर्षिपितृभूतानि दैत्या देवानुगाः
स्वयं ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः ॥ २ ॥ ॥

कैः ॥ वार्त्रघ्नस्य पापस्य वधस्येष्टतया पाठाय चेत्यादये स्तमिंद्रमभिष्टुवानाश्चाभिष्टुवंतः ॥ ३४ ॥ अलोकं लोकाती
तं भगवंतं ॥ ३५ ॥ इति श्री० षष्ठे० द्वादश ॥ १२ ॥ त्रयोदशे तु वृत्रघ्नस्य ब्रह्महत्यामहाभयात् ॥ चिरं नष्टोऽपि वि
तः शक्रो विस्तुतेनेति निरूप्यते ॥ अनिर्वृतं शक्रमदृष्ट्वैव तस्य मेव प्रतिजग्मुः ॥ २ ॥

॥ रामः ॥

श्री·भा·
ष· टी·
४१

पुरुषस्य हरेराधनं यस्मिंस्तेन ॥१९॥ सर्वदेवमय आत्मा मूर्तिर्यस्य तस्मिन् । वेदमयात्मनीति वा पाठः ॥ ब्रह्मवादिभि
र्वितते अनुष्ठिते सत्यश्वमेधे महेंद्रेणेज्यमाने पुरुषे सति ॥१९॥ तेनैव पुरुषेणैव शून्याय अपनीतः नाशित इत्यर्थः ॥२०॥
अघविक्षालनाय यत्ताः ये तेनत्वं ॥२१॥ पादादि विधानमाख्याने सौति । इदमिति । प्रक्षाल्यते अनेनेति प्रक्षालनं तीर्थपद
स्यानुकीर्तनं यस्मिन् । भक्तेरुच्छ्रयो यस्मिन् । भक्तजनानामनुवर्णितं यस्मिन् । महेंद्रस्य मोक्षो यस्मिन् । मरुत्व

तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत । यथावद्दीक्षयां चक्रुः पुरुषाराधनेन ह ॥१८॥ अथेज्यमाने पुरुषे सर्व
देवमयात्मनि । अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः ॥१९॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ।
नीतस्तेनैव शून्याय नीहार इव भानुना ॥२०॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ।
इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः ॥२१॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थ
पदानुकीर्तनं । भक्त्युच्छ्रयं भक्तजनानुवर्णितं महेंद्रमोक्षं विजयं मरुत्वतः ॥२२॥ पठेदुपाख्यानमिदं
सदा बुधाः शृण्वंत्यथो पर्वणि पर्वणींद्रियं । धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथा
युषं ॥ ॥२२॥ इति श्रीभागवते षष्ठस्कंधे इंद्रविजयो नाम त्रयोदशोऽध्यायः ॥१३॥

तो विशेषेण जयो यस्मिन् ॥२३॥ इंद्रियं तत्पाटवकरं इंद्रसंबंधीति वा आयुष्यं ॥२४॥ इति श्रीभागवतभावार्थ
दीपिकायां षष्ठस्कंधे इंद्रजयः त्रयोदशोऽध्यायः ॥१३॥ वृत्रस्य ज्ञातभक्त्यादि श्रुत्वाश्चर्यं परीक्षिता । हेतुमा
ह चतुर्भिः स त्वाख्यानं च चित्रकेतोरुक्तिभिः ॥१॥ चतुर्दशे तु सहसा पुत्रलब्धस्तु तेन हते । चित्रकेतोरगतिस्त्वह्यदति

स इंद्रः सहस्रं वर्षाणि ॥ पुष्करनालमंतं तत्रावसत् कथंभूतः नलब्धो भोगो येन सः कुतः यद्यस्मात् ॥ इह
नलं वसन् ॥ अग्निदूतस्स्वयं ॥ अग्नेस्य संहृतस्य हविर्भागानेतुं जलेप्रवेशासंभवादलब्धभोगइत्यर्थः पा
ठांतरे ॥ नलब्धोयज्ञभागो येन सः ॥ १४ ॥ त्रिनाके ॥ तत्प्रकंडः त्रियस्मिन्निति त्रिनाकः भूपह्लोकः तृतीयं
नाकं स्वर्गं ॥ तत्र मनुष्यस्य कुतः स्वर्गराज्यं तत्राह ॥ विद्यादिभिरनुभावः स्वर्गपालनसा र्थ्यं यस्य स
सः नहि तस्मिन्नंतिकयमिंद्रस्य पुनः स्वर्गमागमिष्यत्याह ॥ स नहुषः संपदैश्वर्याभ्यां योमदस्तेनांधाबु
द्धिर्यस्य सः ॥ इंद्रपत्न्या शच्या तिरश्चां गतिं सर्पयोनिं नीतः ॥ उपायेन प्रापितः एवं सुपायः नहुषः कि
लकदाचिदिंद्राणीमुवाच ॥ इंद्रस्तावदहं वर्ते तस्मात्त्वं मां भजेति ॥ तया चावेदिते हृद्गतो बृहस्पतिस्तामुवाच

स घ्याव सपुष्करनालतंतून् नलब्धभागो यदिदाग्निदूतः ॥ वर्षाणि साहस्रमलक्षितोंतः संचिंत
यन् ब्रह्मवधाद्विमोक्षं ॥ १४ ॥ तावत्त्रिनाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ स संपदैश्वर्य
मदांधबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या ॥ १५ ॥ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिता
घः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥ १६ ॥

ब्राह्मणवाहनशिबिकामधिरुह्यागतं त्वां भजिष्यामीति ब्रूहि ॥ ततोऽसौ ब्रह्मशापात् पतिष्यतीति ॥ तया च तथो
क्तो नहुषो ब्राह्मणैः शिबिकां वाहयामास ॥ तदा च योऽब्रु ॥ सर्प सर्पेत्यगस्त्यं पदा पस्पर्श ॥ तेन कुपिते
न सर्पो भवेति शप्तो महासर्पोऽजगरोऽभूदिति ॥ १६ ॥ ततः इंद्रः स्वर्गं गतः प्राप्तः कथंभूतः ब्रह्मगिरा ब्राह्म
णवाक्येनोपहूतः सन् ॥ ऋतंभरः सत्यपालको हरिः तस्य ध्यानेन निवारितमघं येन ॥ आगतमपि तं पापं ब्र
ह्मवधरूपमिंद्रं नाभ्यभूत् ॥ वशं नाकरोत् ॥ कुतो दिग्देवतया प्रागुदीच्यां दिशि स्थितया यास्त्री रुद्र
णाभिवितं रक्षितं संतम् ॥ १७ ॥ ॥

श्री॰ भा॰
ष॰ टी॰
१५

तथाप्येतावंतं कालं मम पुत्रो नाभूत्॥ वार्धके जातो मृत इति दुःखमिति चेत्तत्राह॥ यथा धानासु बीजेषु धानाः
बीजोत्तराणि भवंति॥ कासुचित्कदाचिन्न भवंति नोत्पद्यंते नश्यंति च॥ न तु भवंत्येवेति वा नियमः॥ एवमेव भूतानि
पुत्रादिरूपाणि तेषु पित्रादिषु॥ प्रतो धातानां जनकत्वेपि॥ यथा पितृपुत्रादिभावो नास्ति॥ एवमत्रापीति न
शोकः॥ कार्य इति भावः॥ ईशमायया प्रेरितानामेव भवनमभवनं च वस्तुतः॥ ५॥ तस्य वयमवेतायार एतावता न
पुत्रो शोच्यतीयश्चात्राह॥ वयं चेति॥ तुल्यकालावर्तमानकालीनाः जन्मतः प्रागस्त्येः पश्चाच्च यथा न संतः
एवमधुनापि न संति॥ भो राजन्॥ आद्यंतयोरसत्वात्स्वप्नवदित्यर्थः॥ ६॥ असत्वे कथं प्रतीतिः कथं वा परमस्य
जनकत्वाद्यभिमानस्तत्राह॥ भूतैरिति ईश्वरमायया सृष्ट्वा प्रतीतिः॥ निमित्तमात्रत्वेनैव च भूतानां

यथा धानासु वै धाना भवंति न भवंति च॥ एवं भूतेषु भूतानि चोदितानीशमायया॥ ७॥ वयं च त्वं च ये
चेमे तुल्यकालाश्चराचराः॥ जन्ममृत्योर्यथा पश्चात्प्रागेवमधुनापि भोः॥ ८॥ भूतैर्भूतानि भूतेशः
सृजत्यवति हंत्यजः॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत्॥ ९॥ देहेन देहिनो राजन्देहाद्देहोभि
जायते॥ बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः॥ १०॥ देहदेहिविभागोयमविवेककृतः पुरा॥ जा
तिव्यक्तिविभागोयं यथा वस्तुनि कल्पितः॥ ११॥

ममत्वमभिमान इति भावः॥ नन्वीश्वरस्य सृष्ट्यादिभिः सा
धर्म्यमस्ति चेन्न॥ अपूर्णकामत्वाप्राप्तानामिति चेत्तत्राह॥ अनपेक्षोपि बालवल्लीलया
करोतीति॥ ९॥ अयं च जन्मादिस्त्वदस्य देहानामेव न त्वात्मन इत्याह॥ देहेनेति॥ पितुर्देहेन पुत्र
स्य देहो मातुर्देहाच्च॥ अभिजायते॥ यथा बीजादेव बीजं जायते॥ देही तु शाश्वत एव॥ अर्थो भूम्यादिर्यथा
न हन्त॥ १०॥ ननु नश्वरदेहप्रतियोगित्वात् देह्यपि न शाश्वतः स्यात्॥ तत्राह॥ देहदेहिनोरयं पर
स्परप्रतियोगित्वविभागः॥ पुरा अनादिरविवेककृतः॥ अज्ञानकल्पितः जातिः सामान्यं॥ व्यक्ति
र्विशेषः॥ तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धत्वेनावास्तवः

व

१६
३१

तनुजदेपुत्र ॥ नाहं प्रथमं त्वन्मातृश्रीमागतास्मि तीतवज्जगत्यस्मि तं वज्ञं दहशेनदृष्टवत्यस्मि इदानीमपि तव गिरोशु
णोमि ॥ तर्हि किं प्रपुत्र नवयं पुनरागमनेयथान भवति तथा गतास्मि ॥ ४८ ॥ इति षष्ठस्कंधटीकायां चतुर्विंशः
४ ॥ ततः पंचदशे विचक्षणेतोः शोकापनोदनम् कृतं तन्नेत्रोपदेशेन बोदितो गिरा पुत्र ॥ स्नातकोऽयं तत्र शावस
मीपे ॥ १ ॥ तत्रास्यवंधुनाकतमः स्वप्नोमनानुपायी ॥ अयं पुत्रः अंदृचासुपितरिचेत ॥ तन्नेहतः ॥ पुत्रेतिपूर्व

तम्हंतद्दृष्टं दृशेहतमंगलातेमुपियमितंसुदितवीक्षणामानताङ्गं ॥ किंवागतोसपुत्रत्वयमन्यलोकं
तीतेत्वह्नेणानतमृणोमिकलामिरस्ते ॥ ५८ ॥ शुकउ० ॥ विलपंत्यामस्तंपुत्रमितिविज्ञविलापनैः चित्रके
तमर्भशांतमास्मुक्तकंदोरुरोदह ॥ ५९ ॥ तयोर्विलपतोः सर्वेदंपत्योस्तदनुव्रताः तरुडःसतवानार्यः
सर्वमासीदचेतनम् ॥ ६० ॥ एवं कश्मलमापन्नं नष्टसंज्ञमनायकं ज्ञात्वांगिरानाममुनिराजगामसना
रदः ॥ ६१ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ शुकउ० ॥ ऊचतुर्मृतको
पांते पतितं मृतकोपमं शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः ॥ १ ॥ कोयं स्यात्तव राजेन्द्र भवा
न्यमनुशोचति ॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम् ॥ २ ॥ यथा प्रयांति संयांति स्रोतोवेगेन वा
लुकाः ॥ संयुज्यंते वियुज्यंते तथा कालेन देहिनः ॥ ३ ॥ ॥ ॥ ॥

जन्मनि पित्रादिरूपेण संयुक्ताश्चासन् तत एवमरणेन ततो वियुक्ताः संतो वर्तमानजन्मनि कदाचित्तस्यैवा
न्यस्य वा पुत्रादयो भवंति ॥ ते जन्मांतरे तस्यैवान्यस्य वा कलत्रादयः ॥ शत्रुमित्रादयो वा भवंति अतो नायं नि
यमइति भावः ॥ २ ॥ तमेवाभिप्रायं प्रकटयतः ॥ यथेति ॥ स्रोतसः ॥ प्रवाहस्य वेगेन यथा प्रयांति वियुज्यंते
संयांति संयुज्यन्ते ॥ तथा कालवेगेन देहिनो जीवा अपि ॥ ३ ॥

श्री भा० प० ९९

प्रातमस्त ह्येरसतिरूपमनन्तरूपं चेष्टसे॥ तदाह॥ त्वमहो परे ह्येते जीवति अपरस्य बालस्य पासि तिस्तम्॥ तदा हि त्वद् मसृष्टिसामर्थ्याभावे वा तेच सते सति तव सृष्टिनस्यादित्यर्थः॥ सांप्रतं तत्त्व सृष्टे विपरीतो ऽसीति चेत्तत्राह॥ विपर्ययः विपरीतो ऽसि चेत्॥ तर्हि त्वं प्राणिनाम तिदुःखकारित्वात्॥ ध्रुवो ऽनित्यः परः शत्रुरसि न तु कृपालुरित्यर्थः॥ ५४॥ न तु जीवस्यैव कर्मानुसारेण जन्मादि कुर्वतो मम को ऽपराध स्तत्राह न हीति॥ पूर्वे जीवस्यैव पिता म्रियते पितरि जीवत्येव पुत्रो जायत इति॥ कर्मो नास्ति कर्माधीनत्वादिति चेत्॥ तर्हि आत्मकर्मभिस्तज्जन्मा

ऽदो विधात स्वमती ववालि शो यत्तान्मस्त ह्यप्रतिरूपमीहसे॥ परे त्वजीवस्य परस्य यान्मृति र्विपर्ययश्चेन्नमसि ध्रुवः परः॥ ५४॥ न हि क्रमश्चेदिह मृत्युजन्मनोः॥ शरीरिणामस्तु तदात्मकर्मभिः॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि॥ ५५॥ त्वं नाथ नार्हसि च मां कृपणामनाथां त्वक्तु विच त्वपितं रत वशोकतमं अजत्तरेम भवता॥ अनडुत्स्तरं यदह्यांतं नयास्य कृतोन यमेन तद्दरम्॥ ५६॥ उन्निष्टतात तत्रेमे शिशवो वयस्यास्त्वामाह्वयंति नृप नंदनसंविहर्तुम॥ स्तनश्चिरं क्षुधशनया वभवान्परीतो भुंक्ष्व स्तनं पिव शुचो हर नः स्वकानाम्॥ ५७॥

दिकमनस्तु किं मया कृतं॥ न तु मये श्रेयेण विनान्यैः कर्मभिरिदं कथं सिध्येत भवतु नाम तथापि निजसर्गवृद्धये त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव विवृश्चसि छिनत्सि त्वादिको ऽपराध इति॥ न ह्येवं विधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं करिष्यतीति भावः॥ ५५॥ अप्रमत्तं दुस्तरं॥ अप्रमत्तान्तं दुस्तरम्॥ अकरुणो न स इह॥ ५६॥ अशनया क्षुधा॥ ५७॥ ॥

५९

पांशीसन्तदाय्यिंती ॥४४॥ उद्गतेतारके कनीनिके ययोस्तेलोचने यस्मतं ॥४८॥ विभ्रष्टाः शिरोरुहाः यंबरे
वयस्याः सा ॥४८॥ तास्त्रसमस्तोपि ॥४९॥ प्रलपतितः प्रेतकः सन्देहतयं स्मृतं ॥ अत्रगताः प्रहतयोपस्याद

कृतस्तुतिरजानंतीस पत्नीनामवंमदत ॥ सम्पप्रवेति संचिंत्य निरीक्ष्य च वरंहृदे ॥४४॥ शयानंस
चिरंबालमुपधार्यमनीषिणी ॥ पुत्रमानयभद्रेमेइतिधात्रीमचोदयत ॥४५॥ साशयानमुपव्रज्य ह
ष्टाचोन्नारलोचनं प्राणोद्दियात्मभिस्पृक्तं दृष्ट्वासीत्त्यपमङ्गविः ॥४६॥ नस्मास्तदाकर्णवचोमशान्तं
ब्रम्भाः कराभ्यामुरउच्चकैरपि ॥ प्रविश्यराज्ञी त्वरयात्मजं ॥ निकंददर्शवालमसदृशास्तंतसंत ४७
पपात भूमौपरिहृदयाशुचामुमोह विभ्रष्ट शिरोरुहाम्बरा ॥४८॥ ततोन्तःपुराः पुरवर्तिनोजनात
राश्रुतार्थस्तनिशम्यरोदनं ॥ आगात्यतुल्यव्यसनाः सुडुःखिताःस्मास्वपलीकंरुरुडुः कृतागा
सः ॥४९॥ कृत्वामृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतत्सवलंमयि ॥ क्लिष्टानुबंधेधितयाश्रु
वाम्पर्शांविमुक्तिलिताञ्जप्रकृतिर्हिजैर्हृतः ॥५०॥ पपातबालस्यसपादमूलेमरतस्वाविस्त्रस्तशिरो
रुहोम्बरः ॥ दीर्घस्वसन्बाष्पकलोपपरो ... पतोनिरुद्धकंठोनशशाकभाषितुं ॥५१॥ पतितंनिरी
देगारुपचार्पितंतदामतंचबालेसुतमेकसंततिं ॥ जनतस्यरोतीप्रकृतेश्रुडुत्सजंसतीदयानाविल
लापविवशा ॥५२॥ जनदयंकुरुमगांधमंदिरेतंविषिंचतीसांजनबाष्पबिंदुभिः ॥ विकीर्यकेशान्वि
गलत्स्वजस्रतंस्तुशोचविचंकुररीवसुस्वरं ॥५३॥ ॥

योयस्यसोनुप्रकृतिः ॥५०॥ बाष्पकलाभिरस्रुबिंदुभिरुपरोधतः संहृतत्वेननिरुद्धः कंठोयस्य ॥५१॥ उरसु
वार्पितंवकुशोकेनवामांगं ॥ एकमेवसंततिरूपं ॥५२॥ विगलंतः स्रजोयेभ्यस्तान केशान ॥५३॥ ॥

रामायनमः ॥ ५३

शूरसेनानामीशस्यतेजसावीर्येणयोगार्भः सववृधे ॥२॥ ३१ ॥ जातकंजातकर्म ॥ ३२ ॥ अर्बुदंदशकोटयः वेदित
कोष्ठिरेवार्बुदं इतिश्रुतंच प्रयुतंचार्बुदं चेतिप्रयुतानंतरतिदेशात् ॥ ३४ ॥ धनंधनकर्म ॥ आयुष्यं ॥ आयुष्करंकौ
तमानन्यतिशोषः ॥ ३५ ॥ मोहस्यसमुद्भवो यस्मिन् ॥ प्रजाकामस्यनृपेऽजस्रस्तापः ॥ ३७ ॥ सापत्न्येकवचनमर्थं ३८
सापिततस्याशनादेवचित्रकेतोरधारयत् ॥ गर्भंकृतद्युतिर्देवीकृत्तिकाग्नेरिवात्मजं ॥ ३० ॥ तस्या
अनुदिनंगर्भः शुक्लपक्षउवोडुपः ॥ ववृधेशूरसेनेशतेजसाशनकैर्नृप ॥ ३१ ॥ अथकालउपावृत्तेकु
मारः समजायत ॥ जनयन्शूरसेनानांशृण्वतांपरमांमुदम् ॥ ३२ ॥ हृष्टोराजाकुमारस्यस्नातःशु
चिरलंकृतः ॥ वाचयित्वाशिषोविप्रैः कारयामासजातकं ॥ ३३ ॥ तेभ्योहिरण्यंरजतंवासांसि
स्याभरणानिच ॥ ग्रामान्हयान्गजान्प्रादाद्धेनूनामर्बुदानिषट् ॥ ३४ ॥ ववर्षकामानन्येषांपर्जन्यइ
वदेहिनां ॥ धन्यंयशस्यमायुष्यंकुमारस्यमहामनाः ॥ ३५ ॥ कृच्छ्रलब्धेऽथराजर्षेस्तनयेऽनुदिनंपि
तुः ॥ यथानिःस्वस्यकृच्छ्राप्तेधनेस्नेहोऽन्ववर्धत ॥ ३६ ॥ मातुस्त्वतितरांपुत्रेस्नेहोमोहसमुद्भवः ॥
कृतद्युतेः सपत्नीनांप्रजाकामज्वरोऽभवत् ॥ ३७ ॥ चित्रकेतोरतिप्रीतिर्यथादारेप्रजावति ॥ नतथा
न्येषुसंजज्ञेबालंलालयतोऽन्वहं ॥ ३८ ॥ ताः पर्यतप्यन्नात्मानंगर्हयन्त्योऽभ्यसूयया ॥ आनपत्येन
दुःखेनराज्ञोनादरणेनच ॥ ३९ ॥ धिगप्रजांस्त्रियंपापांपत्युश्चागृहसंमतां ॥ सुप्रजाभिःसप
त्नीभिर्दासीमिवतिरस्कृतां ॥ ४० ॥ दासीनांकोनुसंतापः स्वामिनः परिचर्यया ॥ अभीक्ष्णंलब्ध
मानानांदास्यादासीवदुर्भगाः ॥ ४१ ॥ एवंसंदह्यमानानांसपत्न्याः पुत्रसंपदा ॥ राज्ञोऽसंमतवृत्ती
नांविद्वेषोबलवानभूत् ॥ ४२ ॥ विद्वेषनष्टमतयःस्त्रियोदारुणचेतसः ॥ गरंददुःकुमारायदुर्म

र्षानपतेस्तदाउच्यतेनिमित्तेन ॥ ३९ ॥ नपत्युःसंमतानबहुमतां ॥ यद्वा गृहे एवगृहनभार्येति ॥ संमता
भिःसप्रजाः ॥ ४० ॥ दास्यादासीयथातथावयंदुर्भगाः ॥ ४१ ॥ नसंमतानाप्रवृत्तिर्येषांतासां ॥ ४२ ॥ विद्वेषेणनष्टा

त्वमतः स्ववशो वा न वेत्त्यर्थोऽस्त्विति॥ यस्मात्त्वमात्मनः स्ववशः स्वाधीनः स्यात्॥ तस्य वशगा इमे सर्वे भवंति
किंच लोकाः स्वतस्तस्य बलिं यच्छंति॥ आत्मभवात्॥ आत्मनो न स्पीयते॥ नत्वच्छति॥ तत्किं परतो वा स्वतो वा
अलब्धकामं त्वां लक्षये॥२०॥ विडम्बमात्मर्वं त्वेनापि॥२१॥ अलब्धकामत्वे कथयन् दृश्यं याचते भगवन्निति

यस्मात्त्वात्मवशः सेत्या सर्वे वशगा इमे॥ लोकाः सपाला यच्छंति सर्वे बलिमतंद्रिताः॥२०॥ आ
त्मनः प्रीयते नात्मा परतः स्वत एव वा॥ लक्षये लब्धकामं त्वां चिंतयाशबलेक्षणे॥२१॥ शुकउ॥
एवं विकल्पितो राजन् विदुषा मुनिनापि सः॥ प्रश्रयावनतो भ्याह प्रजाकामस्ततो मुनिं॥२२॥ चि
त्रकेतुरुवाच॥ भगवन्किं न विदितं तपोज्ञानसमाधिभिः॥ योगिनां ध्वस्तपापानां बहिरंतः शरी
रिषु॥२३॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्माभिचिंतितं॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया॥
२४॥ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः॥ न नंदयन्त्यप्रजं मां क्षुत्तृट्कामिवापरे॥२५॥ त
तः पाहि महाभाग पूर्वैः सह गतं तमः॥ यथा तरेम दुस्तारं प्रजया तद्विधेहि नः॥२६॥ शुकउ
वाच॥ इत्यर्थितः स भगवान्कृपालुर्ब्रह्मणः सुतः॥ श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः॥
ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत॥ नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्द्विजः॥२८॥ अ
थाह नृपतिं राजन्भवितैकस्तवात्मजः॥ हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ॥२९॥ ॥

चतुर्भिः॥२८॥ अप्रजमपुत्रं॥ क्षुत्तृड्भ्यामन्नपानकामं॥ अपरे स्रक्चंदनादयो न नंदयंति॥२५॥ पूर्वैः पित्रादि
भिः सह गतं प्राप्तं तमः नरकं प्रजया यथा तरेम तथा विधेहि॥२६॥ यज्ञोच्छिष्टं यज्ञशेषं॥२८॥ जन्मना ह
र्षं मरणेन च शोकं प्रददातीति तथा इत्येवमुक्त्वा ययौ॥२९॥ ॥ ॥
॥ रामाय नमः ॥

हृतं व्यवसितं निश्चयो येन ॥ आत्मानं देहं तत्र संनयन् लीनं कुर्वन् ॥ तनुं जहौ ॥११॥ यताः असवः प्राणादयो येन तं तथा ॥ ध्वस्तानि गतानि बन्धनानि यस्य ॥ १२ ॥ अथेन्द्र इति ॥ अशोभत इत्यन्वयः ॥ मुनेः शु

शुक उ॰ ॥ एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुं ॥ परे भगवति ब्रह्मण्यात्मानं सन्नयञ्जहौ ॥११॥ यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबन्धनः ॥ आस्थितः परमं योगं न देहं बुबुधे गतम् ॥१२॥ अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ॥ मुनेः शक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥१३॥ वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत ॥ स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥१४॥ वृत्रमभ्यद्रवच्छक्तमसुरानीकयूथपैः ॥ पर्यस्तमोजसा राजन्क्रुद्धो रुद्र इवान्तकं ॥१५॥ ततः सुराणामसुरै रणः परमदारुणः ॥ त्रेतामुखे नर्मदायामभवत्प्रथमे युगे ॥१६॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिं ॥१७॥ दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया ॥ नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥१८॥ नमुचिः शंबरो बाणो द्विमूर्धा ऋषभो बलः ॥ हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः ॥१९॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥२०॥ सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः ॥ प्रतिषिध्येन्द्रसेनाग्रं मृत्योरपि दुरासदं ॥२१॥ अभ्यर्दयन्नसंभ्रान्ताः सिंहनादेन दुर्मदाः ॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥२२॥ ॥

किभिः शस्त्रिभिर्निर्मितम् ॥ उत्सिक्तः ऊर्जितः मुनिशक्तिभिरिति वा पाठः ॥१४॥ असुरानीकानां यूथपैः पर्यस्तं परिवृतं ॥१५॥ रणः संग्रामः प्रथमे चतुर्युगे त्रेतायुगस्य मुखे प्रारंभे ॥१६॥ नामृष्यन्नासहन्त

॥ २ ॥ २९ ॥ ॥

श्री·भा·
घ· टी·
३२

शतघ्नी च चतुर्हस्ता लोहकंटकसंचिता ॥ भुसुंडी सर्वतो लोहकंटका सप्तनोन्नता दश्यभिधानं ॥४४॥ पुंखो मूलदेशमनुतस्मिन्लग्नोपरपुंखो यथा भवति ॥ तथा नभसि घनैर्नर्जोतीषीवस्थिते ततेषांतद्यासिः स्थिता ॥४५॥ तामेवाहत्त नदति ॥ शस्त्राणाम् ॥ स्त्राणां वर्षाणि वर्षणानि तेषामोघाः ॥ न सेडुः नशकुः सिद्धपथे आकाशे ॥४५॥ तोयाः अस्त्राणां शस्त्राणां च उघाये वांगिरिशृंगैर्द्रुमैरुपलैश्च ॥४६॥ ततिद्रुसैनिकास्त्रा णामस्त्राणां वह्नौ समूहैरहताना ॥ स्तत मृत्यान्स्त्रि मितः सृष्विनः द्रुमादिभिस्त्राविदलिताविशामहद्ध

शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुसुंडिभिः ॥ सर्वतो वाकिरञ्छस्त्रैरस्त्रैश्च विबुधर्षभान् ॥४७॥ ततेदृश्यत संछन्नाः शरजालैः समंततः ॥ पुंखानुपुंखपतितैर्ज्योतींषीव नभोघनैः ॥४८॥ ततः शास्त्रा स्त्रवर्षौघा व्यासेडुः सुरसैनिकान् ॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥४९॥ अथ दा णास्त्रशस्त्रौघा गिरिशृंगैर्द्रुमोपलैः ॥ अभ्यवर्षन्सुरबलं विच्छिदुस्तांश्च पूर्ववत् ॥५०॥ तानस्त्र तान्स्त्रिमितोनिरीक्ष्य शस्त्रास्त्रसंयतान् यत्हतान्ताया ॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्त त्रसुरिंद्रसैनिकान् ॥५१॥ सर्वे प्रयासा अभवन्विमोघाः ॥ कृताः कृता देवगणेषु दैत्यैः ॥ कृष्णा नुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुषती रूक्षवाचः ॥५२॥ ते स्वप्रयासं वितथं निरीक्ष्य हरा वभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥५३॥ ॥

हृतोत्साहा येषां ते तत्र सुभीताः ॥५१॥ कृताः कृताः पुनःपुनः कृताः कृष्णोनुकूलो येषां तेषु देवगणे षु ॥ रुषतीः रुषवत्यः ॥ अकल्याणाः वाचः दुरुक्ताः पुरुषा वाचो यथा महत्सु ते भक्तेभ्य न भवंति तद्वत् ॥५२॥ हतो युद्धे दर्पो येषां आत्तः परैर्गृहीतः सारो बलं येषां ते अप्रति प्रसिद्धा अपि ते देवस्यायोनकृष्णस्य आजिमुखे युद्धारंभे ॥ पतिं विसृज्य पलायनाय मनो दधुः यतो हरावभक्ताः ॥५३॥ ॥

ननुस्वापस्मृतिरस्माकंहि कथंजाग्रद्द्रष्टुःस्मरेत॥ नस्वप्नेनदृष्टमन्यःस्मरति॥ तत्राह उभयंस्वापंप्रति
बोधंचस्मरतः॥ अत्रसंदधतः तयोःस्वापप्रतिबोधयोःप्रकाशकत्वेनप्रदत्वेति॥ नाभ्याख्यातिविशे
नवा॥ एकैकापायेप्यनपायात॥ नज्ञानंपरंब्रह्मतदेवननभिन्नमित्यर्थः॥ यतोवाऽसेदृष्टस्यपो
वनेस्मृतिवद्द्रव्यान्तरत्वेपिस्वापबोधयोःस्मरणंचरतनरतिभावः॥ तदेवंप्रत्नब्रह्मात्मानमेवेहा
त्मत्वेनगः॥ १९॥ विपक्षेदोषमाह॥ यतद्यदि॥ यतत्स्वयिभावमत्स्वरूपंचब्रह्मविस्मृतं तदात्मनःस

उभयंस्मरतःपुंसःप्रस्वापप्रतिबोधयोः॥ अन्वेतिव्यतिरिच्येततज्ज्ञानंब्रह्मतत्परम॥ १९
यदेतद्विस्मृतंपुंसोमद्भावंभिन्नमात्मनः॥ ततःसंसारएतस्यदेहाद्देहोमृतेर्मृतिः॥ २०॥
लब्ध्वेहमानुषींयोनिंज्ञानविज्ञानसंभवां॥ आत्मानंयोनबुध्येतनक्वचित्क्षेममाप्नुयात॥ २१
स्मृत्वेहायांपरिक्लेशंततःफलविपर्ययं॥ अभयंचाप्यनीहायांसंकल्पाद्विरमेत्कविः॥ २२

कात्मान॥ भिन्नंभवतितन्तएतस्यपुंसः॥ संसारोभवति॥ संसारस्वरूपमाह॥ देहाद्देहंजन्मान्तरंउ
तरंजन्म॥ मृतेरनन्तरंमृतिश्चेति॥ २०॥ योमनुष्यदेहोपिभोगादिसंपादनेसाधकंज्ञानार्थंत्वेवचयतित्वयमि
त्याह॥ लब्ध्वेति॥ ज्ञानंशास्त्रोत्थं॥ विज्ञानमपरोक्षंतयोःसंभवोयस्यां॥ २१॥ वैराग्यप्रकारमाह ईहा
यांप्रवृत्तिमार्गे॥ ततईहातः॥ अनीहायांनिवृत्तिमार्गेतअभयंमोक्षोभवतीति॥ स्मृत्वाफलसंक
ल्पाद्विरमेत॥ प्रातान्तरेत्वेअभयंपरिक्लेशःफलविपर्ययश्चनास्तीत्येवंस्मृत्वा॥ २२॥

पतद्धि हगोति सुखायेति त्रिभिः दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ॥६०॥ विज्ञाः उद्यमेषु प्रवीणास्तदभि
मानिनां ॥ स्थानत्रयविलक्षणां तुरीयां बुद्ध्वा ॥६१॥ दृष्टश्रुताभिर्मात्राभिः ऐहिकामुष्मिकैर्विषयैः स्वेन ते
जसा विवेकबलेन ॥६२॥ न त्वतः परः पुरुषार्थोस्तीत्याह ॥ एतावानिति ॥ योगे नैपुण्यं यस्याः सा बुद्धिर्ये
षां परस्यात्मन एकं दर्शनमिति यत् ॥ एतावानेव ॥६३॥ इति षष्ठस्कंधटीकायां षोडशोध्यायः ॥१६॥ ततः

सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः ॥ ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥६०॥ ए
वं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनां ॥ आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां ॥६१॥
दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ॥ ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत् ॥६२॥
एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः ॥ स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ॥६३॥
त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ॥ ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ॥६४॥
शुक उ० ॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ॥ पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे ह
रिः ॥ इति भागवते षष्ठस्कंधे षोडशोध्यायः ॥१६॥ शुक उ० ॥ यतश्चांतर्हितोऽनंतस्तस्यै कृत्वा दिशे नमः ॥
विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥१॥ स लक्षं वर्षलक्षाणामव्याहतबलेंद्रियः ॥ स्तू
यमानो महायोगी मुनिभिः सिद्धचारणैः ॥२॥ कुलाचलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु
रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरं ॥३॥

सप्तदशे मोहं महदहं श्वासयैवे च वरन् ॥ विहस्य गिरि
शांगापान्नदुर्मायाहुं तेगां गतः ॥१॥ यतः यस्यां तस्यै दिशे नमः ॥ नमनं कृत्वा स विद्याधरश्चित्रकेतुः ह
रिं गापयन् रेमे इति ह योरन्वयः ॥५॥ अव्याहतबलानिंद्रियाणि यस्य ॥ नानाविधाः संकल्पैने

अतो हं हन्तार्थो स्मीत्याह ॥ अयेति ॥ अतो हेतोः न वा वल्लोके न परिरक्षा नि रस्ता यागाये विनेमला येषां ॥ त्वदर्शने च मम मनारदो पदेशेन ज्ञातमित्याह ॥ सरविणेति ॥ ५ ॥ यथा चाहमेवं मतिमन्त्रा स यथा च ना रदेना त्रु म र ही तो स्मि त न्म ते न यो मि ण स्तवं म या किं प्र का शनीयमित्याह ॥ विदितमि ति ॥ विशेषेण ज्ञातं प्र का शनी यम् ॥ कियदिवन किमपी त्यर्थः ॥ स वितर्थे याच ये तोनेः प्रकाश

अयं भगवन्नयमधुना त्वद्देवलोकपरिपालनाय मला ॥ सहविषेण यज्ञदिनं ज्ञात्वकेनक पमस्य याभवति ॥ ५ ॥ विदितमनेन समस्तं तव जगदात्मनो गन्नैविद्याचरितं ॥ विज्ञाप्यप रम गुरो किय दिव स वि भूति विव क्ष्यो तैः ॥ ५ ॥ नमस्तुभ्यं भगवते सकलजगत्स्थिति ल ये दयाप्रह रवसिताल्मगतये कृ यो गिनां भिदापरमहंसाय ॥ ५ ॥ ये वै त्वसंतमनुविस्त न: स्व सं तिये वे कि ताननमनुविनयदचके नि ॥ भूमंडलसर्वपापनियम मूर्तिसेन मे भगवते तस्मै ह स्व मर्थं ॥ ५ ॥ श्रीकृष्ण ॥ संस्तुतो भगवानेवमनंतस्तमभाषत ॥ विद्याध रपतिमीतश्चित्रकेतुं कुरुद्वह ॥ ५ ॥ श्रीभगवानुवाच ॥ यन्नारदांगिरोभ्यां ते व्याहृतं मेऽनु शासनम् ॥ संसिद्धोसितया तन्विद्यया दर्शनाच मे

नीयं नालिंत हत ॥ ५ ॥ उक्तलक्षणं भग वतेन प्रणमति ॥ नम इति द्वाभ्याम् ॥ सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय दूरवा सिताय प्रविज्ञाता आत्मगतिः ॥ तिनेन न्वय स्य न स्मै ॥ केषां कृयोगिनां ॥ केन भिदाभेददृष्ट्या ॥ ५ ॥ स्वसंतिये दैवं तेन ॥ वेकिताने पद्मं न मनु चिन्तय ॥ ज्ञानेंद्रिया गणादुत्वकं तिसाहत्वपश्ये ति ॥ ५ ॥ मेत्रु यासनं मद्दिव य दपदे षां तेन च नयाच विद्यया ॥ अस्माद्दर्शनात्संसिद्धासि ५

तदेवाभ्युदयार्थाय स्वयमप्युपदिशति ॥ अहमित्यादिना ॥ सर्वभूतान्यहमेव ॥ भूतानामात्मा भोक्ताप्य
हमेव ॥ भोक्तृभोग्यात्मकं विश्वमहमिति किं तत्राहं मर्थः ॥ यतो हं भूतभावनः भूतानां प्रकाशकः
कारणं च ॥ ननु शब्दब्रह्मप्रकाशकं ॥ परब्रह्म कारणं च तस्य ते उभे ममैव रूपे इत्याह ॥ शब्दब्रह्मेति
शाश्वती शाश्वत्यौ ॥ ५१ ॥ अतस्त्वमेवं पश्येत्याह ॥ लोके भोग्यप्रपंचे भोक्तृत्वेन विततं तत्त्वमात्मा
नम् ॥ लोकं चात्मनि भोग्यत्वेन संततं व्याप्तं ॥ तदुभयं मया कारणात्मना व्याप्तं ॥ मयि चैवोभयं कृ
तं ॥ कल्पितं ॥ स्मरेदिति तृतीयेनान्वयः प्रपंचेपि दृष्टान्त आहारो वा ॥ ५२ ॥ ननु जाग्रदाद्यवस्थासु देहेनाभो
क्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्याह ॥ स्वप्नवज्जाग्रदादिस्थाने

> अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥ लो
> के विततमात्मानं लोकं चात्मनि संततं ॥ उभयं च मया व्याप्तं मयि चैवोभयं कृतं ॥ ५२ ॥ यथा
> सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥ एवं जा
> गरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ येन प्रसु
> प्तः पुरुषः स्वापं वेदात्मनस्तदा ॥ सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां ॥ ५५ ॥

न संभावयन्नाह ॥ यथेति द्वाभ्यां यथा स्वप्ने सुषुप्तो विश्वं गिरिवनादिरूपं देशान्तरस्थमात्मन्येव प
श्यति ॥ स्वप्नमध्ये सुषुप्तिस्वप्ने च पश्यतीत्यर्थः ॥ तथा स्वप्नप्रबोधोत्थितः सन्नात्मानमेकदेशस्थं शय
नदेशस्थितं मन्यते जाग्रदवस्थामनुभवति ॥ ५३ ॥ एवं प्रसिद्धान्यपि जागरणादीनि जीवस्थानानि
जीवो यासु धर्मैर्देहे वस्थानानि आत्मनः मायामात्राण्येव विज्ञाय तेषां द्रष्टारं ॥ अतएव परं तदव
स्थारहितमात्मानं स्मरेत् ॥ ५४ ॥ ननु तेषां द्रष्टारमिति कथमुच्यते ॥ स्वापे दृश्याभावेन द्रष्टृत्वाभा
वात् ॥ तत्राह ॥ येनेति ॥ प्रसुप्तः पुरुषो जीवः येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणं तं

एवंभूतवतेनकालतः परिच्छेदोनास्तीत्युक्तं ॥ देशतोप्यपरिच्छेदमाह ॥ त्वत्पादिभिरिति ॥ सर्वस्मात्पूर्वस्माद्
गुणात्गुणान्तरेऽधिके यह्वतः ॥ यत्तत्वगिग्रन्तुकल्पः प्रायतल्पः पततिपरिभ्रमति ॥ ततस्तस्मादनन्तत्वं ॥३८॥
यस्मादेवंपरमेश्वरस्त्वमेव ॥ अन्येदेवास्तवविभूतयः ॥ अतस्त्वांविहायविषयकामतयान्योपासकाश्च
निमंदाइत्याह ॥ विषयेष्वत्तरत्तस्मायेवांतेनराकाराः पशवः कृतैयविभूतीरिंद्रायाउपासते ॥ तत्तुपर
त्वांततः किंतत्राह ॥ नेषामितिनिरस्त ॥ उपास्यनाशानंतरं ॥ यथाकुलमनुराजकुलनाशानंतरम् यथात
त्सेवकानामाशिषोनश्यंतितद्वत् ॥३८॥ अयंचपरमोवधिः ॥ मत्स्यवित्तश्रपेव ॥ विषयकामनाश्रपिहेयपर

त्वत्पादिभिरेषकिलाहृतः सप्तभिर्दशगुणोत्तरैरंडकोशः ॥ यत्रपतत्यणुकल्पः सहांडकोटिको
टिभिस्तदनंतः ॥३९॥ विषयतृष्णोनरपशवोयउपासतेविभूतीर्नपरंत्वां ॥ तेषामाशिषईशतद
नुविनश्यंतियथाराजकुलम् ॥३८॥ कामधियस्त्वयिरचितानपरमरोहंतियथाकरंभबीजानि
ज्ञानात्मन्यगुणमयेगुणगणतोस्यद्वंद्वजालानि ॥४१॥ जितमजितनतदाभवताययदाह भागवतंध
र्ममनवद्यं ॥ निष्किंचनायेमुनयश्रात्मारामायमुपासतेःपवर्गाय ॥४२॥ ॥

मत्तयस्त्वयिरचिताः कृता
अत्ररोहंतिदेहान्तरोत्पत्तयेनभवंति ॥ करंभबीजानिभर्जितबीजानियथा ॥ यतोस्मत्त्वस्यगुणमयाणा
दवद्वंद्वसमूहाभवंति ॥ अतः कामनापिनिर्गुणस्यतवभजनाद्धेतोर्नैर्गुण्यंभवतीत्यर्थः ॥ किलकामत
यापित्वदाराधनंयदामोक्षहेतुः ॥ तदाकिंवक्तव्यं ॥ भगवन्त्धर्ममाहात्म्यमितिवक्तुं तत्संप्रदायप्रवर्तक
त्वेनचभगवंतंस्तौतिजितमितिजितमिति ॥४२॥ यदाभवान् ॥ भागवतंधर्ममाह ॥ तदाभगवंतंत्वयाजितंसर्वोत्कर्षे
णस्थितं ॥ तत्रहेतुः येनिष्किंचनाः ॥ सनत्कुमारादयोमुनयस्तेयंभवंतमपवर्गायसेवंतेतेनभवताजितं

श्री॰ भा॰
ष॰ टी॰
५२

अनवद्यतामेवाह । विषममतिर्यत्र यस्मिन्भागवते धर्मे नास्ति । यदन्यत्र अन्यस्मिन्काम्यधर्मे तत्तु सोऽपि वेदोक्तो
ऽपि तन्नवद्य एवेत्याह । विषमधिया शत्रुमरणादिकामनया रचितो विहितो यः । स ह्यविशुद्धः । रागद्वेषादि
मत्वात् । क्षयिष्णुः नश्वरफलत्वात् । अधर्मबहुलश्च हिंसादिबाहुल्यात् । तदुक्तं शांबरस्वामिभिः । उभ
यमिह वेदनाय फलत्वे तेऽर्थाः तथा श्येनत्यादि । एतत्प्रपंचयति । ४२ । कः क्षेमः किं फलं न किंचिन्निजपर
योः स्वस्य परस्य च । स्वपरद्रुहा स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन यतः स्वद्रोहाद्देहं तकायक्लेशा

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र । विषमधिया रचितो यः स ह्यविशुद्धः
क्षयिष्णुरधर्मबहुलः । ४१ । कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण । स्वद्रोहात्तव
कोपः परसंपीडया च तथाऽधर्मः । ४२ । न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः । स्थि
रचरसत्त्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः । ४३ । न हि भगवन्नघटितमिदं त्वद्दर्शना
न्नृणामखिलपापक्षयः । यन्नाम सकृच्छ्रवणात्पुल्कसकोऽपि विमुच्यते संसारात् । ४४ ॥

त्तव कोपः पीडा संभवति तदुक्तं गीतासु । कर्षयंतः शरीरस्थं भूतग्राममचेतसः । मां चैवांतःशरीरस्थं
तान्विद्ध्यासुरनिश्चयानिति तथा परसंपीडया धर्मः च शब्दात्तव कोपश्च । ४२ । अतस्त्वया रागाद्यभावेऽपि
कथं विद्वेदमार्गे प्रवर्तयितं काम्यधर्मोऽभिहितो न तत्तव दृष्ट्या भागवतधर्मेण तत्तु तद्द्रोहेनेत्याह न व्यभि
चरति न परमार्थं जहाति तवेक्षा दृष्टिः अव्यभिचारे हेतुः स्थिरेति स्थावरजंगमप्राणिसमूहेषु समदृ
ष्ट्या भागवतास्तं धर्मं सेवंते ४३ एवंभूतत्वस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भव

सकलायेसांनन्तपरिहृदाः तेषां निकरासमूहस्तस्यकरः कमलानां कुड्मलैर्मुकुलैरुपलालितं ॥ चरणारविंदयुगलं यस्य तस्य संबोधनं परमउत्कृष्टपरमेष्टि सर्वेश्वर ॥२५॥ पूर्वं सनारदो गिरां ग्रामं गामेत्यगिरांः प्राधान्येनोक्तः चित्रकेतोः पुत्रप्रदत्वेनतस्य ऋष्युक्तत्वात ॥ इत्थं नारदोगिभिस्सांमांकयया चिनितानारदस्य प्राधान्यनिर्देशः ॥ तदुपदेशेनतस्यवैराग्यमन्येनः प्रभोहे समर्थ ॥२६॥ यथायथावद्धारयामास ॥२७॥ विद्याधराधिपत्यं चावांतरफलं लेभे अप्रतिहतमसवलितं ॥२८॥ कतिपयैरहोभिः विद्यया इदेनदीप्तेनमनसा

ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते ॥२५॥ शुकउ० ॥ भक्तायेतांप्रपन्नायविद्यामादिश्यनारदः ययावंगिरसासाकंधामस्वायंभुवंप्रभो ॥२६॥ चित्रकेतुस्तुविद्यांतांयथानारदभाषितां धारयामाससप्ताहमब्भक्षः सुसमाहितः ॥२७॥ ततश्चसप्तरात्रांतेविद्ययाधार्यमाणया विद्याधराधिपत्यंसलेभेप्रतिहतंन्टप ॥२८॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगामदेवदेवस्यशेषस्यचरणांतिकं ॥२९॥ मृणालगौरंशितिवाससंस्फुरत्किरीटकेयूरकटित्रकंकणं ॥ प्रसन्नवक्त्रारुणलोचनंवृतंददर्शसिद्धेश्वरमंडलैःप्रभुं ॥३०॥ तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलांतःकरणोभ्ययान्मुनिः ॥ प्रवृद्धभक्त्याप्रणयाश्रुलोचनः प्रहृष्टरोमानमदादिपूरुषं ॥३१॥

गतिर्यस्य ॥२९॥ मृणालवद्गौरं शितिनीलंवासो यस्य तं नीलांबरं ॥ स्फुरंति किरीटादीनि यस्य ॥ कटित्रं कटिसूत्रं प्रसन्नानि वक्त्राणि यस्य ॥ अरुणानि लोचनानि यस्य तं चतं च ॥३०॥ दृष्ट्वा च तमादिपुरुषं अभ्ययात् ऋषिरागतः अनमत् नाम ॥ कथंभूतः तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य स्वच्छममलं चांतःकरणं यस्य प्रणयेनाश्रुयुक्ते लोचने यस्य ॥ प्रहृष्टानि रोमाणि यस्य सः ॥३१॥ ॥

तेनप्रसमीरितंस्तोतुंचिरंनैवाशकत्समाशाकत् ॥ तत्रहेतुः उत्तमश्लोकस्यपदाब्जयोर्विष्टरमासनंउपमेहयन्
श्रुभिःसिंचन् ॥ प्रेमगाद्गदः ॥ अखिलानांवर्णानांनिर्गमउच्चारणंयस्मात्सः ॥ ३२ ॥ मनीषयाबुध्यामनःसमा
धायैतद्वक्ष्यमाणंबभाषे ॥ प्रतिलब्धावाक्येनसात्वतशास्त्रेविग्रहोयस्यतं ॥ ३३ ॥ अन्योन्यप्रेमज्ञानंदर्शि
भक्तान् ॥ स्वामिसेवकान् ॥ अभिनंदन्नुदास्तौति दशभिःपंचभिर्विभुम् ॥ हे अजित ॥ अन्यैरजितोपिभवान्
साधुभिर्भक्तैर्जितः स्वाधीनएवकृतः ॥ येतैर्भवान्अतिकरुणः ॥ तेपिचनिष्कामा अपिभवताविजिताः।
योभवानकामात्मनामात्मानमेवददाति ॥ ३४ ॥ ननुभक्तैरेवजितस्तुनिकथं ॥ स्वईमानेरपिसृष्ट्यादि
कर्तृभिरन्यैरीश्वरैर्जेयसंभवात् ॥ तत्राह तवेतिजगतउदयादीनितेवविभवः ॥ विभवोमहिमालीले

सउत्तमश्लोकपदाब्जविष्टरंप्रेमास्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमोपरुद्धाखिलवर्णनिर्गमोनैवाशक
त्प्रसमीडितुंचिरम् ॥ ३२ ॥ ततःसमाधायमनोमनीषयाबभाषएतत्प्रतिलब्धवागसौ ॥ नियम्यस
र्वेंद्रियबाह्यवर्तनंजगद्गुरुंसात्वतशास्त्रविग्रहं ॥ ३३ ॥ चित्रकेतुरुवाच ॥ अजितजितःसममति
भिःसाधुभिर्भवान्जितात्मभिर्भवता ॥ विजितास्तेपिचभजतामकामात्मनांयआत्मदोतिकरुणः ॥
३४ ॥ तवविभवःखलुभगवन्जगदुदयस्थितिलयादीनि ॥ विश्वसृजस्तेंशांशास्तत्रमृषास्प
र्धंतेपृथगभिमत्या ॥ ३५ ॥ परमाणुपरममहतोस्त्वमाद्यंतांतरवर्तीत्रयविधुरः ॥ आदावंतेपिचसत्वानांय
द्ध्रुवंतदेवांतरालेपि ॥ ३६ ॥

लीलावत् ॥ आदिशब्देनप्रवेशनिर्गमादीनि ॥ विश्वसृजस्तवअंशांशाब्रह्मादयो
नेश्वराःकिंतुतेतवांशांशाःयुरूपस्तस्यांशाःतैरेवंस्थितेपिपृथक्पृथगीश्वरावयमित्यभिमानेनतद्व
थैवस्पर्धंते ॥ ३५ ॥ तमेवसृष्ट्यादिकर्तृत्वेनउपपादयति ॥ परमाणुःसूक्ष्मंमूलंकारणंपरममहत्
प्रतिमकार्यंतयोस्त्वमेवाद्यंतांतरवर्ती आदावंतेमध्येच ॥ वर्तितुंशीलंयस्यसः ॥ एवंत्रयविधुरः
आद्यंतमध्यशून्योभवः ॥ तेवत्वयासत्वेनेतन्नभवाः कुतइत्याहसत्वानांसत्वस्यनास्तीत्यातोकार्याणां

श्री·भा
ष·टी
५०

निवृत्तद्वैतदृष्टिर्यस्माव ॥१९॥ न्यस्ता निरस्ताः शक्त्यूर्मयः ॥ मायानिमित्ता रागद्वेषाद्यो येन ॥२०॥ मनसा सह वचसि उपरते अप्राप्यापरते सति ॥ य एक एव प्रकाशते ॥ वचसीति सर्वेंद्रियोपलक्षणं ॥ सोऽस्मानव्यात ॥ सदसत्परः कार्यकारणयोः कारणं ॥२१॥ तदेवाह ॥ यस्मिन्निदं कार्यं कारणं तिष्ठति ॥ अप्येति च यतश्च जायते ॥ मृण्मयेषु घटादिषु मृ जातिर्मृत्सामान्यमिव ॥ सर्वानुस्यूतत्वेन तस्मै ॥२२॥ ननु सर्वानुस्यूतं चेज्ज्ञानवत्प्रतीयेत कथं मनोवचसोरप्राप्तिस्तत्राह ॥ यन्न स्पृशन्ति ॥ असवः प्राणाः क्रियाशक्त्या न स्पृशन्ति ॥ मन आदीनि च ज्ञानशक्त्या न विदुः ॥ तद्यदन्तर्बहिश्च व्योमवद्विततमपि ॥ तन्नतोऽस्मि ॥२३॥ तेषां तदज्ञाने हेतुमाह ॥ देहेन्द्रियादयोऽमी यदंशविद्धाः यच्चैतन्यांशेनाविष्टाः सन्तः कर्मसु

तस्मै विज्ञानमात्राय परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये ॥१९॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ॥ हृषीकेशाय महते नमस्तेऽनंतमूर्तये ॥२०॥ वचस्युपरतेऽप्राप्य य एको मनसा सह ॥ अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥२१॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृण्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥२२॥ यन्न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्च विततं व्योमवत्तन्नतोऽस्म्यहं ॥२३॥ देहेंद्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरंति कर्मसु ॥ नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टृपदेशमेति ॥२४॥ ॥ ॥ ॥ विषयेषु चरंति नान्यदा तस्मयोः अन्यदा सुषुप्त्यादौ नैव प्रवर्तन्ते ॥ यथा ॥ अप्रतप्तं लोहं न दहति ॥ अतो यथा लोहमग्निप्रवेशाद्दाहकं सदग्निरिति नाम लभते ॥ एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां प्रवर्तमाना देहादयस्तन्न स्पृशन्ति ॥ न विदुश्चेति भावः जीवस्तर्हि द्रष्टृत्वाज्ज्ञाता तु नेत्याह स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञां न देव इति प्राप्नोति नान्यो जीवो नाम अस्ति नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः ॥ यद्वा द्रष्टृत्वव्यपदेशाद्द्रष्टृसंज्ञं जीवमपि न देव इति ज्ञानाति ॥ न हि जीवस्तं ज्ञातुमीष्टे ॥ तदुक्तं ॥ समसमस्तोत्रे ॥ देहासवोऽक्षा त्यादि ॥२४॥ ॥ ॥

१०

पङ्कं स्वहृदृत इति स्वहृदो वा बंधवा मम माइ निचतदप्याह ॥ नह्यस्येति ॥ तत्र हेतुः एकः स्वहृदादिसंगरहितः तत्कृ
तः गुणदोषयोर्हि नाहि तयोः ॥ कर्तॄणां मित्रादीनां याः सर्वा धियः विविधा बुद्धयः तासां द्रष्टा साक्षी ॥१०॥ यद्वो
क्तं भुंक्ष्व भोगान्पित्र्यादित्यत आह ॥ गुणमुक्तं दोषं दुःखं क्रियाफलं च राज्यादिकं ॥ उदासीनवत्ते हेतुः परावर
दृक्कारणस्य कार्यस्य च साक्षी न तु भोक्ता ॥ यतः ईश्वरः देहादिपारतंत्र्यशून्यः अतएवंभूतस्य मम भवद्भिः

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥१०॥
नादत्त आत्मा हि गुणं न दोषं न क्रियाफलं ॥ उदासीनवदासीनः परावरदृगीश्वरः ॥११॥ श्रीशुक उ० ॥ इ
त्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ॥ विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृंखलां ॥१२॥ नि
र्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं ॥१३॥ बालघ्न्यो
व्रीडितास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं ॥१४॥ यमुनायां महारा
ज स्मरंत्यो द्विजभाषितं ॥१५॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ॥ गृहांधकूपान्निष्क्रांतः सर
ः पंकादिव द्विपः ॥१६॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः ॥ मौनेन संयतप्राणो ब्रह्मपुत्राव
वंदत ॥१७॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥१८॥ नम
स्तुभ्यं भगवते वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥१९॥ ॥ ॥

स्याकं च संबंधाभावाच्छोकं मा कुरुतेति वाक्यार्थः ॥११॥ द्विजभाषितं अंगिरसा प्रोक्तं शुक्रादीनां दुःखदेहतत्त्वस
त्यः पुत्रकामता स्मरंत्यः ॥ निमित्तस्मरः ॥ सस्मर इति भावः ॥१४॥ निर्विद्य पंकतुल्यं गृहं विहाय निष्क्रमणमति
धीरस्य तस्यैव योग्यं तान्यस्येति सदृष्टांतमाह ॥ सरः पंकाद्विपो गजः इवेति ॥१५॥ कृताः शुभाः पुण्यजलक्रियाः
पितृतर्पणाद्या येन संयतप्राणो नियतेंद्रियः ॥१६॥ नमो धीमहि ध्याये मनसा नमस्यामः इत्यर्थः ॥१८॥

श्री भा०
द० टी०
४९

कर्मभिर्भ्राम्यमाणत्वे दृष्टांतः॥ यथा वस्तूनि पण्यानि क्रयार्हाणि कर्तृषु व्यवहर्तृषु॥ एवं जीवोऽपि योनिषु
जन्मकेषु॥१८॥ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वे सदृष्टांतमाह द्वाभ्यां॥ नित्यस्य जीवस्यापि॥ अर्थस्य प-
दार्थस्य॥ अनित्यः॥ अनियतः॥ विक्रयादिना संबंधनिवृत्तेः॥१९॥ एवं योनिगतः पित्रादिसंबंधं प्राप्तोऽपि स जीवो
नित्यः देहजन्मादितत्त्वस्य तन्मयभावात्॥ अत एव वस्तुतो निरहंकृतः॥ अहमस्य पुत्र इत्यभिमानशून्यः य-
त्र पित्रादौ संबंधिभिर्यावदुपलभ्यते कर्मवशात्पालनवर्धनेन तावदेव तत्स्वत्वं पितृत्वादेः तत्संबंधित्वं॥ स्वत्वं॥ ननु विक्र-
याद्युत्तरकालमपि अस्य वसेवं संबंधः यदुक्तं॥ कलेवरं॥ समाविशेति॥ न च तत्र तस्मिन्कलेवरे ममेदमिति स्वत्वं
निहत्वं इति सदृष्टांतमाह नित्यस्य चिरकालावस्थायिनः सुवर्णादेः॥ योनिगतो देहं प्रविष्टः यदा देहे

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु॥१८॥ नित्यस्यार्थ-
स्य संबंधो ह्यनित्यो दृश्यते नृषु॥ यावद्यस्य हि संबंधो ममत्वं तावदेव हि॥१९॥ एवं योनिगतो जीवः
स नित्यो निरहंकृतः॥ यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत्॥२०॥ एष नित्योऽव्ययः सूक्ष्म एष
सर्वाश्रयः स्वदृक्॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः॥२१॥ ॥

ननु जीवस्य तत्र तस्मिन्दे-
हे स्वत्वे॥ तन्मरणोत्तरकालमपीत्यर्थः॥ शेषं समानं॥२०॥ जीवस्य नित्यत्वं साधयति एष नित्य इत्यत्र हेतुः अ-
व्ययः॥ अपक्षयशून्यः तत्कुतः सूक्ष्मः जन्मादिशून्यः तच्च कुतः सर्वाश्रयः जन्मादिमतो देहादेराश्रयः
न तु देहाद्युत्पाद्यः यतः स्वदृक् स्वप्रकाशः॥ सर्वाश्रयत्वमुपपादयति॥ आत्ममायागुणैरात्मानमेव वि-
श्वं विश्वात्मकं सृजति॥ तदात्मानं स्वयमकुरुतेति श्रुतेः॥ उपादानकारणत्वात्सर्वाश्रय इत्यर्थः जी-
वस्य ब्रह्मतोऽभिन्नत्वाद्ब्रह्मण एव चिद्धर्मकिंचिद्विशिष्टस्येश्वरत्वेन स्रष्टृत्वाज्जीवः सृजतीति वाचोयुक्तिः
यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन स्रष्टृत्वं भोग्यस्य च सर्वस्य भोक्तृत्वात् अयत्वात्सर्वाश्रयत्वं चोक्तमिति द्र

ग्रंगिरसोपदिष्टं तत्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारद उपदिशति ॥ एतामिति ॥ उप
निषदां परं श्रेयो यस्मिन्नस्यां येन निषत्त ॥ तां प्रतीच्छ गृहाण ॥ द्रष्टास्यसि भवान् ॥ २८ ॥ अतुलं तदनधिकं च समानाधि
कस्य संपन्नं महिमानं प्रापुः ॥ उपैति ॥ उपैष्यति ॥ २९ ॥ इति श्री षष्ठे पंचदशोध्यायः ॥ १५ ॥ षोडशे तत्सुतो जीवविवि
शोकीकृत्य तं नृपम् । आदिदेश महाविद्यां नारदः शेषतोषणीम् ॥ १ ॥ आदौ तावत्तत्सुतमुखेनैव पितृपि
त्रादिसर्वयोनिमिथ्यात्वं दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥ ४ ॥ शेषमवशि

नारद उवाच ॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम ॥ यां धारयन् सप्तरात्राद्द्रष्टा संकर्षणं प्रभुं ॥ २७ ॥ य
त्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महि
त्वं प्रापुर्भवानपि परं न चिरादुपैति ॥ २८ ॥ इति श्रीभागवते महापुराणे षष्टस्कंधे पंचदशोध्यायः १५
श्रीशुक उ० ॥ अथ देवऋषी राजन् संपरेतं नृपात्मजम् ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ॥ १ ॥
नारद उ० ॥ जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया भृशं ॥ २ ॥
कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ॥ भुंक्ष्व भोगान् पितृप्रत्तानधितिष्ठ नृपासनम् ॥ ३ ॥ जी
व उवाच ॥ कस्मिन् जन्मन्यमी मह्यं पितरो मातरोऽभवन् ॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनि
षु ॥ ४ ॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्व एव हि सर्वेषां भवंति क्रमशो मिथः ॥ ५ ॥

॥ शेषमायुरसित्वं अपमृत्युना त्वत्तत्वादित्यर्थः तदेव केवलं प्रविशेत्स्थितो जीव उवाच ॥ यद्यं [illegible] लेशेन
शरीरे स्थित्वेति तेषाम् ॥ ३ ॥ मत्पितरस्ते [illegible] प्राचुर्यं [illegible] किं न क्रियन्ते [illegible] संबंध
स्यानियतत्वमाह ॥ बंधवो विवाहादिभिः संबंधिनः ॥ ज्ञातयः सपिंडाः अरयो घातकाः मित्राणि रक्षकाः मध्य
स्था उभयव्यतिरिक्ताः ॥ साधारणाः विद्विषा द्रव्यादिनिमित्तेन द्वेषिणः उदासीनास्तद्व्यतिरिक्ताः इति भेदः ५

श्री·भा·
ष·टी·
४८

हे शूरसेन इमे सर्वेऽपि कायशोकादिप्रदाः किंच ॥ आगमापायित्वेन गंधर्वनगरतुल्याः गंधर्वनगरं यथा कस्मादेव
कचिदायाति अपयाति चेति ॥ प्रसिद्धं ॥ तदेवमनित्यत्वं शोकादिहेतुत्वं चागमापायित्वं चोक्तं मिथ्यात्वम-
प्याह ॥ स्वप्नश्च माया च मनोरथश्च यथा तद्वत् ॥२३॥ मनोभवाः मनोमात्रविजृंभिताः अत्र हेतुः अर्थेन ता-
त्त्विकस्वरूपेण विनैव दृश्यमानाः ॥ तत्कुतः यस्मात् क्षणांतरेण न दृश्यंते ॥ तात्त्विकत्वे हि क्षणांतरे बाधो न
स्यात् ॥ अतो मनोमात्रविजृंभितत्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः ॥ नन्वेते उपाय उपाय हेतोरिति मीमां-
सकाः प्राहुः तत्कुतो मनोभवत्वं तत्राह ॥ कर्मभिः कर्मवासनाभिः कर्माण्येव ध्यायतः पुंसो मनस

सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः ॥ गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥२३॥ दृश्यमाना
विनार्थेन न दृश्यंते मनोभवाः ॥ कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन् ॥२४॥ अयं हि देहिनो
देहो द्रव्यज्ञानक्रियात्मकः ॥ देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥२५॥ तस्मात्स्वस्थेन मन-
सा विमृश्य गतिमात्मनः ॥ द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश ॥२६॥ ॥

एव निमित्तात् ॥ कर्माण्यभवन् ॥ पाठांतरे कर्मभिर्ध्यायतो ममाभिध्यायत इत्यर्थः कर्मणोऽपि मनोभवत्वान्त-
त्सार्थाः अर्था अपि मनोभवा एवेति भावः ॥२४॥ तदेवं ममतास्पदानां पुत्रादीनां तत्त्वमुक्तं ॥ तत्र देहसंबंधो
मूलमित्याह ॥ अयं हीति ॥ हीत्यवधारणे ॥ अयं द्रव्यज्ञानक्रियात्मकः ॥ अधिभूताधिदैवाध्यात्मरूपो
देह एव देहिनो देहाभिमानिनो जीवस्य विविधान् क्लेशान् ॥ संतापांश्च करोतीति तत-
था ॥२५॥ स्वस्थेनावधानेन गतिं तत्त्वं ॥ ध्रुवार्थमर्थ इति विश्रंभं विश्वासं ॥ एकांतिकं त्यज ॥ ततश्च उपशममा-
श्रय ॥२६॥ ॥

१८

आधिनाम्लानवक्रं ॥ ९ ॥ १० ॥ उत्तमश्लोकलिंगं येषां ते ॥ ११ ॥ १२ ॥ ममग्राम्यबुद्धेः बोधे समर्थौ विनिवा ॥ अतो युवा
भ्यां ज्ञानदीपः प्रवर्त्यतां ॥ १८ ॥ महापुरुषगोचरं हरिभक्तं ॥ १९ ॥ २० ॥ तदैव गृहं प्रति ममागतोस्मि ॥ २१ ॥ रायः

शुक उ॰ ॥ एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ॥ विमृज्य पाणिना वक्रमाधिम्लानमभाषत ॥ १० ॥ रा
जोवाच ॥ कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसां ॥ अवधूतेन वेषेण गूढाविह समागतौ ॥ ११ ॥ च
रंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ॥ मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः ॥ १२ ॥ कुमारो ना
रद ऋभुरंगिरा देवलोसितः ॥ अपांतरतमो व्यासो मार्कंडेयोथ गौतमः ॥ १३ ॥ वसिष्ठो भगवान्रामः क
पिलो बादरायणिः ॥ दुर्वासा याज्ञवल्क्यश्च जातूकर्णस्तथारुणिः ॥ १४ ॥ रोमशश्च्यवनो दत्त आसुरिः
सपतंजलिः ॥ ऋषिर्वेदशिरा धौम्यो मुनिः पंचशिखस्तथा ॥ १५ ॥ हिरण्यनाभः कौसल्यः श्रुतदेव ऋ
तध्वजः ॥ एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः ॥ १६ ॥ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ॥ अंधे तम
सि मग्नस्य ज्ञानदीप उदीर्यतां ॥ १७ ॥ अंगिरा उ॰ ॥ अहं ते पुत्रकामस्य पुत्रदोस्म्यंगिरा नृप ॥ एष ब्रह्मसुत
ः साक्षान्नारदो भगवानृषिः ॥ १८ ॥ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ॥ अतदर्हमनुस्मृत्य महापुरु
षगोचरं ॥ १९ ॥ अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हसि ॥ २०
तदैव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहं ॥ २१ ॥ अधुना पुत्रिणां ता
पो भवतैवानुभूयते ॥ एवं दारा गृहा रायो विविधैश्वर्यसंपदः ॥ २२ ॥ शब्दादयश्च विषयाश्चला राज्यविभू
तयः ॥ मही राज्यं बलं कोशो भृत्यामात्यसुहृज्जनाः ॥ २३ ॥ ॥ ॥

टी॰ २३ चलाश्चानित्याः किं वा महीति ॥ २२ ॥ ॥ ॥

त्राणोनष्टसंततीनांसांपरायिकंपिंडोदकानि आदितआरभ्यश्रीकृष्णचरितकीर्तनस्यफलमाह यएतदितिद्वाभ्यां शंतमानिपरममंगलानिपरमहंसगतौश्रीकृष्णएवमेकादशस्कंधभा

कृष्णपत्न्योविशन्नग्निंरुक्मिण्याद्यास्तदात्मिकाः बंधूनांनष्टगोत्राणामर्जुनःसांपरायिकं २१ हतानांकारयामासयथावदनुपूर्वशः द्वारकांहरिणात्यक्तांसमुद्रोप्लावयत्क्षणात् २२ वर्जयित्वामहाराजश्रीमद्भगवदालयं नित्यंसन्निहितस्तत्रभगवान्मधुसूदनः २३ स्मृत्याशेषाशुभहरंसर्वमंगलमंगलं स्त्रीबालवृद्धानादायहतशेषान्धनंजयः २४ इंद्रप्रस्थंसमावेश्यवज्रंतत्राभ्यषेचयत् श्रुत्वासुहृद्वधंराजन्नर्जुनात्तेपितामहाः २५ त्वांतुवंशधरंकृत्वाजग्मुःसर्वेमहापथं यएतद्देवदेवस्यविष्णोःकर्माणिजन्मच कीर्तयेच्छ्रद्धयामर्त्यःसर्वपापैःप्रमुच्यते २६ इत्थंहरेर्भगवतोरुचिरावतारवीर्याणिबाल्यचरितानिचशंतमानि अन्यत्रचेहच श्रुतानिगृणन्मनुष्योभक्तिंपरांपरमहंसगतौलभेत २७ इति भा० द० म० पु० पा० प० द० स्कंधे एक त्रिं० अ० ३१

वार्थस्यप्रदीपिका स्वात्मानंधांतभीतेन श्रीधरेणप्रकाशिता २७ इतिश्रीमद्भा० श्रीधर मि ता भा थैं क त्रिं० अ० ३१

पतोउक्तप्रकारांपदवींगतिं तदेवंभगवतःस्वलोकंगच्छतःस्वदेवादीनामपितत्प्राप्तियोग्यत्वेउपा
यस्तित्यतस्त्वांमीतिमाह दारुकइत्यादि कृष्णरामौमातवपश्यन्तः सदुक्तिभिः स्मृत्याविततया।

यएतांप्रातरुत्थायकृष्णस्यपदवींपरां प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्यनुत्तमां
१४ दारुकोद्वारकामेत्यवसुदेवोग्रसेनयोः पतित्वाचरणावस्रैर्न्यषिंचत्कृष्णवि
च्युतः १५ कथयामासनिधनंवृष्णीनांकृत्स्नशोनृप तच्छ्रुत्वोद्विग्नहृदयाःजनाः
शोकविमूर्छिताः १६ तत्रस्मत्वरिताजग्मुःकृष्णविश्लेषविह्वलाः व्यसवःशेर
तेयत्रज्ञातयोघ्नंतआत्मनः १७ देवकीरोहिणीचैववसुदेवस्तथासुतौ कृष्णरामाव
पश्यंतःशोकार्ताःविजहुःस्मृतिं १८ प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः उ
पगुह्यपतींस्तातचितामारुरुहुःस्त्रियः १९ रामपत्न्यश्चतद्देहमुपगुह्याग्निमाविश
न् वसुदेवपत्न्यस्तद्गात्रंप्रद्युम्नादीन्हरेःस्नुषाः २०

उक्तयोरेवश्रुतैःनाहंप्रकाशःसर्व
स्ययोगमायासमावृतः मूढोयंनाभिजानातिलोकोमामजमव्ययमित्यादिभिःनश्यतो।

लीलाविषयाः कथाः । अतो ब्रह्मापि कार्त्स्न्येन नाभिधातुं नेशः । ननु यदि साकल्येनाभिधातुं न शक्यते
तर्हि किं तदभिधानेन तत्राह ॥ ४० ॥ विविधैर्दुःखैरेव दवो दावानलस्तेनार्दितस्य पीडितस्य अत उ-
त्तितीर्षोः पुंसः । भगवतो या लीलास्तासां कथास्तासां रसस्तन्निषेवणमन्तरेणान्यः प्लवः ॥ उप-
करणसाधनं न भवेत् ॥ उपायान्तरासंभवात् ॥ तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ॥ ४१ ॥
संहितानारदः ॥ ४२ ॥ अतो नरनारायणाद्यसंप्रदायप्रवृत्तिमाह पुराणसंहितामिति त्रिभिः स ॥ ४३ ॥
एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्त्वधाम्नः ॥ लीलाकथास्ते कथिताः समास-
तः । कार्त्स्न्येन नाजोऽप्यभिधातुमीशः ॥ ४० ॥ संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो
भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुःखदवार्दि-
तस्य ॥ ४१ ॥ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय
सः ॥ ४२ ॥ स वै मह्यं महाराज भगवान्बादरायणः ॥ इमां भागवतीं प्रीतः संहितां वेदसंमिताम्
॥ ४३ ॥ इमां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः
॥ ४४ ॥ इति श्रीद्वादशस्कंधे चतुर्थोऽध्यायः ॥ श्रीशुक उ० ॥ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवा-
स वै बादरायणः प्रीतः सन्मह्यमिमां संहितां प्राहेति पूर्वेणान्वयः ॥ ४२ ॥ असौ सूत इति पुरतः स्थि-
तं मंशत्वा निर्दिशन्नाह ॥ नैमिषालये नैमिषारण्यस्थाने ॥ ४४ ॥ इति श्रीभावार्थदीपिकायां द्वादशे
चतुर्थः ॥ ४ ॥ पञ्चमेन समासेन परब्रह्मोपदेशतः ॥ राज्ञस्तक्षकसंदेशान्मृत्युभीतिनिवारणं ॥ ५ ॥
तस्यैतां शृण्वतो भयं प्राप्नोतीत्यभिप्रेत्य पुराणार्थं समनुस्मारयति ॥ अत्रेति ॥ अयं भावः ॥ न गतः

भा
टी
२२

त्वेविति॥ पशुबुद्धिमविवेकं यस्मात्त्वं नेत्स्यसि॥ कृतइत्यतआह॥ नजातइति॥ यथादेहः प्रागभूत्वा एवाद्य जातो नेत्स्यति॥ नचैवं त्वं हृदं नाभः नचायं जातोऽसि अतो न नेत्स्यसि॥ ५॥ नतु बीजांकुरवत्स्वस्मात्स्वरूपेणास्वयमेव भवति॥ यथाहस्मृतिः अंगादंगात्संभवसि हृदयादभिजायसे॥ आत्मा वै पुत्रनामासि तेजीव शरदः शतमिति तत्र पुत्ररूपा दीजस्थिवपो बहुरूपेणाप्यि स्वयमेव भवसि पिता पुत्ररूपेणापि आत्मा स्तोति पा नाविति स्मृतेः अत सत्युत्रपत्नत्त कथं न नेत्स्यामीति चेन्नेत्याह॥ ५॥ भूत्वा पुत्ररूपोयाद्भूय एवान बीजांकुरवन्न भविष्यसि॥ यस्माद्देहादेव्यतिरिक्तस्त्वं यथानलः काष्ठान्॥ देहाद्देहोजायते नात्मेति त्वं तु राजन्मरिष्ये इति पशुबुद्धिमिमां जहि॥ नजातः प्रागभूतो यदेहवत्त्वं न नेत्स्यसि॥ ५॥ नभवि ष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान्॥ बीजांकुरवद्देहादेव्यतिरिक्तो यथानलः॥ ३॥ स्वप्ने यथा शिरश्छेदं पश्येद्वा तथात्मनः स्वयं॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः॥ ४॥ घटे भिन्ने यथाकाश आकाशः स्याद्यथा पुरा॥ एवं देहे मृते जीवो ब्रह्मसंपद्यते पुनः॥ ५॥ मनः सृज ति वै देहान्गुणान्कर्माणि चात्मनः॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः॥ ६॥ स्नेहा धिष्ठानवर्त्यग्निसंयोगो यावदीयते॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः॥ ७॥।

भावः जन्मादीनां देहधर्मत्वं दृष्टान्तेन प्रपंचयति स्वप्ने इति॥ ५॥ स्वप्ने यथात्मनः शिरश्छेदं प श्यति॥ एवं जागरणे पि यस्माद्देहस्य पंचत्वादिकं पश्यति॥ ततस्तद्द्रष्टा त्वमजोऽमरश्चासि एव ति तस्मात्मा नोऽमरस्येमध्यः॥ ननु तर्हि आत्मनः स्थितिस्थिवा भ्यामनुमेयो भवाप्ययौ॥ नभवाप्य यवत्त्वनामभिव्यक्तोदयलक्षणाद्रूपादि॥ ५॥ यस्माद्देहोपाधिकोयमात्मनो जन्मादिसंसारभ्र मः॥ तस्माद्देहोपाधिनिवृत्तौ मुच्यते इति घटाकाशदृष्टान्तेनाह॥ घटे भिन्ने घटे भिन्ने तदन्तर्गतमेव काशः आकाश एव स्याद्यथा एवं देहे मृते तत्वज्ञानेन लीने सति तादेतल्लयं संभावयितुं मायां कृतेनात्मनो देहाद्युपाधिसंबंधप्रकारमाह॥ ६॥

دکم سکندھ [illegible]

दशमस्कंधउत्रार्ध

त्विनप्रथमेपंचाध्यायीनिरूप्यते तत्रप्रथमेध्यायेवैराग्योत्पादनाययदुकुलस्यब्रह्मशापापदेशेना
त्मन्वतंविषयसुखानामप्यनित्यताप्रतिपाद्यते ततश्चतुर्भिर्निमिजायंतेयसंवादेनसपरिकरपरम
तत्वनिरूपणं ततःषष्ठेभगवदुद्धवसंवादप्रस्तावः ततस्त्रयोविंशत्याउद्धवंप्रतिभगवतागनिरूपणं त

ॐनमोभगवतेवासुदेवाय॥ श्रीबादरायणिरुवाच॥
कृत्वादैत्यवधंकृष्णःसरामोयदुभिर्वृतः भुवोवतारयद्
भारंजविष्ठंजनयन्कलिम् १॥

शूलकोडेत्येवमेकत्रिंशताध्यायैरेकादशस्कंधस्यप्रवृत्तिः तस्यचयथामति व्याख्या
[illegible]तेमेशूलप्रसंगार्थेएवंस्कंधार्थमनुवर्णतिश्लोकद्वयेन कृत्वेति भुवोभारंजन् भुव
[illegible]मोक्षश्च्यः जविष्ठंवेगवत्तरंयातिशीघ्रंहिंसापर्यवसायिनमित्यर्थः कलिंकलहं १

कोपिताइति सपत्नैर्दुर्योधनादिभिः कोपिताः कोपं कारिताः सवकृपया भवति तया व
नन्नार्थः तदेवाह दुर्द्यूतहेलनकचग्रहणादिभिरिति दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रह
णं द्रौपद्याः केशाकर्षणं एतानि आदिर्येषां गरदानजतुगृहदाहादीनां तैः कृत्वा ये कोपिताः
तान्निमित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान्मिलितान्नृपान्हत्वा क्षितेर्भारं निरहरत्
कोपिताः तानितरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः यावत्प्रकटदैत्याः पूतनादयः
हतवान् ये च दैत्याः वा पवक्ष्मनास्थिताः तान् परस्परं निमित्तं विधाय हत्वा भूभारमपाकृत्

कोपिताः सवकृपांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् कृ
त्वा निमित्तमितरेतरतः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः २
भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः मन्येऽव
नेर्ननु गतोऽप्यगतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते ३ रामकृष्ण

तवानित्यर्थः २ अपि च भूभारेत्यादि अन्याश्च भूभारभूताः राजपृतनाः सेनाः राजानश्च तेषां पृतनाश्चेति
वा स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिच्छलेन निरस्य हत्वा बाहुभिरिति बहुवचनेन स्वतश्चत
भुजाभिप्रायेण नन्वेवं कृत्स्नं त्रिकोष्ठ्यतीति ज्ञात्वा कथं तमस्यापाद्वान् इत्यत आह अप्रमेयः अप्रमातम
शक्यः चिन्तामाह मन्य इति नन्विति वितर्के अवनेर्भूमेर्भारो यद्यपि लोकप्रतीत्या गतः तथाप्यहमग
तमेव मन्ये यद्यस्मात् अविषह्यं सोढुमशक्यं यादवं कुलमित्यनेनैव स्ववंश्यत्वात्स्वयं हननमनुचितमिति

स्कं ३
२

विधिःप्रकारःमैगल्लायनेन च किंचदेवर्षिद्विजगवांपूजा भवद्भिश्चदेहतःदेवलोकेपरमसुखोभविष्य
तीतिभावः मधुद्विषोवाक्यमाकर्ण्यतथेत्यभिनेयउत्तीर्यसमुद्रं सर्वश्रेयोपबृंहितमित्यत्रसंधि
रार्षः भगवतानुज्ञैरपिसर्वैःश्रेयोभिःसंहितंचक्रुःपीयतइतिपानं मैरेयकंमदिराविशेषं मधु

विधिरेषपरिष्ठोऽभिमैगल्लायनसुतमे देवर्षिद्विजगवांपूजाभूतेषुपरमोद्भवः ९ इतिसं
वैस्समाकर्ण्ययदुश्रेष्ठामधुद्विषः तथेतिनौभिरुत्तीर्यप्रभासंप्रययूरथैः १० तस्मिन्भ
गवतादिष्टंयदुदेवेनयादवाः चक्रुःपरमयाभक्त्यासर्वश्रेयोपबृंहितं ११ ततस्तस्मि
न्महापानंपपुर्मैरेयकंमधु दिष्टविभ्रंशितधियोयद्वैभ्रंशयतेमतिः १२ महापा
नाभिमत्तानांवीराणांदृप्तचेतसां कुलमायाविमूढानांसंघर्षःसमजायत १३
ययुधुःक्रोधसंरब्धावेलायामाततायिनः धनुर्भिरसिभिर्भल्लैःगदाभिस्तोमरर्ष्टि
भिः १४ ॥ रामकृष्णौजयति ॥

सर्वादिष्टेनदैवेनविभ्रंशितधियःनह्यन्यथातस्मिन्स्यानेतदुचितमितिभावः यस्यदैवैःरमैः
कुलमायानामितिमुख्यादेवतःसंघर्षःकलहःततोयुयुधुश्च १४ ॥ ॐनमोभगवान्यैः

श्री
भा० ए०
टी०
१४८

पतत्पतत्पतन्तस्तत्र चलन्त्यः पताका येषु तै रथादिभिर्मिथः समेत्यान्यहन्नन्योन्यमित्यर्थः दद्भिर्दन्तैरिवाभि
घ्नः समेतेत्यस्य प्रपंचः प्रद्युम्नेत्यादिचतुर्भिः गदौ श्रीकृष्णस्य भ्राता एकः पुत्रश्चापरः सुमित्रसुरथावन्ये
मित्रौ वितिदेश्यमाधे असुरथनामा वा कश्चित् मदांधेन मदेन तमसा वलान्कारिताः दाशार्हादि

पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि मिथः समेत्याश्वतरैः सुदुर्म
दान्यहन्छरैर्दद्भिरिव द्विपा वने १५ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरु
द्धसात्यकी सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रसुरथौ समीयतुः १६ अन्ये च
ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः अन्योन्यमासाद्य मदांधकारिता
जघ्नुर्मुकुंदेन विमोहिता भृशं दाशार्हवृष्ण्यंधकभोजसात्वता मधर्बुदा माथुरशूरसेनाः १७
विसर्जनाः कुकुराः कुंतयश्च मिथस्तु जघ्नुः सुविसृज्य सौहृदं १८ पुत्रा अयुध्यन्पितृभिर्भ्रातृभि
श्च स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहन्ज्ञात
य एव मूढाः १९ शरेषु हीयमानेषु भज्यमानेषु धन्वसु शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रे
रुरेरकाः २० तावज्रकल्पा ह्यभवन्परिघा मुष्टिना धृता जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणा
स्तु तं च ते २१ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः हंतुं कृतधियो राजन्नापन्ना आत

यो वचतत्तद्देशपाः मधर्बुदाः माथुराः शूरसेनाश्च तत्तद्देशीयाः भ्रातृभिश्च निभ्रातृजादिरपि ज्ञातयो समप्रतियो
धिश्चिज्ञात्ज्ञातेर्मातृमात्राद्यादित्यर्थ मित्रैश्च मित्राणि च सुहृदः सुहृद्भिरहनन् घ्नतः शेषधनुषस्तेः कुंर्त्यरुः

१४८

श्री· भा·ए· टी· ४५५

तत्प्रपंचयति प्रत्याकृष्टमिति यस्मिन्रूपे लग्नं नयनं प्रत्यावर्तयितुमबला न शेकुः यच्च कर्णरंध्रेण प्रविष्टं यत्सतामात्मनि लग्नं लिखितमिवातिष्ठत ततो न सरति न निर्गच्छति यस्य श्रीः शोभा सा कीर्तिमानाकवीनां वाचां रतिमुल्लासविशेषं जनयति तेषां मानं जगति ख्यातं तेन नयतीति किंनु वक्तव्यं यच्च विश्वरूपं जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा युधि मृतास्ते तत्साम्यं सारूप्यमीयुः प्राप्ताः तत्केनट्

प्रत्याकृष्टं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं यच्छ्रीर्वाचां जनयति रतिं किं नु मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ३ ऋषि वाच दिव्यभूम्यंतरिक्षे च महोत्पातान्समुत्थितान् दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ४ श्री भ उ च एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ५ स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ६ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ७ ब्राह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं गोभूहिरण्यवासोभिर्ग॰

पैणारित्यन्वयः दिवि सूर्यपरिवेषादीन् भुवि भूकंपादीन् अंतरिक्षे दिग्दाहादीन् महोत्पातान् स्वयमेवोत्पादितत्वाद्दृष्ट्वेति कारान्यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः अस्माभिः प्रत्यक् पश्चिमवाहिनी तत्राभिषिच्य स्नात्वा ब्राह्मणांश्च तैः कृतशांतिकाः सेनागावादिभिः पूजयिष्यामः ८

४५५

एवंकृतोपदेशोजगद्गुरुंप्रणमति भवभयमिति भवःसंसारःभयंचजरारोगादिनिमित्तंतद्भयं१
निवृत्तानांप्रवृत्तानांचभृत्यवर्गाणांयथायोग्यमपहंतुंयोमृतद्वयमुपजह्रेउद्धृतवान् तदेवाह
वेदसारमेकंकिंतत् ज्ञानविज्ञानरूपंचतत्सारंश्रेष्ठंचभृंगवद्भृंगोयथापुष्पमकोपयन्नेवामृत
मुपसंहरति तथास्वयंमूर्तवेदानुमारणैव उदधितश्चैकं तच्चोभयंयथायथंभृत्यवर्गानपा
ययत् तंनतोस्मीति येनानुकंपितविश्वमुद्धवप्रश्ननिर्णयैः तंवंदेपरमानंदंनंदनंदनरूपिणं

भवभयमपहंतुंज्ञानविज्ञानसारंनिगमकृदुपजह्रेभृंगवद्वेदसारं अमृतमुदधितश्चा
पाययद्भृत्यवर्गान्पुरुषमृषभमाद्यंविस्नुसंज्ञंनतोस्मि ३ श्री ग ते का श
स्कं भग उद्ध सं दे को त्रि ध्यायः २९ श्री जो च ततोमहाभागव
तउद्धवेनिर्गतेवनं द्वारवत्यांकिमकरोद्भगवान्भूतभावनः १ ब्रह्मशापोपसंसृष्टे
स्वकुलेयादवर्षभः प्रेयसींसर्वनेत्राणांतनुंसकथमत्यजत् २

३ का शे को त्रिंशः २९ त्रिंशेतुप्रभासपतिलसंमौशलव्याजतोहरिः स्वधामगंतुमन्विछ
न्संजहारनिजंकुलं विप्रशापप्रभावेणसुपत्तिंसंहृतिंमौशले कथावसानेतत्रैवविशेषंपरिपृच्छति
ततइतिद्विभिः ब्रह्मशापोपसंसृष्टेकुलेसतितत्रयंभावः भगवतिनहिशापःप्रभवति पादयत्वा
नुकंरणाचसोपिकथंचिन्मान्यः अतःकिमकरोदिति तदेतदुक्तंकथमत्यजदिति सर्वनेत्राणां

हरिमेधसा मे समारेद्रवति मेधा यस्य तेन श्रीकृष्णेन ग्रहेंद्रपरोपि महाविंश्वविनिर्मुक्तोपि पूर्वपक्रमेणैव
गमनसमये किंच मद्रूत्स्यनः स्नेहाद्यस्मिन्तेनवियोगात्कातरोभीतः अतएवतंपरिहातुमशक्
नुवन्नातरोविक्लवः सन्नहंकृष्णैकदृष्टयप्रापं ततश्चभक्तेपादुकेतेनैवकृपयादत्तेमूर्ध्निविभ्रत
अतिनिर्बंधदूपयातदाज्ञयातपुनः पुनर्नमस्कृत्यययो अत्रचाष्टश्लोकान्वगामेभक्तः पादविश्लेष
घणात्तमयुत्पादितत्वतीयंस्कंधोपक्रमोक्तानुमोरणाबदरिकाश्रमगछन् भगवतः प्रभासपयाणयो

शुकः सएवमुक्तोहरिमेधसोद्धवः प्रदक्षिणांतंपरिसृत्यपादयोः शिरोनिधायाश्रुक
लाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्युपक्रमे सुदुस्त्यजस्नेहवियोगकातरो नशक्नुवंस्त
परिहातुमातुरः कृच्छ्रंययौमूर्ध्निभर्तृपादुके विभ्रन्नमस्कृत्यययौपुनः पुनः ततस्त
मंतर्हृदिसन्निवेश्यगतोमहाभागवतोविशालां यथोपदिष्टांजगदेकबंधुना तप
ः समास्थायहरेरगाद्गतिं यएतदानंदसमुद्रसंभृतंज्ञानामृतंभागवताय भाषितं
कृष्णेनयोगेश्वरसेविताघ्रिणायच्छ्रद्धयासेव्यजगद्विमुच्यते ॥

यत्तुत्पश्लनैः स्थितोगतः सन्नुपसंहृतनिजकुलंभगवंतमेकांतेदृष्टवातत्कालप्राप्तेनमैत्रेयेणसह
पुनःकृपयाभगवतोपदिष्टंतत्वमाकर्ण्यतदाज्ञातोययावितिदृष्टव्यं विशालांबदरिकाश्रमंगतः
सन्नहंगौतमगात् कथंभूतांतेनैवजगदेकबंधुनायथोपदिष्टां तदाश्तत्वंप्रतिपद्यमानेनमयात्म
भूयायचकल्प्यतेनैवप्रतिवज्यगतोस्मि सोमामेष्यतिसतः परमित्येवंशुकप्रकारेआनंदसमुद्राभगं

किंच दाशार्हादिषु त्वयायः स्वमायया स्नेहपाशः प्रसारितः स त्वयैवात्मतत्त्वज्ञानशस्त्रेणाद्य छिन्नः एवं यद्यपि त्वया मद्बहुकृतं तथाप्येतावन्मात्रार्थं पुनः प्रार्थयत इत्याह नमोस्त्विति अनुशाधि अनुशिक्षय अनुशासनीयमाह यथेति सुखात्वय्यनपायिनी तद्भक्तौ मामित्यंगीकृत्य तथापि मयादिष्टो

दृढश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी श्री भ उ च गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ईक्षयालकनंदाया विधूताशेषकल्मषः वसानो वल्कलान्यंग वन्यभुक्सुखनिस्पृहः तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः शान्तः समाहितधिया ज्ञानविज्ञानसंयुतः मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव अतिव्रज्य गतीस्ति

कुतः सुखदायं मेता वक्तु वित्याह आदिष्टो नियुक्तः स्नानादेः शुद्धमेवमत्पादतीर्थोदकभूतायाश्चाल कनंदाया गंगाया ईक्षया वसानः परिदधानः द्वंद्वमात्राणां शीतोष्णादिविषयाणां सुशीलः आर्यवादि सुशीलः वेत्यर्थो विविक्तं विचारितं तिस्रो त्रिगुणात्मिका गतीरिति शेषः ॥

समधीयीत उच्चैः पठेत् परमं शुचि ग्रन्थेषामपि शोधकं स्पृयेत शुध्येत् सम्यग्ज्ञानात्तत्स्तत्पुनरूपदे
क्ष्यामीत्याशयेनाह श्रुत्वेति श्रुपीति श्रोपि किं उपधारितमित्याकलय्याह नैतदिति शाठ्यं च वक्ता
मूढ आगयोषितां च यदि भक्तिः स्यात्तर्हि ब्रूयात् एतज्ज्ञाने च पुमान्कृतार्थो भवतीत्याह नैतदिति
ब्रह्मरक्षितमाह पीत्वेति पीयूषस्वादु नत्र संति बहूनि श्रेयांसि तत्फलसाधनानि सन्त्ये संन्यभक्ता

य एतत्समधीयीत पवित्रं परमं शुचि स श्रेयेताद्दरहमोंज्ञानदीपेन दर्शयन् य एतत्त्वहृद
यानित्यमव्यग्रः शृणुयान्नरः मयि भक्तिपराकुर्वन्कर्मभिर्नैवबध्यते श्रुतं हृवत्वयाव
ल्लिसत्वेसमुपधारितं अपेतविगतो मोहः शोकश्चासासमनोभवः नैतत्त्वया दांभिकाय
नास्तिकाय शठाय च अशुश्रूषो अभक्ताय दुर्विनीताय दीयतां एतद्दोषविहीनाय ब्रह्म
णाय प्रियाय च साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां नैतद्विज्ञाय जिज्ञासोर्ज्ञात
व्यमवशिष्यते पीत्वा पीयूषममृतं पानं यनावशिष्यते ज्ञाने कर्मणि योगे च वार्ता
यां दंडधारणे यावानर्थो नृणां तावांस्तेहं चतुर्विधः ॥

नो भक्तस्यतत्सर्वमहमेव श्रुतोमदेकशरणो भवेत्याह ज्ञानइति ज्ञानादौ यावानर्थो दिलक्ष
णस्तत्तद्विधो ऽर्थः तावान्सर्वो ऽपि त्वहमेव तत्र ज्ञाने मोक्षः कर्मणि विहितधर्मः स्वाभाविके तत्क
मः योगे त्वणिमादिसिद्धयः वार्तायां कृष्यादावर्थः दंडनीतावैश्वर्यमिति सिद्धश्चयं यो ऽपि कामो

कृतार्थइत्यतआह मर्त्यइति यदात्यक्तसमस्तकर्मासन्मेनिवेदितात्माभवति तदासौमेविचिकीर्षि
तःविशिष्टःकर्तुमिष्टोभवति ततश्चअमृतत्वंमोक्षंप्रतिपद्यमानोमयाऽऽत्मभूयायमदैक्यायतस्म
मानेच्छायामपीति यावत्कल्पतेयोग्योभवतीत्येवंवेदादर्शितोयोगमार्गोयस्मैसः प्रणयेनाव
घूर्णिताभितश्चित्तंधैर्येणविष्टभ्यबहुमन्यमानःआत्मानंकृतार्थंमन्यमानः मयायआश्रित

मर्त्योयदात्यक्तसमस्तकर्मानिवेदितात्माविचिकीर्षितोमे तदामृतत्वंप्रतिपद्यमानो
मयात्मभूयायचकल्पतेवै शुकः एवमादर्शितयोगमार्गः तदोत्तमश्लोकवचोनिश
म्य बद्धाञ्जलिःप्रीत्युपरुद्धकण्ठोनकिंचिदूचेऽश्रुपरिप्लुताक्षः विष्टभ्यचित्तंप्रणयावघू
र्णंधैर्येणराजन्बहुमन्यमानः कृताञ्जलिःप्राहयदुप्रवीरंशीर्ष्णास्पृशंस्तच्चरणारविंदं
श्री उ उ च विद्रावितोमोहमहान्धकारोयआश्रितोमेतवसन्निधानात् विभा
वसोःकिंनुसमीपगस्यशीतंतमोभीःप्रभवंत्यजाद्य प्रत्यर्पितोमेभवतानुकंपिनाभृ
त्यायविज्ञानमयःप्रदीपः हित्वाकृतज्ञस्तवपादमूलंकोन्यंसमीयाच्छरणंत्वदीयं ॥

आसीत्तत्तवसन्निधानेनैवविद्रावितःप्रभवंतिकिंत्वाधायसमर्थाभवंति अज्ञानस्यब्रह्मणोपि
जनकोंकिंच यद्यपितवसन्निधानादेवगतःतथाप्यनुकंपिताभवताविज्ञानमयःप्रदीपश्चप्र
त्यर्पितःस्वमाययापहृतःपुनःसमर्पितःअतएवकृतज्ञःयस्त्वयाकृतमनुगृहेनजानातिसकोना

आश्रयेत ॥

किंच यो य इति किं वक्तव्यं मद्धर्मस्य न ध्वंस इति यतो लौकिकोपि यो यो निरर्थः व्यर्थ आयासः सोपि मयि परे निष्फलाय चेत्कल्प्यते निष्कामतयार्पितश्चेत्तर्हि धर्मः स्यात् निरर्थायासे दृष्टान्तः यथा भयशोकादेर्हेतोः पलायनाक्रंदनादिक्रोशनवत् अतो मद्भजनमेव बुद्धेर्विवेकस्य मनीषायाश्च तत्त्वस्य च फलमित्याह एषेति तामेव दर्शयति सत्यममृतं च मामाप्नोत्यनृतेनासत्येन म

॥ यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत् तदायासो निरर्थः स्याद्भयादेरिव सत्तम एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं एष तेभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः समासव्यासविधिना देवानामपि दुर्गमः अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः सुविविक्तं तव प्रश्नं मयैतदपि धारयेत् सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना ॥

र्त्येन विनाशिनानेन मनुष्यदेहेनेहास्मिन्नेव जन्मनि प्राप्नोतीति यत् सैव बुद्धिमतां बुद्धिर्मनीषा चेति बुद्धिर्विवेकः मनीषा चातुर्यं महाप्रकरणार्थमुपसंहरति द्वाभ्यां एष त इति किंच आस्तां तावज्ज्ञानं एतदनुसंधानकथनपठनश्रवणपारायणमात्रेणैतदेव फलं भवतीत्याह चतुर्भिः सुविविक्तमिति एतदाख्यानमपि यो धारयेत् स तु सद्ध्यानात् ब्रह्मगुह्यं वेदोपरहस्यं सुपुष्कलं यथा भवति तथा ब्र

नरेष्वीश्वरदृष्टिं कुर्वतः सद्यः फलविशेषमाह नरेष्विति समोत्तमहीनेषु स्पर्द्धादयः स्वस्मिन्नहंकारश्च हि निश्चितं वियन्ति नश्यन्ति अतोऽन्तर्यामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह विसृज्येति स्मयमानान्हसतः स्वान्सखीन्तथा दैहिकीं दृशं अहमुत्तमः सतनीचश्चेति दृष्टिं तथा दृशापां व्रीडां लज्जां च विसृज्य आश्वचाण्डालादीनभिव्याप्य प्रणमेत् एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह यावदिति तस्य

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् स्पर्द्धासूयातिरस्काराः साहंकारा वियंति हि
विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीं प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरं या
वत्सर्वेषु भूतेषु मद्भावो नोपजायते तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः सर्वं ब्रह्मा
त्मकं तस्य विद्ययात्ममनीषया परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः अयं हि सर्वकल्पा
नां सध्रीचीनो मतो मम मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥

एवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति कुतः आत्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया अतः परितो ब्रह्मैव पश्यन्नुपरमेत् सर्वतः क्रियामात्रादुपरमेत् किमयमेवोपायः अस्ति वान्योपीत्यपेक्षायामेतद्वचः समीचीनतमोपायमित्याह अयं हीति भगवद्धर्मलक्षणोपायस्य समीचीनत्वमेवोपपादयति द्वाभ्यां न हीति अंग हे उद्धव अनाशिषो निष्कामस्य मद्धर्मस्य उपक्रमे सति अण्वपि ईषदपि वैगुण्यादिभिर्ध्वंसो नास्ति

ग्राम्नामन्यभजनवातोत्वत्कृतोपकारस्यत्वय्यात्मनिवेदनैवनिष्कृतिर्नान्ययेत्याह नैवेति अर्पयिच
त्तिप्रत्युपकारं आनृण्यमिति यावत्कवयोब्रह्मविदोपिनैवप्राप्नुवंति यतः त्वत्कृतमुपकारंस्मर
न्तः अहहं मदः उपचितपरमानंदाः उपकारमेवाह योभवान्वैदराचार्य्यवपुषाऽरूपेणाग्रंतश्च
त्त्यवपुषा अंतर्यामिरूपेणाशुभविषयवासनांविधुन्वन्निरस्यन्स्वगतिंनिजंरूपंप्रकटयति
तस्यतवेश्वरत्वेहेतुः जगत्क्रीडनकक्रीडोपकरणायस्यसः नन्वजगन्मूलत्वादिनाऽजेशाद्यःक्री

नैवोपयंत्यपचितिंकवयस्तवेशब्रह्मायुषापिकृतमृद्धमुदः स्मरंतः योंतर्बहिस्तनुभृ
तामशुभंविधुन्वन्नाचार्य्यचैत्यवपुषास्वगतिंव्यनक्ति ६ श्री कं उ च उद्धव
वेनात्यनुरक्तचेतसा पृष्टोजगत्क्रीडनकः स्वशक्तिभिः गृहीतमूर्तित्रयईश्वरेश्व
रोजगादसप्रेममनोहरस्मितः ७ श्री ग उ च हंततेकथयिष्यामिममध
र्मान्सुमंगलान् यान्श्रद्धयाचरन्मर्त्योमृत्युंजयतिदुर्जयम् ८ कुर्यात्सर्वाणिक
र्माणिमदर्थंशनकैःस्मरन् मय्यर्पितमनश्चित्तोमद्धर्मात्ममनोरतिः ९ रामः

इतितत्राह यः स्वशक्तिभिःसत्त्वादिभिः गृहीतमूर्तित्रयोयेनसः सप्रेमहासितमनोहरंस्मितंय
स्यसः सप्रेमयथातथाजगाद इतित्वाहं तेतिसहर्षसंबोधने सुमंगलान्सावरूपान्मृत्युंस
सारं दुर्जयमन्यैरुपायैः ८ धर्मानेवाह कुर्यादिति त्रयोदशभिः मां स्मरन् शनकैः असंरंभं
कुर्यात् तदाह मय्यर्पितेमनश्चित्तेसंकल्पविकल्पानुसंधानात्मकेयेन अतएवमद्धर्मेष्व

पुण्यदेशलक्षणंमद्भक्तैरिति देवादिषुयेयेमद्भक्तास्तेषामाचरितानिकर्माणिचाश्रयेत् १० सत्रे॰
णसंभूयसा ११ अंतरंगांभक्तिमाह मामिवितित्रिभिः सर्वभूतेष्वात्मनिचात्मानमीश्वरंस्थितंमा॰
मेवेक्षेत कथमेकस्यसर्वेषुस्थितिःतत्राहबहिरन्तःपूर्णमित्यर्थः तत्कृतःअपावृतंअनावरणंतदपि
कुतःयथाखंअसंगत्वादित्यर्थः १२ हेमहाद्युतेः इतिप्रागुक्तेनप्रकारेणकेवलंज्ञानंआह

देशान्पुण्यानाश्रयेतमद्भक्तैःसाधुभिःश्रितान् देवासुरमनुष्येषुमद्भक्ताचरितानिच १०
पृथक्सत्रेणवामह्यंपर्वयात्रामहोत्सवान् कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ११
मामेवसर्वभूतेषुबहिरन्तरपावृतं ईक्षेतात्मनिचात्मानंयथाखममलाशयः १२
इतिसर्वाणिभूतानिमद्भावेनमहाद्युते सभाजयन्मन्यमानोज्ञानंकेवलमाश्रितः १३
ब्राह्मणेपुल्कसेस्तेनेब्रह्मण्येऽर्केस्फुलिंगके अक्रूरेक्रूरकेचैवसमदृक्पण्डितोमतः १४

श्रितःसन्सर्वाणिभूतानिमद्भावेनमन्यमानःसभाजयन्पण्डितोमतइत्युत्तरेणान्वयः ननूत्तमा॰
धमेषुएकरूपेणसभाजनमयुक्तमेवस्यात् शुश्रूषणादिव्यतिक्रमादित्याशंक्यतामेवज्ञानदृष्टिप्र॰
पंचयति ब्राह्मणइति विषमेष्वपिसमदृक्सर्वमामेवपश्यन् वैषम्यमेवचतद्दर्शयति ब्राह्मणे
पुल्कसेभिल्लजातितोवैषम्यंपुल्कसोंत्यजातिविशेषःस्तेनब्रह्मस्वहारिणिब्रह्मण्येब्राह्मणेभ्यो

उक्तं विशेषतः श्रेयो विस्तरेण निरूपितः भक्तियोगस्तमेवाह सुभक्ताय समासतः अतिक्लेशमिवाल
क्ष्य योगसंयोगकसंपदि सावोपायं पुनः सुगमं उद्धवः परिपृच्छति अनात्मनः अवशीकृतमनसः अ
ञ्जसा अप्रयासतो यथा सिध्येत तन्न यथा अञ्जसा अविघ्नेन यातयथा मे ब्रूहि १ सुदुष्करत्वं प्रपंचयति
प्रायश इति मनो युञ्जन्तो निगृह्णन्तः विषीदन्तः क्लिश्यन्ति कुतः असमाधानात् अनिग्रहात् कथं
चिन्मनसो निग्रहेण कर्शिताः श्रान्ताः सन्तः यस्मादेवं केचन विषीदन्ति अथातः अत एव हंसाः सार

श्री उ उ च सुदुष्करामिमां मन्ये योगचर्यामनात्मनः यथाञ्जसा पुमान्सिध्येत
तन्मे ब्रूह्यञ्जसाच्युत १ प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः विषीदन्त्यसमा
धानान्मनोनिग्रहकर्शिताः २ अथात आनन्ददुघं पदाम्बुजं हंसाः श्रयेरन्नरविन्द
लोचन सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययामी विहता न मानिनः ३ ॥

सारविवेकचतुराः ते त्व आनन्ददुघं समस्तानन्दपरिपूरकं तव पदाम्बुजमेव सुखं यथा भवति
तथा अनुतिष्ठन्तः श्रयेरन् सेवन्ते अमी त्वन्मायया विहताः केऽपि योगकर्मभिमानिनस्ते तो न श्र
यन्ते यद्वा अमी त्वद्भक्तास्त्वन्मायया न विहताः अत एव योगकर्मभिः कृत्वा मानिनो न भवन्ति
अन्ये तु त्वन्मायामोहितास्ते तो वयं योगज्ञाः वयं कर्मकुशला इति केवलं गर्विता भवन्ति न तु सु

त्वद्भक्तास्त्वत्प्रसादेन कृतार्था भवन्तीति नातिचित्रमित्याह किमिति अनन्यशरणेषु दासेषु तव वात्मसा
त्वं तदधीनत्वं यत् यथा नंदगोपी बलिप्रभृतिषु ततः किं चित्रं नाश्चर्यमित्यर्थः यतो यो भवान् श्रीराम
रूपेण मृगैर्वानरैः सह साहित्यं साख्यमिति यावत् अरोचयत् प्रीत्या कृतवान् कथंभूतः ईश्वराणां ब्रह्मा
दीनां यानि श्रीमन्ति किरीटानि तेषां तटान्यग्राणि तैः पीडितं विलुठितं पादपीठं यस्य स्वयं तथाभूतोपि
सत् प्रतनोति परिष्वस्य को नाम आत्मतो श्रेयोदित्याह त्वत्वेति त्वमेवंभूतं त्वां को नु विसृजेत् न भजेत्
कथंभूतः सन् कृतवित् बलिप्रह्लादादिषु त्वया कृतमनुग्रहं जानन् यद्वा स्वस्मिन् त्वं वा तत्पोषमित्याह

किं चित्रमच्युत तवैतदशेषबन्धो दासेष्वनन्यशरणेषु यदात्मसात्त्वं यो रोचयत्सह मृगैः
स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ४ त्वं त्वाखिलात्मदयितेश्वरमा
श्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु को वा भजेत्किमपि विस्मृतयेनुभूत्यै किं
वा भवेन्न तव पादरजोजुषां नः ५

तमुपकारं विद्वान् नत्वेवाह अखिलात्मदयितेश्वरेश्च
अखिलस्य जगतः आत्मानं चेतयितारं आत्मत्वादेव दयितं प्रेष्ठं सर्वेश्वरत्वादेव अप्रभजनीयं किं च आ
श्रितानां सर्वार्थदं हि किं फलोद्देशेनाहं सेव्यः नेत्याह किमपि अनिरूपितं त्वद्व्यतिरिक्तं स्वर्गादि
यादृशमको वा भजेत् सेवेत कथंभूतं तत् पत्केवलं भूत्यै ऐश्वर्यभोगाय अनु अनंतरमेव त्वद्विस्मृतये भ
वतीति यद्वा त्वद्व्यतिरिक्तं किमपि सेवितात्तैरेव मेतानादि साधनं वा भूत्यै ऐश्वर्याय संसारे विस्मृतये
मोक्षाय वा को भजेत् न कोपि नवतत्तत्साधनं विना भोगमोक्षादि फलं कस्य स्यादित्याह किं वेति न

श्री॰
भा॰ पु॰
टी॰
१३१

यन्ये तु देहसिद्ध्यर्थमेवैतत्सर्वं कुर्वन्ति तद्दूषयति केचिदिति नरैस्तैस्तैरुपायैर्देहमेव सुकल्पं जरारोगादि
रहितं वयसि तारुण्ये स्थिरं च कृत्वा परकायप्रवेशादिसिद्ध्यै तत्तद्धारणाद्युपयोगं युंजन्तीति नन्वेतानपि
शास्त्रोपकुशलैः प्राप्तेराद्रणीयं भवति वनस्पतिवद्धात्मैव स्थायी शरीरं तु फलवन्नश्वरमित्यर्थः नन्वे
केचित्समाध्यमात्त्वेनापि प्राणायामादियोगं क्रियमाणे जरारोगाद्यभावो दृश्यते सत्यं तथापि स।

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं विधाय विविधोपायैरथ युंजन्ति सिद्धये
न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः अन्तवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः
योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य
मत्परः योगचर्यामिमां योगी विचरन्मदपाश्रयः नान्तरायैर्विहन्येत निस्पृहः स्व
सुखानुभूत् इति भा वे हा रा प दश घे श श्लो पः २८ ॥

मोपि मुमुक्षुस्तु न तत्र सज्जेतेत्याह योगमिति नतु तां देहसिद्धिं श्रद्दध्यात्तु न विश्वसेत् तदेवं विघ्न
प्रतीकारैर्योगं कुर्यादित्युक्तं मच्छरणस्य तु न विघ्नशंकापीत्याह योगचर्यामिति विचरन्नाच
रन्स्वसुखानुभूः स्वप्रभूतिर्यस्य स्पृहा मूलादिविघ्नाः सा च मदपाश्रयस्य निवर्तते अतोऽन्तरायै।
र्विहतः स्वानंदरूपो भवतीति समाहात्म्यस्य योगस्य समस्तोपनिषद्रसे मत्प्रेम्णि सुयत्नमाभक्तौ मु

श्रीमद्भागवतपुराणटीका स्कं ११ पत्र १३१

केचित्तु नः प्रत्यक्षादिप्रतीतप्रपंचस्य बाधायोगात् वेदांतार्थानां चकृतत्वर्थकत्वे प्रतिपादनपरत्वेना
र्थवादत्वात् द्वैतं सत्यमिति मन्यंते तन्मतमनूद्य दूषयति यदिदं नामाकृतिभिः नामरूपोपल
क्षितं पंचभूतात्मकं द्वयं द्वैतं यत् तदबाधितमिति पंडितमानिनां अयं व्यर्थ एव पंडितत्वाभिमा
नवतां वेदांतेष्वयमर्थवाद इति प्रतीतिः न तत्त्वविदां यतः व्यर्थेनापि विनाप्यर्थेन सा प्रतीतिः त
थाहि न तावद्विधेयैकवाक्यत्वं तेषामस्ति यतोऽर्थवादत्वं स्यात् नचाकर्तृभोक्तृपरमानंदरूपात्म
प्रतिपादनकं विधिशेषतां भजते नचाबाधितत्वं द्वैतस्य नामरूपात्मकत्वात् ग्राह्यत्वात् पंचव

एतन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनाम्
योगिनोऽपक्वयोगस्य युंजतः काय उत्थितैः उपसर्गैर्विहन्येत तत्रायं विहितो विधिः
योगधारणया कांश्चिदासनैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्द
हेत् कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः योगेश्वरानुवृत्त्या वा हन्यादशुभदान्
(शनैः

र्णात्मकत्वात् स्वप्नवदित्याद्यनुमानैः वाचारंभणादिश्रुतिभिश्च बाधितत्वादिति
तदेवं ज्ञानेन योगं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह योगिन इति त्रिभिः योगं युंज
तः कायो यद्येतैरेवोत्पन्नैः उपसर्गैः रोगाद्युपद्रवैः अभिभूयते विधिः प्रतीकारः योगधारणया सो
मसूर्यादिधारणया संतापशीतादीन् आसनैर्वायुधारणान्वितैः वातादिरोगान् तपोमंत्रौषधैः
पापग्रहसर्पादिकृतान् ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन् हन्यात्

आत्मनो निर्विकारतां प्रपंचयति एष इत्यनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्व
यंज्योतिरित्यज्ञानमल्लापाकरणालब्धात्मविवृत्ते अजन्म इत्यंतिं वारयति अप्रमेय इति ज्ञानल
क्षणातिशयाध्यानेन संस्कारं महानुभूतिरिति देशकालपरिच्छेदाभावं नास्तित्वं द्विविषयेणा
माप्नुयनाशनात् स्वयंज्योतिष्ट्वादेहेतुः सकलानुभूतिरिति एकोऽद्वितीय इति विकारहेतोरन्य
स्याभावान्न कोऽपि विकार इति दर्शयति न तु श्रुतिविषयस्य कथं स्वयंज्योतिष्ट्वमित्याह वचसा
विरामगोचरत्वेन निष्ठितामत्याततया च श्रुतिः यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति तद्वदे

एषः स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः एकोऽद्वितीयो
यो वचसां विरामे येनेषिता वागसवश्चरंति एतावानात्मसंमोहो य(
द्विकल्पस्तु केवले आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ॥

तः येनेषिताः प्रेषिताः तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केने
षितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स प्राणस्य
प्राणश्चक्षुषश्चक्षुरिति अद्वितीयत्वमुपपादयितुं भेदस्यावास्तवत्वमाह एतावानिति केवले अभि(
न्ने आत्मन् आत्मनि निर्विकल्प इति यत् एतावान् सर्वोऽप्यात्मनो मनसः संमोहः भ्रमः यतः स्वमात्मान
मृते विना यस्य विकल्पस्यावलंबः आश्रयो नास्ति रजतभ्रमस्येव शुक्तिं विना नेह नानास्ति किंचन

तदेवमात्मा न विक्रियत इत्युक्ते नन्वेतदनुपपन्नं बद्धावस्थया त्यज्यमानत्वात् मुक्तावस्थयोपा
दीयमानत्वात् न हि व्रीहेः पूर्वावस्थात्यागेन व्रीहिभावत्यागेन तंडुलीभावे गृह्यमाणे न विक्रियेतेति तत्रा
ह एवमिति येयमवस्थायां गुणैः कर्मभिश्च चित्रमज्ञानकार्यं देहेंद्रियादिलक्षणं आत्मध्यासे
नाविविक्तं स्फुरितं तन्मायामात्रं तदेव पुनर्ज्ञानेन निवर्तते आत्मा तु न केनापि रूपेण गृह्यते नापि त्य

एवं स्फुरितं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग। नि
वर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा। यथा
हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते। ए
वं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः॥

ज्यते अयं भावः मुक्तेः क्रियाफलत्वे स्यादात्मनो विकारः न तु स्वत आरोपिताज्ञानमात्रनिवृत्तिरू
पत्वात्तत्रात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न विकार इति एतदेव दृष्टान्तेन स्पष्टयति यथेति
न तु सद्वै मेव सद्घटादि न विधत्ते करोति या समीक्षा आत्मविद्या॥

एवंविवेकज्ञानवतोमुक्तस्यैनंद्रियादिकृतोगुणादोषसंबंधइत्याह समाहितैरिति मत्सविविक्तधा
म्नः ममसम्यग्विविक्तंधामस्वरूपंयेनतस्यप्रकाशस्यप्रकाश्यंगुणादोषानभवंतीतिशेषदृष्टांतेनोक्ते
र्थंसंगमयत्वेनावेक्ष्यतस्यनैकोपिगुणदोषइत्याशंक्यदृष्टांतेनाह यथेति वाय्वादीनांशोषणदहन
क्लेदनरंजनाभ्रमणत्वादिभिर्गतागतैरागमापायिभिःसत्वगुणैःशीतोष्णादिभिर्वाअहंममतेःअहंका
रात्परमव्यक्तंस्मृतिहेतुभिर्नयुज्यते यद्वाहंकारस्यसंसृतिहेतुदेहाभिरिति मुक्तवदसम्यग्ज्ञानी

समाहितैःकःकरणैर्गुणात्मभिर्गुणोभवेन्मत्सविविक्तधाम्नः विक्षिप्यमाणैरुतकिंनुदू
षणंघनैरुपैतैर्विगतैरवेःकिं यथानभोवाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्नसज्जते
तथाक्षरंसत्वरजस्तमोमलैरहंमतेःसंसृतिहेतुभिःपरं तथापिसंगःपरिवर्जनीयोगुणे
षुमायारचितेषुतावत् मद्भक्तियोगेनदृढेनयावद्रजोनिरस्येतमनःकषायः यथाम
योसाधुचिकित्सितोनृणांपुनःपुनःसंतुदतिप्ररोहन् एवंमनोपक्वकषायकर्मकुयो
गिनंविध्यतिसर्वसंगम् ॥

तथापियेषुमाचरेदित्याहद्वाभ्यां तथापीति गुणेषुविषयेषु रजःरागःमनसःकषायइतिदुर्नि
राशतामाह एतदेवदृष्टांतेनोपपादयति यथेति नृणांमामयोरोगः असाधुअसम्यक्चिकित्सा यथा
भवतितथाअपक्वकषायकर्मअधादः कषायारागादयस्तन्मूलानिकर्माणिचयस्मिन्तत्
अतएवसर्वसंगमस्यैषुपुत्रादिषुसज्जमानंमनःकुयोगिनंअसम्यग्ज्ञानिनंविध्यतिभ्रंशयति ॥

श्री भा. एं. टी. ३३

ननु कथंचिद्विषयसंसर्गे यदि योगभ्रंशः स्यात्तर्ह्यलं तर्हि सापायेन योगमार्गेणेत्यत आह कृयोगिन इति
मनुष्यभूतैर्विघ्नैः स्त्र्यादिरूपैस्त्रिदशैरुपसृष्टैः पीडितैः तथा च श्रुतिः यस्मात्तदेषां न प्रियं यदेतन्म-
नुष्या विद्युरिति भूयो जन्मान्तरे नैव कर्मतन्त्रे कर्मविस्तारे ननु विदुषामपि सर्वथा कर्म दुष्परिहर-
मिति पुनः संसारः स्यादत आह करोतीति विद्वान् जन्तुर्देहस्तद्वदेव भोजनादि कर्म करोति क्रियते वि-
क्रियते च तेन कर्मणा गुणप्रवाहमपि प्राप्नोतीत्यर्थः केनापि संस्कारादिना चोदितः सन् विद्वांस्तु प्रष्ठ

कृयोगिनो ये विहितान्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः तेन प्राक्तनाभ्यासबलेन भू-
यो युञ्जन्ति योगं न तु कर्मतन्त्रे करोति कर्म क्रियते च जन्तुः केनाप्यसौ चोदित आनिपाता-
त् न तत्र विद्वान्प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या तिष्ठन्तमासीनमुत व्रजन्तं
शयानमुक्षन्तमदन्तमन्नं स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वे-
द यदि स्म पश्यत्यसदिन्द्रियार्थं नानानुमानेन विरुद्धमन्यत् न मन्यते वस्तुतया मनी-

तो देहे स्थितोऽपि तत्र कर्मणा न विक्रियते निरहंकारत्वात् हर्षविषादादिभिः संसारं न प्राप्नोति किंच आ-
त्मानं तावद्दैहिककर्मभिर्विकारशंका यतो देहमप्यसौ न पश्यतीत्याह तिष्ठन्तमिति उक्षन्तं मूत्रयन्तं स्व-
भावं प्राणमन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वन्तं आत्मानं देहं न वेत्ति इन्द्रियवतः सर्वथा कथमद-
र्शनं संभवति तत्राह यदि स्मेति यद्यप्यसन्तो विद्यमाना इन्द्रियाणामर्थं पश्यति तथापि ना-
नात्वान्मिथ्या स्वप्नवदित्यनुमानेन विरुद्धं बाधितं सत् अन्यदात्मव्यतिरिक्तं मनीषी वस्तुतया न म-

श्री॰
भा॰ए॰
टी॰
१९५

तदेवज्ञानंस्वरूपसाधनफलैर्निरूपयति ज्ञानमिति विवेकोज्ञानंसाधनान्याह निगमोवेदः त
पःस्वधर्मः प्रत्यक्षंस्वानुभवः ऐतिह्यमुपदेशः अनुमानंतर्कः फलमाह आद्यंतयोर्यदस्यजगतः
मध्येपितदेवकेवलंनतज्जगदादिति किंतत्कालः कलयतिप्रकाशयतियः तथाहेतुश्चकारणं
चयत् तदेवएतदुक्तंभवति यद्यस्यविश्वस्यकारणंप्रकाशकंचब्रह्मतदात्मकमेवैतत् नत

ज्ञानंविवेकोनिगमस्तपश्चप्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्यय
देवकेवलंकालश्चहेतुश्चतदेवमध्ये १८ यथाहिरण्यंस्वकृतंपुरस्तात्
पश्चाच्चसर्वस्यहिरण्मयस्य तदेवमध्येव्यवहार्यमाणंनानापदेशैरहमस्य
तद्वत् १९

तःपृथगितिएवंनिश्चयफलोनियमादिसाधनैर्जायतेयोविवेकवत् ज्ञानमिति तत्रनानाभेदव्य
वहारालंबनस्यापिविश्वस्यकारणमात्रात्मकत्वंसदृष्टांतमाह यथेति स्वकृतंसष्टुंकुंडलादि
रूपेणाविरचितंयद्धिरण्यंकीदृशंहिरण्मयस्यकुंडलादेरुत्पत्तेःपुरस्तान्नाशाच्च पश्चाद्यदस्ति
कटककुंडलमित्यादिनानाव्यपदेशैर्व्यवहारैराप्यमाणमपितदेवयथा तद्वदस्यविश्वस्यका
रणभूतोहमेवनानाव्यवहारालंबनेनतमतःपृथग्विश्वस्येति १९॥

१९५

नन्वकथंचिज्ज्ञानतोविषयस्फूर्तिर्जीवन्मुक्तस्यापिदुर्वारेत्यनिर्मोक्षप्रसंगःस्यात्तत्राह यथाहीति प्रस्वापःस्वप्नः बहूनर्थान्बिभर्तिपुष्णातीतितथाअहंकारलक्षणोदेहादिसन्निकर्षएवसंसारालंबनमित्यन्वयव्यतिरेकाभ्यांदर्शयति शोकेति स्पृहादीतेषामदर्शनात्अहंसुखीति यच्चेतन्यस्सुखीतिप्रतीत्यभावाच्चदृश्यत्वाच्चसत्त्वादीनांकृशत्वादिवद्दृश्यधर्मत्वानुपपत्तेरितिभावः ननुयद्यहंकारस्यसंसारस्तर्हिमुक्तिरपितस्यैवेतिमुक्तावहंकारावशेषःप्रसज्येततत्राह देहेति

यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् सएवप्रतिबुद्धस्यनवैमोहायकल्पते १४
शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहंकारस्यदृश्यन्तेजन्ममृत्युश्चनात्मनः
१५ देहेंद्रियप्राणमनोभिमानोजीवोंतरात्मागुणकर्ममूर्तिः सूत्रंमहानित्युरुधेव
गीतःसंसारआधावतिकालतंत्रः १६ अमूलमेतद्बहुरूपरूपंमनोवचःप्राणश
रीरकर्म ज्ञानासिनोपासनयाशितेनछित्त्वामुनिर्गांविचरत्यतृष्णः १७ श्रीराम

देहादिष्वभिमानोयस्यसः आत्मैवतेषामंतर्हितोजीवः अतएवगुणकर्ममयीमूर्तिर्यस्यसः एवंचसूक्ष्मोपाधिर्बहुधावस्थ्रादिशब्दैर्गीतःसंसारेपरमेश्वराधीनस्सन्नाधावति अतोनात्मदोषइतिभावः तदेवमहंकारकृतंबंधमुपपाद्यइदानींज्ञानेनतन्निवृत्तौमुक्तिरित्याह अमूलमिति वस्तुतोमूलशून्यंअसन्तमपिबहुभीरूपैःरूपितंप्रकाशितंऐन्द्रजालिकवत्स्थितमित्यर्थः किंतत्तदाह

तदेवं कार्य्यस्य कारणमात्रत्वात्मकतामुक्त्वा प्रकाशस्य प्रकाशकात्मकतामाह विज्ञानमिति त्रि
यवस्थ्यप्रकारस्य स्पष्टयक्त्यावः छेदानुरोधेन जाग्रदादिव्यवस्थयोदितानेमनः तदवस्थाकारणभूते
पंचयज्ञानत्रये यच्च कारणकार्य्यकर्त्तृकारणमध्यात्मकार्यमधिभूतकर्त्ताधिदैवं एवंगुण
त्रयकार्य्यभूतंत्रिविधं जगत् एतत्त्रयेनत्रय्येणसामान्यज्ञानमात्रेण समन्वयेन भवतियेनानु
गतं प्रकाशात्तनुत्पत्त्यर्थः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तथा चक्षुष
श्चक्षुश्श्रोत्रस्य श्रोत्रं मनसो येन मनो विदुरित्यादिश्रुतेः नत्रविशेषविज्ञानव्यतिरेकेणान त्रय्येना

विज्ञानमेतत्त्रयवस्थमेतगुणत्रयेकमणाकार्य्यकर्तृ समन्वयेन व्यतिरेकतश्चयेनैवतत्
त्र्येणतदेवसत्यं २ नयत्पुरस्ताद्भमयन्नपश्चान्मध्ये च यत्तव्यपदेशमात्रं भूतप्रसिद्धं च
परेण यद्यत्तदेवतत्स्यादितिमेमनीषा ३

सोपलभामहे तत्राद्व्यतिरेकतश्चसमाध्या
दोयदोस्तितदेवसत्यमिति एवं कालत्रयेप्यव्यभिचारित्वसत्यतामाह नयदिति मध्ये चततत्
यद्वास्तिकिंतव्यपदेशमात्रं कृतः यतः यद्यत्परेणअन्येन भूतं जातं प्रसिद्धं प्रकाशितं च तत्तदेव
कारणप्रकाशतावन्मात्रं स्यान्नपृथगिति मेमनीषा बुद्धिः वाचारंभणं विकारो नामधेयं मृत्ति
केत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेण च कार्यस्य प्रकाशस्यवा

एवंसामान्यतःकार्यप्रकाश्ययोःकारणप्रकाशकाभ्यामभेदमुक्त्वायःप्रस्तुतेनतदुभयविवेकःसर्वकं
प्रपंचस्यब्रह्माभेदमाह अविद्यमानइति योयंवैकारिकःविकारसमूहःसएषप्राणाविद्यमानोराज
ससर्गःरजोद्वारेणाब्रह्मकार्यभूतइत्यर्थः अवभासतेपिब्रह्मप्रकाश्यएवेत्यर्थः ब्रह्मतुस्वयंस्वतः
सिद्धंनतुकार्यमित्यर्थः ज्योतिश्चप्रकाशकमित्यर्थः अतःकारणात् इंद्रियाणिचअर्थाश्चतन्मात्रा(
णिचआत्मामनश्चदेवानामप्युपलक्षणंविकाराःपंचभूतानिएवंविचित्रंब्रह्मैवभातीतिउपसंहरति
एवंनिगमतपःप्रत्यक्षेतिह्यानुमानैःस्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः तथापरस्यदेहादेर

अविद्यमानोप्यवभासतेयोवैकारिकोराजससएषसर्गः ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मविकारचित्रं २२ एवंस्फुटंब्रह्मविवेकहेतुभिःपरापवादेनविशारदेन छित्वात्मसंदेहमुपारमेतस्वानंदतुष्टोखिलकामुकेभ्यः २३ नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुर्जलंहुताशः मनोन्नमात्रंधिषणाचसत्वमहंकृतिःखंक्षितिरर्थसाम्यम् २४ ॥

पवादेनआत्मत्वनिरासेनचकीदृशेनविशारदेननिपुणेनगुरुणानिमित्तभूतेनेतिवाआत्मविषये
संदेहंछित्वास्वानंदतुष्टःसन्नखिलेभ्यःकामुकेभ्यइंद्रियादिभ्यउपारमेतनिसंगोभवेत् परापवा
देप्रपंचयतिवपुरात्मानभवतिपार्थिवत्वात्घटवत् तथाइंद्रियाणितदधिष्ठातारोदेवाअसुःप्राणःधिष
णाबुद्धिःसत्वंचित्तंअहंकृत्यतेआत्मानभवंतिजडत्वात्अन्नमात्रंमनःअन्नोपष्टभ्यत्वात्शरीरवत्वायुर्जलं
चहुताशस्तेजःखंक्षितिरितिपंचभूतानिअर्थाःशब्दादयःसाम्यंप्रकृतिश्चआत्मानजडत्वात् घटवदि

श्री॰
भा॰ ए॰
टी॰
९३४

ननु यद्यात्मसंविदा सर्वं दृश्यमसद्विच्यते तर्ह्यात्मा स्वप्रकाशो देहादिद्वैतं च जडमिति तत्र केस्यात् तथा
च संसारप्रतिभासो न घटेतेति चोदयति नैवेति अनात्मस्वदृशोः जडाजडयोः अत्र हेतुः द्रष्टृदृश्ययोः
माक्षिन्तद्दृश्ययोरपि तत्राह उपलभ्यत इति एतत्प्रपंचयति आत्मेति अव्ययत्वादिपंचविशेषणैर्नो।
शादिरागादिगुणपापत्वानपरिच्छेदानामसंभवं दर्शयति हेतद्दैवमत्वेनपर्थेष्टश्च चित्त जडः अग्निभा
वः यथैवाग्निदारुणोर्भेदेनानुपलंभेपि दारुप्रकाश्यमेवाग्निश्च प्रकाशकः तथा देहात्मनोरपी।

उ॰ व॰ उ॰ च नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः अनात्मस्वदृशोरीश कस्य स्यादुपल
भ्यते ५० आत्माव्ययोगुणः शुद्धः स्वयंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहः कस्येह सं
सृतिः ५१ श्री॰ रा॰ उ॰ च यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं संसारः फलवांस्ता
वदपार्थोप्यविवेकिनः २ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य
स्वप्नेनर्थागमो यथा ३

ति न संसृतिस्तयोरन्यतरस्यापि घटत इति सत्यं तथाप्युभयोरेवमविवेकएव संसारालंबनमित्या
ह पंचभिः यावदिति सन्निकर्षणं संबंधः नन्वसंगस्य कुतः संबंधः तत्राह अविवेकिनः अज्ञान।
कृत इत्यर्थः ननु स्वप्रकाशस्य कथमज्ञानं अतः संसारस्तत्राह अपार्थोपि केवलं फलवान् फलं
स्फूर्तेर्नतत्त्वतोस्तीत्यर्थः नन्वसतो देहादेः कुतः संसारस्फूर्तिहेतुत्वमपि तत्राह अर्थे हीति अस्या

द्वैतासत्यतयास्तवनिर्निंद्योनिर्विषयत्वंप्रपंचयतिसार्द्धैःषड्भिः किंभद्रमिति अवस्तुनोद्वैतस्यमध्येकिं
भद्रंकिंवाभद्रंकियद्भद्रंकियद्वाभद्रमित्यर्थः अवस्तुत्वमेवाह वाचोदितंवागिंद्रियोपलक्षणं वाचाउ
दितंउक्तंचक्षुरादिभिश्चयद्गृहीतंतदनृतमिति नत्वेवंसतिदेहादिभावानामप्यसत्वात्कथंभयहेतु
त्वंतत्राह दृष्टांतमाह छायाप्रतिबिंबंप्रत्याह्वयःप्रतिध्वनिः आभासःशुक्तिरजतादिःएतेयथासंतोप्यर्थ
कारिणोभवंति आमृत्युतःमृत्युमभिव्याप्ययद्वामृत्युर्लयःयावन्नविलीयंतेतावद्भयंयच्छंतीत्यर्थः

किंभद्रंकिमभद्रंवाद्वैतस्यावस्तुनःकियत् वाचोदितंतदनृतंमनसाध्यानमेवच ४ छा
यापत्याह्वयाभासाह्यसंतोप्यर्थकारिणः एवंदेहादयोभावायच्छंत्यामृत्युतोभयं ५
आत्मैवतदिदंविश्वंसृज्यतेसृजतिप्रभुः त्रायतेत्रातिविश्वात्माह्रियतेहरतीश्वरः ६ तस्मा
न्नह्यात्मनोन्यस्मादन्योभावोनिरूपितः निरूपितेयंत्रिविधानिर्मूलाभातिरात्मनि ७
इदंगुणमयंविद्धित्रिविधंमाययाकृतं एतद्विद्वान्मदुदितंज्ञानविज्ञाननैपुणं ८ ननिंद
तिनचस्तौतिलोकेचरतिसूर्यवत् प्रत्यक्षेणानुमानेननिगमेनात्मसंविदा आद्यंतवदस

न्नतुसत्यादिश्रुतिभिरेवंद्वैतंनिरूपितंकथमसत्यंस्यात्तत्राह आत्मैवेतिद्वाभ्यां त्रायतेपाल्यतेत्राति
पालयति अन्यस्मात्सत्यादिव्यतिरिक्तात् त्रिविधाअध्यात्मादिरूपाभातिःप्रतीतिः नतुकथंनि
र्मूलप्रतीयतेतत्राह इदमिति ज्ञानविज्ञानयोर्नैपुणंनिष्ठांसूर्यवत्समोभूत्वाएतन्निष्ठाप्राप्त्युपायमा
ह प्रत्यक्षेणेति यदाद्यंतवत्तद्द्वैतमसदसदितिज्ञात्वानिःसंगोविचरेत् आद्यंतवत्वप्रमाणानिप्रत्य

ततःशेषाग्रहणात्पूर्वंकैकवैकल्पिकोद्वासनप्रकारमाह इतिमनसैवप्रार्थनयाशेषांनिर्माल्यंमयाद
त्तंमात्वाशिरस्याधाययित्वाप्ययुद्वासयेत् तोर्हिउक्तमायायन्यस्तज्योतिस्तत्त्वनरेपिद्वित्यमस्यज्यो
तिष्येवोद्वासनीयं एतत्सर्वविधिषुशास्त्रेषुकिमर्थमित्यपेक्षायामाह अर्चादिष्विति यदायत्रश्रद्धातदात
त्रतन्त्वविधिशास्त्रेषुश्रद्धावत्त्वकृतः यतः सर्वभूतेष्विति उभयतः इहामुत्रचसमर्थ इत्याह मदर्चामि
तित्रिभिः पुष्पोद्यानानिचकारयेत् पूजापात्रोत्सवाश्रितान् पूजाप्रत्यहंयात्राविशिष्टपर्वणिवाकुं

इतिशेषांमयादत्तांशिरस्याधायसादरं उद्वासयेच्चेदुद्वास्यंज्योतिर्ज्योतिषितत्पुनः अर्चा
दिषुयदायत्रश्रद्धामांतत्रचार्चयेत् सर्वभूतेष्वात्मनिचसर्वात्माहमवस्थितः एवंक्रिया
योगपथैःपुमान्वैदिकतान्त्रिकैः अर्चन्नुभयतःसिद्धिंमत्तोविंदत्यभीप्सितां मदर्चांसंप्र
तिष्ठाप्यमंदिरंकारयेद्दृढं पुष्पोद्यानानिरम्याणिपूजायात्रोत्सवाश्रितान् पूजादीनांप्र
वाहार्थंमहापर्वस्वथान्वहं क्षेत्रापणपुरग्रामान्दत्वामत्सार्ष्टितामियात् प्रतिष्ठयासा
र्वभौमंसद्मनाभुवनत्रयं पूजादिनाब्रह्मलोकंत्रिभिर्मत्साम्यतामियात् मामेवनैरपे
क्ष्येणभक्तियोगेनविंदति भक्तियोगंस

तत्समयागमः उत्सवः वसन्तादिमहोत्सवः तदाश्रितान्
नैवेद्यादीन्दत्वा पूजापात्रोत्सवाश्रितानित्यस्यविवरणंपूजादीनामितिप्रवाहार्थंसंततानुवृत्त्यर्थं
मत्सार्ष्टितांमत्समानैश्वर्यंप्रतिष्ठादीनांव्यस्तसमस्तानांफलमाह प्रतिष्ठयेति मत्साम्यतांमया
साम्यमित्यर्थः सकामस्यफलमुक्त्वा अहैतुकभक्तस्याह मामेवेति अहैतुकभक्तियोगःकथंभवति

श्री. भा. पं. टी. १३३

यतः फलमुक्तं अप्रदत्तोरेनिंदंति यद्वेति विद्वद्भिर्विष्टाभोगीक्षमिः कर्तव्यंतत्फलेनदेवान्येषामप्याह
कर्तरीति सारथेः सहकारिणः हेतोः प्रयोजकस्यानुमोदितुश्चप्रेत्यपतत्फलमित्यन्वयः ऊतेः
यतः कर्मणामेतभागिनः भागार्हाः तत्रापिविशेषमाह भूयसिकर्मणिसारथ्यादौचभूयः अधिकं
फलमिति ययः पत्रादिमात्रेणापूजितोयः परपदंप्रापोवदिशतिप्रीतः सहकृत्सः शरणंमम ३ का।
ह म वि ध्यायः २७ अष्टाविंशेत्वयः एवंविस्तरेणोपवर्णितः ज्ञानयोगः पुनरप्यासेसमाह।

परस्वदत्तोपदैदेत्तोदहरेतसुरविप्रयोः इतिसजायतेविड्भुग्वर्षाणामयुतायुतं कर्तुश्चसा
रथेहेतोरनुमोदितुरेवच कर्मणांभागिनःप्रेत्यभूयोभूयसितत्फलं ३ श्री कादं
श ध म श्री यः २७ श्री ग उ च परस्वभावकर्माणिनप्रशंसेन्नगर्हयेत्
विश्वमेकात्मकंपश्यन्प्रकृत्यापुरुषेणच १ परस्वभावकर्माणियःप्रशंसतिनिंदति स
आशुभ्रश्यतेस्वार्थादसत्यभिनिवेशतः २ तैजसेनिद्रयापन्नेपिंडस्थोनष्टचेतनः मायां
प्राप्नोतिमृत्युंवातद्वन्नानार्थदृक्पुमान् ३

त्वनिरूप्यते इदानींमतिविस्तरेणोक्तंज्ञानयोगंसंक्षे
पेणावक्तुमाह परेषांस्वभावान्शांतघोरादीन्कर्माणिचतत्रहेतुःविश्वमिति विपक्षेदोषमाह प
रेतिस्वार्थाद्ज्ञाननिष्ठालक्षणात् असतिमिथ्याभूतेद्वैताभिनिवेशात् भेदमेवदृष्टांतेनदर्शयति
तैजसेराजसाहंकारकार्येइंद्रियगणेनिद्रयाआपन्नेअभिभूतेसतिपिंडस्थोजीवः केवलंमनोमात्रे
णमायांस्वप्नंप्राप्नोति ततोमनसिलीनेसतिनष्टचेतनःसन्मृत्युंवामृत्युतुल्यांसुषुप्तिंप्राप्नोतिय

१३३

फलभूयस्त्वार्थिनो ग्रावपि हुताप्रकारमाह विधिना स्वगृह्योक्तप्रकारेण मेखलादिभिरुपलक्षिते।
विहिते निर्मिते तदुक्तं विस्तारोच्छ्रायतस्तिस्रो मेखलाश्चतुरङ्गुलाः हस्तमात्रो भवेद्गर्तः सयोनि वेदिका
मेयेत्यादि उदिते प्रज्वालितमग्निं परितः समूहेत् एकत्रं मेलयेत् दर्भैः परिस्तीर्य परितः प्रोक्षयेत् अ
न्वाधाय अन्वाधानसंज्ञकं व्याहृतिभिः समित्त्रयप्रदानादिरूपं कर्म कृत्वा अग्रे कुर्यात् ततो द्वयोराज्यहोमाय
योग्यान्यासाद्य निधाय प्रोक्षणपात्र्या प्रोक्षणीपात्रस्थेन प्रोक्ष्याग्नौ माधापयेत् मेखलादिभिरुपलक्षितः।

विधिना विहिते कुण्डे मेखलागर्तवेदिभिः अग्निमाधाय परितः समूह्य परिणोदिते प
रिस्तीर्य परिषिच्य दत्त्वाधाय यथाविधिः प्रोक्षणीसाधद्वयोराज्यभावाग्नौ भावयेत्ततो
तमनोनूनदेप्रस्यशंखचक्रगदाद्भुतैः लसच्चतुर्भुजं शान्तं पद्मकिंजल्कवाससं स्फुर।
त्किरीटकटककटिसूत्रवराङ्गदं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ध्या
यन्नभ्यर्च्य दारूणि हविषाभिहूतानि च प्रास्याज्यभागावाघारौ दत्वाऽन्यत्तु नेद्दविः

शोभमाना अस्त्रादिरोमर्जायस्य तं स्मरेत् इति किरीटादीति यस्य तं हविषाहूतेन अभिहूतानि सं
सिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य आघारौ तन्नामकौ याग्नौ एवमाज्यभागौ च द
त्वा तदयो आहुती इत्यर्थः तत्राघारौ प्रजापतये स्वाहेति चोत्तरदक्षिणपरिधिसंधिमारभ्याग्नि
मध्यादापरिध्यंते हूनतारणाकृत्यो आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ॥

श्री॰
भा॰ पं॰
टी॰
१३२

मूलमंत्रेणाष्टशतावरेणाथवाषोडशनामचोपचारैस्तैस्तत्पुरुषसूक्तेन च प्रवदानतः प्रस्तुचमाकृतिग्रहणेने
तथैः पुरुषसूक्तेनाथवानपठेत्सपवमूलमंत्रः तेनैव प्रस्तुचमवदानतो होमः इति मंत्रैः स्वाहांतैर्नोम
मंत्रैर्यथान्यायं पूजाक्रमेणैव अग्नये स्विष्टकृते स्वाहेत्यंते स्विष्टकृते च हुत्वा ततो वीक्षस्य भगवतम
भ्यर्चाथनमस्कृत्य पार्षदेभ्यो नैवेद्यादिभ्यो ऽष्टसिद्धिदेवबलिं हरेत् ततः पूजास्थानमागत्य देवस्याग्रे
मंडपे विश्य यथाशक्ति मूलमंत्रं जपेत् ततो ऽभयप्रभ भगवत्ताभोजनमासिंध्यात्वाचमनं दत्वा

गृहुयान्मूलमंत्रेण षोडशार्चावदानतः धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः अभ्य
र्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं दत्वाच
मनमुच्छेषं विष्वक्सेनाय कल्पयेत् मुखवासं सुरभिमत्ताम्बूलादिमथार्हयेत् उपगा
यन्गृणन्नृत्यन्कर्माण्यभिनयन्मम मत्कथाः श्रावयन्शृण्वन्मुहूर्तं क्षणिको भवेत्
स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् शिरो
मत्पादयोः कृत्वा बाहुभ्यां च परस्परं प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥

उच्छेषं विष्वक्सेनाय कल्पयित्वा तदनुज्ञया पश्चात्त्वयं भुंजीत ततः सुरभिमत्सुगंधवत्ताम्बूलाद्य
मुखवासं दत्वाथ पुनरपि मर्हयेत् पुष्पांजलिना पूजयेत् अभिनयन् अस्मिन्नाविकुर्वन् क्षणिकः
वेत्यग्रे परित्यक्तलज्जावशो भवेत् स्तवस्तोत्राणां भेदं दर्शयति पौराणैः प्राकृतैरिति कथं प्रणा
मेदित्यपेक्षायामाह शिर इति बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृहीत्वा
यद्वा स्पष्टं ततः परस्परं निबद्धाभ्यां हस्ताभ्यां अपराधेष्वेव प्रपन्नमित्यादिस्तुत्या च प्रणमेत् ॥ श्रीमायेनमः

१३२

पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपंचयति चंदनेति षड्भिः मंत्रेणाह स्वर्ण घर्मानुवाकः स्वर्णघर्मे परिवेदनामित्यादि महापुरुषविद्या जितंते पुंडरीकाक्ष नमस्ते विश्वभा वन सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वजेति पौरुषं सूक्तं सहस्रशीर्षेत्यादि नीराजनादीनि सामा नि इंद्रं नरो नेमधिता हवंत इत्यस्यामृचि गीतानि अभिषेकेण रोहिण्यादीनि वस्त्राद्युपचारेष्वलंका रलक्षणगुणं विधत्ते वस्त्रेति पत्राणि कपोलवक्षःस्थलादिषु लिखिताः पत्रभंगाः मकरिकेत्यन

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति स्व र्णघर्मानुवाकेन महापुरुषविद्यया पौरुषेणापि सूक्तेन सामनीराजनादिभिः व स्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं पाद्य माचमनीयं च गंधं सुमनसोक्षतान् धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः गुड पायससर्पींषि शष्कुल्यापूपमोदकान् संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् अ भ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्नाद्यगीतनृत्यानि पर्वणि स्युरुतान्वहम् ॥

प्रेम यथा भवति तथा यथोचितमलंकुर्वीत तत्कार्थं सर्वेषामुपचाराणां श्रद्धालक्षणगुणं विधत्ते पा द्यमिति नैवेद्ये विभवलक्षणगुणं विधत्ते गुडपायसेति शष्कुल्यः तैलपक्वविशेषाः अपूपानां मोदकादीनां समूहः सूपा व्यंजनानि दधि सति विभवे इत्येषः कालभेदेन गुणं विधत्ते अभ्यंगेति अ भिषेचनं पंचामृतादिस्नपनं अन्नाद्येति अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि एकादश्यादौ अन्वहं प्रत्यहं

कथंपूजयेत्तदाह पाद्येतिद्वाभ्यां धर्मादिभिर्ममासनेतत्रपद्मंचकल्पयित्वोभाभ्यांवेदतंत्राभ्यामुभ
यसिद्धयेमंत्रपाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः उपस्पर्शः आचमनं अर्हणामर्घ्यं उभयसिद्धये
वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तयेइत्यर्थः धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचत्वारःको
णेषुपादाः अधर्मादीनिपूर्वादिदिक्षुगात्राणि त्रयोगुणाः पट्टिकाः तत्रपूर्वादिक्रमेणमध्येचविम
लोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहेतिनवशक्तयः एवंयथोपदेशंधर्मादिभिर्भव

पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत् धर्मादिभिश्चनवभिः कल्पयित्वासनंमम
पद्ममष्टदलंतत्रकर्णिकाकेसरोज्वलं उभाभ्यांवेदतंत्राभ्यांमह्यंतूभयसिद्धये सुदर्श
नंपांचजन्यंगदासीषुधनुर्हलान् मुशलंकौस्तुभमालांश्रीवत्संचानुपूजयेत् नंदं
सुनंदंगरुडंप्रचंडंचंडमेवच महाबलंबलंचैवकुमुदंकुमुदेक्षणं दुर्गांविनायकंव्या
संविष्वक्सेनंगुरून्सुरान् स्वेस्वेस्थानेत्वभिमुखान्पूजयेत्प्रोक्षणादिभिः ॥

भिश्चशक्तिभिरासनंकल्पयित्वेतिकर्णिकायांकेसरैरुज्वलस्यसूर्यादिमंडलैश्चोज्ज्वलमित्यर्थः अ
थपादिपूजामाह सुदर्शनमितित्रिभिः तत्रन्यसांगमित्यावरणपूजासूचिता आसनेनैवशान्त्या
वरणमप्युक्तं ततःसुदर्शनादिमुशलांतानायुधान्पश्चिमादिक्षुकौस्तुभमालाश्रीवत्सानुरसि नंदा
दीन्पार्षदान्पश्चिमादिक्षुगरुडंपुरतः दुर्गादीनिकोणेषु गुरून्वामतः सुरानिंद्रादिलोकपालान्स्वे
दिदिक्षुएवमेतान्स्वस्वाभिमुखान्प्रोक्षणादिभिः अर्घ्यादिभिः पूजयेदित्यर्थः ॥ रामायनमः

पाद्यार्घ्यत्रीणिपात्राणिकलशोदकैःपूरितानितैस्तैर्द्रव्यैःसाधयेत् तत्रपाद्यार्थद्रव्याणिपाद्येश्या
माकदूर्वाब्जविष्णुक्रांतादीनिस्मृते गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वाचेतिक्रमादष्टद्र
व्याष्टकमर्घ्येरितं जातीलवंगकक्कोलैर्मतमाचमनीयकमिति तानिचत्रीणिपात्राणियथा
क्रमंहृदयादिमंत्रैर्गायत्र्याचसर्वाण्यभिमंत्रयेत् तदनंतरंपिंडेदेहे वाय्वग्निसंशुद्धइतिकोष्ठगते
नवायुनाशोषितेमूलाधारगतेनाग्निनादग्धेपुनर्ललाटस्थचंद्रमंडलामृतप्लावनेनामृतमयेजाते

प्रोक्तपात्राणित्रीणिप्रक्षिप्तैस्तैर्द्रव्यैश्चसाधयेत् पाद्यार्घ्याचमनीयार्थंत्रीणिपात्राणिदेशि
कः २२ हृदाशीर्ष्णाऽथशिखयागायत्र्याचाभिमंत्रयेत् पिंडेवाय्वग्निसंशुद्धेहृत्पद्मस्थांप
रांमम २३ अण्वींजीवकलांध्यायेन्नादांतेसिद्धभाविताम् तयात्मभूतयापिंडेव्याप्तेसं
पूज्यतन्मयः आवाह्यार्चादिषुस्थाप्यन्यस्तांगंमांप्रपूजयेत् २४

तस्मिन्हृत्पद्मस्थांपरांश्रेष्ठांजीवकलांश्रीनारायणमूर्तिंध्यायेत् कथंभूतांनादांतेसिद्धभावितां
प्रणवस्याकारोकारमकारबिंदुनादाःपंचांशाःतत्रनादांतेसिद्धैर्ध्यातां तथाचश्रुतिः योवेदादौ
स्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरइतितयात्मभूतयास्वेनैव
भावेनचिंतितयात्वमृतमयेपिंडेदीपेनप्रभयागृहमिवव्याप्तेसतितस्मिन्नेवादौमनसैवोपचारैः
संपूज्यतन्मयःसन्नर्चादिषुआवाह्यस्थापनमुद्रयास्थापयित्वा २४॥

प्रधिष्ठानभेदेन प्रधानोपचारमाह सार्द्धेन स्नानेति तत्वविन्यासः सपर्यास्नानमंगप्रधानदे
वतानां तत्तन्मंत्रैः स्थापनं श्रम्महरणं उपस्थानार्थीद सलिलादिभिस्तर्पणादिनायजनं सर्वत्र
साधारणमाह श्रद्धयेति एवमधिकारादिव्यवस्थामुक्त्वेदानीं पूजाप्रकारमाह शुचिरिति
संभृताः संभाराः पूजासाधनानि येन सः प्राग्रैः दर्भैः यद्वा प्रागेव संभृतसंभारः सन्नासीनः तत्रा
सीनः सन्पश्चात्तत्संभारार्थं वा रचयेत् स्वस्तिरिष्टदित्यर्थः प्राङ्मुखः उदङ्मुखो वा आसीनः अर्चयोर्वास्थि

स्नानालंकरणं प्रेष्ठमर्चायामेव तद्धव स्थंडिले तत्वविन्यासो वह्नावाज्यप्लुतं हविः १८ सू
र्यै चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि १९ भूर्य
प्यभक्तोपहृतं न मे तोषाय कल्पते गंधो धूपः सुमनसो दीपोन्नाद्यं च किं पुनः २० शुचिः
संभृतसंभारः प्राग्दर्भैः कल्पितासनः आसीनः प्रागुदग्वार्चेदर्चायामथ सम्मुखः २१ कृत
न्यासः कृतन्यासां मदर्चां पाणिना मृजेत् कलशं प्रोक्षणीयं च यथावदुपसाधयेत् तद
(द्भिर्देवयजनं द्रव्याण्यात्मानमेव च २२

रायोः संमुखः अर्चाभिमुखः उपविष्टः सन् अनंतरं गुर्वादि
नमस्कारपूर्वकं यथोपदेशं स्वस्मिन् कृतन्यासः कृतो मूलमंत्रन्यासो यस्यां तां मम अर्चां पाणिना मृजेत्
निर्माल्याद्यपकर्षणादिना शोधयेत् कलशं पूर्णकुंभं प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं च उपसा
धयेत् चंदनपुष्पादिभिः संस्कुर्यात् तदद्भिः प्रोक्षणीयाद्भिः देवयजनं देवपूजास्थानं २२ राम

किंच संध्योपासनादीनि कर्माणि मयाचोदितानि साकल्पेन विहितानि यस्य यानि तैः सह पूजां कुर्यात् नतु तानि परित्यजेदित्यर्थः सम्यक्संकल्पो मदेकविषय एव संकल्पो यस्य तथाभूतस्सन् कर्मपावनीं कर्मनिर्हारिणीं अर्चाभेदानाह सार्द्धेन शैली शिलामयी लौही सुवर्णादिमयी लेप्या मृच्चंदनादिमयी हृदिस्थितायां मनोमयी प्रकर्षेणातिष्ठत्यस्यामिति प्रतिष्ठा प्रतिमैव जीवस्य भगवतो मंदिरं यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति प्र

संध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीं ११ शैली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं १४ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि १५

तिमाभेदेन विशेषमाह सार्द्धेन उद्वासो विसर्जनं स्थिरायामर्चने न विकल्पः शालिग्रामे न कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्यात् वा न वेति अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां लेख्यायां च परिमार्जनमेव इदानीं सकामनिष्कामभेदेन च विशेषमाह द्रव्यैरिति प्रकर्षेण प्रसिद्धैः सशोभनैः अमायिनो निष्कामस्य भक्तस्य तु यथालब्धैः यत्र चंदनादि सर्वं यथा न लभ्यते तत्र।

यस्य पुनर्विशेषतः प्रश्नेकारणमाह चतुर्भिः एततत्त्वद्वचनेन निःश्रेयसकरं वदंति अंगिरसः सुतो बृ
हस्पतिः निःसृतं त्वयोपदिष्टमित्यर्थः देव्यै पार्वत्यै सर्ववर्णानां विशेषणायेतेषांऽइष्वरकर्मकांडस्य
सूत्राविधानस्य नानात्वं ततोऽश्यतः पारे वानुष्ठाननं तोयस्य तस्य वैदिक एवमंत्रो वैदिकान्येवांगानि चय

एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां नारदो भगवान्व्यास आचार्योंगिरसः सुतः २ निः
सृतं ते मुखांभोजाद्यदाह भगवानजः पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ३ ए
तद्वै सर्ववर्णानामाश्रमाणां च संमतं श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ४ ए
तत्कमलपत्राक्ष कर्मबंधविमोचनं भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ५ श्री
भगवानुवाच न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव संक्षिप्तं वर्णयिष्यामि यथावदनुपू
र्वशः ६ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः त्रयाणामीप्सितेनैव विधिना मां
समर्चयेत् ७ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः यथा यजेत मां भक्त्या श्रद्धया तन्नि
बोध मे ८ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं
माममायया ९ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणा

मिश्रत्वमाह सूक्तादौ स वैदिकः एवं तांत्रिकोपि मिश्रोऽष्टाक्षरादिभिर्वा ऋचा यदा स्वैर्वर्णिकोपनेन तद्व
विशेषमाह यदा साभीष्टमेकादशद्वादशादिकाले स्वनिगमेन स्वाधिकारस्थितेन वेदेनोक्तं द्विज

श्री
भा॰ए॰
टी॰
१२८

किंच यथान्नमेव प्राणिनां जीवनं अहमेव यथा शरणं धर्म एव यथा प्रेत्य परलोके वित्तं तथा सन्त एव अर्वाक् संसारपाताद्बिभ्यतः पुंसः शरणं किंच सन्तश्चक्षूंषि सम्यग्ज्ञानानि ज्ञानानि अर्कः पुनः सम्यगुत्थितोपि बहिः तद्दृष्ट्येकमेव चक्षुरित्यर्थः अध्यायार्थमुपसंहरति वैतसेन इति सु ग्रुन्नभावेनाभावेन प्रविष्टस्य वीतसेनाः स्त्रीभावप्राप्तायस्य तस्य स्त्रीभावप्राप्तस्य पुत्रो वैतसेनः पुरूरवाः एवमुक्तप्रकारेण उर्वश्या लोकान्तस्यानादेव लोकना हानिः स्पृहः ततोपि सत्सङ्गादपि हेतोः ३

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं धर्मो वित्तं नृणां प्रेत्य सन्तोऽर्वाग्बिभ्यतोऽरणं
३४ सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः देवता बान्धवाः सन्तः सन्त आत्माहमेव च
३५ वैतसेनस्ततोप्येवमुर्वश्या लोकनिःस्पृहः मुक्तसङ्गो महीमेतामात्मारामश्चचार
ह ३६ इति भाग तम पुरा एका स्कं षड्वि ध्यायः २६ ३ ३ च
क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो यस्मात्त्वां ये यथार्चन्ति सात्वताः सात्वतर्षभ १

मुक्तसङ्गः सन्नात्मारामो भूत्वा यथेष्टं चचारेति ३६ इति भा ए पि यो द श्रो पः २६
क्रमेण सन्नात्मारामो भूत्वा यथेष्टं चचारेति ... सर्वकामाशिषहेतुः पूजायोगः प्रोक्तः समासतः १ यामा १
पूर्वं विशेषक्रियायोगः सर्वाधिष्ठानप्रसादकः सर्वकामाशिषहेतुर्योगः प्रोक्तः समासतः १ यामा १ ... २ क्रियायोगमि
यात्कलं चितनाक्लेशसङ्गादिसम्भवः इति क्रमाचेन भक्तिमनुसरत्पातुं इष्टस्य ति २ क्रियायोगमि
ति भवदाराधनरूपं यस्मादिति कारणाधिष्ठानादिप्रश्नः सर्वकारणानां निमित्तत्वस्याविशिष्टत्वा
त्तयेति कस्मिन्नधिष्ठानादौ केन प्रकारेणेति प्रश्नः योधिकारिणः सात्वता भक्ताः १ याम

१२८

इंद्रियैःकृत्वाअविश्रब्धःअविश्वसनीयःमादृशांअविवेकिनांफलितमाह एवमिति नृपेषुदेवेषुचदी
व्यतीतितथा उक्तिभिःहितोपदेशैःरातितीर्थेदेवादेसंगोदोपिसत्संगः श्रेयानितिदर्शयन्सतांल
क्षणमाह सन्तइतिविशेषणाष्टकस्ययथेष्टंहितमस्तावः नवेनस्पदेशापेक्षापिकेवलंततस्तेन्विधि

तस्मात्संगोनकर्तव्यःस्त्रीषुस्त्रैणेषुचेंद्रियैः विदुषांचाप्यविश्रब्धःषड्वर्गःकिमुमादृशां २५
श्री भ ग वा नु वा च एवंप्रगायन्नृपदेवदेवःसउर्वशीलोकमथोविहाय आत्मानमात्मन्य
वगम्यमांवैउपारमज्ज्ञानविधूतमोहः २६ ततोदुःसंगमुत्सृज्यसत्सुसज्जेतबुद्धिमान् सं
तएवास्यछिंदंतिमनोव्यासंगमुक्तिभिः २७ संतोनपेक्षामच्चित्ताःप्रशांताःसमदर्शिनः
निर्ममानिरहंकारानिर्द्वंद्वानिष्परिग्रहाः २८ तेषुनित्यंमहाभागमहाभागेषुमत्कथाः
संभवंतिहितानृणांजुषतांप्रपुनंत्यघं २९ तायेशृण्वंतिगायंतिह्यनुमोदंतिचादृताः
मत्पराःश्रद्दधानाश्चभक्तिंविंदंतितेमयि ३० भक्तिंलब्धवतःसाधोःकिमन्यदवशिष्यते
मय्यनंतगुणेब्रह्मण्यानंदानुभवात्मनि ३१ यथोपश्रयमाणस्यभगवंतंविभावसुं
शीतंभयंतमोप्येतिसाधून्संसेवतस्तथा ३२ निमज्योन्मज्जतांघोरेभवाब्धौपरमायणं
संतोब्रह्मविदःशांतानौर्दृढेवाप्सुमज्जतां ३३ एवंतावद्यतितेत्याह तेषुनित्यमभिः श्रवणादिभि
रेवमत्पराःश्रद्दधानाश्चसंतोभक्तिंविंदंतिविभावसुमग्निंसेवमानस्यअप्येतिनश्यति तथाक
र्मादिजांसंसारागामिसंसारभयंतन्मूलमज्ञानंचनश्यतीत्यर्थः निमज्योन्मज्जतांउच्चावचायोनीगे

करात्तरक्तसमीनाः यान्तु नानागणाः केशपाशैर्बलैर्यान्तुताः थनैश्चैव तेषाः मुष्टिप्रहारैस्तथा लाः तैस्तुतैः
श्वसेउलाः श्मशानिकास्तुमांसिनि चकाणिवानानेवावर्त्तामैर्भयानकाः महामणीनांप्रवेकाः उत्तमाः
ग्रामवराणि तेव्वयथा याव्यया ॥ श्रवमानः पाकेतान्तुपासेताः ॥ २४ ॥ भीरूणांभयावहाः मनस्विनां हर्षकर्षः
किं वसंकर्षणेनापितद्दलं लयेनीतेप्रणीते ॥ पेगाहरगजन ॥ प्रणिवव तेडगोमे रवंभयंकरेवयतं
उरतपारं ॥ श्रुतोयजलपारमवधिं उ: मोहोनिषेधेविक्रमेणागायंदेशानस्त्रुतिरवधिकेरत्यर्थः

करोरुमीनानरकेशपाशेवलाधभुजरंगागुधगुल्मसंकुला ॥ महारिकावर्तभयानका महा
मणिप्रवेकाभरणायमप्राकंताः ॥ २० ॥ प्रवर्तितांभीरुभयावहांस्पेमनस्विनां हर्षकरीं पर
स्परं ॥ विनिघ्नतारीन्नृसलेनदुर्मदान्संकर्षणेनापरिमेयतेजसा ॥ २१ ॥ बलेनतदंगागणावद्रुरो
भेरवंदुरंतपारंगाथेदृपालितं ॥ तंचरणातिर्वदेवं ९ ययोर्विक्रीडितंनजगदीशयोः प
रे ॥ २४ ॥ स्थित्युद्भवांतं भुवनत्रयस्यपः समीहतेनन्तगुणाः स्वलीलया ॥ नतस्यचित्रंपरपक्षनि
ग्रहस्तथापिमर्त्यानुविधस्यवर्ण्यते ॥ २२ ॥ जग्राहविरथंरामोजरासंधंमहाबलं ॥ हतानी
कावशिष्टासुंसिंहोगजमिवौजसा ॥ २८ ॥ बध्यमानंहतारातिंपाशैर्वारुणमानुषैः ॥ वारया
मासगोविंदस्तेनकार्यचिकीर्षया ॥ २९ ॥ सपुक्तोलोकनाथाभ्यांब्रीडितोवीरसम्मतः ॥ तपसे
कृतसंकल्पोवारितःपथिराजभिः ॥ ३१

किंतुमगथैर्हन्यालिन्वलैलसदेवंभतेनरामहतस्यपोः क(
मोकेनसंदेतयोः विक्रीडितनतगपराक्रमः ॥ ३४ ॥ नैतदाश्चर्यमित्याह ॥ स्थित्युद्भवांतमिति ॥ नहि
किमाश्चर्यमिववर्णितंतत्रहनापीति ॥ मर्त्यानुविधन्ते अनुकरोतीति ॥ मर्त्यानुविधस्य
ः ॥ किंचनयाहेति ॥ निहतानानीकाविशिष्टासु ॥ अवशिष्टाश्रुसवएवपत्सतंचतंच ॥ ३५ ॥ हतानाब
हुयोरावचन्द्रमः ॥ तथापुनमाविजरासंधंवध्यमामेवारयामासेति ॥ ३३ ॥

भा॰ टी॰ ११

पवित्रार्थाभिधर्मैः पदैः शापदशरणीयदर्शनीयैः श्रुतैर्वाक्यैः नयनैर्नीतिभिः प्राकृतैः लौकिकैः नत्वलौकि
कन्यायमाहुः स्वकर्मोचितषड्भिरन्यैः कृत्वाते महतः प्रभवः केवलेकर्मवेधेन प्राग्ब्रह्मकर्मवशो
न्नयामः अनल्पान्नजितवमिति ॥ ३२ ॥ वार्हद्रथो जरासंधः शुक्रं दोषविषयाविस्पृष्टगः नद्गतेव
लयस्य सः नस्यवास्तदेष्टाल्पदतकृतमतिसंधानादिभिभावः तिर्लोर्णः अनाद्यासनैवनीलोविव
लार्णवो येन साधुसाधु इमत्तमोदितमुक्ष ॥ ३३ ॥ मनश्चयनेर्मेघुरावासिभिर्जनैरभिसंगम्यमिति

वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि ॥ स्वकर्मबंधप्राप्तोयं षड्भिस्तेपराजयः ॥ ३३ ॥ हृ
नेषुसर्वानीकेषु नृपतिर्वीरहद्रुष्य ॥ उपेत्तिनोभगवतामगधानुर्मनायषौ ॥ ३४ ॥ शुक्र
दोष्पन्नतबलोनिस्तीर्णाविबलार्णवः ॥ विकीर्यमानः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३५ ॥ मा
थुरैरहृपसंगम्यविज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमागधवंदिभिः ॥ ३६ ॥
शंखदुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानि पुरीप्रविशानिप्रभो ॥ ३७ ॥
सिक्तमार्गां हृष्टजनां पताकाभिरलंकृतां ॥ निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणां ॥ ३८ ॥
निचीयमानो नारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ॥ ३९
आगोपथनयानं वित्तमवंतनवीरस्यपंचलं ॥ यदुराजनायतनत्त्वं माहृतेपादिशत्प्रभुः ॥ ४० ॥ प
वेशनवदशाकृतवस्त्रावमसौहिरण्यवलं ॥ बुबुधे मागधो राजा यदुभिः कृतपालितैः ॥ ४१ ॥

ब्रह्मघोषेण वेदघोषेण निर्घुष्टां निनादितां ॥ कौतुकेन उत्सवेन ॥ आसर्वतोवद्धातितोरणा ॥
नियस्यानां ३८ निचीयमानः विकीर्यमाणः प्रविवेशोत्सवगृहंगः ॥ ३९ ॥ आगोपथनं रणभूमिस्त
वस्थं वित्तं वीराणां भूषणं तावतीतिच्छेदः तावतिन्नयेवर्तमानेपि ॥ असौहिरण्यवलंयस्यस
मदशाकृतत्वः समदशावाचन ॥ बुबुधे ॥ ४१ ॥

भा
१०.उ
२

माधवीमप्युवेषाम धीमहत्तासैन्यसमरेनाहतवान ॥ वायुरभ्रैः सूर्यरेणुभिस्याग्निर्यथादर्शनमेवावर
णमिति सूचितम ॥ १८ ॥ परस्परानीकानि सेनानि तामेव पक्षयोः पक्षौ मेवास्तेषां शिलीमुखा बाणाः तेषाम
स्त्रुणं तेन प्रपीडितं तेव स्फूर्जयत ॥ उत्रेभितवान ॥ १९ ॥ तदा हरहन्त्रि तिनिषंगादिषुधेः ॥ पाणान गृह्ण
न ग्रथतान्गुणसंदधत ॥ गुणमाहत्य निशितान बाणान समन्हाभ्यन्चत ॥ निघ्नन महरन्नपत्तिः पदाति

जरासंधस्तावभिसृत्य मायवीमहाबलौ तेन बलीयसाहरोत ॥ स सैन्ययानध्वजवाजिसारथी
सूर्यानलौ वायुरिवाभ्ररेणुभिः ॥ २० ॥ सुपर्णतालध्वजचिह्नितौ रथावलक्षयन्त्यो हरिरामयोर्मृ
धे ॥ स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः संमुमुहुः शुचार्दिताः ॥ २१ ॥ हरिः परानीकपयो
मुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितं ॥ स्वसैन्यमालोक्य सुरासुरार्चितो व्यस्फूर्जयच्छार्ङ्ग
शरासनोत्तमं ॥ २२ ॥ गृह्णन्निषंगादथ संदधच्छरान्विकृष्य मुंचन्शितबाणपूगान् ॥ निघ्नन्
रथान्कुंजरवाजिपत्तीन्निरंतरं यद्वदलातचक्रम ॥ २३ ॥ निर्भिन्नकुंभाः करिणो निपेतुरनेक
शोऽश्वाः शरवृक्णकंधराः ॥ रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकंधराः
॥ २४ ॥ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताः शतशोऽसृगापगाः ॥ भुजाहयः पू
रुषशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः ॥ २५ ॥ ॥

निरंतरमिति ॥ ग्रहणादिक्रियाविशेषणं ज्वलत्काष्ठभ्रमणेन यथा अलातचक्रं भवति ॥ तद्वत
व्यस्फूर्जयदिति ॥ २४ ॥ हताश्वध्वजाः सूतनायकाश्च येषु ते संछिद्यमाना द्विपाद
वाजिनश्च ॥ तेषामंगेभ्यः प्रसूताः असृगापगा रुधिरनद्यः परस्परं प्रवर्तिता रतिन्द्रनीयेनात
यः प्रसिद्धनदीरूपत्वमेवाह ॥ भुजा एवाहयो यासु ताः पुरुषाणां ॥ शीर्षाण्येव कच्छपा यासु ताः
हताद्विपा एव द्वीपाः अंतर्वर्तितटानि हया एव ग्राहाः तैराकुला यासाम ॥ २५ ॥

२

एतदर्थमिति ॥ एतदुद्धार्यं स्यहवति भूभारहरणायेति ॥ ४ ॥ अयमेतदर्थोवतारस्तूपलक्षणमित्याह
अन्योपीति अभवतरुद्भवतः ॥ ५ ॥ ससूतौ सारथिसहितौ ॥ ६ ॥ परिच्छदः धुनकवचादिः तत्सहितौ तं रथ
कोनाथो विद्यते येषां ते नाथवंतस्तेषां ॥ ७ ॥ दंसितौ बद्धकवचौ सायुधाढ्यौ शोभनायुधसंपन्नौ ॥ ८ ॥ ७

एतदर्थोवतारोयं भूभारहरणाय मे ॥ संरक्षणाय साधूनां कृतोन्येषां वधाय च ॥ ४ ॥ अन्योपि धर्मरक्षायै देहः संभ्रियते मया ॥ विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् ॥ ५ ॥ एवं ध्यायति गोविंद आकाशात्सूर्यवर्चसौ ॥ रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ॥ ६ ॥ आयुधानि च दिव्यानि पुराणानि यदृच्छया ॥ दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत् ॥ ७ ॥ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो ॥ एष ते रथ आयातो दयितान्यायुधानि च ॥ ८ ॥ यानमास्थाय जह्येतद्व्यसनात्स्वान्समुद्धर ॥ एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत् ॥ ९ ॥ त्रयोविंशत्यनीकाख्यं भूमेर्भारमपाकुरु ॥ एवं संमंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात् ॥ निर्जग्मतुः स्वायुधाढ्यौ बलेनाल्पीयसाहतौ ॥ शंखं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः ॥ ततोभूत्परसैन्यानां हृदि वित्रासवेपथुः ॥ १० ॥ तावाह मागधो वीक्ष्य हे कृष्ण पुरुषाधम ॥ न त्वया योद्धुमिच्छामि बालेनैकेन लज्जया ॥ ११ ॥ गुप्तेन हि त्वया मंद न योत्स्ये याहि बंधुहन् ॥ तव राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह ॥ हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि ॥ १२ ॥ श्रीभगवान् ॥ न वै शूरा विकत्थंते दर्शयंत्येव पौरुषं ॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥ १३ ॥

रुद्धा अथ मागधस्यादिति वा लब्धोर्थः हे पुरुषाधमेति ॥ ११ ॥ गुप्तेन सर्वांतरत्वाद्दर्शनानर्हेण हे मंद
बधातो निबंधुरविद्यातां हंतीति ॥ न त्वया अविद्यानिरस्तेनेति याहि मा स्पृहि ॥ १२ ॥ अच्छेद्यदेहो सावि ति
स्वयमेव मम बाणपरितोषात् ॥ मतांतरमाह ॥ यद्वा मां जहीति ॥ यद्यप्यकृतार्थग्रहणेन भवतउत्तरं

२२
परकामुष्टिरूपपरिह्वावुधम स्पर्हानिमित्तः क्रोधः कलेत्तयोनित्योपौरुषे योगेपरमपुरुषध्यानल
त्वागतमेवाहासेयोऽप्याति मानुलोकेभूर्लोके मनुष्यरूपत्वेवा धरापस्थ्यमस्तलेभाजिस्नुरूपत
देवाञ्जवर्णीयत श्रीवत्सांकामितिचत्वभिः मंदरस्मितवक्त्राब्जयस्मिन्त्वतत्पुंडरीकवदीभरामस्व

प्रथनावपिसंक्रुद्धावुधम्यकरुनेदन परकामुष्टिपरिह्वौचरंतैमज्ञतयुधि २३ ब्रह्म
पापापमश्चनाकृत्स्नमायाहृतात्मनो स्पर्हाक्रोधः त्वयोनित्येवृत्तावेश्मिर्ययावने २४
एवनष्टेषुमवेषुकलेषुत्वषुकश्चवः प्रवर्तामितोभुवोभारजुतिमेनवशेषितः २५ रामः
समुद्रवेल्लायांयोगमास्थायपौरुषे नत्याजल्लोकमानुष्यमेयोऽप्यात्मानमात्मनि २६
रामानियोगमाल्लोक्यभगवान्ध्रुवकौसितः निषसाद्धरापस्ये तूष्णीमासाद्यपिप्पले
२७ विभ्रचत्वभेजत्रूपंभ्राजिस्नुप्रभवास्त्वया दिशोवितिमिराः कुर्वन्विधूमइवपावकं २८
श्रीवत्सांकघनश्यामतप्तहाटकवर्चसा कौशेयांबरयुग्मेनपरिवीतंसुमंगलं २९
मंदरस्मितवक्त्राब्जनीलकुंतलमंडितं पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ३०
कौटसूत्रब्रह्मसूत्रकिरीटकटकांगदैः हारनूपुरमुद्राभिः कौस्तुभेनविराजितम् ३१
वनमालापरीतांगमूर्तिमद्भिर्निजायुधैः कृत्वोरौदक्षिणेपादमासीनंपंकजारुणं ३२

दरेयालिगायस्मिन्नवतवनमालयापरीतान्यंगानियस्मिन्नतत्तनिजायुधैश्चपरीतांगो पंक
जारुणंवामपाददक्षिणोरुकृत्वास्थासरूपेविभ्रन्व ३३

श्री॰ भा॰ए॰ टी॰ ३६५

द्वि॰ ३०

जरानामकश्चिल्लुब्धकोमृगयुःमृगास्यास्यमिवाकारोयस्यतंचचरणंब्रह्मशापकृतमेनत्तत
तेवापराधइतिवदतन्नाह यस्यतेवात्मयोगरचितंविरिंच्यःश्रष्टातनयारुद्रादयश्च येचान्ये
गिरांपतयोवदद्रष्टारःतेपिनविदुःतस्यतेश्चिन्त्यमायस्यएतद्भ्रह्मशापादिस्मेतसाश्रमञ्जतः

मुषलावशेषायःखंडकृतेषुर्लुब्धकोजरा मृगास्याकारंतच्चरणंविव्याधमृगशंकया
३३ चतुर्भुजंतंपुरुषंदृष्ट्वासकृतकिल्बिषः भीतःपपातशिरसापादयोरसुरद्विषः
अजानताकृतमिदंपापेनमधुसूदन क्षंतुमर्हसिपापस्यउत्तमश्लोकमेनघ ३५
यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं वदंतितस्यतेविष्णोमयासाधुकृतंप्रभो
तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकं यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं ३७
यस्यात्मयोगरचितंनविदुर्विरिंचोरुद्रादयोस्यतनयाःपतयोगिरांये त्वन्मायया
पिहितदृष्टयएतदंजःकिंतस्यतेवयमसद्गतयोगृणीमः ३८ श्री भ उ
माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदं ३९
इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ
दारुकःकृष्णपदवीमन्विच्छन्नधिगम्यतां वायुंतुलसिकामोदमाघ्रायाभिमुखं

पापयोनयोवयंकिंगृणीमःकिंवर्णयामःअतस्त्वदाज्ञांप्राप्तुमोनदीतिभावः इच्छाशरीरिणोत्य
स्यायंभावःशुद्धसत्वमयीनिजाश्रीमूर्तिमेनहायपरतत्मनिकृत्संवीविडंवनमात्रमिति एतदेव

एवमष्टभिःर्निर्वेदोनिरूपितः इदानींतस्यविवेकमाहदशभिः पुंश्चल्येति अयंभावः कर्मभिर्देवानिष्टा
दुःखमेवप्राप्तोस्मि अतःपरमेश्वरमेवभजेयमिति परमेश्वरप्रसादंविनादेवरूपादिष्टादपिवेदवाक्या
न्मोहोननिवर्ततइत्याह बोधितस्यापीति देव्याउर्वश्यासूक्तवाक्येनयथार्थवचनेन पुरूरवोमामृथा
माप्रपप्तोमात्वावृकासोअशिवासउक्षन्नवैस्त्रैणानिसख्यानिसंतिसालावृकाणांहृदयान्येताइत्य
नेनएवंपुंश्चल्यापहृतंचित्तमित्यादिनातस्याअपकारोऽनुस्मृतः इदानीममैवायमपराधइत्याह किम

पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः आत्मारामेश्वरमृतेभगवन्तमधोक्षजं १७ बोधि
तस्यापिदेव्यामेसूक्तवाक्येनदुर्मतेः मनोगतोमहामोहोनापयात्यजितात्मनः १८ किमेत
यानोपकृतंरज्ज्वावासर्पचेतसः रज्जुस्वरूपाविदुषोयोहंयदजितेंद्रियः १९ क्वायंमलीम
सःकायोदौर्गंध्याद्यात्मकोशुचिः क्वगुणाःसौमनस्याद्याह्यध्यासोविद्ययाकृतः २० राम

तयेति नःअस्माकंकामिनांएतयाकिमपकृतंनकिंचिदपियथारज्जुस्वरूपाविदुषोरज्ज्वादुःखंसंसर्गा
सर्पकल्पनयाभवतितोपिरज्ज्वाकिमपिनापकृतंतद्वत् यद्यस्माद्योहमेवंभूतःसएवाजितेंद्रियत्वाद
पराधीत्यर्थः ननुतथापिसैवमोगोप्यप्रेमादिगुणैःसंमोहस्यमूलमित्याशंक्यतेपिस्वपरिकल्पिताए
वेत्याह चतुर्भिः क्वायमिति मलीमसःअतिमलिनःसुमनसांसौमनस्यंमानाभिवंगंधसौकुमार्यादिसौमन

ममत्वस्यापि तस्मिन्विचारासहत्वमेवेत्याह पित्रोः किं स्वं कार्यः जनकत्वात् नु वितर्के भार्याया वा भोगप्रदत्वात् स्वामिनो वा तत्क्रयक्रीतत्वाद् ... स्वामिनो वा अधीनत्वात् अग्नेर्वा अन्ते तस्य तद्दाह्यत्वात् श्वगृध्रयोर्वा भक्ष्यत्वात् किंच आत्मनः तत्कृतशुभाशुभभोगित्वात् सुहृदां वा उपकारित्वात् एवं यो नावसीयते तत्त्वतो निश्चीयते तस्मिन्कालेवरे प्रियत्वेन सक्तो विषजते इत्येवाह अहो इति सुनसं शोभननासिकं अतो गुणारोपेण रमणीयमाह ... ...ः २

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीयते २० तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः २१ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ विण्मूत्रपूये रमतां कृमीणां कियदन्तरं २२ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा २३ अदृष्टादश्रुताद्भावान्न भाव उपजायते असंप्रयुञ्जतः प्राणान्शाम्यति स्तिमितं मनः २४

त्याह त्वगादिसंहतौ तत्संघाते देहे विण्मूत्रादिसंहतौ रमतां कृमीणां वा यद्यप्येवं वीभत्सिता एव स्त्रियः अथापि नोपसज्जेत अवलोकनादिनापि संगं न कुर्यात् अर्थवित् विवेकी अस्मद्वेतः क्षिपेति न तु क्वचिन्निमीलितनयनादेरपि मनः क्षोभो दृश्यते सत्यं ... दर्शनादिकं विना न भवतीत्याह अदृष्टादिति भावात्पदार्थात् भावो मनःक्षोभः अतः प्राणान् इन्द्रियाणि असंप्रयुञ्जतः नियच्छ

तदेवाह नाहमिति अभिनिर्मुक्तः अधिरमणात्‌ अस्तंगतः अभ्युदितो वा सूर्य इति अमुया उर्वश्या वंचितः बतविदे उत अपि वर्षपूगाणामहान्यपि गतानि न वेद इति येन मे मोहेन आत्मा देहः क्रीडा मृगवत्‌ अधीनः नतु प्रभुः अयं कोपि तया अनुनयार्थमधीनता उक्तैव सत्यं नन्वेतदस्तीत्याह सप रिछदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांतीं मयि अन्वगमं अनुगतोस्मि किंच

नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितो मुया मुषितो वर्षपूगानां बताहानि गतान्युत ९
अहो मे आत्मसंमोहो येनात्मा योषितां कृतः क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः १०
सपरिछदमात्मानं हित्वा तृणमिवेश्वरं यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन्‌ ११
कुतः तस्यानुभावः स्यात्तेज ईशत्वमेव वा योन्वगछं स्त्रियं यांतीं खरवत्पादताडितः
१२ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं १३
स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं योहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः १४
सेवतो वर्षपूगान्मे उर्वश्याः अधरासवं न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा

मनःप्रभावादिभिमानो हर्षैर्वेत्याह कुत इति तस्य मे तेजो बलं ऐश्वर्यं यथा पादताडितोपि खरी मनुगछति तद्वत्‌ एवंभूतस्य एवं साधनं व्यर्थमित्याह किमिति त्यागेन संन्यासेन विविक्तेन एकांतसेवया मौ नेन वाङ्नियमेन अजितमतः सन्नात्मानं निंदति इति द्वाभ्यां अकोविदं मसातारं गोखरवत्‌ गोखरवत्‌

प्रसिद्धमितिहासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः कीर्तिर्यस्य सः उर्वशीविरहात् प्रथमं मुह्यन् पश्चात् कुरुक्षेत्रे तां समासाद्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकापगमे सति ततो निर्विण्णः सन्निमां गाथामगायतेति नवमस्कंधानुसारेणाद्रष्टव्यं प्राक्तनीं मोहावस्थामाह त्यक्त्वेति घोरे तिष्ठेति अपराधनकारिण्यहे हे जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवा।

ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ४ त्यक्त्वात्मानं व्रजन्तीं तां नग्न उन्मत्तवन्नृपः विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ५ कामानतृप्तोऽनुजुषन् क्षुल्लकान्वर्षयामिनीः न वेद यंतीर्नायांतीरुर्वश्याकृष्टचेतनः ६ ऐ० उ० च अहो मे मोहविस्तारः कामकश्मलचेतसः देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ७

वहै नु न नौ मंत्रा अनुदितास एते मयस्करन् परतरे चनाहंनित्येवं मंत्रैर्विलपन् वैक्लव्यकारणमाह कामानिति वर्षाणां यामिनीः रात्रीः यंतीः अपयातीः आयातीः आगामिनीः आकृष्टचेतना यस्य सः तस्य गंधर्वलोकं प्राप्तस्य बहुकालमुर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाह अष्टादशभिः तत्राष्टभिरनुतापः प्रपंच्यते अहो इति यत्तामया रेमस्य

र्यद्वेशे योगनिष्ठया विद्यातोऽष्टसंगतः साधुसंगेन तन्निष्ठापराकाष्ठेति वर्ण्यते योगिनो योगविधे
याः संगतः संभवेदिति सर्वथा तन्निष्ठत्वमर्थं मे लक्षणानि वितन्यते निःसंगो मां भजेद्विद्वानप्रमत्तो जितें
द्रिय इति श्रुते तत्र पृष्ठेऽनर्थं कथमिष्यन्जीवन्मुक्तस्यापि तद्धि संगोऽद्वो भवत्यनर्थः स्यादित्याशंक्या
मुमुक्षोऽनुवादपूर्वकं परिहरति साईश्मिः मल्लक्षणमत्स्वरूपं लब्ध्वा ते येन तमिमं नरदेहं लब्ध्वा म
द्धर्मभक्तिलक्षणो आस्थितः सन् आत्मस्थ आत्मन्येव नियतत्वेन स्थिते परमानंदरूपमात्मानं मां

श्री. ग. उ. च. मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः आनंदं परमात्मानमा
त्मस्थं समुपैति माम् १ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया गुणेषु मायामा
त्रेषु दृश्यमानेष्ववस्तुतः २ वर्तमानोऽपि न पुमान्युज्यतेऽवस्तुभिर्गुणैः संगं न कुर्या
दसतां शिश्नोदरतृपां क्वचित् तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत् ४ ॥

समुपैति सम्यक् प्राप्नोति न चैवंभूतस्य विषयसंगो नामास्तीत्याह गुणमय्येति गुणमय्या
जीवयोन्या लिंगोपाधिस्तया विमुक्तः गुणेषु वर्तमानोऽपि तैर्न युज्यते संगं न प्राप्नोति अवस्तुतः अव
स्तुभिः नन्ववस्तुभिरप्ययुज्यमाना दृश्यंते तत्राह अवस्तुत्वेन दृश्यमानेषु तथापि संगं वर्ज
येदित्याह संगमिति असतां लक्षणमाह शिश्नोदरे तर्पयंतीति शिश्नोदरतृपस्तेषां क्वचित्क
दाचिदपि असतां तावद्बहूनां संगः किं तु तत्र एकस्याप्यनुगामः अनुवर्ती अंधमनुगच्छतीति योंधस्तद्वत्

इत्यनेनोक्तं त्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्षमित्याह एता इति सार्द्धेन येन जीवेन निर्जिताः स प
श्चाद्विविक्तेन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति तस्माद्विवेकिना
मिदमेव युक्तमित्याह तस्मादिति ज्ञानविज्ञानयोः संभवो यस्मिन् तमिमं नरदेहं भजनप्रकारमाह
निःसंग इति सार्द्धेन सत्वसंसेवया सात्विकान्येव सेवेत प्रमाद सत्वविद्विद्ध्य इति प्रागुक्तया नैरपेक्ष

एताः संसृतयः पुंसो गुणकर्मनिबंधनाः येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ३२
भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं ३३ गुण
संगं विनिर्द्धूय मां भजंतु विचक्षणाः निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः ३४ रज
स्तमश्चाभिजयेत्सत्वसंसेवया मुनिः सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः ३५ सं
पद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः मयै
व ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् ३६ इति ए द स्कं पं वि ध्यायः २५

णा उपशमात्मकेन सत्वेनैव एवं सति मां प्राप्नोतीत्याह संपद्यत इति जीवं जीवत्वकारणं लिंगश
रीरं सोपाधिकस्य पुनः संसार इत्याह जीव इति न बहिः विषयभोगे नांतरतः स्मरणेन गुणाकृता
भुक्तसंस्मरणप्रयासमिति गुणकथाकथनादिभिः प्रवृत्तभक्तिरसेन विवेकिनो न हि पुनः स्खलनं भ
ननुरीदृशी ३६ ३ श्री ग ते का श ये वा दी का पं वि ध्यायः २५

देहोत्क्रांतिकालीनगुणोत्कर्षमाह सत्वेप्रवृद्धेसतिप्रलीनामृताः रजोलयाः रजसिप्रवृद्धेसतिल
यायेषांते एवंतमोलयाः उत्पीपिनिर्गुणाः उत्पत्रतत्वलयशब्दानुपादानाज्जीवंतोपिनिर्गुणाश्चेन्मा
मेवयांतीत्यर्थः इदानींगुणोत्कर्षकृतमेवतत्तत्फलसाधनकर्मत्रैविध्यमाह मदर्पणमिति मत्यै
तदर्पणकृतंनिष्फलंकेवलंदासभावेनैवकृतंयन्निजंकर्मनित्यादितत्सात्विकंफलसंकल्पं
तेयस्मिनतत्तदिंसाप्रायंहिंसादर्पणकृतंहिंसाबहुलंच आदिशब्दाद्दंभमात्सर्यादिकृतंइदानींस

सत्वेप्रलीनाः स्वर्यांतिनरलोकंरजोलयाः तमोलयास्तुनिरयंयांतिमामेवनिर्गुणाः
२२ मदर्पणंनिष्फलंवासात्विकंनिजकर्मतत् राजसंफलसंकल्पंहिंसाप्रायादितामसं
२३ कैवल्यंसात्विकंज्ञानंरजोवैकल्पिकंतुयत् प्राकृतंतामसंज्ञानंमन्निष्ठंनि
र्गुणंस्मृतं २४ वनंतुसात्विकोवासोग्रामोराजसउच्यते तामसंद्यूतसदनंमन्निकेतंतुनि
र्गुणं २५ सात्विकः कारकोसंगीरागांधोराजसः स्मृतः तामसः स्मृतिविभ्रष्टोनिर्गुणो
मदपाश्रयः २६ सात्विक्याध्यात्मिकीश्रद्धाकर्मश्रद्धातुराजसी तामस्यधर्मेयाश्रद्धाम

गुणातंरगुणाभेदेनज्ञानादीनांचातुर्विध्यमाह कैवल्यंदेहादिव्यतिरिक्तात्मविषयंवैकल्पिकंदे
हादिविषयंप्राकृतंइज्ञः राजसंप्राकृतंबालमूकादिज्ञानतुल्यंमन्निष्ठंपरमेश्वरविषयंवनेविवि
क्तवासःसात्विकोवासः भगवन्निकेतनंतत्सान्निध्यात्तदाविर्भावान्निर्गुणंस्थानंकारकंकर्मासंगीत्य
नासक्तः रागांधः अत्यभिनिवेशवान्स्मृतिविभ्रष्टः अनुसंधानशून्यः मदपाश्रयः मदेकशरणः

२२

२

पथ्यंहितं पूतंशुद्धं अनायस्तंअनायासतःप्राप्तं आहार्यंभक्ष्यभोज्यादि इंद्रियाणांप्रेष्टंकट्वम्ल
लवणादि आर्तिदंअशुचिदेत्यकरमशुद्धंच चशब्दान्निवेदितंनिर्गुणमित्यभिप्रेतं आत्मोत्थ
मात्वंमदपाश्रयमित्यपितत्वेनतत्पदार्थविषयत्वेनज्ञानवदेवद्रष्टव्यं उक्तंसमाहृतभूतंत्रैगुण्य
मुपसंहरन्निहाभ्यां द्रव्यंपथ्यभूतादिदेशोवनग्रामादिःफलंसात्विकंसुखमित्यादिकालः य
दाभजंतमांभक्त्याध्यदेतेराजनेयदित्यादिनायोयोउक्तः ज्ञानंकेवल्यंसात्विकंज्ञानमित्यादिकर्म

पथ्यंपूतमनायस्तमाहार्यंसात्विकंस्मृतं राजसंचेंद्रियप्रेष्टंतामसंचार्तिदाशुचि २८
सात्विकंसुखमात्मोत्थंविषयोत्थंतुराजसं तामसंमोहदैन्योत्थंनिर्गुणंमदपाश्रयं
२९ द्रव्यंदेशःफलंकालोज्ञानंकर्मचकारकः श्रद्धावस्थाकृतिर्निष्ठात्रैगुण्यःसर्व
एवहि ३० सर्वेगुणमयाभावाःपुरुषाव्यक्तधिष्ठिताः दृष्टंश्रुतमनुध्यातंबुद्ध्यावापुरु
—षर्षभ ३१

मदर्पणमित्यादिकारकःसात्विकःकारकोसंगीत्यादिश्रद्धासात्विक्याध्यात्मिकीत्यादिअ
वस्थासत्वंजागरणमित्यादिआकृतिः उपर्युपरिगच्छंतीत्यादिनोक्तादेवत्वादिरूपा निष्ठा
सत्वेप्रलीनाःस्वर्यांतीत्यादिनोक्तस्वर्गादिः एवमन्येप्ययंभावस्त्रैगुण्यपरिणामात्मकःकेवल
मेषएवकिंतर्ह्यावंतःपुरुषाव्यक्तयोर्धिष्ठिताःअधिष्ठिताः नेमेसर्वेभावागुणमयाएवतत्प्रपंचः

तदेवं मिश्राणां मिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणोद्रेककार्याणि दर्शयति यदेतिसमदेशा
भिः यदेतरौ गुणौ जयेत् अभिभवेत् भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शान्तं शिवत्वविशद
त्वभास्वरत्वानां यथाक्रमं सुखधर्मज्ञानत्वे हेतुत्वात्तदा तैर्युज्येत आदिशब्दाच्छमदमादिभिश्च तत्
मस्सत्त्वं च कर्म्मभूतं रजः कर्त्तृ संगो संगादेर्हेतुर्भिदा भेदहेतुः चलं प्रवृत्तिस्वभावो अतः संगादेर्हेतुत्वा
त्तयशसा श्रिया च युज्येत तत्कामः पुमान्भवतीत्यर्थः भिदादेर्हेतुत्वाद्दुःखेन युज्येत द्वितीयाद्वै भ

यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवे तदा सुखेन युज्येत धर्म्मज्ञानादिभिः पुमान् १३
यदा जयेत्तमस्सत्त्वं रजस्संगं भिदा चलं तदा दुःखेन युज्येत कर्म्मणा यशसा श्रिया १४
यदा जयेद्रजस्सत्त्वं तमो मूढं लयं जडं युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया १५
यदा चित्तं प्रसीदेत इन्द्रियाणां च निर्वृतिः देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मत्पदं १६

यं भवतीति श्रुतेः चलत्वात्कर्मणा च युज्येत यदा रजः सत्त्वं च कर्मभूतं तमः कर्तृ जयेत् मूढं विवे
कभ्रंशकं लयं आवरणात्मकं जडं अयत्नमयमात्मकं अतो मूढत्वाच्छोकमोहहिंसाभिः लयत्वा
न्निद्रया जडत्वाद्धयमाभावेन केवलमाशया युज्येतेति द्रष्टव्यं जनतिपाठे लयात्मकत्वेन
वा निद्राशायये वेहेतुः किंच यदा चित्तं प्रसीदेत स्वच्छं भवेत् निर्वृतिरुपरतिः तत्तदा मत्पदं मदुपल।

यदापुनःक्रिययाविकुर्वन्विकारंप्राप्नुवन्नपिभवति आसमंताद्धितिसाधीर्यस्यसःचेतसांज्ञानें
द्रियाणांचानिवृत्तिःअनुपरतिःगात्राणांकर्मेंद्रियाणांतेषामस्वास्थ्यंविकाराधिक्यंमनोभ्रांतंतैश्च
चलैरजउत्कटंनिशामयजानीहि यदासीदत्तिरोभवत्चेतसोग्रहणेऽर्थचदाकारपरिणामेऽक्ष
मंसम्यक्चित्तंविलीयतेमनोपिसंकल्पात्मकंनष्टंलीनंतमोज्ञानंग्लानिर्विषादश्चभवति तदातम
उत्कटंउपधारयविद्धि किंच एधमानइति इंद्रियाण्येवनिवृत्तिप्रवृत्तिमोहस्वभावानिदेवासुररक्षां

विकुर्वन्क्रिययाचाधीरनिवृत्तिश्चचेतसां गात्रास्वास्थ्यंमनोभ्रांतंरजएतैर्निशामय १७
सीदच्चित्तंविलीयेतचेतसोग्रहणेक्षमं मनोनष्टंतमोग्लानिस्तमस्तदुपधारय १८ एध
मानेगुणेसत्वेदेवानांबलमेधते असुराणांचरजसितमस्युद्धवरक्षसां १९ सत्वाज्जा
गरणंविद्याद्रजसास्वप्नमादिशेत् प्रस्वापंतमसाजंतोस्तुरीयंत्रिषुसंततं २० उप
र्युपरिगछंतिसत्वेनब्राह्मणाजनाः तमसाधोधआमुख्याद्रजसांतरचारिणः २१॥

सिइतितेषांयथाप्रसंगमाद्याधिदैविकानांगुणानामुत्कर्षकार्याण्युक्तानीतिसेयंगुणोत्कर्षतोऽव
स्थाभेदंदर्शयति सत्वादिति प्रसंगात्त्रिगुणावस्थामाह तुरीयंचतुर्थमवस्थांतरेणामत्रिषुसं
ततमेकरूपमात्मतत्वमेवेत्यर्थः गुणोत्कर्षद्वारेणतत्कर्मफलनिष्ठांदर्शयति उपर्युपरीति
ब्राह्मणावेदाद्यनुष्ठानाभियुक्ताःआब्रह्मणाइतिपाठेब्रह्मलोकमभिव्याप्येत्यर्थः आमुख्यात्
स्थावरानभिव्याप्यअंतरचारिणःमनुष्याएवभवंति २१॥

तमोऽन्तोरागद् क्रोधइति लोभोव्ययपराङ्मुखता क्लमःश्रमः कलिःकलहः शोकमोहोऽग्रजशो
चनं भ्रमश्च विषादःतीव्रदुःखंदैन्यंच निद्रातंद्रा आशाइदमस्य भविष्यतीत्यन्वीक्षा भीःभयं अ
नुद्यमोनाम अनुद्वेशः क्रमेणैताः शोकत्रयोक्ताः वर्णितप्रायाः अन्याश्च ग्राह्या इतिभावः वि
भक्तानांगुणानां त्रयाणां योगाणांताःमिश्राणामाह सन्निपातइतित्रिभिः अत्रेमम्मेतिच मन्तव्यं क्रो
धवद्इति सामानाधिकरण्यप्रदर्शनात्सन्निपातत्वं अत्रेशान्तः कामीक्रोधीत्यादि तथा मम

क्रोधोलोभोऽनृतंहिंसायाच्यादंभःक्लमःकलिः शोकमोहोविषादार्तिनिद्राशाभीरनु
द्यमः ४ सत्त्वस्यरजसश्चैतास्तमसश्चानुपूर्वशः एतयोर्वर्णितप्रायाःसन्निपातमथो
शृणु ५ सन्निपातस्त्वहंमितिममेत्युद्धवयामतिः व्यवहारःसन्निपातोमनोमात्रे
न्द्रियासुभिः ६ धर्मेचार्थेचकामेचयदासौपरिनिष्ठितः गुणानांसन्निकर्षोयंश्र
(द्धारतिधनावहः ७

मांतिरस्ति कामक्रोधइत्यादिद्रष्टव्यं तत्रएवकःसर्वोव्यवहारश्चस
न्निपातकार्यमित्याह व्यवहारइति अत्रहेतुः मनश्चमात्राणिचइंद्रियाणिचअसवःप्राणाःतैःमनआ
दीनांसात्त्विकतामसराजसत्वात्तद्व्यवहारइतिभावः धर्मोऽपुरुषोयदाधर्मादिषुपरिनिष्ठितोभव
तितदाऽयंत्रिगुणनिष्ठारूपःसन्निकर्षःसन्निपातकार्यं धर्मादीनांसत्वतमोरजःकार्यत्वात्विष
यतःसन्निपातजन्यमुक्तफलत्रयंइत्याह श्रद्धारतिधनानिसत्वरजस्तमोमयान्यावहतीति

धर्मनिष्ठयामेवसन्निपातंदर्शयति प्रवृत्तिलक्षणोकाम्यधर्मेयदापुंसोनिष्ठाभवतितयापुमान्य
दागृहाश्रमएवासक्तस्तिष्ठेत अनुपश्चात्स्वधर्मेचानित्यनैमित्तिकेतिष्ठेत्सोपिसात्विकसन्निपातः
हिंयस्मात्काम्यधर्मगृहाश्रमेतेस्वधर्माःरजस्तमःसत्वमयाइत्यर्थः तदेवंमिश्रामिश्रगुणवृत्तीः
प्रदर्श्यपदानेपुमान्येनयथाभवतितत्र यदुक्तंतद्दर्शयति पुरुषमितित्रिभिः हिंसाशत्रुमारणादि
कर्माशास्ययाभजन्तेतामसंविद्यात् एतैर्गुणैरेवंभूताभवन्तीतितात्पर्यार्थः नन्वेतेवापिगुणएवशो

प्रवृत्तिलक्षणोनिष्ठापुमान्यद्गृहाश्रमे स्वधर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ८
पुरुषंसत्वसंयुक्तमनुमीयाच्छमादिभिः कामादिभिरजोयुक्तंक्रोधाद्यैस्तमसायुतं ९
यदाभजन्तिमांभक्त्यानिरपेक्षःस्वकर्मभिः तंसत्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा १०
यदाआशिषआशास्यमांयजेतस्वकर्मभिः तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसं
सत्वंरजस्तमइतिगुणाजीवस्यनैवमे चित्तजायैस्तुभूतानांसज्जमानोनिबध्यते १२

ननुकर्तृत्वाविशेषात्कथंविशेषणत्वंमेत्याहजीवस्यैवकर्तृतिनियमःयतोमांभजन्तेतिवारंवारमुच्य
तेतत्राह सत्वमिति जीवस्यैवनमेऊतःयतःचित्तजाःजीवोपाधौचित्तेभिव्यज्यन्ते अतोयैःसएवव
ध्यतेकीदृशः भूतानांदेहरूपाणामन्येषांचमध्येसज्जमानःअहंत्वनासज्जमानोगुणानियंतृत्वेन
रत्स्याऽधिकतोपिनित्यमुक्तइतिमहान्विशेषइतिभावः यद्वाभूतानामपंचीकृतानांयत्कार्यंभू

एवंभूतादिनाहंकारेणाग्रस्यमाने शब्दतन्मात्रे तदेवं तामसाहंकारस्य कार्यस्य शब्दपर्यंतलय
मुक्त्वा राजसाहंकारकार्यस्याह इंद्रियाणि स्वयोनिष्विति स्वप्रवर्तकदेवतासु तेषां प्रवृत्तिस्व
भावत्वात्प्रवृत्तेश्च देवताधीनत्वात्तासु लय इति वाचोयुक्तिः वस्तुतस्तु स्वकारणे राजसाहंकारे लय
मिश्रतः योनिरित्युद्देश्यपरत्वादेकत्वमविवक्षितं येन योनयो देवतास्तु मनसि कृतं इश्वरे नियंतरि म
नोवशत्वसंभवसदेवाद्युत्पत्त्युक्तत्वात् इंद्रियलयोक्तप्रकारोप्यभिप्रायः मनश्च देवताभिः सह वैका

एवं शब्दतन्मात्रे इंद्रियाणि स्वयोनिषु योनिर्वैकारिके
सौम्य लीयते मनसीश्वरे २२ शब्दो भूतादिमप्येति भूतादि
र्महति प्रभुः स लीयते महान्स्वेषु गुणेषु गुणवत्तमः २३
तेऽव्यक्ते संप्रलीयंते तत्काले लीयतेऽव्यये

रिके अहंकार इत्यर्थः तामसाहंकारकार्याविशेषितस्य शब्दस्य लयमाह शब्दो भूतादिना तामसा
हंकारं अप्येति तस्मिंल्लीयत इत्यर्थः भूतादिस्तु पल्लवगुणो त्रिविधोप्यहंकारो महति जडांशं वि
हाय ज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् स च महा
न्स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्वात् गुणवत्तमः स्वात्मरूपं विहाय गुणमात्ररूपो भवति
तेऽव्यक्ते प्रकृतौ साम्यावस्थां गच्छंतीत्यर्थः तदव्यक्तं काले कालाधीनत्वात्तेनैकीभूयावतिष्ठते अ

प्रलयं निरूपयति विराड्ब्रह्मांडमयः कालात्मना बाध्यमानः लोकानामहरहः कल्पाः सृष्टिप्रलय
विधाः कल्प्यंते यस्मिंस्तान्वा यस्मिन्विकल्पयतीति तथा स तथाभूतोऽपि पंचत्वमुपायविशेषाय
विभागाय कल्पते योग्यो भवति पंचानां भूतानां पंचरूपस्तेषां पृथग्भावापत्त्या नश्यतीत्यर्थः त
त्र तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी
पृथिव्या ओषधयः ओषधीभ्योऽन्नं अन्नात्पुरुषः इति श्रुत्युक्तसृष्टिक्रमप्रातिलोम्येन प्रलयमाह अ

हिरण्मयः स आत्मा वै लोककल्पविकल्पकः पंचत्वाय विशेषाय कल्पते भु
वनैः सह अन्नं प्रलीयते मर्त्यमन्नं धानासु लीयते १९ धाना भूमौ प्रलीयंते भू
मिर्गंधे प्रलीयते अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे २० लीयते ज्योति
षि रसो ज्योती रूपे प्रलीयते रूपं वायौ स च स्पर्शे लीयते सोऽपि चांबरे २१ ॥

न्न इति मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षाण्यनावृष्ट्या क्षीणे सति तत्रैव लीयत इत्यर्थः
अन्नं धानासु बीजमात्रावशेषं भवतीत्यर्थः धाना भूमौ उत्तानप्ररोहंतीत्यर्थः भूमिर्गंधे संवर्तका
दित्यशोषिता संकर्षणाग्निना दग्धा वसतीभूत सूक्ष्मरूपगंधमात्रावशेषा भवति अप्सु गंधः
शतवर्षधारावृष्ट्या ग्रस्यमानो लीयते एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भव
ति ततो रसोऽपि तस्मिंल्लीयते ज्योतिश्च वायुना भिद्यमानं रूपमात्रं तस्मिंल्लीयते वायुश्च काल

नन्वेवंतर्हिस्वकार्येष्वपिमहदादीनामप्याद्यन्तरूपत्वात्सत्यत्वंस्यात् तत्राह यदिति यद्रूपमुपादायउदाय॰
कारणतयास्वीकृत्यपूर्वःकारणरूपोमहदादिभावः परमहंकारादिकंभावंविकुरुतेसृजति यथापि
डंमृद्रूपमुपादायस्वयंनिमित्तभूतोघटंसृजति तद्वत्सएवसत्योन्यो नेति पूर्वस्याद्यन्तयोःकथंतर्हिमृत्तिकेत्ये
वसत्यमित्यादिश्रुतिः तत्राह आदिरिति यद्यदायस्यादिरन्तश्चविवक्ष्यतेतदा तत्सत्यमित्यभिधीय॰
ते श्रुत्यापरमकारणस्यात्मनःसत्यत्वविवक्षयेत्यर्थः ननुतथापिप्रकृतिपुरुषकालानामकार्यभू॰
तानांभिन्नत्वात्कथमद्वितीयतातत्राह प्रकृतिरिति अस्यसतःकार्यस्योपादानंयाप्रकृतिप्रसिद्धाय

यदुपादायपूर्वस्तुभावोविकुरुतेपरं आदिरन्तोयदायस्यतत्सत्यमभिधीयते १७ प्रकृति॰
र्ह्यस्योपादानमाधारःपुरुषःपरः सतोभिव्यंजकःकालोब्रह्मतत्त्रितयंत्वहं १८ स॰
र्गःप्रवर्ततेतावत्पौर्वापर्येणनित्यशः महान्गुणविसर्गार्थःस्थित्यन्तोयावदीक्षणं १९

अस्यसतआधारःअधिष्ठानंपरःपुरुषःयस्यगुणक्षोभेणाभिव्यंजकःकालस्तत्त्रितयंब्रह्मरूपोऽहमेवत॰
स्यचप्रकृतेःशक्तित्वात् पुरुषकालयोर्मदंशरूपत्वात् एवंतावत्कालत्रयेप्यव्यभिचारित्वा
त्ब्रह्मैवसत्यमितिवक्तुं तस्यसृष्टिकारणत्वेनादौसत्यमुक्त्वामध्येपिसत्यत्वमुपपादयितुंप्र
वाहनित्यत्वंदर्शयिष्यन्सर्गप्रवाहरूपायाःस्थितेरवधिमाह सर्गइति महान्कुलःपौर्वापर्येण
पितृपुत्रादिरूपेणनित्यशःअविच्छेदेनकिमर्थंप्रवर्ततेतत्राह गुणाःदेहेषुविविधतयासृज्यतइ॰
तिगुणविसर्गोजीवःतदर्थःतद्भोगप्रयोजनःकिंपर्यन्तंप्रवर्तते यावत्स्थितेरन्तःसोपिकिमवधिःत

एवंव्यवस्थायांकारणमाह त्रिलोक्यांपातालादिस्वदितायां योगादितारतम्येनयथोत्तरंमहर्लोकाद
यः मद्गतिर्वैकुंठलोकः तत्रतमङ्गतिव्यतिरेकोगतिरागतयश्चचलाइत्याहवैराग्यार्थं मयाकालश
क्तिनाधात्रापरमेश्वरेणकर्मफलप्रदेनहेतुभूतेनगुणप्रवाहसंसारेउन्मज्जतिआसत्यलोकमुन्नमाग
तीःप्राप्नोतिपुनर्निमज्जति आस्थावरंनीचागतीःप्राप्नोतिस्पष्टंनिरूपणोस्याद्वितीयात्मप्रतिपत्त्यर्थं

त्रिलोक्यांगतयःसर्वाःकर्मणांत्रिगुणात्मनां योगस्यतपसश्चैवन्यासस्यगतयोमलाः
महर्जनस्तपस्सत्यंभक्तियोगस्यमद्गतिः मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत
१६ गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति अणुर्बृहत्कृशस्थूलोयोयोभावःप्रसिध्यति
१७ सर्वोप्युभयसंयुक्तःप्रकृत्यापुरुषेणवा यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसत वि
कारोव्यवहारार्थोयथातैजसपार्थिवाः १८

त्वाततत्वतिपादनायकारणेनकार्यस्यव्याप्तिमाह अणुरिति उभयेनसंयुक्तोव्याप्तःतदेवाह प्रकृत्येति
इदानींकार्यस्यकारणात्मतांदर्शयति यस्यकार्यस्ययआदिःकारणंअंतःलयस्थानंचतस्यमध्यंम
ध्यावस्थापिसएववैयोपिग्रहंमत्स्वर्णादिषुअतएवाव्यभिचारित्वात्सएवसन्नेतरः यलंतर्हिमिथ्याभू
तकार्यंनदृश्यतेतत्राह विकारइति तैजसाःकटककुंडलादयःपार्थिवाघटशरावादयश्च यथेति १८

कोप्यसौ स्वर्लोकः तमाह नैतेति हृदिस्थमात्मानं मां स्वर्लोकं न जानन्ति हृदिस्थमहं कारणं मद्ज्ञानेनैव सत्यं परमा
त्मानं तत्त्वं न जानन्तीत्याह य इदं यस्मातिरिक्तं जगन्नास्ति कुतः यत इदं जगज्जातं तत्कुतो न जानन्तीति हि य
स्मात् उक्थं कर्मैव शस्त्रं शस्यं कथनीयं पशुहिंसासाधनं वा येषां ते असतः केवलं असत्पोष्याः प्राणतर्पणा
पराः नीहारं तमः तेन व्याप्तानि चक्षूंषि येषां ते यथा प्रसिद्धमपि न जानन्ति तद्वत् तथा च श्रुतिः न
तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तीति।

नैते मां मे रा जानन्ति हृदिस्थं य इदं यतः उक्थशस्त्रा ह्यसत्पोष्या नीहारचक्षुषः २८ ते
मे मतमविज्ञाय परोक्षं विषयात्मकाः हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना २९ हि
साविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया यजन्ते देवता यज्ञैः पितृभूतपतीन् खलाः ३०

वेदतात्पर्याज्ञानाच्चान्यथान्यजन्तीत्याह तेपरोक्षमस्फुटं मे मतमविज्ञाय देवादीन्यजन्ते न तु उत्तरेणा
न्यः स्वमतमेवाह हिंसायां मांसभक्षणार्थं तत्फलार्थं च यदि रागः स्यात्तर्हि यज्ञ एवेत्यभिव्यक्त
तद्द्वारा परिसंख्येयं न त्वावश्यकत्वेन चोदनेत्येवं रूपं यद्यपि नित्यनैमित्तिकयोः कामविशेषानुबंधो
नास्ति तथापि कर्मणा पितृलोकमिति श्रुतेः सामान्यतः पितृलोककामनाऽस्त्येव यतस्तत्करणश्रु
हि कामना चेति भावः तदुक्तं कामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् यद्यद्धि कुरुते जन्तुस्तत्त
त्कामस्य चेष्टितमिति अतएव हिंसया विहारः क्रीडा येषां ते ३० ॥ ॐ नमो महाकाल्यै ॥

ननुकर्मकांडेमोक्षस्यनामापिनश्रूयते कुतएवंव्याख्यायतेययाश्रुतस्योच्छेदनादित्याह उत्पत्त्यैवेतिद्वा
भ्यां उत्पत्त्यास्वभावतएवकामेषुपश्वादिषुप्राणेषुआयुरिंद्रियबलवीर्यादिषुस्वजनेषुपुत्रादिषुअ
नर्थहेतुषु अतस्तान्स्वार्थंपरमपुरुषार्थमविदुषः अतोनतान्प्रत्येकीभूतान्वेदोयद्वाथपिष्यांतितदेवश्रेय
इतिविश्वासितानित्यर्थः तानेवंभूतान्वृजिनाध्वनिकामवर्त्मनिदेवादियोनिषुभ्राम्यतःततःपुनः
तमःवृक्षादियोनिविशतः पशुकामइति आयुरिंद्रियादिकामइतिचपुत्रादिकामइतिच कथंयु
नक्तितेष्वेवकामेषुस्वयंवेदोयुंज्यात्प्रवर्तयेत तथासत्यनाप्तःस्यादितिभावः कथंतर्हिमीमांसका

उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच आसक्तमनसोमर्त्याआत्मनोनर्थहेतुषु २४ नतान
विदुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि कथंयुंज्यात्पुनस्तेषुतांस्तमोविशतोबुधः २५ एवंव्यव
सितंकेचिदविज्ञायकुबुद्धयः फलश्रुतिंकुसुमितांनवेदज्ञावदंतिहि २६ कामिनःकृपणा
लुब्धाःपुष्पेषुफलबुद्धयः अग्निमुग्धाधूमतान्ताःस्वंलोकंनविदंतिते २७ रामायनमः

कर्मःफलपरतांवदंतितत्राह एवमिति व्यवसितंवेदस्याभिप्रायंकुसुमितां अवांतरफलश्रोचनत
यारमणीयांपरमफलश्रुतिंवदंति कुतस्तेकुबुद्धयस्तदाह हियस्माद्वेदज्ञाव्यासादयस्तथानवदं
तीति कुबुद्धित्वंप्रपंचयतिकामिनइत्यष्टभिः कामित्वात्कृपणाःततोलुब्धाःसक्ताःअतःपु
ष्पेष्ववांतरफलेषुपरमफलबुद्धयःअतएवअग्निमुग्धाः अग्निसाध्यकर्माभिनिवेशेनलुप्तविवेकाः
ततश्चधूमतांताः धूममार्गेणयेषांस्वंलोकेआत्मतत्त्वं तथाचश्रुतिः कश्चिद्वाअस्माल्लोकात्प्रेत्य
आत्मानंवेदअयमहमस्मीतिकश्चित्स्वंलोकंनप्रतिजानातीति अग्निमुग्धोहैवधूमतांतःस्वम् २७

अहंमीत्युक्ते तत्रहेतुमाह त्वत्तइति त्वत्तःत्वत्प्रसादादेवज्ञानंप्रमोषःभ्रंशश्चतेशक्तितःमायातः
ननुचस्वप्रकाशस्यात्मनःकथंज्ञानप्रमोषौज्ञानदानेनतत्प्रमोषेणवाममकिंप्रयोजनंतत्राह त्वमेवेति
विकाराविकाराभ्यांनानात्वैकत्वाभ्यांसापेक्षनिरपेक्षप्रकाशाप्रकाशाभ्यांचात्यंतभेदंवक्तुमा-
ह प्रकृतिःपुरुषश्चेति विकल्पोत्यंतभेदएवकृतइत्यपेक्षायांप्रकृतिशब्दोक्तदेहादिसंघातस्य।

त्वत्तोज्ञानंहिजीवानांप्रमोषस्तेत्रशक्तितः त्वमेवह्यात्ममायायागतिंवेत्थनचापरः २८
श्रीभ वा वाच प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ एषवैकारिकःसर्गोगुण-
व्यतिकरात्मकः २९ ममांगमायागुणमय्यनेकधाविकल्पबुद्धीश्चगुणैर्विधत्ते
वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ३०

विकारित्वंतावद्दर्शयति एषइतिद्वाभ्यां एषसर्गःसृज्यतइतिसर्गोदेहादिसंघातःवैकारि-
कःविकारवान् यतःगुणव्यतिकरात्मकःगुणक्षोभकृतः नानात्वमाह ममेति वि-
कल्पभेदंतद्बुद्धीश्च अनेकधात्वंप्रपंचयति वैकारिकः अनेकविकारवानपिस्थूलेनमार्गे-
णतावत्त्रिविधः त्रैविध्यमेवाह अध्यात्ममिति एकंरूपम् ३० ॥ ॐनमोभगवते राम

तानिरूपाणिदर्शयति दृक्स्वरूपमध्यात्मंरूपंअधिभूतंअत्ररंध्रेचक्षुर्गोलकेप्रविष्टंआर्कंवपुःअंशोधिदै
वमिति सापेक्षप्रकाशतामाह परस्परमिति चक्षुषारूपंज्ञायतेतदन्यथानुपपत्याचक्षुस्तत्व
हृत्यन्यथानुपपत्यातदधिष्ठात्रीदेवताततश्चक्षुषःप्रवृत्तिस्तेनानुपपत्तानमित्येवमेतत्त्रयंपरस्परं
सिध्यति अत्ररंध्रइतिविशेषणाव्यावर्त्यमाह दृष्टांतापयोगितयायस्त्वेआकाशेअर्कोवर्ततेतम
उक्तात्मामतस्वतःसिध्यति चक्षुर्विषयत्वेपिप्रतियोग्यपेक्षाभावमात्रेणस्वतइत्युक्तं इदानीमा
त्मनोविकारित्वाद्यभावेनभेदमाह यतएतस्मात्आत्माएषामध्यात्मादीनामाद्यःकारणंअतए

दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिध्यतियःस्वतःखे आत्मायदेषामपरोयआद्यःस्वया
नुभूत्याखिलसिद्धिसिद्धिः एवंत्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचचित्तयु
क्तं

स्वरूपःअभिन्नश्चतस्मादेतेभ्योपरोभिन्नःस्वप्रकाशत्वादपीत्याह स्वयानुभूत्यास्वतःसिद्धप्र
बालाः शशंसुः साधुसाध्विति ॥ ४४ ॥ देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥ तौ वत्स
पालकौ भूत्वा सर्वलोकैकपालकौ ॥ ४५ ॥ सप्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः ॥ ४६ ॥
स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ॥ गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलं ॥ ४७
ते तत्र ददृशुर्बाला महासत्वमवस्थितं ॥ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिव च्युतम् ॥ ४८

म कुर्वते निर्मितैः सह सखयमपि ॥ तथैव वृषायमाणौ नर्दंतौ तदनुकारिशब्दान् ॥ कुर्वंतौ युयुधाते प्रा
थैः ॥ कृतैः प्राह्वैर्जलचरहंसमयूरादीन् ॥ मुग्ध इवाजानन्निवासदत्समीपमागात् ॥ अपरपादाभ्यां सलांग

विपदंवीनांपरिलिप्तांपदंस्यानं ॥ विपद्दिग्गतप्रतिष्ठंवान्यतमोवाकाश्चिद्दोलः ॥ अच्युतेनैवरक्षणामा
सीत् ॥ प्रविष्टः प्रनिष्टः उक्तः स्थानात्पशावंपशुभ्योऽहितं । नवानिकाननानि ॥ अवानविनातियः

चक्रवातेननीतोयंदैत्येनविपदंवियत् ॥ शिलायांपतितस्तत्रपरित्रातः सुरेश्वरैः ॥२५॥ य
न्नम्रियेतद्रुमयोरंतरेप्राप्यबालकः ॥ असावन्यतमोवापितदप्यच्युतरक्षणं ॥२६॥ याव
दौत्पातिकोरिष्टोव्रजंनाभिभवेदितः तावद्बालानुपादाययास्यामोन्यत्रसानुगाः ॥२७॥
वनंवृंदावनंनामपशव्यंनवकाननं ॥ गोपगोपीगवांसेव्यंपुण्याद्रितृणवीरुधं ॥२८॥
तत्तत्राद्यैवयास्यामः शकटान्युंक्तमाचिरं ॥ गोधनान्यग्रतोयांतुभवतांयदिरोचते ॥२९॥
तच्छ्रुत्वैकधियोगोपाः साधुसाध्वितिवादिनः ॥ व्रजान्स्वान्स्वान्समादाययुयुरूढपरि
च्छदाः ॥३०॥ वृद्धान्बालान्स्त्रियोराजन्सर्वोपकरणानिच ॥ अनःस्वारोप्यगोपालायत्ता
आत्तशरासनाः ॥३१॥ गोधनानिपुरस्कृत्यशृंगाण्यापूर्यसर्वतः ॥ तूर्यघोषेणमहताय
युः सहपुरोहिताः ॥ गोप्योरूढरथानूत्नकुचकुंकुमकांतयः ॥ कृष्णलीलाजगुः प्रीता
निष्ककंठ्यः सुवाससः ॥३३॥ तथायशोदारोहिण्यावेकंशकटमास्थिते ॥ रेजतुः कृष्ण
रामाभ्यांतत्कथाश्रवणोत्सुके ॥३४॥ वृंदावनंसंप्रविश्यसर्वकालसुखावहं ॥ तत्रचक्रुर्व्र
जावासंशकटैरर्धचंद्रवत् ॥३५॥ वृंदावनंगोवर्धनंयमुनापुलिनानिच ॥ वीक्ष्यासीदु
त्तमाप्रीतीराममाधवयोर्नृप ॥३६॥

नृगाक सिंस्तत्र ॥ एकधियः विप्रतिपत्तिरहिताः व्रजा
दृढरूढः शकटानित्र्यारोपिताः परिच्छदाः यैस्ते ॥ यत्ताः कृतप्रयत्नाः नूत्नैः कुचानैः कुंकु

श्री°
भा° द°
पृ°
३२

तदेषामैश्वर्यं वदन्ति ये तेषां || एवं व्रजस्य हर्षमुवाहेति || वनं वृन्दावनं गन्तुमतः कृष्णेन यं चिताः स्वतं या
द्दवं नन्दाद्यामे मन्त्रममन्त्रयन् || व्रजकार्यं गोकुलस्य हितकृत्यम् || २४ || २५ || २५ || ||

दर्शयंस्तद्विदां लोके आत्मनो भृत्यवश्यतां || व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ||
क्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्युतः || फलार्थी धान्यमादाय ययौ सर्वफलप्र
दः ||१०|| फलविक्रयिणी तस्य च्युतधान्यकरद्वयं || फलैरपूरयद्रत्नैः फलभाण्डमपूरि च
||११|| सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् || जन्मर्क्षं ते मद्य भवतो विप्रेभ्यो देहि गाः शुचिः
||१२|| पश्य पश्य वयस्यांस्ते मातृमृष्टान्स्वलङ्कृतान् || त्वं च स्नातः कृताहारो विहरस्व स्व
लङ्कृतः ||१३|| नोपेयातां यदाहूतौ क्रीडासङ्गेन पुत्रकौ || यशोदां प्रेषयामास रोहिणी पुत्र
वत्सला ||१४|| इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप || हस्ते गृहीत्वा स
हराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयं ||१५|| क्रीडन्तं सा सुतं बालैरतिवेलं सहाग्र
जं || यशोदाजोहवीत्कृष्णं पुत्रस्नेहस्नुतस्तनी ||१६|| कृष्ण कृष्णारविन्दाक्ष तात एहि स्त
नं पिब || अलं विहारैः क्षुत्क्षान्तः क्रीडाश्रान्तोऽसि पुत्रक ||१७|| हे रामागच्छ तातासु सानु
जः कुलनन्दन || प्रातरेव कृताहारस्तद्भवान्भोक्तुमर्हति ||१८|| प्रतीक्षते त्वां दाशार्ह भोक्ष्य
माणो व्रजाधिपः || एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः ||१९|| इत्यानीय मदेह स्ना
पय्य यशोदा मंगलार्हतोः || अभ्यर्च्य भोजयित्वा तमुद्वमापय प्रास्विती ||२०|| श्रीशुकः
गोपवृद्धा महोत्पातानननुभूय बृहद्वने || नन्दादयः समागम्य व्रजकार्यममन्त्रयन् ||२१|| न
श्रीरामचन्द्रमस्तु नमो नमः || कृष्णाय वासुदेवाय गोविन्दाय नमो नमः || श्रीकृष्णस्य भगवतः सीपतजी

३२

ॐ एकादशे समागत्य वृंदावनमथार्भकैः ॥ वत्सान्पालयता तेन हतौ वत्सबकासुरौ ॥१॥ निर्घातो वज्र
पातस्तद्भयेन शंकिताः तत्र संभ्रमस्ततः पततोर्वृक्षयोः पतनकारणमविज्ञाय बभ्रमुः लक्ष्यं कार
णं दर्शयति ॥२॥ उलूखलमिति द्वाभ्यां प्रकारमाह ॥ कस्येदं कुतो वेदं कर्म कुतो वा कारणात् ॥ अद्भुतमाश्च
र्यं कुत्पात इति कातराः भीताः संतो बभ्रमुरित्यर्थः ॥ मध्यगतेन दृष्टस्तयोर्मध्यगतेन ॥ न केवलमेतावत् इ

श्रीशुक उवाच ॥ गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घा
तभयशंकिताः ॥१॥ भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तमविज्ञाय लक्ष्यं
पतनकारणं ॥२॥ उलूखलं विकर्षंतं दाम्ना बद्धं च बालकं ॥ कस्येदं कुत आश्चर्यमुत्पा
त इति कातराः ॥३॥ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलं ॥ विकर्षता मध्यगेन पुरुषा
वप्यचक्ष्महि ॥४॥ न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ॥ बालस्योत्पाटनं तर्वोः के
चित्संदिग्धचेतसः ॥५॥ उलूखलं विकर्षंतं दाम्ना बद्धं स्वमात्मजं ॥ विलोक्य नंदः प्रहस
द्वदनो विमुमोच ह ॥६॥ गोपीभिः स्तोभितोऽनृत्यद्भगवान्बालवत्क्वचित् ॥ उद्गायति क्वचि
न्मुग्धस्तद्वशो दारुयंत्रवत् ॥७॥ बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकं ॥ बाहुक्षे
पं च कुरुते स्वानां च प्रीतिमावहन् ॥८॥

ताभ्यां निर्गतौ दिव्यौ पुरुषौ अप्यचक्ष्महि ॥ दृष्टवंतो
वयमिति ॥ केवलं तार्किकारजगद्गुरुरेव ॥ अन्ये तु संदिग्धचित्ता बभूवुरिति ॥ भगवन्मायया मोहित
त्वान्नंदस्याच विस्मयमाह ॥ उलूखलमिति ॥६॥ त्रासं तेमा भित्ति शोकमानः ॥ अतीव बालमनुकरो
ति स्म नृत्यन्सह ॥७॥ गोपीभिरिति स्तोभितः करतालादिना प्रोत्साहितः ॥ इदमानयेत्याज्ञप्तः स्थानेऽनुम

श्री॰ भा॰ द॰ ३१

नौ ग्रावां तवानुचरः कुवेरोनारदो वा तस्य किंकरौ भगवतस्तव दर्शनं ॥ तत्र गतयोगावयोः पूर्वस्वभावो माभवत ॥ किंतु वाणी गुणानुकथने इत्यादिना ॥ अस्मदोर्हृयो श्लेति द्विवचनस्थाने बहुवचनं ॥ तवनिवासभूतस्य जगतः प्रणामे तन्निवासस्य भक्तमिति बहुमानेन जगत्प्रणामेशिरो स्थितस्त्वयः भवत्तनूनां भवन्मूर्तीनां संकीर्तितः संस्तुतः वाग्भिः नष्टान्योन्यघनो ज्ञोष्यामित्यादिभिः ॥ श्रीवि

श्रनुज्ञानीहितेनोक्षमंस्तवानुचरकिंकरौ ॥ दर्शनं नो भगवत ऋषेरासीदनुग्रहात् ॥ ३७ ॥
वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥ ३८ ॥ ॥ श्रीशुक उवाच ॥
इत्थं संकीर्तितस्ताभ्यां भगवान्देवकीसुतः दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥ ३९
श्रीभगवानुवाच ॥ ज्ञातं मम पुरैवैतदृषिणा करुणात्मना ॥ यच्छ्रीमदान्धयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ॥ ४० ॥ साधूनां समचित्तानां सुतरां मत्कृतात्मनां ॥ दर्शनान्नो भवेद्बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ४१ ॥ तद्गच्छतं मत्परमौ नलकूवर सादनं ॥ संजातो मयि भावो वामीप्सितः परमोऽभवः ॥ ४२ ॥ श्रीशुक उवाच ॥ ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ॥ बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तरां ॥ ४३ ॥ इति श्रीभागवते महापुराणे दशमस्क

भ्रंशाद्रूपेणानुग्रहः कृत इति युक्तमेवैतदित्याह ॥ साधूनां स्वधर्मवर्तिनां समचित्तानामात्मविदां सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां कृपातिरेकात्सतां वामिसुकं ॥ संविन्नदर्शनाद्दत्तागिर्यथा न भवेद्बहत ॥ प्राधान्यादेकस्य संबोधनं हे नलकूवरयुवां तत्र स्मात ॥ सादनं सदनं स्वनिकेतनं मत्पर

तियंतापित्वमेवेत्तचतत्त्वमेकइति ॥ देहाग्रसवः प्राणा ग्रात्माग्रहंकारइंद्रियाणिचतेषामीश्वरः ननुस्वका
लोनिमित्तंप्रकृतिरुपादानंप्रकृतेर्जातोमहान्विष्णुात्मतयापरिणामतेपुरुषः कर्त्तात्वंहतोचकिमत्राह
ग्रतग्राहत्वः त्वमेवकालइत्यादिनासार्थेन ॥ यतोभगवानीश्वरोविभुस्त्वं ॥ ग्रतः कालोनामतवलीलया
प्रकृतिः शक्तिः पुरुषोंशः महान्कार्यं ॥ ग्रतस्त्वमेवसर्वमित्यर्थः ननुदृश्यमेवचेत्सर्वं ह्यदादित्वानेनमञ्ज्ञा
नेकिनभवति ॥ भवतिचेत्सर्वोपिब्रह्मविस्यात् ग्रतग्राहत्वं दृश्यमानेति ॥ हृश्यत्वेनचवर्तमानः

त्वमेकः सर्वभूतानांदेहास्वात्मेंद्रियेश्वरः ॥ त्वमेवकालोभगवान्विष्णुरव्यय ईश्वरः ॥ २० ॥ त्वं
महान्प्रकृतिः सूक्ष्मा रजः सत्त्वतमोमयी ॥ त्वमेवपुरुषोध्यक्षः सर्वक्षेत्रविकारवित् ॥ २१ ॥
दृश्यमानैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ॥ कोन्विहार्हतिविज्ञातुं प्राक्सिद्धं गुणसंवृ
तः ॥ २२ ॥ तस्मैतुभ्यंभगवतेवासुदेवायवेधसे ॥ ग्रात्मद्योतगुणैश्छन्नमहिम्नेब्रह्मणेनमः
॥ २३ ॥ यस्यावतारा ज्ञायंतेशरीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः
॥ २४ ॥ सभगवान्सर्वलोकस्यभवायविभवायच ॥ ग्रवतीर्णोंशभागेनसोद्यपतिराशि
षां ॥ २५ ॥ नमः परमकल्याणनमः परममंगल ॥ वासुदेवायशांतायपदूनांपतयेनमः ॥ २६

नैः बुद्ध्यहंकारेंद्रियादिभिर्दृश्यत्वेनग्रहस्मेइतिभावः ॥ ननुतर्हिजीवोज्ञानान्नहिनैवेत्याहत्वं कोः
न्विहेति जीवाग्रुत्पत्तेः प्रागेवस्वप्रकाशतयासिद्धं ॥ लोकोवाज्ञानानिगुणसंवृतः देहाद्यावृतः
ग्रतोदुर्ज्ञेयत्वात्केवलंप्रणामतः तस्मैतुभ्यमिति ॥ २३ ग्रात्मनः स्वस्मात् ॥ द्योणैतः प्रकाशोयेषां
तैः ॥ गुणैश्छन्नोमहिमायस्य ग्रसंगैरिवरवलत्सेः ॥ ग्रहोग्रहमीश्वरइतिकृतोज्ञानंनत्याह ॥ २३ ॥ यस्य

श्रीमद्भागवत ... ३५

अतोर्हतमिति अनुरक्तातिस्यातां नैवमित्यादिना मत्प्रसादेन स्मृतिः स्यात॥२०॥ स्वर्लोकतां दे
वत्वं पुनर्लब्धानमित्मदनुग्रहात् लब्धभक्ती भविष्यत इति शस्तत्रमाह॥२१॥ ऋषेरिति किमिति स
मं कर्तुं यत्तत्राह देवर्षिरिति॥ यद्यतस्तत्ततः यमयोर्यमलयोः सहजातयोः आत्मनः श्रीकृष्णस्य त
त्मध्यप्रवेशमात्रेण अनुप्रवृत्ततीति अन्वकु॥ अन्वहन्तः सामोदरेणेति॥ उत्कलितः उद्घाटितः अंघ्रि

अतोर्हतः स्थावरतां स्यातां नैवं यथा पुनः॥ स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात॥२०॥
वासुदेवस्य सान्निध्यं लब्धा दिव्यशरच्छते॥ वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः॥२१
श्रीशुक उवाच॥ एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं नलकूवरमणिग्रीवावासतुर्यमला
र्जुनौ॥२२॥ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः॥ जगाम शनकैस्तत्र यत्रास्तां यमलार्जु
नौ॥२३॥ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ॥ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना
२४॥ इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ॥ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं २५
बालेन निष्कर्षयतान्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ॥ निष्पेततुः परमवि
क्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ॥२६॥ तत्र श्रिया परमया ककुभः स्फुरंतौ

वधो मूलबंधो ययोः तौ परमस्य श्रीकृष्णस्य विक्रमितं विक्रमस्तेनातिवेपंति कंपो येषु ते स्कंधप्रवा
लविटपा ययोस्तौ ककुभः॥ प्रति सर्वतः स्फुरंतावित्यर्थः यद्वा दिशः प्रकाशयंताविति कुजयो
वृक्षयोः स्थितोऽग्निः यथा मूर्तिमानुपैति तथा चेत्य विरजसौ निर्मदौ योपालंभाय वाधुवा देवौ कि
मिति प्रणताविति चेत्तत्राह॥२७॥ हे कृष्ण कृष्ण महायोगिन्नित्यप्रभावतत्वेन बालः किंतु परः पुरु

नरदेवमदेवसंज्ञितं विड्संज्ञितं दग्धे भस्मसंज्ञितं॥ अथात्मा क्रिमिसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक् द्रो
ह्यायतो भूतद्रोहात् निरयो भवति॥ स किं स्वार्थं वेद न वेदेत्यर्थः॥ निषेक्तुः पितुः मातुः पितुर्वा माता
महस्य पुत्रिकाकरणे अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवः तस्मिन्नेवाप्ययो यस्य तं आत्मसात्कृत्वाः
आत्मेति मत्वा असतो मृत्यूनृते एवं श्रीमदविचेष्टितमुक्त्वा तन्निवर्तिकारतिस्थिनोति॥ असतनशति
देवसंज्ञितमप्यंते क्रिमिविड्भस्मसंज्ञितं॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥१०॥ देहः
किमन्नदातुर्वै निषेक्तुर्मातुरेव च मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोपि वा॥११॥ एवं सा
धारणं देहमव्यक्तप्रभवाप्ययं॥ को विद्वानात्मसात्कृत्वा हंति जंतूनृते सतः॥१२॥ असतः
श्रीमदांधस्य दारिद्र्यं परमांजनं॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते॥१३॥ यथा कंटक
विद्धांगो जंतुर्नेच्छति तां व्यथाम॥ जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः॥१४॥ दरिद्रो निर
हंस्तंभो मुक्तः सर्वमदैरिह॥ कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः॥१५॥ नित्यं क्षुत्क्षाम
देहस्य दरिद्रस्यान्नकांक्षिणः॥ इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्तते॥१६॥ दरिद्रस्यैव
युज्यंते साधवः समदर्शिनः॥ सद्भिः क्षिणोति तं तर्षं तत आराद्विशुद्ध्यति॥१७॥ साधूनां स
मचित्तानां मुकुंदचरणैषिणाम॥ उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः॥१८॥ नतदह
परं श्रेष्ठं दारिद्र्यमेव केवलमिति वा कुत इत्यत आह॥ आत्मौपम्येनेति ततो न द्रुह्यतीति भावः॥ दृ
ष्टांतमाह यथेति॥१३॥ मुखवस्त्रान्नादिलिंगैः सर्वेषां जीवानां सुखदुःखेषु समे इति ज्ञानवान् नित्य
र्थः किं च दारिद्र्यं मानमपि साधयतीत्याह श्लोकचतुष्टयेन॥१४॥ निरहंस्तंभः निर्गतोऽहंका

द्यूमेपानयइंगाश्रंतरायमलार्जुनौ ॥ तत्र त्वाभ्यां च देवाभ्यां कश्मलः सुतरां नीयते ॥ १ ॥ यद्विगर्हितं कर्म येन वा देवर्षेर्भगवतो नमस्यापि ॥ तमः क्रोधस्तदेतत्कथ्यतामिति ॥ गंगायामंतर्मध्ये कर्णस्थम तेषु अंभोजानां वनानि तेषां राजयः ॥ ता विद्यंते यस्मिंस्तस्मिन् ॥ अपश्यत ॥ दृष्ट्वा च क्षीबाणौ समबुध्यत

राजोवाच ॥ कथ्यतां भगवन्नेतत्तयोः शापस्य कारणं ॥ यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः ॥ १ ॥ श्रीशुक उवाच ॥ रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ॥ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ ॥ २ ॥ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥ ३ ॥ अंतः प्रविश्य गंगायामंभोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ॥ ४ ॥ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव ॥ अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ॥ ५ ॥ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः ॥ वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥ ६ ॥ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥ ७ ॥ श्रीनारद उवाच ॥ न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः ॥ श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ॥ ८ ॥ हन्यंते पशवो यत्र निर्दयैरजितात्मभिः मबुध्यत कुजनः स्यत ग्राह ॥ ९ ॥ तौ दृष्ट्वेति ॥ अनुग्रहार्थाय ॥ अनुग्रहश्च मदनाशाय ग्रंथे श्रीकृष्णदर्शनं वदत्यमिदं वक्ष्यमाणेन सार्धं इत्यादि जोष्यान् प्रियान् विषयान् ॥ जुषतः सेवमानस्य पुंसः श्रीमदादन्यदाभिजात्यादिः ॥ सत्कुलविद्यादिजनितो मदः अन्यो वा रजोगुणः रजः कार्य बुद्धिभ्रंशः तथा बुद्धिभ्रंशः बुद्धिभ्रंशयतीति तथा किं तु श्रीमद एवेति न

एवं संदर्शितेति सेश्वरमिदं विश्वं यस्य वशे यदधीनमित्यर्थः ॥ भगवत्प्रसादमन्येपि लभंते इदं त्वतिचित्रमिति सर्वोत्कर्षमाह ॥१९॥ नेममिति विरिंचः पुत्रोपि भवः स्वात्मापि श्रीर्जायापि फलितमाह नायमिति ॥२०॥ देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निर्वृत्ताभिमानिनामपीति यशोदायाः कृतबंधने प्रतिज्ञा ॥ अयं मद्याद्यवेध्यनीय एवेति कृष्णस्य स्वबंधनिवृत्तौ प्रतिज्ञा इयं त्वस्माकं तर्गत

तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः ॥ द्व्यंगुलोनमभूत्तेन संदधेन्यच्च गोपिका ॥१५॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं ॥१६॥ एवं स्वगेहदामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् ॥१७॥ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥१८॥ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥१९॥ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥२०॥ नायं सुखापो भगवान्देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥२१॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ॥ अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥२२॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥२३॥ इति श्रीभागवते द

ज्ञादि किं मो बंधुं शक्नोति तत्र कृपेति विचार्य अदृं भक्ताधीनो सतं त्वरइव हिन इव भक्तस्य कृत्ये तंत्रतो हरीकुर्वन् ॥ मम प्रतिज्ञायातु माभक्तस्येति स्वबंधने स्वीकृतवान् ॥ एवं गोपीप्रतिज्ञाकथं तावन्नयाद ॥ स्विन्नगात्राया इति भक्तैर्वृंदस्याप्यस्य मोचकं सवत्कमाह ॥२१॥ कृष्णस्त्विति ॥२२॥ इति श्री

श्री॰
भा॰ पु॰
दं॰
२८

अन्वंचमाणाणयवेक्षलमनुगच्छंती इहत्योऽप्यलभ्योः श्रोणयोः भरेणाक्रांतानामस्ताग्गतिर्यस्याः साविस्रं
सितान्केशाबंधाच्युतैः ॥ प्रसूनैरनुगतिगमनंयस्याः सायद्वा जवेनकंपितान्केशाबंधात्पुरः पतितानाति
प्रसूनानि प्रसूनानिपश्चाद्गतिर्यस्याः सापरामृशात ॥ धृतवती ॥ अंजन्मषिणी अंजंती सर्वतः प्रसर्वं
तीमषीययोस्ते अक्षिणी पाणिनाकर्षंतं सम्मर्दयंतं ॥ भिषयंती ह्रस्वः छांदसः भीषयंतीभयमुत्पाद
यंती प्रवागुरत् ॥ अभर्त्सयत् ॥ इयेषपैच्छत ॥ अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा ॥ अकोविदत्वमे

अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेन विस्रंसितकेशबंधन
च्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥ कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्व
पाणिना ॥ उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ॥ ११ ॥ त्यक्त्वा यष्टिं सु
तं भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा ॥ १२ ॥ न चांतर्न बहि
र्यस्य न पूर्वं नापि चापरं ॥ पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः ॥ १३ ॥ तं मत्वात्मजमव्यक्तं
मर्त्यलिंगमधोक्षजं ॥ गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥ १४ ॥

वाद ॥ १४ ॥ नचांतरितिपंचभिः बंधनेहि बहिः परिधृतेन दाम्नांतराहृतस्य भवति ॥ तथापूर्वा
परविभागवतो वस्तुनः ॥ पूर्वतो दाम धृत्वा परितः परिवेष्टनेन भवति ॥ न चैतदस्तीत्याह ॥ न चांत
रिति किंच व्यापकेन व्याप्यस्य बंधो भवति ॥ न च विपरीतमित्याह ॥ पूर्वापरमिति ॥ किंच नद्वारिति
नेस्यवाभावान्नबंधइत्याह ॥ जगच्चयइति ॥ १४ ॥ तंमत्वेति लिंगमधोक्षजमात्मनेमत्वा बबंधेति बं
गलानेद्वाभ्यामंगुलिभ्यामपूर्णोऽस्मिन्नेकुर्वंतीनां मध्ये स्वयमपिदसंती विस्मयमाप ॥ नचैवंसातेअ
भंगइत्याह ॥ १५

स्वयं च दधि निर्ममंथ । तदा चागायते निचकारान्वयः । स्तनंजं कांचीबद्धं रज्जोराकर्षणश्रमो ययोस्तयोर्भुज-
योश्चलतो कंकणौ च कबराद्विगलंत्यो मालत्यो यस्याः सा । अधिश्रिते चुल्ल्यामारोपिते ॥३॥ उत्सिच्यमाने प्रति-
तापेनोत्सिच्यमाने हृषदाश्मना शिलापट्टेन अंतरं रहः मध्यगतः । एकांतेन वर्तीत मभक्षयत् ॥ सुशृतं सम्य-
ग्दधिमंथनस्यामत्रं प्रविश्य अभित्रं संदृश्य पदृष्ट्वा उलूखलांघ्रेः परिवृत्तितस्योलूखलस्योपरि शिचि शिक्ये ।

श्रीशुक उवाच ॥ ॥ एकदा गृहदासीषु यशोदा नंदगेहिनी । कर्मांतरनियुक्तासु निर्ममंथ स्वयं
दधि ॥१॥ यानि यानीह गीतानि तद्बालचरितानि च । दधिनिर्मंथने काले स्मरंती तान्यगायत ॥२॥
क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः ॥ रज्ज्वाकर्ष-
श्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ॥३॥ तां स्तन्यकाम
आसाद्य मथ्नंतीं जननीं हरिः ॥ गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ॥४॥ तमंकमारूढ-
मपाययत्स्तनं ॥ स्नेहस्नुतं सस्मितमीक्षती मुखं ॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने प-
त्व यसिधिश्रिते ॥५॥ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं ॥ भित्त्वा मृषाश्रु-
र्दृषदश्मना रहो जघास हैयंगवमंतरंगतः ॥६॥ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य सं-
दृश्य च दध्यमत्रकं ॥ भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥७॥ उलूखलां-
घ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितं ॥ हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य
पश्चात्सुतमागमच्छनैः ॥८॥ तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोवरुह्यापससार भीतवत् । गोप्य-
चौर्येण विशंकिते चंचले ईक्षणे यस्य तं ॥ तपसा एकाग्रेणेरिते तदाकारतां नीते । अतएव त-
न्मयोगं प्रवेष्टुं योगिनां मनोपि नोपयातं । अथवा केवलमन्वधावत् ॥ न त्वापयतो योगिनां मनोपि ।

न्वधावन्नयमापयोगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ८

मायावलोकैकमाह॥ त्रय्येति॥ त्रय्या कर्मकांडादिरूपेणोपनिषद्भिर्ब्रह्मेति सांख्यैः पुरुष इति योगैः परमात्मे
ति॥ सात्वतैर्भगवानिति उपगीयमानं माहात्म्यं यस्य तं विस्मयेन पृच्छति॥ नंद इति महोदयं॥ महाभ्युद
य उद्भवो यस्य तत्॥ ययोः प्रसन्नो भगवान् तौ पितरावपि यन्नान्वविंदेतां नाप्राप्नुतां कृष्णस्योदारं मह
त्॥ अर्भकचेष्टितं बाललीलां यच्च कवयो गायंति तद्योर्विंदनसमं किं श्रेयोऽकरोदिति॥ ब्रह्मण आदेशानां

त्रय्या चोपनिषद्भिश्च [illegible] सांख्ययोगैश्च सात्वतैः॥ उपगीयमानमाहात्म्यं हरिं साम
न्यतात्मजं॥ ४६॥ राजोवाच॥ नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं॥ यशोदा च
महाभागा पपौ यस्याः स्तनं हरिः॥ ४७॥ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं॥ गायं
त्यद्यापि कवयो यल्लोकशमलापहं॥ ४८॥ श्रीशुक उवाच॥ द्रोणो वसूनां प्रवरो ध
रया भार्यया सह॥ करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह॥ ४९॥ जातयोर्नौ महा
देवे भुवि विश्वेश्वरे हरौ॥ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत्॥ ५०॥ अस्त्वित्यु
क्तः स भगवान् व्रजे द्रोणो महायशाः॥ जज्ञे नंद इति ख्यातो यशोदा सा धराभवत्॥ ५१॥ त
तो भक्तिर्भगवति पुत्रीभूते जनार्दने॥ दंपत्योर्नितरामासीद्गोपगोपीषु भारत॥ ५२॥ कृ

पालनादिलक्षणानन्नमपवेद द्रोणो जज्ञे॥ स च नंद इति ख्यातः सा च धरा यशोदाभवत्॥ गोपगोपी
नामपि वत्सलस्वभावाद्वात्सल्यभक्तिः तयोः पुनर्नितरामिति स्वलीलया पुत्रभावानुकारिणा॥ ५३॥
इति श्रीभागवते दशमस्कंधे भावार्थदीपिकायामष्टमोऽध्यायः॥ ८॥ नवमे पयउत्सिक्ते गत्वा गोप्य
यत्नतो हरिः॥ विलोक्य भांडभंगादि कृष्णस्योदाम्ना वबंधतं॥ नंदरागिनंतं विश्वं दृष्टा विस्मितचेतसं॥ बंधन

परितोविलोक्याह॥नायंस्वप्नइतितर्हिकिंदेवस्यहरेर्मायातथाचेदन्येकिंनपश्यंतितर्हिकिंवामदीयएव
कश्चिद्बुद्धिमोहः॥विपर्यासोदर्पणोशुसुवर्णवत्॥एवंतर्हिअयंस्थलोपिकथमेतःप्रतीयते॥अंतर्बहिश्चैक
रूपेणचकथंजगत्प्रतीयते॥तथामत्वाविवप्रतिबिंबयोरिवपरस्परवैपरीत्येनप्रतीतिःस्यादित्याशं
क्यान्यथाविनर्कयन्ति॥अथोइति॥४०॥अथवाममामुष्यार्भकस्यापिसतोयःकश्चनाचिंत्यात्मयोगः
सोऽयमेवस्वयंऔत्पत्तिकःस्वाभाविकःचरमेपक्षमाश्रित्याव्ययमेवेश्वरइतिनिश्चित्याह॥अथोइति

किंस्वप्नएतदुतदेवमायाकिंवामदीयोवतबुद्धिमोहः॥अथोअमुष्यैवममार्भकस्ययः
कश्चनौत्पत्तिकआत्मयोगः॥४०॥अथोयथावन्नवितर्कवचोभिरंजसा॥यदाश्र
येयेनयतःप्रतीयतेसुदुर्विभाव्यंप्रणतास्मितत्पदम्॥४१॥अहंममासौपतिरेषमेसु
तोव्रजेश्वरस्याखिलवित्तपासती॥गोप्यश्चगोपाःसहगोधनाश्चमेयन्माययेत्थंकुम
तिःसमेगतिः॥४२॥॥श्रीशुकउवाच॥॥इत्थंविदिततत्त्वायांगोपिकायांसईश्वरः॥वै
ष्णवींव्यतनोन्मायांपुत्रस्नेहमयींविभुः॥४३॥सद्योनष्टस्मृतिर्गोपीसारोप्यारोहमात्मजं
प्रवृद्धस्नेहकलिलहृदयासीद्यथापुरा॥४४॥ ॥ ॥ ॥ ॥ चेतश्चित्तंवित्तादिभिर्न

गोचरं चेतो मनःकर्म

वितर्कगोचरंजगत्यदाश्रयंयदपिष्ठानंयेनकारणाधिष्ठात्रायतोबुद्धिवृत्त्यभिव्यक्तात्॥नत्विदम
वितर्क्यंभवतुतत्पदंकीदृगाह॥सुदुर्विभाव्यमिदमत्यंतमचिंत्यमित्यर्थः एवंप्रपंचप्रतीत्योन्नीतंतत
त्त्वेपुनर्जीवसंसृतिहेतुमायाश्रयत्वेनोचयन्नाह॥अहमिति॥४२॥यन्मायोदात्तामाह॥असौममपतिः
असेव्यव्रजेश्वरस्याखिलवित्तपाअधिष्ठात्रीअहंसतीत्वाया॥एषश्चमोमेसुतःगोप्यादयश्चमदीयाः
इतीत्थंकुमतिः॥यन्मा

कदाचिद्दयमाधांतरेउपालभत तदाव महदाश्चर्यमभूदिति कथयन्नाह ॥ एकदेति ॥ ३२ ॥ उपालभ्य नि
र्भर्त्स्य भयेन संभ्रांतप्रेक्षणो चपलनिरीक्षणे अक्षिणी यस्य तं अदांतात्मन् ॥ चपलगोचरह्यकोलेना
ह्मभक्षितवानिति ॥ नहि बाह्यं किंचिन्मयाभक्षितं ॥ मत्कृते वा दावेवसर्वे मत्कीर्तिभावः समक्षंप
श्यवं व्यादेहि मुखं प्रसारयेति व्यादत्तं प्रसारितवान् ॥ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श तत्प्रपंच

एकदाक्रीडमानास्ते रामाद्या गोपदारकाः कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥ ३२ ॥
सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी ॥ यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ॥ ३३ ॥
कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः ॥ वदंति तावका ह्येते कुमारास्तेग्रजोप्ययं ॥ ३४ ॥
नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ॥ ३५ ॥
यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान्हरिः ॥ व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबाल
कः ॥ ३७ ॥ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः ॥ साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नी
दुतारकम् ॥ ३८ ॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणींद्रियाणि म
नो मात्रा गुणास्त्रयः ॥ ३९ ॥ एतद्धि चित्रं सहजीवकालस्वभावकर्माशयलिंगभेदम् ॥ सू
नोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकाम् ॥ ४० ॥

घति ॥ जगज्जंगमं स्थावरं च खमंतरिक्षं लोकं सादिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगो
लं भूलोकं वायुः प्रवाहः ॥ अग्निर्वैद्युतश्चंद्र उडु तारकाश्च नतानि सदितं ज्योतिश्चक्रं स्वर्लोकं वैकारि
काणि देवाः ॥ मनः इति वैकारिकशब्देन गृहीतमपि देववैलक्षण्यार्थं पुनः कर्मेंद्रियाणि च तेजसा
नि मात्राः मात्रा स्वरूपाः प्राणादयः ॥ एवमेतद्धि चित्रं विश्वं सहदेववीक्ष्य विचित्रमाह ॥ जीवस्य गुणादो ॥

असमये अदोहकाले क्रोशसंजातहासः स्तेयं चौर्यं निर्मितं न तु दत्तं तत्रापि स्वादु नेतरत् ॥ दधि च पयश्च द
धिपयसी किंच भोक्ष्यन् मर्केभ्यो ददाति विभज्य ददाति ॥ तेषां मध्ये तत् मत्वेन केनापि नात्ति चेत् तर्हि भाण्डं भिनत्ति
तर्हि द्रव्यस्यालाभे सति सगृहः अन्यस्वामी तेषु कुपितो याति यद्वा सगृहः सदारः गृहिणीसहितः कुपितः तेषां तो
कान् शिशून् उपक्रोश्य रोदयित्वा याति कल्पितैः स्तेययोगैः विस्तृतं प्रपंचयति ॥ हस्ताग्राह्ये इति तु गा
शिक्यस्थभाण्डे अन्तर्निहितं दध्यादौ च वयुनं ज्ञानं यस्य सः छिद्रं च रचयतीति तद्वित् ॥ छिद्रं रचनादिवित

ततस्तु भगवान्कृष्णो वयस्यैर्व्रजबालकैः ॥ सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् ॥२८॥
कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम् ॥ शृण्वत्याः किल तन्मातुरिति होचुः समागताः
वत्सान्मुञ्चन्क्वचिदसमये क्रोशसंजातहासः ॥ स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययो
गैः ॥ मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भाण्डं भिनत्ति द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य
तोकान् ॥२९॥ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यन्तर्निहितवयुनः शिक्य
भाण्डेषु तद्वित् ॥ ध्वान्तागारे धृतमणिगणं स्वाङ्गमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सु
व्यग्रचित्ताः ॥३०॥ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः
सुप्रतीको यथास्ते ॥ इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसि

विशेषतो धृतमणिगणं ॥ यर्हि यस्मिन्काले रे रे चौर इत्याक्रुष्टो उशति जल्पति त्वमेव चोरः अहं दे
व गृहस्वामी इत्यादीनि धार्ष्ट्यानि उशति भोः कमनीयेयं शोभयद्वा उशति वास्तौ स्वर्चिते गृहे मेहनादीनि पु
रीषोत्सर्गादीनि कुरुते एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः तत्समीपे सुप्रतीकः साधु
रिवास्ते सभयेन नयनेन यस्मिंस्तत् श्रीमुखं तदालोकिनीभिः व्याख्यातार्था प्रख्यापितजन्मफ

स्रांकृष्य पुनः पुनरनुकृष्य सरीसृपन्तौ अतिशयेन चलन्तौ कथंभूतौ घोषाः कटिपादभूषणानि किंकिण्यः तेषां प्रघोषेण ॥ रुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टमनसौ यं यं लोकं ॥ ततस्ततो गच्छन्तं जनमनुसृत्य विचित्रं तत्र गाण्पदानि अनुगम्य मुग्धवत् प्रभीतवत् ॥ मात्रोरन्ति समीपमुपेयतुः उपजग्मतुः ॥ तन्मातरौ निजसुतौ दोर्भ्यामुपगृह्य प्रमोदं ययतुः कथंभूते घृणया कृपया ॥ स्नुवन्त्यौ पयः क्षरन्त्यौ पंकांगरागौ पंकेनांगरागेण रुचिरौ कथं मुखं निरीक्ष्य मुग्धं मंदस्मितं यस्मिन ॥ अल्पा ईषत् दशना यस्मिंस्तच्च

कालेन व्रजताल्पेन गोकुले रामकेशवौ ॥ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः ॥२१॥ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः ॥२२॥ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां ॥ दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदं ॥२३॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः ॥२४॥ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं ॥ गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोनवस्थां ॥२५॥ कृष्णचापलवीर्याणि सहैवाखिलसंयुताः ॥ प्रजल्पंत्यः समागत्य गोप्यो गोपमदर्दथुः ॥२६॥ कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले ॥ अघृष्टजानुभिः पद्भिर्वि

नवयसैंगनानां दर्शनीयाः कुमारलीला ययोः तथाभूतौ जातौ नसंतर्व्रजे व्रजस्य मध्ये तदा चलाव्रजांगनाः तौ प्रेक्षंत्यः प्रेक्षमाणाः विसृज्य गृहकृत्याः हसंत्यो जहृषुः ॥ ताभ्यां प्रगृहीतानि पुच्छानि येषां तैः वत्सैरितस्ततोनुकृष्यमाणौ अतिचपलौ तौ ॥ शृंग्यादिभ्यो निषेद्धुं रक्षां विना निकर्माणि कर्तुं यत्र यदा तज्जनन्यौ न शेकाते ततश्च अलं मनसोनवस्थामापतुरिति रूसो प्यामपराकाष्टादर्शितेति ॥२७॥

यद्वृत्तं मह्यं सम्यक् भावात्कृतं तस्मिन् हेतोः विप्रतिपद्यमानानां यद्वृत्तं नामस्पष्टं गर्भावांत ॥ भावोभावनं तस्मात् अन्योन्य
प्रीत्या सर्वैकमत्यकरणादित्यर्थः सम्यक्कर्षति पकीकरोतीति संकर्षणाम प्रशंसतिमन्यते वदंतीत्यर्थः ॥ गर्भसंकर्षणात्तन प्रकाशयति ॥ अस्यतव पुत्रस्य ॥ अतः श्रीकृष्ण इत्येकं नाम भविष्यति ॥ प्रागयमि
ति सामान्योक्त्या ॥ कश्चिदयं जन्मांतरगतं नाम कथयतीति नंदो मन्यते ॥ अतएवं वासुदेव इति संयहस्येत
श्रीशुक उवाच ॥ ॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत ॥ चकार नामकरणं गूढो रहसि बालयोः ॥ १ ॥ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः ॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः ॥ २ ॥ यदूनामपृथग्भावात्संकर्षणमुशंत्युत ॥ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ॥ ३ ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः १९
वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ बहूनि संति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १५ ॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥ १६ ॥ पुरानेन व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥ १७ ॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः ॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ १८ ॥ तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः ॥ १९ ॥ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते नंदः प्रमुदितो मेने आत्मा
इति ॥ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि ॥ गोपतिर्गोवर्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि न वेद जना अपि नो विदुरिति ॥ जातकफलमाह ॥ १५ ॥ एष इति ॥ आधास्यद्दास्यति ॥ अनेन रक्ष्यमाणाः समेधिता दस्यून् जिग्युरिति ॥ इति चात्मानं प्रति समादिश्य आत्मानं प्रति समादिश्य आत्मानं
हि स्वं वा ॥ आशीर्भिः ॥ बालकीडाचमत्कारैः कृष्णो रामेण संयुतः परमानंदमाधत्ते व्रजे नंदयशोदयोः १

भा० द० स्क० अ० ८

बालबोधिनी टी० ॥ १८० ॥

नयोर्मिथः स्नेहप्रसंगो दर्शयति कपोताविति त्रयेण स्नेहेन गुणिते निबद्धे हृदये ययोस्तौ ५४ विस्रब्धौ निः
शंकौ सा कपोती तर्पयन्ती महासवीक्षितजल्पादिभिः प्रीणयन्ती अत एव तेनानुकंपिता सती यं यं वांछ
ति तं तं कामं समनयत् संपादयामास राजन्निति त्वया धैर्येन सूचितं ५८ तेषु जन्मरचितेष्वंडेषु हरेः स्वभा

कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः ५४ शय्यास
नाटनस्थानवार्ताक्रीडाशनादिकं मिथुनीभूय विश्रब्धौ चेरतुर्वनराजिषु ५५ यं यं वांछति
सा राजन्तर्पयन्त्यनुकंपिता तं तं समानयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ५६ कपोती प्रथमं
गर्भं गृह्णन्ती काल आगते अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ५७ तेषु काले व्यजायंत
रचितावयवा हरेः शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ५८ प्रजाः पुपुषतुः प्रीतौ
दंपती पुत्रवत्सलौ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ५९ तासां पतत्रैः सुस्पर्शैः कू
जितैर्मुग्धचेष्टितैः प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ६० स्नेहानुबद्धहृदयावन्योन्यं वि
ष्णुमायया विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः ६१ एकदा जग्मतुस्तासामन्नार्थं तौ
कुटुंबिनौ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं ६२ दृष्ट्वा तांल्लुब्धकः कश्चिद्यदृच्छातो वनेचरः
जगृहे जालमातत्य चरतः स्वालयांतिके ६३

वकर्माद्यशक्तिभिः रचितावयवाः पालिताः कोमलान्यंगानि तनूरुहाश्च येषां ते ५८ ५९ पतत्रैः पक्षैः अदी
नानां हृष्टानां ६० विष्णुमायया प्रजाः पुपुषतुः ६१ ६२ स्वालयांतिके चरतः क्रीडतः तान्कपोतपुत्रान् ग्रात

सिद्दावलोकनेनाग्निदृष्टांतेनैवदेहानांदशाभेदुरतयावैराग्यंप्रशंसितमित्याह कालेनेति ओघवद्वेगो
यस्यतेन आत्मनःसंबंधिनांभूतानांदेहानामित्यर्थः ४९ आदित्यदृष्टांतमाहद्वयेन गुणैरिति गु
णैरिंद्रियैर्गुणान्विषयानुपादत्तेयथाकालेऽर्थिभ्यागतेसतिविमुंचतिच नतेषुयुज्यतेलब्धमितिदत्त
मितिवाभिनिवेशंनकरोति गोभिःरश्मिभिःगाःजलानिगोपतिःसूर्योयथा ५० स्वेनाभेदस्फूत्यस्याप्या

कालेनह्योघवेगेनभूतानांप्रभवाप्ययौ नित्यावपिनदृश्येतेआत्मनोऽग्नेर्यथार्चिषां ४९
गुणैर्गुणानुपादत्तेयथाकालंविमुंचति नतेषुयुज्यतेयोगीगोभिर्गाइवगोपतिः ५० बु
ध्यतेस्वेनभेदेनव्यक्तिस्थइवतद्गतः लक्ष्यतेस्थूलमतिभिरात्माचावस्थितोऽर्कवत् ५१
नातिस्नेहःप्रसंगोवाकर्तव्यःक्वापिकेनचित् कुर्वन्विंदेतसंतापंकपोतइवदीनधीः ५२
कपोतःकश्चनारण्येकृतनीडोवनस्पतौ कपोत्याभार्ययासार्द्धमुवासकतिचित्समाः ५३

त्मनोभेदप्रतीतिरुपाधिवशादादित्यदृष्टांतेनैवसंभावितमित्याह बुध्यतइति स्वेस्वरूपेऽवस्थितः
आत्माभेदेनबुध्यते अभिव्यनक्तीतिव्यक्तिरुपाधिःव्यक्तिस्थःउपाधौप्रतिबिंबितस्तद्गतश्चउपा
धिप्रविष्टइवभेदेनस्थूलमतिभिर्लक्ष्यतेयथार्कवदित्यन्वयः ५१ कपोतदृष्टांतमाह नातिस्नेहइ
ति स्नेहःप्रीतिःप्रसंगःउपलालनाद्यासक्तिः ५२ दृष्टांतंप्रपंचयति कपोतःकश्चनेति ५३ ॥

एतेषां च मुनिसान्त्वनादीनां घर्मो सेवकानां मध्ये परमभागवतेषु त्वदर्पितप्रीतिरधिकेति स्त्व
वीति यत्रेष्टयेति ऽऽ भावः छांदसः अहं यत्र वसामि तत्रैव वत्सा परोषिताः पीयं वसतीति प्रतिपत्ति
वत्समपत्नी वत्सश्रीः संस्पर्द्धमाना भवति तथापि तां स्पर्द्धमानां श्रियमनादृत्य यो भवान्मयोषितया
पि यस्या वनमालया भक्तैरर्पितया मिति प्रीत्या सुप्रणीतं सत्कृष्टं सम्पादितं यथा भवति तथार्हणं पू
जामाददत् स्वीकृतवान् सुप्रणीतमित्यर्हणविशेषणं वा तस्य तवांघ्रिर्नो शुभाशयधूमकेतुर्भू

यत्रेष्टयातवति विभोर्वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्तिवच्छ्रीः यः
सुप्रणीतममुयार्हणमाददन्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः १२

यात् यस्यां यो अंघ्रिरमुया सुप्रणीतमर्हणमाददत् मनोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः अथ
वैवं संबंधः एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योपि त्वद्वक्षसि स्पर्द्धमानत्वाद्वा एवं केतायां भगवतो
यशः श्रियं त्वादित्याह यत्रेष्टयावत्सकां तत्भवत्तस्मात् परितः सर्वांगे उष्ट्या कांत यास्यामितया व
नमालया वक्षसि एकदेशे वर्तमाना श्रीः संस्पर्द्धमाना भवति तथाप्यनादृत्य यमयुक्तैर्वेरुयावती
तया कीर्तिमय्या वेत्तु यत्या वनमालयैव यो भवान् सुप्रणीतमर्हणमाददत् इत्यादि पूर्ववत् १२

श्री
भा.प.
टी.
३०

त्वच्चरणस्य भक्तपक्षपातः प्रसिद्ध एवेति स्तुवंतः प्रार्थयंते केतुरिति बलिवधने त्रिभिर्विक्रमैर्युतः त-
त्र द्वितीयविक्रमे सत्यलोकं गतस्तव पादः ब्रह्मक्षालितो विजयध्वज इव तस्मिन्पादे यानि त्रिपतत्पताकः
त्रिधा पतंती त्रिषु लोकेषु वा पतंती गंगा पताका यस्य सः तथा असुरदेवचम्वोः तत्सेनयोः क्रमेण भया-
भयकरः साधुषु सुरेषु स्वर्गाय ऐश्वर्याय खलेष्वसुरेषु इतराय अधोगमनाय एवं केतुरूपस्ते पा-

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः
स्वर्गाय साधुषु खलेष्वितराय भूमन्पादः पुनातु भगवन्भजतामघं नः १३

दः संभजतो नः अघं पुनातु शोधयतु अघादिति पाठे भजतो नः इति कर्मणि षष्ठी अघाद्भजतोऽस्मा-
न्पुनात्विति तथा च श्रुतिः चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि तेन पवित्रेण शु-
द्धेन पूता अति पाप्मानमरातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महः स्वत अ-
मृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधात्विति १३ ॥

नन्वात्मारामस्य किं कर्मकरणेनेत्यत आहुः शुद्धिरिति हे ईड्य हे ऋषभ दुराशयानां रागिणां विद्या उप-
सनाविद्यादिभिः तथा शुद्धिर्न भवति सत्वात्मनां सतां ते यशसि श्रवणेन संभृतया परिवृद्धया अभिवृ-
द्धया सच्छ्रद्धया यथा स्यात् परमपावनस्य यशसो वितानायैव कर्माचरणमिति भावः ९ तथैव
त्वद्यशः श्रवणे दृढश्रद्धा हेतुः अस्माभिस्त्वत्तत्वोऽङ्घ्रिरिष्टः अतस्तवाङ्घ्रिर्नोऽस्माकं अशुभाशयानां विषयवास-

शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदान-
तपःक्रियाभिः सत्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्र-
द्धया श्रवणसंभृतया यथा स्यात् ९ स्यान्नस्तवाङ्घ्रि-
रशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमा-
नः यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सव-

नानां धूमकेतुः तद्दाहकः स्यात् कथंभूतः यः क्षेमाय मोक्षाय मुनिभिः मुमुक्षुभिः प्रेमार्द्रहृदा उह्यमा-
नः ध्यायमानः यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहेऽर्चितः तेषु च केचि-
दात्मवद्भिर्धीरैः स्वरतिक्रमाय स्वर्गातिक्रमाय वैकुण्ठप्राप्तये सवनशस्त्रिकालेऽर्चितः १० ॥

श्री॰
भा॰ पु॰
टी॰
२९

किंच प्रयतपाणिभिः संयतहस्तैर्दर्भैर्विरचिंतत्वा अध्वराग्नौ आहवनीयादौ पात्रेकैर्येयं क्षिप्यते ननु यस्मै
देवतायैदर्भैर्विशृहीतंस्यात्तेध्यायेद्वषट्करिष्यन्नितिवचनात्तद्देवतायैक्षिप्यतेअतआह अध्यात्मिरु
क्तविधिनायंइन्द्रादिरूपेणवयज्ञपुरुषक्षिप्यतइत्यर्थः उक्तंकिंच अध्यात्मयोगअात्माधिकारयो।

यःक्षिप्यतेप्रयतपाणि
भिरध्वराग्नौत्रय्यानिरुक्तवि
धिनेशहविर्गृहीत्वा अध्यात्म
योगउतयोगिभिरात्ममायांजिज्ञा
सुभिःपरमभागवतैःपरी
ष्टः ९ ॐनमोभग
वतेश्रीरामः

गिभिरपिआत्मनस्तवमायांअणिमादिसांजिज्ञासुभिस्त्वत्कामैर्यःक्षिप्यतेपरमभागवतैस्तुभक्तैः।
यःपरीष्टःसर्वतःपूजितस्त्वंवाअग्निर्नोअस्माशमधूमकेतःस्यादितिपूर्वेणान्वयः ९ श्रीरामायनमः

२९

विधिज्ञकर्मेनिहर्त्तत्रमुक्तानिषेधनिमित्तप्रायश्चित्तनिमित्तमाह स्वपादमूलमिति त्यक्तः अन्यस्मिन्देहादौ
देवतांतरे वा भावो येन अतएव तस्य विकर्मणि प्रवृत्तिर्नसंभवति यच्चकथंचित्प्रमादादिनाउत्पतितं भवे
त् तदपि हरिर्धुनोति ननुप्रायश्चित्तमपेक्षते तत्राह परेशः ननुश्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात्
स्वाज्ञाभंगे कथं सहेत तत्राह प्रियस्य ननु नाथ पापफलयाथ्यं भजते तत्राह हृदिसंनिविष्टः नोहवस्तुशः

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः विकर्म यच्चोत्पतितं कथंचिद्धुनो
ति सर्वं हृदि संनिविष्टः ४२ ॥ नारद उवाच ॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः जाये
तेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ४३ ततोंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः रा
जा धर्मानुपातिष्ठन्नवाप परमां गतिं ४४ त्वमप्येतान्महाभाग धर्मान्भागवतान् श्रुतान् आ
स्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ४५ युवयोः खलु दंपत्योर्यशसा पूरितं जगत् पु
त्रतामगमद्यद्वां भगवानीश्वरो हरिः ४६ दर्शनालिंगनालापैः शयनासनभोजनैः आत्मा
वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ४७

क्विरर्थं तामपेक्षत इत्यर्थः ४२ जायंतेयान् जयंत्याः पुत्रान् ४३ उपातिष्ठन् अनुतिष्ठन् ४४ निःसंगो
भूत्वा ४५ यशसैव प्रक्रियेयमुक्ता युवां तु संगत एव कृतार्थावित्याह युवयोरिति वां युवयोः ४६ न च
सर्वकर्माण्यर्पणादिभागवतधर्मैरन्येषामिव युवयोः सत्वशुद्धिः संपादनीया पुत्रोपलालनेनैव भागवत
धर्मसर्वस्वं निष्पन्नमित्याह दर्शनेति कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा पावितः शो

श्री॰
भा॰ प॰
टी॰
१२

एतदेवकैमुत्यन्यायेनस्फुटयति वैरेणेति यंशयनासनादौवैरेणापिध्यायंतस्तस्यगतिविलासाद्यैः आकृतधियः तत्तदाकाराधीर्येषांतेतत्साम्यमापुः किंपुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति ४८ ननुपुत्रस्नेहश्चेन्मोहहेतस्तर्हिसर्वैर्मुच्यतांतत्राह मापत्यबुद्धिमिति अपत्यमिति बुद्धिमाकृथाः

वैरेणयन्नृपतयःशिशुपालपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः ध्यायंतआकृतधियःशयनासनादौतत्साम्यमापुरनुरक्तधियांपुनःकिं ४८ मापत्यबुद्धिमकृथाःकृष्णेसर्वात्मनीश्वरे मायामनुष्यभावेनगूढैश्वर्येपरेव्यये ४९ भूभारासुरराजन्यहंतवेगुप्तयेसतां अवतीर्णस्यनिर्वृत्यैयशोलोकेवितन्यते ॥५०॥ शुकउवाच ॥ एतछ्रुत्वामहाभागोवसुदेवोतिविस्मितः ॥ देवकीचमहाभागाजहतुर्मोहमात्मनः ५१ इतिहासमिमंपुण्यंधारयेद्यःसमाहितः ॥ सविधूयेहशमलंब्रह्मभूयायकल्पते ॥५२॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपंचमोध्यायः ॥५॥ ॐनमोभगवतेवासुदेवाय ॥ खनिवारेण

एवंगमः कोदमः ४९ ननुकथमीश्वरोमानुषःस्यात्कथंवातस्यविश्वस्पृष्ट्यादिकर्तुः शत्रुनाशोपाधिकमोश्वर्यमिवनिरूप्यतेतत्राह भूभारासुरराजन्यपवयेराजन्यास्तेषांहंतवेगुप्तानंहतेशेव हेतुर्मोताय ५० ५१ इहास्मिन्नेवदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते ॥५२॥ एकादशेपंचमो

१२

षट्ब्रह्मादिभिः स्तुत्वा गंतेविज्ञापितं हरिं उद्धवः प्रार्थयामास स्वधाम नय मामिति अतः परमितिविस्तरेणा त्मीयं यानिरूपयितुं तत्प्रस्तावमाह अथेति आत्मजैः सनकादिभिः अभ्यगात् द्वारकामिति चतुर्थेनान्वयः १ २ ननु तेषामुपदेशाद्रूपं भगवंतं नित्यं पश्यतां कथमतिदिदृक्षा अत आह वपुषेति येन वपुषा नरलो

श्रीबादरायणिरुवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः १ इंद्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ऋभवोऽङ्गिरसो रुद्रा विश्वे साध्याश्च देवताः २ गंधर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ऋषयः पितरश्चैव सविद्याधरकिन्नराः ३ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः वपुषा येन भगवान्नरलोकमनोरमः ४ यशो वितेने लोकेषु सर्वलोकमलापहं तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ५ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनं स्वर्गोद्यानोपगैर्माल्यैश्छादयंतो यदूत्तमं गीर्भिश्चि त्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं ६

कमनोरमः सन् सर्वलोकेषु यशो वितेने तदतिसुंदरं वपुर्दिदृक्षवः ४ व्यचक्षत अपश्यन् ५ स्वर्गोद्या नस्थैर्माल्यैः चित्राणि श्रोतव्यत्वेन प्रायाणि पदानि अर्थाश्च यासु ताभिर्गीर्भिः ६ ॥ ॥

रामायनमोनमः ॥ शिवायैनमः ॥

बुद्धींद्रियादिभिर्दर्शनादिना प्रणामेन च वल्लदेन नादेरुवत्याणपातेन न तावयेन मस्कृतवंतः सोतिविस्म
येययाहुः दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा मनसा वचसा चेति प्रणामोष्टांग ईरित इतिस्म
प्राहोक्तो विस्मयाय विशेषणं कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमंतर्हृदि चिंत्यते तेन
तत्स्पृष्टेतत्स्वयं नताः स्वदोभाग्यमित्यर्थः ७ ननु ममापि दृष्टादृष्टकर्मकरणात् कुतो मत्पदारविंद
चिंतनं कर्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः त्वमिति हे अजित नतथात्मामिदानीं तनोमिदमल्पकमंत्वं

देवाऊचुः॥ नताः स्मते देवपदारविंदंबुद्धींद्रियप्राणमनोवचोभिः यच्चिंत्यतेंत
र्हृदिभावयुक्तैर्मुमुक्षुभिःकर्ममयोरुपाशात् ७ त्वंमाययात्रिगुणयात्म
निदुर्विभाव्यंव्यक्तंसृजस्यवसिलुंपसितद्गुणस्थः नैतैर्भवानजितकर्मभिर
ज्यतेवैयत्स्वेसुखेव्यवहितेभिरतोनवद्यः ८ ॥

व्यक्तं महदादिप्रपंचं सृजसि पालयसि संहरसि च तदप्यात्मन्येव न पृथक् दुर्विभाव्यं मनसाप्यन्यैर
वितर्क्यं तद्गुणस्थः तस्या मायाया गुणेषु नियंतृत्वेन स्थितः अथ च एतैः कर्मभिः भवान्नाज्यते न
लिप्यते कुतः यो भवाननवद्यः रागादिरहितः यतः स्वे आत्मरूपे सुखे अव्यवहिते अनावृते अभि
रतः अतस्त्वं कर्मकृदप्यात्मारामः परमेश्वर इति मुमुक्षुभिश्चिंत्यत इति भावः ८

स्तौतिमाह ध्येयमिति हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे कथंभूतं ध्येयं ध्यातुं योग्यं सदे
ति सर्वत्र संबध्यते ध्येयत्वे हेतवः इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारस्तं हंतीति तथा तत् किंच अ
भीष्टदोहं मनोरथपूरकं किंच तीर्थास्पदं गंगाद्याश्रयत्वेन परमपावनं शिवविरिंचिभ्यां नुतं स्तुतं म
हत्तमं ननु तौ कृतार्थौ वेवा किमर्थं ताभ्यां नुतं तत्राह शरण्यमाश्रयणयोग्यं परमसुखात्मकमित्यर्थः तर्हि
वत्सादिस्तुत्यं प्राकृतस्य कथं गोचरः स्यात्तत्राह भृत्यार्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिहं न केवलं
मार्गतकार्तिमात्रं हंतीति किंतु भवाब्धिपोतं संसारार्णवतारकं च ३३ इदानीं स्वयमाप्तकामत्वान्नैरपेक्ष्यं भ

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं भृत्यार्तिहं प्रणतपाल भ
वाब्धिपोतं वंदे महापुरुष ते चरणारविंदं ३३ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आ
र्यवचसा यदगादरण्यं मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदं ३४

त्यागं च सापेक्षत्वं दर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति अन्यैः सुदुस्त्यजां यां सुरेप्सितां राज्यलक्ष्मीं त्य
क्त्वा यदरण्यमगादित्यर्थः यः अरण्यमगात् किं राज्यवैकल्यदर्शनेन न धर्मिष्ठः सन् आर्यस्य गुरोः दशरथस्य
वचसा किंच एवं स्वराज्यं त्यक्त्वापि भक्तवात्सल्येन दयितया सीतया ईप्सितं मायामृगं स्वर्णाकारं यो ऽ
न्वधावत् तस्य भगवतश्चरणारविंदं वंदे एवं हि धर्मिष्ठेति संबोधनेन तत्त्याज्यविवक्षितत्वात् ध्येयपदेन
संबध्यते तथा यदगादिति चरणारविंदमेवोच्यते यन्मायामृगमन्वधावत् तेन पदारविंदं वंदे इत्य

श्री॰
भा॰ ए॰
टी॰
३८

युगानुरूपाभ्यांनामरूपाभ्यां ३५ एतेषुचतुर्षुयुगेषुकलिरेवश्रेष्ठइत्याह कलिमिति गुणज्ञाःकलेर्गुणं
जानंतियतस्ते नतुदोषाणांबहुत्वात्कथंसभाजयंतितत्राह सारभागिनः गुणांशग्राहिणः कोसौगुणः
तमाह यत्रेति तदुक्तं ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन् यदाप्नोतितदाप्नोतिकलौसंकी
र्त्यकेशवमिति ३६ तस्मात्कलौप्रवृत्तःअस्मात्संकीर्तनात्परमोलाभोनास्तियतःसंकीर्तनात् ३७ किं
चकृतादिष्विति ३८ ३९ अमलाशयाःसंतःप्रायःप्रायशोभगवतिभक्ताभवंति ४० भक्तस्यविधि

एवंयुगानुरूपाभ्यांभगवान्युगवर्तिभिः मनुजैरिज्यतेराजन्श्रेयसामीश्वरोहरिः ३५ कलिं
सभाजयंत्यार्यागुणज्ञाःसारभागिनः यत्रसंकीर्तनेनैवसर्वःस्वार्थोभिलभ्यते ३६ नह्यतः
परमोलाभोदेहिनांभ्राम्यतामिह यतोविंदेतपरमांशांतिनश्यतिसंसृतिः ३७ कृतादिषु
प्रजाराजन्कलाविच्छंतिसंभवं कलौखलुभविष्यंतिनारायणपरायणाः ३८ क्वचित्क्व
चिन्महाराजद्रविडेषुचभूरिशः ताम्रपर्णीनदीयत्रकृतमालापयस्विनी ३९ कावेरीच
महापुण्याप्रतीचीचमहानदी येपिबंतिजलंतासांमनुजामनुजेश्वर ४० प्रायोभक्ताभग
वतिवासुदेवेमलाशयाः देवर्षिभूताप्तनृणांपितॄणांनकिंक

निषेधनिवृत्तेःकृतकृत्यतामाह
देवर्षीति आप्ताःपोष्याःकुटुंबिनःइतरेदेवादयःपंचयज्ञदेवताःएषांयथाभक्तऋणीनतथातेषांकिंकरः
तदर्थंनित्यंपंचयज्ञादिकर्ता तथाचस्मृतिः हीनजातिपरिक्षीणमृणार्थंकर्मकारयेदिति अयंतुन
तथाकोसौयःसर्वभावेनश्रीमुकुंदंशरणंगतः कर्तंकृत्यंपरिहृत्य यद्वाकर्तंभेदंपरिहृत्यकर्ताछेदन

३९

तदेवं व्यवायादिमनोरथाकुलितत्वादभीष्टमात्मानं न शृण्वन्तीत्युक्तं। इदानीं धनस्यापि धर्मद्वारा परमा
त्मप्रापकस्य दृष्टोपभोगार्थविनियोगान्नात्मज्ञानगोचरमित्याह धने चेति धर्म एवैकः फलं यस्य त
त् कुतः यतः धर्मात् सविज्ञानमपरोक्षज्ञानसहितं तदपरोक्षज्ञानं भवति कथंभूतं अनुप्रशान्ति अनु
अनंतरमेव प्रकृष्टा शान्तिः निर्वाणलक्षणा यस्मात्तत् एवंभूतं धनं गृहेषु देहाद्यर्थं युञ्जन्तीति ११ किंच व्य
वस्थायामपि व्यवायाद्यभ्यनुज्ञानं यथेष्टप्रवृत्त्यर्थमेवेत्याह यदिति यद्यस्मात्सुरायाः घ्राणभक्षः अ

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशान्तिः गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यं ११ यद्घ्राणभक्षो विहितः सुरायाः तथा पशोरालभनं न हिंसा एवं व्यवायः प्रजया न रत्यै इमं विशुद्धं न विदुः स्वधर्मं १२

घ्राणमेव विहितः न पानं तथा पशोरप्यालभनमेव विहितं न तु हिंसा अयमर्थः देवतोद्देशेन यत्प
शुहननं तदालभनं वायव्यं श्वेतमालभेतेत्यादिश्रुतेः न तु हिंसा या वेदविहिता हिंसा न सा हिंसेति कौ
त्सत्रितिवचनात् भक्षणार्थेन तु क्रियमाणे तदालभने लौकिकहननवद्धिंसैव अत्र आलभनमेव
विहितं न तु हिंसा अतो न यथेष्टभक्षणाभ्यनुज्ञानं तदर्थः व्यवायोऽपि प्रजनननिमित्तभूतया न तु रत्यै अ
तो मन्वादिदत्तमिमं विशुद्धं स्वधर्मं न विदुरिति १२

एवंभगवत्पराङ्मुखानां बहुदोषतां प्रपंच्य तन्निष्ठां प्रपंचयति पंचभिः येत्विति अनेवंविदः एवं यथोक्तेन
विदंति ये ते विस्रब्धाः निःशंकाः अनेन मनोरथा भविष्यतीति विस्रब्धा वा तदानीं न उपोषणेन वा तैः प
शुभिर्विस्रब्धाः प्रेत्य अमुत्र तान् खादंति मांसभक्षयिता अमुत्र यस्य मांसमिहाद्म्यहं एवं मांसस्य मांसत्वं
प्रवदंति मनीषिण इति वचनात् १४ अभिचारादिना द्विषंतः मृतके देहे सानुबंधे पुत्रादिसहिते १५ अ
त्रात्मत्वेन रजकं पितामस्ये रोति तत्वज्ञास्त स्वतः पतनात्यंत मज्ञाः न च तत्वज्ञाः ते तरालवर्तिनः पततीत्या

येत्वनेवंविदोऽसंतः स्तब्धाः सदभिमानिनः पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् १४
द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं मृतके सानुबंधेऽस्मिन्बद्धस्नेहाः पतंत्यधः १५ ये कै
वल्यमसंप्राप्ता ये चातीताश्च मूढतां त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते १६ एत आ
त्महनोऽशांता अज्ञाने ज्ञानमानिनः सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः १७ हित्वात्या
यासरचिता गृहापत्यसुहृच्छ्रियः तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः १८ ॥ श्रीराम

द्वयमिति कैवल्यं तत्वज्ञानम संप्राप्ताः अत्र हेतुः त्रिवर्गप्रधानाः अक्षणिका उपशांतिलक्षणरहिताः दे
होरिस्थ्यं ये बुद्धयो वा स्वयमेवात्मानं घातयंति १६ तदाह एत इति आत्महनः आत्मापह्नवकर्तारः
अज्ञाने कर्मणि तथा च श्रुतिः असुर्या नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्याभिगच्छंति ये के
चात्महनो जना इति १७ या गृहापत्यसुहृच्छ्रियस्ताः हित्वा १८

तदेवंभगवद्भक्तिरेवकर्तव्येतिस्थितेतत्रविशेषंपृच्छतिकस्मिन्कालइति किंवर्णःकीः कीदृगाकारःकेनवानाम्नाकेनवाविधिना १९ प्रत्युत्तरंकृतादिकालेषु नानाप्रकारावर्णाभिधाकारायस्यसः नानैव विधिनाविविधेनैवमार्गेण २० तदेववर्णादिचतुष्टयमाह कृतइत्यादिना कृष्णाजिनादीन् बिभ्रदि-ति

राजोवाच॥ कस्मिन्कालेसभगवान्किंवर्णःकीदृशोनृभिः नाम्नावाकेनविधिनापूज्यते तदिहोच्यतां॥१९॥ श्रीकरभाजनउवाच॥ कृतंत्रेताद्वापरंचकलिरित्येषुकेशवः नानावर्णाभिधाकारोनानैवविधिनेज्यते २० कृतेशुक्लश्चतुर्बाहुर्जटिलोवल्कलांबरः कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू २१ मनुष्यास्तुतदाशांतानिर्वैराःसुहृदःसमाः यजंतितपसादेवंशमेनचदमेनच २२ हंसःसुपर्णोवैकुंठोधर्मोयोगेश्वरोमलः ईश्वरःपुरुषोव्यक्तःपर-मात्मेतिगीयते २३ त्रेतायांरक्तवर्णोसौचतुर्बाहुस्त्रिमेखलः हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः २४ तंतदामनुजादेवंसर्वदेवमयंहरिं यजंतिविद्ययात्रय्याधर्मिष्ठा ब्रह्मवादिनः २५ विष्णुर्यज्ञःपृश्निगर्भःसर्वदेवउरुक्रमः वृषाकपिर्जयंतश्चउरुगायइ

तिब्रह्मचारिवेषोदर्शितः २१ तपसाध्यानेन २२ २३ त्रिगुणादीन्योगभूतामेखलायस्यसः यज्ञमूर्तिः हिरण्यकेशःपिशंगकेशः २४ त्रय्याविद्ययावेदत्रयोक्तकर्मभिः २५ पृश्निगर्भःपृश्न्याःपुत्रःवृषाकपिः स्मृतःसन्वर्षतिकामान्प्राकंपयति क्लेशान्निवृत्यथा जयत्येवसर्वदानयंतः २६ रामायनमः

श्यामः अतसीपुष्पसंकाशः निजानि चक्रादीन्यायुधानि यस्य सः श्रीवत्सो नाम वक्षसो दक्षिणभागे रो-
म्णां प्रदक्षिणावर्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैः अंकैश्चिह्नैः लक्षणैर्वा अस्त्रैः कौस्तुभादि-
भिः २७ महाराजोपलक्षणं छत्रचामरादियुक्तं वेदतंत्राभ्यां वैदिकेनागमिकेन च मार्गेण यजंति पूज-
यंति परं ईश्वरं ज्ञातुमिच्छवः २८ नामान्याह नमस्त इति २९ ३० नानातंत्रविधानेनेति कलौ तंत्रमा-

द्वापरे भगवान्श्यामः पीतवासा निजायुधः श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः २७
तं तदा पुरुषं मर्त्या महाराजोपलक्षणं यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप २८ नम-
स्ते वासुदेवाय नमः संकर्षणाय च प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः २९ नाराय-
णाय ऋषये पुरुषाय महात्मने विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ३० इति द्वापर-
उर्वीश स्तुवंति जगदीश्वरं नानातंत्रविधानेन कलावपि यथा शृणु ३१ कृष्णवर्णं त्विषा-
कृष्णं सांगोपांगास्त्रपार्षदं यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः ३२ रामाय नमः ॥

र्गस्य प्राधान्यं दर्शयति ३१ कृष्णं तावद्वर्तयति त्विषा कांत्या कृष्णं इंद्रनीलमणिवदुज्ज्वलं यद्वा
त्विषाकृष्णं कृष्णावतारे अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति अंगानि हृदयादीनि उपांगा-
नि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनंदनादयः तत्सहितं यज्ञैः अर्चनैः संकीर्तनं
नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः ३२

ननुव्यवायादीनामपिश्रुतौभार्य्यामुपेयात् ऊनशेषंभक्षयेदित्यादिनाविहितत्वात्किमेवंनिषिध्यते
अतआह लोकइति व्यवायःस्त्रीसंगःनित्याःरागतएवनित्यप्राप्ताः जंतोःप्राणिमात्रस्यअतस्तत्र
तासुचोदनादिनाविधिर्नास्ति ननुऋतावुपेयादित्यादिविधिर्दर्शितः सत्यंदर्शितः नत्वयमपूर्व
विधिःरागतःप्राप्तत्वात् किंतुनियमविधिरूपेणरागिणामप्रवृत्तामार्गेक्रियतेतदाह व्यव

लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना व्य
वस्थितिस्तेषुविवाहयज्ञसुराग्रहैरासुनिवृत्तिरिष्टा ॥११॥ राम

स्थितिरिति तेषुव्यवायादिषुकैःविवाहयज्ञसुराग्रहैः विवाहविषयएवव्यवायःकार्यःयज्ञ
एवामिषसेवासौत्रामण्यांसुराग्रहान्गृह्णातीतिश्रुतेस्तत्रैवमद्यसेवेतिनियमःक्रियतेननुच
नियमएवेत्यपूर्वत्वान्नैनिंदाप्युक्ताअतआह आसुनिवृत्तिरिष्टेति अयंभावः नायनिय
मविधिरपिनित्यप्राप्तत्वात् अतोनिवृत्तिःपरिसंख्यैवअस्याव्यवायामिषमद्यसेवासुविधिरिष्टः

श्री॰
भा॰ टं॰
पू॰ टी॰
२२

कथंतर्हिव्यवस्थितिरितिचेत् तेषुव्यवायादिषुकेः उच्यतेनतावत्परिसंख्याविधिवकृत्यानिवृत्तिरूपं
तेनयस्मात्स्वार्थत्यागः परार्थकल्पना प्राप्तबाधिश्चेतिदोषत्रयंस्यात् अतःक्वचित्प्रसक्तोप्यर्थः
स्वप्राप्यमाणमनर्थकमित्यपूर्वविधिद्वाराऽत्यनिवृत्तिःफलतोभवति तद्यथाह इमामगृभ्णन्रशनाम्
तस्येत्यश्वाभिधानीमादत्तइत्यत्ररशनालिंगतोगर्दभाश्वाभिधानीरशनाद्वयेप्राप्यतामंत्रस्याश्व
विविधिद्वारापरिसंख्याच्यतेयथोक्तंतंत्रवार्तिके अप्राप्तविधिरेवायमतोमंत्रस्यनिश्चितः परि
संख्याफलेनोक्तानविशेषःपुनःश्रुतेरिति क्वचित्तुरागतोनित्यप्राप्तस्याप्राप्तांशपूरणलक्षण
स्यनियमफलस्याप्यभावान्नियमविधिद्वाराफलतःपरिसंख्याभवति यथापंचपंचनखाभ
क्ष्याइति तथारागतोनित्यवत्प्राप्तस्यव्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञापरि
संख्यैवेति ननुयद्यभ्यनुज्ञामात्रमेतद्भवेत् तर्हिस्वतन्त्रतानपोभार्यो
सन्निधानोपगच्छेत् योगायांभ्रूणहत्यापापच्यतेनात्रसं
शयः इत्यादिदोषश्रवणंनस्यात् नैषदोषःमनः
सिकामेसत्यपितस्यामृत्वादिष्ट्यादिनावा
तामनुपगच्छतोदोषश्रवणोपप
त्तेरितिसर्वमनवद्यम् ॥
रामायनमः

२२

तत्रये ज्ञानस्त्वेभ्योविद्यानामनुयायात्त्वाद्भूयुत हरेर्हरिकथाःश्रवणंयेषांते अतएवहरेश्चअच्युतकी
र्तनंयेषांते हरेरच्युतकीर्तनाश्चैनिवा ४ ज्ञानलवदुर्विदग्धाश्चिकित्सन्त्वाउपेत्याश्लयाशयेनाह वि
प्रश्रुति श्रौतेनउपनयनाख्येनउपलक्षणमेतत् अध्ययनादिनापिहरेःपदांतिकंतज्जनोलमाधिका
रंप्रामाअपिमुह्यंतिकर्मफलेषुसज्जंते कृतःआम्नायेषुयेवादाअर्थवादास्तेमाहकतयाविद्यंतेयेषां
ते तद्वक्तसीताहृ यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेदवादरताःपार्थनान्यदस्तीतिवादिन

हरेर्हरिकथाःकेचितहरेर्वाच्युतकीर्तनाः स्त्रियःशूद्रादयश्चैवतेनुकंप्याभवादृशां ४ वि
प्रोराजन्यवैश्यौचहरेःप्राप्ताःपदांतिकं श्रौतेनजन्मनाथापिमुह्यंत्याम्नायवादिनः ५
कर्मण्यकोविदास्तब्धामूर्खाःपंडितमानिनः वदंतिचाटुकान्मूढाययामाध्व्यागिरोत्सुकाः
६

इत्यादिना ५ भक्तिमार्गेदासायतेषांमोहंप्रपंचयन्निंदते कर्मणीत्यादि अकोविदाःयथावे
दकंनभवतितथाकर्तुमसमर्थाःनचाभिज्ञानंनष्टास्तीतियतःस्तब्धाःअनम्राःस्तब्धत्वेहेतुः यतोमूर्खा
अपिपंडितांचयमितिमानवंतः अतःअपामसोमममृताअभूम अक्षय्यंहवैचातुर्मास्ययाजि
नःसुकृतंभवति यत्रनोष्णंनशीतंस्यान्नग्लानिर्नाप्यरातयः इत्यादिकयायथामाध्व्यागिरो
त्सुकाःसंतोमूढास्तथाचाटुकान्अप्सरोभिःसहविचरिष्यामइत्यादिप्रियंबहुशानवदंति ६ ॥

श्री॰
भा॰ पु॰
टी॰
११

किंच तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो वर्द्धंत इत्याह रजसा रजसेति घोराः अभिचारादिसंक-
ल्पा येषां ते अहिवन्मन्यवो येषां ते ७ कामकत्वं प्रपंचयति उपासिताः स्त्रियो यैः न तु हरिस्तैः मैथुन्यमिथु-
नसुखमेव परं तत्त्वादिषु गृहेषु तेषु आशिषो वदंति इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथमिदमस्ती-
दमपि मे भविष्यति पुनर्धनमित्याकाराः दांभिकत्वं प्रपंचयति यजंतीति असृष्टान्नविधानदक्षिणं
न सृष्टं न संपादितमन्नविधानं दक्षिणा च यथा यजंति तदाह वृत्त्यै जीविकार्थं परं केवलं पशून्घ्नंति

रजस्तामसकल्पाः कामकामा हि मन्यवः दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ७
वदंति तेऽन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यसुखेषु चाशिषः यजंत्यसृष्टान्नविधानदक्षिणं
वृत्त्यै परं घ्नंति पशूनतद्विदः ८ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्म-
णा जातस्मयेनांधधियः सहेश्वरान्सतोऽवमन्यंति हरिप्रियान्खलाः ९ सर्वेषु शश्वत्तनुभृत्-
स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति

अतद्विदः हिंसादोषानभिज्ञाः ८ मानित्वं प्रपंचयति श्रियेति श्रिया धनादिसंपदा विभूत्या ऐश्वर्येणाभि-
यादिना जातो यः स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान्सतः अवमन्यंते ९ किंच एवं वर्तमाना
स्ते वदंतस्त्वात्मस्फुरणमपि न जानंतीत्याह सर्वेष्विति केन रूपेणावस्थितं तदाह आत्मानमीश्वरं आत्म-
तया ईश्वरतया चावस्थितं एवमप्यसंगतामाह यथा खमिवेत्यसंगतामाह अभीष्टस्फुरत्वमाह वेदोप-
गीतं चेति तत्कुतः अतो मनोरथानां वार्तया मिथो मद्यसेवा विषयाणां वार्ते या प्रवदंति १० अतएव

११

ऽत्लाष्टखीऽरोषधयष्ठगुमाः कौऽर्वरादावतारे ग्राहात गजेन्द्रममुंचत मोचयामास एवमादौ यज्ञावतार
नामनामिलत्वाविस्तुः शिवायज्ञगतो कल्पयावतीयोऽत्यनुवर्तनीयं १७ संस्तत्वतः स्तुतिऊर्वाणानुस्र
पीनवालौर्विल्यानकश्यपार्थमीमिदाहरणोमोपदेनिमग्रानिर्धुणोपहसिताऽऽहत्यापदेः स्मोचयत

गुणेमायपेमनुरिलोषधयस्त्रमात्समेक्रौडेहतोदितिनुऽहस्तोऽभमसःत्वां कौर्मेधृतोऽद्रिरम
तोन्मथने स्वपृष्ठेयादान्मपन्नीमिभराजममुंचदाते १८ संसत्वतोऽब्धिपतितोऽक्षमरणा
स्पृष्ठोत्थयाकं चहरवधतस्तमोमिप्रविष्टे देवस्त्रियोसुरगृहे पिहिताअनाथाजन्मे सुरेन्द्रमभ
यायमतोनृसिंहे १९ देवासुरेयुधिचदैत्यपतीन्मुरार्थेहत्वांतरेषु भुवनान्यदधात्कलाभिः
भूत्वाथवामनइमामहरद्बलेः क्ष्मां याञ्चाच्छलेन समदाददितेः सुतेभ्यः २० निःक्षत्रियाम
कृतगां चत्रिसप्तकृत्वोरामस्तु तैहयकुलाप्ययभार्गवाग्निः सोऽब्धिं बबन्ध दशवक्त्रमहन्स
लंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः २१ ॥

तस्मिन् ब्रह्मन्दन्त्वा पोप्रविश्येमोचयामास अमुरगृहे पिहिता निरुद्धायादेवस्त्रियस्तास्ताममुंचदनेकाव
तारैः १९ अंतरेषु सर्वमन्वंतरेषु कलाभिर्मूर्तिभिर्भुवनानि अदधात् अपालयत् इंद्रत्सोरममरात दद्दौ २०
हैहयानां कुलस्याप्ययापभार्गवरूपोऽग्निः सरामोदाशरथिः सनससलंकायां स्थितं सच जयति वर्तमानेका

श्री° भा° ए° टी° ३१

भाविनौ रामकृष्णावतारमाह भूमेरिति बुद्धावतारमाह वादैरिति अतदर्हान् यज्ञानर्हान् दैत्यान् वि॥ मोहयिष्यति कल्क्यवतारमाह शूद्रानिति न्यहनिष्यत् निहनिष्यति ॥ २२ ॥ २३ ॥ इति श्रीभावार्थदीपिकायामेकादशे चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे भक्तिहीनानां का निष्ठा कोऽपि वा युगे पूजाविधिरिति प्रश्नद्वयस्योत्तरमुच्यते त्वां सेवतां सुरकृता बहवोऽन्तराया इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्त्वा परां गतिं यान्ति अभक्तानां तु विघ्ना भवन्तोऽप्यके न हि तेषां का गतिर्भवतीति पृच्छति भगवन्तमिति हे आत्मवि॥

भूमेर्भारावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान् कलौ क्षितिभुजो न्यहनिष्यदन्ते ॥ २२ ॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः भूरीणि भूरियशसो वर्णितानि महाभुज ॥ २३ ॥ इति श्रीभागवते एकादशस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥ राजोवाच ॥ भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः तेषामशान्तकामानां का निष्ठाविजितात्मनां ॥ १ ॥ चमस उवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ २ ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं न भजन्त्यव॥

त्तमाः अविजितात्मनोऽत एव अशान्तकामानां का निष्ठा किं प्राप्यमित्यर्थः ॥ १ ॥ स्वजनकपुरुषद्रोहेण भगवतोऽनाश्रयणात् दुर्गतिं यान्तीति वक्तुं भगवतः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह मुखेति गुणैः सत्त्वादिभिः तेन विप्रः सत्त्वेन रजःसत्त्वाभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यः तमसा शूद्र इति ॥ २ ॥ एषां मध्ये ये तत्त्वान भजन्ति ये च तत्त्वाप्यवजानन्ति आत्मनः प्रभवो जन्म यस्मात्तं तदभजने कृतघ्नतामप्याह ईश्वरमिति स्थानाद्

(वाम पार्श्व:) वृत्तम् १

(दक्षिण पार्श्व:) श्रीमद्भागवते

५४

२१

अस्माकं चापराधाचरणं स्वभावत्वान्नचित्रमित्याहः त्वामिति त्वां सेवमानानां सुरैरिंद्रादिभिः कृतांत
रायाविघ्नं न भवंति कस्मादित्यत आहः स्वौकइति स्वस्थानं स्वर्गमतिक्रम्य परमं तव स्थानं व्रजतोऽ
नान्यस्य त्वामेवं सेवमानस्य कुतः वर्हिषि यज्ञे स्वभागान्पुरोडाशादीन्वलीन्करान्क्षोषिकुवराज्ञे
इंद्रादिभ्यो ददतः प्रयच्छतः तर्हि किं मद्भक्तो विघ्नैर्भेश्यति नेत्याहः धत्तइति निश्चये यतस्त्वत्सेवस्य राधी
श्वरो भवतारलकः श्रेतासौ विघ्नानां मूर्ध्नि पदमंघ्रिं धत्ते कुतः पुनस्त्वपि विघ्नशंकेति भावः ९ त्वद्भऽ

त्वां सेवतां सुरकृता वहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते ना
न्यस्य वर्हिषि वलीन्ददतः स्वभागान्धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ९
त्वद्दृष्टत्रिकालगुणमारुततेजकोशिस्थानं स्मानपारजलधीन्तितीर्य के
चित् क्रोधस्य याति विफलस्य वशं पदे गोर्मज्जंति दुश्चरं तप उत्सृजंति ९

क्षानांतके वलेन तपश्चरतोऽध्यपीगोतिः अस्माकं वा वशं यांति क्रोधस्य वा न त्वास्मद्वशाः कामोपभोगम
पितावदन्नभवंति क्रोधवशाः पुनर्भवंति मेदा इत्याहः त्वद्दृष्टेति त्वचत्दृष्टत्रिकालगुणाश्च शीतोऽ
ष्णवर्षा सिममारुतश्च प्राणाणवाद्यो वाजेन्द्र्याः जिह्वा भोगाश्च शेश्याः शुश्रे पभोगाश्च एतान् स्मानस्य पा
रजलधिरूपान्तितीर्य विलंघ्य गोष्पदे मज्जंति कुतः क्रोधस्य विफलस्य वशं यांति गच्छंति किंच ज
लमज्जतो यथा विवशाः संतो मस्तकारोपितभारमुत्सृजंति तथा तथैव नमोल्लायनच भोगाय शापा
दिना दुश्चरं तप उत्सृजंति ९

स्त्रियः योगेन निर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठु अलंकृताः तेषां स्वलावण्यादिदर्पोपशमाय दर्शयामास १२ रूपिणीः मूर्तिमतीः श्रीरिव ताः स्त्रीर्दृष्ट्वा तासां तद्रूपस्यौदार्येण महत्तेन हृता श्रीः कांतिर्येषां ते १३ वृंध्वं वृणीध्वं एकं वयं वराकाः कांचेमा उतिचेत्तत्राह सवर्णां समानरूपां नैकाप्यस्मदनुरूपेति चेत्तत्राभवत्तु तथापि स्वर्गस्य भूषणरूपा १४ सुरवंदिनः देवभृत्याः १५ इन्द्रायेंद्रप्रति नारायणबलं प्रभावः श्राकः त्रा

इति प्रगृणतां तेषां स्त्रियोत्यद्भुतदर्शनाः दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः १२
ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणी गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः १३ तानाह देवदेवेशः प्रणतान्प्रहसन्निव आसामेकतमां वृंध्वं सवर्णां स्वर्गभूषणां १४ ओमित्यादेशमादाय नत्वा तं सुरवंदिनः उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः १५ इंद्रायानम्य सदसि शृण्वतां त्रिदिवौकसां ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः १६ हंसस्वरूप्यवदद्‍च्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः विष्णुः शिवाय जगतां कलयावतीर्ण-
स्तेनाहृता मधुभिदा श्रुतयो हयास्ये १७ ॥

त्रासं त्रासं प्राप्तः विस्मितश्च तत्र विस्मितस्त्रासेति वा १६ अन्यानप्यवतारांस्तच्चरितानि चाह हंसस्वरूपीति दत्तः दत्तात्रेयः कुमाराः सनकादिनः पिता ऋषभश्च विष्णुरेव कलयावतीर्णः सन्नात्मयोगम् वदत् तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सनातनाः श्रुतयः आहृताः १७ रामाय नमः ॥

ईदृशंवेदतात्पर्यमाह परोक्षवादइति यत्रान्यथास्थितोऽर्थःसंगोपयितुमन्यथाकृत्वोच्यतेसपरो
क्षवादः तथाचश्रुतिः तंवाएतंचतुर्होतारंसंतंचतुर्होतेत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाइ
ति परोक्षवादत्वमेवाह कर्ममोक्षायेति ननुस्वर्गाद्यर्थंकर्माणिविधत्तेनकर्ममोक्षार्थंतत्राह बा
लानामनुशासनंयथाभवतितथा अत्रदृष्टांतः अगदमौषधं यथापिताबालमगदंपाययन्खं
डलड्डुकादिभिःप्रलोभयन्पाययतिददातिचतानिनैवनागदपानस्यतल्लाभःप्रयोजनंअपितु

परोक्षवादोवेदोऽयंबालानामनुशासनं कर्ममोक्षायकर्मा
णिविधत्तेह्यगदंयथा ४३ नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजि
तेन्द्रियः विकर्मणाह्यधर्मेणमृत्योर्मृत्युमुपैतिसः ४४ ॥

रोगघ्नंतथावेदोऽप्यवांतरफलैःप्रलोभयन्कर्ममोक्षायैवकर्माणिविधत्ते ४३ ननुकर्ममो
क्षश्चेत्पुरुषार्थस्तर्हिप्रथममेवकर्मत्यज्यतांतत्राह नाचरेदिति अजितेन्द्रियत्वात्स्वयंसःस्व
पर्यायेन्नाचरेत् तर्हिविकर्मणाकर्म्माऽनाचरणलक्षणेनाधर्मेणमृत्योरनंतरंमृत्युमेवप्रा
प्नोति यथाचश्रुतिः मृत्वापुनर्मृत्युमापद्यतेअद्यमानःस्वकर्मभिरिति ४४ शिवायैनमः

तस्माद्वेदोक्तमेवकुर्वाणोनतुनिषिद्धं नतुकर्माण्यक्रियमाणेतस्मिन्नासक्तिःनतत्फलंचस्यान्ननुनै
ष्कर्म्यरूपासिद्धिरित्यत आह निःसंगःअनभिनिवेशवान् ईश्वरेऽर्पितंनतुफलोद्देशेन नतुफलस्यश्रुतत्वा
त्कर्मणांकृतफलमर्वादेव नरोचनार्थेति कर्मणिरुच्युत्पादनार्थं अगदपानेखंडलड्डुकादिवत् त
तश्चकर्माभिरुच्यावेदार्थंसम्यग्विचारयति तदाचयोवाएतदक्षरमविदित्वागार्गस्माल्लोकात्प्रै
तिसकृपणइत्यनात्मज्ञस्यकृपणत्वात् तमेवंवेदानुवचनेनब्राह्मणाविविदिषंतिब्रह्मचर्येणतपसा

वेदोक्तमेवकुर्वाणोनिःसंगोऽर्पितमीश्वरे नैष्कर्म्यंलभतेसिद्धिंरोचनार्था
फलश्रुतिः ४५ यआशुहृदयग्रंथिंनिर्जिहीर्षुःपरात्मनः विधिनोपचरे
द्देवंतंत्रोक्तेनचकेशवं ४६ लब्ध्वानुग्रहआचार्यात्तेनसंदर्शितागमः
महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ४७

श्रद्धयायज्ञेनानाशकेनचेतियज्ञादीनांज्ञानशेषतांचावधार्यनिःकामेषुकर्मसुप्रवर्तते ततश्चस्वर्ग
कामोयजेतेत्यादिभिःकामितस्यैवस्वर्गादेःफलत्वेनावगमादकामितोऽसौनभवतीतिनैष्कर्म्यसिद्धि
र्भवतीतिभावः ४५ वैदिकंकर्मयोगमुक्त्वातांत्रिकमाह यआशुइति परमात्मनःपरस्यैवसतआत्म
नोजीवस्यहृदयग्रंथिंअहंकारबंधंनिर्जिहीर्षुःसतंत्रोक्तेनचविधिनाप्रकारेणभजेत् तंत्रमागमंच
कारादिकेनसहसमुच्चयमाह ४६ तमेवविधिमाह लब्ध्वानुग्रहइत्यादिना तेनाचार्येणसंदर्शितआ

मूर्तेः संमुखमासीनः प्रादिशब्देन भूतशुद्ध्यादिपिंडं देहं विशोध्य संन्यासैः सकलीन्यासैः कृतारक्षायेनसः ४८
अर्चादौ वक्ष्यमाणि पुष्पादीनि जंत्वादिशोधनेनादीनि संमार्जनादिना आत्मानं भगवद्रूपतया लिंगमूर्ति
अर्चालेपक्षालनादिना निष्पाद्य योग्यानि कृत्वा ४९ पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृदीरं संपू
जितश्रीमूर्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः मूलमंत्रेण च देवकृतन्यासो मू

शुचिः संमुखमासीनः प्राणसंयमनादिभिः पिंडं विशोध्य संन्यासकृतरक्षोर्चयेद्धरिं ४८
अर्चादौ हृदये चापि यथालब्धोपचारकैः द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ४९
पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत् ५०
सांगोपांगां सपार्षदां तां तां मूर्तिं स्वमंत्रतः पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ५१
गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ५२
आत्मानं तन्मयं ध्यायन्मूर्तिं संपूजयेद्धरेः शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतं ५३

लमंत्रेणार्चयेत् ५० अंगानि हृदयादीनि उपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां कै
रुपचारैरर्चयेत् तत्र द्रव्य पाद्येति आदिशब्देन मधुपर्कमाचमनं च ५१ अक्षतास्तिलकालंकारेण त
ण्डुला वा नालंकारर्चयेद्धि सनकेतकाभिर्दर्शमिति निषेधात् उपहारा नैवेद्यं ५२ शेषां निर्माल्य
स्वधाम्नि स्वस्थाने देवं हृदि मूर्तिकरंडके उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ५३

श्री॰
भा॰ए॰
टी॰
९८

तांश्चिकेकमेयोगमुपसंहरति ॥५४॥ एकादशेतृतीयः॥३॥ चतुर्थेत्ववतारेहाप्रश्नस्योत्तरमुक्तवान् जन्ये
तीर्नेंद्रेनानाम्नाद्रुमिलोनवमोमुनिः मूर्त्याभिमतयात्मनइत्यनेनात्मनःप्रियमवतारसृजन्येदिदंशकेऽव
तारास्तानमपेक्षिते तयास्तवैःस्तत्वानमेदहरिमित्युक्तेगुणाकर्मत्तानेचापेक्षितेअतःश्चाति यानियानी
ति कर्ताकरिष्यति १ त्वयाःसृष्टानिकालत्रयसंबंधिसकलावतारगुणकर्माणिकथयितुमशक्याः
विसंक्षेपतस्तुकानिचित्कथयिष्यामीत्याह॥योवाइत्यादिना अनुक्रमिष्यन्गणयितुमिच्छतियःस

एवमग्न्यर्कतोयादावतिथौहृदयेचयः॥यजतीश्वरमात्मानमचिरान्मुच्यतेहिसः॥५५॥इति १
श्रीभागवतेमहापुराणेएकादशस्कंधेतृतीयोध्यायः॥३॥राजोवाच॥यानियानीहकर्माणियैर्यैःस्वच्छंदजन्मभिः
चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः॥१॥द्रुमिलउवाच॥योवाअनंतस्यगुणाननंताननुक्र
मिष्यन्सतुबालबुद्धिः रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाखिलशक्तिधाम्नः १ भू
तैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन् स्वांशेनविष्टःपुरुषाभिधानमवाप
नारायणआदिदेवः

तुबालानामिवबुद्धिर्यस्यसमंदबुद्धिःकालेनमहताकोपिमहामतिःरजांसिगणयेदपिअखिलशक्ति
धाम्नःसर्वेशस्त्वस्यभगवतोगुणास्तुनैवगण्यंतेयथाचश्रुतिः विष्णोर्नुकंवीर्याणिप्रवोचं १
यःपार्थिवानिविममेरजांसिइत्यादि २ तत्रादौपुरुषावतारमाह भूतैरिति यदास्वसृष्टैर्भूतैर्विराजंब
ह्मांडंपुरंनिर्मायतस्मिन्लीलयाप्रविष्टःनतुभोक्तृत्वेन प्रभूतत्रणापस्यजीवस्यतत्रभोक्तृत्वात् ३

तदेवं देहो गुरुरित्यादिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यातिदुर्लभत्वं दर्शयन्नीश्वरनिष्ठां
विधत्ते सृष्ट्वेति द्वाभ्यां पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणोऽवलोकाय अपरोक्षाय योग्या धिषणा बुद्धिर्य
स्मिन् तासामेषा पुरुषोऽप्रियेति श्रुतिश्च पुरुषत्वे चाविस्तरामित्यादि ऐतरेयके हि करणाधिष्ठात्रीरग्न्यादिदेव
ता वागादीभिः सह सृष्ट्वा ता अन्नतः प्रति भोगार्थं शरीरं मयाचत स चताभ्यो गोशरीरं अश्वशरीरं पुरुषश
रीरं यथाक्रममानीतवान् ततस्ता देवताः सोऽब्रवीत् यथायतनं चक्षुरादिस्थानेऽस्मिन्देहे प्रविशतेति
तदाहता अभ्युत्तीर्णादि तथा ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रु

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्। तैस्तैरतुष्ट
हृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः॥२८॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः। तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः
खलु सर्वतः स्यात्॥२९॥ एवं संजातवैराग्यो विज्ञानालोक आत्मनि। विचरामि महीमेतां मुक्त
संगोऽनहंकृतः॥३०॥

वन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन् [illegible] सुकृतं बतेति च
२८ तस्मात् बहूनां संभवानां जन्मनामन्ते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं दैवाल्लब्ध्वा अद्य अनु
मृत्यु अनु निरन्तरं मृत्युर्यावन्न पतेत् यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत विषयः पुनः सर्व
तः पश्वादियोनिष्वपि स्यादेव॥२९॥ तदेवं देहोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं त्वं कल्पः कविर्द
क्ष इत्यादि तत्रोत्तरमाह एवमिति एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः

सततान्नेदकेनोपपंचयति जायेतिद्वाभ्यां यस्यदेहस्यप्रियचिकीर्षयाभोगसंपादनेच्छयाजायादिव
र्गान्वितन्वन्पुष्णातिपुरुषःकथंभूतःसकृच्छ्रंयथाभवतितथाऽवरुद्धानिसंचितानियेनसःदेहवि
शेषणंवासदेहःस्वांतेस्वस्यापुष्यान्तेअवसीदतिनश्यति किंच देहनाशेपिनदुःखसमाप्तिरित्याह अ
स्यपुरुषस्यदेहांतरबीजंकर्मसृष्ट्वेति वृक्षस्येवधर्मोयस्यसः २६ किंच जिह्वेति अमुंदेहवंतमभिमा

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णातियत्प्रियचिकीर्षयावितन्वन् स्वांतेसकृच्छ्रम
वरुद्धधनःसदेहःसृष्ट्वास्यबीजमवसीदतिवृक्षधर्मा २६ जिह्वैकतोमुमपकर्षतिकर्हितर्षा
शिश्नोन्यतस्त्वगुदरंश्रवणंकुतश्चित् घ्राणोन्यतश्चपलदृक्क्वचकर्मशक्तिर्बह्व्यः
सपत्न्यइवगेहपतिंलुनंति २७ रामायनमः

निनंपुरुषंवाएकतःरसंप्रतिजिह्वाअपकर्षतिस्पाछिननिकर्हिकदाचित् तर्षापिपासाजलंप्रति
शिश्नोव्यवायंप्रति त्वक्स्पर्शंप्रति उदरंअन्नमात्रंप्रतिश्रवणंशब्दंप्रति घ्राणोगंधंप्रतिचपलदृक्
रूपंप्रति क्वचकाचित्स्वस्वविषयंप्रतिकर्मशक्तिःअन्यदपिकर्मेंद्रिये लुनंतित्रोटयंति २७ राम

श्रीयसाहश्यमेवाह वैशारदीति विशारदोतिनिपुणः तेनवशिष्येणाप्रमाने नगुरुणोपदिष्टावा अतिविशु
द्वाबुद्धिः गुणाकार्यरूपांमायांनिवर्तयति यदात्मकमेतद्दिस्वंजीवस्यसंसृतिनिमित्तंतान्गुणानपिदहत्यात्म
समितनिरिंधनः तस्मात्कार्येणकारणेन विधयाचबाधनाभावात्साक्षात्परमानंदरूपाभवतीति ११
एवंतावत्स्वप्रकाशज्ञानस्वरूपोनित्यएकएवात्माकर्तृत्वादयस्तुधर्मास्तस्यदेहोपाधिकाः तथातिरिक्तंच
सर्वमनित्यंमायामयंचअतः सर्वतोविरक्तः सन्नात्मज्ञानेनमुच्यतइत्युक्तं विलक्षणः स्थूलसूक्ष्माद्देहादि
नातिदेवंश्रुतिसमन्वयेननिर्णीतेप्यर्थेमतांतरविरोधेनसंदेहोमाभूदितितन्मतंनिराकर्तुमनुवदति

वैशारदीसातिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूतां गुणांश्चसंदह्ययदात्ममेतत्स्वयंचशाम्
यत्यसमिद्यथाग्निः १२ अथैषांकर्मकर्तृणांभोक्तृणांसुखदुःखयोः नानात्वमथनित्यत्वंलो
(ककालागमात्मनां १४

अथेति अथमन्यसे एषांजीवात्मनांकर्मकर्तृणांसुखदुःखयोःभोक्तृ
णांचनानात्वमिति एवंहिजैमिनीयामन्यन्तेअहंप्रत्ययविज्ञेयएवात्मासचप्रतिशरीरंभिन्नः कर्तृभो
क्तृस्वरूपश्च नतुतत्स्वरूपभूतोनिर्विकारएकः परमात्मास्तीति यथाहुः अहंप्रत्ययविज्ञेयोज्ञातव्यः सर्व
देवहीति तथावैराग्यंचनसंभवतितथाहि भोगस्यानानामनित्यत्वाद्धिवैराग्यंभवेत् भोगकालस्यवा
तदुपायकर्मबोधकागमस्यवाभोक्तुरात्मनोवानित्यत्वनदस्तीत्यर्थः अथनित्यत्वंलोककालागमात्मनां

श्री· भा· ए· टी· ५५

नचसर्वभोग्यानांविच्छेदान्मायामयत्वाच्चवैराग्यमस्यास्तीत्याह सर्वभावानांस्वर्गादीनांसंस्थास्थितिः
औत्पत्तिकीप्रवाहरूपेणनित्यातथाचवदंति नकदाचिदनीदृशंजगदिति अतस्तत्कर्ताकश्चिदीश्वरो
ऽपिनास्तीतिभावः किंच यथायथावृत्तेनतेनमायामयीत्यर्थः नचात्मस्वरूपभूतंनित्यमेकंज्ञानमस्ती
त्याह तत्तदिति घटपटाकारभेदेनधीर्जायते अतोऽनित्याभिद्यतेच अयंभावोऽभिप्रायः नहिनित्यज्ञा
नरूपआत्माअपितुज्ञानपरिणामवान् नचविकारित्वेनानित्यत्वप्रसंगः यथाहुः विक्रियाज्ञानरू
पास्यननित्यत्वविरोधिनीति अतोमुक्तोविच्छेदादिरहितस्यपरिणामासंभवाज्जडत्वेनतत्त्यागेपुरु

मन्यसेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५ एवम
प्यंग सर्वेषांदेहिनांदेहयोगतः कालावयवतःसंतिभावाजन्मादयोऽसकृत् १६ अत्रापिक
र्मणांकर्तुरस्वातंत्र्यंचलक्ष्यते भोक्तुश्चदुःखसुखयोःकोन्वर्थोविवशंभजेत् १७ नदेहिनां
सुखंकिंचिद्विद्यतेविदुषामपि तथाचदुःखंमूढानांवृथाहंकरणंपरं १८ ॥ = ॥

षार्थत्वमत्यन्तमहानिरेवश्रेयसीननिवृत्तिरिति १५ तत्रतावदनुक्रमंअंगीकृत्यवैराग्योपपादनायप्रवृत्तिमार्ग
स्यानर्थहेतुत्वंप्रपंचयति एवमपीत्यादिनालोकानांलोकपालानामित्यतःप्राक्तनेनग्रंथेन अंगहे
उद्धव कालावयवतःसंवत्सरादिरूपात् १६ अत्रापीति स्वातंत्र्यपक्षेदुष्कर्मणोदुःखभोगस्यचासंभवा
दित्यर्थः १७ ननुयेसम्यक्कर्मकर्तुंजानंतितेसुखिनएवयेतुनजानंतितएवदुःखिनइतिचेत्तत्राह नै
ति विदुषामपिसुखंकिंचिन्नविद्यते अतोवयंकर्मकुशलत्वात्सुखिनइतितेषांकेवलंवृथैवाहंकारः

५५ ये: १८

मंगीकृत्याप्याह यदीति तेयोगंउपायंनविदुर्येथासाद्यान्मृत्युर्नप्रभवेत् १९ तथापियावज्जीवंसुखंभवि
ष्यतीतिचेन्नेत्याह कोन्विति यतःअंतिकेवर्तमानोमृत्युर्नतुष्टिदइति आघातंवधस्थानंप्रति २० एवम
स्मिन्लोकेसुखंनास्तीत्युक्तंलोकांतरेपितथैवेत्याह श्रुतमिति श्रुतंस्वर्गादितदपिदुष्टं स्पर्द्धापरसुखा
सहनं असूयापरगुणेदोषाविष्करणंअत्ययोनाशःव्ययोपचयःइष्टस्यद्रव्ययोनाशः अन्ययोऽन्यस्य

यदिप्राप्तिंविघातंचजानंतिसुखदुःखयोः तेप्यद्धानविदुर्योगंमृत्युर्नप्रभवेद्यथा १९ कोन्वर्थः
सुखयत्येनंकामोवामृत्युरंतिके आघातंनीयमानस्यवध्यस्येवनतुष्टिदः २० श्रुतंचदृष्टवत्
दुष्टंस्पर्द्धासूयात्ययव्ययैः बह्वंतरायकामत्वात्कृषिवच्चापिनिष्फलं २१ अंतरायैरविहितो
यदिधर्मःस्वनुष्ठितः तेनापिनिर्जितंस्थानंयथागच्छतितच्छृणु २२ इष्ट्वेहदेवतायज्ञैःस्व
र्लोकंयातियाज्ञिकः भुंजीतदेववत्तत्रभोगान्दिव्यान्निजार्जितान् २३ स्वपुण्योपचितेशुभ्रेवि
मानउपगीयते गंधर्वैर्विहरन्मध्येदेवीनांहृद्यवेषधृक् २४ स्त्रीभिःकामगयानेनकिंकिणी
जालमालिना क्रीडन्नवेदात्मपातंसुराक्रीडेषुनिर्वृतः २५

निप्रायःतेदृष्टानदशाम्याद्दुःखमित्यर्थः
किंच वहवोंतरायाविघ्नापादिरूपाविद्यमायस्मिन्कामेसुखेतस्यभावस्तत्वंतस्मात्कृषिर्यथाबहुविघ्नात
दृत बहुसुखत्वेनउक्तमपिनिष्फलं २१ विघ्नैर्विघ्नाद्यभावमंगीकृत्यापिनाशअवदुःपरिहरमि
त्याह अंतरायैरितिपंचभिः निर्जितंसाधितं २२ यत्तेदेवताइंद्रादिरूपाःइष्टा २३ स्वपुण्यैरुपचितेसर्वभो
गसंपन्नेदेवीनांमध्येविहरन्गंधर्वैरुपगीयते २४ कामेनइच्छयागच्छत्यत्रविमानेनकिंकिणीजालमालि

कालेन चालितः पातितः २६ प्रवृत्तिर्द्विविधा विध्यनुसारेण काम्यकर्म्मणा वा तल्लंघनेनाधर्म्मेण वा तत्र
काम्यकर्म्मप्रवृत्तेर्गतिरुक्ता अधर्मप्रवृत्तेर्गतिमाह यदीति यदि वेत्यन्वयः अजितेंद्रियत्वात्कामात्मा
अतः कृपणः अतो लब्धो भोगतृष्णाकुलः अतः स्त्रैणः स्त्रीलंपटः तदर्थं भूतविहिंसकः २७ किंच दुष्टजन
प्रलोभितो धनाद्यर्थं पशूनविधिनाहत्वा तमः स्थावरतां याति २८ एवं कर्मप्रवृत्तस्य न सुखं न च नि

तावत्प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते क्षीणपुण्यः पतत्यर्वागनिच्छन् कालचालितः २६
यद्यधर्मरतः संगादसतां वाजितेंद्रियः कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः २७
पशूनविधिनालभ्य प्रेतभूतगणान्यजन् नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः २८
कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः २९ लो
कानां लोकपालानां मद्भयं कल्पजीविनां ब्रह्मणोपि भयं मत्तो द्विपरार्द्धपरायुषः ३० ॥

वृत्तिरित्युपसंहरति कर्म्माणीति २९ तथापि लोकानां नित्यत्वादमर्त्यधर्म्मत्वाच्च लोकपालानां सु
खमस्तीति चेत्तत्राह लोकानामिति द्विपरार्द्धः परमायुर्यस्य तस्य ब्रह्मणोपि तथा च श्रुतिः भीषा
स्माद्वातः पवते भीषोदेति सूर्य्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति अतः प्रवृत्तिमार्गस्यैवम
नर्थहेतुत्वाद्दुरत्ययात्ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः एतेनैव स्वयमीश्वरत्वाभिप्रायेणास्य राभावो गीका

नकेवलंश्रीनित्यतामात्रंकिंतुमायामयत्वमपीत्याह कालइति स्वभावोदेवत्वादिपरिणामहेतुः धर्मस्त
द्वेगाकारणंगुणव्यतिकरेमायायांतोभसौतिमामेवप्राहुः नतुमद्व्यतिरिक्ताःसंति ततोनिवृत्तिरेवमुक्तिरेव
त्याद्धेयमीतिभिदं ३४ एवंतावदेकएवात्मातस्यचगुणकार्यदेहसंबंधकृतःसंसारः आत्मज्ञानाच्च
क्तिरित्युक्तं विलक्षणःस्थूलसूक्ष्मादित्यादिना तदेवचमतांतरनिरासेनदृढीकृतमश्रेषामित्यादिना
तत्रपृच्छति गुणेष्विति द्वयमर्थः गुणेषुअसत्त्वमुक्तिःसत्त्वेवपा आद्येज्ञानसाधनाभावान्नमुक्तिः(

कालआत्मागमोलोकःस्वभावोधर्मएवच इतिमांबहुधाप्राहुर्गुणव्यतिकरेसति ३४
उद्धवउवाच॥ गुणेषुवर्तमानोपिदेहजेष्वनपावृतः गुणैर्नबध्यतेदेहीबध्यतेवाकथंविभो
३५ कथंवर्तेतविहरेत्कैर्वाज्ञायेतलक्षणैः किंभुंजीतोतविसृजेच्छयीतासीतयातिवा ३६
एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर नित्यमुक्तोनित्यबद्धएकएवेतिमेभ्रमः॥३७॥इतिश्रीभा
कादशस्कंधेदशमोध्यायः॥१०॥

द्वितीयेचगुणेषुवर्तमानोपितत्कार्यदेहेषुकर्मसुसुखादिषु
चकथंनबध्यते तथापिनैराकाशवदनावृतत्वान्नबध्यतइतिचेन्नदेवंविधानसंभवतीत्याह अनपावृ
तःकथंबध्यतइति ३५ यदितुसत्त्वेवतद्देहकारणबध्यतेतन्निवृत्याचमुच्यतइतिमतंतर्हितत्कथ
ज्ञातव्यमितिपृच्छति बद्धोमुक्तोवाकथंवर्ततेत्यादि किंभुंजीतकथंभुंजीतेत्यर्थः ३६ एतत्एतद्विष
येप्रश्नं किंच एकएवात्मानादिगुणसंबंधान्नित्यबद्धः मुक्तोजन्यत्वेनित्यत्वप्रसंगान्नित्यमुक्तश्चेत्यपि
गौकार्यंस्यात् नचममभ्रमोभवतीत्याह नित्यबद्धइति॥३७॥इतिभावार्थदीपिकायांदशमोध्यायः॥१०॥

अन्यदपिप्रौढ्या पूर्वमंगीकृतं निराकरोति चतुर्भिः तत्र यदुक्तं कर्तृभोक्तृरूप एवात्मेति तन्निराकरोति
गुणा इति गुणा इंद्रियाणि कर्माणि सृजंति नत्वात्मा आत्मैवेंद्रियाणि प्रवर्तयन् कर्माणि करोतीति चे
त्तत्राह गुण इति गुणाः सत्वादिगुणानिंद्रियाणि अनुसृजंते प्रवर्तयंति नत्वात्मा अतः कर्तृत्वं ताव
न्नास्ति भोक्तृत्वमप्यौपाधिकमित्याह जीवस्त्विति गुणसंयुक्त इंद्रियादिसंयुक्तः कृतेऽप्यत आह

गुणाः सृजंति कर्म्माणि गुणोऽनुसृजते गुणान् जीवस्तु गुणसंयुक्तो भुंक्ते कर्म्मफलान्यसौ
३१ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः नानात्वमात्मनो यावत्पारतंत्र्यं तदैव हि ३२
यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयं य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः ३३ ॥

अमीतेषु अहंकारवानित्यर्थः ३१ यच्चोक्तमात्मनो नानात्वं तदप्यौपाधिकमित्याह यावत्स्यादिति
गुणानां वैषम्यम् अहंकारादिकार्यरूपं ३२ नन्वात्मन एकत्वे कथं पारतंत्र्यमुक्तं कथं वा लोकपाला
दीनामपि भयमित्युक्तं तत्राह नानात्वमिति ३३ यच्च पूर्वमभिप्रेतं प्रश्ने निरवद्यं श्रेयसीति तत्राह य ए
तदिति एतद्गुणवैषम्यं तत्कृतं भोगं कर्मैवेत्यर्थः उपासीरन् ते लोकादीनामनित्यत्वाच्छुचार्पिताः शो

अतोवस्तुविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकीत्यदततइत्याह विद्याविद्येइति नन्वेतेमोक्षबंधावाभ्या
मितितन्तुशक्तौ कुतःमेमाययाविनिर्मितेमायाहिनिरूपत्वात बंधमोक्षकरीत्येकवचनेद्विवचनार्थे न
नुतत्कार्ययोर्बंधमोक्षयोरनादित्वनित्यत्वेनस्यातां नत्याद्येत्वनादी अतोयावदविद्याप्रवर्तेयामितावद्बंधः
यदाविद्योदयामितदामोक्षःस्फुरतीत्यर्थः तथाचस्कंदपुराणे बंधकोभवपाशेनभवपाशाच्चमोचकः
कैवल्यदःपरंब्रह्मविष्णुरेवसनातनइति २ तत्रशरीरिणामितिबहुवचननिर्देशाद्विषयभेदेनाविरो
धउक्तइतिभातित्यावर्तयनबंधमोक्षव्यवस्थामुपपादयति एकस्यैवेति नर्हिकिमात्माभेदास्तवापि

विद्याविद्येममतनूविशुद्धवशरीरिणां मोक्षबंधकरीआद्येमाययामेविनिर्मिते ३ एकस्ये
वममांशस्यजीवस्यैवमहामते बंधोस्याविद्ययानादिविद्ययाचतथेतरः ४ रामायनमः ॥

बंधःलक्षीत्याह अस्यैवेति नत्वात्माभेदेजीवेनामकोन्योस्तिष्टथक् कथंचबंधमोक्षसुखदुःखादि
व्यवस्थातत्राह ममांशस्य अयंभावः यथैकस्यापिचंद्रादेर्जलाद्युपाधिनाविंबप्रतिबिंबरूपाभेदः
यथाचतज्जलकृताःकंपादयःप्रतिबिंबस्यैव यथावत्तत्रप्रतिबिंबानामप्युपाधिभेदेनभेदादेकस्मि
न्नुदकेभेदकृतप्रतिबिंबस्यैवाविवेकंनान्यगतस्यतथाविद्यायांप्रतिबिंबितस्यमदंशस्यजीवस्यैव
तत्कृतोबंधःतस्यचोपाधितोभेदान्नाव्यवस्थेति तथाचाहुः यथैकस्मिन्घटाकाशेरजोधूमादिभिर्युते
नसर्वेसंप्रयुज्यतेतथाजीवाःसुखादिभिरिति एतच्चातिरहस्यंसर्वश्रुतिनिश्चितत्वमितिसंबोधयति हेम

एकादशेतुबद्धानांमुक्तानांचाथलक्षणं साधूनांचतथाभक्तेर्लक्षणोहरिणोदितं नित्यबद्धोनित्यमुक्त १
एकएवेतिमेभ्रमः इतियदुक्तं तत्किंवस्तुतोविरोधःप्रतीतितोवा नाद्यः बंधमोक्षयोर्वास्तवत्वाभावा १
दित्याह बद्धोमुक्तइतिद्वाभ्यां आत्माबद्धोमुक्तश्चमेगुणतः मदधीनसत्वादिगुणोपाधितः नतुवस्तुतः
नन्वौपाधिकत्वेपि तंडुलपाकादिवद्वास्तवत्वंकिंनस्यात्तत्राह गुणस्यमायामूलत्वात्तद्बंधनेनास्ति
अतएवमोक्षश्चनास्तीति ननुकथंसर्वशास्त्रविरुद्धमुच्यतेतत्राह इतिमेव्याख्येति एवंमेकृतोनिर्णयः

श्रीभगवानुवाच ॥ बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः गुणस्यमाया
मूलत्वान्नमेमोक्षोनबंधनं १ शोकमोहौसुखंदुःखंदेहापत्तिश्चमायया
स्वप्नोयथात्मनःख्यातिःसंसृतिर्नतुवास्तवी २ ॥

अलमतिकुतर्कैरित्यर्थः अलमतिकुतर्कैरित्यर्थः अथचैवमन्वयः आत्माबद्धोमुक्तइतियाव्याख्याउ
क्तिः सामेगुणतः मद्गुणपारतंत्र्यात् अत्रेदंतत्वेनगुणनियंतरिस्तोस्मिंस्तद्व्यतिरेकमाह अतएवनमेबं
धतेनमोक्षश्चेति अन्यत्समानं १ एवंकारणभूतगुणानांमायामयत्वात्तत्कार्यसंसृतिर्मायेतिप्रपंच
यति शोकमोहाविति यथास्वप्नः आत्मनः बुद्धेरेवख्यातिर्विवर्तः तद्वत् २ ॥ ≈ ७ राम

इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह देहस्थोऽपीति दशभिः विद्वान्मुक्तः संस्कारवशेन देह
स्थोपि देहस्थो न भवति यथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितोपि तत्रस्थो न भवति तद्वत्तत्सुख
दुःखाद्यभावात्तद्वत् तथा वस्तुतः अदेहस्थोपि कुमतिः अविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक्
यथा स्वप्नदृक् स्वप्नदेहगत इति ८ अत्र हेतुत्वेन वैलक्षण्यं तयोराह द्वाभ्यां इंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि य
स्तु विद्वान्सः नाहं कुर्यात् अहं शृणोमीति मतिं न कुर्यादित्यर्थः कुतः गुणैर्गुणेषु गृह्यमाणेष्वत एव

देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ८
इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ९ दैवा
धीने शरीरेस्मिन्गुणभाव्येन कर्मणा वर्तमानोबुधस्तत्र कर्तास्मीति निबध्यते १० ॥

यद्यविक्रियः रागादिशून्यः तथा चोक्तं गीतासु तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणे
षु वर्तन्त इति मत्वा न सज्जत इति ९ अबुधस्त्वेवं कर्माधीनेस्मिन् शरीरे वर्तमानः गुणैरिंद्रियैर्भाव्येन
कर्मणा तत्र देहादौ निबध्यते कुतः कर्तास्मीत्यहंकारेण तदुक्तं तत्रैव प्रकृतेः क्रियमाणानि गुणै
गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यत इति एतैस्त्रिभिः श्लोकैः कथं वर्ततेत्य
स्य प्रश्नस्य सुखदुःखशून्यो निरभिमानश्च देहे वर्तते इत्युत्तरमुक्तं भवति १० ॥

नेदंवं व्यवस्थानुपपाद्यकथंवर्ततेनत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह अथेति तच्चवैलक्षण्यंद्विविधंजीवे
श्वरयोरेकंजीवानांचैकंतत्रजीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरितिसार्द्धद्वयेन शोकानंदधर्मे
वतोः एकस्मिन्धर्मिणिशरीरेनियम्यनियंतृत्वेनस्थितयोः ५ सुपर्णाविहत्वात्पक्षिणाविवदेहान्तः
स्थभूतौसदृशौचिद्रूपत्वात् सखायौअवियोगादेकमत्याचयदृच्छयाअनिरुक्तयामाययादृश्यतइति
वृक्षोदेहः ऊर्ध्वमूलमवाक्शाखंवृक्षंयोवेदसप्रतीतिश्रुतेः ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययमि
तिस्मृतेश्च तस्मिन्कृतनीडौनिकेतनेहृदयरूपयामध्येतौ तयोर्मध्येएकोजीवःपिप्पलान्नंपिप्पलाः

अथवैधर्म्यमुक्तंवैलक्षण्यंवदामिते विरुद्धधर्मिणोस्तत्रस्थितयोरेकधर्मिणि ५ सुप
र्णौवैतौसदृशौसखायौयदृच्छयैतौकृतनीडौचवृक्षे एकस्तयोःखादतिपिप्पलान्नमन्यो
निरन्नोपिबलेनभूयान् ६ आत्मानमन्यंचसवेदविद्वानपिप्पलादोनतुपिप्पलादः यो
विद्ययायुक्तमसौनित्यबद्धोविद्यामयोयःसततोनित्यमुक्तः ७

ऽस्त्यः देहस्तस्मिन्अदनीयंकर्मफलमित्यर्थः खादतिभक्षयति अन्यःईश्वरःनिरन्नःअभोक्तापिनि
त्यानंदत्वमोबलेनज्ञानादिशक्त्याभूयानधिकः श्रुतिश्च द्वासुपर्णासयुजासखायासमानंवृक्षंपरिष
स्वजाते तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीति ६ बलाधिक्यमेवाह आत्मानमिति
अतोयोविद्ययायुक्तःसततनित्यबद्धः अनादिबद्धःयस्तुविद्याप्रधानःसततंनित्यमुक्तःमायायाअना
वरकत्वादाश्रयाव्यामोहकत्वाच्च ७ ॥

साधुलक्षणमुक्त्वाभक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः लिंगानिप्रतिमादीनि ३४ सर्वलाभोपहरणंसर्व। स्यलब्धस्यसमर्पणं ३५ मज्जन्मेति जन्माष्टम्यादीनि तदनुमोदने ३६ बलिविधानेपुष्पोपहारादिसम। र्पणं सर्ववार्षिकपर्वसुचातुर्मास्यैकादश्यादिषुविशेषतः उद्यानादिकरणेसामर्थ्येसतिस्वतः।

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं परिचर्यास्तुतिःप्रह्वगुणकर्मानुकीर्तनं ३४ मत्कथाश्रवणेश्रद्धामदनुध्यानमुद्धव सर्वलाभोपहरणंदास्येनात्मनिवेदनं ३५ मज्जन्मकर्मकथनंममपर्वानुमोदनं गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६ यात्रा। बलिविधानंचसर्ववार्षिकपर्वसु वैदिकीतांत्रिकीदीक्षामदीयव्रतधारणं ३७ ममार्चा स्थापनेश्रद्धास्वतःसंहत्यचोद्यमः उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ३८ संमार्जनोपलेपाभ्यांसेकमंडलवर्तनैः गृहशुश्रूषणंमह्यंदासवद्यदमायया ३९ श्रीरामायनमः

असतिचान्यैःसंभूयोद्यमः उद्यानंपुष्पप्रधानम् उपवनंफलप्रधानंवनम् आक्रीडंक्रीडास्थानम् संमार्जनंरजसोपकारणं उपलेपःगोमयोदकादिभिरालेपनंसेकःतैरेवप्रोक्षणम् मंडलवर्तनंस र्वतोभद्रादिकरणमस्ममम ३९ ॥

कामैरक्षुभितचित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनी
हः दृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मु
निः मननशीलः अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान् विपद्यप्यकृपणः जितषड्गुणः क्षु
त्पिपासे शोकमोहौ जरामृत्यू षड्ऊर्मयः एते जिता येन सः अमानी न मानाकांक्षी अन्येभ्यो मानदः कल्यः प
रावबोधने दक्षः मैत्रः न वंचकः कारुणिकः करुणयैव प्रवर्तमानः न दृष्टलोभेन कविः सम्यक्ज्ञानी किं

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः ३० अप्र
मत्तो गभीरात्मा धृतिमान्जितषड्गुणः अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ३१
आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान् धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च सत्तमः ३२
ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः भजंत्यनन्यभावेन ते मे भक्ततमा मताः ३३

च मयावेदरूपेणादिष्टानपि स्वधर्मान्संत्यज्य यो मां भजेत सोपि एवंभूतः पूर्वोक्तवत्सत्तमः किमज्ञानान्ना
स्तिक्याद्वा न धर्माचरणे सत्वशुद्ध्यादीन्गुणान्विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया
मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान्संत्यज्य यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य च
एवा विहितकादश्याहंस्यैकादश्युपवासानुपवासान्निषेध्य आह्रादयो ये भक्तिविरुद्धा धर्मास्तान्संत्यज्येत्य
र्थः ३२ किंच यावान्देशकालापरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वा अज्ञात्वा
पि यद्वा विशेषतः पुनः ज्ञात्वा एकांतभावेन ये भजंतीति ३३ ॥ ॐ नमो भगवते वासुदेवाय नमो नमः

श्री० भा० ए० टी० ५५

ग्राचरन्सेवमानः २४ ततश्चानेनप्रकारेणमयिसत्संगेनलब्धयाभक्त्यासभक्तः मांउपासिताध्याताभव
ति मच्चध्यानशीलः सोंजसादर्शितेनमार्गेणैवमेपदंस्वरूपंप्राप्नोति २५ सत्संगलब्धयाभक्त्येत्युक्तं सतत्रसतां
भक्तेश्चविशेषंपृच्छति साधुरिति साधवःस्वस्वमतिपरिकल्पिताःसंतिबहवःतवतुकीदृशाःसंमताःभ
क्तिरपिबहुविधाल्लोकेकीदृशीपुनस्त्वय्युपयुज्यते सद्भिश्चनारदादिभिरादृता २६ एतच्चकथ्यतां उ
द्धवोतिगुह्यंतत्वमेववक्ष्यामीत्येवमर्थमाविष्करोति हेपुरुषाध्यक्षेत्यादिना ब्रह्मादिनियंतः २७ अत्र

मदर्थेकर्मसंकामार्थानाचरन्मदपाश्रयः लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २४ सत्सं
गलब्धयाभक्त्यामयिमांसउपासिता सवैमदर्शितेनांजसाविंदतेपदं २५॥उद्धवउवा
च॥ साधुस्तवोत्तमश्लोकमतःकीदृग्विधःप्रभो भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिरादृता २६
एतन्मेपुरुषाध्यक्षलोकाध्यक्षजगत्प्रभो प्रणतायानुरक्तायप्रपन्नायचकथ्यतां २७
त्वंब्रह्मपरमंव्योमपुरुषःप्रकृतेःपरः अवतीर्णोसिभगवान्स्वेच्छोपात्तपृथग्वपुः॥२८॥श्रीभ
गवानुवाच॥ कृपालुरकृतद्रोहस्तितिक्षुःसर्वदेहिनां सत्यसारोनवद्यात्मासमःसर्वोपकार

देतः त्वमिति व्योमवदसंगःप्रकृतेःपरःस्वेषामिच्छयाउपात्तंपृथक्अपरिमितंवपुर्येनसः तत्रत्रिंशल्ल
क्षणःसाधुंनिरूपयति कृपालुरितिपंचभिः कृपालुःपरदुःखासहिष्णुः सर्वदेहिनांकेषांचिदपिअकृ
तद्रोहः तितिक्षुःक्षमावान् सत्यंसारःस्थिरंबलंवायस्यसः अनवद्यात्मा असूयादिरहितःसुखदुः
खसमः यथाशक्तिसर्वेषामुपकारकः २९
रामायनमोनमः ॥

५५

एतदेवान्यार्थनिदर्शनैः प्रपंचयति गामिति दुग्धतइति दोहः पयः दुग्धो दोहो नोन्नत्रदोह्योऽस्ति यस्याः
तामर्थशून्यां असतीं भार्यां कामशून्यां देहं पराधीनं प्रतिक्षणं दुःखहेतुं असत्प्रजां दृष्टादृष्टसाधनशू
न्यपुत्रं अतीर्थीकृतं अपात्रे दत्तं वित्तं दुःकीर्तिदुरितापादकं अंगहे उद्धव दुःखानंतरं दुःखमेव
यस्य सः रक्षति १९ मयाहीनां वाचमित्युक्तं विवृणोति यस्यामिति जगतः शोधकं चरित्रं न स्यात् किं तत्
अस्य विश्वस्य स्थित्यादिरूपं तद्धेतुरित्यर्थः लीलावतारेषु ईप्सितं जन्म मत्स्वरूपं श्रीरामकृष्णादिनाम

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया
रक्षति दुःखदुःखी १९ यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य लीलावता
रेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः २० एवं जिज्ञासयापोह्य नानात्वभ्रममात्म
नि उपारमेत विरजं मनो मय्यर्प्य सर्वगे २१ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं मयि स
र्वाणि कर्माणि निरपेक्षः समाचर २२ श्रद्धालुर्मे कथाः शृण्वन्सुभद्राः लोकपावनीः गाय
न्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः २३

जन्म वा न स्यात् ततो निष्फलां गिरं धीरो मा न धारयेत् उक्तं ज्ञानमार्गमुपसंहरति एवमिति जिज्ञासया विचारे
णात्मनि नानात्वभ्रमं देहाद्यभिमानं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधाय उपारमेत न किंचि
त्कुर्यात् न शास्त्रवादादित्यमात्रेणेत्यर्थः शक्तिमाह श्रद्धालुरिति अभिनयन् नेत्रेणेत्यर्थः २१ यदनीशः
असमर्थः तर्हि सम्यक् न सिद्धं मत्कर्मैव कृतार्थो भविष्यतीत्याह मयीति मदर्पणेन २२ कर्मभिर्विशुद्धस
त्वस्यांतरंगां भक्तिमाह श्रद्धालुरिति अभिनयन् स्वयमनुकुर्वन् २३

सर्वाधिष्ठानेष्वध्येयमाह धिष्ण्येष्विति इति अनेन प्रकारेण ४६ उक्ताया भक्तेः फलमाह इष्टापू र्तेनेति मद्भक्तिं दृढां भक्तिं अस्या भक्तेरंतरंगसाधनमाह अत्यं मत्स्मृतिः साधुसेवया भवति य द्वा स्मृतिः ज्ञानं तत्त्वश्च दृढभक्तिमतः पुंसः साधुसेवया मतज्ज्ञानं भवतीत्यर्थः ४७ ज्ञानभक्तिमा र्गादपि भक्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति सत्संगेन त्वत्र हेतुमाह हि यस्मात् सतामहं प्रायणं प्र

धिष्ण्येष्वित्येषु मद्रूपं शंखचक्रगदाम्बुजैः युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ४६
इष्टापूर्तेन मामेवं यो यजेत समाहितः लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ४७
प्रायेण भक्तियोगेन सत्संगेन विनोद्धव नोपायो विद्यते सम्यक् प्रायणं हि सतामहं ४८
अथैतत्परमं गुह्यं शृण्वतो यदुनंदन सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ४९
इति श्रीभागवते महापुराणे एकादशस्कंधे एकादशोऽध्यायः ॥११॥ श्रीरामकृष्णो जयति ॥

कृष्टमयनं प्राश्रयः अतः सत्संगो मत्प्राप्तेरंतरंग इत्यर्थः ४८ इदानीं सांख्ययोगादीनि साधनोत्तरसा पेक्षाणि सव्यभिचाराणि च सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्णयितुमा ह अथेति एतद्वक्ष्यमाणं परमं गुह्यं अतः शृणु इत्यर्थः ॥ ४९ ॥ इति श्रीभागवते महापुराणे एका दशस्कंधभावार्थदीपिकायां [illegible] एकादशोऽध्यायः ॥११॥

स्वयमन्येन वा निवेदितं च स्वीकुर्यात् एतच्च साधारणाभ्यासविषयं रागप्राप्तविषयं वा भक्त्यानुत्याश्र
मेव षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितं विष्णोर्नैवेद्यसिक्थेन पुण्यं तद्भुंजतां कलौ हृदि रू
पमुखे नाम नैवेद्यमुदरे हरेः पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युत इत्यादिवचनेभ्यः यद्वा अ
न्यस्मै निवेदितं मे नोपयुंज्यात् मह्यं न निवेदयेदित्यर्थः विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं पि
तृभ्यश्चैव तद्देयं तदानन्त्याय कल्पते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधाः पितरस्तस्य भ।

अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं अपि दीपावलोकं मे नोपयुंज्यान्निवेदितं ४०
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः। तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ४१
सूर्योऽग्निर्ब्राह्मणा गावो वैष्णवः खं मरुज्जलं भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ४२
सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत मां आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना ४३
वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ४४
स्थंडिले मंत्रहृदयैर्भोगैरात्मानमात्मनि क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ४५ राम

वंति क्लेशभागिन इत्यादिवचनेभ्यः ४० इदानीमेकादश पूजाधिष्ठान्याह सूर्य इति हे भद्र ४२
अधिष्ठानभेदेन पूजासाधनान्याह सूर्य इति त्रिभिः त्रय्या विद्यया सूक्तैरुपस्थानादिना अंग हे
उद्धव यवसादिना तृणादिना ४३ बंधुसत्कृत्या बंधुवत्संमानेन हृदि खे हृदयाकाशे मुख्यधिया
प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ४४ स्थंडिले भुवि मंत्रहृदयैः रहस्यमंत्रन्यासैः ४५

नन्वेवं हीतिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्यकान्यं च यज्ञानाह वेदाध्ययनेन ब्रह्मयज्ञः तेन ऋषीन् स्वधाकारेण पितॄन् स्वाहाकारेण देवान् बलिहरणेन भूतानि अन्नाद्यैरुदकादिभिर्मनुष्यानिति ज्ञातव्यं यथोदयं विभवानुसारतः तेषां च स्वरूपदृष्टिं विधत्ते मद्रूपाणीति ४९ आवश्यके धर्मे मुक्त्वा गृह्यत्र सारधर्ममाह यदृच्छयोपपन्नेन विना उपार्जितेन वा शुक्लेन स्वधर्मलब्धेन शुद्धेन धनेन वा भृत्यानपीडयन् ५० गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुम्बेष्विति त्रिभिः न प्रमाद्येत ईश्वरनिष्ठायां प्रमत्तो

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ४९ यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ५० कुटुम्बेषु न सज्जेत न प्रमाद्येत्कुटुम्ब्यपि विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ५१ पुत्रदाराप्तबन्धूनां संगमः पान्थसंगमः अनुदेहं वियन्त्येते स्वप्नो निद्रानुगो यथा ५२ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन् न गृहैरनुबध्येत निर्ममो निरहंकृतः ५२ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ५४ ॥ कृष्णायनमः

न भवेत् ननु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमादः विचारेणेत्याह विपश्चिदिति ५२ तत्रापि दृष्टेवासक्तेरधिकत्वात्तेषां नश्वरतां प्रपञ्चयति पुत्रादीनामेकत्र संगमः पान्थानां प्रपायां संगम इव तत्र हेतुः अनुदेहं प्रतिदेहं प्रतिदेहमेते वियन्ति नश्यन्ति निद्रानुवर्ती स्वप्नो निद्रापाये यथेति ५२ अतिथिवत् उदासीनः ५२ प्रसाप्याश्रमविकल्पमाह कर्मभिरिति गृहाश्रम एव तिष्ठेत् यदि प्रजावांस्तर्हि

३

श्री. भा. पु. टी. ८३

गृहाश्रमे गोदोषमाह यस्त्वितित्रिभिः ५५ वंधमेवाभिनयेन दर्शयति अहोइति वाला आत्मजा
यस्याः सा आत्मजास्तु मां विना अनाथाः संतः कथं जीविष्यंतीति ५६ गृहेषु आशयो वासना तेन आ
क्षिप्तं हृदयं यस्य सः अंधंतमः अतितामसीयोनिं ५७ इत्येकादशे सप्तदशोऽध्यायः १७ अष्टादशे व
दहमेवं वनस्थयतिगोचरं अधिकारविशेषाणि विशेषं चापि तद्गतं क्रमप्राप्तं वनस्थधर्मानाह व

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति वध्यते ५५ अहो
मे पितरौ वृद्धौ भार्या वालात्मजात्मजाः॥ अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ५६
एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं॥ अतृप्तस्ताननुध्यायन्मृतोंधं विशते तमः ५७ ॥
इत्येकादशे सप्तदशः॥ १७॥ श्रीभगवानुवाच॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा वन एव
वसेच्छांतस्तृतीयं भागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् वसीत वल्क
लं वासस्तृणपर्णाजिनानि च २ केशरोमनखश्मश्रुमलानि विभृयाद्दतः न धावेदप्सु मज्जे
त त्रिकालं स्थंडिलेशयः ३ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले आकंठमग्नः शिशि
र एवं वृत्तस्तपश्चरेत् ४ वनमिति आयुषः तृतीयं भागं पंचसप्ततिवर्षपर्यंतं ततः परं नीरोगादि
यस्य षड्भागोऽपि संन्यासाधिकारः स्यादिति भावः १ वसीत परिदधीत २ दतः दंतान् न धावेत् न शोध
येत् त्रिकालम् अप्सु मज्जेत् स्नायात् स्थंडिलेशयः भूमिशायी ३ तप्येत पंचाग्नीन् सूर्येण
सह चतुर्दिक्षु अग्निं ध्यायात्मानं तापयेदित्यर्थः आसारषाट् आसारं धारासंपातं सहत इति तथा अभाव

कायं तापयंतं वेतज्जलेष्वाकंठमग्नः उदकवासं नाम व्रतं चरेत् ४

८३

तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामश्चेद्गृहं चेत्करणशुद्ध्याधिका मश्चेद्वनं प्रविशेत् शुद्धान्तःकरणश्च चेद्द्विजोत्तमः ब्राह्मणश्चेत्प्रव्रजेदित्यर्थः यद्वा आश्रमादाश्रमं वं गच्छेत् अन्यथा अनाश्रमी प्रतिलोमं च नाचरेदित्यर्थः अमत्परश्चेति वाच्छेदः स्वभक्तस्याश्रमान पेक्षाभावस्य वक्ष्यमाणत्वात् ३७ विवाहे नियमं पूर्ववत्कं वर्णधर्मैः सह गृहस्थधर्मानाह गृहार्थी ति सदृशीं सवर्णाम् अजुगुप्सितां कुलतो लक्षणतश्चानिंदितां कामतस्तु यामन्यामुद्वहेत् तां स

गृहं वनं चोपविशेत्प्रव्रजेद्वा द्विजोत्तमः आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ३७ गृ हार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां यवीयसीं तु वयसा तां सवर्णामनुक्रमात् ३८ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां प्रतिग्रहोध्यापनं च ब्राह्मणस्यैव याजनं ३९ प्र तिग्रहं मन्यमानस्तपस्तेजोयशोनुदं अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः ४० ब्रा ह्मणस्य हि देहोयं क्षुद्रकामाय नेष्यते कृच्छ्राय तपसे चेह प्रेत्यानन्तसुखाय च ४१ राम

वर्णामनु तस्याः अनन्तरं ततोऽपि वर्णक्रमेणोद्वहेदित्यर्थः निसर्गावर्णमनुपूर्वेणाद्वहेत तथैकाययथाक्रमे ब्राह्मणादिविप्रविशां भार्याः स्वाः शूद्रजन्मन इति स्मृतेः ३८ इज्यादयस्त्रैवर्णिकानामावश्यकाः अथ र्माः प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव ३९ तत्रापि ब्राह्मणो मुख्यतमां वृत्तिमाह प्र तिग्रहमिति तथा याजनाध्यापनयोरपि कार्पण्यापरभिदादोषं पश्यन् शिलैः स्वामित्यक्तैः क्षेत्रपति तैः कणिशैः ४० एवं वृत्तिकार्श्यं ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ४१ श्रीरामायडो

ञ्छवृत्तिर्नाम विपणादिपतितकणोपादानं तेन शिलवृत्त्यैकोञ्छवृत्त्या तुष्टचित्तस्य मोक्षे फलमा
ह शिलोञ्छेति महान्तं स्वातिशयादिलक्षणं ४२ एवमधनस्य महत्फलमुक्त्वा सधनानामप्याह द्वि
भिः समुद्धरन्तीति दारिद्र्यादुत्तारयन्तीति विप्रमित्युपलक्षणं मत्परायणं येकमपि ४३ एतत्सर्वावश्य
कमेतदित्याह सर्वा इति ४४ ४५ सर्वेषामापद्वृत्तिराद्याभिः परार्थविक्रियादिः न तु स्वा

शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः मय्यर्पितात्मा गृह एव तिष्ठन्नाति
प्रसक्तः समुपैति शान्तिं ४२ समुद्धरन्ति ये विप्रं सीदन्तं मत्परायणं तानुद्धरिष्ये न चिरादाप
द्भ्यो नौरिवार्णवात् ४३ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः आत्मानमात्मना धीरो य
था गजपतिर्गजान् ४४ एवंविधो नरपतिर्विमानेनार्कवर्चसा विधूयेहाशुभं कृत्स्नमिन्द्रे
ण सह मोदते ४५ सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत् खड्गेन वापदाक्रान्तो न श्ववृ
त्त्या कथंचन ४६ वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययापदि चरेद्वा विप्ररूपेण न श्ववृत्त्या
कथंचन ४७ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत

वणाद्यैः तत्राप्यापदाक्रान्तश्चेत्खड्गेन लोम्यवृत्त्या वा यद्यपि गौतमोऽनन्तरापापीयसीं वृत्तिमातिष्ठे
दिति स्मरन्नखड्गधारणं पण्यविक्रियाच्छ्रेष्ठं मन्यते तथापीदं सातोवर्णाकृद्वृत्तिरेव श्रेष्ठेति भगवतोऽभि
मतं न तु श्ववृत्त्या नीचसेवया ४६ तत्राप्यसमर्थश्चेन्मृगयया विप्ररूपेण वाऽध्यापनादिना ४७ कारवः
प्रतिलोमजा विशेषाः कुलालादयः तेषां वृत्तिः कटादिक्रिया आपद्गतोऽपि गर्ह्येणानुकल्पेन वर्तेतेत्याह कृ

किंचमेखलादीन्कृशोपिधारयेत् तत्रादण्डशब्देनाक्षमाला कथंभूतः जटिलः अनभ्यंगादिनाजातजटः तथा
अधौतदद्धासोरक्तपीठः दन्ताश्चवासश्चदद्धासोसितधौतानितानियस्यसः अधौतदद्धासाःसचासावरक्त
पीठश्चनकौलकादिनारक्तपीठमासनंयस्यसः २२ तपश्चउचारोमूत्रपुरीषोत्सर्गोजपोच्चारेतेस्मि
न्वाग्यतःमौनीभवेत् २३ रेतोबुद्धिपूर्वेनावकिरेत्नोत्सृजेत् ब्रह्मव्रतधरः अष्टहस्थःस्वयमेवकथं

मेखलाजिनदंडाश्चब्रह्मसूत्रकमंडलून् जटिलोधौतदद्धासोरक्तपीठःकृशान्दधेत् २२ स्नान
भोजनहोमेषुजपोच्चारेचवाग्यतः नोच्छेषान्नखरोमाणिकक्षोपस्थगतान्यपि २३ रेतो
नावकिरेज्जातोब्रह्मव्रतधरःस्वयं अवकीर्णोवगाह्याप्सुयतासुस्त्रिपदींजपेत् २४ अग्नि
कोचार्यगोविप्रगुरुवृद्धसंगोष्ठेषु समाहितउपासीतसंध्येचयतवाग्जपन् २५ आचार्यं
मोविजानीयान्नावमन्येतकर्हिचित् नमर्त्यबुध्यासूयेतसर्वदेवमयोगुरुः २६ सायंप्रात
रुपासीयभैक्ष्यंतस्मैनिवेदयेत् यच्चान्यदप्यनुज्ञातमुपयुंजीतसंयुतः २७ शुश्रूषमाणआ
चार्यंसदोपासीतनीचवत् यानशय्यासनस्थानैर्नातिदूरकृतांजलिः २८ एवंवृत्तोगुरुकु
लेवसेद्भोगविवर्जितः विद्यासमाप्यतेयावद्बिभ्रद्व्रतमखंडितं २९

चिदवकीर्णोअवगाह्यस्ना
त्वायतासुःकृतप्राणायामःत्रिपदींगायत्रींजपेत् २४ संध्येचवेदयेत्वाक्जपन्नुपासीतमध्याह्नसंध्या
निमित्तमौनेनाप्नोतीतिहवचने २५ २६ अन्यदपियत्संप्राप्तंतच्चनिवेदयेत् तेनानुज्ञातेसंयतेसन्नुपभु
ञ्जीतेत्यर्थः २७ यानशय्यासनस्थानैःयातिष्ठतेतायांतेननिदितमध्यमतेनतासमीपशयनेनविश्रा
न्तेपादसंवाहनादिभिःसमीपासनेनआसीनेकृतांजलिर्नियोगमप्रतीक्षयानातिदूरेवस्थानेनेत्यर्थः २८

एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यद्यसाविति षड्भिः असौ ब्रह्मचारी यदि छंदसो लोकं महर्लोकं ततो ब्रह्मलोकं चारोक्ष्यन् आरोढुमिच्छतीत्यर्थः यद्वा छंदसो लोकमिति ब्रह्मलोकविशेषणं यत्र मूर्तिधराः कलाः स्तुवन्ति तर्हि बृहद्व्रतः सन् नैष्ठिकव्रतः सन् विन्यसेत् समर्प्पयेत् अधिकस्वाध्यायार्थं अधीतानिष्क्रियार्थं वा ३० ब्रह्मवर्चस्वी वेदाभ्यासजं तेजः सद्वृत्त तस्यैव वनस्थयतिसाधारणधर्मानाह स्त्रीणामिति निरीक्षणं भावगर्भं क्ष्वेलनं परिहासः एवमादिकं त्यजेत्

यद्यसौ छंदसो लोकमारोक्ष्यन् ब्रह्मविष्टपं । गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः ३० अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं । अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ३१ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं । प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ३२ शौचमाचमनं स्नानं संध्योपासनमार्जवं । तीर्थसेवां जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं ३३ सर्वाश्रमप्रयुक्तोऽयं नियमः कुलनंदन । मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३४ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् । मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ३५ अथानंतरमावेक्ष्यन् यथाजिज्ञासितागमः । गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः ३६ अग्रतस्स

मिथुनीभूतान्पश्यन् तत्त्यजेत् तन्न पश्येदित्यर्थः ३२ तस्यैवं सर्वाश्रमसाधारणधर्ममाह शौचमिति द्वाभ्यां ३३ ३४ निष्कामनैष्ठिकस्य तु मोक्षफलमाह एवमिति अमलः निष्काम इत्यर्थः दग्धकर्माशय इति कारणं यस्य तथाभूतः सन् मद्भक्तो भवति ३५ उपकुर्वाणस्य समावर्तनप्रकारमाह अथेति अनंतरं द्वितीयाश्रमं आवेक्ष्यन् प्रवेष्टुमिच्छन् यथा यथावद्विचारितवेदार्थः स्नायात् अभ्यंगादिकं कृत्वा समा

श्री॰
भा॰ ए॰
टी॰
८॰

तेषामधिकारिविशेषेणास्वभावानाह वर्णानामिति पंचभिः जन्मस्थानानुसारिणः नीचैरित्यव्ययं म
ध्यमं जन्मभूमिभिर्भेदाः उत्तमाभिरुत्तमाश्चेति १५ तपआलोचनं १६ तेजः प्रतापः १७ १८ एतैरेवा
श्रमस्वभावाश्च विज्ञेयाः १९ तदाद्यानां स्वभावानाह अशौचमिति शुष्कविग्रहः निर्मूलकलहः दस्या
२० तत्र तावत्सर्वसाधारणधर्ममाह अहिंसेति वर्णग्रहणमुपलक्षणार्थं २१ वर्णधर्मो गृहस्थप्रक

वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणी आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमाः १५
शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः १६ तेजो
बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतयस्त्विमाः १७ आ
स्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः १८ शुश्रूष
णं द्विजगवां देवानां चाप्यमायया तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः १९ अशौचम
नृतं स्तेयं नास्तिक्यं शुष्कविग्रहः कामः क्रोधश्च तर्षश्च सभावोंऽत्यावसायिनां २० अहिंसास
त्यमस्तेयमकामक्रोधलोभता भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः २१ द्वितीयं प्राप्या
नुपूर्व्याज्जन्मोपनयनं द्विजः वसन्गुरुकुले दान्तो ब्रह्माधीयीत चाहूतः २२

रणो वक्ष्यति प्रथमं तावदाश्रमेषु ब्रह्मचारिणो धर्मा वर्ण्यन्ते सच द्विविधः उपकुर्वाणको नैष्ठिकश्च त
त्राद्यस्य धर्मानाह द्वितीयमिति नवभिः द्विजः त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण
द्वितीयमुपनयनाख्यं जन्म प्राप्याचार्येणाहूतो ब्रह्मवेदमधीयीत चकारात्तदर्थं च विचारयेत् २२ ॥

८॰

धर्म्योधर्मादनपेतः अतः नैश्रेयसकरः भक्तिजनकः अतःसेमत्तः तंधर्मंनिबोध ८ तत्रादौमदुपासनाल
क्षणएवस्वाभाविकोधर्मआसीत्तथाचारलक्षणस्तुपश्चात्प्रवृत्तः सचैवमनुष्ठितोभक्तिहेतुरितिवर्णयितुमाह
आदाविति कल्पादौयत्कृतयुगंतस्मिन्नतेचतदामामुपासतएवकेवलंनान्यत्कृत्यमस्तीतिवक्तुंकृतयु
गनामनिरुक्तिमाह कृतकृत्येति जात्याजन्मनैवाकिंचविधायकाभावादपितदानीनान्यकर्मास्तीत्य

श्रीभ वा वाच धर्म्यएषतवप्रश्नोनैःश्रेयसकरोनृणां वर्णाश्रमाचारवतांतमुद्धवनिबोध
मे ८ आदौकृतयुगेवर्णोनृणांहंसइतिस्मृतः कृतकृत्याःप्रजाजात्यातस्मात्कृतयुगंविदुः
९ वेदःप्रणवएवाग्रेधर्मोऽहंवृषरूपधृक् उपासतेतपोनिष्ठाहंसंमांमुक्तकिल्बिषाः १० त्रेता
मुखेमहाभागप्राणान्मेहृदयात्त्रयी विद्याप्रादुरभूत्तस्याअहमासंत्रिवृन्मखः ११ विप्रक्ष
त्रियविट्शूद्रामुखबाहूरुपादजाः वैराजात्पुरुषाज्जातायआत्माचारलक्षणाः १२ गृहाश्र
मोजघनतोब्रह्मचर्यंहृदोमम वक्षःस्थलाद्वनेवासोन्यासःशीर्षणिसंस्थितः १३ श्रीराम

९ वेदइति धर्मस्तुमनोविषयोऽहमेववृषरूपधृन्नचतुष्पात्तन्नक्रियाविषयोयज्ञादिः अतःतपोनिष्ठाः
मांहंसंशुद्धंमांध्यायंतीत्यर्थः १० पश्चात्त्रेतायुगप्रवेशेमेवैराजरूपस्यप्राणान्निमित्तात्हृदयादाकाशा
त्तस्याःत्रय्याःसकाशात् होत्राध्वर्य्वौद्गात्रैःत्रिवृत्त्रिरूपः यज्ञोवैविष्णुरितिश्रुतेः ११ वर्णानामाश्र
माणांधर्मान्वक्तुंतेषामुत्पत्तिमाह विप्रेतिद्वाभ्यां आत्माचारःस्वधर्मएवलक्षणंज्ञापकोयेषां १२
ममवैराजरूपस्यहृदः वक्षसोधस्तात्ब्रह्मचर्यमितिनैष्ठिकाभिप्राय १३

भगवतोउत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानित्येवंलक्षणा
नां २९ सुपेशसांसुंदराणां दर्भजातीनांकाशहर्षादीनां हविःषुचरुपुरोडाशमादिष्वितेषुवा ३० लक्ष्मीः
धनादिसंपत् ३१ बलवतांओजश्चसहश्च सात्वतोभागवतानांभक्त्याकृतंकर्माहमित्यर्थः तेषांम
ध्येनवव्यूहार्चनेवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माणइतियानव

वासुदेवोभगवतांत्वंतुभागवतेष्वहं किंपुरुषाणांहनुमान्विद्याध्राणांसुदर्शनः २९ रत्ना
नांपद्मरागोस्मिपद्मकोशःसुपेशसां कुशोस्मिदर्भजातीनांगव्यमाज्यंहविःष्वहं ३०
व्यवसायिनामहंलक्ष्मीःकितवानांछलग्रहः तितिक्षास्मितितिक्षूणांसत्वंसत्ववतां
अहं ३१ ओजःसहोबलवतांकर्माहंविद्धिसात्वतां सात्वतांनवमूर्तीनामादिमूर्तिरहंप
रा ३२ विश्वावसुःपूर्वचित्तिर्गंधर्वाप्सरसामहं भूधराणामहंस्थैर्यंगंधमात्रमहंभुवः ३३
अपांरसश्चपरमस्तेजिष्ठानांविभावसुः प्रभासूर्येंदुताराणांशब्दोहंनभसःपरः ३४ ब्रह्म
ण्यानांबलिरहंवीराणामहमर्जुनः भूतानांस्थितिरुत्पत्तिरहंवैप्रतिसंक्रमः ३५ गत्यु
क्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं आस्वादश्रुत्यवघ्राणमहंसर्वेंद्रियेंद्रियम् ३६

मूर्तयस्तासांमध्येवासुदेवाख्यः ३२ गंधर्वाणांविश्वावसुः अप्सरसांपूर्वचित्तिः गंधमात्रंअविकृ
तं ३३ परमःमधुरः परःपराख्यःशब्दः ३४ अर्जुनःपार्थः भूतानांप्राणिनां प्रतिसंक्रमःप्रलयः ३५
गत्याद्याःपंचकर्मेंद्रियव्यापाराःस्पर्शादयोज्ञानेंद्रियव्यापाराःतत्रलक्षणंदर्शनंसर्वेंद्रियामिंद्रियंतद्

तदेवं तत्र तत्र निर्द्धारणेन तन्नत्संबंधेन च विशेषतो विभूती निरूप्येदानीं सामान्यतः सर्वत्रापि निरूपयति
पृथिवीति सार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि शब्दे शब्द एकारः महान्मदत्तत्त्वं एता
सप्त प्रकृतिविकृतयः विकारः पंच महाभूतानि एकादशेंद्रियाणि चेत्येवं षोडशसंख्याकः पुरुषो
जीवः अव्यक्तं प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृतिर्नो विकृतिः पुरुष इति किंच रजःस
त्वतमइति प्रकृतेर्गुणाश्च परंब्रह्म च तदेतत्सर्वमहमेव किंच एतत्संख्यानं एतेषां लक्षणं ज्ञा
नं च तत्फलं तत्त्वविनिश्चयश्चाहमेव ३६ एतदेवसंक्षिप्याह मयेति जीवेश्वररूपाहि विधा याः भावः

पृथिवी वायुराकाशमापो ज्योतिरहं महान् विकारः पुरुषोऽव्यक्तं रजः सत्वतमः परं अह
मेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ३७ मयेश्वरेण जीवेन गुणेन गुणिना विना सर्वा
त्मनापि सर्वेण न भावो विद्यते क्वचित् ३८ संख्यानं परमाणूनां कालेन क्रियते मया
न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ३९

यश्च गुणा गुणिरूपः यश्च देवस्तदेवरूपः स सर्वो मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्वमित्य
र्थः ३८ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वा क
थयेति चेत्तत्राह संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तावदपि मयैव क्रियते कृत्वा वक्तुं
शक्यते न तथा मे विभूतीनां संख्यानं कर्तुं न शक्यते कुतस्तत्राह सृजतोऽण्डानीति यदा मया सृज्य
मानानां ब्रह्मांडानामेव तावत्संख्या नास्ति तदा कुतस्तत्कृतानां विभूतीनां संख्येत्यर्थः ३९ श्रीराम

तथापिविशेषतएवसर्वासंक्षेपतःकथयामीत्याह तेजःप्रभावःश्रीःसंपत् सौभगंमनोनयनाह्लाद
कत्वं भगःभोगः वीर्यंबलं अंशकःविभूतीः उपसंहरति एताइति एतेचविभूतिभेदामायिकवि
ज्ञावताराएवकथिताः अंशेनात्रात्तौवाभिनिवेशःकर्त्तव्यइत्याह मनोविकाराएवनतुपरमार्थाःय

तेजःश्रीःकीर्तिरैश्वर्यंह्रीस्त्यागःसौभगंभगः वीर्यंतितिक्षाविज्ञानंयत्रयत्रसमेंऽशकः एता
स्तेकीर्तिताःसर्वाःसंक्षेपेणविभूतयः मनोविकाराएवैतेयथावाचाभिधीयते ४१ वा
चंयच्छमनोयच्छप्राणान्यच्छेंद्रियाणिच आत्मानमात्मनायच्छनभूयःकल्पसेऽध्वने ४२ यो
वैवाङ्मनसीसम्यगसंयच्छन्धियायतिः तस्यव्रतंतपोदानंस्रवत्यामघटाम्बुवत् ४३ तस्मा
द्वचोमनःप्राणान्नियच्छेन्मत्परायणः मद्भक्तियुक्तयाबुद्ध्याततःपरिसमाप्यते ४४
इति भाग तेम पुरा एका दशस्कं षोड ध्यायः॥१६॥ ॐनमोभगवतेनमः

यांकिंचपुष्पादिवाचावेणाभिधीयन्तेतत्तुल्याः तस्माद्वागादीनियच्छ आत्मानंबुद्धिंआत्मनासत्त्वसं
पन्नयातयैवनियच्छ अध्वनेसंसारमार्गाय असंयमनेदोषमाह यइति असंयच्छन्नसंयच्छन्निति
परिसमाप्यतेकृतकृत्योभवतीत्यर्थः ४४ इति भावा दीपि यांए दशे षोडो ध्याः १६

ततः समदर्शोऽहं स्वधर्मे भक्तिलक्षणो हंसोक्तं धर्ममन्वाह ब्रह्मचारिगृहस्थयोः कर्माद्दंविद्धिसात्वता
मित्यत्र भक्त्या कृतं कर्म मोक्षसाधनं मद्विभूतिरित्युक्तं भक्तिसाधनत्वं च कर्मणामनोदितेषु वहितः
स्वधर्मेष्वित्यादिना तत्र चोक्तं न च कर्मानुष्ठातॄणां नियमेन भक्तिरुत्पद्यते अतः पृच्छति यस्त्वये
निमनाभिः पूर्वं कल्पादौ त्वद्भक्तिलक्षणः तज्ज्ञापकः तत्साधनमित्यर्थः वर्णाश्रमहीनानामपि द्विप

उद उ च यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः वर्णाश्रमाचारवतां सर्वेषां द्विप
दामपि १ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् स्वधर्मेणारविंदाक्ष तन्ममाख्यातु
मर्हसि २ पुरा किल महाबाहो धर्मं परमकं प्रभो यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव
३ स इदानीं सुमहता कालेनामित्रकर्शन न प्रायो भविता मर्त्यलोके प्रागनुशासितः
४ वक्ता कर्तावितानान्यो धर्मस्याच्युत ते भुवि सभायामपि वैरिंच्यां यत्र मूर्तिधराः क
लाः ५ कर्त्रावित्रा प्रवक्त्रा च भवता मधुसूदन त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति
६ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः यथा यस्य विधीयेत तथा वर्णय मे प्रभो ७

दानां यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण नृणां संप्रदायादेव त्वत्तस्ते किं पुनर्वेदसंनेन
तु चाह पुरेति परमकं परमस्वामी कंसस्वरूपश्चेतयत्र यद्धंसरूपेण धर्मोऽयुक्तः एवं तत योगमाजेजा
नीतमागतं यत्तत्पुनः महदंसं विवक्षयेत्युक्तत्वात् प्रागनुशासितोऽपि न भविता न भविष्यति अत्र हेत
माह वक्तेति द्वाभ्यां तत्त्वतोऽन्यः कलावेदाद्याः तत्तस्मात् नः अस्माकं मनुष्याणां मध्ये यस्य यथा वि

द्विहोनीकामधेनुः नक्षत्रौषधीनांप्रभुंसोमं यक्षरक्षसांप्रभुंवैश्रवणमित्यर्थः १६ यादसांप्रभुंतप
तांप्रतापवतांयुमतांदीप्तिमतांचमध्ये १७ संयमतांदंडयतामित्यर्थः १८ शृंगिणांदंष्ट्रिणांचमध्ये
तेनेषांप्रभुर्वातयैः सन्यासःप्रथमःश्राश्रमाणाः १९ स्रोतसांप्रवाहानांच सरसांस्थिरोदकाशयानां २०

इंद्रोहंसर्वदेवानांवसूनामस्मिहव्यवाट् आदित्यानामहंविष्णूरुद्राणांनीललोहितः १३
ब्रह्मर्षीणांभृगुरहंराजर्षीणामहंमनुः देवर्षीणांनारदोहंहविर्द्धान्यस्मिधेनुषु १४ सिद्ध
गणानांकपिलःसुपर्णोहंपतत्रिणां प्रजापतीनांदक्षोहंपितॄणामहमर्यमा १५ मां
विद्धिदैत्यानांप्रह्लादमसुरेश्वरं सोमंनक्षत्रौषधीनांधनेशंयक्षरक्षसां १६ ऐरावतं
गजेंद्राणांयादसांवरुणंप्रभुं तपतांशुमतांसूर्यंमनुष्याणांचभूपतिं १७ उच्चैश्रवास्तु
रंगाणांधातूनामस्मिकांचनं यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः १८ नागें
द्राणामनंतोहंरुद्राःशृंगिदंष्ट्रिणां आश्रमाणामहंतुर्योवर्णानांप्रथमोनघ १९ तो
यानांस्रोतसांगंगासमुद्रःसारसामहं आयुधानांधनुरहंत्रिपुरघ्नोधनुष्मतां १० धिष्ण्या
नामस्म्यहंमेरुर्गहनानांहिमालयः वनस्पतीनामश्वत्थओषधीनामहंयवः ११ न्यग्रोध
सोवमिष्ठांहंवलिष्ठानांबृहस्पतिः स्कंदोहंसर्वसेनान्यामग्रण्यांभगवानजः २२ राम

धिष्ण्यानांनिवासस्थानानांगहनानांदुर्गमानां २१ बलिष्ठानांवेदार्थनिष्ठानां सेनान्यांचमूपती
नां अग्रण्यांसन्मार्गप्रवर्तकानांअजःब्रह्मा २२

शुचीनां शोधकानामपि मार्जनेन तत्क्षणाद्धर्षणादीनां मध्ये वायुरादिरूपः शोधकोऽहं २३ योगानां योगा
ङ्गानां मध्ये आत्मसंरोधः समाधिरहं मंत्रानीतिः कौशलानां विवेकादिगुणानां मध्ये आन्वीक्षिकी
आत्मानात्मविवेकविद्या आत्मख्यात्यन्यथाख्यात्यख्यातिशून्यख्यातिसत्ख्यात्यनिर्वचनीयख्यातिवादिनामेव
मिदमेव चेति प्राडुरतो विकल्पः सोऽहं २४ कुमारः सनत्कुमारः २५ संन्यासः भूताभयदाने क्षेमाणा
मभयस्थानानां मध्ये अबहिर्मतिः अनिशमूनृतप्रियवचनं मौनं च नहिप्रियभाषणां मौनं च पुरुषस्य

पवतानां वायुरस्म्यहं देवतानामःविदिमने वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः २३
योगानामात्मसंरोधो मंत्रोऽस्मि विजिगीषतां आन्वीक्षिकी कौशलानां विकल्पः ख्या
तिवादिनां २४ स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः नारायणो मुनीनां च कुमारो ब्रह्म
चारिणां २५ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः गुह्यानां सूनृतं मौनं मिथुनाना
मजस्त्वहं २६ संवत्सरोऽस्म्यनिमिषामृतूनां मधुमाधवौ मासानां मार्गशीर्षोऽहं नक्षत्राणां
तथाभिजित् २७ अहं युगानां च कृतं धीराणां देवलोऽसितः द्वैपायनोऽस्मि व्यासानां कवीनां

मिथायोत्तायमवेस्त्रजः प्रजापतिः यस्मादेहाद्वाभ्यां मिथुनमभूत्तमेवं ब्रह्मा मिथुने अहं देवा एषमात्म
नो यदस्यत्वमितिश्रुतिः २६ अनिमिषां अप्रमत्तानां मधुमाधवौ वसंतऋत्वर्थः अभिजिदुत्तराषाढाः
चतुर्थपादः तथा च श्रुतिः अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामवस्ताच्छ्रोणाया इत्यादिकृ
ते कृतयुगं २७ देवलः असितश्च व्यासानां वेदविभागकर्तॄणां कवीनां विदुषां काव्यः २८ रामजी

श्री: भा: प: टी: ७७

७७

श्री॰
भा॰ए॰
टी॰
७८

सचयदाततोनातिवधान्निवृतः तदामयाप्रतिबोधितः सन्यथात्वमभिभाषसेएवंसेयामस्तुत्वेमामभ्य
भाषत तद्वदेवत्तवापिकथयिष्यामीतिभावः ८ ताःविभूतीःकथयति अहमिति अस्यच्छ्लोकस्यमा
नाधिकरणाः प्रथमंताद्वितीयाताश्चसर्वाविभूतयः तास्ताश्चोपासनार्थंकथ्यंते षष्ठीचक्वचिन्निर्द्धार
णेसंबंधचक्वचिद्यथायोगंपदृष्टव्या ततञ्चामीषांभूतानांआत्मेति सुहृदितिईश्वरइतिचसामान्येनाहमु

सततदागुरुषव्याघ्रोयुक्त्यामेप्रतिबोधितः अभ्यभाषतमामेवंयथात्वंरण
मूर्द्धनि ८ अहमात्माहवामीषांभूतानांसुहृदीश्वरः अहंसर्वाणिभूता
निनेषांस्थितस्संभवाप्ययः ९ अहंगतिर्गतिमतांकालःकलयतामहं गु
णानांचाप्यहंसाम्यगुणानांत्यौत्पत्तिकोगुणः १० गुणिनामप्यहंसूत्रंमह
तांचमहानहं सूक्ष्माणामप्यहंजीवोदुर्जयानामहंमनः ११ हिरण्यगर्भो
वेदानांमंत्राणांप्रणवस्त्रिवृत अक्षराणामकारोस्मिपदानिछंदसामहं १२

पासकइत्यर्थः एवंसर्वेषांतेषांस्थितसंभवाप्ययः तद्धेतुरित्यर्थः ९ विशेषतोविभूतीराह कलयतांव
शीकुर्वतांमध्ये गुणानांमध्येगुणिनिधर्मिणिऔत्पत्तिकास्वाभाविकोयोगुणःसोहं १० सूत्रंप्र
थमकार्यं महान्महत्तत्त्वंसूक्ष्मोपाधित्वात्दुर्ज्ञेयत्वाच्च जीवस्यसूक्ष्मत्वं बुद्धेर्गुणानात्मगुणेनचैव
सारग्रमात्राह्यवरोपिदृश्यतइतिश्रुतेः ११ वेदानांसंबंधीनेषामध्यापकःपदानित्रिपदागायत्रीत्यर्थः

७८

अत्रसदाचारंप्रमाणमाह याथातथ्येनयथार्थत्वेन सर्वभूतकारणंत्वांब्राह्मणावेदतात्पर्यविदः २ एवंकारणत्वेनसर्वात्मत्वमनूद्यविभूतीःपृच्छति येष्विति उपासीनामामेवमानाःसंतः ३ दुर्ज्ञेयत्वमेवाह गूढश्चरसिगूढः भूतानांप्राणिनांमध्येअत्रहेतुः भूतानामात्माअंतर्यामी अत्रोपहेतुः हेभूतभावनेति तेतवमाया ४ तास्ताएवसाकल्येनपृच्छति हेमहाविभूतेयाःकाश्चभूम्यादिषुतेविभूतयः

उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः उपासतेत्वांभगवन्याथातथ्येनब्राह्मणाः २
येषुयेषुचभावेषुभक्त्यात्वांपरमर्षयः उपासीनाःप्रपद्यंतेसंसिद्धिंतद्वदस्वमे ३ गूढश्चरसिभूतात्माभूतानांभूतभावन नत्वांपश्यंतिभूतानिपश्यंतंमोहितानिते ४ याःकाश्चभूमौदिविवैरसायांविभूतयोदिक्षुमहाविभूते तामह्यमाख्याह्यनुभावितास्तेनमामितेतीर्थपदांघ्रिपद्मं ५ ॥श्रीभगवानुवाच॥ एवमेतदहंपृष्टःप्रश्नंप्रश्नविदांवर युयुत्सुनाविनशनेसपत्नैरर्जुनेनवै ६ ज्ञात्वाज्ञातिवधंगर्ह्यमधर्मंराज्यहेतुकं ततोनिवृत्तोहंताहंहतोयमितिलौकिकः ७

रसायांरसातले अनुभाविताःत्वयैवकेनचित्कस्मिंश्चित्प्रदेशेणसंयोजिताः तीर्थानांपदंचत्वदंघ्रिपद्मंच ५ नरावतारभूतार्जुनप्रश्नसंवादित्वात्तवायंप्रश्नःसाधीयानितितावदनुमोदते एवमितित्रिभिः प्रष्टेप्रष्टव्यं सपत्नैर्योद्धुमिच्छताविनाशनेकुरुक्षेत्रे ६ युयुत्सोर्विभूतिप्रश्नेकःप्रसंगस्तत्राह ज्ञात्वेतिलौकिकःप्राकृतमतिःसन् ७ राम

यत्रप्रविशतितत्रात्मानंचिंतयेत् ततःस्वपिंडंदेहंहित्वाप्राणःप्राणप्रधानंलिंगशरीरोपाधिर्वायुभू
तःवाह्यवायोभूतःप्रविष्टःतेनमार्गेणेत्यर्थः षडंघ्रिवत् भृंगोयथापुष्पात्पुष्पांतरंसमनायासेनप्रवि
शतितद्वत् २३ पिंडंहित्वेत्युक्तंतत्प्रकारंकथयन् स्वच्छंदमृत्युमाह पार्ष्ण्यापार्ष्णिनागुदंनिरुध्य
प्राणंप्राणापानोपाधिमात्मानंब्रह्मरंध्रेणमूर्द्धद्वारेणब्रह्मणिस्वोपलक्षणे ब्रह्मवास्वन्यद्वास्वपेक्षितेस्थाने

परकायंविशन्सिद्धआत्मानंतत्रभावयेत् पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत्
२३ पार्ष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्द्धसु आरोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं २४
विहरिष्यन्सुराक्रीडेमत्स्थंसत्वंविभावयेत् विमानेनोपतिष्ठंतिसत्ववृत्तीःसुरस्त्रियः २५
यथासंकल्पयेद्बुध्यायदावामत्परःपुमान् मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते २६
योवैमद्भावमापन्नईशितुर्वशितुःपुमान् कुतश्चिन्नविहन्येततस्यचाज्ञायथामम २७

मनसानीत्वा २४ मत्स्थंमन्मूर्तिरूपंसत्वंचिंतयेत् तदासत्ववृत्तयःसत्वांशभूताः २५ यदा
वात्रकालेपियथावेतिपाठे यथावायेनकेनापिप्रकारेणबुध्यासंकल्पयेत् तत्तथायथाव
त्प्राप्नोतीत्यर्थः पक्षेयथासंकल्पयेत् यथावामत्परःमयिविश्वासवान्भवति तथातत्स्व
रूपंसर्वंप्राप्नोतीत्यर्थः किंकुर्वन्सत्येसत्यसंकल्पेमयिमनोयुंजन् २६ मदितिपृथक्पदंममेत्य
र्थः ईशितुःसर्वनियंतुःवशितुःस्वतंत्रस्यममभावंस्वभावंप्राप्तः २७ ॥

पत्तागुणादेनवः अतःपरं दूरधारणाविदश्चेति त्रिकालसंस्पर्शधारणामासूचिता त्रैकालिकी त्रिकाल वस्तुविषया स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता अनयैव परचित्तादि अभिज्ञतापि ख्याता २८ अग्न्यादिभिर्वापघात मृन्याभगवानित्येवं भूतयोगमयं तेनाभिभूयेत अत्र हेतुः मद्योगेति या दसामुदकं यथाऽभिघातकं न भवति तथा तस्य वपुषोऽग्न्यादय इत्यर्थः २९ अनयैवाहंकृतापि वा

मद्रन्याशुद्धसत्वस्य योगिनो धारणाविदः तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता २८
अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः मद्योगश्रान्तचित्तस्य यादसामुदकं यथा २९
मद्विभूतीरभिध्यायेच्छ्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैः स भवेदपराजितः ३० उ
पासकस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ३१ जिते
न्द्रियस्य योगस्य जितश्वासात्मनो मुनेः मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ३२ अं
तरायान्वदन्त्येता युञ्जतो योगमुत्तमं मया संपद्यमानस्य कालक्षपणहेतवः ३३ श्रीः

ख्याता मद्विभूतीः ममावतारान् ध्वजादिभिः सह ३० उपसंहरति उपासकस्येति एवं पृथक्कथ नादिभिः ३१ यद्वा किं नाना धारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवेतीत्याह जितेन्द्रियस्येति मद्धारणां नारायणोऽत्र रीयाख्ये इत्यत्रोक्तां या सा दुर्लभा स्यात् सा का न काचिदित्यर्थः ३२ यद्यप्येव तथाऽपि न प्रार्थ्या इत्याह अन्तरायानिति ३३ ॥

श्री॰
भा॰ ए॰
टी॰
७५

षोडशेऽत्र हरेराविर्भावरूपा विभूतयः ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः अंते श्रितेन यथा नम
स्कारमकृतात्मनो अतस्तद्योग्यतापत्त्यै विभूत्यादिनिरूपणं एवं तावन्नवाध्याय्यामष्टप्रश्ना निरूपिताः
उत्तमत्वसंभवे तावत्समसमाधिच तत्रैव वहनुक्तेस्तन्निर्दारे सत्कृत्याश्च ततः परे द्वादशे वेत्तरेक मंक्तितत्या
गम्यवस्थितो ईशितिहासमेतो योगानिष्ठायां च त्रयोदशे अथ साधननिर्दारध्यानेनैव चतुर्दशे धारणा
सिद्धिभेदश्च प्रसंगेनान्तिरंतरे उद्धवप्रश्नतादत्तमुत्तरं हरिणोचितं षोडशे भूतिविस्तारे ह्ययावर्णाश्रमव्रते
ज्ञानादिनिर्णये वा तो यमादीनां चोनिर्णये योगत्रयाधिकारे तु विंशे च तदनंतरे तत्त्वसंख्याविवादे च प्र
कृत्यादिविवेचने जन्ममृत्युप्रकारे च द्वाविंशे तदनंतरे परापराधसहने च तितिक्षादनंतरे समविंशेऽक्रि॰

उद्धव उवाच ॥ त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतं
सर्वेषामपिभावानांत्राणस्थित्यप्ययोद्भवः १ ॥

यः योगप्रश्ने तदुपवर्णने अष्टाविंशे ततः प्रोक्ता ज्ञानयोगोपसंहृतिः संसारसंभवप्रश्ने तन्मध्ये दत्तमुत्त
रं तदष्टाकृत्याप्युनः प्रश्ने भक्तियोगोपसंहृतिः एवं प्रश्नोत्तराण्यत्र क्रमेणैतानि विंशतिः अहमात्मांतरो वा
ह्येनावृतः सर्वदेहिनां यथा भूतानि भूतेषु बहिरंतः स्वयं तथेत्युक्ते तत्र भूतानि पृथक्कश्चित्केवं चिद्गुण
विशेषेणोद्रिक्तान्निवर्तंते कश्चित्सामान्यरूपेणैव तथा त्वमपि कं क कथं वर्तसे अत विभूतीः प्रष्टुं प्रथ
मं तावदुक्तमेव सर्वात्मकत्वमनुवदन्नीत्वं ब्रह्मेति अपावृतं निरावरणं स्वतंत्रं वा अतएव सर्वेषामपि
भावानां स्त्राणं स्थितिर्जीवनं त्राणस्थितिमोदितो अप्ययोद्भवौ यस्मात्सत्वं उपादानकारणमित्यर्थः १

७५

तस्माद्दैवतकीयमेवधारणाकार्यानान्याःकाम्याइत्याह जन्मनैवकाश्चित्सिद्धयोभवंतियथादेवानां
यथाचयादसामुदकस्तंभःपक्ष्यादीनांविचरन्त्यादि तद्वत्पात्रेजले जन्मौषधितपोमंत्रयोगाज्जाः
सिद्धयइति योगेनमद्धारणामित्यनेन योगगतिमत्यालोकवादिरूपा ३४ कुतइत्यतआह सर्वासा
मित्यनेन प्रभुत्वापपादनेहेतुःकारणंपतिःपालयिताचेति किंच नकेवलंसिद्धीनामेवप्रभुः अ
पितुमोक्षादीनामपीत्याह अहमितियोगोमोक्षःसांख्यंतत्साधनंज्ञानं धर्मस्यतदुपदेष्टृणांब्रह्मवा

जन्मौषधितपोमंत्रैर्यावतीरिहसिद्धयः योगेनाप्नोतिताःसर्वानान्यैर्योगगतिंव्रजेत् ३४
सर्वासामपिसिद्धीनांहेतुःपतिरहंप्रभुः अहंयोगस्यसांख्यस्यधर्मस्यब्रह्मवादिनां ३५
अहमात्मांतरोबाह्योनावृतःसर्वदेहिनां यथाभूतानिभूतेषुबहिरंतःस्वयंतथा ३६ ॥

इतिश्रीभागवतेएकादशेपंचदशोध्यायः॥१५॥

दिनांच ३५ कुतःतत्राह अहमिति सर्वदेहिनांजीवानामात्मा यतःअंतरःअंतर्यामी एवंतर्ह्यात्मा
तद्यात्मास्ययतइतिश्रुतेः तर्हिकिमेतद्वीतिन्वात्परिछिन्नःनबाह्यश्चव्यापकइत्यर्थः तत्रहेतुः अनावृतः
एतत्सदृष्टांतमाह भूतेषुचतुर्विधेषुमहाभूतानियथाबहिरंतश्चभवंतिस्वयंअहमपितथेत्यर्थः ३६

इतिश्रीभावार्थदीपिकायामेकादशेपंचदशः॥१५॥

आकाशात्मायःप्राणःसमष्टिरूपस्तद्रूपेमयिमनसाघोषंनादंचिंतयन् असौहंसोजीवः तत्रआकाशेउपल
ब्धानांसतां तत्रस्थाःविचित्रावाचःशृणोति यद्वातत्राकाशेउपलब्धाअभिव्यक्तायाःभूतानांवाचस्तादू
रतःशृणोतीति १९ त्वष्टाआदित्यःतस्मिन्नपरिछिन्नेचक्षुःसंयोज्यतंचचक्षुषिसंयोज्यतत्रोभयसंयो
गेमांध्यायन् विश्वंदूरतःपश्यति २० मनोदेहंचतदनुवर्तिनावायुनासहमयिसंसंयोज्यमद्धारणा

मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहन् तत्रोपलब्धाभूतानां
हंसोवाचःशृणोत्यसौ १९ चक्षुस्त्वष्टरिसंयोज्यत्वष्टारमपिच
क्षुषि मांतत्रमनसाध्यायन्विश्वंपश्यतिसूक्ष्मदृक् २० म
नोमयिसुसंयोज्यदेहंतदनुवायुना मद्धारणानुभावेनतत्रा
त्मायत्रवैमनः २१ यदामनउपादाययद्यद्रूपंबुभूषति तत्त
द्भवेन्मनोरूपंमद्योगबलमाश्रयः २२ श्रीरामजी

क्रियतेतस्याःप्रभावेनयत्रमनोयातितत्रात्मादेहोयातीत्यर्थः यद्वामनःकर्तृआत्मानंवायुनासहदे
हंचमयिसंसंयोज्ययत्रयातितदनुतत्रदेहोयातीति २१ मनःउपादायउपादानकारणंकृत्वायद्यद्देवा
दिरूपंभवितुमिच्छतितत्तन्मनोरूपंमनसाभीष्टंरूपंयोगीभवेत्कुतःयतोमयोगबलंयोऽहमचिंत्यश
क्तिर्नानाकारस्तस्मिन्मयिमनसोयोगोधारणातस्यबलंप्रभावःसएवाश्रयःकारणम् २२ श्रीः

क्रियाशक्तिप्रधाने महत्तत्त्वमेव सूत्रं तदुपाधौ मयि मः मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूतस्य
अव्यक्ताज्जन्म यस्य तस्य सूत्रतदुपाधर्म्मे मेत्यर्थः १४ त्र्यधीश्वरे त्रिगुणमायानियंतरि अत एव कालविग्रहे
प्राकलयितृरूपे एतयोर्मिलित ईशित्वं विशिनष्टि क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनां प्रे
रणां न तु विश्वसृष्ट्यादिकर्तृत्वलक्षणामित्यर्थः १५ तुरीयाख्ये विराड्हिरण्यगर्भस्वकारणं चेत्युपाध

महत्यात्मनि सूत्रे धारयेन्मयि मानसं प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः १४ वि
ष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनां १५ ना
रायणे तुरीयाख्ये भगवच्छब्दशब्दिते मनो मय्यादधद्योगी मद्धर्मा वशितामियात् १६
निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः परमानंदमाप्नोति यत्र कामोऽवसीदति १७ श्वे
तद्वीपपतौ चित्तं शुद्धे धर्ममये मयि धारयञ्छ्वेततां याति षडूर्मिरहितो नरः १८ हरेष्टम

यः ईश्वरस्तु यत्तु त्रिभिर्हीनं तुरीयं तत्पदं विदुरित्येवं लक्षणे ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञा
नवैराग्ययोश्चैव षण्णां भग इतीरणा तद्वति भगवच्छब्दशब्दिते यत्र परमानंदरूपे सर्वोपि कामः क्लेश
भूतोऽवसीयते समाप्यते तेन १७ अतः परं गुणाहेतुकाः शुद्धे सत्त्वात्मके श्वेततां शुद्धरूपतां १८ राम

ताः स्वरूपेणोपदिशति अणिमेति सार्द्धैः पंचभिः अणिमा महिमा लघिमा च मूर्तेर्देहस्येति स्वः सिद्धयः प्रा
प्तिर्नाम सिद्धिः सर्वप्राणिनामिन्द्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः श्रुतेषु पारलौकिके
षु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यसिद्धिः शक्तीनां मा
यातदंशभूतानां प्रेरणं तत्त्वेश्वरे मायायाः अन्येषु तदंशानां प्रेरणं ईशिता नाम सिद्धिः ४ विषयभोगेष्व

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ४
गुणेष्वसंगो वशिता यत्कामस्तदवस्यति एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः ५
अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शने मनोजवः कामरूपं परकायप्रवेशनं ६ स्वच्छंद
मृत्युर्देवानां सहक्रीडानुदर्शने यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः ७ श्रीराम

संगो वशिता नाम सिद्धिः औत्पत्तिकाः स्वाभाविक्यो निरतिशयाश्चेत्यर्थः ५ गुणहेतुकाः सिद्धीराह अनूर्मि
मत्त्वं क्षुत्पिपासादिराहित्यं दूरे श्रवणदर्शने चेति द्वे सिद्धी मनोवेगेन देहस्य गतिः कामितरूपप्रा
प्तिः परकायप्रवेशः ६ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शने प्राप्तिः संक
ल्पानुरूपप्राप्तिः अप्रतिहता यासमंताद्गतिर्यस्याः सा आज्ञा चेत्येता दश ७

त्वइसिद्धीश्चपंचाद त्रिकालज्ञत्वमिति अद्वंद्वंशीतोष्णादिभिरनभिभवः अग्न्यादीनांसंस्तंभने ८ ९ त
न्महारणाभिःसहविशेषतोनिरूपयतितयावत्समाप्ति भूतसूक्ष्मोपाधौमयि तन्मात्रेभूतसूक्ष्माकारे
मःतन्मात्रोपासकः ममसदीयमणिमामासो ज्ञानशोक १० महत्तत्त्वोपाधौमयि यथासंस्थेमहत्तत्त्वा
त्मकंभूतानांचेति आकाशादिभूतोपाधौमयिमनोधारयन्तत्तद्भूतमहिमानंप्राप्नोतीत्यर्थः ११ वाख्या

त्रिकालज्ञत्वमद्वंद्वंपरचित्ताद्यभिज्ञता अग्न्यर्काम्बुविषादीनांप्रतिष्टंभोपराजयः ८ एता
श्चोद्देशतःप्रोक्तायोगधारणसिद्धयः यथाधारणयायास्याद्यथावास्यान्निबोधमे ९ भूत
सूक्ष्मात्मनिमयितन्मात्रंधारयन्मनः अणिमानमवाप्नोतितन्मात्रोपासकोमम १० महत्
त्यात्मन्मयिपरेयथासंस्थंमनोदधत् महिमानमवाप्नोतिभूतानांचपृथक्पृथक् ११ प
रमाणुमयेचित्तंभूतानांमयिरंजयन् कालसूक्ष्मार्थतांयोगीलघिमानमवाप्नुयात् १२
धारयन्मय्यहंतत्त्वेमनोवैकारिकेखिले सर्वेन्द्रियाणामात्मत्वंप्राप्तिंप्राप्नोतितन्मनाः १३

दिभूतानांयेपरमाणवःतन्मयेतदुपाधौचित्तंमयिरंजयन्योगी कालसूक्ष्मार्थतांकालपरमाणु
पर्यंतरूपतामिति लघुत्वमिवरणे तदुक्तं सकालःपरमाणुर्वैयोभुंक्तेपरमाणुतामिति १२ वैकारि
कादहंकारोपाधौमयिअखिलप्रकाशेआत्मतत्त्वअधिष्ठातृत्वअग्रहेतुः मन्मनाःमयिमनोधारणप्रभावा
देवभवति नानातीवहेतरनुसंधेयइतिभावःएवमहंधारणानुभावेन मयोगबलमाश्रयइत्यादिवद्रष्टव्यं

सुकुमारं प्रतिकोमलं ४४ सविशेषणं ध्यानमुपसंहरति इंद्रियाणीति प्रकर्षेण नयेत् सर्वतः सर्वांग
युक्तो ४४ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्ता यदात्मकमित्यस्योत्तरं तया शनैर्विशेषणत्याग
नेन ध्यानमेव समाधिपर्यन्तमाह तदिति त्रिभिः एकत्रांगे अन्यान्यंगानि न चिंतयेत् एकत्रेति यदुक्तं
तदेवांगं दर्शयति सुस्मितमिति ४६ व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोढः

सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् ॥४४॥ इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः
बुध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥४५॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्
नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं ॥४६॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्
तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ॥४७॥ एवं समाहितमतिर्मामेवात्मानमात्मनि
विचष्टे मयि सर्वात्मन्ज्योतिर्ज्योतिषि संयुतं ॥४८॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः
संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥४९॥ इति श्रीभागवते एकादशे चतुर्दशोध्यायः

मयि शुद्धे ब्रह्मणि आरूढः सन् न किंचिन ध्यानध्येयविभागमपि न चिंतयेत् ४७ मामेवात्मनि प्रविष्टे
आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिर्ज्योतिषि संयुक्तमिवेत्यन्वयः ४८ एवंभूतसमाधियु
क्तं ध्यानस्य फलमाह ध्यानेनेति मनो युंजतः समादधतः द्रव्यज्ञानक्रियाभ्रमः अधिभूताधिदैवा
ध्यात्मरूपः द्रष्टृदृश्यदर्शनरूपो वा भ्रमः निर्वाणं शांतिं सम्यग्यास्यतीति ॥४९॥ इत्येकादशे भावार्थ
दीपिकायां चतुर्दशोध्यायः ॥१४॥

ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णुपदसंप्राप्तावंतरायतया मताः एवं मनो युंजतो यो
गिनोऽंतराविर्भवंत्यः सिद्धयोऽप्यंतरायप्राया एवातस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं सि
द्धीराह जितेंद्रियस्येति युक्तस्याऽस्थिरचित्तस्य सिद्धिदातिवितर्कौ कास्विन्ता किंनामाः कथं स्विन्न कीदृशी
वा धारणास्वकतीति प्रश्नोत्तरे वा शब्दः १ त्वमेवैतज्जानासि नान्य इत्याशयेनाह योगिनामिति २

श्रीभगवानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य यो
गिनः मयि धारयतश्चेत उपतिष्ठंति सिद्धयः ॥१॥ श्रीउद्ध
वउवाच ॥ कया धारणया कास्वित्कथं वा सिद्धिरच्युत ॥
कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥२॥ श्रीभ
गवानुवाच ॥ सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः
तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥३॥ श्रीकृष्ण ॥

धारणाश्च अष्टादशेत्यनुषंगः योगपारगैरिति त्रिकालज्ञत्वादित्वद्वंद्वसिद्धीरन्येऽपि जानंतीति
भावः अहमेव प्रधानं मुख्यः स्वभावत आश्रयो यासां ताः मत्सायुज्यप्राप्तेषु किंचिन्न्यूना भवंतीति
भावः गुणहेतवः सत्वोत्कर्षहेतुकाः ३ ॥

श्री॰
भा॰ ए॰
टी॰
१०

एवं ध्यानयोगमुक्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह हृत्पुंडरीकमिति सार्द्धेन अंतस्थं देहांतर्व
ति ऊर्द्ध्वनालमधोमुखं विकसितं च कदलीपुष्पसंकाशं यद्वर्तते तद्विपरीतं ध्यात्वेत्यर्थः ३७ न्यसेत्
चिंतयेत् सविशेषणं ध्यानमाह वह्निमध्य इति षड्भिः ध्यानमंगले ध्यानस्य शुभे विषये ३८ समं

हृत्पुंडरीकमंतस्थमूर्द्ध्वनालमधोमुखं ध्यात्वोर्द्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं ३७ कर्णि
कायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३८ समं प्र
शांतं सुमुखं दीर्घचारुचतुर्भुजं सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ३९ समानकर्ण
विन्यस्तस्फुरन्मकरकुंडलं हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ४० शंखचक्रग
दापद्मवनमालाविभूषितं नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं ४१ द्युमत्किरी
टकटककटिसूत्रांगदायुतं सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं ४२

प्रशांतरूपावयवे दी
र्घाश्चारवश्चत्वारो भुजा यस्मिन् तत्तथा चारु प्रतिरम्यं ३९ समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराका
रे कुंडले यस्मिन् तत्तथा श्रीवत्सश्रियो निकेतनं ४० वक्षसि दक्षिणवामतस्ताभ्यां युक्तमित्यर्थः ४१ द्यु
मद्भिः किरीटादिभिः आसमंताद्युतं अलंकृतं प्रसादेन शोभनं मुखमीक्षणं च यस्मिन् तत्तथा ४२ ॥

१०

तत्रध्यानांगत्वेनासनप्राणायामप्रकारमाह समइतिचतुर्भिः समेनात्युच्छ्रितेनातिनीचेनासनेनकेवलादौ समकायःसन्यथासुखमासीनइतिनोस्तिस्वस्तिकादिनियमइत्युक्तं नासिकाग्रनिरीक्षणंचचित्तस्थैर्या यात्रतल्लक्षणोवाहिहोष्टिःस्थिरचित्तःसमभ्यसेदितियोगशास्त्रोक्तेः ३३ विपर्ययेणरेचकपूरककुंभकक्रमे णापि यद्वावामनासापूरितंदक्षिणयात्यजेत्तयावापूरितंवामयेत्येवंविपर्ययेण यथोक्तयोगे इं याणिरेचयेद्वाप्रत्येजेत्तिमलयातनइति निर्जितेंद्रियइतिप्रत्याहारउक्तः ३४ प्राणायामोद्विविधः सगर्भो

श्रीभगवानुवाच॥ समआसनआसीनःसमकायोयथासुखं हस्तावुत्संगआधायस्वनासाग्र कृतेक्षणः ३३ प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः विपर्ययेणापिशनैरभ्यसेन्निर्जितें द्रियः ३४ हृद्यविच्छिन्नमोंकारंघंटानादंबिसोर्णवत् प्राणेनोदीर्यतत्राथपुनःसंवेशयेत्स्व रं ३५ एवंप्रणवसंयुक्तंप्राणमेवसमभ्यसेत् दशकृत्वस्त्रिषवणंमासादर्वाग्जितानिलः ३६

गर्भश्चेतितत्रश्रेष्ठत्वात्सगर्भमाह हृदीतिद्वाभ्यां मूलाधारादारभ्याविच्छिन्नंसंततंघंटानादतुल्य मोंकारंहृदिस्थंप्राणेनउदीर्यऊर्ध्वंद्वादशांतपर्यंतंनीत्वा कथंबिसोर्णवत् कमलनालतंतुवत् तत्र मात्रातीतंस्वरूपंचदशांबिंदुसंवेशयेत् अथपुनरित्यस्यतंचबिंदुशिरस्कंकुर्यादित्यर्थः यद्वामूलाधारा दारभ्यमूर्द्धांतपर्यंतंविशालंतंतुवत्सूक्ष्ममविच्छिन्नंसंततंहृदिमनसिप्राणेनोदीर्याभिव्यज्यअथपुनस्त मोंकारंघंटानादतुल्यंस्वरंउदात्तेनादीर्घ्रीकुर्यादिति ३५ मासादर्वाक्जितानिलोभवति ३६ सम

रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या च विना कथमाशयः शुध्येदिति २४ किंच भक्तिः स्वाश्रयं
शोधयतीति किं वक्तव्यं येतामङ्गद्वाग्गादिलक्षणो मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह वाग्गदेति २५
अपि च भक्त्यैवात्मशुद्धिर्नान्यतइति सदृष्टान्तमाह यथेति यथाग्निना ध्मातं तापितमेव हेम सुवर्णं अन्त
र्मलं जहाति न क्षालनादिभिः स्वं निजं रूपं च भजते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतामाप

कथं विना रोमहर्षं द्रवता चेतसा विना विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाशयः २४ वा
ग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च विलज्ज उद्गायति नृत्यते च मद्भक्तियु
क्तो भुवनं पुनाति २५ यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं आत्मा च क
र्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो मां २६ यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगा
थाश्रवणाभिधानैः तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तं २७ विषयान्ध्या
यतश्चित्तं विषयेषु विसज्जते मामनुस्मरतश्चित्तं मय्येव प्रविलीयते २८ रामाय नमः

यते २६ ननु ब्रह्मविदाप्नोति परं तमेव विदित्वाति मृत्युमेतीत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्यात्म
स्वरूपप्राप्तिरवगम्यते कुतो भक्तियोगेनेत्युच्यते तत्राह यथायथेति आत्मा चित्तं परिमृज्यते शोध्यते
मत्पुण्यकथानां श्रवणैरभिधानैश्च भक्तेरेवावान्तरव्यापारो ज्ञानं न पृथगित्यर्थः २७ किंच ताननु
ध्यायतश्चित्तस्य मदाकारपरिणामः स च मां भजतः स्वभावत एव भवति न च यत्नान्तरमपेक्ष्यत इति सदृष्टा

श्री० भा० ए० टी० ६९

यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति तस्मादिति मद्भावभाविते मद्भावेन भजनेनैव शोधिते २९ विशेषतो वात्स्यायनाद्युक्तकामशास्त्रैः परित्याज्यास्तत्रापि स्त्रीणामिति आत्मवान्धीरः सन् क्षेमे निर्भये देशे भवविविक्ते विजने ३० एतदुपपादयति न तथेति अस्य पुंसः यथा तत्संगिसंगतः क्लेशो भवेत् यथा वंधो योषित्संगतः तथान्यप्रसंगतो न भवेदिति ३१ मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति यथे

तस्मादसदभिध्यानं यथा स्वप्नमनोरथं हित्वा मयि समाधत्स्व मनो मद्भावभावितं २९ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः ३० न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३१ ॥उद्धव उवाच॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि ३२ राम

ति ध्यानांगप्रश्नः यादृशमिति ध्येयध्येयविशेषणप्रश्नः यदात्मकमिति यस्य तानि विशेषणानि तत्त्वप्रश्नः एतन्मे ध्यानं मे वक्तुमर्हसीति पाठः तत्रायमर्थः मुमुक्षुस्त्वां यथा ध्यायेत्तन्मे वक्तुमर्हसीति जिज्ञासोः कथनाय एतन्मे तत्त्वदासस्यैव पुरुषार्थः नन्वध्यानेन कृत्यमस्तीति तदुक्तं त्वयाप्युक्तं सर्वं गोधेत्यादि त्वं वक्तुमर्हसीति पाठस्तु गमः ३२ ॥

६९

चतुर्दशेपरंश्रेयोभक्तिरेवनचेतरत् इत्येतद्दर्शयंस्तेध्यानयोगंश्चसहसाधनैः एवंतावद्भगवताभक्त्यामोक्ष
उक्तः अन्येत्वन्यानिसाधनानिवदंति तत्रविशेषनिर्द्धारणायपृच्छतिश्रेयांसिश्रेयःसाधनानि किंविक
ल्पेनप्राधान्यं उताहोकिंवाएकस्यैवमुख्यता १ पक्षान्तराण्यनेकानिभवंति नअपेक्षितंतदपेक्षायस्मिन्सः
प्रवर्तकः अयमर्थः भवताभक्तियोगउक्तः अन्येचयानिश्रेयःसाधनानिवदंति तेषांकिंसाक्षात्फलसा
धनत्वेनप्राधान्यमेवसर्वेषांउताहोगौणत्वे प्राधान्येपिकिंविकल्पेनसर्वेषांतत्फलत्वे यद्वाकश्चिदेव

उद्धवउवाच॥ वदंतिकृष्णश्रेयांसिबहूनिब्रह्मवादिनः तेषांविकल्पप्राधान्यमुताहोएकमुख्यता
१ भवतोदाहृतःस्वामिन्भक्तियोगोनपेक्षितः निरस्यसर्वतःसंगंयेनत्वय्याविशेन्मनः २
श्रीभगवानुवाच॥ कालेननष्टाप्रलयेवाणीयंवेदसंज्ञिता मयादौब्रह्मणेप्रोक्ताधर्मोयस्यांम
दात्मकः ३ तेनप्रोक्ताचपुत्रायमनवेपूर्वजायसा ततोभृग्वादयोगृह्णन्सप्तब्रह्ममहर्षयः ४
तेभ्यःपितृभ्यस्तत्पुत्रादेवदानवगुह्यकाः मनुष्याःसिद्धगंधर्वाःसविद्याधरचारणाः ५ ॥

विशेषइति २ तत्रभक्तिरेवमहाफलत्वेनमुख्या अन्यानितुस्वस्वप्रकृत्यनुसारेणतुच्छस्थानीयस्वर्गादिफ
लतुहिभिःप्राणिभिःप्राधान्येनपरिकल्पितानितुच्छकफलानीतिविवक्षुःप्रकृत्यनुसारेणबहुधावेदा
र्थप्रतिपत्तिमाह कालेनेतिसप्तभिः मदात्मकः मय्येवात्माचित्तंयेनसः ३ भृग्वादयः भृगुश्चमरीचिरत्र्य
ङ्गिरसौपुलस्त्यःपुलहःक्रतुरित्येतेचसप्तब्रह्मणःप्रजापतयः तेचतेमहर्षयश्च ४ ५ रामायनमः

किंदेवाः क्रमेण देवदेवीगंधादिनादीत्येन किंदेवाः मनुष्या वेति संदेहास्पदेही पीतर मनुष्या एव किंकराः किंचिन्न
राइव सुरादिभिस्तारतोवा किंपुरुषाः किंचित्पुरुषा इव वानरादयः वासनाः बह्वः कृतः तमोसिभुवः जन्मस्था
नानियामांताः ६ भूतानि देवासुरमनुष्यादीनि चित्रावाचः वेदार्थव्याख्यानविषयाः ७ एवमित्युक्तो
पसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण अपरेपाषंडमतयः वेदनिरूढार्थमत
यः ८ तत्र हेतुर्मनोमायागुणमूलत्वान्मायामोहितधियः अनेकांतमनात्यंतिकं ९ तदेवाह धर्ममिति

किंदेवाः किंनरानागारक्षः किंपुरुषादयः बह्व्यस्तेषां प्रकृतयो रजःसत्वतमोभुवः ६ याभिर्भू
तानि भिद्यंते भूतानां मतयस्तथा यथाप्रकृति सर्वेषां चित्रावाचः स्रवंति हि ७ एवं प्रकृति
वैचित्र्याद्भिद्यंते मतयो नृणां पारंपर्येण केषांचित्पाषंडमतयोऽपरे ८ मन्मायामोहितधियः
पुरुषाः पुरुषर्षभ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ९ धर्ममेके यशश्चान्ये कामं
सत्यं दमं शमं अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान्

त्रिभार्द्धेन धर्मं कर्ममीमांसकाः तदुक्तं मोदनार्थो न प्रवर्तेत तत्र काम्यनिषिद्धयोः नित्यनैमित्तिके कुर्यात्प्र
त्यवायजिहासयेत्यादि यशः काव्यालंकारकृतः यथाहुः यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते
तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति कामं वात्स्यायनादयः सत्यं शमं दमं च योगशास्त्रकृतः अ
न्येऽर्थशास्त्रे वार्तादिनादंडनीतिकृतः वृषीसिद्ध ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति अतः मामापुनः पायापवद्वे
षः साधनमिति तेषां मतं तथैव त्यागभोजने च लोकाः पतिकाः १० यज्ञतपोदानं यज्ञो देवतानां पूजने

तेषांतुच्छफलत्वमाह आद्यंतवंतइति एषांलोकाः एतैःसाध्यानिफलानि तमोनिष्ठामोहावसानाः भोगका
लेप्यल्पतयादिभिः शुचार्पिताःव्याप्ताः १२ भक्तसुखमहत्वमाह मयीतियावत्समाप्ति हेसभ्यमयापरमानंद
रूपेणआत्मनास्वरूपत्वेनस्फुरता १३ किंच अन्येषांतुलोकादिपरिछिन्नंसुखंभक्तस्यतुपरिपूर्णमित्या
ह अकिंचनस्येति १४ परिपूर्णतामेवाह नपारमेष्ठ्यइति रसाधिपत्यंपातालादिस्वाम्यं अपुनर्भवंमोक्ष

आद्यंतवंतएवेषांलोकाःकर्मविनिर्मिताः दुःखोदर्कास्तमोनिष्ठाःक्षुद्रानंदाःशुचार्पिताः १२
मय्यर्पितात्मनःसभ्यनिरपेक्षस्यसर्वतः मयात्मनासुखंयत्तत्कुतःस्याद्विषयात्मनां १३ अकिं
चनस्यदांतस्यशांतस्यसमचेतसः मयासंतुष्टमनसःसर्वाःसुखमयादिशः १४ नपारमेष्ठ्यंन
महेंद्रधिष्ण्यंनसार्वभौमंनरसाधिपत्यं नयोगसिद्धीरपुनर्भवंवामय्यर्पितात्मेछतिमद्विनान्य
त् १५ नतथामेप्रियतमआत्मयोनिर्नशंकरः नचसंकर्षणोनश्रीर्नैवात्माचयथाभवान् १६
निरपेक्षंमुनिंशांतंनिर्वैरंसमदर्शनं अनुव्रजाम्यहंनित्यंपूयेयेत्यंघ्रिरेणुभिः १७ ॥

मयिमहित्वामांहित्वाअन्यन्नेछति अहमेवतस्यप्रेष्ठइत्यर्थः १५ ममापिसएवप्रेष्ठइत्याह नतथेतिद्वा
भ्यां आत्मयोनिर्ब्रह्मापुत्रोपिशंकरः मत्स्वरूपभूतोपिसंकर्षणःभ्रातापि श्रीर्भार्यापि आत्मामूर्तिर
पियथाभक्तइतिवक्तव्येइतिहर्षेणाह भवानिति १६ पूयेयमहंतर्गतानिब्रह्मांडानिपवित्रीकुर्यामि इ
तिभावेनेत्यर्थः १७ ॥

किंचमद्भक्तानांसुखंयत्तावदेवंभूतमितिवाक्येवक्तुंसमर्थः यतस्तत्स्वसंवेद्यंनिरूपमित्याह निष्किंचना
इति महांतःनिरहंमानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वादीना यथेष्टदेत्तमसंगवः एवंभूताः
ममसदीयाःयत्सुखंजुषंतिसेवंतेतत्सुखंतएवलभंतेविदुः नान्येकुतः नैरपेक्ष्येनानास्ति अपेक्षणीयंयेषां
तेनिरपेक्षाः तैरेवलभ्यनतुमोक्षादिपदैरपीत्यर्थः यद्वाएवंभूताःसंतोयेममसमामित्यर्थः जुषंतेप्रीणंति
तएवयत्तन्नैरपेक्ष्यंसुखंतद्विदुर्नान्यइत्यन्वयः १७ अपिचप्राक्तनानावडुत्तमभक्तकथायतःप्राकृतोपिभक्तः

निष्किंचनामय्यनुरक्तचेतसःशांतामहांतोखिलजीववत्सलाः कामैरनालब्धधियोजुषंतिय
त्तन्नैरपेक्ष्यंनविदुःसुखंमम १७ बाध्यमानोपिमद्भक्तोविषयैरजितेंद्रियः प्रायःप्रगल्भयाभ
क्त्याविषयैर्नाभिभूयते १८ यथाग्निःसुसमृद्धार्चिःकरोत्येधांसिभस्मसात् तथामद्विषयाभ
क्तिरुद्धवैनांसिकृत्स्नशः १९ नसाधयतिमांयोगोनसांख्यंधर्मउद्धव नस्वाध्यायस्तपस्त्यागो
यथाभक्तिर्ममोर्जिता २० भक्त्याहमेकयाग्राह्यःश्रद्धयात्माप्रियःसतां भक्तिःपुनातिमन्नि
ष्ठाश्वपाकानपिसंभवात् २१ धर्मःसत्यदयोपेतोविद्यावातपसान्विता मद्भक्त्यापेतमात्मानं

कृतार्थएवेत्याह बाध्यमानइतिद्वाभ्यां विषयैराकृष्यमाणोपिप्रगल्भयासमर्थया १८ पावकार्थमुज्ज्वा
लितोग्निर्यथाकाष्ठानिभस्मीकरोति तथारागादिनापिकथंचिन्मद्विषयासतीभक्तिःसमस्तपापा
नीति १९ भगवानपिस्वभक्तिमहिमाश्चर्येणसंबोधयति अहोउद्धवविस्मयंशृणुइति अतएवंभूतश्रेयो
नान्यदस्तीत्याह नसाधयतीतिद्वाभ्यांश्रद्धयायाभक्तिस्तयासंभवाज्जातिदोषादपीत्यर्थः २१ २२ भक्ति

श्री०
भा०ए०
टी०
६६

ननुचयःपरिभाव्यमानोपिमृषेति तेचेन्नपश्यति तर्हिपतेद्देवेनेत्याह देहोपीति दैववशोनगच्छन् स्वारंभकंकर्मयावदस्तितावत्पर्यंतंप्रतिसमीक्षतएवसासुःप्राणेंद्रियसहितः तर्हितस्मिन्कदाचिदासज्जेतापीत्याह तमिति स्वाप्नंस्वप्नतुल्यंअधिरूढःप्राप्तःसमाधिपर्यंतोयोगोयेन अतएवप्रतिबुद्धंज्ञातंपरमार्थवस्तुयेनसः तथाचश्रुतिः तस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्यइति

देहोपिदैववशगःखलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः तंसप्रपंचमधिरूढसमाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः ३७ मयैतदुक्तंवोविप्रागुह्यंयत्सांख्ययोगयोः जानीतमामंयज्ञंयुष्मद्धर्मविवक्षया ३८ अहंयोगस्यसांख्यस्यसत्यस्यर्तस्यतेजसः परायणंद्विजश्रेष्ठाःश्रियःकीर्तेर्दमस्यच ३९ मांभजंतिगुणाःसर्वेनिर्गुणंनिरपेक्षकं सुहृदंप्रियमात्मानंसाम्यासंगादयोगुणाः ४० इतिमेछिन्नसंदेहामुनयःसनकादयः सभाजयित्वापरयाभक्त्यागृणतसंस्तवैः ४१ तैरहंपूजितःसम्यक्संस्तुतःपरमर्षिभिः प्रत्येयायस्वकंधामपश्यतःपरमेष्ठिनः ४२ ॥इत्येकादशेत्रयोदशोध्यायः॥१३॥

३७ उक्तार्थेतेषांविश्वासार्थंस्वस्वरूपमाहमयेति सांख्यमात्मानात्मविवेकःयोगोऽष्टांगःतयोर्गुह्यंरहस्यंयत्तत्विस्पष्टःतेयुष्मद्धर्मविवक्षये त्यनेनधर्मोऽयमुपदिष्टइतिज्ञेयं ३८ अतएवयत्नेनहंसरूपेणाब्रह्मणोभ्यर्थितमाधवेत्यनुवादोभविष्य ति स्वतेश्चमेयमाणोधर्मः सत्यंचानुष्ठीयमानोधर्मःतेजःप्रभावःएतेषांपरमयनं ३९ किंचेति कथं भूताःअगुणाःगुणपरिणामरूपानभवंतिकिंतर्हिक्रियाःअन्यार्थः ४० मेमयाश्रहणानमांतुष्टुवुः ४१ प्रत्ये

अनुमानान्निदर्शयति ईक्षेतेति इदं जगत् विभ्रममीक्षेत तत्र हेतवः मनोविजृंभितत्वात् दृष्टत्वात् वि
नाशित्वाच्च स्वप्नवत् प्रति चैचलत्वाच्च अलातचक्रवत् ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह विज्ञा
नमिति निर्भ्रमं नित्यं तस्मात्त्रिधा योऽयं गुणपरिणामकृतो विकल्पो भेदः समारोपित ३४ तस्मान्नेत्याह दृष्ट्य
दृष्टिं प्रति निवर्त्य निजसुखानुभवो भवेत् तन्नेत्रव्यापारार्थं च निवृत्ततृष्णः तूष्णीं निरीहश्च भवेत् मनोवा
क्कायव्यापाररहित इत्यर्थः ननु देहवतः सर्वथा हि तद्दृष्टिप्रतिनिवर्तनायोगात् पुनः संसारः स्यादेवेत्याह

ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं विज्ञानमेकमुरुधेव वि
भाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ३४ दृष्टिं ततः प्रति निवर्त्य निवृत्ततृष्णस्तू
ष्णीं भवेन्निजसुखानुभवो निरीहः संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृ
तिरानिपातात् ३५ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं
दैवादुपेतमुत दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ३६ श्रीरामाय नमः

संदृश्यत इति क्वचिद्व्यवहारकाले यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत्त्यक्तं तस्मिन्
मोहाय न भवेदेव किंतु देहपातपर्यंतं स्मृतिरेव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ३५
एतदेवोपपादयति देहमिति आसनादुत्थितं उत्थाय तत्रैव स्थितं ततः क्वचिदपेतं निर्गतं पुनस्त
त्रैवोपेतं वा देहमपि नानुसंधत्ते कुतोऽयम् यतः येन देहेन स्वरूपमध्यगमत् ज्ञातवान् तं देहं य
तः कारणादिति वा परिकृतं परिहितं वासो गतं स्थितं वा यथा भवति तद्वत् ३६ रामाय नमः

श्री· भा·ए· टी· ६५

युक्तिभिस्तूक्तेनाएवयुक्तीराह यइति अर्थान्मूलान्देहादीन्समस्तकरणैश्चक्षुरादिभिर्भुंक्तेकथंभू
तान्अनुक्षणंधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः यश्चस्वप्नेहृदितानर्थानेवतत्सदृक्षान्वा
सनामयान्भुंक्ते यश्चसुषुप्तेतान्सर्वानुपसंहरति सएकः कुतः त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा
ननुजाग्रदवस्थायामेवेन्द्रियाणिपश्यंति स्वप्नेमनःसुषुप्तौतत्संस्कारशेषाबुद्धिःकथमात्मनस्तद्द्रष्टृत
मत आह इंद्रियेशः ननुइंद्रियेशाअपिविश्वतैजसप्राज्ञाभिन्नाः नकुतः स्मृत्यानुप्रतिसंधानेनसर्वावस्था

यो जागरे बहिरनुक्षणधर्मिणोर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् स्व
प्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ३२ ए
वं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः
संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिं ३३

स्वन्वयात्तयःस्वप्नमद्राक्षंयश्चसुप्सवान्स्वापादनंतरंनकिंचिदवेदिषंसएवएतर्हिजागर्मीति उपाधिभेदेनवि
सादिव्यवहारइतिभावः एतेनबाल्याद्यवस्थास्वपिप्रतिसंधानेनात्मैकत्वंद्रष्टव्यं ३२ ततःकिंअ
तआह एवमिति गुणतोयाएतामनसःअवस्थाःताःमदीयमायामयिकृताः नतत्त्वतःसंतीतिनि
श्चितआत्मस्वरूपोयेषांतेयूयंअखिलसंशयानामाधिराधीयतेतस्मिन्नित्याधिरहंकारःतंसंछिद्यद
हेंद्रियादिस्थितंमाभजततत्केनछित्वातदाह अनुमानैःसदुक्तिभिःसतांगुरूणामुपदेशैःस्वकीयैःश्रुतिभिःस्वज्ञानखड्गेन

६५

नेनु तर्हि कथमहं जागर्मीत्यादिप्रतीतिस्तत्राह यर्हीति यस्मात् मय्यप्रवृत्तेः सर्वगामनयेति संसृतिर्बुद्धिः
तया बंधोयमात्मनो गुणवृत्तिद इति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् ततश्च गुणानां च
तेषां गुणानां चेतसश्चान्योन्यत्यागो भवति कथं संसृत्या बंधः कथं च तं जह्यात् तदाह अहंकारेणाकृतं
बंधमात्मनः अर्थविपर्ययं आनंदाद्यावरणं अनर्थहेतुं विद्वान् जानन् सन्निर्विद्य दुःखमेतदिति त्वा
त्वा तुर्ये स्थितो भूत्वा संसारे बुद्धिः तस्मिन् चिंतां अभिमानेन तत्कृतां भोगचिंतां च त्यजेदिति २९ यावदे

यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां २८
अहंकारकृतं बंधमात्मनोर्थविपर्ययं विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् २९
यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ३०
असत्वादात्मनोन्येषां भावानां तत्कृता भिदा गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१

वं न त्यजेत् तावत्तस्य कर्मज्ञानादि सर्वं व्यर्थमित्याह यावदिति यद्यपि जागर्ति कर्मादिषु तथापि स्व
पत्स्वप्नमात्यस्वपन्निव भवति यतोज्ञः अप्रसम्यग्दर्शी अज्ञजागरत्वस्य स्वप्नत्वे दृष्टांतः स्वप्न इति ३० न
नु कथं वेदप्रमितवर्णाश्रमकर्मादिभिर्नानाधीर्निवर्तेत तत्राह असत्वादिति भावानां देहादीनां तत्
कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि वास्यात्मनो मृषा अविद्याव
द्विषयो वेद इति भावः ३१ ॥ रामाय नमः ॥

मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां ऐकान्तिकीं गतिं परां काष्ठां तदेवाह गुणेष्विति विषयेषु स्वभावतो रागादि-
वशाच्चेतः प्रविशति ते चानुभूता विषया वासनारूपेण चेतसि प्रविशन्ति अतितितीर्षोः विषयानतिक्र-
मितुमिच्छोः एवमिति महान्देवोपि स्वयंभूरपि भूतानां स्रष्टापि ध्यायमानः विचारयन्नपि प्रश्नस्य बीजं
दज्ञानाद्यं नत प्रश्नः तत्त्वाविदन् यतः कर्मविक्षिप्तधीः प्रश्नस्य पारमुत्तरमभिप्रायो वा तस्य तितीर्षया।

श्रीभगवानुवाच॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः पप्रच्छुः पितरं सूक्ष्मां योगस्यै-
कान्तिकीं गतिं १६ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो कथमन्योन्यसंत्यागो मुमुक्षोरति-
तितीर्षतः॥१७॥ **श्रीभगवानुवाच॥** एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ध्यायमानः प्रश्नबी-
जं नाभ्यपद्यत कर्मधीः १८ स मामचिन्तयद्देवः प्रश्नपारतितीर्षया तस्याहं हंसरूपेण सका-
शमगमं तदा १९ दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवंदनं ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भ-
वानिति २० इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा यदवोचमहं तेभ्यस्तदुद्धव निबोध मे २१

जिज्ञासया हंसरूपेणेति यथा हंसो नीरक्षीरे च पृथक्करणे शक्तः एवमहं गुणांश्चेतश्चेति द्योतयितुं हं-
सरूपेणागतोस्मीति इत्यहं मुनिभिः पृष्ट इति पृष्टवाक्यं यदवोचमिति च पृथगेव यतोस्मच्छ्रेष्ठः।
निर्दोषः तेभ्यो यदवोचं तन्मे वचनेन निबोध २१॥

इदमेवंभोग्यमितिसविकल्पःसंकल्पःस्यात् ततश्चअहोरूपमहोभावइतिगुणध्यानात्दुर्वहःकामः स्यात् ततोविषयान्भोक्तुंकर्माणिकरोति एवंचेत्कस्यापिदुःखनिवृत्तिःस्यादित्याशंक्याह यदि ति यद्यपिरजस्तमोभ्यांविक्षिप्तधीर्मूढधीश्चतथापिविद्वान्विवेकीपुनर्मनोनिरुंधन्नसज्जते विषय दोषदृष्ट्यापिमनोनिरोधाशक्तौमामेवदुःखंततोनिरोधोपायमाह अप्रमत्तइति अनिर्विण्णःअनलसः

रजोयुक्तस्यमनसःसंकल्पःसविकल्पकः ततःकामोगुणध्यानाद्दुःसहःस्याद्धिदुर्मतेः १०
करोतिकामवशगःकर्माण्यविजितेंद्रियः दुःखोदर्काणिसंपश्यन्रजोवेगविमोहितः ११
रजस्तमोभ्यांयदपिविद्वान्विक्षिप्तधीःपुनः अतंद्रितोमनोयुंजन्दोषदृष्टिर्नसज्जते १२
अप्रमत्तोनुयुंजीतमनोमय्यर्पयञ्छनैः अनिर्विण्णोयथाकालंजितश्वासोजितासनः १३
एतावान्योगआदिष्टोमच्छिष्यैःसनकादिभिः सर्वतोमनआकृष्यमय्यद्धावेश्यतेयथा १४
श्रीउद्धवउवाच॥ यदात्वंसनकादिभ्योयेनरूपेणकेशव योगमादिष्टवानेतद्रूपमिच्छामिवे
दितुम् १५ ॐनमोनारायणाय ॥

यथाकालंत्रिषवणमपिपरमानंदरूपेमय्यर्पयन्समादध्यात् १३ विषयैःसंग्रथितस्यमनसस्तद्वि योगेनेश्वरनिष्ठत्वमसंभावितंमन्यमानंप्रतितन्निरूपणायेतिहासमुपोद्घातयति एतावानिति यथावन्मय्यावेश्यतइत्येतावानित्यर्थः १४ मच्छिष्यैरित्युक्तेतेषामपितज्ज्ञापयसामनेनरूपेणानि रूपणासंभवात्पृच्छति यदेति तंकालंतदेतद्रूपंचवेदितुमिच्छामितत्कथयेति १५ रामायनमः

देहादिविविक्तात्मज्ञानेसतितन्निष्ठस्यरागाद्यसंभवात्स्वयमेवविषयचेतसोःविश्लेषोभवतीतिवक्तुंप्र
श्नंविडंबनमिषेणैवतावदात्मानात्मविवेकमाह वस्तुनइतित्रिभिः किमात्मनोयंप्रश्नःतदुपाधेर्भूतसं
घस्यवा यद्यात्मनःतर्हितस्यवस्तुनःपरमार्थरूपस्यअनानात्वेसतिहेविप्राःवःयुष्माभिःकृतःईदृशः
वर्णरूपनिर्द्धारणरूपः कथंघटेत वक्तुरुत्तरदातुर्वामेममकआश्रयःअविशेषआत्मनिकंजातिगुणादि
विशेषमाश्रित्योत्तरंवदामीत्यर्थः २२ भूतसंघविषयेत्वपिअयंवःप्रश्नःवाचारंभःवाङ्मात्रेणारब्धः

वस्तुनोयद्यनानात्वमात्मनःप्रश्नईदृशः कथंघटेतवोविप्रावक्तुर्वामेकआश्रयः २२ पं
चात्मकेषुभूतेषुसमानेषुचवस्तुतः कोभवानितिवाप्रश्नोसमानेषुचवस्तुतः २३ मन
सावचसादृष्ट्यागृह्यतेन्यैरपीन्द्रियैः अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा २४ ॥ ॥

यतोनर्थकः कुतः भूतेषुदेवमनुष्यादिदेहेषुपंचभूतात्मकेषु अतःसमानेषुअभिन्नेषु पुनश्चवस्तु
तः परमकारणात्मनाअभिन्नेषुवाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः तत्र
पंचात्मकत्वंप्रत्यक्षादिसिद्धमेवेति २३ परमकारणाभेदमेवोपपादयति मनसेति मनआदि
भिर्यद्गृह्यते तन्मदहमेवेत्यर्थः अंजसातत्त्वविचारेणापतेनैवसर्वात्मकोहमित्यंजसासाक्षात्तरणुकं

एवंप्रश्नावेदनमिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोपि दुष्परिहरं यत्पृष्टं तत्रोत्तरमाह गुणेष्वि
त्यादिना यावदध्यायसमाप्ति अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चेत
बुद्ध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत् ततस्तद्वियोगो न घटेत न स्वतत्स्वरूपमदेहस्यैव चित्ताध्या
सेन तत्तत्स्वभावतया विषयैः संग्रथितं अतः स्वस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधाने
न सर्वतो निर्विषयमगर्वं तत्भजतो भवत्येव परिपूर्णस्वरूपावस्थानमिति हे प्रजाः पुत्राः सत्यं गुणेषु चेत
आविशति गुणाश्च चेतसि एवं गुणाश्चिता उभयग्रथितं मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देहस्त्वयमस्य

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः जीवस्य देह उभयं गुणाश्चेतो मदात्मनः २५ गु
णेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६ जा
ग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः २७ ॥

उपाधिः न तत्स्वरूपं २५ तस्मादभीक्ष्णं पुनः पुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं ते च गु
णा वासनारूपेण चित्ते प्रकर्षेण भवन्तीति तथा ते गुणाश्च एवं यदुभयं तन्मद्रूपः सन् त्यजेत् २६ नन
जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वं तद्रूपता तत्राह जाग्रत् जागरः स्वप्नः सुषुप्तं चेति बुद्धेर्वृत्तयस्ता
श्च न स्वाभाविकाः किं तु सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सं
ततमिति वक्ष्यमाणक्रमेण गुणतः एव जीवस्तु विलक्षणः तदवस्थारहितः एव विनिश्चितः कुतः तासां

नतुगुणवृत्तीनांपरस्परोपमर्दनरूपत्वात्कथंसत्ववृद्ध्यैवेतरवृत्तयोनियमेनहंतव्याः तत्राह सत्वादिति
मद्भक्तिलक्षणइति योधर्मःसभक्तिरूपएववासत्वमेवकथंवर्द्धततत्राह सात्विकानांपदार्थानामुपास
यासेवयासत्वंवृद्धंभवतीत्यर्थः २ सचधर्मोरजस्तमसीहन्यातऊतःनविद्यतेउत्तमोयस्मात्सःसर्वोत्तमः
यतःसत्ववृद्धिःसत्वस्यवृद्धिर्यस्मात्कारणात्सःअतएवतत्कार्योधर्मप्रतिबंधोपिनास्तीत्याह तयोरिति

तत्वाद्धर्मोभवेद्वृद्धात्पुंसोमद्भक्तिलक्षणः सात्विकोपासयासत्वंततोधर्मःप्रवर्तते २
धर्मोरजस्तमोहन्यात्सत्ववृद्धिरनुत्तमः आशुनश्यतितन्मूलोह्यधर्मउभयेहते ३ आ
गमोपःप्रजादेशःकालःकर्मचजन्मच ध्यानंमंत्रोथसंस्कारोदशैतेगुणहेतवः ४ त
त्तत्सात्विकमेवैषांयद्यद्वृद्धाःप्रचक्षते निंदंतितामसंतत्तद्राजसंतदुपेक्षितं ५ श्रीराम

भयस्मिन्हते तन्मूलःतेरजस्तमसीरागद्वेषादिनाप्रमादालस्यादिनाचमूलंयस्यसः ३ सात्वि
कोपासनयासत्ववर्द्धतइत्युक्तं तानेवसत्ववृद्धिहेतून्दर्शयितुंसामान्यतोगुणत्रयवृद्धिहेतूनाह
आगमःशास्त्रंअपःआपःक्वचिदागमोर्थइतिपाठःएषुसात्विकादिनिर्णयमाह ४ एषामेवमध्ये
प्रचक्षतेप्रशंसंति यद्यन्निंदंतितत्तत् यदुपेक्षितंनप्रशस्तंनचनिंदितंतद्राजसम् ५ राम

सात्त्विकान्येवेति निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाखण्डशास्त्राणि तीर्थ्यमेव न गन्धोदकसुराद्याः प्रजाज
नः निवृत्तानेव जनान् न प्रवृत्तान् दुराचारान् विविक्तदेशं न रथ्याद्यूतदेशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्र
दोषनिशीथादि न कर्म च नित्यं न काम्याभिचारादीन् जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तं दुष्टदीक्षा
रूपं ध्यानं श्रीविष्णोः न कामिनीविद्विषां मन्त्रं प्रणवादिकं न काम्यं दुष्टं संस्कारं आत्मनः शोधकं न तु केव
लं देहपुष्टादीनां ननु स्नानेन वा कस्यचिद्वाक्यश्रवणादेवात्मज्ञानं किं तत्र सत्त्ववृद्ध्या धर्मेण वा अत आह यावत्स्मृतिः आ
त्मापरोक्ष्यं यावच्च देहद्वयतत्कारणाभूतगुणापोहः तावत्ययं तेन ज्ञानं भवतीत्यर्थः ६ ननु गुणव्यतिकरा

सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनं ६ वेणुसंघर्ष
जो वह्निर्दग्ध्वा शाम्यति तद्वनं एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ॥ ७ ॥ उद्धव उवाच ॥ वि
दन्ति मर्त्याः प्रायेण विषयान्पदमापदां तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ॥ ८ ॥ श्रीभगवा
नुवाच ॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि उत्सर्पति रजो घोरं ततो वैकारिकं मनः ९ ॥

जातो देहः कथं स्वाश्रयभूतान्गुणान्स्वतएवोत्पन्नया विद्ययापोह्य स्वयमप्युपरमेदित्याह वेणुसंघ
र्षजो जातो मंथ्ये यथा स्वत एवोत्पन्नाभिर्ज्वालाभिस्तद्वनं सर्वं दग्ध्वा स्वयं शाम्यति एवं देहोपि तज्जः तस्माद्विव
क्रियाव्यापारो यस्य सः ७ ननु नियतेन्द्रियतया सात्त्विकसेवायां प्रियतास्ति पुरुषार्थः तथापि राजसादी
न्विषयान् दुःखमिति जानन्तोपि कथं सेवन्त इति पृच्छति विदन्तीति पदं स्थानं श्वानो यथा भर्त्सिता नाद्या
पि खरा यथा पद्माहता अस्मानाश्रपि खरीमनुधावतः अजा यथा निर्लज्जाः देवमानीता अपि तद्वन्मिथ्याभि
निवेशेन भुञ्जत इति ८ सहेतुकमाह अहमिति त्रिभिः प्रमत्तस्य विवेकशून्यस्य देहादावहमिति मिथ्याबुद्धिर्हृ

९ दि यथावदुत्सर्प्पति ततो हंकृते सत्त्ववैकारिकं सत्त्वप्रधानमपि
मनः शान्तिघोरं दुःखात्मकं रजः उपसर्प्पति मनो व्याप्नोतीत्यर्थः ९

तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदंजगत्ततःपृथगिति सदृष्टांतमाह यस्मिन्निति तंतुविताने
संस्थास्थितिर्यस्य सः पटो यथा तथा यस्मिन्निदं विश्वमोतं दीर्घतंतुषु पटइव प्रोतं तिर्यक्तंतुष्विव एवंभूते
समष्टिव्यष्ट्यात्मकविश्वमविद्ययान्मन्यध्यस्तं तद्रूपं जीवस्य कर्तृत्वादिसंसारहेतुः अतस्तद्विवेकस्त्वा
नेन कर्मादिसर्वं त्याज्यमित्युक्तमित्याशयेनाह यएष इति साहैस्त्रिभिः पुराणः अनादिः कर्मात्मकः प्रवृत्ति
स्वभावः पुष्पफले भोगापवर्गौ कर्मतत्फले वा प्रसूते जनयति २१ द्व्येतद्रूपकं प्रपंचयति द्वे इति द्वे पु

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः य एष संसारतरुः पुराणः कर्मात्म
कः पुष्पफले प्रसूते २१ द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः दशैक
शाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः २२ ॐ नमो नारायणाय ॥ याम

ण्यपापे अस्य बीजे स च शतमूलः शतं अपरिमिताः वासनाः मूलानि यस्य त्रयो गुणाः नालानि प्रकांडाः
यस्य पंचभूतानि स्कंधा यस्य पंचरसाः शब्दादिविषयास्तेषां प्रसूतिर्यस्मात् दश च एका च शाखा इं
द्रियाणि यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं यस्मिन् त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो
यस्य द्वे सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तन्निर्भिद्य गतस्य संसाराभावात्

तत्फलभोक्तृत्वाद् गृध्रा इति गृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्य वृक्षस्यैकं फलं दुःखमदन्ति परिणा मतः स्वर्गादेरपि दुःखरूपत्वात् हंसा विवेकिनः अरण्यवासाः संन्यासिन एकं फलं सुखमदन्ति ॥ एकं परमात्मानं मायामयमेव बहुरूपं इज्यैः पूज्यैर्गुरुभिः कृत्वा यो वेद तत्त्वार्थं वेद ॥२३॥ तदेवं ज्ञात्वा कृतकृत्यः सर्वं साधनं त्यजेदित्याह एवमिति एकान्तभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण स्वतन्त्रतावाद्ययो जीवोपाधिं त्रिगुणात्मकं लिङ्गशरीरं विवृश्च्य छित्त्वा परमात्मानं च संपद्य प्राप्य अथ अस्त्रं साधनं त्यजेति ॥२४॥

अदन्ति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः । हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदम् ॥२३॥ एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः । विवृश्च्य जीवाशयमप्रमत्तः सम्पद्य चात्मानमथ त्यजास्त्रम् ॥२४॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे द्वादशोऽध्यायः ॥१२॥ श्रीभगवानुवाच ॥ सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः । सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि ॥१॥

इति श्रीभावार्थदीपिकायामेकादशस्कंधे द्वादशोऽध्यायः ॥१२॥ त्रयोदशेऽथ सत्त्वस्य वृद्ध्या विद्योदयक्रमात् । हंसेतिहासतश्चित्तगुणविश्लेषवर्णनं ॥ विद्याकुठारेण जीवाशयं छित्त्वा साधनं त्यजेदित्युक्तं तत्र तत्र तमआदिगुणत्रयहेतिप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह सत्त्वमिति त्रिभिः तत्र यदि नेत्रादिवदात्मधर्मा गुणाः स्युः तर्हि तत्स्वरूपत्वात्तेषां निवृत्तिर्न स्यात् न त्वेतदस्तीत्याह बुद्धेः प्रकृतेरेते गुणाः न त्वात्मन इति अतः सत्त्वेन सत्त्ववृत्त्याऽन्यतमौ हन्यात् रजस्तमोहन्यौ जयेदित्यर्थः सत्त्वं च सत्त्वेन दयादिवृत्तिरूपेण प्रशमात्मकेन सत्त्वेनैव हन्यात् ॥१॥

उक्तं सएवपरतत्त्वं श्रुतिभिः अयंभावः ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मनाभाति तत्प्रपंचाध्यासाच्च जीवानामनाद्यविद्ययाकर्तृत्वादिनानाविधप्रतिभासाधिकारः तदानींसत्वशुद्ध्यर्थंकर्माणिउ विस्तृतं सत्वचशुद्धेपुनःकर्मजन्यपरिहारायभक्तिविदलपकंकर्मोदरंपरित्यज्यहृढविश्वासे नभजेत्युक्तं जातायांतुविद्यायांनकिंचित्कर्तव्यमस्तीति तत्रतावदीश्वरादृष्टागोदोऽस्यद्वारा जीवसंसृतिकारणभूतप्रपंचात्मकमाह सएषइतित्रिभिः सएषःपरोदेवःजीवयतीतिजीवःपर मेश्वरः अपरोक्षत्वेदंतःविवरेषुआधारादिचक्रेषुप्रसूतिरभिव्यक्तिर्यस्यसः नामेवा

श्रीभगवानुवाच॥ सएषजीवोविवरप्रसूतिःप्राणेनघोषेणगुहांप्रविष्टः मनोमयंसू क्ष्ममुपेत्यरूपंमात्रास्वरोवर्णइतिस्थविष्ठः २

भिव्यक्तिमाह घोषेणेति घोषेणपराख्ये नादेवतापायेनसहगुहांआधारचक्रंप्रविष्टःसन्मनोमयंसूक्ष्मंरूपंपश्यंत्याख्यंमध्यमाख्यं चमणिपूरकचक्रेविशुद्धचक्रेचउपेत्यप्राप्यवक्त्रेमात्राह्रस्वादिःस्वरउदात्तादिःवर्णःअकारादि रित्येवंवैखर्याख्यःस्थविष्ठःअतिस्थूलोनानावेदशाखात्मकोभवति तथाचश्रुतिः चत्वारिवा क्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंगयंति तुरीयंवाचो मनुष्यावदंतीति श्रीभगवत्श्लोकश्च यासामिन्द्रावरुणासदनाडचरंत्रीणिषष्टिवर्णानंतःप्रक टकरणैः प्राणसंगात्प्रसूतेनांपश्यंतीप्रथममुदितामध्यमांबुद्धिसंस्थांवाचंवक्त्रेकरणविशदां

श्री॰
भा॰ ए॰
टी॰
८८

एवंव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः यथेति यथाग्निः खेऊष्माव्यक्तोग्निरूपः।
दारुण्यधिमथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः प्र
कृशेजातो हविषा समिध्यते तथैवेयं वाणी ममाभिव्यक्तिः १७ उक्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रिय
वृत्तिष्वतिदिशति एवं गदिः गदनं भाषणं ममैव व्यक्तिरित्युपसंहारः कर्म हस्तयोर्वृत्तिः गतिः पादयोः।
विसर्गः पायूपस्थयोः इति कर्मेंद्रियाणां घ्राणः घ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रु।
तिः श्रवणमिति ज्ञानेंद्रियाणां संकल्पो मनसः विज्ञानं बुद्धिचित्तयोः अभिमानोहंकारस्य सूत्रं प्रधा

यथानलः खेनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः अणुः प्रजातो हविषा समिध्य
ते तथैव मे व्यक्तिरियं हि वाणी १७ एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः
श्रुतिश्च संकल्पविज्ञानमथाभिमानः सूत्रं रजः सत्वतमोविकारः १८ अयं हि जीवस्त्रि
वृदब्जयोनिरव्यक्त एको वयसा स आद्यः विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिप

नस्य सत्वरजस्तमसां विकारोधिदैवादिस्त्रिविधः प्रपंचः ममैव व्यक्तिरिति सर्वेणैवान्वयः १८ तस्मादी
श्वराभिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नोस्तीत्याह अयमिति अयं जीव ईश्वरः आदावव्यक्तरूपकार।
व वयसा कालेन विश्लिष्टा विभक्ता वागादींद्रियरूपाः शक्तयो यस्य यद्वा विशेषेणाश्लिष्टा आलि
गिता मायाशक्तिर्येन स बहुप्रकार इवाभाति यतः स एव आद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनि।
र्लोकपद्मस्य कारणभूतः एक एव बहुधा भाने दृष्टांतः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति १९

६०

श्री॰
भा॰ए॰
टी॰
५५

एवं तावद्बद्धमुक्तयोः स्वसंवेद्यमेव वैलक्षण्यमुक्तं उदासीनैः केवलं ज्ञायेत लक्षणैरित्याह मोहनरत यावत्परैरपि
सज्ञेयं वैलक्षण्यमाह यस्मादिति त्रिभिः हिंस्रैर्दुर्जनैरन्यैर्वा प्राणिभिः यस्मात् देहः पीड्यते यदृच्छ
या येन केनापि क्वचित् किंचिदर्च्यते वा स बुधस्तत्र न व्यतिक्रियते नास्ति विक्रिय इत्यर्थः तदुक्तं
याज्ञवल्क्येन यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति अक्रुद्धोपरितुष्टश्च समस्तस्य च तस्य चेति २५
किंच साध्वसाधु वा कुर्वतो वदतो वा जनान् न स्तुवीत न च निंदेत यो लौकिकव्यवहारे विमुखः

यस्मात्मा हिंस्यते हिंस्रैर्येन किंचित् यदृच्छया अर्च्यते वा क्वचित्तत्र न व्यतिक्रिय
ते बुधः २५ न स्तुवीत न निंदेत कुर्वतः साध्वसाधु वा वदतो गुणदोषाभ्यां वर्जि
तः समदृङ्मुनिः २६ न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा आत्मारामो
नया वृत्त्या विचरेज्जडवन्मुनिः २७ शब्दब्रह्मणि निष्णातो न निष्णायात्परे य
दि श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः २८ ॥ ॐ नमो भगवते ॥

समदृक् इत्यर्थः २६ अपि च न कुर्यादिति यो दैहिकेपि कर्मण्युदासीनः स मुक्तः इतरो बद्ध इत्यर्थः प
तान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञातव्यानि २७ यस्तु केवले शब्दब्रह्मण्येवाभिज्ञः पांडित्यमात्रस्ना
तो न तु कैः साधनैस्तदर्थनिष्ठो भवेत्तं निंदति शब्दब्रह्मणि निष्णातः अर्थतः पारंगतोपि परे ब्रह्मणि
निष्णातः ध्यानादिभिर्योगं कुर्यात्तस्य शास्त्रश्रमः श्रमैकफलः न तु पुरुषार्थपर्यवसायी अर्थे चेत्

वैलक्षण्यांतरं वदन् किं भुंजीतेत्यादिप्रश्नोत्तरमाह एवमिति त्रिभिः अन्यगतमेव कर्म मां बध्नातीत्येवं
विरक्तो विद्वान् तथाविद्वानिव शयनादिषु न बध्यते कुतः तत्र तत्र विषयेषु गुणानिंद्रियाणि आदयन्
भोजयन् तत्साक्षित्वेन वर्तमानः न तु स्वयमदन् ११ एतदेव कुतः तत्राह प्रकृतिस्थोपीति सार्द्धेन य
था खं सर्वत्र स्थितमपि न सज्जते यथा सविता जले प्रतिबिंबितोपि यथानिलः सर्वत्र संचरन्नपि तद्व

एवं विरक्तः शयनआसनाटनमज्जने दर्शनस्पर्शनघ्राणभो
जनश्रवणादिषु न तथा बध्यते विद्वांस्तत्र तत्रादयन् गु
णान् ११ प्रकृतिस्थोप्यसंसक्तो यथा खं सविता निलः वै
शारद्येक्षयासंगशितया छिन्नसंशयः १२ प्रतिबुद्ध इव
स्वप्नान्नानात्वाद्विनिवर्तते यस्य स्युर्वीतसंकल्पाः प्रा
णेंद्रियमनोधियाम् वृत्तयः स विनिर्मुक्तो देहस्थोपि हि
तद्गुणैः १४ श्रीकृष्णायनमः ॥

तयासंगेन वैराग्येणाशितया तीक्ष्णया छिन्नाः संशया असंभावनादयो यस्य सः नानात्वात् देहा
दिप्रपंचात् १३ कथं विदेहादित्यस्योत्तरत्वेन वैलक्षण्यांतरमाह यस्य स्युरिति तद्गुणैः देहगु
णैः संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरन्मुक्त इत्यर्थः १४ ॥

श्री॰
भा॰ए॰
टी॰
५९

एवंताअबलाःकेवलंमत्कामाःअस्वरूपविदःस्वरूपंतत्त्वनजानंतीति तथापिमत्संगात् जारंब्रह्मज्ञानाद्ब
हिर्वेद्यमपिब्रह्मस्वरूपमेवमांपरमंप्रापुरित्यर्थः १३ यस्मादेवंभूतोमत्संगजनप्रभावः तस्मात्त्वंचो
दनांश्रुतिंप्रतिचोदनांस्मृतिंच यद्वाविधिंचनिषेधंचउत्सृज्य १४ मांशरणंयाहिमयैवाकुतोभ
यःस्याःभवः १५ एवंतावन्मर्यादेनप्रवर्तितः स्वधर्मक्षितिपादिना कर्मकर्तव्यमित्युक्ते उद्धवो

मत्कामारमणंजारमस्वरूपविदोबलाः ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः १३
तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां प्रवृत्तंचनिवृत्तंचश्रोतव्यंश्रुतमेवच १४
मामेकमेवशरणमात्मानंसर्वदेहिनां याहिसर्वात्मभावेनमयास्याःह्यकुतोभयः
१५॥उद्धवउवाच॥संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ननिवर्ततआत्मस्थोयेन
भ्राम्यतिमेमनः १६ रामायनमः॥

तत्सर्वंत्यक्त्वामामेकंशरणंयाहीत्युच्यतेतत्रकिमात्मनःकर्तृत्वाद्यस्तिनास्तिवेत्यात्मस्थःआत्मविष
यसंशयोननिवर्तते यद्वाकर्मकार्यमस्त्यन्यद्वेत्यात्मस्थःहृदिस्थःसंशयोननिवर्ततइति[illegible]
ति संशयइति येनसंशयेन १६ कृपायतनमानमः

५९

गोपीनांभावंप्रपंचयति रामेणेतिचतुर्भिः श्वाफल्किनाअक्रूरेण मयिप्रणीतेसति मेमत्तोन्यंसु-
खायनददृशुः अतःवियोगेनतीव्रोदुःसहआधिर्यासांताः अत्रहेतुः मयिविगाढेनअतिदृढेनभावे-
नप्रेम्णाअनुरक्तानिसंसक्तानिचित्तानियासांताः १० तीव्राधित्वंव्यनक्तितास्ताइति मयासहयाःप-
वदपारार्द्धयः क्षणार्द्धवन्नीतास्ताएवपुनःमयाहीनानांतासांकल्पसमाबभूवुः कथंभूताःतास्ताः

रामेणसार्द्धंमथुरांप्रणीतेश्वाफल्किनामय्यनुरक्तचित्ताः विगाढभावेननमेवियोग-
तीव्राधयोन्यंददृशुःसुखाय १० तास्ताःक्षपाःप्रेष्ठतमेननीतामयैववृंदावनगोचरे-
ण क्षणार्द्धवत्ताःपुनरंगतासांहीनामयाकल्पसमाबभूवुः ११ तानाविदन्मय्यनु-
षंगबद्धधियःस्वमात्मानमदस्तथेदं यथासमाधौमुनयोब्धितोयेनद्यःप्रविष्टाइवना-
मरूपे १२

वाचामगोचराइत्यर्थः ११ किंचैवंतीव्राधयस्ताः मोहमिषेणसमाधिंप्राप्ताइत्याह तानाइति म-
यिअनुषंगेणआसक्त्याबद्धाधियोयासांताः स्वमात्मानंस्वदेहमहंरूपं इदंसन्निहितंचनाविदन्व
यद्वास्वपौत्रपुत्रादिममतास्पदं आत्मानंअहंकारास्पदं अदःपरंलोकंइदंइमंलोकंचनाविदन्नि-
तियथामुनयःसमाधौनामरूपेनविदुःनद्यश्चकिंच अब्धितोयेनद्यइवमपिप्रविष्टाइत्यन्वयः १२

श्री°
दं° ३
१३

तस्यागमनं विशिनष्टि हृदयेन पश्यामिति ॥ मृदंगोत्यादिजघ्निरे आहताः वादिता इत्यर्थः वाद्यमुख्याग
णिकोत्तमाः ॥ ४३ ॥ उपसृष्टप्रपाचम्य प्रवयसो वृद्धाः ॥ ४४ ॥ भवानितामिति भवस्योपसर्जनत्वस्तीकर्मो°
चित मुकुंनमस्य इति ॥ कक्मिणपालदेवहृष्टोऽयं मंत्रः स्वसंतानयुतानां गणेशादिसहितानां ॥ ४७ ॥ आत्मा

पश्यांविनिर्ययौ इष्टुं भवान्याः पादपल्लवं ॥ साचानुध्यायती सम्यग्मुकुंदचरणांबुजं ॥ ४८ ॥ यत
वाग्यातृभिः सार्धं सखीभिः परिवारिताः ॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥ ४९ ॥ मृदंग
शंखपणवास्तूर्यभेर्यश्च जघ्निरे ॥ नानोपहारबलिभिर्वारमुख्याः सहस्रशः ॥ ५३ ॥ स्रग्गंधव
स्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ॥ गायंत्यश्च स्तुवंतश्च गायका वाद्यवादकाः ॥ परिवार्य वधूं
जग्मुः सूतमागधवंदिनः ॥ आसाद्य देव्याः सदनं धौतपादकरांबुजा ॥ ५५ ॥ उपस्पृश्य शुचिः
शांता प्रविवेशांविकांतिकं ॥ तां वै प्रवयसो बाला विधिज्ञा विप्रयोषितः ॥ ५६ ॥ भवानी वंद
याचक्रुर्भवपत्नीं भवान्वितां ॥ नमस्ये त्वांबिकेभीक्ष्णं स्वसंतानयुतां शिवां ॥ ५७ ॥ भूयात्पति
र्मे भगवान्कृष्णस्तदनुमोदतां ॥ अद्भिर्गंधाक्षतैर्धूपैर्वासः स्रग्माल्यभूषणैः ॥ ५८ ॥ नानोपहा
रबलिभिः प्रदीपावलिभिः पृथक् ॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् ॥ ५९ ॥ ल
वणापूपताम्बूलकंठसूत्रफलेक्षुभिः ॥ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ॥ ६० ॥
ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ॥ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात् ॥ नि

तरां सौकर्यं तत्पतिर्भवेदिति चेदत आह तदनुमोदतामिति ॥ भवनी श्रीकृष्णस्य पत्नी वा स्रग्गंधा
दिभिरंबिकां समपूजयत् ॥ तथा विप्रस्त्रियो पि तेईर्थैः ॥ लवणादिभिश्च समपूजयदिति ॥ ६१
शेषां निर्माल्यं मुनिव्रतं मौनादिभिः त्याग सखीमु ॥ ५२ ॥

वदननारिस्त्रीभिः पतिव्रता ...

१३

तं हृष्टमस्मिन्कार्ये सर्वस्वार्पणमपि॥ अपर्याप्तमिति तद्दयितं प्रियमपि पत्नीं दातुं केवलं तेन नाम पश्चा
द्दृद्दाविसृष्ट्यर्थः॥ यद्वा मां श्रियं येन मस्तित्तेतावत्सर्वमपदामास्पदं भवति॥ किंतु नर्मविषयणानाया
मिति॥ ततोधिकमन्यत्प्रियं न पत्नीति तेन नाम॥२१॥ महामतिरिमनेन श्रीकृष्णाबाहुकस्यामेवो
दोढुमागतः स्यादिति वरो वित्तेन विधिना समस्तजयदितिमहवितं यथाय यथावत्॥२४॥ समेतानां
नमागतं समस्तं यवैदर्भी हृष्टमानसा॥ नपश्चपत्नीद्वास्त्वणाय प्रियमस्त्वनामसा॥२२॥ श्रीमौ
क्त्वा सद्दुहितु कृद्वाह प्रेत्नगणोन्सुकौ॥ अभ्ययान्त्यं वोषणा नामकृष्णौ समर्हणोः॥२३॥ मधुप
र्कमुपानीयवासांसि विरज्जानि सः॥ उपायनान्यभीष्टानि विधिवत्संमयोजयत्॥२४॥ नयो
र्निवेशनेश्रीमदुपकल्प्य महामतिः॥ ससैन्ययोः सानुगयोरातिथ्यं निर्दिदेश यथा॥२५॥ प
ं राजा समेतानां यथावीर्यं यथावयः॥ यथाबलं यथावित्तं सर्वैः कामैः समर्हयत्॥२६॥ ०॥
कृतस्मागतमाकर्णपिविदर्भपुरवासिनः॥ प्रावात्मने रांजलिभिः पपुस्तन्मुखपंकजं॥२७॥ ॥ ॥ टि
असावेव भायोभवितुं कृर्कि णपर्दैनितापरा॥ असावप्यनवद्याङ्गी भैम्याः समुचितः पतिः॥२८॥ टि
किं विनिह्वचरितं यत्र तेन नतु शृण्वि लोककृतः॥ अनुरक्तानुरक्तान्तु वैदर्भ्याः पाणिमच्यु॥
तः॥२९॥ एवं प्रेमकलावद्वावदं निस्सप्तुरौकसः॥ कन्या चानः सुगान्याणाङ्ग दैशैसाविका
नांमध्येवीर्याद्यन्तिक्रम्यततेसमर्हिंनवानित्यर्थः॥२८॥ श्रीकृष्णेभाविकर्मह्वचकेंजनानुरामंद
र्शयति॥ कृलमागतमितिविमिः॥ असावेव रु किं णपेवाई ति असावेवभैष्मापवसमुचितपवेति
पटुवधारणानि॥ नवैकस्मिन्न्यजिरेकपदर्शनमनुपलक्षणार्थं॥ नापरेतिन च वा केभेदवोषः अ
न्यविषयभेदनविमित्रानामेववाकानांसहप्रयोगात्॥ यह्माशिस्त्स्मादिवदिति यथमेवान्

तां विलोक्य वीरा मुमुहुरिति तृतीयश्लोकेनान्वयः ॥ श्यामां सुजातनरजस्कां कुंतलेभ्यः शंकिते इव च
पले ईक्षणे यस्यास्तां ॥५१॥ द्विजा एव कुंदानां कुड्मलानि मुकुलानि विंबफलवद्योधरस्तस्य द्युतिभिः
शोणायमानानि तानि यस्यास्तां कलाशोभानयुक्तनूपुरे सिंजत तत्र नत्कलानूपुरं च तस्य धाम दीप्तिः
तेन शोभितुं शीलं यस्य तेन पदा चलंती ॥५४॥ न केवलं मुमुहुः पेतुश्चेत्याह ॥ यामिति ॥ यात्राभिषेण

तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां ॥ श्यामां नितंबार्पितरत्नमेखलां व्यं
जत्स्तनीं कुंतलशंकितेक्षणां ॥५३॥ शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुं
दकुड्मलां ॥ पदा चलंतीं कलहंसगामिनीं ॥ सिंजत्कलानूपुरधामशोभिना ॥५४॥ विलोक्य
वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः ॥ यां वीक्ष्य ते नृपतयस्तदुदारहासव्री
डावलोकहृतचेतस उज्झितास्त्राः ॥ पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राछलेन हरयेर्पय
तीं स्वशोभां ॥ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा ॥५५॥ उत्सा
र्य वामकरजैरलकानपांगैः प्राप्तान् ह्रियैक्षत नृपान् ददृशेच्युतं सा ॥ तां राजकन्यां रथमारुरुक्षं
तीं जहार कृष्णो द्विषतां समीक्षतां ॥५७॥ रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय मा
धवः ॥ ततो ययौ रामपुरोगमः शनैः शृगालमध्यादिव भागहृद्धरिः ॥५८॥ तं मानिनः स्वाभि
भवं यशःक्षयं परे जरासंधवशा न सेहिरे ॥ अहो धिगस्मान्यश आत्तधन्विनां गोपैर्हृतं केसरिणां
मृगैरिव ॥५९॥ इति श्रीभागवते दशमस्कंधे त्रिपंचाशत्तमोध्यायः ॥५३॥

हरये स्वलावण्यं समर्पयंतीं यां वीक्ष्य ते नृपतयः सानान्द्या ह्रियैक्षत ननदेवाच्युतं ददृशे बलपद्म
कोशौ न्यूलयां चरणौ चालयंती सुपर्णलक्षणं गरुडध्वजं हरिः सिंहः ग्रसमानानां तेषां माकोशमाह

चलुः पंचाशत्नसेनतु जित्वा राज्ञो विपक्षमान् ।। रुक्मिणां च विरूप्याय भैष्म्याः पार्णिग्रहे यदीन् ।। इतीत्सदो
ति गन्तानि स्वैवं वदंतः ससंरब्धाः क्रोधाविष्टा दंसिताः स्वतसन्नाहाः परिक्रान्ताः परिवृत्ताः ।। अन्वीयुः
अन्वधावन् ।। २ ।। विस्फूर्य टंकारयित्वा परेषां शराणां वाकूल्पे यादवानाम चलतेव दृष्ट्वा ततः ।। सेचाड्डुति

श्रीशुक उवाच ।। इति सर्वे ससंरब्धा वाहानारुह्य दंसिताः ।। स्वैः स्वैर्बलैः परिःक्रान्ता अन्वीयुर्धृ
तकार्मुकाः ।। १ ।। तानापतत आलोक्य यादवानीकयूथपाः ।। तस्थुस्तत्सम्मुखा राजन्विस्फूर्य
स्वधनूंषि ते ।। २ ।। अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोविदाः ।। मुमुचुः शरवर्षाणि मेघा अ
द्रिष्वपो यथा ।। ३ ।। पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा ।। सव्रीडमैक्षत्तद्वक्त्रं भयविह्व
ललोचना ।। ४ ।। प्रहस्य भगवानाह मा स्म भैर्वामलोचने ।। विनंक्ष्यत्यधुनैवैतत्तावकैः शात्र
वं बलं ।। ५ ।। तेषां तद्विक्रमं वीरा गदसंकर्षणादयः ।। अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्र
थान् ।। ६ ।। पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि ।। सकुंडलकिरीटानि सोष्णीषाणि
च कोटिशः ।। ७ ।। हस्ताः सासिगदेष्वासाः करभा ऊरवोंघ्रयः ।। अश्वाश्वतरनागोष्ट्रखरमर्त्यशि
रांसि च ।। ८ ।। हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः ।। राजानो विमुखा जग्मुर्जरासं
धपुरःसराः ।। ९ ।। शिशुपालं समभ्येत्य हृतदारमिवातुरं ।। नष्टत्विषं गतोत्साहं शुष्यद्वदन
मब्रुवन् ।। १० ।। भो भो पुरुषशार्दूल दौर्मनस्यमिदं त्यज ।। न प्रियाप्रिययो राजन्निष्ठा देहि
।। ३ ।। पेतन्नयेतनमासभैः मा भयं कुरु हे वामलोचने वराविनावकैः तदीयैः ।। (शुद्धपत्ते ।। ११ ।।
हेत्वाः ।। ४ ।। सचासौ विक्रमश्चतं ।। ६ ।। उष्णीषाणि शिरोवेष्टनसवस्त्राणि तत्सहितानि शिरांसि ।। ७ ।। क
रभाः प्रकोष्ठाः ऊरुविशेषणं वा ।। ८ ।। आत्मानं दारमेवतं हृतदारमिवातुरं ।। १० ।। निष्ठास्थैर्यं ।। ११ ।।

५२

क्रूरकोन संयिनात स्वेच्छया दुःखिपीड्यमानतेन पुत्रस्य स्वरूपं तथा संदर्शितं ॥ तथा चाहमेव हृष्टोन त्रस्मार नराम्सं
थं शौरेरिति क्रमात्मकोशाद्देकेसंप्रापरकेवलमतिमवाजिरपेजितवानहं देवेमहृष्टं तत्फलेन फल्गुनं
यथा राक्मयीयोपिन्यमतेतुद्रहकेच्छया ॥ एवमीस्वतशेषमीदृते सर्वखंड्डःसर्वयोः ॥१२॥ शौरेः स
मद शाहं देवसंगानि पराजितः ॥ त्रयोविंशतिभिः सन्येजित्वपकसहस्पर ॥१३॥ तथाप्यहं नशो
वामिनसदृश्यामिकदाचित ॥ कालेन देवयुक्तेन जानन्विशांचितं जगत ॥१४॥ अथ फल्गुनापि वय
मवैवीरवृथपपृथ्यपाः ॥ पराजिताः फल्गुनेन वै यदुभिः कृतपालितैः ॥१५॥ विपुवोजित्रपुरुषे
नाकालमात्मानुसारिणि ॥ तदावयं प्रजेष्यामो यदा दैवं प्रदक्षिणं ॥१६॥ एवं सर्वोपिनामिदं
भ्रद्यागान्तानुगः पुरे ॥ दृनेपोषाः पुनस्तेपियपुः स्वसपुरं नृप ॥१७॥ रुक्मीतु राजसाहार्द
तोस्माद्दुःसहत्वसः ॥ दृष्टतो व्रणमन्त्रसमन्तो हिरण्यापहृतो बली ॥१८॥ रुक्ममसर्वीसहस
रत्रैः सूर्याद्वनामवश्वक्षुजां प्रतिजज्ञेमहावाहुर्दर्शितः सशरासनः ॥१९॥ अहत्वासमरेक्
ममप्रत्नूस्यचरुक्मिणीं ॥ कुंडिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः ॥२०॥ इत्युक्त्वारथमा
रुह्यसारथिमाह सत्वरः ॥ चोदयाश्वान्यतः कृष्णस्तत्र मे संयुगं भवेत ॥२१॥ अद्याहं निशितैर्बाणै
गोपालस्यसुदुर्मतेः ॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥२२॥ विकत्थमानः कुमतिरी
श्वरस्याप्रमाणवित ॥ रथेनैकेन गोविंदं तिष्ठ तिष्ठेत्यथाह्वयत ॥२३॥
वैः सुकल्पसैन्यैः ॥२५॥ प्रदक्षिणामनुकूलस्यांगोपालस्यवेदपालकस्यानिवासवीर्यः ॥ तथासहडर्म
नेतिनिशांभनाग्रतुयहवतीडुरुद्वेपिमनिर्यस्यातस्पेति ॥२६॥

यद्दनोत्कुलयोः सनकुलदूषणावस्तततस्य यद्दनोत्कुलस्य पतेद्देग्रं सनस्य यं चरितद्दन चतुरग्रं ससमा
वानद्द्यस्माद्दानोः कर्नेरिल्लुट प्रत्ययो नेद्यादिविद्दितः ॥२४॥ ध्वांक्षः काकः स यथा हविर्मुक्तानि तद्द
तवत्तनत्तग्रथ्वा सवदितिच्छेदः सद्दस्रान्तवादेस्यर्थः ॥ देमेदाग्धिरेत्यर्थः परित्रासेनाविकंपितानि

यत्नुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ॥ आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन ॥२४॥ कु
त्र यासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः ॥ हरिष्येद्य मदं मंद मायिनः कूटयोधिनः ॥२५॥ या
वन्न मे हतो बाणैः शयीथा मुंच दारिकां ॥ स्मयन्कृष्णो धनुः छित्वा षड्भिर्विव्याध रुक्मिणं
॥२६॥ अष्टभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः ॥ स चान्यद्धनुरादाय कृष्णं विव्याध पंचभिः
॥२७॥ तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः ॥ पुनरन्यदुपादत्त तदप्याच्छिनदव्ययः ॥२८
परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ ॥ यद्यदायुधमादत्त तत्सर्वं सोच्छिनद्धरिः ॥२९॥ त
तो रथादवप्लुत्य खड्गपाणिर्जिघांसया ॥ कृष्णमभ्यद्रवत्क्रुद्धः पतंग इव पावकं ॥३०॥ तस्
य चापततः खड्गं तिलशश्चर्म चेषुभिः ॥ छित्वासिमाददे तिग्मं रुक्मिणं हंतुमुद्यतः ॥३१॥
दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला ॥ पतित्वा पादयोर्भर्तुरुवाच करुणं सती ॥३२॥
योगेश्वराप्रमेयात्मन्देवदेव जगत्पते ॥ हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥३३॥ श्रीशु
क उवाच ॥ तया परित्रासविकंपितांगया शुचावशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रं
सितहेममालया गृहीतपादः करुणो न्यवर्तत ॥३४॥

अंगानि यस्यास्तया शुचा शोकेन शुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः सा चासौ च तया कातर्येण वै
क्लव्येन विस्रंसिता हेममाला यस्याः तया गृहीतौ पादौ यस्य सः ॥ ३४

सुप्रमस्य केशांसहितानिस्थानेस्थाने वपितानि श्मश्रूणि केशाश्च यथा भवंति॥ तथा तेनैवासिना प्रवप

न्मुंडयत् विरूपमकरोत् तथा स तं हतप्रायमित्युत्तरेणवा ऽप्यनुषंगः रुक्मिणी सांत्वयति मैवास्मानि

ति ॥३७॥ पुनः श्रीकृष्णमादिपाति। वधविति॥३५॥ पुनर्देवी प्रत्याह। नक्षत्रियाणामिति। येनधर्मेण भ्राता

पिभ्रातरं हन्यात्॥ ततस्तस्माद्घोरतरः॥ प्रतिदारुणोयं धर्मः अग्रतस्त्रकोस्माकमपराधश्चेति भावः॥ पुनः

चैलेनबद्धान्तमसाधुकारिणा सप्रमस्य केशप्रवपनं स्वरूपयत्॥ तावन्ममुंडः परसैन्यमङ्गं तयद्ध

प्रवीराम्नलिनी यथा गजाः॥३४॥ कृत्वानिकमुपयन्दत्तसुस्तचरुक्मिणः॥ तथाक्ष्णं तं हतप्राय

द्दृष्ट्वा सकर्षणो विभुः॥३५॥ विमुच्यबद्धकारुणोभगवान्कृष्णमब्रवीत्॥ असाध्विदं त्वयाकृष्ण

कृतमस्मज्जुगुप्सितं॥३६॥ वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः॥ मैवास्मान्साध्व्यसूयेथा भ्रा

तुर्वैरूप्यचिंतया॥३७॥ सुखदुःखदो न चान्योस्ति यतः स्वकृतभुक्पुमान्॥ बन्धुर्वधार्हदोषोपि न बं

धोर्वधमर्हति॥३८॥ त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः॥ क्षत्रियाणामयं धर्मः प्रजापति

विनिर्मितः॥३९॥ भ्रातापि भ्रातरं हन्यात् येन घोरतमस्ततः॥ राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य ते

जसः॥४०॥ मानिनोन्यस्य वा हेतोः श्रीमदांधाः क्षिपंति हि॥ नवेयं विषमाबुद्धिः सर्वभूतेषु दु

र्हृदाम्॥ यन्मन्यसे सदाभद्रं सुहृदां भद्रमज्ञवत्॥४१॥ श्रीकृष्णमाह॥ राजन्येति॥ तथाप्यस्मा

कमेतदनुचितमिति भावः॥४०॥ पुनर्देवी प्रत्याह॥ नवेयमिति सर्वभूतेषु दुर्हृदां समदित्नानां भ्रातृ

णां॥ यत्नवद्भद्रं मन्यसे इच्छसि॥ इयं तव विषमा बुद्धिः समीचीना बुद्धिः ऊनोयत स्वदेवसुहृदामभद्रं वि य

द्दासर्वभूतेषु सेदुर्हृदामपि स्व सुहृदांभद्रमेवदंडरूपं सुंडनमभद्रं यन्मन्यसे॥ नवेयं विषमाबुद्धिरिति अ

थवा सर्वभूतेषु मध्ये दुर्हृदां शिशुपालादीनामभद्रं च यन्मन्यसे न वेयं विषमाबुद्धिः समानभवंमि नृत्स

कुतइत्यतआह ॥ आत्ममोह इति ॥ ४३ ॥ परमार्थमाह एक एवेति ॥ परः शुद्धः ज्योतिश्चंद्रादिर्यथोदकेषु न
भो यथा घटादिष्विव ॥ ४४ ॥ कुतस्तर्हि न चंद्रादिवदात्मानमेकं शुद्धं प्रतीमः ॥ तत्राह ॥ देह इति ॥ द्रव्यमपि
भूतं प्राणा इंद्रियाणि ॥ अध्यात्मं गुणाधिष्ठानाधिदेवतेति त्रितयात्मको देहो ह्याविद्यात्मशुद्धो न प्रतीयत इत्य
र्थः ॥ ४५ ॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत्राह ॥ नात्मन इति द्वे सति ॥ अन्येनापि भूता
दिना आत्मनः संयोगो वियोगो न स्तः कुतः ॥ असतः ॥ असत्त्वादसत्यत्वादित्यर्थः ॥ कुतः ॥ सत्त्वे तत्राह ॥ तद्धेतुत्वादि

आत्ममोहो नृणामेव कल्पते देवमायया ॥ सुहृद्दुर्हृदुदासीन इति देहात्ममानिनां ॥ ४३ ॥ एक एव
परो ह्यात्मा सर्वेषामपि देहिनां ॥ नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ४४ ॥ देह आद्यन्तवानेष
द्रव्यप्राणगुणात्मकः ॥ आत्मन्यविद्यया कॢप्तः संसारयति देहिनम् ॥ ४५ ॥ नात्मनोऽन्येन संयोगो
वियोगश्चासतः सति ॥ तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ॥ ४६ ॥

ति ॥ तस्यात्मनस्तदिंद्रियादेः प्रसिद्धेः प्रकाशकस्य तद्धेतुत्वात् ॥ आत्महेतुकत्वात् ॥ ननु देवैरधिष्ठितेभ्य
इंद्रियेभ्यो भूतानां प्रतीतिः ॥ प्रसिद्धाः स्वतः प्रतीत्या च ॥ तत्प्रसिद्धिर्नात्मन इत्यत आह ॥ दृग्रूपाभ्यां यथा र
वेः ॥ यथा प्रकाश्यप्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयोः ॥ रवेः सकाशात्सिद्धिः द्वयोरपि तैजस
त्वात् न तद्भेदश्च ॥ यथा भूतेंद्रियादीनां परस्परसिद्धानामपि चैतन्याधीनत्वप्रकाशः ॥ तत्कार्यत्वाच्च तद्व्य
तिरेकेण सत्त्वं चेत्यर्थः ॥ तथा च द्वादशे वक्ष्यति ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ॥ एवं धीः
खानि मात्राश्च स्फुरंत्यन्यतमादृतादिति ॥ यद्वा रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परप्रसिद्धिर्यथा त
द्वदिति ॥ ४६ ॥ ॥ ॥

देहसंबंधाभावादेवनात्मनोजन्मादयोपीतिवक्तुं जन्मादीनां देहधर्मत्वमेवाह ॥ जन्मादयस्त्विति ॥ कथं त
र्हि ॥ जातोहं बालोहं वृद्धोहमिति ॥ आत्मनि जन्मादिप्रतीतिर्देहजन्मादिनैवेति ॥ सदृष्टांतमाह ॥ क
लानामिवेति ॥ इन्दोः कलानामेव जन्मादयो नैवेंदोर्यथा तद्वत् ॥ यथा च कलानाशादेव कुहूरमाव
स्याइंदुर्यउच्यते ॥ तद्वदस्यात्मनो देहनाशादेव मृतिर्व्यवहारइत्यर्थः ॥ ४७ ॥ नन्वात्मनो देहादिसंबंधा
भावे कथं भोक्तृभोग्यभोगप्रतीतिरित्याशंक्य स्वप्नदृष्टांतेन समर्थयते ॥ यथा शयान इति ॥ आत्मा

जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् ॥ कलानामिव नैवेन्दोर्मृतिर्ह्यस्य कुहूरिव ॥ ४७ ॥
यथा शयान आत्मानं विषयान्फलमेव च ॥ अनुभुंक्तेप्यसत्यर्थे तथाप्नोत्यबुधो भवं ॥ ४८ ॥
तस्मादज्ञानजं शोकमात्मशोषविमोहनं ॥ तत्त्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ॥ ४९ ॥
श्रीशुक उवाच ॥ एवं भगवता तन्वी रामेण प्रतिबोधिता ॥ वैमनस्यं परित्यज्य मनो बुद्ध्या स
मादधे ॥ ५० ॥ प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः ॥ स्मरन्विरूपकरणं वितथात्मम
नोरथः ॥ ५१ ॥ अहत्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीं ॥ कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रु
षा ॥ ५२ ॥ चक्रे भोजकटं नाम निवासाय महत्पुरं ॥ भगवान्भीष्मकसुतामेवं निर्जित्य भूमिपा
न् ॥ पुरमानीय विधिवदुपयेमे कुरूद्वह ॥ ५३ ॥ तदा महोत्सवो नॄणां यदुपुर्यां गृहे गृहे
अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥ ५४ ॥ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुंडलाः

तं भोक्तारं विषयान्भोग्यान्फलं भोगमसत्यप्यर्थे अनुभुंक्ते तथा बुधः संसारं प्राप्नोतीति ॥ ४८ ॥ आत्मा
नं शोषयति विमोहयति चेति ॥ तथा निर्हृत्य अपाकृत्य ॥ ४९ ॥ समादधे समाहितमकरोत् ॥ ५० ॥ प्रा

उत्तंभितैरिंद्रकेतुभिः ध्वजविशेषैः॥ उपक्लृप्तानि मंगलानि लाजांकुरदध्यक्षतादीनि तैः॥५६॥
आहूताः प्रेष्ठाः सुहृज्जनास्तेषां गजैः परामृष्टा उक्षिताः॥ रंभाश्च पूगाश्च तैरनुशोभिता यद्द्वारं तैः रेवगजैः
परामृष्टाः संसृष्टाः रंभाश्च पूगाश्च तैरुपशोभिता॥५७॥ संभ्रमादौत्सुक्यात्परिधावतां बंधूनां मध्ये
स्त्रियः समेतास्तमदृष्टपूर्वाः॥६०॥ इति श्री[illegible]भावार्थदीपिकायां चतुःपंचाशत्तमः॥५४॥ पंचपंचाशे
तु प्रद्युम्नो जनिष्ठः स ततः शंबरेणाहृतः सोऽथ हत्वा तं कांतया गमत्॥१॥ प्रद्युम्नहानिलाभाद्यैः

सावृष्णिपुर्युत्तंभितेंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः॥ बभौ प्रतिद्वार्युपक्लृप्तमंगलै
रापूर्णकुंभागुरुधूपदीपकैः॥५६॥ सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजां॥ गजैर्द्वाःसु परा
मृष्टरंभापूगोपशोभिता॥५७॥ कुरुसृंजयकैकेयविदर्भयदुकुंतयः॥ मिथो मुमुदिरे तस्मि
न्संभ्रमात्परिधावतां॥५८॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः॥ राजानो राजक
न्याश्च बभूवुर्भृशविस्मिताः॥५९॥ द्वारकायामभूद्राजन्महामोदः पुरौकसां॥ रुक्मिण्या रम
योपेतं दृष्ट्वा कृष्णं श्रियः पतिं॥६०॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःपंचाशत्त
मोऽध्यायः॥५४॥ श्रीशुक उवाच॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना॥ देहोपपत्तये

भूयस्तमेव प्रत्यपद्यत॥१॥ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः॥ प्रद्युम्न इति

विख्यातः सर्वतोऽनवमः पितुः॥२॥

शंबराद्धरणादिना॥ कुटुंबिनाम पत्यादिसुखं ददृशुः स्वसमसमुचत॥२॥ जांबवत्यादिविवाहेभ्यः प्रा
गेव प्रद्युम्नजन्म ततो विवाहाः॥ ततः शंबरागारात्प्रद्युम्नप्रत्यागमने॥ अतः प्रकरणकथनप्रस्तावे
पि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेणाहरणं निरूप्यते॥ प्रत्यागमनं तु तत्कालीनमपि क
थापर्यवसानाय योग्यमिति॥ वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः॥ सृष्टिहेतुत्वाच्च देहो

[illegible] ॥१॥ [illegible] ॥२॥

सप्रद्युम्नः कामयात्रः शंबरस्यात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रक्षिप्य स्वगृहमगादिति निर्जगार मिलित
वान् ॥४॥ स पितिना शास्त्रिकयाग्रयवयन् खिडित वेतः ॥५॥ तत्र कामो यत्नव भर्त्ता निउत्पत्तिं श्रीकृष्णा
दुक्मिण्याउत्पन्नश्रुतियशस्विनी पतिव्रता ॥७॥ भर्तुर्देहप्राप्तिं प्रतीक्षमाणा ॥८॥ तं विशुं कामदेवं बुद्धा
नं शंबरः कामरूपी हृत्वा तोकमनिर्दशं ॥ स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ॥३॥ तं निर्जगा
र बलवान्मीनः सोप्यपरैः सह ॥ वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥४॥ तं शंबराय कै
वर्त्ता उपाजह्रुरुपायनं ॥ सूदा महानसं नीतमवद्यन्स्वधितिनाद्भुतं ॥५॥ दृष्ट्वा तदुदरे बालं मा
यावत्यै निवेदयन् ॥ नारदोकथयत्सर्वं तस्याः शंकितचेतसः ॥६॥ बालस्य तत्त्वमुत्पत्तिं मत्स्योद
रनिवेशनं ॥ सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ॥७॥ पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं
प्रतीक्षती ॥ निरूपिता शंबरेण सा सूपौदनसाधने ॥८॥ कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं तदा
र्भके ॥ नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः ॥९॥ जनयामास नारीणां वीक्षंतीनां च विभ्रमं ॥१०॥
सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरं ॥ सव्रीडहासोत्तभितभ्रुवेक्षती प्री
तोपतस्थे रतिरंग सौरतैः ॥११॥ तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा ॥ मातृभावमतिक्रम्य
वर्तसे कामिनी यथा ॥१२॥ रतिरुवाच ॥ भवान्नारायणसुतः शंबरेण हृतो गृहात् ॥
अहं तेऽधिकृता पत्नी रतिः कामो भवान्प्रभो ॥१३॥ एष त्वानिर्दशं सिंधावक्षिपच्छंबरोऽसुरः ॥
विभ्रमं समोह ॥ प्रगादेरागजनन सौरतैर्भावैः उपतस्थे प्रभजन ॥११॥ अधिकृता पत्नी व्यवहरेतुः रतिर
र्भवान् ॥ कामश्रुति ॥१३॥ दुर्जयं यत्न रजुः मायाशतविदमिति ॥ कथं तर्हि हतं यस्त्वत्राह ॥ मायाभिरि

नचात्र विलंबः कार्य इत्याह ॥ परिघोचतिरोदिती त्यर्थः ॥ १६ ॥ वज्रस्य निष्पेषे निर्घाते यथा निष्ठुर
स्तीव्रो नादो भवति ॥ तथाभूतं व्यनदत् ॥ सामान्यविशेषतया व्याप्यव्यापकत्वमोदने पाके पचंती
तिवत् ॥ प्रतिनिष्ठुरं नादमकरोदित्यर्थः ॥ १९ ॥ वैहायसः आकाशे स्थितः ॥ २१ ॥ सत्त्वात्मिकां सत्त्वगु
परिघोचतिते माता कुररीव गतप्रजा ॥ पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ १६ ॥ प्र
भावं वददौ विद्यां प्रद्युम्नाय महात्मने ॥ मायावती महामाया सर्वमायाविनाशनी ॥ १७ ॥ स
च शंबरमभ्येत्य संयुगाय समाह्वयत् ॥ अविषह्यैस्तमाक्षेपैः क्षिपन्संजनयन्कलिं ॥ १८
सोधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः ॥ निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ १९
गदां स आविध्य तदा प्रद्युम्नाय महात्मने ॥ प्राक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरं ॥ २० ॥ तामाप
पतंतीं भगवान्प्रद्युम्नो गदया गदां ॥ अपास्य प्राज्ञवे क्रुद्धः प्राहिणोत्स्वगदां तु च ॥ २१ ॥ सच
मायां समाश्रित्य दैतेयो मयदर्शितां ॥ मुमुचे शस्त्रमयं वर्षं कालेयो वैहायसोऽसुरः ॥ २२ ॥ बा
ध्यमानो निवर्षेण रौक्मिणेयो महारथः ॥ सत्त्वात्मिकीं महाविद्यां सर्वमायोपमर्दिनीं ॥ २३
ततो गौह्यकगांधर्वपैशाचोरगराक्षसीः ॥ प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्तु ताः ॥ २४
निघ्नता सम सिंम युध्यम सकिरीटं सकुंडलं ॥ शंबरस्य शिरः कायात्तान्मस्मश्रुजगाहरत् २५
आकीर्णमानो दिविजैः स्तुवद्भिः कुसुमोत्करैः ॥ भार्यया वरचारिण्या पुरं नीलो विहाय
णामयी प्राप्तुं केस्तत (सा ॥ २६ ॥ अतः परं वरराजल्ललना शांत संकुलं ॥ विवेशापत्यागारान्तादिगु
रस्यान्तुषंगः ॥ २२ ॥ नामा या व्यथमयत व्यनाशयत् ॥ २४ ॥ नामा साशिम ष्ठणि य सि स्तत ॥ ओजसा ब

नीलाम्बरकाश्मुखेलक्ष्मवालयलैर्ह्रीताः लज्जिताः ॥२८॥ श्रीकृष्णोनभवतीत्यवधार्यसखीवर्तं श्री
शरनिःस्तृतदिन ॥२९॥ मत्तं स्मरेत्याह ॥ नरदेहर्यः पुरुषश्रेष्ठः ॥३०॥ यतेनतुल्यवयोरूपंचयस्यमः ॥३१
तलेक्षणतमुखाम्भोजनीलवक्रालकालिभिः ॥ कृष्णसमतामिवयोहीनानिलिन्दलदृतवहह ॥२९॥
अवधार्यशनैरीषद्दृलज्जमानेनयाचित ॥ उपजग्मुः प्रमुदिताः सखीरत्नस्यचिस्मिताः ॥३०॥
अथतत्रासितापांगीवैदर्भीकल्लुभाषिणी ॥ अस्वरत्समातनस्तेहस्नुतपयोधरा ॥३१॥ कोन्व
यंनवदूर्वयः कस्यवाकमलेक्षणः ॥ धृतः कयावाजठरेकेयलब्धावनेनवा ॥३२॥ ममचाप्या
त्मजोनष्टोनीतोयः सूतिकागृहात् ॥ एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित् ॥३३॥ कथंत्व
नेनसंप्राप्तसारूप्यंशार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्यास्वरहासावलोकनैः ॥३४॥ सएववा
भवेन्नूनंयोमेगर्भेधृतोऽर्भकः ॥ अमुष्मिन्प्रीतिरधिकावामः स्फुरतिमेभुजः ॥३५॥ एवंमीमांसमा
नायांवैदर्भ्यांदेवकीसुतः ॥ देवक्यानकदुंदुभ्यांवासुदेवउपागमत् ॥३६॥ विज्ञातार्थोऽपिभगवां
स्तूष्णीमासजनार्दनः ॥ नारदोऽकथयत्सर्वंशम्बराहरणादिकं ॥३७॥ तच्छ्रुत्वामहदाश्चर्यंकृष्णा
न्तःपुरयोषितः ॥ अभ्यनंदन्बहून्नष्टान्मृतमिवागतं ॥३८॥ देवकीवसुदेवश्चकृष्णरामौतथा
स्त्रियः ॥ दंपतीतौपरिष्वज्यरुक्मिणीचययुर्मुदं ॥३९॥ नष्टंप्रद्युम्नमायातमाकर्ण्यद्वार
कौकसः ॥ अहोमृतइवायातोबालोदिष्ट्येतिहाब्रुवन् ॥४०॥ रामानुजायनमः ॥४०॥
नसत्वरत्वंसंभावयंत्याह ॥ कथंत्विति ॥ नदेवाधिकंसंभावयंत्याह कथंत्विति ॥ नदेवाधिकंसंभाव
यति ॥ सएवेति ॥३५॥ देवक्यानकदुंदुभ्यांदेवक्यानकदुंदुभिभ्यामित्यर्थः ॥ अतिसौंदर्येणप्रद्युम्नम
नवगायति ॥४०॥ रामानुजायनमः ॥४०॥

पितापि कृष्णस्वरूपे प्रसुप्ते निज आत्मीयईश्वरः॥ भर्तेति भावो भावनायामंतास्तन्मातरः कृष्णपत्न्यो
पिहमितिरूढभावाः सत्योयमभमन्त्रितियमन्नावलविश्वकायेसन्तिस्मरेस्मर्यमाणेन्द्रेनेवलोक
के कामे निविषये सन्ति किंचरमास्पदे श्रीकृष्णस्य सर्वबिंबमन्निलस्यबिंबप्रतिबिंबरूपेण दाक्षि
तु वक्तव्य॥ अन्यानार्थोभेनुविशि॥ ४०॥ इति श्रीदशमस्कंधे भावार्थदीपिकायां पंचपंचाशत्तमोऽध्यायः ५५
षट्पंचाशत्तमे मिथ्याभियोगे मणिमाहरत्॥ कन्यां जांबवतः प्रापत्कृष्णः सत्राजितस्तथा॥ १॥ ७
येवैमुहुः पितृस्वरूपनिजेशभावास्तन्मातरोयदभजन्नरूढभावाः॥ चित्रं न तत्खलु रमास्प
दबिंबबिंबेकामस्मरेऽत्तिविषयेकिमुतान्यनार्यः॥ ४०॥ इति श्रीभागवते महापुराणे दशम
स्कंधे पंचपंचाशत्तमोध्यायः॥ ५५॥ श्रीशुक उवाच॥ सत्राजितः स्वतनयां कृष्णाय कृतकिल्बि
षः॥ स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान्॥ १॥ राजोवाच॥ सत्राजितः किमकरोद्ब्र
ह्मन्कृष्णस्य किल्बिषं॥ स्यमंतकः कुतस्तस्य कस्माद्दत्तासुताहरेः॥ २॥ शुकः॥ आसीत्सत्रा
जितः सूर्यो भक्तस्य परमः सखा॥ प्रीतस्तस्मै मणिं प्रादात्स च तुष्टः स्यमंतकं॥ ३॥ स तं
बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः॥ प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः॥ ४॥
द्वारिकामसौ व्यसनिशामुक्तानि चंचलो॥ अर्थस्यानर्थतामाह स्यमंतहरणादिना॥ १॥ ससभा
माजांबवत्योर्विवाहप्रस्तावाय स्यमंतकाख्यानमाह॥ सत्राजित इति॥ १॥ सत्राजित इति अकृ
तनाध्यो विज्ञनकारोनोपयत्वयानुसारेणाद्रष्टव्यः कृतापराधस्तच्छान॥ स्वयमेवोद्यम कृत्वाम
णिनासह॥ प्राद्दादितिभक्तस्य सत्राजितः सूर्यस्याम्यपि सखेवासीदित्यर्थः स च तुष्टः तस्मै स्य
मंतकेनाम मणिं प्रादात् प्रीतः स्निग्धः॥ ३॥ नोपलक्षितः सत्राजितोसावितिज्ञातः॥ ४॥

दीव्यते क्रीडते सूर्यो यमिति शंकिताः संतः कथयामासुरिति ॥५॥ सूर्यं नमस्कारायागतं कल्पयित्वो
द्विकमकानां सर्वाधनानि ॥६॥ गभस्तिचक्रेण रश्मिजालेन मुष्णन् ॥ प्रतिघ्नन् ॥ नैरसालो द्वागागा बो
र्ध्वमयोर्ध्वमयाय स्यसः ॥७॥ नचेदं मत्र्यटमानमित्याहुः नवेत्ति ॥ अन्विच्छंति मृगयंते ॥ अजः सूर्यः ८
बालानामज्ञानां वचनं ज्वलन्निद्योतमानः ॥४॥ हसनानि कौतुकेन उग्रश्रवेन मंगलानि यशांसि स्तवन्तं गवि
नं त्रिलोकजनाह्वानं जसा मुख्ख्यः ॥ दीव्यते दैर्भगवते शाशांकः सूर्य शंकिताः ॥५॥ नारायण
नमस्तेस्तु शंखचक्रगदाधर ॥ दामोदरारविंदाक्ष गोविंद यदुनंदन ॥६॥ एष आयाति सविता त्वां दि
दृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः ॥७॥ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां वि
बुधर्षभाः ॥ ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ॥८॥ श्रीशुक० ॥ निशम्य बालवचनं प्रह
स्याम्बुजलोचनः ॥ प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥ सत्राजित्स्वगृहं श्रीमत्कृतकौतु
कमंगलं ॥ प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥१०॥ दिने दिने स्वर्णभारानष्टौ स सृजति प्र
भो ॥ दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोऽशुभाः ॥११॥ न संति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो म
णिः ॥ सयाचितो मणिं क्वापि यदुराजाय शौरिणा ॥१२॥ नैवार्थकामुकः प्रादाद्याच्ञाभंगमत
र्कयन् ॥ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं ॥१३॥ प्रसेनो हयमारुह्य मृगयायां व्यचरद्वने ॥१४
प्रैः कृत्वा ॥१०॥ भारप्रमाणं च ॥ चतुर्भिर्व्रीहिभिर्गुंजं गुंजान्पंच पणं पणान् ॥ अष्टौ धरणमष्टौ
च कर्षं तांश्चतुरः पलं ॥ तुलां शतपलं प्राहुर्भारं स्याद्विंशतिस्तुलेति ॥ मारी नाम अकालमृत्युः अरि
ष्टम् अभद्रम् अशुभा दुःखहेतवः ॥११॥ क्वापि कदाचित् ॥ अनेन भगवत्यसमर्पितेन स्वयमत्र तेजो जितः
सर्वोविशिष्ट निवर्तकमपि अरिष्टहेतुरेव भवतीति सूचितं ॥१२॥ नतु देवदत्तं यो पितृमाह ॥ तमेकदेति प्रसेन

प्राछिद्यप्राकृष्य॥ १५॥ गृहीतराजपत्न॥ उपोष्णुस्त्रवोचत॥ १६॥ कृत्यार्थे प्राभिघार्थे॥ २३॥ अष्टाविंशत्यहं
अष्टाविंशतिमुहूर्तानानियमितमलक्त॥ अष्टाविंशत्यहविंशतिशब्देन्नलोपः॥ आर्ष॥ वज्रानिष्पेषोनिः

प्रसेनंसहृद्यंहत्वामणिमाछिद्यकेसरी॥ गिरिंविशन्जांबवतानिहतोमणिमिच्छता॥ १४॥
सोपिचक्रेकुमारस्यमणिंक्रीडनकंबिले॥ अपश्यन्भ्रातरंभ्रातासत्राजित्पर्यतप्यत॥ १५॥
प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः॥ भ्रातामयेतितच्छ्रुत्वाकर्णेकर्णेजगुर्जनाः॥ १६॥
भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि॥ मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः॥ १७॥ ह
तंप्रसेनमश्वंचवीक्ष्यकेसरिणावने॥ तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः॥ १८॥ ऋक्ष
राजबिलंभीममंधेनतमसावृतम्॥ एकोविवेशभगवानवस्थाप्यबहिःप्रजाः॥ १९॥
तत्रदृष्ट्वामणिप्रेष्ठंबालक्रीडनकंकृतम्॥ हर्तुंकृतमतिस्तस्मिन्नवतस्थेऽर्भकांतिके॥ २०॥ त
मपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत्॥ तच्छ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः॥ २१॥ स
वैभगवतातेनयुयुधेस्वामिनात्मनः॥ पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित्॥ २२॥ द्वं
द्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः॥ आयुधाश्मद्रुमैर्दोर्भिःक्रव्यार्थेश्येनयोरिव॥ २३॥
आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशम्॥ २४॥
कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः॥ क्षीणसत्वःस्विन्नगात्रस्तमाहातीवविस्मितः

वीतः नदत्यपरुषैःनिष्ठुरैः॥ २४॥ श्रीकृष्णस्यमुष्टीनांविनिष्पातैराघातैःविनिष्पिष्टानिविश्लथानि

लोकेकोयंवावलीयानितिविस्मितः सन्निहप्याह॥जानेइतिसर्वभूतानांयः प्राणः तत्रचयदोजः
महोबलंचइंद्रियहृदयदेहबलानितत्सर्वंत्वमित्यहंजानेकथंतथात्वमतआह॥विष्णुमित्याह॥२६
पुराणंवेदेतः निदोतितस्ष्टानिमिनंयच्चसत॥उपादानं ग्रतः पुराणः प्रभुविसृतेदेहः॥कालइति
सुधीश्वरत्वमप्यतएवेत्याह॥यद्वेशः परइति॥नचतदस्पृश्यमाह॥आत्मनात्मेति॥२७॥तएवंभेतः
सतोममेषदेवोरघुनाथएवत्वमित्याह॥यस्येतिईषद्उत्कालितउदीपितोरोषोयः तेनयेकटाक्षमो
जानेत्वांसर्वभूतानांप्राणओजःसहोबलं विष्णुंपुराणपुरुषंप्रभविष्णुमधीश्वरम्॥२६॥
त्वंहिविश्वसृजांस्रष्टासृष्टानामपियच्चसत्॥कालःकलयतामीशः परआत्मातथा
त्मनाम्॥२७॥ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः
सेतुः कृतः स्वयशउज्ज्वलिताचलंकारक्षः शिरांसिभुविपेतुरिषुक्षतानि॥२८॥ इतिवि
ज्ञातविज्ञानमृक्षराजानमच्युतः॥व्याजहारमहाराजभगवान्देवकीसुतः॥२९॥ अभिमृ
श्यारविंदाक्षः पाणिनाशंकरेणतं॥कृपयापरयाभक्तंप्रेमगंभीरयागिरा॥३०॥ मणिहे
तोरिहप्राप्तावयमृक्षपतेबिलं॥मिथ्याभिशापंप्रमृजन्नात्मनोमणिनामुना॥३१॥
त्मक्षैः क्षुभितानक्राग्राहास्तिमिंगिलामहामत्स्याश्चयस्मिन्सोऽब्धिः वर्त्मादिशद्दत्तवान्॥ तथा
पितस्मिन्॥येनस्वयशएवसेतुः कृतः उज्ज्वलितादद्भ्यायस्यइषुभिः क्षतानिछिन्नानि॥रक्षसोदश
ग्रीवस्यशिरांसिभुविपेतुः॥सएवत्वमितिजाने॥२८॥इतिविज्ञातंविज्ञानंयेनतंविज्ञातं सन्त्रः कान्न
णासाथतः कर्मसाधनोवाऋक्षराजप्रतिउक्तवान्॥२९॥ वयमिहबद्धोबिलद्वारंप्राप्ताः तत्रमि

[illegible]

श्रीभा॰द॰ २१

सहेमणिनामसमर्पयामास ॥ श्रीकृष्णप्राप्नये ॥ चेद्भागोनामदुर्गामभजत ॥ सचकृष्णस्तेषां
प्रादुर्बभूव ॥ प्रसवइतिपाठे ॥ प्रसवं इंद्रियाणितेषांप्रेष्ठइत्यर्थः ॥ कदाचिद्याइयस्याम्नया
नाव्यत्यादिष्टादलायाप्राप्तीः कृष्णेइत्यर्थेनितयासहैव ॥ २८ ॥ यदिलोकेजनाः कथंचिन्ननंबंधे
पुनरागतमुपलभंतेतद्दुपलभ्यसर्वेजानमहोत्सवाप्रासन्निति ॥ ३० ॥ पापमनापराधेनानुतप्य
इत्यकः स्वादुदितरकन्यांजांबवतींमुदा ॥ अर्हणार्थंसमणिनाकृष्णायोपजहारह ॥ ३२ ॥
अदृष्ट्वानिर्गमंशौरेःप्रविष्टस्यबिलंजनाः ॥ प्रतीक्ष्यद्वादशाहानिदुःखिताःस्वपुरंययुः ॥ ३३ ॥
निशम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः ॥ सुहृदोज्ञातयोशोचन् ॥ बिलात्कृष्णमनिर्ग
तं ॥ ३४ ॥ सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः ॥ उपतस्थुर्महामायांदुर्गांकृष्णोपल
ब्धये ॥ ३५ ॥ तेषांतुदेव्युपस्थानात्प्रत्यादिष्टाशिषा सह ॥ प्रादुर्बभूवसिद्धार्थः सदारोहर्षे
यन्हरिः ॥ ३६ ॥ उपलभ्यहृषीकेशंमृतंपुनरुपागतं ॥ सहपत्न्यामणिग्रीवंसर्वेजातम
होत्सवाः ॥ ३७ ॥ सत्राजितंसमाहूयसभायांराजसन्निधौ ॥ प्राप्तिंचाख्यायभगवान्मणिंतस्मै
न्यवेदयत् ॥ ३८ ॥ सचातिव्रीडितोरत्नंगृहीत्वावाङ्मुखस्ततः ॥ अनुतप्यमानोभवनमगमत्
स्वेनपाप्मना ॥ ३९ ॥ सोनुध्यायंस्तदेवाघंबलवद्विग्रहाकुलः ॥ कथंमृजाम्यात्मरजः प्र
मावः ॥ ४० ॥ अहंदोषंत्र्यात्मनः रजोमलमपराधमिति ॥ किंकृत्वाकाम्लिन्कृतेनइत्यर्थः साधुमहं
अदीर्घदर्शिनंअविचारकंदत्वइंद्रपणामसुद्धंमंदमतिम ॥ ४१ ॥ एवंध्यायन् ॥ उपायेनिश्चित्तोनेतिसौ
राजेंद्रदृष्टिमनरंतोचदास्यामि ॥ तदत्ननरपाविवहत्वेनरत्नमपीति ॥ ४२

२८

बहुभिः कृतवर्मादिभिः ॥४४॥ मणिं न प्रतीच्छामः नसौ कुर्मः देवः सूर्यः तद्भक्तस्यैव निकटात्स्वः फल भागिन इति तत्राह त्वात् त्वदीयं धनमस्माकमेवेति तत्राभिप्रायः ॥४५॥ इति श्रीदशमस्कंधे भावार्थदीपिकायां षट्पंचाशत्तमोऽध्यायः ॥५६॥ सप्तपंचाशत्तमे तु घ्नन् शतधनुर्वधे । श्रान्तस्सद्वये शोमार्थं कृष्णोक्रूरात् तं तान्मणेः अक्रूरस्सुरदीकृत्यमणेः पात्रमेयाचत ॥ उपमग्नं तमेकोनसप्तमोगाद्ध

एवंव्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥४२॥ तां सत्यभामां भगवानुपयेमे यथाविधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ॥४४॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप ॥ तवास्तां देवभक्तस्य वयं च फलभागिनः ॥४५॥ इति श्रीभागवते दशमस्कंधे षट्पंचाशत्तमोऽध्यायः ॥५६॥ श्रीशुक उवाच ॥ विज्ञातार्थोपि गोविंदो दग्धानाकर्ण्य पांडवान् ॥ कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् ॥१॥ भीष्मं कृपं स विदुरं गांधारीं द्रोणमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥२॥ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥३॥ योस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः ॥ कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ॥४॥

जाहयत् ॥१॥ सत्राजितः कृष्णाज्ञानं गफले व्यक्तीकर्तुमाह विज्ञातार्थोपीति ॥ पांडवा विलद्वारे राजन्नु मरहान्निर्गता इत्येवं विज्ञातार्थो येन सः कुंती च दग्धामाकर्ण्य कुल्यकरणे कुलोचितं सव्यवहारार्थं ॥१॥ अस्त्येषां न द्रोहदुःखभावात् ॥ भीष्मादीन् संगम्य इत्यनेक ॥२॥ ननु जीवन्सत्राजित्कथं मणिं दास्यतीति शोचतुः योस्मभ्यमिति ॥ भ्रातरं प्रसेनं मृतं कस्मान्नान्वियात् ॥ नानुगच्छेदित्

नमिमवान्नजगाम ॥ ७ हेलनं प्रतिकूलं चाहजिनमपराधे ॥ २२ ॥ अपीतो मृतः दशसंख्याकान्संभुगात ॥ २३
तो रामकृष्णावेकमेवतत्वमित्यभिप्रेत्याह ॥ यद्वदमिति ॥ अजयामायया मोहिताजयेनिसस्थिरार्थः ॥ २४
एवंभिन्नमतिलाभ्यामुशाजितमसत्तमः ॥ यावानमवधीलोभात्सयापात्मीणाजीवितः ॥ ४
स्त्रीणांविक्रोशमानानांक्रंदंतीनामनाथवत् ॥ हत्वापशून्सौनिकवन्मणिमादायजग्मिवा
न् ॥ ९ ॥ सत्यभामाचपितरं हतंवीक्ष्यशुचार्पिता ॥ व्यलयन्तातनातेतिहाहतास्मीतिमुह्यती ॥ ५
तैलद्रोण्यांमृतंप्रास्यजगामगजसाह्वयं ॥ कृष्णायविदितार्थायतप्ताचख्यौपितुर्वधं ॥ ६
तदाकर्ण्येश्वरौराजन्ननुसृत्यनृलोकतां ॥ अहोनः परमंकष्टमित्यस्राक्षौविलेपतुः ॥ ९
आगत्यभगवांस्तस्मात्सभार्यःसाग्रजःपुरम् ॥ शतधन्वानमारेभेहंतुंहर्तुंमणिंततः ॥ १०
सोपिकृतोद्यमंज्ञात्वाभीतःप्राणपरीप्सया ॥ साहाय्येकृतवर्माणमयाचतसचाब्रवीत् ॥ ११
नाहमीश्वरयोःकुर्यांहेलनंरामकृष्णयोः ॥ कोनुक्षेमायकल्पेततयोर्वृजिनमाचरन् ॥ १२
कंसःसहानुगोपीतोयद्द्वेषात्त्याजितःश्रिया ॥ जरासंधःसप्तदशसंयुगाद्विरथोगतः ॥ १३
प्रत्याख्यातःसचाक्रूरंपार्ष्णिग्राहमयाचत ॥ सोप्याहकोविरुध्येतविद्वानीश्वरयोर्बलं ॥ १४ ॥ यइदं
लीलयाविश्वंसृजत्यवतिहंतिच ॥ चेष्टांविश्वसृजोयस्यनविदुर्मोहिताजया ॥ १५ ॥ यःसप्तहा
यनःशैलमुत्पाट्यैकेनपाणिना ॥ दधारलीलयाबालउच्छिलींध्रमिवार्भकः ॥ १६ ॥ नमस्तस्मै
भगवतेकृष्णायाद्भुतकर्मणे ॥ अनंतायादिभूतायकूटस्थायात्मनेनमः ॥ १७ ॥ प्रत्याख्यातः
सतेनापिशतधन्वामहामणिं ॥ तस्मिन्न्यस्याश्वमारुह्यशतयोजनगंययौ ॥ १८ ॥ गरुडध्वजमा
अंतयोमिह्नस्सनियुक्तः ॥ तस्मिन्नक्रूरेममणिंन्यस्यययोपलायनगुरुः समुरलक्ष्मनादं ॥ १९ ॥ रामा

धा५

२२

श्री भा द ३३

व्यूषतुः द्वारकायाः सकाशात् । क्वापि पलायितौ प्रयोजकौ । मणिहरणे शतधन्वनः प्रवर्तकौ । तत्रा-
क्रूरः कृष्णानुमतेनैव गतः कृतवर्मा तु भक्तपक्षपातमात्रकथमथादिवोपेक्षित इति गम्यते । कथमन्यथा
सर्वज्ञस्यैवं वचनं तयोः संभवतीति । तदेवं श्रीवाराणस्यां दानपतिसमाख्यया मणिहस्ते रुक्मवेदिके
महाध्वरे यजमाने निवसति सति । पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति । कर्णाकर्णि जनपतिजने स

अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधम् । व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ
॥३०॥ अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसाम् । शारीरा मानसास्तापा मुहुर्दैविक
भौतिकाः ॥३१॥ ततोऽष्टछु हृषीकेशो हृद्यान्सर्वानमनीषिणः । वा स्मारिता रिष्ट
न्यासन्नुच्यतां मे यथायथं ॥३२॥ इत्यङ्गोपदिशन्त्येके विस्मृत्य प्रागुदाहृतं । मुनि
वासनिवासे किं घटेतारिष्टदर्शनम् ॥३३॥

त्यभामारामादीनामपि प्रविष्टा सोऽजनसंग्रहाय । अक्रू-
रमाहूय सात्वतेषु श्रीकृष्णः प्राह इदं च भगवन्मतं संगोपकेचनः स्वपयोनस्कारणमक्रूरेणनयनेन
वर्णयन्ति तद्यथा श्रुत्वेष्वपि तु समनुवदन्ति ॥३०॥ अक्रूरे प्रोषित इति । इषयति । इति । अङ्ग हे राजन्
श्रीकृष्णस्य माहात्म्यं विस्मृत्येति । तदेवाह । मुनिवास इति । मुनीनां निवासो यस्मिन्स मुनिवासः

शतयोजनमात्रगामिना ततः परं गंतुमशक्तस्तत्र पतितं हयं विसृज्य गतवान् ॥२०॥ व्यचिनोत् मृगयामास ॥ अक्रूरे मणिरस्तीति सर्वज्ञतया विदितापि रामं वंचनायैव यतोऽहं न वेद्मीति भावः ॥२१॥ अन्वेष्टुमर्हसि ॥२१॥ सर्वज्ञस्यैव वेष्टितमहं वंचनायेति मत्वा रुष्टमनास्तु राह ॥ अहमिति कानिचित्समाः संवत्सरा

मिथिलायामुपवने विसृज्य पतितं हयं ॥ पद्भ्यामधावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा ॥२०॥
पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना ॥ चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिं ॥२१॥
अलब्धमणिरागत्य कृष्ण आहाग्रजांतिकं ॥ वृथा हतः शतधनुर्मणिस्तत्र न विद्यते ॥२२॥
तत आह बलो नूनं स मणिः शतधन्वना ॥ कस्मिंश्चित्पुरुषे न्यस्तस्तमन्विष्य पुरं व्रज ॥२३॥
अहं विदेहमिच्छामि द्रष्टुं प्रियतमं मम ॥ इत्युक्त्वा मिथिलां राजन्विवेश यदुनंदनः ॥२४॥
तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः ॥ अर्हयामास विधिवदर्हणीयं समर्हणैः ॥२५॥
उवास तस्यां कतिचिन्मिथिलायां समा विभुः ॥ तदाशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः ॥
२६ ॥ मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ केशवो द्वारकामेत्य निधनं शतधन्वनः ॥२७॥
अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥ ततः स कारयामास क्रिया बंधोर्हतस्य वै ॥
साकं सुहृद्भिर्भगवान्या याः स्युः सांपरायिकाः ॥२८॥

त् ॥ प्रासंगिकमाह तत इति ॥ सत्यभामामपि अवंचयदिति सूचयन्नाह केशव इति ॥ बंधोः सत्राजि-
तः ॥ सांपरायिकाः पारलौकिकाः ॥२८॥

पुनस्तस्मात्तमेवानुवर्णयन्ति काशिदेशेषु देवेष्ववर्षति यदवर्षति सति ॥३४॥ इत्येवं भूमक्रूरमहि
माप्रतिपादनपरं वृद्धानां वाक्यं श्रुत्वा स्वमेवं तथाप्येतावद्देवकारणं न भवति किंतु मणेः
प्रभाव इति मत्वा इत्येतदं तेपरमेन ॥३५॥ विज्ञानमखिलं येन स चासावत एव वितृष्णायं
भावः ॥ महाभागवतस्यास्य सपादनपि मणावपेक्षा नास्त्येव यस्मादाहूतो मणिना सहैवागत

देवे वर्षति काशीशः श्वफल्कायागताय वै ॥ समस्तां गान्दिनीं प्रादात्ततो वर्षत्स्म का
शिषु ॥३४॥ तत्सुतस्तत्प्रभावोसावक्रूरो यत्र यत्र ह ॥ देवोभिवर्षते तत्र नोपतापा न मा
रिकाः ॥३५॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणं ॥ इति मत्वा समाहूय प्राहाक्रूरं
जनार्दनः ॥३६॥ पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ॥ विज्ञाताखिलचि
त्तज्ञः स्मयमान उवाच ह ॥३७॥ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना ॥ स्यमन्तको
मणिः श्रीमान्विदितः पूर्वमेव नः ॥३८॥ सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः
दायं निनीयापः पिण्डान्विमुच्यर्णं च शेषितं ॥३९॥ तथापि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते
मणिः किंतु मामग्रजः सम्यङ्ग प्रत्येति मणिं प्रति ॥४०॥ दर्शयस्व महाभाग बन्धूनां
शान्तिमावह ॥ अविच्छिन्नमखाद्य वर्तन्ते रुक्मवेदयः ॥४१॥

इति ज्ञात्वेति ॥३४॥ ततः किं मतमित्याह स
त्राजित इति ॥ अपः पिण्डांश्च निनीय दत्वा ऋणं च विमुच्यापहृत्य शेषितं सर्वांशं हं दायं दुहितुः सत्य
भामायाः ॥ सुता गृह्णीयुरिति शास्त्रं च तथास्त्वेवेति ॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ त
त्सुता गोत्रजा बन्धुः शिष्याः सब्रह्मचारिण इति ॥३८॥ अग्रजोपि न प्रत्येति न विश्वसिति नास्तीति

श्री.
भाग.
३
२५

स्या लब्धुं कामः हरिः स्पष्टः इति वा ॥४२॥ रत्नं मिथ्याभिशापं संमृज्य ग्रन्थैर्दुर्यशः कलंकादि निमेषेणाग्नीत्यामभ्ययल स्मै प्रत्यर्पितवानिति ॥४३॥ दुष्कीर्तिं तत्कलंकं दुरितं चेति ॥४४॥ इति श्री दशमस्कंधे भावार्थदीपिकायां सप्तपंचाशत्तमः ५७ ॥ अष्टपंचाशत्तमे तु कृष्णः पंच करे ग्रहीत् ॥ कालिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणां ॥१॥ कालिंदी निजलाभाय तपः परमुपेयुषी परिणीता प्रियावासमिंद्रप्रस्थमथागमत् श्री

एवं सामभिरालब्धः श्वफल्कतनयो मणिं आदाय वाससाच्छन्नं ददौ सूर्यसमप्रभं ॥४२॥ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ॥४३॥ यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च ॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्तिं दुरितमपोह्य याति शांतिं ॥४४॥ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तपंचाशत्तमोऽध्यायः ॥५७॥ श्रीशुक उवाच ॥ एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः ॥१॥ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं ॥ उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं ॥२॥ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥३॥ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं फाल्गुनं परिरभ्याथ यमाभ्यां चाभिवंदितः ॥४॥ परमासन आसीनं कृष्णा कृष्णमनिंदिता नवोढा व्रीडिता किंचिच्छनैरेत्याभिवंदत ॥५॥ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः

तान्नश्शानपि दुपदस्य देशनः सर्वैर्दृष्टशान् (तः निषसादासनेऽन्ये च पूजिताः पर्युपासिताः ॥६॥

युयुधानः सात्यकिः ॥१॥ प्राणा इंद्रियाणि मुख्यं पंच वृत्तिं प्राणमिव ॥२॥ अंगस्पर्शेन हतमेनो येषां ॥३॥ ज्येष्ठयोः पादाभिवंदनं कृत्वा समेना लिंगितः कनिष्ठाभ्यामभिवंदितो बभूव ॥४॥ कृष्णा द्रौपदी बहुभार्यासत्यपि अनिंदिता दृष्टिनापार्थैन

दशमस्कंधपरिशीता ५
२५

निंदिता २

प्राणापानोदानव्यानसमानाः १

श्रुतिदार्ढ्येन स्नेहेन यार्द्रसज्जले हृदयो यस्यास्तया परिप्लुतः ॥ तया परिष्वज्य स बांधवाय स्वस्तः ॥७॥ प्रेमसागवैक्ल
व्येतेन रुद्धः कंठो यस्याः क्लेशापाये आत्मनिदर्शनं यस्य तं भजनाभक्ता नो क्लेशापाये आत्मनिदर्शनं
यस्य तं भजतां भक्तानां क्लेशापायायात्मानं दर्शयतीति वा ॥८॥ ज्ञातीन्वै पृच्छनः अस्मान् यदा भा
ताः कृतः प्रोषितः ॥९॥ ज्ञातीनिति वचनात्त्वां प्रेमोद्वारयति ॥ न ते अस्तीति तत्र हेतुः विश्वस्येति ॥ सुहृच्च
प्युपासमागतः कृताभिवादनस्तया निद्रा इशी इष्टया भिरंभितः ॥ आह स्म वा स्तात् कुशलेस
दह्यंपोपितस्नुसारं परिष्वज्य बांधवः ॥ तस्मात्प्रेमवैक्लव्यरुद्धकंठवा स्नुलोचना ॥ स्मरंतीना
त्वहं लोका क्लेशापायात्मदर्शन ॥८॥ तदैव कुशलं नो भूत्सनाथास्ते कृतावयं ॥ ज्ञातीन्नः
स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥९॥ न ते अस्ति स्वपरभ्रान्तिर्विश्वस्य सुहृदात्मनः ॥ तथा
पि स्मरतां कृष्ण क्लेशानंदसि हृदि स्थितः ॥१०॥ युधिष्ठिर उवाच ॥ किं न आचरितं श्रेयो न वे
दाहमधीश्वर ॥ योगीश्वराणां दुर्बोधो यन्नोहष्टः कुमेधसाम् ॥११॥ इति वै वार्षिकान्मासान्रा
ज्ञा सोभ्यर्थितः सुखं ॥ जनयन्नयनानंदमिंद्रप्रस्थौकसां विभुः ॥१२॥ एकदा रथमारुह्य विज
ध्वजे यो वानरध्वजं ॥ गांडीवं धनुरादाय तूणौ चाक्षयसायकौ ॥१३॥ साकं कृष्णेन सन्नद्धो विह
र्तुं विपिनं महत् ॥ बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा ॥१४॥ तत्राविध्यच्छरैर्व्याघ्रान्सू
करान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान्हरिणान्शशशल्लकान् ॥१५॥ तान्निन्यु
आत्मा वनस्पतिं सिना प्रायसि ॥१७॥ कुमेधसां ॥ किं करा रासे मध्यान्य वे एयुपागते ॥१६॥
विपयासक्तचित्ता नो हृष्टोसि ॥१८॥ सुखमवसदित्यर्थः ॥ सुखमभ्यर्थित इति वा क्रियासमासिः
कालिंदीदर्शनप्रसंगमाह ॥ एकदेति ग्रंथयाः सायका ययोस्तौ तूणौ इषुधी ॥१३॥ राज्ञे युधि
ष्ठिरायमध्यान्कर्मार्पितान् ॥१९॥ ॥ ॥

बीभत्सुरर्जुनः ॥१२॥ सख्या श्रीकृष्णेन ॥ अयं मां काममेदिनिशं कामाह ॥ नान्यमिति ॥ यादावेवतद्विदि
त्वा ॥ प्रसंगात्कालीं चरितांतरमाह यदैवेति ॥ यदैवं संदिष्टो विज्ञापितः श्रीकृष्णः तदैव तेन ॥ विश्वक
र्मणा देवशिल्पिना नगरं कारयामास ॥२४॥ भगवान्निवेशितश्चायेत्यर्थः स्वयं गुणानां नपि अर्जुनस्य धनुरादि

तृट्परीतः परिश्रान्तो बीभत्सुर्यमुनामगात् ॥ तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ॥१७॥
कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां ॥ तामासाद्य वरारोहां सुद्विजां रुचिराननां ॥१८॥
पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां ॥ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्ष
सि ॥१९॥ मन्ये त्वां पतिमिच्छंतीं सर्वं कथय शोभने ॥२०॥ कालिंद्युवाच ॥ अहं देवस्य सवि
तुर्दुहिता पतिमिच्छती ॥ विष्णुं वरेण्यं वरदं तपः परममास्थिता ॥२१॥ नान्यं पतिं वृणे वीर
तमृते श्रीनिकेतनं ॥ तुष्यतां मे स भगवान्मुकुंदोऽनाथसंश्रयः ॥२२॥ कालिंदीति समाख्या
ता वसामि यमुनाजले ॥ निर्मिते भवने पित्रा यावदच्युतदर्शनं ॥२३॥ तथावदद्गुडाकेशो वा
सुदेवाय सोपि तां ॥ रथमारोप्य तद्विद्वान्धर्मराजमुपागमत् ॥२४॥ यदैव कृष्णः संदिष्टः पा
र्थानां परमाद्भुतं ॥ कारयामास नगरं विचित्रं विश्वकर्मणा ॥२५॥ भगवांस्तत्र निवसन्स्वा
नां प्रियचिकीर्षया ॥ अग्नये खांडवं दातुमर्जुनस्यास सारथिः ॥२६॥ सोऽग्निस्तुष्टो धनुरदा
द्धयान्श्वेतान्रथं नृप ॥ अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः ॥२७॥ मय
श्च मोचितो वह्नेः सभां सख्य उपाहरत् ॥ यस्मिन्दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः ॥२८॥
स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः ॥ आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥२९॥

लाभाय ॥ सारथिरास खांडवेनामइंद्रवने ॥२५॥ अदात् यावत्तूणौ अक्षयसायकौ ॥२६॥ खांडवदाहकाले हेतना
णात्सखेर्जुनाय यया सभा सिमिति सा मामसतोत निर्देशः यस्यामिति जलस्थलयोर्दृशो दृष्टेर्भ्रमः यथा जले

स्पृष्टएषः स्मृतः स्मृतश्च यस्मिन् ॥ २६ ॥ पंचमं मित्रविंदाविवाहमाह ॥ विंदानुविंदावितिद्वाभ्यां आवं
त्याववंतीराजानौ ॥ ३० ॥ षष्ठमाह ॥ नग्नजिदिति कौसल्यः अयोध्याधिपतिः सत्यानामकन्याभव
त् ॥ देवी कीर्तिमती नाग्नजिती पितृनाम्ना प्रसिद्धेत्यर्थः ॥ ३२ ॥ वीरस्सगंधमपिनसहंते इति तथा नाना
अयोपयेमे कालिंदी सुपुण्यर्तूडुजिते वितन्वन्परमानंदं स्वानां परममंगलं ॥ २९ ॥ विंदानु
विंदावावंत्यौ दुर्योधनवशानुगौ ॥ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ॥ ३० ॥ राजाधिदे
व्यास्तनयां मित्रविंदां पितृष्वसुः ॥ प्रसह्य हृतवान्कृष्णो राजन्राज्ञां प्रपश्यतां ॥ ३१ ॥ नग्नजि
न्नाम कौसल्य आसीद्राजातिधार्मिकः ॥ तस्य सत्याभवत्कन्या देवी नाग्नजिती नृप ॥ ३२ ॥ न
तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् ॥ तीक्ष्णशृंगान्सुदुर्धर्षान्वीर्यगंधासहान्खलान् ॥ ३३ ॥
तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः ॥ जगाम कौसल्यपुरं सैन्येन महता वृतः ॥ ३४ ॥ स
कोसलपतिः प्रीतः प्रत्युत्थानासनादिभिः ॥ अर्हणेनापि गुरुणा पूजयन्प्रतिनंदितः ॥ ३५ ॥
वरं विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमापतिं ॥ भूयादयं मे पतिराशिषोमलाः क
रोतु सत्या यदि मे धृतो व्रतैः ॥ ३६ ॥ अर्चितं पुनरित्याह नारायण जगत्पते ॥ आत्मानंदेन पूर्णा
स्य करवाणि किमल्पकः ॥ ३७ ॥ यत्पादपंकजरजः शिरसा बिभर्ति श्रीरब्जजः सगिरिशः
सह लोकपालैः ॥ लीलातनूः स्वकृतसेतुपरीप्सया यः काले दधत्स भगवान्मम केन तुष्ये
त् ॥ श्रीशुक उवाच ॥ तमाह भगवान्हृष्टः कृतासनपरिग्रहः ॥ मेघगंभीरया वाचा सस्मितं
लान दुर्हृतान ॥ ३३ ॥ नृपाज्ञ्याचतियलेन न लभ्यो ॥ ३४ ॥ प्रतिनंदितं लं प्रतिनंदि कुरुनंदन ॥ ३९ ॥
नवान् ॥ श्रीकृष्णेन वासः प्रतिनंदितः ॥ ३८ ॥ रामानुजायनमः ॥ ३९ ॥

हेनरैं इराजन्यबंधोः ॥ तत्रियस्य शुल्कदाः इत्यादिप्रदाः ॥४०॥ गुणानामेकमेव धाम स्थानं तत्तथा
भूतस्य तवांगे ॥४२॥ दुर्दान्ताः अशिक्षिताः दुरवग्रहाः अपराधवन्तः कृतस्तदाह एतैरिति भग्नाः भंगं प्रा

ॐ श्रीभगवानुवाच ॥ नरेन्द्र याच्ञा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां नहि शुल्कदा वयं ॥४०॥ राजोवाच ॥ कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः ॥ गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी ॥ किंत्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥४२॥ सप्तैते गोवृषा वीर दुर्दान्ता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥४३॥ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन ॥ वरो भवानभिमतो दुहितुर्मे श्रियःपते ॥४४॥ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ॥४५॥ बद्ध्वा तान्दामभिः शौरिर्भग्नदर्पान्हतौजसः ॥ व्यकर्षल्लीलया बद्धान्बालो दारुमयान्यथा ॥४६॥ ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ॥४७॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं पतिम् ॥ लेभिरे परमानंदं जातश्च परमोत्सवः ॥४८॥ शंखभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्रमुदिताः सुवासःस्रगलंकृताः ॥४९॥ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससम् ॥५०॥

त्मा ॥४३॥ एतान्गृहीतास्तस्य कन्येति ॥ समयः कृतः यत् ॥४४॥ यदि इमे गोवृषाः समर्था कृत्वेति
वक्तीनां योषितां सहस्राणि वाहं संभोगयोग्यः स्वामिसत्या अस्य सापत्न्यप्रदर्शनार्थमात्मनः समर्थाक

नागान् ॥ नागेभ्यः शतगुणान्रथान् रथेभ्यः शतगुणाश्चवकोटीः अश्वान् तेभ्यः शतगुणान् नरान्नवैसा
ति ॥५१॥ यदुभिर्गोवृषैः भग्नवीर्याअपिसहदुर्मर्षाः कुरवः ॥५२॥ अस्यतः क्षिपतः यदुज्ञातीनितियावत्
॥५३॥ सन्तमं किवाद ॥ श्रुतकीर्तिर्नाम या पितृष्वसा तस्याः सुतां भद्रांनाम कैकेयीं नहेराजा ॥५५॥ अथ

नवनागसहस्राणि नागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वान् अश्वाच्छतगुणान्नरान् ॥५१॥
दंपती रथमारोप्य महत्या सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो यापयामास कोसलः ॥५२॥ श्रुत्वै
तद्रुरुधुर्भूपा नयंतं पथि कन्यकां ॥ भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥५३॥ तानस्यतः श
रव्रातान्बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानिव ॥५४॥ पारिबर्हमुपा
गृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥५५॥ श्रुतकीर्तेः सुतां
भद्रामुपयेमे पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥५६॥ सुतां च मद्राधिप
तेर्लक्ष्मणां लक्षणैर्युतां ॥ स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥५७॥ अन्याश्चैवंविधा भा
र्याः कृष्णस्यासन्सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥५८॥ इति श्रीभाग
वते महापुराणे दशमस्कंधे अष्टपंचाशत्तमः ५८ ॥ रामानुजाय नमः ५८ ॥

ममाह ॥ सुतां चेति ॥ एक एव स श्रीकृष्णो लक्ष्मणां जहार ॥५७॥ तस्य निरोधः अंतःपुरं तस्मात् ॥ भैष्मी जां
बवती भामा सत्या भद्रा च लक्ष्मणा ॥ कालिंदी मित्रविंदा चेत्यष्टावष्टमहास्त्रियः ॥५८॥ इति श्रीभाग
वते भावार्थदीपिकायां दशमे अष्टपंचाशत्तमोऽध्यायः ५८ ॥ ॥ ॥

कृनचष्टितमेभौमंहत्वातेनाहृतान्हरिः ॥ कन्याः सहृतधनाः प्राप्यपारिजातंदिवोहरन् ॥ १ ॥ पारिणीयततस्ता भिस्तन्मनोरथपूरणोः ॥ प्रातस्तासमाप्यसौरेमेतद्दृहस्थवत् ॥ २ ॥ येनताः स्त्रियोनिरुद्धाः सभौमः चकार ग्रेनकारणेनहतस्तदाचक्ष्वेति ॥ १ ॥ इंद्रेणभौमविचेष्टितंज्ञापितः सन् ॥ प्राग्ज्योतिषपुरंभौमनगरंययौ विमत्वय ॥ कथंभूतेनइंद्रेणहृतछत्रेणयस्यतेनलोकपालप्रधानत्वादिइंद्रस्यवरुणछत्रंहृतमपितदेवमानम यहृ ॥ तथोक्तं ॥ हृतकुंडलेयस्याः सादितिर्बंधुर्मातायस्यतेनहृतममराद्रेःस्थानंममणिपर्वतलक्षणंयस्यते

राजोवाच ॥ यथाहतोभगवताभौमोयेनचताःस्त्रियः ॥ निरुद्धाएतदाचक्ष्वविक्रमंशार्ङ्गधन्वनः १

श्रीशुकउवाच ॥ इंद्रेणहृतछत्रेणहृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेनज्ञापितोभौमचेष्टितं २

सभार्योगरुडारूढः प्राग्ज्योतिषपुरंययौ ॥ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं ॥ ३ ॥ मुरपाशायुतैर्घोरैर्दृढैः सर्वतआवृतं ॥ गदयानिर्बिभेदाद्रीन्शस्त्रदुर्गाणिसायकैः ॥ ४ ॥ चक्रेणाग्निं जलंवायुंमुरपाशांस्तथासिना ॥ शंखनादेनयंत्राणिहृदयानिमनस्विनां ॥ ५ ॥ प्राकारंगद यागुर्व्यानिर्बिभेदगदाधरः ॥ पांचजन्यध्वनिंश्रुत्वायुगांताशनिभीषणं ॥ ६ ॥ मुरः शयान न ॥ २ ॥ सत्यभामायासहभगवंतमिंद्रआगत्य (उत्तस्थौदैत्यः पंचशिराजलात् ॥ ७ ॥

विज्ञापितवान् ॥ तदातस्याः कौतुकायतयाभार्ययासह ययाविति यद्वात्वदनुज्ञयैवनत्वंहंन्निष्याः मीतिप्रसोक्तेसमेवववरेदंतंसत्यकर्तुं सत्यभामायाभूम्यंशत्वात्तयासहययौयद्वा ॥ नारदानीतपा रिजातेकरुक्मिण्यैदत्तेसतिकुपितांसत्यभामांसांत्वयन्नातभ्यंपारिजातमेवदास्यामीति दृविशेषप्रसिद्धं ॥ तदर्थंतांनीतवानितिनिविज्ञेयंगरुडेनयानेकारणमाह ॥ गिरिदुर्गैरित्यादितैः रुपलक्षितंजलाग्न्यनिलेषुसर्वतोवर्तमानेदुर्गमिपुरंगंतानाशनेर्धनिवद्भीषणंपरिखायाज।

आविध्य भ्रामयित्वा उल्बणः महाद्भुतनादं इत्युक्त्वा ययः ॥८॥ तस्मै श्रीकृष्णाय गदां व्यमुंचत ॥९॥ इंद्रतेजसा वज्रेण प्रतिक्षि-
प्यादद्भुतं तया जामर्षजुषः पीठं पीठनामानं निरगात् ॥ निरगमन ॥१२॥ निकृत्तानि शीर्षादीनि येषां तान्
त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगान्तसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मु-
खैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ॥ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः ॥
सरोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाहमावृणोत ॥८॥ तदापतद्वै त्रिशिखं गरुत्मते ह-
रिः शराभ्यामभिनत्त्रिधोजसा ॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्यमुंचत ॥९॥
तामापतंतीं गदया गदां मृधे गदाग्रजो निर्विभिदे सहस्रधा ॥ उद्यम्य बाहूनभिधावतोजितः
शिरांसि चक्रेण जहार लीलया ॥१०॥ व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेंद्रतेजसा ॥
सा ॥ तस्यात्मजाः सप्त पितुर्वधातुराः ॥ प्रतिक्रियामर्षजुषः समुद्यताः ॥११॥ ताम्रोंतरिक्षः
श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता नि-
रगन्धृतायुधाः ॥१२॥ प्रायुंजतासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः ॥
तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह ॥१३॥ तान्पीठमुख्याननयद्य-
मालयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नर-
को धरासुतः ॥१४॥ निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत ॥ दृष्ट्वा सभा-
र्यं गरुडोपरिस्थितं ॥ सूर्योपरिष्टात्सतडिद्घनं यथा ॥१५॥ कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधा-
श्च सर्वे युगपत्स्म विव्यधुः ॥ तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः ॥
१६॥ शतघ्नी शक्तिविशेषं ॥ विचित्रवाजाः पत्राणि येषां ते बाणाः ॥ निकृत्ता बाहवः शिरोध्राः कंधरा विग्र-
हाश्च देहा यस्य तत् ॥ नरेंद्रवंतेयदाविध्वस्तस्मित्रेवत्राणो ॥१७॥ रामानुजायेन मोनमः ॥१८॥ ॥ राम

अन्यास्त्वर्थैः कुरूद्वहेति संबोधनं ॥ तथा हि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि तान्यस्मैः पूर्वमेव तत्सै-
न्यं पूर्वं हत्वा पश्चाच्छस्त्रास्त्राणि विच्छेद ॥ तत्राप्येकैकमस्त्रं त्रिभिः शरैरित्याश्चर्यं ॥१७॥ किंच गरु

याति योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह ॥ हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः
१८॥ उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् ॥ गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः
१९॥ पुरमेवाविशन्नार्ता नरको युध्ययुध्यत ॥ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं ॥ तं भौमः
प्राहरच्छक्त्या वज्रः प्रतिहतो यतः ॥२०॥ नाकंपत तया विद्धो मालाहत इव द्विपः ॥ शूलं भौ
मः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः ॥ शूलं भौमोऽच्युतं हन्तुमाददे वितथोद्यमः ॥२१॥ तद्विस
र्गात्पूर्वमेव नरकस्य शिरो हरिः ॥ अपाहरद्गजस्थस्य चक्रेण क्षुरनेमिना ॥२२॥ सकुंडलं चारु
किरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् ॥ हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुं
दं विकिरंत ईडिरे ॥२३॥ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे ॥ सवैज
यंत्या वनमालयार्पयत्प्राचेतसं छत्रमथो महामणिं ॥ अस्तौषीदथ विश्वेशं देवी देववरा
र्चितम् ॥ प्रांजलिः प्रणता राजन्भक्तिप्रवणया धिया ॥२५॥

त्मतेति ॥१९॥ यतः यया शक्त्या वज्रः प्रतिहतः असौ गरुडस्तया नाकंपत ॥ गरुडे वितथोद्यमः सन्
॥२१॥ प्रतप्तजांबूनदे यानि रत्नानि तैर्भास्वरे ॥ सर्वशास्त्रनमंदरशिखरं महामणिं चार्पयदिति ॥२५॥
रामानुजायनः ॥ २५

ऐश्वर्यं ज्ञातानाभृद्भिः स्तोतिति नमस्त इति परमात्मन। देवाद्यन्तर्यामिन् ॥२४॥ येन मैत्रेण गाङ्गेयः प्रसन्नः पूर्वमासीत् ॥ तेन मैत्रेण नमस्यामि नमः इति ॥२५॥ पंकजं नाभौ यस्य तस्मै जगत्कारणायेत्यर्थः ॥ अत एव सर्वकीर्तिमयी पंकजानां माला विद्यते यस्य तस्मै ॥ एवं भूते ॥ पंकजवत्प्रसन्ने तापोपशमने नेत्रे यस्य तस्मै पंकजवत्स्मेरौ पंकजौ किञ्जौ चाङ्घ्री यस्य तस्मै नमः इति ॥२६॥ किं च भगवते निरतिशयैश्वर्याय वासुदेवाय सर्वभूताश्रयाय पूतपवित्रसर्वव्यापिने नदि सर्वभूतान्वयत्वपरिच्छिन्नस्य संभवतीति ॥ कुतः सर्वाश्रयत्वं तत्राह ॥ प्रकृत्यायस्तत्वस्मात्कार्यात्पूर्वमेव सते ॥ पूर्वमेवादिमिहाक्षमिति तिन्नकृषस्य प्रकृषत्वमिति श्रुतेः

भूमिरुवाच ॥ नमस्ते देवदेवेश शंखचक्रगदाधर ॥ भक्तेच्छोपात्तदेहाय परमात्मन्नमोऽस्तु ते ॥२५

नमः पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजाङ्घ्रये ॥२६॥ नमो भगवते तुभ्यं वासुदेवाय विष्णवे ॥ प्रकृत्याद्यादिबीजाय पूर्णबोधाय ते नमः ॥२७॥ अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये ॥ परावरात्मभूतात्मन्परमात्मन्नमोऽस्तु ते ॥२८॥ रामजानीनमः २८

एतदपि कुतः आदिबीजाय ॥ आदेर्जगतः कारणाय ॥ एवमपि नमदादिवज्ज्ञानाद्रूमित्याह पूर्णबोधायेति ॥२७॥ नन्वेवमपि सकारणत्वं सजन्मत्वं स्यात् कुत आह ॥ अजायेति ॥ स्वयमजाय ॥ अन्यस्य च जनयित्रे ॥ उभयत्रापि क्रमेणादेतु हयं ब्रह्मणे बृहते अनंतशक्तये इति च ॥ बृहत्वादजत्वं अनंतशक्तित्वाज्जनयितृत्वमित्यर्थः ॥ ननु पित्रादयः पुत्रादीनां जनकाः तेषां च तन्मूर्वे तेषां च स्वकर्महावेण जीवाः किमत्रा दत्त आह ॥ परावरात्मन्नित्यादि ॥ पित्राद्यात्मकत्वात्त्वमेव जनक इत्यर्थः ॥२८॥ ननु गुणाभिघोत्पत्त्यादि हेतवः ते च प्रधानस्यैव न तस्य पुरुषः क्षोभकः न त्वत्र च कालो निमित्तमिति प्रसिद्धं किम

ना ॥२८॥

त्वं वा इति ॥ तमसो धारणेऽप्यसंभृत एव स्थानाय पालनाय जगतः सृष्ट्याद्यर्थं उत्कटं रजआदित्वमेव विभर्षि
विसृजसीत्यर्थः ॥ २६ ॥ कालं प्रधानं पुरुषाश्रयं तद्विकारान् सति ॥ त्वं तु परः सर्वव्यतिरिक्तः अतस्त्वमेव जन
नयितेत्यर्थः ॥ २७ ॥ कार्यकारणप्रपंचस्य तदव्यतिरेकं तस्य सर्वव्यतिरेकमुपपादयति ॥ अहं भूमिः मा
त्राणि तद्देवा मन इंद्रियाणि च ॥ त्रिविधाहंकारकार्याणि कर्ता अहंकारः ॥ ३० ॥ एवं सत्ताश्रयेत तत्तत्

त्वं वैरसि हृदन्तर उत्कटं प्रभो तमो निरोधाय विभर्ष्यसंभृतः ॥ स्थानाय सत्त्वं जगतो जगत्पते का
लः प्रधानं पुरुषो भवान्परः ॥ २८ ॥ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि
कर्ता महानित्यखिलं चराचरं त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ २९ ॥ तस्यात्मजोऽयं तव पादपंक
जं भीतः प्रपन्नार्तिहरोपसादितः ॥ तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्म
षापहं ॥ ३१ ॥ श्रीशुक उवाच ॥ इति भूम्यार्चितो वाग्भिर्भगवान्भक्तिनम्रया ॥ दत्त्वाभयं भौम
गृहं प्रविवेश सकलर्द्धिमत् ॥ ३२ ॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं ॥ भौमाहृतानां
विक्रम्य राजभ्यो ददृशे हरिः ॥ ३३ ॥ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः ॥ मनसा वव्रिरेऽभी
ष्टं पतिं दैवोपसादितं ॥ ३४ ॥ भूयात्पतिरयं मह्यं धाता तदनुमोदतां ॥ इति सर्वाः पृथक्कृष्णे भा
वेन हृदयं दधुः ॥ ३५ ॥ रामानुजाय नमः रामजी नमः ॥ श्रीरामजी नमो नमः ॥ ३६ ॥ ॥

पन्नार्तिहर तस्य नरकस्यायं भगदत्तो नाम भीतः ॥ अतएव मया तव पादपंकजमुपसादितः ॥ ३१ ॥ अ
भयं दत्त्वा षट्सहस्राधिकमित्यपि ज्ञातव्यं यदाह ॥ श्रीपराशरः ॥ कन्यापुरे स कन्यानां षोडशधातुल्यविक्र
मः ॥ प्रागाधिकानि ददृशे सहस्राणि महामते इति ॥ राजभ्य इत्युपलक्षणं सिद्धादिभ्य इति ॥ तथा
दि ॥ तेनैवोक्तं ॥ देवसिद्धासुरादीनां नृपाणां च जनार्दन ॥ हृत्वा हि सोऽसुरः कन्या रुरोध निजमंदि

पारिजातोऽन्वस्थापयामास ॥ समस्ताः कमनीयास्तत्ताः विरजो वराश्च ताः ते यानैः शिबिकाभिः
सुपिच महाकोशानिति ॥ ३८ ॥ स प्रियः सत्यभामासद्मनि ॥ ३५ ॥ गृहोद्याने निष्कुटे उपशोभय
ति यः ॥ संग्रामे विबुधा विनिर्जिता इन्द्रमुखाः यः संग्राममुखे तत्र ॥ ३० ॥ ननु कथमस्थापि तमनोरथे
न श्रीकृष्णेन महेन्द्रेण सह संग्राममङ्गीकृत्याह यथा च इति ॥ प्रस्तुतमर्थसाधनमिति वक्तुमाह यथा च
ताः पारिजातोद्भवं दृष्ट्वा विरजा वराः ॥ न यानैर्महाकोशान्वया स्वान्हविरामहन् ॥ ३
८ ॥ पेतावनं कुलेभाश्च चतुरङ्गं बलं रविसन्निनः ॥ पाण्डुराश्च वतः पुष्टिः प्रेषयामास केशवः ॥ ३
गत्वा सुरेन्द्रभवनं देवादितिपश्चकुण्डले ॥ पूजितः त्रिदशैरिन्द्रं समहेन्द्रागणाच्च स प्रियः ॥ ३५ ॥ नो
दितो भार्यया सा द्युपारिजातं गरुत्मति ॥ आरोप्य सेन्द्रान्विबुधानिनिर्जित्यानयत्पुरे ॥ ३९ ॥
स्थापितः सत्यभामाया गृहोद्याने उपशोभितः ॥ अन्वयुर्भ्रमराः स्वर्गात्तद्गन्धासवलम्पटाः
४० ॥ यथा च आनम्यकिरीटकोटिभिः पादौ स्पृशन्तच्युतमर्थसाधनम् ॥ सिद्धार्थयानेन वि
रचयन्नेन महानन्दो सुरगणांश्च नमो विनयाद्यतो ॥ ४१ ॥ अथो मुहूर्ते एकस्मिन्नानागारेषु ताः
स्त्रियः ॥ यथोपयेमे भगवान्तावद्रूपधरोऽव्ययः ॥ ४२ ॥ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्त
साम्यातिशयेष्ववस्थितः ॥ रेमे रमाभिर्निजकाम संप्लुतो यथेतरो गार्हकमेधिकांश्चरन् ॥ ४३
निधानतः निरस्यते विग्रहं करोति महानपि तमसः क्रोधः आयत्तो यन्निकतो ॥ यथा यथावत् अने
न देवक्यादिबन्धुजनसमागमो विप्रसादितः रुचयो गावयेन सुविनः ॥ ४८ ॥ अव्ययः सर्वत्रापि सम्पूर्णोऽप
व ॥ ४४ ॥ अव्ययः सर्वत्रापि सम्पूर्णो पव ॥ ४५ ॥ अहो भागवतानां रणा भिन्या रुचिभिः गृहेषु विन ॥ अन
र्वाणि कर्माणि करोति तथा सः निरस्तसाम्यमतिशयाश्च ये रमेषां तेषु गृहेषु ॥ अनपायी अवस्थि

श्री॰
भा॰ द॰
३
६०

प्रत्युद्गमादीनसमर्हितमवलोकं च तत्पूर्वकं नवसंगमं च तद्दृग्जल्पं च तस्मिन् लज्जां च भेजुः ॥ ४४ ॥ विश्र-
मणं संवाहनं केशप्रसारः केशप्रसाधनं दासीनां शतान्यपि विद्यन्ते यासां तथाभूता अपि स्वयं विभोर्दास्यं
विदधुरिति ॥ ४५ ॥ इति श्रीदशमस्कंधे सचोपिन्यां टीकायामेकोनषष्टितमः ५९ ॥ अथ षष्टितमे हैम-
ल ॥ परिहासेन रुक्मिणीं कोपयित्वा ततः प्रेमकलहेन समसान्त्वयत् ॥ १ ॥ रामा रामजनानंदमहोद

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयां ॥ भेजुर्मुदाविरतमे-
धितयानुरागहासावलोकनवसंगमजल्पलज्जा ॥ ४४ ॥ प्रत्युद्गमासनवरार्हणपादशौचतां-
बूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभो-
र्विदधुः स्म दास्यं ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पारिजातहरणनरका-
सुरवधो नामैकोनषष्टितमोऽध्यायः ॥ बादरायणिः ॥ कर्हिचित्सुखमासीनं स्वतल्पस्थं
जगद्गुरुं ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥ १ ॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यव-
तीश्वरः ॥ स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ २ ॥ तस्मिन्नंतर्गृहे भ्राजन्मुक्तादाम-
भिः पुष्पैर्द्विरेफकुलनादिते ॥ जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ॥ ४ ॥ पारिजात-
वनामोदवायुनोद्यानशालिना ॥ धूपैरगुरुजै राजन् जालरंध्रविनिर्गतैः ॥ ५ ॥

विलंबिना ॥
विराजते वि
तानेन दीपैर्म
णिमयैरपि ।
मल्लिकादाम

पविद्धत्वैः हरिणापि प्रेमकलहच्छद्मनैश्वर्यमीर्यते ॥ ५ ॥ स्वतल्पस्थं पर्यंकस्थं ॥ १ ॥ वक्ष्यमा-
णा ॥ हास्यवाक्यानां स्त्रियाः श्रीकृष्णे परमप्रेमसंभावयितुं तस्योक्तमेव तत्त्वमनुस्मारयति ॥ यस्त्वेति
यादोनावत्रिभिः ॥ श्रीकृष्णं मंदिरमंतु वर्णयति ॥ तस्मिन्निति ॥ तच्छ्रुतेनाति प्रसिद्धमाह ॥ भ्राजंति
मुक्तादामानि तेषां विलंबिनां सनियमितं सेन वितानेन विराजनतत्तोयानं विराजितपदे

पयसः क्षीरस्य फेनवन्मृदुनि पर्यंके कस्यैकशिपूत्तमे हंसतूलिकायां उपविष्टस्य सेवनं ॥ ६ ॥ नदेवाभिन
यतिवालव्यजनमिति ॥ उपाच्युतं ग्रच्युतस्य समीपसामत्तिनूपुराभ्यां रेजे क्वणयती सगणामयो नूपुरैः
कूजयंती ॥ तयोगुलीयवलयव्यजनानि ॥ ग्रग्रहस्ते हस्ताग्रे यस्याः सा च वस्त्रांतेन गूढौ यौ कुचौ
तयोः कुंकुमेन शोणो हारस्तस्य भासा नितंबधृतया परार्ध्या महामूल्या कांचीतया च रेजे ॥ ७ ॥ तां
निरीक्ष्य प्रीतः सन् ॥ स्मयमानो हरिः ग्राबभाषे ॥ कथंभूतां ॥ या लीलया धृततनोः तस्यानुरूपा ॥ ग्रनुर

पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे ॥ उपविष्टं सुखासीनं जगतामीश्वरं पतिं ॥ ६ ॥ वालव्य
जनमादाय रत्नदंडं सखीकरात् ॥ तेन वीजयती देवी उपासां चक्र ईश्वरं ॥ ७ ॥ सोपाच्युतं क्व
णयती मणिनूपुराभ्यां रेजे ऽंगुलीयवलयव्यजनाग्रहस्ता ॥ वस्त्रांतगूढकुचकुंकुम
शोणहारभासा नितंबधृतया च परार्ध्यकांच्या ॥ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या
लीलया धृततनोरनुरूपरूपा ॥ प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां
हरिराबभाषे ॥ ९ ॥ श्रीभगवानुवाच ॥ राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः ॥ महा
नुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः ॥ १० ॥ तान्प्राप्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् ॥ द
त्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषे ऽसमान् ११ पंक्ति यस्मात्तां ॥ यथोक्तं श्रीपराशरेण देवत्वे दे
हेयं मानुषत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुमिति ॥ किंच ॥ ग्रलकैः कुंडला
भ्यां निष्केण पदकेनालंकृतकंठेन च वक्त्रे दिव्यशोभिते उल्लसन्ती स्मितसुधा यस्यास्तां ॥ ९ ॥ सर्वगु
णयुक्ताया ग्रपि तव बुद्धिर्मे देया शापये नाह ॥ राजपुत्रीत्यादि एकादशभिः हे राजपुत्रि ॥ लोकपाला
नामिव विभूतिर्येषां तैः तथानुभावैराढ्यै रूपादिभिरूर्जितैः ग्रपूर्वमीप्सितासि ॥ नाग्नि
तानो स्मान्कस्माद्वृतवतीत्व ॥ ११ ॥ ॥ रामानुजायनमः ॥ रामजीनमः रामानुजायनमः ॥ ११

श्रीः भा० द० ३९

किं तु प्राय इत्याह ॥ राजभ्यो जरासंधादिभ्यो बिभ्यतः भयं प्राप्नुवतः ॥ १२ ॥ अस्पष्टवर्त्मनां अविज्ञाताचाराणां अलोकपथं अहितापारनं पदवीं मार्गं आस्थिताः अनुसृताः ॥ १३ ॥ किंच ॥ आत्मसमं परस्परमनुरूपं जन्मैश्वर्याभ्यां सहिता ॥ आकृतिः रूपं ज्ञातिर्वा भवः समानवयः ॥ १५ ॥ आपातिनं दीर्घा समीक्षा विचारो यस्यास्तया ॥ १६ ॥ अथेदानीमपि त्वं दिक्किमित्यामीत्याह ॥ अमी नित्वेदित्या शंकाह ॥ चैद्य इति मम मां द्विषन्ति ॥ १८

राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान् ॥ बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृपासनान् ॥ ११ ॥ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषां ॥ आस्थिताः पदवीं सुभ्रु प्रायः सीदन्ति योषितः ॥ १२ ॥ निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे ॥ १४ ॥ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥ १५ ॥ वैदर्भ्येतदविज्ञाय त्वयादीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥ १६ ॥ अथात्मनोऽनुरूपं वै भजस्व क्षत्रियर्षभं ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥ १७ ॥ चैद्यशाल्वजरासंधदन्तवक्त्रादयो नृपाः ॥ मम द्विषन्ति वामोरु रुक्मी चापि तवाग्रजः ॥ १८ ॥ तेषां वीर्यमदांधानां दृप्तानां स्मयनुत्तये ॥ आनीतास्माभिरनघे तेजोपहृतये सतां ॥ १९ ॥ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्यास्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥ २० ॥

श्रीशुक उवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् ॥ २१ ॥ इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं ॥ आश्रुत्य भीता हृदि जातवेपथुश्चिन्तां दुरन्तां रुदती जगाम ह ॥ २२ ॥

स्मयनुत्तये गर्वापनयनाय स्त्रीणाममित्वात्सहमौदासीन्यमकामत्वं वा ॥ उदासीनानामिति ॥ गेहयोर्देहगेहयोरुदासीनाः ॥ अतएव ज्योतिरक्रियाः ज्योतिः प्रदीपादिः तद्वन्साक्षिमात्रतया क्रियारहिताः ॥ आत्मलब्ध्येवेत्याह आत्मनेति ॥ अपि

चिंतालक्षणमाह ॥ पदेति ॥ नखैररुणाश्रीः कांतिर्यस्य तेन सुजातेन कोमलेन पदा ॥२३॥ सुखदुःख
मप्रियश्रवणाद्यं यस्यास्तदाशोकयाशोकः शुचा तापस्तैर्विनष्टा बुद्धिर्यस्याः स्रंसमानानि वलयानि
यस्मात् ॥ देहस्य पपात ॥ विक्लवा अवशा धीर्यस्यास्तस्याः ॥२४॥ हासस्य प्रौढिं गांभीर्यं ॥२५॥ चतुर्भुज
यति ॥ उत्थापनाश्र्व ससेवक्त्रपरिमार्जनार्थं आविष्कृतभुजचतुष्टय इत्यर्थः समस्पर्श इत्यर्थः ॥२६॥ श्र

पदा सुजातेन नखारुणश्रिया भुवं लिखंत्यस्रुभिरंजनासितैः ॥ आसिंचती कुंकुमरूषितौ स्तनौ
तस्थावधोमुख्यतिशोककरुद्धवाक् ॥२३॥ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्रुयद्व
लयतो व्यजनं पपात देहश्च विक्लवधियः सहसैव मुह्यन्रंभेव वातविहता प्रविकीर्य केशा
न् ॥२४॥ तद्दृष्ट्वा भगवान्कृष्णः प्रियायाः प्रेमबंधनं ॥ हास्यप्रौढिमजानन्त्याः करुणः सोन्वकंप
यत ॥२५॥ पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः ॥ केशान्समुह्य तद्वक्त्रं प्रामृजत्पद्मपा
णिना ॥२६॥ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ॥ आश्लिष्य बाहुना राजन्ननन्यविष
यां सतीं ॥२७॥ सांत्वयामास सांत्वज्ञः कृपया कृपणां प्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हां स
तां गतिः ॥२८॥ श्रीभगवानुवाच ॥ मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां ॥ त्वद्वचः श्रोतु
कामेन क्ष्वेल्याचरितमंगने ॥२९॥ मुखं च प्रेमसंरंभस्फुरिताधरमीक्षितुं ॥ कटाक्षेपारुणा
(पांगसुंदरभ्रुकुटीतटम् ॥३०॥

श्रुकले अश्रुभिः शोभिते नेत्रे शुचा शोकाश्रुभिः ॥२७॥ सां
त्वयामास अनुनीतवान् ॥ निरस्कारानर्हा ॥२८॥ मा मा न त्वद्वचः किं त्वं वदिष्यसीति श्रोतुकामेन श्रो
तुमिच्छता त्वेल्या नर्मणा ॥ एवमाचरितमुक्तं न तत्त्वतः हे अंगने सुंदरि ॥२९॥ प्रेमसंरंभेण प्रण
यकोपेन स्फुरितः कंपितोधरो यस्मिंस्तत् ॥ कटाक्षेण कटाक्षास्तेषां क्षेपैररुणा अपांगा यस्मिं

श्री
भाग
१०

ननु कलहे किं कौतुकं स्वयं वाग्रयेदीति ॥ नर्मैव नर्मभिः यामः कालः ॥ ३१ ॥ भगवतस्तस्यैश्वर्यं प्रकर्षेण बुः
खितस्त्री उद्वाससेन रुचिरेणाक्षिप्येन यत्रायातेन वीक्षमाना ॥ ३२ ॥ असमत्वे भयं इत्यसत्यगुणप्रबलैः कलिः
स्वराजन्यगविनाता लोकिके हावसादते ॥ १ ॥ निष्किंचनत्वं तत्स्मीति राज्ञानादरणीयता ॥ यत्तौ चिन्त्य
निर्गुणत्वं तृष्णयास्माचाच भिक्षुभिः ॥ २ ॥ औदासीन्यमकामत्वं सदोषाण्येवाह प्राप्तः ॥ अन्यादीवदर्शितेः
भेषारात्री बहुन्गुणान ॥ इत्येवं मनसी दितान्भेषीन्यपेयतत्त्वगुणलवे ॥ ३३ ॥ भगवतः स्वनिंदापरामिव या

स्वयं विपरमो लाभो यद्देहश्वसदमेधिनौ ॥ यन्त्रमैत्री यतेयामः प्रियया भीरु भाषितं ॥ ३१ ॥ श्री
शुक उवाच ॥ सैवं भगवता राजन्वैदर्भी परिसांत्विता ॥ ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभ
यं जहौ ॥ ३२ ॥ बभाष ऋषभं पुंसां वीक्षंती भगवन्मुखम् ॥ सव्रीडहासरुचिरस्निग्धापांगे
न भारत ॥ ३३ ॥ रुक्मिण्युवाच ॥ नन्वेवमेतदरविंदविलोचनाह यद्वै भवान्भगवतोसदृ
शी विभूम्नः ॥ क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः ॥ क्वाहं गुणप्रकृतिरज्ञगृहीतपादा
३४ ॥ राम ॥ ३४

निवेदनानि सर्वोत्कर्षपरत्वाव्याचक्षाणा प्रतिभाषते ॥ यत्त्वयुक्तं कस्मान्नो वव्रे ॥ समानिति ॥ तत्र
सामान्यसत्यमेवेत्याह ॥ नन्वेवमिति ॥ हे अरविंदलोचन ॥ त्र्यधीशः त्रयाणां ब्रह्मादीनाम प्यधीश इति य
नात्मकं चाहं गुणप्रकृतिः ॥ त्रिगुणात्मस्वभावा प्राकृता त्रिगुणामयी प्रकृतिर्वा ॥ ननु त्वमेव ॥ अधीश्वरी श्रीः
सर्वैरुपास्यत्वादिति ॥ अत आह ॥ अज्ञैः सकामैः गृहीतो पादो यस्याः सा ॥ ३४ ॥

३२

निष्किंचनानां यं शाश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्त्वा ये एनं सा ग्रामांभजंति समर्थमेश इति ॥ एतत् श्लोकोक्तं
दोषत्रयं परिहरति ॥ निष्किंचन इति ॥ दरिद्रत्वलक्षणं निष्किंचनत्वं तु दनत्रुटत इत्याह ॥ यस्मादिति ॥ अ
नतो बलिभुजः पुरुषाद्यपि ब्रह्मादयः ॥ यस्मै भगवते बलिं हरंति ॥ न स्वस्तदेवेश्वरस्य भगवतो दरिद्रता
न घटत इत्यर्थः ॥ निष्किंचनजनप्रिया इत्यत्र तत्त्वेषणापक्षे भेदेन वानिंदास्पदीत ॥ स्वयमपि भयस्ता
ति प्रेष्ठो भवातिति ॥ बलिभुजां ब्रह्मादीनां लोकस्य रागिणां नभवतेति ॥ तस्मात्त्वा ये एनं सा ग्रामांभजंतीत्य
सोऽन्वनत्वाविदंतीति आद्रुतयोर्थः नानं नविदंतीति ॥ अत्र तत्त्वे अहमस्य ॥ यस्तु नेवं तर्पयति ने

निष्किंचनो ननु भवान्न यतोस्ति किंचिद्यस्मै बलिं बलिभुजोपि हरंत्यजाद्याः ॥ न त्वा विदंत्यसुतृ
पोंतकमाढ्यतायां प्रेष्ठो भवान्बलिभुजामपि तेपि तुभ्यं ॥ २७ ॥ त्वं वै समस्तपुरुषार्थमयः फ
लात्मा यद्वांछया सुमनसो व्यसनं सृजंति तस्य ॥ तेषां विभो समुचितो भवतः समाजः पुंसः स्त्रि
याश्च रतयोः सुखदुःखिनोर्न ॥ २८ ॥ त्वं न्यस्तदंडमुनिभिर्गदितानुभाव आत्मात्मदश्च जग
तामिति निश्चितोसि ॥ हित्वा भवद्भ्रुव उदीरितकालवेगध्वस्ताशिषोऽब्जभवनाकपतीन्कुतोन्ये २९

नां भजंतीत्यर्थः ॥ २७ ॥ बलिभुजामपि भवान्प्रेष्ठ इत्यत्र हेतुं वदति ॥ ययोरेव समं वित्तमित्यनेनोक्तमनौ
चित्यं परिहरति ॥ त्वं वा इति ॥ फलात्मा परमानंदरूपः एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवं
तीति श्रुतेः ॥ समाजः सेव्यसेवकलक्षणः संबंधः ॥ ननु पुंसः स्त्रियाश्च ॥ मिथो रतयो रतयोरेव ॥ तत्र हेतुः त
सुखदुःखिनोः सरागयोर्नित्यर्थः ॥ भिन्नत्वमिः भावितामुपेत्य तस्य परिहारः तमिति ॥ २८ ॥ भिन्नपदव्या
ख्यानं न्यस्तदंडैर्मुनिभिरिति ॥ अयं भावः तस्य परिहारः आत्मेति यद्यपि सर्वं प्रियं तस्य जगतामात्मनस्तव
वरगानंनं दृश्ये इत्यर्थः किंचात्मदश्चेति ॥ वेदगर्भेन तद्विज्ञायत यथा दीनं ह्य समीत्यति ॥ स्वस्मिन्नुक्तं दोषद्वयं

यदुक्तं राजभ्यो बिभ्यतः समुद्रं शरणं गतानिति ॥ तत्राह सत्यमिति ॥ उरुक्रमेति भयाभावं दर्शयति ॥ गुणाः शब्दादयः त एव राजानः तेष्विंद्रियाणां राजानः ॥ तेभ्यो भयादिवेति ॥ अंतर्हृदये समुद्र इत्यत्र हृदयावधिविषयाकारैरपरिच्छिन्नस्वरूपः ॥ शेते निश्चलतया प्रकाशते उपलम्भनमात्रः चैतन्यघन आत्मा भवानिति ॥ बलवद्भिः कृतद्वेषानिति यदुक्तं ॥ तदपि सत्यमित्याह ॥ नित्यमिति ॥ कदिंद्रियगणैः कुत्सितैर्बहिर्मुखैरिंद्रियगणैः नृपाभिप्रायेण बहुवचनं कुत्सितं इंद्रियगणो येषामिति वा ॥ तैः त्वं नित्यं कृतविग्रहः तेषु नवा प्रतीतेः

सत्यं भयादिव गुणेभ्य उरुक्रमांतः शेते समुद्र उपलंभनमात्र आत्मा ॥ नित्यं कदिंद्रियगणैः कृतविग्रहस्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोंधं ॥ ३५ ॥ त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यम् ॥ यस्मादलौकिकमिवेहितमीश्वरस्य भूमंस्तवेहितमथो अनु ये भवंतं ॥ ३६ ॥

यदुक्तं त्यक्तनृपासनानिति ॥ तद्युक्तमेवेत्याह त्वत्सेवकैरिति ॥ नृपाणां पदमासनं अंधं गाढं तम एव ॥ अविवेकबहुलत्वात् ॥ त्वत्सेवकैरेव त्यक्तं ॥ किं पुनर्वक्तव्यं त्वया त्यक्तमिति ॥ ३५ ॥ अस्पष्टवर्त्मनां पुंसामलोकपदमीयुषामिति ॥ यदुक्तं तदपि तथैवेत्याह ॥ त्वत्पादेति ॥ नृपशुभिर्नराकारैः पशुभिः ॥ किं पुनर्वक्तव्यं ॥ तव वर्त्मास्फुटमिति ॥ किंच यस्माद्ये भवंतमनुवर्तंते तेषामपीहितमलौकिकमिव अथो किमु वक्तव्यं ॥ तवेश्वरस्येहितमलौकिकमित्यर्थः ॥ आस्थिताः पदं नियोषितस्त्विति अस्य परिहारं वदन्निति ॥ यद्वाञ्छयेति ॥ पंचमश्लोकेन ॥ ३६ ॥ रामानुजाय नमः

रामराम । ३९

सात्त्वानं परिहृत्य गुरुरूपाणां तव गुणानां वर्णन प्रदीप्तकोपसंरंभेण॥ तस्मिन्नेवाज्ञानमादद्यति॥ जाड्यमिति॥ सिंहो
यथा पशून्निद्राव्य सर्वान् लिहति॥ तथा शार्ङ्गधनुर्निनादेनैव जरासंधादीन्निद्राव्य॥ मां सभायां आश्रित्य यस्त्वं
हृतवानसि॥ तस्य तव राजभ्यो भयादुदधिं प्रपन्न इति यद्वचो भाषणं॥ तज्ज्ञाश्रमोद्घाटनेन रत्नार्थः॥ ४०
यज्ञामदस्य पूर्ववत्मनामित्यादि॥ नार्थान्॥ त्वां भजन्तः सीदन्ति॥ अवसादनं प्रमादवहत्वमुक्तं तदपि मं
दमवेत्याह॥ यद्वाञ्छयेत्याद॥ यस्य तव भजनवाञ्छयान्नृपोत्तमाः अंगो वेनस्य पिता वैन्यः पृथुः जायंताभ

जांगेवचत्वगदाग्रजय स्तम्भपान्निद्राव्य शार्ङ्गनिनदेन जरासंध मां त्वं सिंहो यथा स्वबलि
२ भीः पशून्स्वभागं तेभ्यो भयादुदधिं शरणं प्रपन्नः॥ ४०॥ यद्वाञ्छया नृपशिखामणयोंग
वैन्यजायंतनाहुषगाधादयपक्वपस्य राज्यं विसृज्य विविशुर्वनमम्बुजाक्ष सीदन्ति नेतु पद
वीं तव दास्यिनः किं॥ ४१॥ कास्यं श्रयेत्तव पादसरोजगन्धमाघ्राय स्वरिततज्जनतापव मु
र्गं॥ लक्ष्म्यालयं त्वविगणय्य गुणालयस्य मर्त्यः सदोरुभयमर्थविविक्तदृष्टिः॥ ४२॥

वृतः नाहुषो ययातिः॥ गाधस्य आदिर्येषां ते॥ यपते तव पदवीं मार्गं समाश्रितास्ते किं सीदन्ति न सीदन्त्येव अ
पितु नन्दं प्राप्ता इत्यर्थः॥ ४१॥ एवं च कोपावेशेनावसादनस्य परिहारादसपूर्ववत्मनामित्यनदानंत
र्ये॥ विरुद्धावाशंक्य॥ यद्वोक्तमात्मनोऽनुरूपमिति॥ कांम्यमिति श्लोकद्वयेन शुणवामालघुस्य॥ न
वपादसरोजगंधं जननायापवर्गं मोक्षरूपं॥ लक्ष्म्या आलयं॥ नत्वेव्यरूद्धिः सुखवितं वर्णनं श्री आ
यतनमविगणय्य मर्त्यो मरणधर्मिकाः सदा उरुभयं यस्य तं मर्त्यं॥ यस्य न मत्यं कां ह्नीश्रयेन॥ सेव
ते॥ अर्थे विविक्ता दृष्टिर्यस्य सः॥ सा गुणालयस्य नेन गुणे फी नाड्नियडुक्तं तदपास्तं॥ ४२॥

श्री
भाग.
द.
३४

ऽतस्त्वामेव मद्भजमित्याह।। तं तेति स्वार्थे यते स्यादिति।। अरसां श्रवणां स्तुतिभिस्तनिभिर्देवतिर्यगादिभिर्जन्म
भिः पादांतरे तत्वाहवहलकं मे श्रवणे विन्यर्थः।। कथंभूतस्य तव यस्य मन्तस्य समस्तास्य अपवर्गो नाशो
यस्मात्सः भजतमुपयाति आत्मसात्करोति तस्य तव विश्रवेति।। भीतस्य हि पादग्रहणमेवानुरूपे भजनं योग्य।। अ
तस्त्वामहमभजमित्यर्थः।।४३।। ये चोक्ता राजपुत्र्यः सा वद्दतो गुणः राजपुत्रीप्सितोऽभ्यै पैलोकपालविभूतिभिरित्या
दिना।। तत्र सेर्ष्यमित्याह।। तस्या स्वापे।। सा गुल्मिभेगचाद।। द्वाभ्यां।। तस्याः स्युरिति सद्वदवकेवलभारवाहाः।। एव त्वं व
लीवर्दा इव नित्यं व्यापारक्लिष्टाः।। श्वान इवाच मत्तः बिडाला इव क्रूराः पशवः रद्द स्वाम्य मत्या इव किंकरा

तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च काममपूरं।। स्यान्मे तवांघ्रिररणस्तृतिभिर्भ
मत्या यो वै भजन्तमुपयात्यनृतापवर्गः।।४३।। तस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहे
षु खरगोश्वविडालभृत्याः यत्कर्णमूलमरिकर्षण नोपयायाद्युष्मत्कथा मृडविरिंचसभासु
गीता।।४४।। त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातं।। जी
वच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री।।४५।। अस्त्वम्बुजाक्ष मम
ते चरणानुराग आत्मन्रतस्य मयि चानतिरिक्तदृष्टेः।। यर्ह्यस्य वृद्धय उपात्तरजोतिमात्रो मामीक्षसे

तदुह नः परमानुकम्पा ४६

ऽल्पाः तस्मादुभे गाथाः पतयः स्युः यस्याः कर्णपथं त्वत्कथा न यायादिति।।४४।। तथाहि ते त्वत्पदाब्ज
मकरंदमजिघ्रमकरंदमजिघ्रती या स्त्री विमूढा सा कांतेयमिति मतिर्यस्याः सा कांतमतिः जीवच्छवं भ
जति त्वगादिभिर्बहिः पिनद्धं अन्तर्मांसादिमयमिति तथा।। आस्त्विति।। यद्यपि त्वं निरपेक्षः तथा
पि मम ते चरणानुरागोस्तु मय्यपि मयि चानतिरिक्तदृष्टेः निर्व्यवधानहृष्टिस्त्वं।। आत्मन्नात्मन्येव रत
स्य तर्हि नव तेन को लाभः त्वच्चरणानुराग एव महान्लाभः किंच तस्य सर्वस्य हृद्धये उपात्तरजाः

५८

तदेवं तदुक्तं सर्वं प्रति व्याख्याय प्रसन्नचित्तां संप्रत्युपदिशेत्याह ॥ द्वाभ्यां नैवेति ॥ अथात्मनोनुरूपमि
त्यादिनेव वचः अलीकमिथ्येति नैव मन्ये यतो लोके कन्यायाः पवर्ग्गो विक्रुतिर्भवति ॥ यथा काशिराजक
न्यानां ॥ अंबांबिकांबालिकानां निर्हरणमध्ये अंबायाः पव साल्वे रतिर्जाता तद्वत् ॥४७॥ ऊढायाः पति
व्रतायाः प्रीति ॥ उभयस्मात् ॥ इह परत्र च लोकाद्दयं च्युतो भ्रष्ट इति ॥४८॥ अलभितोपदसितामस्म
त्त्वाच्य वन्ताख्यातवती ॥४९॥ मध्येकांतभक्ताया लेकामाः संतीव ॥ अकामाय कामतिहन्न येमोक्त

नैवालीकमहं मन्ये वचस्ते मधुसूदन ॥ अंबाया इव हि प्रायः कन्यायाः स्याद्रतिः क्वचित् ॥४७
व्यूढायाश्चापि पुंश्चल्या मनोभ्येति नवं नवं ॥ बुधोसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥४८॥
श्रीभगवानुवाच ॥ साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्रि प्रलंभिता ॥ मयोदितं यदन्वात्थ
सर्वं तत्सत्यमेव हि ॥४९॥ यान्यान्कामयसे कामान्मय्यकामाय भामिनि ॥ संति ह्येकांतभक्ता
यास्तव कल्याणि नित्यदा ॥५०॥ उपलब्धं पतिप्रेम पातिव्रत्यं च तेनघे ॥ यद्वाक्यैश्चाल्यमाना
या न धीर्मय्यपकर्षिता ॥५१॥ ये मां भजंति दांपत्ये तपसा व्रतचर्यया ॥ कामात्मानोपवर्गे
शं मोहिता मम मायया ॥५२॥ मां प्राप्य मानिन्यपवर्गसंपदं वांछंति ये संपद एव तत्पतिम्
ते मंदभागा निरयेपि ये नृणां मात्रात्मकत्वान्निरयः सुसंगमः ॥५३॥ रामानुजायत

पर्यवसायिन इत्यर्थः अनुवादेन वरान्तत्त्वानामभिनंदति ॥ उपलब्धमिति ॥ यद्यस्मात्मयि वर्तमा
नाधीः ॥ नापकर्षिता नान्यविषया जाता ॥५१॥ एकांतभक्तिमभिनंदयंस्तामेव द्रढयितुं सकामान्भक्तान्
निंदति ॥ ये मामिति ॥ दांपत्य पत्युपभोग सुखार्थं ॥५२॥ मायामोहितत्वमेवोपपादयति ॥ मां प्राप्ये
ति अपवर्गपापस्तदसंपदोयस्मिन् ॥ मां प्राप्य प्रसाद्य ॥ ये केवलं संपद एव विषयान्वांछंति ॥ नरकेपि

श्री० भा० द०
३५

तस्माद्धृदे स्थितया मयि भवमोचनी निष्कामानुवृत्तिः कृता ॥ एतद्धि स्वाभाविकथ्यभूताखलैः सुदुष्करा
दुराशिषो दुरभिप्रायायाः असतपत्रसमेरायाः प्राणतर्पणपरायाः निष्कृतिन्नुषो वे च नपरायाः स्त्रियाः
सततामेव सानुवृत्तिः दुष्करेति ॥ ५४ ॥ सन्ति निष्कामाः प्रेम्णो वसत्यनुवर्तमानान्तावत्तः किन्तु नयासदृशी
कापि नयपश्यामीति ॥ तस्माद्धृदि किंबहुमानेनाभिनंदति ॥ तत्तादृशोमिति त्रिभिः ॥ उपस्कृताः सत्या
वा प्राप्य समे ॥ ५५ ॥ षोडशसहस्रपर्वतमिश्रानिरुद्धविवाहे प्रतरोक्षा ॥ पूतस्य भार्यातनभानुवर्धन ॥ तस्मिन्काले
कालान्तरे तदनुस्मरणातः पुनः पुनः समस्यद्वः स्वस्त्रीभिरयोगोवियोगस्तद्वीन्याप्र सद्धः सोढ

दिष्टार्यगृहेश्वर्यसकृन्मयि त्वयाकृतानुवृत्तिर्भवमोचनी खलैः ॥ सुदुष्करासौ सुततां दुराशिषो
ह्यसुंभरायानिकृतिंजुषः स्त्रियाः ॥ ५४ ॥ तत्तादृशी प्रणयिनी स्वदृशी स्वदेहुपसम्भिभामिति
ययासविवाहकाले ॥ ग्रामान्तर्यान विग्राण्य रहोहदरोमे प्रस्थापितो द्विजउपश्रुतसत्कथ
स्य ॥ ५५ ॥ भ्रातुर्विरूपकरणं युधिनिर्जितस्य प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्याम् ॥ दुःखंसमुत्थ
मसहोस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयंजितास्ते ॥ ५६ ॥ दूतस्त्वयात्मलभने सुवि
विक्तमंत्रः प्रस्थापितो मयि चिरायति शून्यमेतत् ॥ मत्वा जिहास इदमंगमनन्ययोग्यं तिष्ठेत
तत्त्वयि वयं प्रतिनंदयामः ॥ ५७ ॥ (व्यस्ति ॥ अनेनैव निरुद्धविवाहानेकर्षम स्वज्ञानत्वे ॥ ५८
अपि च हृत इति ॥ ग्रामलाभेन मत्या मय्येवमयि विवाहयति ॥ सोऽभावित्रि विवाहे ॥ आगतवानसि इति
कृतेत्तमये कथं विद शामवतिसति ॥ एतद्धि स्वसून्यं मत्वा इदमनन्ययोग्यमंगं जिहासेत्यत्र कामिच्छ
सि तत्क्षामी त्वेव हतः प्रस्थापितः ॥ नयाद्युक्तं त्वयात्वयैवानुज्ञात्तत्र न लभेयमवत्प्रसादेन सामसत्त्व
तत्कृपणमप्यातनजन्माभिः स्यादिति ॥ यद्वा ॥ आजिहासइति च्छेदः तत्त्वत्कामिच्छादित्यर्थः ॥ तत्रैव कर्म

३५

सौरतसंलापैः स्वरतनर्मगोष्ठीभिः ॥५८॥ इति श्रीभागवते दशमस्कंधे टीकायां षष्टितमोऽध्यायः ॥६०॥ एकषष्टि
तमे शौरेः पुत्रपौत्रादिसंततिः अनिरुद्धविवाहे च रुक्मिणो रामतो वधः ॥ अष्टाधिकशतयुक्तषोडशसहस्रस्त्रीसमूहवा
न् कोटिशः पुत्रपौत्रादीन्दिदारैरयोजयत् ॥१॥ न देन हक्तमाह ॥ एकैकश इति ॥ कृष्णस्य अबला भार्या ॥ स
र्वीयात्मसंपन्न ॥ तया पितुः सकाशादनवमान् अन्यूनान् ॥१॥ प्रेष्ठं न्यमंसत ॥ अच्युतं स्वप्रियतमं प्रत्येकं स्वं

श्रीशुक उवाच ॥ एवं सौरतसंलापैर्भगवाञ्जगदीश्वरः ॥ स्वरतो रमया रेमे नरलोकं विडंबयन् ॥५८
तथान्यासामपि विभुर्गृहेषु गृहवानिव ॥ आस्थितो गृहमेधीयान्धर्मान्लोकगुरुर्हरिः ॥५९ ॥ इति
श्रीभागवते महापुराणे दशमस्कंधे षष्टितमोऽध्यायः ॥६०॥ श्रीशुक उवाच ॥ एकैकशस्ताः कृष्णस्य
पुत्रान्दश दशाबलाः ॥ अजीजनन्ननवमान्पितुः सर्वात्मसंपदा ॥१॥ गृहादनपगं वीक्ष्य राजपुत्र्यो
ऽच्युतं स्थितं ॥ प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः ॥२॥ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहास
रसवीक्षितवल्गुजल्पैः ॥ संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनिता विभूम्नः ॥२

स्वंमेनि येन तत्स्वतत्त्वमात्मारामत्वं विदंतिताः ॥२॥ आत्मारामत्वं व्यनक्ति हृद्येन ॥ चार्विति ॥ चार्वब्जकोशवद
ने च ॥ आयतानि बाहुनेत्राणि च ॥ वल्गुजल्पाः भगवतः एतैः संमोहिता वनिताः स्वैरनेकैर्विभ्रमैस्तस्य म
नो विजेतुं नाशक्नुवन् ॥ नशाकाः बभूवुः विभूम्नः परिपूर्णस्य ॥३॥ रामानुजाय नमः ॥ रामनारायणाय
नमः ॥३॥

श्री [illegible]

तासां विभ्रमातराय जेतद्दिन्नुरणोनि स्मायेनि ॥ स्मायो गरच्छ द्दमितं तनयुक्तः अवलोकलवः कटाक्षस्तेन द
र्शितः स्वचिनोभावो भिप्रायस्तेन हाविमोहरणा यो लेयद्भ्रमंडलं तेन प्रदिष्टाः प्रस्थापिता ये सौरताः मंत्राः ते
षु षोडशैः प्रगल्भैः अनंगास्त्रबाणैः शरैः अन्यैश्च करणैः कामशास्त्रप्रसिद्धैर्यसेंद्रियमनोविमथितं तेभ
यिनं षोडशसहस्रमपि पत्नीनां न शेकुरिति ॥ ४ ॥ अनुरागेन हासावलोकस्त्रेनवसंगमलालसैः ॥ डौस्त्रवंसंचने

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः पत्न्यस्तु षोडशसहस्रमनं
गबाणैर्यस्येंद्रियं विमथितुं करणैर्न शेकुः ॥ ४ ॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि
न विदुः ॥ पदवीं यदीयां भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंगमलालसाद्य
५ ॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसाधपायनस्नप
नोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ॥ ६ ॥ तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदि
ताः ॥ अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते ॥ ७ ॥ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवा
न् ॥ सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ ८ ॥ चारुचंद्रो विचारुश्च चारुश्च दशमो हरेः ॥ प्रद्यु
म्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ॥ ९ ॥ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा
चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥ १० ॥

आगायस्य विभ्रमकटं द्वयस्यं भेजुः तस्य मनो विजेतुं न योग्यं न शेकुरिति वा ॥ ५ ॥ किंतु प्रत्युद्गमादिभि
र्विभोस्तस्य दास्यं नित्यं विदधुरिति ॥ प्रौढभावे पि नवसंगमाशा प्रभिधानं ॥ आगतं सा रत्वेनौत्सुक्येन तथा
पनीनेलपामेवस्त्रो कानाश्रलावांतरे पुतः पुनरागृह्णातीति सौंदर्यात ॥ ६ ॥ प्रासंगिकमुक्त्वा प्रकृतमा
ह ॥ तासामिति दशादशपुत्रा या तासां मध्ये अष्टौ महिष्यो याः प्राग्दुक्तास्तत्पुत्रानिति ॥ १० ॥

श्रीमानिनिवसोः कुंतेर्वीविशेषणे ॥१४॥ भद्रो नाम प्रकलः प्रकः सोमक प्रवरः कनीयान् ॥ एते कालिंद्याः
सुता इति ॥१४॥ माद्र्याः लक्ष्मणायाः ॥१५॥ क्षुधि प्रदशमः एते मित्रविंदात्मजाः ॥१६॥ संग्रामजित्प्रमु
खाः सत्यकांताः भद्रायाः सुताः शैव्या नामापि सैव रोहिण्याः सुतानामुक्तिरन्यासामुपलक्षणार्थं १८
एवाचेति ॥ अन्येषामपि श्रीकृष्णस्य पुत्राणां शतसंख्यसीषु पुत्राः पौत्राश्च कोटिशो बभूवुः तत्र हेतुत्वेन

श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥ सांबः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥११॥
विजयश्चित्रकेतुश्च वसुमान् द्रविडः क्रतुः ॥ जांबवत्याः सुता ह्येते सांबाद्याः पितृसंमताः ॥१२॥ वी
रश्चंद्रोऽश्वसेनश्च चित्रगुर्वेगवान् वृषः ॥ आमः शंकुर्वसुः श्रीमान् कुंतिर्नाग्नजितीसुताः ॥१३॥ श्रुतिः क
विर्वृषो वीरः सुबाहुर्भद्र एकलः ॥ शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोऽवरः ॥१४॥ प्रघोषो गा
त्रवान् सिंहो बलः प्रबल ऊर्ध्वगः ॥ माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः ॥१५॥ वृको हर्षो
ऽनिलो गृध्रो वर्धनोऽन्नाद एव च ॥ महांशः पावनो वह्निर्मित्रविंदात्मजाः क्षुधिः ॥१६॥ संग्रामजिद्बृ
हत्सेनः शूरः प्रहरणोऽरिजित् ॥ जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ॥१७॥ दीप्तिमांस्ताम्रतप्ता
द्या रोहिण्यास्तनया हरेः ॥ प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्मवत्यां महाबलः ॥१८॥ पुत्र्यां तु रुक्मिणो राजन्
नाम्ना भोजकटे पुरे ॥१९॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप ॥ मातरः कृष्णजातीनां सहस्रा
णि च षोडश ॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि ॥ कृष्णेन परिभूतस्तं हंतुं रंध्रं प्रति

श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति ॥ मातरः कृष्णजातानामिति ॥ चशब्देनाधिकाश्चेत्सूक्तं ॥२१॥ यं कृ
ष्णं हंतुं रंध्रं प्रतीक्षते स कथं प्रादादिति चैवाहिकं विवाहनिमित्तं ॥ २०

श्री· भा· द· उ· ३१

ननु रुक्मिणोभिप्रायं कथं ज्ञातो मया इति चेत् तत्राह अनागतमिति ॥ अतीन्द्रियं अस्मदादीन्द्रियागोचरं विप्रकृष्ट देशस्थं व्यवहितं कुड्याद्यन्तरितं ॥ २१ ॥ तदेनं स्वयंवरे रुक्मावज्ञयाहूतः सन्नोर्ध्वोत्तो निर्जित्य जहारेति यद्यपि श्रीकृष्णस्यावमानितः ॥ तथापि वैरमनुस्मरन्नपि अमतरत्वादादन्वमोदते इत्यर्थः ॥ २२ ॥ सर्वासामप्येकैकाकन्यानां स्वयंविवाहोपलक्षणार्थं अभीष्टकन्याविवादमाह रुक्मिण्या इति यातं विवाहः ॥ तद्योनमथ मंज्ञानन्निति

अनागतमतीतं च वर्तमानमतीन्द्रियं ॥ विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिनः ॥ २१ ॥ श्रीशुक उवाच ॥ यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः ॥ व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियं ॥ २२ ॥ वृतः स्वयंवरे साक्षादनंगोंऽगयुतस्तया ॥ राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥ २३ ॥ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली ॥ उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥ २४ ॥ दौहित्रायानिरुद्धाय पौत्रीं रुक्म्याददाद्धरेः ॥ रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया ॥ २५ ॥ जानन्नधर्मं तद्यौनं स्नेहपाशानुबन्धनः ॥ तस्मिन्नभ्युदये राजन्रुक्मिणी रामकेशवौ ॥ २६ ॥ पुरं भोजकटं जग्मुः साम्बप्रद्युम्नकादयः ॥ तस्मिन्निवृत्त उद्वाहे कालिंगप्रमुखा नृपाः ॥ दृप्तास्ते रुक्मिणं प्रोचुर्बलमक्षैर्विनिर्जय ॥ २७ ॥ अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत् ॥ इत्युक्तो बलमाहूय तेनाक्षैरुक्म्यदीव्यत ॥ २८ ॥ शतं सहस्रमयुतं रामस्तत्राददे पणं ॥ तं तु रुक्म्यजयत्तत्र कालिंगः प्राहसद्बलं ॥ दन्तान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः ॥ ३० ॥

द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेदित्यादि लोकविरोधाद्दसर्गेऽपि लोकविद्विष्टं धर्ममप्याचरेन्न त्विति निषेधाज्जानन्नित्यर्थः ॥ २९ ॥ लोकविरुद्धाचरणफलं च कुमाद तस्मिन्निति अदीव्यत क्रीडितवान् ॥ ३० ॥

ना॰

तिः कारणं लक्षं ग्लहं पणं रुक्म जितवान् कैतवं कपटं ॥३१॥ न्युर्बुदं दशकोटिः ग्लहं द्यूतभितो राम आददे ॥३२॥ छल
माश्रितो रुक्मी मयाजितमित्याह ॥३३॥ नृपसंसदि मंगलसभायां ॥३७॥ सूर्यया नवोढया सिद्धा अखिला

ततो लक्षं रुक्म्यगृह्णात् ग्लहं तत्राजयद्बलः ॥ जितवानहमित्याह रुक्मी कैतवमाश्रितः ॥३०॥ मन्युना
क्षुभितः श्रीमान्समुद्र इव पर्वणि ॥ जात्यारुणाक्षोतिरुषा न्यर्बुदं ग्लहमाददे ॥३२॥ तं चापि जितवान्रामोथ
र्मेण छलमाश्रितः ॥ रुक्मी जितं मयात्रेमे वदंतु प्राश्निका इति ॥३३॥ तदाब्रवीन्नभोवाणी बलेनैव जितो
ग्लहः ॥ धर्मतो वचनेनैव रुक्मी वदति वै मृषा ॥३४॥ तामनादृत्य वैदर्भो दुष्टराजन्यचोदितः ॥ संकर्षणं प
रिहसन्बभाषे कालचोदितः ॥३५॥ नैवाक्षकोविदा यूयं गोपाला वनगोचराः ॥ अक्षैर्दीव्यंति राजानो
बाणैश्च न भवादृशाः ॥३६॥ रुक्मिणैवमधिक्षिप्तो राजभिश्चोपहासितः ॥ क्रुद्धः परिघमुद्यम्य जघ्ने तं नृ
म्णसंसदि ॥३७॥ कलिंगराजं तरसा गृहीत्वा दशमे पदे ॥ दंतानपातयत्क्रुद्धो योहसद्विवृतैर्द्विजैः ३८
अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः ॥ राजानो दुद्रुवुर्भीता बलेन परिघार्दिताः ॥३९॥ निहते रुक्मिणि
श्याले नाब्रवीत्साध्वसाधु वा ॥ रुक्मिणीबलयो राजन्स्नेहभंगभयाद्धरिः ॥४०॥ ततोनिरुद्धं सह सूर्यया
वरं रथं समारोप्य ययुः कुशस्थलीं ॥ रामादयो भोजकटाद्दशार्हाः सिद्धाखिलार्था मधुसूदनाश्रयाः
४१ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे एकषष्टितमोध्यायः ॥६१॥

र्थाः अभ्युदयशत्रुवधादयो येषां ते ॥४२॥ इति श्रीभागवते भावार्थदीपिकायां एकषष्टितमः ॥६१॥ द्विषष्
टितमे प्रोक्तमनिरुद्धस्य रोधनं ॥ कन्यायां रममाणस्य बाणे
न बहुबाहुना ॥ ॥ रामानुजायन
मः रामानुजाय

अनिरुद्धोद्वहे तस्मिन्बाणयादवसंयुगे ॥ श्रीकृष्णः श्रीहरं जित्वा बाणबाहूनथाच्छिनत् ॥१॥ पुराधिपं पु
रपालकं ॥६॥ कामान्पूरयति कामपूरः स चासावमराङ्घ्रिपः कल्पतरुः तं त्वा ॥८॥ दे आद्य निभृतैर्भिविनैः
राजोवाच ॥ बाणस्य तनयामूषामुपयेमे यदूत्तमः ॥ तत्र युद्धमभूद्घोरं हरिशंकरयोर्महत् ॥१॥ ए
तत्सर्वं महायोगिन्समाख्यातुं त्वमर्हसि ॥ श्रीशुक उवाच ॥ बाणः पुत्रशतज्येष्ठो बलेरासीन्महा
त्मनः येन वामनरूपाय हरयेऽदायि मेदिनी ॥२॥ तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा
मान्यो वदान्यो धीमांश्च सत्यसंधो दृढव्रतः ॥३॥ शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा ॥ तस्य
शंभोः प्रसादेन किंकरा इव तेऽमराः ॥४॥ सहस्रबाहुर्वाद्येन तांडवेऽतोषयन्मृडं ॥ भगवान्सर्वभू
तेशः शरण्यो भक्तवत्सलः ॥५॥ वरेण छंदयामास स तं वव्रे पुराधिपं ॥ स एकदाह गिरिशं पार्श्व
स्थं वीर्यदुर्मदः ॥६॥ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजं ॥७॥ नमस्ये त्वां महादेव लोकानां
गुरुमीश्वरं ॥ पुंसामपूर्णकामानां कामपूरामरांघ्रिपं ॥८॥ दोःसहस्रं त्वया दत्तं परं भाराय मेऽभ
वत् ॥ त्रैलोक्ये प्रतियोद्धारं न लभे त्वदृते समं ॥९॥ कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहं ॥ आ
द्यायां चूर्णयन्नद्रीन्भीतास्तेऽपि प्रदुद्रुवुः ॥१०॥ तच्छ्रुत्वा भगवान्क्रुद्धः केतुस्ते भज्यते यदा ॥ त्वद्द
र्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥११॥ इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप ॥ प्रतीक्षन्गि
रिशादेशं स्ववीर्यनशनं कुधीः ॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिं ॥ कन्यालभत कां
तेन प्रागदृष्टश्रुतेन च ॥१३॥ सा तत्र तमपश्यंती क्वासि कांतेति वादिनी ॥ सखीनां मध्य उत्तस्थौ
विह्वला व्रीडिता भृशं ॥१४॥ दोर्भिरद्रींश्चूर्णयन्न प्रतियोग्य गच्छ ॥१७॥ स्ववीर्यस्य नाशने कोत
भंगं प्रतीक्षमाणः श्रीमहेशादिष्टसंग्रामस्य प्रसंगमारु ॥ तस्योषेति ॥१८॥ प्राद्युम्निनाऽनिरुद्धेन तत्

गतिरसिक्षी १३ तं कांतमपश्यंतीसा उत्तस्थौ १४ ततः किंचिदुत्तरं तदाह ॥

वाणस्येति ॥ इत्युक्तवाप्रदकंभर्मीरं ॥१९॥ तयादृष्टापत्यांमध्येकोवाभवेदिति ॥ देवादीन्पदेःलिखितः ॥२०॥ प्रद्युम्नंलि
खितंवीक्ष्यश्वश्रूरोयमितिलज्जिता ॥२१॥ शोणितपुरंनीत्वा ॥२४॥ पुंभिर्दुष्प्रेक्ष्येप्रेक्षितुमशक्ये ॥२५॥ सचपरार्थ्यैर

वाणस्यमंत्रीकुंभांडश्चित्रलेखाचतत्सुता ॥ सख्यपृच्छत्सखीमूषांकौतूहलसमन्विता ॥१५॥ कांत्वंम
गयसेसुभ्रुकीदृशस्तेमनोरथः ॥ हस्तग्राहंनतेद्यापिराजपुत्र्युपलक्षये ॥ उषोवाच ॥ दृष्टःकश्चिन्न
रःस्वप्नेश्यामःकमललोचनः ॥ पीतवासाबृहद्बाहुर्योषितांहृदयंगमः ॥१७॥ तमहंमृगयेकांतंपाय
यित्वाधरंमधु ॥ क्वापियातःस्पृहयतींक्षिप्त्वामांवृजिनार्णवे ॥१८॥ चित्रलेख्योवाच॰ व्यसनंतेपकर्षामित्रिलो
क्यांयदिभाव्यते ॥ तमानेष्येनरंयस्तेमनोहर्तातमादिश ॥१९॥ इत्युक्त्वादेवगंधर्वसिद्धचारणपन्नगान्
दैत्यविद्याधरान्यक्षान्मनुजांश्चयथालिखत् ॥२०॥ मनुजेषुचसावृष्णीन्शूरमानकदुंदुभिं व्यलिख
द्रामकृष्णौचप्रद्युम्नंवीक्ष्यलज्जिता ॥२१॥ अनिरुद्धंविलिखितंवीक्ष्योषावाङ्मुखीह्रिया ॥ सोसाव
सावितिप्राहस्मयमानामहीपते ॥२२॥ चित्रलेखातमाज्ञाययोगेनकृष्णस्ययोगिनी ॥ ययौविहायसाराज
न्द्वारकांकृष्णपालितां ॥२३॥ तत्रसुप्तंसुपर्यंकेप्राद्युम्निंयोगमास्थिता ॥ गृहीत्वाशोणितपुरंसख्यै
प्रियमदर्शयत् ॥२४॥ साचतंसुंदरवरंविलोक्यमुदितानना ॥ दुष्प्रेक्ष्येस्वगृहेपुंभीरेमेप्राद्युम्निना
समं ॥२५॥ परार्ध्यवासःस्रग्गंधधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्चवाक्यैःशुश्रूषयार्चितः
गूढःकन्यापुरेशश्वत्प्रवृद्धस्नेहयातया ॥ नाहर्गणान्सबुबुधेऊषयापहृतेंद्रियः ॥२७॥ तांतथा
यदुवीरेणभुज्यमानांहतव्रतां ॥ हेतुभिर्लक्षयांचक्रुरापीतांदुरवच्छदैः ॥२८॥ भटाआवेदयांचक्रूरा
जंस्तेदुहितुर्वयं ॥ विचेष्टितंलक्षयामःकन्यायाःकुलदूषणं ॥२९॥

रत्नैर्वासःस्रगादिभिः शुश्रूषणापूर्वकमर्चितः सन् ॥२६॥ तयापहृतेंद्रियोहर्गणान्दिनसमूहान्नबुबु
धे ॥२७॥ आपीतांगर्भितांदृष्टांदुरवच्छदैः छादयितुमशक्यैः ॥२८॥ भटाआवेदयांचक्रुर्विचेष्टितंविरुद्धाचरणं

श्रीभा॰ भाद॰ ३५

अनपायिभिः॥ अपायः अपसर्पणं प्रमादो वा तद्रहितैः॥ पाठांतरे दुष्प्रेक्ष्यायाः सखी यस्या न तस्याः पुंभिर्दूषणं
ज्ञातो वेत्ति न ज्ञातो मद्गुप्तिः॥ ३०॥ कामस्यात्मनो देहाज्जातं॥ ३२॥ अभिनृम्णया सर्वमंगलया॥ तस्या अंगसंगेन
स्तनकुंकुमे यस्यां स्रजि तां॥ बाह्वोर्मध्ये वक्षसि दधानं॥ मधुमल्लिकाः तदाश्रिता तस्या अग्र इत्यार्षः संधिः तस्याः

अनपायिभिरस्माभिर्गुप्तायाः स्वगृहे प्रभो॥ कन्याया दूषणं पुंभिर्दुष्प्रेक्ष्याया न विद्महे॥ ३०॥ ततः
प्रव्यथितो बाणो दुहितुः श्रुतदूषणः॥ त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहं॥ ३१॥ कामात्म-
जं तं भुवनैकसुंदरं श्यामं पिशंगांबरमंबुजेक्षणं॥ बृहद्भुजं कुंडलकुंतलत्विषा स्मितावलोकेन च
मंडिताननं॥ ३२॥ दीव्यंतमक्षैः प्रियया भिनृम्णया तदंगसंगस्तनकुंकुमस्रजं॥ बाह्वोर्दधानं मधु-
मल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः॥ ३३॥ स तं प्रविष्टं वृतमाततायिभिर्भटैरनीकैरवलो-
क्य माधवः॥ उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दंडधरो जिघांसया॥ ३४॥ जिघृक्षया ताना-
न्परितः प्रसर्पतः॥ शुनो यथा शूकरयूथपोऽहनत॥ ते हन्यमाना भवनाद्विनिर्गता निर्भिन्न-
मूर्धोरुभुजाः प्रदुद्रुवुः॥ ३५॥ तं नागपाशैर्बलिनंदनो बली घ्नंतं स्वसैन्यं कुपितो बबंध ह॥ ऊषा भृशं
शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरौदिषीत॥ ३६॥ इति
श्रीभागवते महापुराणे दशमस्कंधे भावार्थदीपिकायां द्विषष्टितमोऽध्यायः॥ ६२॥

अग्रऽइत्यर्थः॥ आततायिभिरुद्यतशस्त्रैः॥ माधवोऽनिरुद्धः मौर्वं मुरस्य लोहविशेषस्य तन्निर्मितं ३४ शो-
कविषादाभ्यां विह्वलाश्रुवशा॥ अश्रूणां कलाबिंदवो ययोस्ते अक्षिणी यस्याः॥ ३६॥ इति श्रीभावार्थ-
दीपिकायां द्विषष्टितमोऽध्यायः॥ ६२॥ रामानुज्ञा॥ नमः रामायनारा॥ राज्ञीनमः॥ ॥ ॥ ॥

३५

एवं सर्वस्वदारागृहेभ्यो भगवान्निर्गत्य ... निर्गत्य ... सभां ...

श्रीः
भा॰ द॰
उ॰
५९

सव्रीडप्रेमवीक्षितैरीक्षितः त्वणां स्थितस्ताभिरेववीक्षितैः कृच्छ्रादिव सृष्टो निरगादिति ॥१५॥ एवं सर्व
गृहेभ्यः पृथक्पृथक् निर्गत्यानंतरमेकएव सन्सुधर्मां प्राविशत् ॥ यन्निविष्टानां यत्र प्रविष्टानां ॥१७॥
नृसिंहैर्नृपश्रेष्ठैः उपमंत्रिणः परिहासकाः पृथक्पृथक् समुदाये ॥१९॥ मृदंगादयः प्रसिद्धाः द

रैरितिनोतः प्रव स्त्रीणां सव्रीडप्रेमवीक्षितैः ॥ कृच्छ्रादिव सृष्टो निरगाज्ज्ञानदासोऽहरन्मनः ॥१६॥
सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः ॥ प्राविशद्यन्निविष्टानां न संत्यंग षडूर्मयः ॥१७॥
तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन् ॥ वृतो नृसिंहैर्यदुभिर्यदूत्तमो य
थोडुराजो दिवि तारकागणैः ॥१८॥ तत्रोपमंत्रिणो राजन्नानाहास्यरसैर्विभुं उपतस्थुर्नटाचा
र्यो नर्तक्यस्तांडवैः पृथक् ॥१९॥ मृदंगवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुः
सूतमागधवंदिनः ॥२०॥ तत्रस्याब्राह्मणाः केचिदासीनाब्रह्मवादिनः ॥ पूर्वेषां पुण्ययशसां
राज्ञांचाकथयन्कथाः ॥२१॥ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितो भगवते प्रवे
शितः ॥२२॥ सनमस्कृत्य कृष्णाय परेशाय कृतांजलिः राज्ञामावेदयद्दुःखं जरासंधनिरो
धजं ॥२३॥ येच दिग्विजये तस्य सन्नतिं नययुर्नृपाः प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे ॥२४॥

रः ॥ घोरवः सूतादयस्तुष्टुवुः ॥२०॥ ब्राह्मणा ब्रह्मवेदमाहुः मंत्रान्याचख्युस्तेष्वर्थं वादिनो वादनचतुराः
॥२१॥ गिरिव्रजे तन्नामके दुर्गे निरुद्धा आसन् तेषां च दुःखमावेदयन्नित्यर्थः प्रोक्तं स्वकृतमिति षड्भ्यो कैः
ज्ञातो विजनैः तत्र प्रथमेन शरणागतत्वं त्रिभिर्भयानुवादः द्वाभ्यां प्रार्थनमिति ॥२५॥ ॥

५६

भूषयामास नरलोकविभूषणं वासोभिर्

कल्याणं शास्त्रे देवान् ॥ ऋषीन्पितॄन् संतर्पयित्वा ॥७॥ वृष्णीनां प्रथमस्तातानां ॥८॥ बद्वमिति हिरण्येन परि
कृत्य च ॥ कृत्स्नान् अन्नोदनो मङ्गलान् ॥ मम स्मारे भगवतो दत्तांकं तं बद्वानि समवेतानि ॥ कृत्स्नकानि संभोजनं दश शतं ब
द्वान्येकीकृत्य पुराणे चतुर्दशलक्षत्वेन गणितानि यथोक्तं भवनमेवापि कृत्य न तु समस्तं च ॥ सुगन्धमुल्लि
तः कल्याणं वर्णानप्य विष्णुनाम् ॥ ग्रदान्कर्मणीमस्मारे निपुणानि चतुर्दशानि ॥ ननश्च यं बहुसंख्याम्लो

उपस्थायार्कमुद्यंतं तर्पयित्वात्मनः कलाः ॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्यात्मवान् ॥७॥ धे
नूनां रुक्मशृंगीनां साध्वीनां मौक्तिकस्रजां ॥ पयस्विनीनां गृष्टीनां सवत्सानां सुवाससां ॥८॥ द
दौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह ॥ अलंकृतेभ्यो विप्रेभ्यो बद्वं बद्वं दिने दिने ॥९॥ गोविप्रदेवता
वृद्धगुरून्भूतानि सर्वशः ॥ नमस्कृत्यात्मसंभूतीर्मंगलानि समस्पृशत् ॥१०॥ आत्मानं भूषयो
स्वीयैर्दिव्यस्रगंधलेपनैः ॥११॥ अवेक्ष्याज्यं तथादर्शं गोवृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां
पौरांतःपुरचारिणाम् ॥१२॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत ॥ संविभज्याग्रतो विप्रां
स्रक्तांबूलानुलेपनान् ॥१३॥ सुहृदः प्रकृतीर्दारानुपायुंक्त ततः स्वयं ॥ तावत्सूत उपानीय स्यं
दनं परमाद्भुतं ॥१४॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः ॥ गृहीत्वा पाणिना पाणी सारथे
स्तमथारुहत् ॥१५॥ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥१६॥

केनास्यते चतुर्दशानां लक्षाणां सप्ताधिकशतानां शताः बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदशेति।
दिने दिने प्रतिसद्म चेति ॥९॥ आत्मसंभूतीः स्वविभूतीः मंगलानि कपिलादीनि ॥१०॥ नरलोकस्य
विभूषणरूपमात्मानं स्वीयैः ॥ पीतांबरकौस्तुभादिभिः कामानभिलषितानर्थान् ॥ विप्रादीन्स्रगा
दिभिः संविभज्य तेभ्यस्तानि दत्त्वेत्यर्थः ॥१३॥ उपायुंक्त भोगार्थमग्रहीत् पाणी गृहीत्वा कृतां जलौ

विप्रेभ्यः

श्री·
भा·द·
५५

ततस्तस्य नित्यमेव कृष्णस्याह्निककर्माणि ॥ दूतनारदयोः कार्ये कार्यमंत्रविचारणं ॥ जगन्मंगलचारित्र
माह्निकं जगदीशितुः नारदेन कृतं किंचित्तद्दृष्टमाह यथाक्रमं ॥ २ ॥ उत्पत्त्यर्थं धर्मकामेषु कृष्णेन श्रद्धि
तान्मनोति ॥ एवं नरस्य श्रीकृष्णस्याह्निकसाधिकारे अथ शब्दः उपवृत्तायां ॥ आसन्नायां पतिभिः श्रीकृ
ष्णैः माधव्यो माधवस्य भार्या वदितव श्रीकृष्णं बोधयंतीति वयांसि पक्षिणोऽरुवन् ॥ अति शायेन
अरुजयन् ॥ मंदारवनवायुभिर्गायत्स्वलिषु अनिद्राणि वयांसि ॥ २ ॥ वेदर्भी सुपलक्षणा परिरंभणवि

श्रीशुक उवाच ॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन् ॥ गृहीतकंठ्यः पतिभिर्माध
व्यो विरहातुराः ॥ १ ॥ वयांस्यरुवन्कृष्णं बोधयंतीव वंदिनः ॥ गायत्स्वलिष्वनिद्राणि मंदारव
नवायुभिः ॥ २ ॥ मुहूर्तं तं तु वैदर्भी नामृष्यदतिशोभनं ॥ परिरंभणविश्लेषात्प्रियबाह्वंतरं गता
ता ॥ ३ ॥ ब्राह्मे मुहूर्त उत्थाय वार्युपस्पृश्य माधवः ॥ दध्यौ प्रसन्नकरण आत्मानं तमसः परं ॥
४ ॥ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषं ॥ ब्रह्माख्यमस्योद्भवनाश
हेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिम् ॥ ५ ॥ अथाप्लुतोंऽभस्यमले यथाविधि क्रियाक
लापं परिधाय वाससी ॥ चकार संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ॥ ६ ॥

शेषाणि पर्यालोच्य ॥ ४ ॥ एकमखंडमत्र हेतुः ॥ अनन्यं निरुपाधिं अतएवाव्ययं नित्यं स्वयंज्योतिर्देहेतुः
नित्यनिरस्तकल्मषं अविद्या यस्मात्तमुपलक्षणमाह ॥ अस्योत्पत्तिविश्वस्य लक्षितो भाव अस्यासौ निर्वृति
स्वभावः सत्तातिरूपनिरानंदः तथापि गुणातीतभावस्तमेव समानाभेदयः सदेव सोम्येदमग्र आसीदित्यादि
श्रुतेः ॥ तं सदानंदमित्यर्थः ॥ ५ ॥ आप्लुतः स्नातः संध्यायाः उपगमनमुपासनमादिर्यस्या भवति ॥ त
या क्रियाकलापं चकार कार्यं नाडदयात्मवमेव हुतानलः ब्रह्मगायत्रीं जजाप ॥ ६ ॥ ॥

५५

हेयोगेश्वरस्यात्मन ॥ आत्मनिममममनसितवत्स्वरूपेवानिर्भाताः ॥ अतोनास्तवयोगमायायाः केवलंवैभ
वंविदामविस्मः नतुतत्त्वमर्थमितिभावः ॥ तन्मानुष्यनाधेनमुसामि ॥ अतोमाशक्यापुत्रत्वात् अव
ज्ञानीहीति ॥३९॥ तत्साल्लोकंशिक्षयन्निमंधर्ममास्थितः नतुतत्त्वतः हेपुत्रमाखिदमोहंमाप्नुहीति
४०॥ इत्येवमनुगृहीतस्तमेकमेवसंतंददर्शेति ॥४१॥ मुहुर्मुहुर्दृष्ट्वाजातकौतुकोविस्मितोमुनिरभूदिः

विदामयोगमायास्तेदुर्दर्शाअपिमायिनां ॥ योगेश्वरात्मन्निर्भाताभवत्पादनिषेवया ॥३८॥ अ
नुजानीहिमांदेवलोकांस्तेयशसाप्लुतान् ॥ पर्यटामितवोद्गायन्लीलाभुवनपावनीः ॥३९॥ श्री
भगवानुवाच ॥ ब्रह्मन्धर्मस्यवक्ताहंकर्तातदनुमोदिता ॥ तच्छिक्षयंल्लोकमिममास्थितः
पुत्रमाखिदः ॥४०॥ श्रीशुकः ॥ इत्याचरंतंसद्धर्मान्पावनान्गृहमेधिनां ॥ तमेवसर्वगेहेषुसंतमे
कंददर्शह ॥४१॥ कृष्णस्यानंतवीर्यस्ययोगमायामहोदयं ॥ मुहुर्दृष्ट्वाऋषिरभूद्विस्मितोजा
तकौतुकः ॥४२॥ इत्यर्थकाममधर्मेषुकृष्णेनश्रद्धितात्मना ॥ सम्यक्सभाजितः प्रीतस्तमेवा
नुस्मरन्ययौ ॥४३॥ एवंमनुष्यपदवीमनुवर्तमानोनारायणोखिलभवायगृहीतशक्तिः
रेमेंगषोडशसहस्रवरांगनानांसव्रीडसौहृदनिरीक्षणहासजुष्टः ॥४४॥ यानीहविश्ववि
भवोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणिहरिश्चकार ॥ यस्त्वंगगायतिशृणोत्यनुमोदते
वाभक्तिर्भवेद्भगवतिह्यपवर्गमार्गे ॥४५॥ इतिश्रीएकोनसप्ततितमोध्यायः ॥६९॥

ति ४२ श्रद्धितेतियः श्रद्धायुक्तः आत्मायस्यतेन ॥४३॥ नारदेदृष्टंकृष्णस्यलीलांनिगमयति अखिलस्य
भवायोद्भवायगृहीताः शक्तयोनानामूर्तयोयेनसः सव्रीडंतेनचतत्सौहृदंचतेननिरीक्षणंहासश्चतेना
भ्याजुष्टः अनन्यविषयाणिअसाधारणानि ॥४४॥ अपवर्गोमोक्षस्तत्प्रदे ॥४५॥ इतिश्रीभावार्थदीपिका

श्री॰ भा॰ र॰ ३॰ ५५

कालेतमत्समयेविधिना ॥ उपयापसंप्राप्यतांविवादमित्यर्थः ॥ कल्पयंतंघटयंतंविभूतिभिर्विभवैः प्रस्थापनं दिक्तुनामाद्यादीनांस्वगृहदानम्नृदंप्रतिनयनं ॥ तन्मृहात्पुनरानयनं ॥ तैर्महोत्सवान् ॥ कल्पयंतं ॥ योगे

क्वापिसंस्थामुपासीनंजपंतंब्रह्मवाग्यतं ॥ पकन्नवासिचर्मभ्यांचरंतमसिवर्त्मसु ॥ २५ ॥ ग्रस्थे गजेरथेवापिविचरंतंगदाग्रजं ॥ क्वचिच्छयानंपर्यंके स्तूयमानंचबंदिभिः ॥ २६ ॥ मंत्रयंतं तुकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः ॥ जलक्रीडारतंक्वापिवारमुख्याबलावृतं ॥ २७ ॥ कुत्रचि द्विजमुख्येभ्यो ददतंगाः स्वलंकृताः ॥ इतिहासपुराणानिशृण्वंतंमंगलानिच ॥ २८ ॥ हसंतंहा स[illegible] ॥ कथयाकदाचित्प्रियया गृहे ॥ क्वापिधर्मसेवमानमर्थे कामौचकुत्रचित् ॥ २९ ॥ ध्यायंतंक्वचिदात्मानपुरुषप्रकृतेः परम् ॥ शुश्रूषंतंगुरून्क्वापि कामैर्भोगैः सपर्यया ॥ ३० ॥ कुर्वंतंविग्रहंकैश्चित्संधिंचान्यत्रकेशवं ॥ कुत्रापिसहरामेण चिंतयंतंसतांशिवं ॥ ३१ ॥ पुत्राणांदुहितॄणांचकालेविधुपयापनं ॥ दारैर्वरैस्तत्सदृशैः कल्पयंतंविभूतिभिः ॥ ३२ ॥ प्रस्थापनोपानयनैरपत्यानांमहोत्सवान् ॥ वीक्ष्ययोगेश्वरेश स्ययेषांलोकाविसिस्मिरे ॥ ३३ ॥ यजंतंसकलान्देवान्क्वापिक्रतुभिरूर्जितैः ॥ पूर्तयंतंक्वचि द्धर्मकूपारामालयादिभिः ॥ ३४ ॥ चरंतंमृगयांक्वापिहयमारुह्यसैंधवं ॥ घ्नंतंतनः पशू ९ ५८

घरेशस्य ॥ येषामपत्यानांमहोत्सवादीन् ॥ वीक्ष्यलोकाः ॥ सर्वेविसिस्मिरे ॥ विस्मयंचक्रुः ॥ यथाभूतान् कल्पयंतं ॥ ३४ ॥ ग्रस्थकलिंगं ॥ वेसमनवेसान्[illegible] ॥ ३५ ॥ रामानुजायनमोनमः ॥ ३७ ॥ रामा

भगवतास्वस्यार्हणं सम्मानं स्वं संभावयन्नाह ॥ नैवेति ॥ सर्वमिदं त्वादेवमर्हणं ॥ तत्तमसंगोरवान् ॥ न
हि कर्यं सादिषमेरीतयाह ॥ खलानादमश्चनैवाद्भुतमिति ॥ कुतो जगतः स्थितिनिर्धारणं दलणं पालनं ताः
भ्यां सदितस्यानि ॥ श्रेयसायतत्वार्ये ॥ स्वेच्छावतारइति ॥ वयमस्यङ्क्तिमः अतः खलदमः साधुसंमानं चयुक्त
मितिभावः ॥ १७ ॥ यदुक्तं प्रभोकिंकरवामेतितत्राह ॥ दृष्टमितिभुक्तं जननतायाम् अपवर्गं द्वयं ॥ किंचानिद्रलक्षणं

नारद उवाच ॥ नैवाद्भुतं त्वयि विभोऽखिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानां ॥ निःश्रे
यसाय हि जगत्स्थितिरक्षणाभ्यां स्वैरावतार उरुगाय विदाम सम्यक् ॥ १७ ॥ दृष्टं तवांघ्रियुगलं
जननापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं ध्यायंश्च
राम्यनुगृहाण यथा स्मृतिः स्यात् ॥ १८ ॥ ततोऽन्यदाविशद्गेहं कृष्णपत्न्याः स नारदः ॥ योगेश्वरे
श्वरस्याङ्ग योगमायाविवित्सया ॥ १९ ॥ दीव्यंतमक्षैस्तत्रापि प्रियया चोद्धवेन च ॥ पूजितः परया भ
क्त्या प्रत्युत्थानासनादिभिः ॥ २० ॥ पृष्टश्चाविदुषेवासौ कदायातो भवानिति ॥ क्रियते किं नु पू
र्णानामपूर्णैरस्मदादिभिः ॥ २१ ॥ अथापि ब्रूहि नो ब्रह्मन् जन्मैतच्छोभनं कुरु ॥ स तु विस्मित उ
त्थाय तूष्णीमन्यदगाद्गृहं ॥ २२ ॥ तत्राप्यचष्ट गोविंदं लालयंतं सुतान् शिशून् ॥ ततोऽन्यस्मिन् गृहे
ऽपश्यन्मज्जनाय कृतोद्यमं ॥ २३ ॥ जुह्वंतं च वितानाग्नीन् यजंतं पंचभिर्मखैः ॥ भोजयंतं द्विजान् क्वा

यान् ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यं ॥ किंच संसारकूपे पतितानामुत्तारणाय अवलंबमाश्रयं ॥ एवंभूतं
तवांघ्रियुगलं मया दृष्टमतः कृतकृत्योऽस्मि तथापि तत्स्मृतिर्यथा स्यात् ॥ तथानुगृहाण ॥ नूनं तच्छ्रा
यन्ने वर्तिनं वयामेति ॥ १८ ॥ एतैर्दीव्यंतमित्यादेर्दशभिः ज्ञातव्य ॥ २३ ॥ वितानाग्नीन् ॥ आहवनीयादीन् ॥ अग्नि
होत्रेणापंचभिर्मखैर्यज्ञैर्महायज्ञैर्यजंतं ॥ ४२ ॥ रामानुजायनमो नमः ॥ ४२ ॥ ॥ ॥

श्री॰
भा॰ द॰
३
प॰ ३

मुक्तादाम्नो वितानेवा विविधानि लंबनानि विद्यंते येषु तैः माणिक्यमयैः परिष्कृतैर्भूषितैः ॥१०॥ इत्थं समीक्षमाणे मेधाय मिति बुद्धिर्यथा ते मनुस्सर्वे सर्वकालं आत्मना समानानि गुणाद्रूपवयांसि स्ववेशोलंकारं प्रयस्याः तेन दासीसहस्राणायुतया रुक्मिण्या सह ॥१३॥ श्रियाः रुक्मिण्याः पर्यंकतः प्रवीविशत् ॥ उपवेशयामास ॥१४॥ प्राविशत् ॥ प्रमिताद यारे मध्यः ॥ विमदिदिशाजेन वातदाच सह ज्याभिभाष्य ग्राहेम्गुक्ते वितानेनिर्मिते सक्ष्मामुक्तादाम विलं विभिः ॥ दांतेरासन पर्यंकेर्माणिक्य समपरिष्कृतैः ॥२०॥ दासीभिर्निष्ककंठीभिः सुवासोभिरलंकृत ॥ पुंभिः सकंचुकोष्णीषस्ववस्त्रमणिकुंडलेः ॥२१॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभीषु शिखंडिनोंग ॥ नृत्यंति यत्र विहितागुरुधूपमक्षैर्निर्यांतमीक्ष्य घनबुद्धय उन्नदंतः ॥२२॥ तास्मिन्समानगुणरूपवयः सुवेशदासीसहस्रयुतयानुसवंगृहिण्या ॥ विप्रोददर्श चमरव्यजनेन रुक्मदंडेन सात्वतपतिं परिवीजयंत्या ॥२३॥ तं सन्निरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यंकतः सकलधर्मभृतांवरिष्ठः ॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांजलिरवीविशदासने स्वे ॥२४॥ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्नि बिभ्रज्जगद्गुरुतरोपि सतांपतिर्हि ॥ ब्रह्मण्यदेव इति यद्गुणनाम युक्तं तस्यैव यच्चरणशौचमशोषयत्तीर्थं ॥२५॥ संपूज्य देवर्षिवर्यमृषिः पुराणो नारायणो नरसखो विधिवत्रैरेणान्वयः कथं क्षतः यस्य चरणशौचं गं (दितेन ॥ वाण्याभिभाष्य मितयामृतमिष्टयातं प्राह प्रभो भगवन् शोषयतीर्थमस्य ॥ अतएव जगद्गुरुतरोपि सतांधर्मभृतांपतिस्त्वां देवमकरोदित्यर्थः ॥ सतांपतित्वे हेतुः ब्रह्मण्यदेव इति यत ॥ गुणाकृतं नाम तस्यैव यत्तो युक्तं समंजसं अतस्तद्र्मप्रवर्तनायैवमाचरितमित्यर्थः ॥ अभिभाष्यदिष्ट्यात्वदागमनमित्यादि प्रियमुक्तमन् ॥ २६ ॥ रामानुजायनमोनमः ॥ २६ ॥ ॥

दिदृक्षामपितयेनाह ॥ चित्रमिति ॥ द्व्यष्टसहस्रं स्त्रीः ॥ उदवहत् ॥ परिणीतवान् ॥ २ ॥ तां द्वारवतीमत्र वर्णयति सार्धद्वयेन ॥ पुष्पितानि उपवनेषु उपवनेषु आरामेषूद्यानेषु ॥ द्विजानामलीनां च कुलानि तैर्नादितां ॥ ३ ॥ छुरितेषु व्याप्तेषु ॥ ४ ॥ महामरकतैः प्रख्यायंते प्रकाशंत इति ॥ तथा स्वर्णरत्नमयाः परिच्छदाः परिच्छदाः १ तिकरणेषु तैः ॥ ५ ॥ पतंत्यः प्रचलंत्यः पताकायेषु तैर्ध्वजैर्वारित आतपो यस्यां तां ॥ ६ ॥ तस्यां सर्वे धिष्ण्य

श्रीशुक उवाच ॥ नरकं निहतं श्रुत्वा तथोद्वाहं च योषिताम् ॥ कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ॥ चित्रं बतैतदेकेन वपुषा युगपत्पृथक् ॥ गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ २ ॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् ॥ पुष्पितोपवनारामद्विजालिकुलनादिता ॥ ३ ॥ उत्फुल्लेंदीवराम्भोजकह्लारकुमुदोत्पलैः ॥ छुरितेषु सरःसूच्चैः कूजितां हंससारसैः ॥ ४ ॥ प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः ॥ महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ॥ ५ ॥ विभक्तरथ्यापथचत्वरापणैः शालासभाभी रुचिरां सुरालयैः ॥ संसिक्तमार्गांगणवीथिदेहलीं पतत्पताकाध्वजवारितातपां ॥ तस्यामंतःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ॥ हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितं ॥ ७ ॥ यत्र षोडशभिः सद्मसाहस्रैः समलंकृतं ॥ विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥ ८ ॥ विष्टब्धं विद्रुमस्तं भैर्वैदूर्यफलकोत्तमैः ॥ इंद्रनीलमयैः कुड्यैर्जगत्या चाहतत्वि

पैः ॥ लोकपालैरर्चितं षोडशभिः सद्मस हस्रैः समलंकृतं हरेरंतःपुरं प्रविवेश तत्र च तस्य शौरेः पत्नीनां भवनेष्वेकतममेव विवेशेत्यन्वयः । यत्र कौशलं त्वष्ट्रा दर्शितमित्यंतः ॥ पुरभवनयोर्विशेषणं तद्वर्णयति चतुर्भिः ॥ विष्टब्धमिति विद्रुमस्तंभैः विष्टब्धं धृतं ॥ वैदूर्यमयानि फलकोत्तमानि शोभनान्याच्छादनानि ॥ तैश्च इंद्रनीलमयैः कुड्यैरादिभिश्चोपलक्षितं जगत्या भूमिकया चेंद्रनीलमय्यानहतात्विड्यस्या तया ॥ ९ ॥ ॥ रामानुजाय नमः ॥

शेषश्चायानंतको शेषिशेषपर्यंकोपरि शिष्यमाणोयः सत्वं त्वमेवेति वा ॥ ४५ ॥ अनेतोस्मात्स्वकोपश्चतत्वायमनु विनयवेत्याहुः कोपस्तइति स्थितिपालनेतत्परः तत्पर्यवान ॥ पाठांतरे संबोधने ॥ विश्वं कंकृत्स्नं यस्य सत्वस्थि

स्थितत्वत्पयययानो त्वमेकोदेवनिराश्रयः ॥ लोकान्क्रीडर्नवर्दंनिदि ॥ ४४ ॥ त्वमेव मूर्ध्नीदमनंतली लया भूमंडलं सर्वमिदं विभर्षि ॥ अंतेचयः स्वात्मनि रुद्धविश्वः शेषेद्वितीयः परिशिष्यमाणः ॥ ४५ कोपस्तेखिलशिक्षार्थं न द्वेषान्न च मत्सरात् ॥ बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्पर ॥ ४६ नमस्ते सर्वभूतात्मन्सर्वशक्तिधरायच विश्वकर्मन्नमस्तेस्तुत्वां वयं शरणंगताः ॥ ४७ ॥ एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितः सुप्रसन्नो माभैष्टेत्यभयं ददौ ॥ ४८ ॥ दुर्योधनः पारिबर्हं कुंजरान्षष्टिहायनान् ॥ ददौ च द्वादशशतान्ययुतानि तुरंगमान् ॥ ४९ ॥ रथानां षट्सहस्राणि रौक्माणां सूर्यवर्चसाम् ॥ दासीनां निष्ककंठीनां सहस्रं दुहितृवत्सलः ॥ ५० ॥ प्रतिगृह्य तु तत्सर्वं भगवान्सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः ॥ ५१ ॥ ततः प्रविष्टः स्वपुरीं हलायुधः समेत्य बंधूननुरक्तचेतसः ॥ शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितं ५२ ॥ अद्यापि च पुरं ह्येतत्सूचयद्रामविक्रमम् ॥ समुन्नतं दक्षिणतो गंगायामनुदृश्यते ॥ ५३ ॥ एतत्ते कीर्तितं सर्वं रामस्य चरितं मया पठेच्छ्रावयेद्यस्तु सर्वपापैः प्रमुच्यते ॥ ५४ ॥ इति श्री दशमस्कंधे बलभद्रविजयोनामाष्टाषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ रामानुजायनमः ॥ ६८ ॥ ॥

ति संबोधने ॥ ४६ ॥ वेपमानायनं प्रुंरेयेषांते ॥ ४८ ॥ तुरंगमाद्वादशायुतानि ॥ ४९ ॥ सुहृद्भिः कौरवैः ॥ ५१ ॥ मध्ये सभायां सभामध्ये ॥ ५४ ॥ इति श्री भागवतभावार्थदीपिकायां दशमस्कंधे अष्टाषष्टितमः ॥ ६८ ॥ ॥ एकोनसप्ततितमे गार्हस्थ्यं प्रति मंदिरे ॥ कृष्णस्य नारदो दृष्ट्वा विस्मितो गां ततः स्तुवन् ॥ १ ॥ ॥ ॥

अहो भूद्धाः श्रीकृष्णमप्यधि विभवं तद्युति॥ कुपितश्चाह॥ अथ मे त्वादि विभिः॥३५॥ मोल्हनमे मौलि पुष्कैकरत्न भोगैः
उत्तमैर्मौलिभिरितिवा उपासितानि तीर्थानि येर्योगिभिः तेषामपि तीर्थप्रदा॥ उपासितं सर्वैः सेविसर्वैः सेवि
वितं तीर्थं गगनात स्य तीर्थं निमित्तं॥ किंच त्रस्साभवः श्रीश्वश्रद्दमपि उद्दहेम॥ कथं भक्तावयं॥ उग्रसेनस्य मदिवं

अथ मोक्षमने येन यावि जानो मगं श्विपः॥ आनीय भुक्तस्त ते सो सोन किलाख्या सनार्दनः॥३७॥ यस्य
पादयुगं सा ह्यो छ्रीरूपा स्तेभ्वि लेश्वरी॥ सनार्दनेति किल श्रीशोनरदेव परिवृह्दान्॥३८॥ यस्याग्र
पंकजरजोपि विलोक पालैर्मौल्हनमैर्धृत मुपासितमीर्थ्यतीर्थं॥ त्रस्साभवोहमपि यस्य कलाः
कालायाः श्रीश्वोहहेमविरमस्य नृपासनं त्व॥३७॥ भुंजते कुरुभिर्दत्तं भूखंडं वृष्णयः किल उग्रान
दः किल वयं स्वयं तं कुरवः स्थिरः॥३८॥ अहो पेश्वर्यमत्ता नोमत्ता नामिव मानिनो॥ असंबद्धा गिरो
त्ता: कः सहेतानुशासिता॥३९॥ अद्य निष्कौरवीं पृथ्वीं करिष्यामि त्वमर्षितः म॥ इत्युक्त्वाद्दलमुत्त
स्थौ दहन्निव जगत्रयं॥४०॥ लांगलाग्रेण नगरमुद्विदार्य गजाह्वयं॥ विचकर्ष सगंगायां प्रविष्य
त्वमर्षितः॥४१॥ जलयानमिवाघूर्णं गंगायां नगरं पतत्॥ आकृष्यमाणमालोक्य कौरवा जातसं
भ्रमाः॥४२॥ तमेव शरणं जग्मुः सकुटुम्बा जिजीविषः॥ सलक्ष्मणं पुरस्कृत्य साबं प्रांजलयस्तदा॥४३॥
राम रामाखिलाधार प्रभावं न विदाम ते॥ मूढानां नः कुबुद्धीनां क्षंतुमर्हस्यधीश्वर॥४४॥

प्रभुत्वं कुरुस्वाधीनमिति॥ कुरुसमदिमानमाह॥ अथ मेति यस्य कलायाः अंशा स्य कलाः अंशाः मद्मानावि
वमयादिना रुक्ताः परुषाः अत्तु शासिता स्वयं दंडकरः सन्॥३९॥ लांगलाग्रेणदक्षिणेनः आकारकृले
निरवानेन॥ उद्विदार्य विपाद्य॥ जिजीविषवः अपत्तराधिका सोढव्यम्॥ ४४॥

अस्मैव पुंपंचपतत्र इति चतुर्भिः यौनेन नष्टयायाविवाहेन ॥ किंच ॥ चामरव्यजन इति भुंजंति उपेक्षं जनत इत्युपेक्षः
अस्मदुपेक्षया अस्माकमनादरेण ॥२६॥ अतः परं तान न पदं विद्याम इति ॥२७॥ अवरुंधीत स्वीकुर्यात् ॥ उरणो मे
षः ॥२८॥ जन्मना बंधुभिश्चापलक्षितया श्रिया श्रिया ॥ उन्नद्धः उन्मत्तो मदो येषां ते दुर्वाच्यं परुषवाक्यं ॥ अस

पतेयौनेनसंबद्धाः सहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतांनीताअस्मद्दत्तनृपासनाः ॥२५॥ चा
मरव्यजनेशंखमातपत्रंचपांडुरं ॥ किरीटमासनंशय्यांभुंजंत्यस्मदुपेक्षया ॥२६॥ अलंयदूनां
नरदेवलांछनैर्दातुः प्रतीपैः फणिनामिवामृतम् ॥ येऽस्मत्प्रसादोपचिताहियादवाः आज्ञा
पयंत्यद्यगतत्रपावत ॥२७॥ कथमिंद्रोपिकुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुंधी
तसिंहग्रस्तमिवोरणः ॥२८॥ श्रीशुक उवाच ॥ जन्मबंधुश्रियोन्नद्धमदास्तेभरतर्षभ ॥ आश्रा
व्यरामंदुर्वाच्यमसभ्याः पुरमाविशन् ॥२९॥ दृष्ट्वाकुरूणांदौःशील्यंश्रुत्वावाच्यानिचाच्युतः ॥ अ
वोचत्कोपसंरब्धोदुष्प्रेक्ष्यः सहसन्मुहुः ॥३०॥ नूनंनानामदोन्नद्धाः शांतिंनेच्छंत्यसाधवः ॥ ते
षांहिप्रशमोदंडः पशूनांलगुडोयथा ॥३१॥ अहोयदून्सुसंरब्धान्कृष्णंचापिकुपितंशनैः सांत्वयि
त्वाहमेतेषांशममिच्छन्निहागतः ॥३२॥ तइमेमंदमतयः कलहाभिरताः खलाः ॥ तंमामवज्ञा
यमुहुर्दुर्भाषान्मानिनोब्रुवन् ॥३३॥ नोग्रसेनः किलविभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयो
लोकपालायस्यादेशानुवर्तिनः ॥३४॥

साधुर्जनाः ॥२९॥ नानाधनाभिजनादिमदैरुन्नद्धाः दंडवत्प्रशमः प्रकर्षेण शमयतीति तथा लगुडो दं
डः ॥३१॥ दुर्भाष्यान् ॥ अवाच्यान् शाद्वान् दुर्भाषणान् मनसस्तानि षड्भिः नोग्रसेन इति विभ्रराज्ञापयितुं

यतः कलिनैच्छत ॥१४॥ अतः सोऽनयित्वाजगामेति ॥१५॥ धृतराष्ट्रप्रतिं बुभुत्सयेति अभिप्राय जिज्ञासयेत्य
र्थः ॥१६॥ विधिवदभिषेच्य ॥१७॥ तमुद्धवमर्चयित्वा ॥ सत्कृत्य मंगलपाणयः उपायनहस्ताः हृष्टा अपि प्रणाम॒

तच्छ्रुत्वा नारदोक्तेन राजन्त्स्वं जातमन्यवः ॥ कुरवस्त्वथ संचक्रुरुग्रसेनप्रचोदिताः ॥२३॥ सोऽनयित्वात्
तान्स्वामः सत्वरज्ञानमपि भगवान् ॥ नैच्छत्कुरूणां हस्तीनां कलिकलिमलापहः ॥२४॥ जगाम हास्ति
नपुरं रथेनादित्यवर्चसा ॥ आस्सेनिः षट्दृष्ट्वा स्मृत्वा तस्य ईश्वरः स्वयं देहः ॥२५॥ गत्वा गजाह्वयं रामो बाह्योप
वनमास्थितः ॥ उद्धवं प्रेषयामास धृतराष्ट्रं बुभुत्सया ॥२६॥ सोऽभिवंद्याम्बिकापुत्रं भीष्मं द्रोणं सवाह्लिकं
दुर्योधनं च विधिवद्राममागतमब्रवीत् ॥२७॥ तेऽपि प्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमम् ॥ तमर्चयित्वा
भिययुः सर्वे मंगलपाणयः ॥२८॥ तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन् ॥ तेषां ये तत्प्रभावज्ञाः
प्रणेमुः शिरसा बलं ॥२९॥ बंधून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयं परस्परमथो रामो बभाषेऽवि
क्लवं वचः ॥३०॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः ॥ तदव्यग्रधियः श्रुत्वा कुरुध्वमाविलं
बितं ॥३१॥ यद्यूयं बहवस्त्वेकं जित्वाधर्मेण धार्मिकम् ॥ अबध्नीताथ तन्मृष्ये बंधूनामैक्यकाम्यया
॥३२॥ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमं वचः ॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः ॥३३॥ अ
हो महच्चित्रमिदं कालगत्या दुरत्यया ॥ आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितम् ॥३४॥

१९॥ यद्यपि उग्रसेनस्य वाक्यं न सह्यं तथापि समानीय सपर्ययेति शेषः वीर्यं प्रभावः वीर्यमना
दा शौर्यमुत्साहः बलं सामर्थ्यं नेरुन्नद्धमुच्छृंखलं ॥ आत्मनः शक्तेः सममनुरूपं ॥३३॥ उपानत् ॥ पादरक्षा शि

दशरोगुमिष्ठी टी नाक्षसानायायतीसर्गः २८

श्री.
१०भा.
ट.
५८

सयात्रैवानुमोदनं कार्यं किंतु तत्रागंतव्यमित्याशयेनाह ॥ तस्मिन्निति ॥ तत्रागताश्च सर्वे तद्दर्शनादिनाप्
ता भविष्यतीत्याह ॥ ५२ ॥ श्रवणादिति ॥ अंतेवसायिनः श्वपचा अपि ब्रह्ममयस्य ब्रह्मवन्मूर्त्तेः ॥ इत्याचा
भिमर्शनेन स्पर्शनेन च ते विधूतैनसो तेषां ॥ ५४ ॥ कैमुत्यमतिशयेनाह ॥ यस्येति ॥ हे भुवनानां मंगलरूप दिवि
पाताले भूमौ च प्रथितं यस्य यशो विश्वं पुनाति कथं प्रथितं दिग्वितानं दिग्भुवनानां वितानं वदलंकर

॥ ७० ॥ अध्यायः

तस्मिन्देवक्रतुवरे भवंतं वै सुरादयः ॥ दिदृक्षवः समेष्यंति राजानश्च यशस्विनः ॥ ५३ ॥ श्र
वणात्कीर्तनाद्ध्यानात्पूयंतेंतेवसायिनः ॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥ ५४ ॥ य
स्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानं ॥ मंदाकिनीति दिवि भो
गवतीति चाधो गंगेति चेह चरणांबु पुनाति विश्वं ॥ ५५ ॥ श्रीशुक उ० ॥ तत्र तेष्वात्मपक्षेष्वगृ
णत्सु जिगीषया ॥ वाचः पेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः ॥ ५६ ॥ श्रीभगवानु० ॥ त्वं हि नः प
रमं चक्षुः सुहृन्मंत्रार्थतत्त्ववित् ॥ अथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥ ५७ ॥ इत्युपामंत्रि
तो भर्त्रा सर्वज्ञेनापि मुग्धवत् ॥ निदेशं शिरसाधाय उद्धवः प्रत्यभाषत ॥ ५८ ॥ इति श्रीभाग

वते म. पु. द. स्कं.

गां तया च चरणांबुजप्रथितं पुनाति कथं तत्स्वसिद्धं दिवि मंदाकिनीति ॥ अधश्च भोगवतीति ॥ इह च भूमौ
गंगेति ॥ तस्य तवागमनात्सर्वं मंगलं पवित्रं भविष्यतीति भावः ॥ ५५ ॥ तत्रैवं नारदोक्ते तेषु स्वपक्षे मानेष्वात्मीय
पक्षेषु यादवेषु जरासंधस्य जिगीषया अगृणत्सु अप्रस्तुवमानेषु वाचः पेशैः पेशलवाग्भिरित्यर्थः ॥ ५६ ॥ च
क्षुर्हेतुः मंत्रार्थानां मंत्रसाध्यानां कार्याणां तत्त्वं विपाकवेदिता ॥ ५८ ॥ इति श्री दशमस्कंधे भावार्थ(

दीपिकायां सप्ततितमोऽध्यायः ॥ ७० ॥

एवमपि गृहेष्वेव सर्वज्ञेन जरासंधवधार्थमेव पांडवचिकीर्षितं दृष्टो नारदो मायेयमिति ज्ञात्वाह ॥ दृष्टा इति त्रिभिः विश्वसृजः ब्रह्मणोपि मायिनो मोहकस्य ते स्वशक्तिभिर्विद्यादिभिश्च तेषु तयामितया च त्वनावृतमानस्य यद्यहं भूतेषु वर्तनादिभूतानि मा किं न पश्यंतीति तत्राह ॥ वह्नेरिव छन्नरुचः शक्तिभिर्वह्नेः छन्नरुचः कुप्रकाशो यस्य तस्य ॥ तत्तवेदं प्रमादि न मेद्भुतं ॥ ३८ ॥ इदं जगत्कथं भवं तं ॥ असदेव यत्त्वमायया विद्यमानात्मतया वभासते ॥ तज्जगत्सृजतः किंतु केवलं तेतुभ्यं नमनमेव शोकामित्याह ॥ तस्मै नम इति ॥ कुतः स्मेन

श्रीनारद उवाच ॥ दृष्टा मयाते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ॥ भूतेषु भूमं स्वरतः स्वशक्तिभिर्वह्नेरिव छिन्नरुचो न मेद्भुतं ॥ ३८ ॥ तवेहितं कोर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्यमानात्मतयावभासते तस्मै नमस्ते स्वविलक्षणात्मने ॥ ३९ ॥ जीवस्य यः संसरतो विमोक्षणं न जानतोनर्थवहाच्छरीरतः ॥ लीलावतारैः स्वयशः प्रदीपकं प्राज्वालयत्त्वा तमहं प्रपद्ये ॥ ४० ॥ अथाप्याश्रावयेब्रह्मन्नरलोकविडंबनं ॥ राज्ञः पैतृष्वसेयस्य भक्तस्य च चिकीर्षितं ॥ ४१ ॥ यक्ष्यति त्वां मखेंद्रेण राजसूयेन पांडवः ॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदतां ॥ ४२ ॥

स्वरूपेण सर्वतो विलक्षणात्मने अचिंत्यायेत्यर्थः ॥ ३९ ॥ ननु वेवं भूतस्य किं मायाचेष्टितैरित्यत आह ॥ जीवस्येति ॥ अविद्यानमसा वृतत्वेन अनर्थप्रापकाच्छरीरात्संसरतः तेनैव तमसा तस्माच्छरीरादिमोक्षोपायमजानतः प्राज्वालयत् ॥ प्रदीपितवान् ॥ तं त्वां त्वाय शः श्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः ॥ ४० ॥ आश्रावये आवयिष्यामि नरलोकविडंबनं ब्रह्मस्त्वं ब्रह्मस्त्रि

दृष्टयादर्शिनो लोकस्य भवभये विघ्नरूपं नेनोनमंति लोक इति ॥ विकर्म निषिद्धं काम्यं च तस्मिन्निरतः स्वेकु
शले धर्मे भगवतोर्चने त्वयोदिते उक्ते पंचरात्रे सामान्यतस्त्वागीनाम् ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि य
त् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति ॥ प्रमत्तोनवहितः ॥ यावदयं लोकः तावदेवास्य लोकस्य यः
सद्योजीविताशां छिनत्ति ॥ तस्मै तुभ्यमनिमिषाय कालात्मने नमइति ॥२४॥ सेयं लोकस्यैवानिर्वेदेन तु त्वं क्रु
द्धः ॥ अतोस्माकं कुतो यत्तद्दुःखमापन्नमित्याशयेनाह ॥ लोक इति ॥ भो ईश जगदिनः जगत ईश्वरः तस्मिं

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह
जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै ॥२५॥ लोके भवाञ्जगदिनः कलयावतीर्णः
सद्रक्षणाय खलनिग्रहणाय चान्यः ॥ कश्चित्त्वदीयमतियाति निदेशमीश किं वा जनः स्वकृ
तमृच्छति तन्न विद्मः ॥२६॥ स्वमायिनं त्वमुपसंस्तवपरं तत्त्वमीशाशास्वदं येन सुतकेन धुरं वहामः
दिव्यानदात्मनि समं त्वनदनीद्दलभ्यं क्षेपणामद्देतिकृपणास्तव मायये श ॥२७॥

त्वयि समुद्धरणार्थमवतीर्णेपि चिरस्माकं दुःखं स समर्थस्यात् ॥ तर्हि किमन्यः कश्चित्त्वत्तः संथादिन्न
दोज्ञामतिलंघयति किं वा तत्तथा रत्नमाणोपि जनः स्वकर्मजं दुःखं प्राप्नोति वेति न विद्मः ॥ न चैतद्दुःभ
यमपि युक्तमिति भावः ॥२६॥ किंतु दुःखं तु न दोषः स्वमायिनमिति स्वभवज्ञातं त्वत्पसुस्वं त्वत्पोचितं स्वं
स्व ॥ यतः परमं तत्त्वं विषयसाम्यं ॥ किंच संप्रति शास्त्रं यस्मिन् ॥ तेन स्तुततन्त्वल्पेन शरीरेण ध्रुव पुत्रदारा
दिभुक्तराज्यचिंताकं हलं वहामः ॥ अस्त्रोकष्टतनः वलयतः पूर्वमेव निष्कामाः संतः त्वनाश्रितास्या

तन्मायाकृतं कर्मबंधं ममैव निवर्त्तयेति प्रार्थयंते [damaged] त्वन्न इति ॥ विमुंच त्वं विमोचय मागधो जरासंधः तन्सं
न्तकाल्कर्मपाशात् ॥ २४ ॥ भवद्भिरेव विक्रम्य तेतो निरोम्यतामिति चेदत आहुः ॥ यद्इति ॥ यदेक एव आयुतमं
तेगजानांवीर्यं बिभ्रत्स एव भवनेभ्य मुंजो मामारुरोध सिंहो मेषीरिव ॥ किं च युष्मदीया वयमिति ॥ अस्मान धि
केबाधते इत्याहुः यो वा इति ॥ हे उदानचक्र उद्यम्य दर्शन ॥ यो वै द्विनवकृत्वः ॥ अष्टादशवारान् ॥ त्वया
तन्त्रो भवात्प्रणतशोकहरांघ्रियुग्मो बद्धान्वियुङ्क्ष्व मगधाह्वयकर्मपाशात् ॥ यो भूभुजोऽयुतमतं
गजवीर्यमेको बिभ्रद्रुरोध भवने मृगराडिवावीः ॥ २९ ॥ यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृ
धे खलु भवंतमनंतवीर्यं ॥ जित्वा नृलोकनिरतं सकृदूढदर्पो युष्मत्प्रजा रुजति नोऽजित तद्विधे
हि ॥ ३० ॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ॥ प्रपन्नाः पादमूलं ते दीनानां शं विधीयतां ३१
श्रीशुक उवाच ॥ राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथा रविः
३२ ॥ गायन्निराम[?]थुरया प्रियकर्माणि जन्म च ॥ द्रावयंश्च मसघोष्व लोकान्विस्मयन्नस्य प्रं ॥ ३३
तं दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववंद उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥ ३४
सभाजयित्वा विधिवत्कृतासनपरिग्रहं ॥ बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिं ॥ ३५ ॥ श्री
भगवानुवाच ॥ अपि स्विदद्य लोकानां त्रयाणामकुतोभयं ॥ ननु भूयान्भगवतो लोकान्पर्यटतो
सहस्रेवमेमानेतत्समदग्धाक्ष नः त्वया भग्नः पराजितः पश्चादनंतवीर्यं सांपिनृलोकनिरतं नरशरीरविं
नोदं भवंतं सकृज्जित्वा ऊढदर्पः पुनः गर्वं युष्मत्प्रजाः नः रुजति ॥ तन्न ॥ यद्युक्तं न हि धेरूम्यथः ॥ ३० ॥ हे नाथा
द्र इतीतिभ्यान्महान् ॥ ३५ ॥ गुणो लाभो यमस्माकं च मस्माकं यत्सर्वलोकद्रष्टमान ज्ञानमिति ईश्वरैः का
र्यैर्यत्नेषु ३२ ॥ रामानुजाय नमो नमः ३२ ॥ ॥ रामानुजाय नमः ३२ ॥

नहि तेविदितं किंचिल्लोकेष्वीश्वरकर्तृषु ॥ अथ पृच्छामहे युष्मान्पाण्डवानां चिकी
र्षितं ३७

श्रीद०
भा०
६०

शिशिरिनामसूर्येण॥१४॥ तयोरनीकानिद्रवोनाथोयेषांनानि॥१५॥ अनिरीक्षमाणास्तिर्यग्भ्रमन्नेवेभवेति
२१॥ ज्वरबलयाद्गुमभ्यधावदितिनारायणः शीतज्वरमसृजत॥२३॥ माहेश्वरः समाक्रन्दन्युयुधे॥२४॥
आत्मानं परमं यो कि मतं मन्यमानः श्रीकृष्णप्रतापयितुं प्रवृत्तः स्वयमेवतत्त्वः सन्नन्तपरमेश्वरं ज्ञात्वा स्तव
वमस्करोति॥ नमामीति॥ त्वां त्वां अनन्तशक्तिं नमामि॥ कुतः परेशं ब्रह्मादीनामीशं॥ तत्रहेतुः सर्वात्मानंचे

मोहयित्वा तु गिरिशं जृम्भणास्त्रेण जृम्भितं॥ बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः॥१४॥ स्कं
दः॥ प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः॥ असृग्विमुञ्चन्गात्रेभ्यः शिखिनापाक्रमद्रणात्॥१५॥ कु
म्भाण्डः कूपकर्णश्च पेततुर्मुसलार्दितौ॥ दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः॥ विशीर्यमाणं स्वब
लं दृष्ट्वा बाणोऽत्यमर्षणः॥ कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिं॥ धनूंष्याकृष्य युगपद्बाणः
पञ्चशतानि वै॥ एकैकस्मिन्शरौ द्वौ द्वौ संदधे रणदुर्मदः॥१८॥ तानि चिच्छेद भगवान्धनूंषि युग
पद्धरिः॥ सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत्॥१९॥ तन्माता कोटरा नाम नग्ना मुक्तशिरो
रुहा॥ पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया॥२०॥ ततस्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्र
जः॥ बाणश्च तावद्विरथश्छिन्नधन्वाविशत्पुरीं॥२१॥ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रि
शिपात्॥ अभ्यधावत दाशार्हं दहन्निव दिशो दश॥२२॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्व
रं॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ॥२३॥ माहेश्वरः समाक्रन्दन्वैष्णवेन बलार्दितः॥ अल

नेयि नावेतकृतः॥ केवलं शुद्धं ज्ञप्तिमात्रं चैतन्यघनं तदेवसर्वचेतयितृत्वेन परमेश्वरत्वमुक्तं किंचावि
श्वस्य स्थित्यादिहेतुतारूपी स्वाह॥ विश्वोत्पत्तिस्थित्यन्तहेतुं ब्रह्मप्रसिद्धं नाद्भुतमिति॥ नत्राह॥ यत्तद्ब्रह्मेति
यत्तद्ब्रह्मतदेवत्वमित्यर्थः किं तद्ब्रह्मेति॥ अतआह॥ ब्रह्मलिङ्गपदं तत्सोऽन्यतरं नितं कुतः प्रशान्तं॥ सर्वक्रिया

विधुक षष्टिन मे वायवा णायादवसंगवे ॥ स्तिर्ज्ज्वरेण रुद्रेणा वाणावाहु भिदोद्द्वेः ॥ कमेकद्रादिकं ॥ ३ ॥ रामकृ
सानुवर्तिनश्च नितेष्वरन्तो निर्गताश्रमर्यः ॥ ३ ॥ सर्वतो दिशं रत्नुमेरेणान्वय ॥ भज्यमाना निपुरोद्यानादीनिदं देकव
श्रीशुक उ० ॥ अथ पृथवतो वा निरुद्धं तद्दृ ध्वनो च भारत चत्वारो वार्षिका मासा अतीयुरत्नु घणा वता ॥ २ ॥
नारदान्नद्रपाकर्ण्य वार्त्ता विद्दस कर्म च ॥ प्रययौ शोणितपुरं द्रस्य यः हस्तदेवताः ॥ २ ॥ प्रद्युम्नोयु
युधानश्च गदः सांबोथ सारणः ॥ नंदोपनंदभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥ प्रद्युम्नोदि णीभिर्द्वाद
शाभिः समेता सर्वतो दिशं ॥ रुरुधुर्वाणनगरं समंतात्सात्वतर्षभाः ॥ ४ ॥ भज्यमानपुरोद्यानप्रा
काराट्टालगोपुरं ॥ प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योभिनिर्ययौ ॥ ५ ॥ वाणार्थो भगवान्रुद्रः स
सुतः प्रमथैर्वृतः ॥ आरुह्य नंदिवृषभं युयुधे रामकृष्णयोः ॥ ६ ॥ आसीत्सुतुमुलं युद्धमद्भुतं
लोमहर्षणं ॥ कृष्णशंकरयो राजन्प्रद्युम्नगुहयोरपि ॥ ७ ॥ कुंभांडकूपकर्णाभ्यां बलेन सह संयु
गः ॥ सांबस्य बाणपुत्रेण बाणेन सह सात्यकिः ॥ ८ ॥ ब्रह्मादयः सुराधीशा मुनयः सिद्धचार
णाः ॥ गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥ ९ ॥ शंकरानुचराञ्छौरिर्भूतप्रमथगुह्यकान्
डाकिनीर्यातुधानांश्च वेतालान्सविनायकान् ॥ १० ॥ प्रेतमातृपिशाचांश्च कूष्मांडान्ब्रह्मराक्षसान्
॥ द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥ ११ ॥ पृथग्विधानि प्रायुंक्त पिनाक्यस्त्राणि शार्
ङ्गिणे ॥ प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥ १२ ॥ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्व
तं ॥ आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥ १३ ॥ तिनना निद्रेण न मस्यानानिश्च
द्रावः अट्टालाः शाकारा द्रुप
भिनिर्ययौ ॥ ५ ॥ सुतः स्कंदस्तत्सहितः प्रमथैर्गणौ रामकृष्णाभ्यां युयुधे ॥ ६ ॥ प्रद्युम्नेन स्कंदस्य बाणपुत्रस्य साम्बेन

किंच यावत्सविशेषं वस्तु तत्र च वयं प्रभवामः ॥ त्वयि तु सर्वविशेषातीते न कस्यचित्प्रभुत्वं ॥ किं तु त्वमेव स
र्वप्रभुरिति ज्ञप्तिमात्रं त्वत्त्विद्रूपाल्लोति ॥ कालइति कालः क्षोभकः कर्मनिमित्तं ॥ तद्दैवं फलाभिमुखत्वमभि
मुखत्वमभिव्यक्तं दैवं स्वभावः ॥ तत्संस्कारो जीवस्तद्वान् ॥ द्रव्यं भूतसूक्ष्माणि क्षेत्रं शरीरं ॥ प्राणः सूत्रं ॥ आत्मा
ऽहंकारः विकारएकादशेंद्रियाणि ॥ महाभूतानि चेति षोडशकः तत्संघातो देहः एतस्य च बीजरोह

कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥ तत्संघातो बीजरोहप्रवाहस्त्वन्मायै
षा तन्निषेधं प्रपद्ये ॥ २६ ॥ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गा
न्हिंसया वर्तमानाञ्जन्मैतत्ते भारहारायभूमेः ॥ २७ ॥ तप्तोहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्ब
णेन ज्वरेण ॥ तावत्तापो देहिनां तेंघ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ २८ ॥

वत्प्रवाहः रोहोंकुरः ॥ देहाद्बीजरूपं कर्म ॥ ततोंकुररूपो देहः ॥ ततः पुनरेवमिति ॥ प्रवाहः एषा
त्वन्मायात्तस्या निषेधः ॥ अपोहो यस्मिन् ॥ तं त्वामिति यथावधिभूतं प्रपद्ये भजे इत्यर्थः ॥ २६ ॥ नतु देवकौतु
नयस्य मे कथमेवंभूतत्वं तत्राह नानाभावैरिति ॥ सर्वोपाधिविनिर्मुक्तएव त्वं यथा लीलया स्वीकृतै
र्मत्स्याद्यवतारैर्देवान् ॥ बिभर्षि पालयसि ॥ तदर्थं लोकसेतून् वर्णाश्रमधर्मान् तदर्थं तद्दुष्टान्त्स्ना
धून् ॥ तद्दर्शनेन ॥ उन्मार्गान् ॥ दैत्यादीन् ॥ हंसि संहरसि संहरसि ॥ एवमेतदपि ॥ तव जन्म भूमेर्भारहर
णाय लीलावतारो येन कस्यापि त्वं न सद्रूपः ॥ २७ ॥ प्रतोत्वात् नतु त्वदभिभवे प्रवृत्तं मां नमरत्नइत्याश
येनाह तप्तोहमिति तेजसा तव दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण परसंतापकस्य मम एवतापइति चेदत आ

देत्रिशिरः व्येतु अपयातु मदाज्ञापालकः सन् ॥ स्वैरं विचर ॥ कास्मत्वा ज्ञाता मारु ॥ य इति ॥ नौ आवयोरि
मं संवादं यः स्मरेत् ॥ तस्य त्वत्तो न भयं भवेत् ॥ त्वया भयं नोत्पादनीयमित्यर्थः ॥ २९ ॥ भक्तरक्षार्थं श्रीभगवंतं
स्तौति ॥ त्वं हीति ॥ अयमर्थः ॥ त्वां मज्ञात्वा अयं युध्यत इति ॥ न चिंत्यं यत्त्वं वाङ्मये ब्रह्मण एव परं ब्रह्म विद्या
विषयत्वात् ॥ कुतः परं ज्योतिषामपि प्रकाशकत्वादविषयत्वमित्यर्थः ॥ कथं तर्हि प्रतीतिस्तत्राह ॥ यमि
ति ॥ अमलात्मनो हृतः प्रकाशानेत्यर्थः ॥ ३८ ॥ आत्मानाद् निर्गुणस्य तव ज्ञानं लीलया धिष्ठितस्य या

श्रीभगवानुवाच ॥ त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयं ॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भ
यं ॥ २९ ॥ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यञ्जनार्द
नं ॥ ३० ॥ ततो बाहुसहस्रेण नानायुधधरोऽसुरः ॥ मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ॥ तस्या
स्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ॥ चिच्छेद भगवान्बाहून्शाखा इव वनस्पतेः ॥ ३२ ॥ बाहुषु
च्छिद्यमानेषु बाणस्य भगवान्भवः ॥ भक्तानुकंप्युपव्रज्य चक्रायुधमभाषत ॥ ३३ ॥ श्रीरुद्र उवा
च ॥ त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ॥ यं पश्यंत्यमलात्मान आकाशमिव केवलं ॥ ३४ ॥
नाभिर्नभोऽग्निर्मुखमंबु रेतो द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी ॥ चंद्रो मनो यस्य दृगर्क आत्मा अ
हं समुद्रो जठरं भुजेंद्रः ॥ ३५ ॥ यो विराड्विग्रहः सोऽपि त्वत्तो जायते ॥ घटडंबरफलो न र्वर्निमषके
रिवोडुंबरफलमिव त्वया धार्यते न विराड्रूपेण स्तौति द्वाभ्यां ॥ नाभिरिति ॥ यस्य तव नभ आदयो नाभ्यादयोऽवयवाः स
भवान् ॥ लोककल्पः पुरुष इत्युत्तरेणान्वयः ॥ नभो यस्य नाभिः ॥ अग्निर्मुखं ॥ अंबु रेतः द्यौः शीर्षं ॥ आ
शा दिशः श्रुतिः श्रवणेंद्रियं ॥ उर्वी अंघ्रिः चंद्रो मनः ॥ अर्को दृक् ॥ अहं रुद्रः आत्मा अहंकारः स
मुद्रो जठरं भुजेंद्रः भुजा बाहवः ॥ इंद्रादयो लोकपाला बाहव इत्यर्थः ॥ ३५ ॥

र्गोऽधयो रोमाणि ॥ यज्ञहा हाहुति ॥ स्पष्टार्थाम्बुवाहाः केशाः विरिंचो धिषणा बुद्धिः ॥ प्रजापतिर्विस
र्गो मेढ्रं धर्मो हृदयं ॥ लोकाः कल्पते ॥ अवकल्पतेऽनेनेति लोककल्पः ॥ २९ ॥ ननु मादेशिकशरीरस्य कथं न भो
नाभितादि ॥ इत्यत आह ॥ तवेति ॥ अंग त्वधामन ॥ अप्रस्तुतस्वरूपभवायाभ्युदयाय ॥ न केवलमेतावत् किं
त्वस्मद्व्यवहार्यमपीत्याह ॥ वयं चेति ॥ सर्वे लोकपालास्त्वया पालितः सप्तभुवनानि पालयाम इति
३० ननु यदि विभावितानि ते ये विभाव्यानि भुवनानि च संति ॥ तर्हि कथमुक्तं त्वमद्वितीयब्रह्मेति ॥ नाहि ब्र

रोमाणि यस्यौषधयोऽम्बुवाहाः केशा विरिंचो धिषणा विसर्गः ॥ प्रजापतिर्हृदयं यस्य धर्मः स
वै भवान्पुरुषो लोककल्पः ॥ २९ ॥ मवावतारोयमकुंठधामन्यमे स्वगुप्मेजगतोऽभवाय ॥ वयं च
सर्वे भुवनानु भाविता विभावयामो भुवनानि सप्त ॥ ३० ॥ त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः
स्वदृग्घेतुरहेतुरीश ॥ प्रतीयसेऽथापि यथाविकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ ३१ ॥

ननु तेऽम सजातीयविजातीयभेदः संभवतीति अत आह त्वमिति ॥ एकः सजातीयरहितः ॥ अत एवाद्यः
पुरुषः ॥ पुरुषाणामवस्थात्रयवतामाद्यः ॥ प्रकृतिर्भूतः पुरुषः ॥ अत एव तुरीयः शुद्ध इत्यर्थः ॥ तदपि
कुतः स्वदृक् स्वप्रकाशज्ञानरूपः ॥ स्वदृगादेवहि ॥ उपाधियोगात् जीवा जायंते ॥ यथाग्नेः क्षुद्रा विस्फु
लिंगा व्युच्चरंति ॥ एवमेवास्मादात्मनः सर्व एव ॥ आत्मनो व्युच्चरंतीति श्रुतेः ॥ अतः सजातीयरहितः
किंच ॥ अद्वितीयः विजातीयरहितोऽपि कुतो हेतुः सर्वस्य यथाऽस्वयं हेतुरहेतुश्चेति ॥ कथं तर्हि प्र
तिशरीरं जीवभेदः प्रतीयते ॥ अत आह ॥ प्रतीयस इति ॥ सर्वगुणप्रसिद्ध्यै सर्वविषयप्रकाशनाय ३१

श्री॰
भाद॰
उ॰
५२

तदिदं किमद्भुतमेव संसारी स उच्यते ॥ तदिदं नदीति मद्भुतं तमाह ॥ यथैवेति ॥ हे भूमन् स्वया छायया मेघवल
त्तण यापहतोऽपिहितः छादितोऽपि सूर्यः छायामेघं च रूपाणि च ॥ मेघान्तरितान् ॥ घटादीनपि संव
कालि प्रकाशयति ॥ एवं गुणेनाहंकारेण स्वकार्यगणजीवावरकेण तद्व्याप्यपिहितोऽपि गुणान् ॥ स्वजा
दीनुपाधीन् ॥ गुणिनश्चोपहितान् जीवानपि चकास्ति ॥ आत्मप्रदीपः स्वप्रकाशः अतः ॥ सर्वसाक्षिण
स्तव सर्वविभासकस्य सर्वसत्तास्फूर्तिकस्य न संसारः इत्यर्थः ॥ ३९ ॥ किंच ॥ मायाश्रयस्यान्यान्मोहयत।

यथैव सूर्योऽपिहितः स्वच्छायया छायां च रूपाणि च संचकास्ति ॥ एवं गुणेनापिहितो गुणांः
स्त्वमात्मप्रदीपो गुणिनश्च भूमन् ॥ ३९ ॥ यन्मायामोहितधियः पुत्रदारगृहादिषु ॥ उन्मज्जंति
निमज्जंति प्रसक्ता वृजिनार्णवे ॥ ४० ॥ देवदत्तमिमं लब्ध्वा नृलोकमजितेंद्रियः ॥ यो नाद्रिये
त त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥ ४१ ॥ यत्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरं ॥ विपर्य
येंद्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ ४२ ॥ अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ॥ स
र्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥ ४३ ॥

स्तव कुतः संसृतिरित्याशयेनाह ॥ यन्माययेति ॥ पुत्रादिषु प्रसक्ताः वृजिनार्णवे दुःखसागरे उन्मज्जंति
स्थावरादिषु ॥ तदुक्तं वायवीये ॥ विपर्ययस्वभावतां ॥ ब्रह्म त्वं स्थावरान्तयोनिष्विति ॥ ४० ॥ एवं जीवेश्वर
व्यवस्थां निरूप्य ॥ तदुदासीनं भजंतं निंदति ॥ द्वाभ्यां देवेति ॥ देवेन त्वया कर्माध्यक्षेण दत्तं देहमिमं ल
ब्धापीति ॥ ४१ ॥ शोच्यत्वे हेतुः यत्त्वामिति विपर्ययाः ॥ विपरीताः ॥ अनात्मा प्रियानीश्वरा ये इंद्रियार्थाः
पुत्रादयस्तदर्थं ॥ ४२ ॥ अहमन्ये च सर्वे मनसत्वामेव भक्ता अहमिति ॥ ४३ ॥

देवादि
यानिष्ठ
निमज्जंति

भगवतो भजनीयत्वे हेतुत्वदंसलक्षणं सिंप्रार्थयते ॥ तं वेति ॥ समत्वेनेति ॥ समत्वे हेतुः ॥ प्रशांतमिति निवि
शेषत्वमाह ॥ सुहृदात्मदैवं सुहृत् हितप्रवर्त्तकत्वात् ॥ आत्मा च सर्वात्मकत्वात् ॥ एवंभूतं दैवमीश्वरं तो नत
त्वतो भजनीयोऽसीत्याह ॥ अनन्यमेकं समानासमानजातीयरहितं तत्कुतो जगतामात्मा न च केनम
विशिष्टं ॥ ४४ ॥ स्वयं भक्तिमाश्रावास्यभक्तस्याभीष्ट नाशाल्ले ॥ अयमिति ॥ दैत्यपतेर्मया प्रल्हादे ॥ ४५ ॥ वैरोच
नत्वाज्जगतां स्थितस्त्वदयांतहेतुं समं प्रशांतं सुहृदात्मदैवं ॥ अनन्यमेकं जगदात्मकेतं भवापव
र्गाय भजाम देवं ॥ ४४ ॥ अयं ममैषो दयितोऽनुवर्ती मया अभयो दत्तमस्तु ष्यदेव ॥ ते पश्यतां तानव
तर प्रसादाय यथाहिते दैत्यपतेः प्रसादः ॥ ४५ ॥ श्रीभगवानुवाच ॥ यथात्यभराव स्वतेनः का
वामसि यं तव ॥ भवतो यद्भावसितं न तन्मे साधनुमोदिते ॥ ४६ ॥ अत्र ...यं समाप्य वैरोचनिः
स्ततोस्वरः ॥ प्रल्हादाय वरो देवानवध्योमतवान्वयः ॥ ४७ ॥ दर्पोपशामनायास्य प्रवृद्धकार्याबाहु
वो मया ॥ हृदि तेच बले भ्र...यत्त्वभारापितं अवः ॥ चत्वारोऽस्य भुजाः शिष्टा भविष्यत्यजरामराः
पार्षदमुख्या भवतो न कुतश्चिद्भयो सुरः ॥ ४८ ॥ इति लब्ध्वा ...पणमस्य शिरसा सुरः ॥ साधु
हितं रचयमारोप्य सर्वथा समुपानयत ॥ ५० ॥ अल्लोहिरण्यपरिभूतं सवासः समलंकृतं ॥ सप
त्नीकं ...बह्मलिं ययो रुद्रानुमोदितः ॥ ५१ ॥ स्वराजधानीसमलंकृतां नोधजैः ॥ समो...रोस्यादितमा
गीचत्वरं ॥ विवेश शंखवान्नंदद्भिर्मस्वतैरभ्युद्यतः पौरस्त्रहद्विजातिभिः ॥ ५२ ॥ एवं कृ...स्सवि
नि...लिर्मद्वकृतानन्तादवध्यस्तावत ॥ किंच प्रल्हादायेति अनुर्धे... ॥ ५३ ॥ न हि किंचिन्तयेवं
कृतं च तत्रारूपोपशमनायेति अनुगृह्णाति चेत्वार इति ॥ ५४ ॥ सरूवध्या उषया ॥ रुद्रानुमोदि

चतुःषष्टितमे कृकलासान्नृगं पापादमोचयत्॥ ब्रह्मस्वहारिदोषोऽत्या राज्ञो हन्मान शिक्षयत्॥१॥ विभुर्निभा
त्यभोगादिमदोन्नद्धमनोरथ्यान्॥ अन्वशात्सदयो हन्त सोऽन्वगोद्धारस्वधर्मगतः॥२॥ पिपासिताः ऋषिताज
श्रीशुक उवाच॥ एकदोपवनं राजन्जग्मुर्यदुकुमारकाः। विहर्तुं साम्बप्रद्युम्नचारुभानुगदादयः॥१॥
क्रीडित्वा सुचिरं तत्र विचिन्वन्तः पिपासिताः॥ जलं निरुदके कूपे ददृशुः सत्त्वमद्भुतं॥२॥ कृकला
सं गिरिनिभं वीक्ष्य विस्मितमानसाः॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः॥३॥ चर्मजैस्तान्तवैः
पाशैर्बद्ध्वा पतितमर्भकाः॥ नाशक्नुवन्समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः॥४॥ तत्रागत्यारविन्दा
क्षो भगवान्विश्वभावनः। वीक्ष्योज्जहार वामेन तं करेण सलीलया॥५॥ स उत्तमश्लोककराभिमृष्टो
विहाय सद्यः कृकलासरूपं॥ सन्तप्तचामीकरचारुवर्णः॥ स्वर्ग्यद्भुतालंकरणाम्बरस्रक्॥६॥ प
प्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुन्दः॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां ग
णयामि नूनं॥७॥ दशामिमां वा कतमेन कर्मणा संप्रापितोऽस्यतदर्हः॥ सुभद्र आत्मानमाख्याहि वि
वित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुं॥८॥ श्रीशुक उवाच॥ इति स्म राजा संपृष्टः कृष्णेनानन्तमू
र्तिना॥ माधवं प्रणिपत्याह किरीटेनार्कवर्चसा॥९॥ नृग उवाच॥ नृगो नाम नरेन्द्रोऽहमिक्ष्वाकुतन
यः प्रभो॥ दानेष्वाख्यायमानेषु यदि ते कर्णमस्पृशम्॥१०॥ जलं विचिन्वन्तः सत्त्वं जीवं॥१॥ तं च
कृकलासं वीक्ष्य च मनसि अभिप्रायमस्य वै पाशैस्तान्तवैश्चर्ममयैश्च॥४॥ सन्तप्तचामीकरस्य वर्णेन हृद्यवर्णो यस्य
सः॥ अद्भुतालंकाराम्बरस्रजो यस्य सः स्वर्गी देवो वा बभूवेति॥६॥ यद्यदिदं मयोगामं॥७॥ च॥ यदि ते
कर्णमस्पृशामिति॥ असंदेहे संदेहवचनं॥ यदि वा प्रमाणांस्तु विनिवन्कर्णपथं न तं प्राप्तः स्यामि

किंच किंचिदिति ॥ सर्वेषां भजतां नाम मात्मनो बुद्धिः सात्विकी । सत्येऽप्यविदितं किं नु न किंचित् ॥ १२ ॥ ऋतव्रतेभ्यः अदे
भाचारेभ्यः तपसा श्रुत्या प्रख्याता ये तेभ्यः अस्माणि ॥ वदन्या अस्तु दाराः अध्यापनशीलाः सुते सत ऋतेभ्यः ॥ १३
पूर्तं वापीकूपादि च विदितं ज्ञातं ॥ १४ ॥ एवं वर्तमानस्य मम संकटं किंचिदापन्नं शृणोति ॥ कस्यचिद्दिति द्वि
जस्य स्वयमप्रतिग्रहं निवृत्तस्य संकटकाम मिलिता अविदुषा ब्राह्मणेभ्य मितज्ञातेना ॥ १५ ॥ प्रतिग्राहिणो के
किं नु न विदितं नाथ सर्वेषां नाम सात्विकी ॥ कालेन नाथ नदी घोषवसे यापितवान्न या ॥ १६ ॥ या
वृत्तः सिक्ता मम यौवनादि विनायका ॥ यावत्तावद्वर्षधारा अनावृतौ वदेहे सगाः ॥ १७ ॥ पयस्वि
नीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृङ्गाः सान्तपः सुतवत्सा वदन्यसद्भ्यः यादाश्च
वद्भ्यो द्विजपुङ्गवेभ्यः ॥ १८ ॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीशतिलरूप्यशय्याः वा
सांसि रत्नानि परिच्छदान् पश्यानिष्टं च यज्ञैश्चरितं च पूर्तैः ॥ १९ ॥ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम
गोधने ॥ संपृक्ता विदुषा सा च मया दत्ता द्विजातये ॥ २० ॥ तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति
तं ॥ ममेति परिग्राह्याह नृगो मे दत्तवानिति ॥ २१ ॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ भ
वान्दाताऽपहर्तेति तच्छ्रुत्वा मे भवद्भ्रमः ॥ २२ ॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै ॥ गवां लक्षं
प्रकृष्टानां दास्याम्येषा प्रदीयतां ॥ २३ ॥ भवन्तावनुगृह्णीतां किंकरस्याविजानतः समुद्धरतं मां कृ
च्छ्रात्पतन्तं निरयेऽशुचौ ॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपारमत् ॥ नान्यद्गवामप्ययुतमिच्छा
दातेति ॥ स्वामिनोक्तं अपहर्तेति ॥ अभवद्भ्रमः व्याकुलो भवमित्यर्थः ॥ २८ ॥ नदो (मीत्स परोपयो ॥ २९ ॥
भावमित्यर्थः ॥ तदाभावपि प्रत्येकमनुनीतौ कथं न ददाद गवामिति सार्धेन ॥ ३० ॥ अपरः प्रतिग्राही
इत्याग्रहो यत्र तेन यो मां अन्यद पि गवामयुतं यदि नर पीमां विप्राय नेच्छामि इत्युक्त्वा गामपक्राय

पार्जिता स्वप्रभवः स्ववृत्त्या दकृत मात्ताभिवत्या दृश्वहं ॥ १२ ॥ स्ववृत्तं कृतेभ्यः
यत्ता शीलवशः सीदत्कुटुम्बेभ्यः ऋतव्रतमः

पतस्मिन्नंतरे इति इतः पूर्वं पापाभावान्नेतुं समर्थ इति भावः॥२२॥ उताहो इत्येकं पदं अथवा पूर्वं शुभमिति
नीतमिति॥ यमस्य सकाशं वा वाक्यं पृष्टे पपपामि॥२३॥ हे देव यम पूर्वं मशुभं भुंज इति मयोक्ते स यमः पततेति प्राह
२४॥ दुष्टदेन भ्रष्टदर्शनेन विस्मितः सन्॥ आत्मनो भाग्यमभिनंदति॥ सत्त्वमिति॥ हे विभो सत्त्वं ममात्मप
हः लोचनगोचरः सन् कथं साक्षात्त्वं तोऽसीति भावः॥ किमत्राश्चर्यं तत्राह॥ परमात्मा अतएव योगेश्वरै

पतस्मिन्नंतरे यामैर्हृतिर्नीतोऽयमत्तयं॥ यमेन दृष्टस्तत्राहं देवदेव जगत्पते॥२२॥ पूर्वं त्वमशुभं भुंक्ष्व
उताहो नृपते शुभम्॥ नांतं दानस्य धर्मस्य पश्ये पलोकस्य भास्वतः॥२३॥ पूर्वं देवाशुभं भुंज इति प्राह
पतेति सः॥ तावदद्राक्षमात्मानं कृकलासं पतन्प्रभो॥२४॥ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव
स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः॥२५॥ स त्वं कथं मम विभोऽक्षिपथः परात्मा योगेश्वरैः श्रु
तिदृशामलहृद्विभाव्यः साक्षादधोक्षज उरुव्यसनांधबुद्धेः॥ स्यान्मेऽनुदृश्य इह यस्य भवापवर्गः॥२६॥
देवदेव जगन्नाथ गोविंद पुरुषोत्तम नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय॥२७॥ अनुजानीहि
मां कृष्ण यांतं देवगतिं विभो॥ यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदम्॥ २८॥

रपि॥ श्रुतिदृशा उपनिषद्दृष्टा॥ अमले हृदि विभाव्यः चिंत्यः यतः अधोक्षजः अपेंद्रियकं ज्ञानं तवाथः अ
र्वागेव यस्मात्सः यस्येदं भवापवर्गो भवेत्स प्रभवान् अनुदृश्यः स्यात्॥ उरुव्यसनेन॥ कृकलासभवदुःखेना
धबुद्धेर्मम मैतद्विचित्रमित्यर्थः॥२६॥ उद्दिष्टभक्तिर्वक्ष्या संबोधयत्॥ अनुज्ञापयति॥ अनुजानीहीति॥ देवलो
के वर्तमानस्यात्मनो मनसा सन्निधिं प्रार्थयते॥ यत्र क्वापीति॥ त्वत्पदमास्पदं विषयो यस्य तथाभूतं भूया
दिति॥२८॥

यावन्नमन्ति नमइति ॥ सर्वभावाय ॥ सर्वस्य भावो जन्म येन तस्मै तर्हि त्वेष्यविकाराय कुतः अनंतशक्तये ॥ अनंता मायाभ्यापाशक्तिर्यस्य तस्मै वासुदेवाय ॥ सर्वभूताश्रयायेत्युपादानत्वमुक्तं ॥ श्रीकृष्णाय सदानंदरूपाय निवृत्तपार्थमुक्तं ॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परंब्रह्म कृष्ण इत्यभिधीयते इति स्मृतेः किंच योगानामिष्टशर्मादिकर्मणां पतये फलदात्रे अयंभावः एवंभूतं त्वां विहाय यतो नु मन्निकुरपिवापि वामि ष्यामि ॥ त्वदत्तकर्मफलभोगायेति ॥ २९ ॥ मनागीषदपि भुक्तं सत् अग्नेः

नमस्ते सर्वभावाय ब्रह्मणेऽनंतशक्तये ॥ कृष्णाय वासुदेवाय योगानां पतये नमः ॥ २९ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना ॥ अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणां ॥ ३० ॥ कृष्णः परिजनं प्राह भगवान्देवकीसुतः ॥ ब्रह्मण्यदेवो धर्मात्मा राजन्याननुशिक्षयन् ॥ ३१ ॥ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि ॥ तेजीयसोऽपि किमुत राज्ञामीश्वरमानिनां ॥ ३२ ॥ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया ॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥ ३३ ॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हंति त्रिपूरुषं ॥ प्रसह्य तु बलाद्भुक्तं दश पूर्वान्दशापरान् ॥ ३५ ॥ राजानो राजलक्ष्म्यांधा नात्मपातं विचक्षते ॥ निरयं येऽभिमन्यंते ब्रह्मस्वं साधु बालिशाः ॥ ३६ ॥

अग्नेरिव तेजीयसः अधिनिजक्षिनोपि दुर्जरं ॥ ३२ ॥ किंच विषादपि घोरमित्याह ॥ हिनस्तीति ॥ मत्तारं हिनस्त्येकमारकत्वाद्धि तुल्यता नास्तीति भावः ॥ वह्निरिति अपि च समूलमिति वह्निर्मूलान्यशोषयति ब्रह्मस्वलक्षणारणिजः पावकस्तु कुलं तदपि समूलमिति ॥ ३४ ॥ दुरनुज्ञातं यथावदननुज्ञातं त्रिपूरुषं स्वयं पुत्रपौत्रं च प्रसह्य तु बलाद्भुक्तं अधमः ॥ ३५ ॥ ये ब्रह्मस्वमभिमन्यंते रक्षंति ॥

श्री॰ भा॰ द॰ उ॰ ४४

अपिहरंतीति ॥ ३७ ॥ महदुग्रमित्यादि ॥ ४० ॥ प्रणमे नमामि । न केवलमर्थवादविभीषिकेयं तु प्रत्यक्षमित्याह ॥ ब्राह्मणार्थ इति ॥ ४४ ॥ इति श्रीभागवते भावार्थदीपिकायां दशमस्कंधे चतुःषष्टितमः ॥ ६४ ॥ ॥ पंचषष्टितमे रामः

हरंति यावतः पांशून्क्रंदतामश्रुबिंदवः । विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ॥ ३८ ॥ राजानो राजकुल्याश्च तावतोब्दान्निरंकुशाः । कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ॥ ३९ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः । षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ४० ॥ न मे ब्रह्मधनं भूयाद्यद्गृध्वाल्पायुषो नराः । पराजिताश्च्युता राज्याद्भवंत्युद्वेजिनोहयः ॥ ४० ॥ विप्रं कृतागसमपि नैव द्रुह्यत मामकाः । घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥ ४१ ॥ यथाहं प्रणमे विप्राननुकालं समाहितः । तथा नमत यूयं च योन्यथा मे स दंडभाक् ॥ ४२ ॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः । अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ॥ ४३ ॥ एवं विश्राव्य भगवान्मुकुंदो द्वारकौकसः । पावनः सर्वलोकानां विवेश निजमंदिरम् ॥ ४४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे चतुःषष्टितमोध्यायः ॥ ६४ ॥

श्रीशुक उवाच ॥ बलभद्रः कुरुश्रेष्ठ भगवान्रथमास्थितः । सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलं ॥ १ ॥ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च । रामोभिवाद्य पितरावाशीर्भिरभिनंदितः ॥ २ ॥ चिरं नः पाहि दाशार्ह सानुजो जगदीश्वरः । इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ॥ ३ ॥

व्रजे गोकुलमागतः । रममाणस्तु गोपीभिः कालिंद्याकर्षणं बलात् ॥ १ ॥ रामस्य चरितं चित्रं कालिंद्याकर्षणादि यत् । पौंड्रकांतादि कृष्णस्य यच्च तन्मतं परम् । आशीर्भिरभिनंदितो बभूव ॥ २ ॥ तदाह चिरमिति ॥ ३ ॥ रामानुजायनमः २

श्रीरामनारायणजोवस

७५

गोपवृद्धाश्च विविधं द मिवंद्य यविष्टैरभिनंदितो बभूवेत्यर्थः अपि च यथा वयश्चेति ॥५॥ तेसर्वे ह्येषु नेत्रा
ममनामयमारोगपपप्रच्छुः तेन दृष्टा इति ॥ कुसेशकुसलप्रश्नपर्यसत्रयस्ताखिलराधसः ॥ स्पमसर्वे विषयाः
७॥ रामस्य संदर्शने आहृताः सादराः ॥१॥ तदितदृमनेगुप्ताभिः प्रतिबंधः किंनकृतः ॥ तदा का विश्वा

गोपवृद्धाश्च विविधवद्य विष्टैश्चाभिवंदितः ॥ यथावयोयथासख्यं यथासंबंधमात्मनः ॥५॥ स
मुपेत्याथ गोपालाहास्यहलयद्दादिभिः ॥ विश्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः ॥६॥ इष्ट
श्रानामयं स्वेषु प्रेमगद्गदया गिरा ॥ कुसलेकमलपत्राक्ष सन्यस्ताखिलराधसः ॥७॥ कच्चिन्नो बा
धवाराम सर्वेकुशलमासते ॥ कच्चित्स्मरत नो राम यूयं दारसुतान्विताः ॥८॥ दिष्ट्या कंसो हतः
पापो दिष्ट्या मुक्ताः सुहृज्जनाः ॥ निहत्य निर्जित्य रिपून्दिष्ट्या दुर्गं समाश्रिताः ॥९॥ गोप्यो हसंत्यः
पप्रच्छू रामसंदर्शनादृताः ॥ कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥१०॥ कच्चित्स्मरति वा
बंधून्पितरंमातरंच सः ॥ अपि वा स्मरतेस्माकमनुसेवां महाभुजः ॥११॥ मातरं पितरं भ्रातॄन्पतीं
पुत्रान्स्वसॄनपि ॥ यदर्थे जहिंदाशार्ह दुस्त्यजान्स्वजनान्प्रभो ॥१२॥ तान्नः सद्यः परित्यज्यग
तः संछिन्नसौहृदः कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितं ॥१४॥ कथं नु गृह्णत्यनवस्थिता
वलोकोछ्लसितस्मरातुराः ॥१५॥ सादिति चेत् ॥ ननु विश्वासः किमिति कृतः तत्राह ॥१६॥ क
थं त्विति निवर्त्त वक्तत्वात् नानाविधानि वाक्यानि ॥ तत्राप्याहुः कथं नु गृह्णंतीति वाक्यनिचित्रकथा वा
ग्य नको विदग्ध किं सुंदरे स्मिते ॥ यस्मिन् ॥ तेनालोकेन उच्छ्वसितः दृभितो यः स्मरस्तेनातुराः ॥१७

गमानुजाय नमः ॥ १५

म

नो वचः कृतघ्नस्य बुधाः पुरस्त्रियः ॥ गृह्णंति वै चित्रकथस्य सुंदर स्मितावे

अपराङ्गेणुः किं न ॥ इति कालस्त्वावत्तस्य चास्माकं च यथैव किं न तस्य सुखेनास्माकं तद्दुःखेनैव तावानेव विशेषश्च निश्चिनोति ॥ २४ ॥ नानाविधेष्वनुनयेषु कोविदः ॥ २५ ॥ मधुं चैत्रमाधवं वैशाखं गोपीनां रतिमिति श्रीकृष्णस्य क्रीडासमयेऽन्यत्र नानामतिबालानां चान्यासामभिप्रायभिज्ञत्वं प्रसिद्धिः ॥ २६ ॥ पूर्णचन्द्रस्य कलाभिर्मृ

किं न स्मरत्कथया गोप्यः कथाः कथयतां परः ॥ या त्वस्माभिर्विना कालो यदि तस्य तथैव नः ॥ इति प्रहसितं शौरे जल्पितं चारु वीक्षितं ॥ गतिप्रेमपरिष्वंगस्सरन्त्यो रुरुदुः स्त्रियः ॥ २५ ॥ संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंगमैः ॥ सान्त्वयामास भगवान्नानानुनयकोविदः ॥ २६ ॥ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च ॥ रामः क्षपासु भगवान्गोपीनां रतिमावहन् ॥ २७ ॥ पूर्णचन्द्रकलामृष्टे कौमुदीगंधवायुना ॥ यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥ २८ ॥ वरुणप्रेषिता देवी वारुणी वृक्षकोटरात् पतन्ती तद्वनं सर्वं स्वगन्धेनाध्यवासयत् ॥ २९ ॥ तं गन्धं मधुधाराया वायुनोपहृतं बलः ॥ आघ्रायोपगतस्तत्र ललनाभिः पपौ समं ॥ उपगीयमानचरितो वनिताभिर्हलायुधः ॥ वनेषु व्यचरत्क्षीबो मदविह्वललोचनः ॥ ३१ ॥ स्रग्व्येककुण्डलो मत्तो वैजयन्त्या च मालया ॥ बिभ्रत्स्मितमुखाम्भोजं स्वेदप्रालेयभूषितं ॥ ३२ ॥ स आजुहाव यमुनां जलक्रीडार्थमीश्वरः ॥ निजं वाक्यमनादृत्य मत्त इत्यापगां बलः ॥ ३३ ॥ अनागतां हलाग्रेण क्रुद्धो विचकर्ष ह ॥ पापे त्वं मामवज्ञाय यन्नायासि मयाहूता ॥ ३४

रीविभिन्नास्पृष्टे उज्ज्वले कौमुदीगंधवायुना ॥ कुमुद्वतीनां गंधवातेन सेविते यद्वा कौमुदीशब्देन तद्दिकामिता तानि कुमुदानि लक्ष्यन्ते कुमुदगंधवायुनेत्यर्थः ॥ २८ ॥ वारुणीसुरया सहोत्पन्ना मदिरा ॥ २९ ॥ क्षीबो मत्तः ॥ ३० ॥ स्वेदाएव प्रालेयानि हिमं तेन भूषितं ॥ ३२ ॥ मनोयास्मि न्वनाहृत्य ॥ ३३ ॥ अनागतामापगां नदीं

नेष्येनेष्यामिचकितांकंपिता ॥२५॥ एकांशेनशेषाख्येन ॥२६॥ विजगाहअवगाहनम् कृतवान् ॥२८॥ उ
त्तीर्णाविर्गताय ॥२९॥ असितेवाससीनीलेकांतिर्ददौ कांतिलक्ष्मीः ॥ यद्यप्येकंवस्त्रवे ॥ वरुणप्रहितेवाससे
मालामम्लानपंकजाम् ॥ समुद्राभेनयाववेनीलेलक्ष्मीःयच्छतेति ॥ हरिवंशेचबलंप्रतिलक्ष्मीवा
क्यं ॥ जातरूपमयंचैकंकुंडलंवज्रभूषणं ॥ आदिपद्मंचपद्माख्यंदिव्यंश्रवणभूषणं देवेमाप्रतिग

नेष्येत्वांलांगलाग्रेणशतधाकामचारिणीम् ॥ एवंनिर्भर्त्सिताभीतायमुनायदुनंदनं ॥२५॥ उ
वाचचकितावाचंपतितापादयोर्नृप ॥ रामराममहाबाहोनजानेतवविक्रमम् ॥२६॥ यस्यैकां
शेनविधृताजगतीजगतःपते ॥ परंभावंभगवतोभगवन्मामजानतीं मोक्तुमर्हसिविश्वात्मन्प्र
पन्नांभक्तवत्सल ॥२७॥ ततोव्यमुंचद्यमुनांयाचितोभगवान्बलः ॥ विजगाहजलंस्त्रीभिःकरेणु
भिरिवेभराट् ॥२८॥ कामंविहृत्यसलिलादुत्तीर्णायासितांबरे ॥ भूषणानिमहार्हाणिददौकां
तिःशुभांस्रजम् ॥२९॥ वसित्वावाससीनीलेमालामामुच्यकांचनीम् ॥ रेजेस्वलंकृतोलिप्तो
माहेंद्रइववारणः ॥३०॥ अद्यापिदृश्यतेराजन्यमुनाकृष्टवर्त्मना ॥ बलस्यानंतवीर्यस्यवीर्यं
सूचयतीवहि ॥३१॥ एवंसर्वानिशायाताएकेवरमतोव्रजे ॥ रामस्याक्षिप्तचित्तस्यमाधुर्यैर्व्रज
योषितां ॥३२॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेबलदेवविजयेयमुनाकर्षणंनामपं

त्तीषपौराणीभूषणाक्रियामिति ॥ वसित्वापरिधाय ॥ आमुच्यकंठेनिधाय ॥३०॥ चंदनादिभिरालिप्तः
एकेवएकेवनिशायथामाधुर्यैर्विलासैः ॥३२॥ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांदशमस्
कंधेपंचषष्टितमोऽध्यायः ॥६५॥ षट्षष्टितमेकाशीगत्वाहृत्वांड्रकंहरिः तन्मित्रंचततोऽदहत्सुदक्षि

प्रस्तोभितः स्तम्भितोऽस्मादिति ॥२॥ बालैरज्ञैर्बालकृतो नृपः बालैन्तृपत्वेन क्रीडयां परिकल्पितः देस्मूढ उत्स्र
क्ष्ये त्वयि प्रक्षेप्स्यामि ॥ यैः सह त्वमेवं विकत्थसे तेष्वपी त्यर्थः ॥ यद्वा यैर्विक्रमैः सुदर्शनादिभिः त्वमेवं स्लाघमे
नानि ॥ उत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः ॥८॥ मांधारणमिति स्तोत्रं ॥ मुखमिति ॥ वटः कंकगृध्रादिपक्षिविशेषः

श्रीशुक उवाच ॥ नंदव्रजं गते रामे करूषाधिपतिर्नृप ॥ वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥१
त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ॥ इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतं ॥२ दूतं च प्राहि
णोन्मंदः कृष्णायाव्यक्तवर्त्मने ॥ द्वारकायां यथा बालो नृपो बालकृतो बुधः ॥३॥ दूतस्तु द्वारकामेत्य
सभायामास्थितं विभुं कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत ॥४॥ वासुदेवोवतीर्णोऽहमेक एव
न चापरः ॥ भूतानामनुकंपार्थं त्वं तु मिथ्याभिधां त्यज ॥५॥ यानि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि
सात्वत ॥ त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवं ॥६॥ श्रीशुक उवाच ॥ कत्थनं तदुपाकर्ण्य पौंड्र
कस्याल्पमेधसः उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥७॥ उवाच दूतं भगवान्परिहासकथा
मनु ॥ उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥८॥ मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः शयि
ष्यसे हतस्तत्र भविता शरणं शुनां ॥९॥ इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत् ॥ कृष्णोऽपि रथमास्था
य काशीमभिजगाम ह ॥१०॥ पौंड्रकोऽपि तदुद्योगमुपलभ्य महारथः ॥ अक्षौहिणीभ्यां संयुक्तो नि
श्चक्राम पुराद्द्रुतम् ॥११॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोन्वियान्नृप ॥ अक्षौहिणीभिस्तिसृभिरप
श्यत ॥ तदा तदा श्वेतनाथश्रीमान्मोयो भविता सि ॥९॥ काशीमि(त्युपत्य पौंड्रकं हरिः ॥१२॥
ति पौंड्रकस्यापि तदा मित्रभूरेव स्थानात् ॥ पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥१२॥ रामानुजायनमीतमः रा

गरुडः कृत्रिमो ध्वजो यस्य तं ॥ अमूल्यो नद्धो मौलिराभरणं च यस्य तं ॥ १२ ॥ राजस्यंदनो विचरन् रंगाबलमर्दितवा-
न ॥ एष यत्र ब्राः वन्तुर्विधक्षन ग्रामेय याप्रु गोत्राग्निरिति ॥ १३ ॥ आयोधने रणस्थाने ग्रीवं रणाचक्रेणाचिन्नमा-
शंगतार्थसिगदाशार्ङ्ग श्रीवत्साद्युपलक्षितं ॥ विभ्राणां कौस्तुभमणिं वनमालाविभूषितं ॥ १३ ॥ कौशे-
यवाससी पीते वसानं गरुडध्वजं ॥ अमूल्य मौल्याभरणास्फुरन्मकरकुंडलं ॥ १४ ॥ दृष्ट्वा तमात्मनस्तुल्य
वेषं कृत्रिममास्थितं ॥ यथा नटं रंगगतं विजहास भृशं हरिः ॥ १५ ॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टि-
प्रासतोमरैः ॥ असिभिः पट्टिसैर्बाणैः प्राहरन्नरयो हरिम् ॥ १६ ॥ कृष्णस्तु तत्पौण्ड्रककाशिनाथयो-
र्बलं गजस्यंदनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरर्दयद्भृशं यथा युगान्ते हुतभुक् पृथक्प्रजाः ॥ १७
आयोधनं तद्रथवाजिकुंजरद्विपत्खरोष्ट्रैररिणावखंडितैः ॥ बभौ चितं मोदवहं मनस्विनामाक्री-
डनं भूतपतेरिवोल्बणं ॥ १८ ॥ अथाह पौण्ड्रकं शौरिर्भो भो पौण्ड्रक यद्भवान् ॥ दूतवाक्येन मामाह तान्यस्त्रा-
ण्युत्सृजामि ते ॥ १९ ॥ त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतं ॥ व्रजामि शरणं तेऽद्य यदि नेच्छामि
संयुगं ॥ २० ॥ इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकं ॥ शिरोऽवृश्चद्रथांगेन वज्रेणेंद्रो यथा गिरेः ॥ २१
तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः ॥ न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ २२
एवं मत्सरिणं हत्वा पौण्ड्रकं ससखं हरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २३ ॥ स नित्यं
भगवद्ध्यानप्रध्वस्ताखिलबंधनः ॥ बिभ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् ॥ २४ ॥ शिरः पतित-
मालोक्य राजद्वारे सकुंडलं ॥ किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥ २५ ॥ राज्ञः काशिपतेर्ज्ञा-
त्वा महिष्यः पुत्रबांधवाः ॥ पौराश्च हा हता राजन्नाथ नाथेति प्रारुदन् ॥ २६ ॥
कीर्णं प्राकारं गृहमिव कल्पांते ॥ इस क्रीडास्थानमिव गिरेः शृंगं भवये ति ॥ २७ ॥ प्रथमं किमिदमिति प

श्री॰
भार॰
५
९८

संस्थाविधिमन्तरेक्रियांत्रपचितिंनिह्नुतिं ॥२६॥ आत्मनाभिसंधायतुह्यायववस्य ॥ सदक्षिणः ॥ अत्युदारः ॥२७
वरमदात् ॥ हरिणीश्वसुककवानित्यर्थः नियोगकरणयन्तस्यदेवस्यात्विजमितिश्रुतिः ॥ २८ ॥ अब्रह्मणपेप्रयोनिः
तरमिक्तसेप्रयोजितोविपरीतोभविपरीतोभविष्यतीतिहचिंतंअभिचारंकुर्वन् ॥ ब्रतीस्हीतनियमः ॥ ३० ॥
सदक्षिणास्तस्यसुतःकृत्वासंस्थाविधिंपितुः ॥ निहत्यपितृहंतारंयास्याम्यपचितिंपितुः ॥२६ ॥ इत्या
त्मनात्मनाभिसंधायसौयाच्यायोमहेश्वरं ॥ सदक्षिणोर्चयामासपरमेणसमाधिना ॥ २७ ॥ प्रीतो
विमुक्तोभगवांस्तस्मैवरमदाद्भवः ॥ पितृहंतृवधोपायंसवव्रेवरमीप्सितं ॥ २८ ॥ तदक्षिणाग्निप
रिचरब्राह्मणैःसमसृत्विजे ॥ अभिचारविधानेनसचाग्निःप्रसमेर्वृतः ॥ २९ ॥ साधयिष्यतिसंक
ल्पमब्रह्मण्यप्रयोजितः ॥ इत्यादिष्टस्तथाचक्रेकृष्णायाभिचरन्व्रती ॥ ३० ॥ ततोग्निरुत्थितःकुंडा
न्मूर्तिमानतिभीषणः ॥ तप्ततामशिखाश्मश्रुरंगारोद्गारिलोचनः ॥ ३१ ॥ दंष्ट्रोग्रभ्रुकुटीदंडकठो
रास्यःस्वजिह्वया ॥ आलिहन्सृक्किणीनग्नोविधुन्वंस्त्रिशिखंज्वलन् ॥ ३२ ॥ पद्भ्यांतालप्रमाणाभ्यां
कंपयन्नवनीतलं ॥ सोभ्यधावद्वृतोभूतैर्द्वारकांप्रदहन्दिशः ॥ ३३ ॥ तमाभिचारदहनमायांतंद्वार
कौकसः ॥ विलोक्यतत्रसुः सर्वेवनदाहेयथामृगाः ॥ ३४ ॥ अक्षैःसभायांक्रीडंतं ॥ भगवंतंभयातु
राः ॥ त्राहित्राहित्रिलोकेशवह्नेःप्रदहतःपुरम् ॥ ३५ ॥ श्रुत्वातज्जनवैक्लव्यंदृष्ट्वास्वानांचसाध्वसं ॥
तप्ततामशिवशिखाश्मश्रुरणियस्यसः ॥ अंगारोद्गारिणीलोचनानियस्यसः ॥ ३१ ॥ दंष्ट्राभिरुग्रैःभ्रुकुटी न॥५
दंडैश्चकठोरंक्रूरमास्यंयस्यसः ॥ त्रिशिखंत्रिशूलं ॥ ३२ ॥ दिशःप्रदहन् ॥ त्राहित्राहित्र्याकुरितिघोषः ॥ ३५ ॥ ९८
अहमविनाशिवदिष्यामीति ॥ ३६ ॥

पारणः संप्र ५ स्त्रो ५ माभैष्टेत्यविनाशयहं २

रोदसी च प्रकाशयदिति शेषः । यद्वा स्वतेजसा । स्वादीन्प्रति ज्वाज्वल्यमानं प्रत्यर्थप्रकाशमानमित्यर्थः । प्र
दीपयदपीडयदित्यर्थः ॥३९॥ अर्दितोऽग्निर्येन हतवान् । तदाह कृत्यानलमिति । सदर्त्विग्भिः जनैः स्ववर्तमाने
अभिचर्यते येनेति तेन स्वमभिचारः कृत्यानलः ॥४०॥ अदाहादि सन्दिह्निन ॥ अदाहामञ्चाः ॥ इति दशमस्कंधटीकायां षट्
षष्टितमोऽध्यायः ६६ सप्तषष्टितमे रामो गिरौ रैवतके मदात् ॥ स्वैरं युवतिभिः क्रीडन्वधीद्द्विविदं खलं ॥१॥ कालिंदीवि

सर्वस्यान्तर्बहिः साक्षी कृत्यां माहेश्वरीं विभुः ॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥३८॥ तत्सू
र्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभं ॥ स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुन्दास्त्र
मथाग्निमर्दयत् ॥ कृत्यानलः प्रतिहतः स रथांगपाणेरस्त्रौजसा स नृप भग्नमुखो निवृत्तः ॥ वाराण
सीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः ॥४०॥ चक्रं च विष्णोस्तदनुप्रविष्टं वा
राणसीं साट्टसभालयापणां ॥ सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालां ॥४१॥
दग्ध्वा वाराणसीं सर्वां विष्णुचक्रं सुदर्शनं ॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ॥४२॥ य
एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमं ॥ समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥४३॥ इति श्रीभा
गवते दशमस्कंधे षट्षष्टितमोऽध्यायः ॥६६॥ राजोवाच ॥ भूयोऽहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः ॥ अ
नन्तस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः ॥१॥ श्रीशुक उवाच ॥ नरकस्य सखा कश्चिद्द्विविदो नाम वान
दारणानंदरनामच वितिद्विविदवधादिसंग (रः ॥ सुग्रीवसचिवः सोऽथ भ्राता मैंदस्य वीर्यवान् ॥२॥
नमप्युक्तकीर्तनस्य वैभाविनत्वेन पौंड्रकवधादिनरस्पृदानीं तदेव प्रश्नोति । भूयोऽहमित्यादिना रामचरित्रश्रवणे
लुब्धाद्भुतकर्मेति हेतुः ॥ तत्र चानन्तत्वं तत्राप्यप्रमेयत्वमिति ॥१॥ नरकस्य सखेति ॥ हरिणा वैरकारणं ॥ सुग्रीव
सचिव इति मैंदस्य भ्रातेति रामायणप्रसिद्धत्वेन वीर्याधिक्यमुक्तमिति ॥२॥

श्रीभाग० ३ ५१

सखुः नरकस्यापचितिमात्रं एवं राष्ट्रस्य विघ्नो वीनाशो यथा भवति ॥ तथा पुरादीनदहदिति ॥ ३ ॥ किंच कः विदि-
तिकः विघ्नपुष्टिविदः मित्रद्रोहस्य विहतो ॥ ४ ॥ तस्य समुद्रस्य जलपूराभ्यां मुक्तिप्रवेलायां कूले वर्तमान ॥ देशान्

२ सखुः सोपचितिं कुर्वन्वानरो राष्ट्रविप्लवं ॥ पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ॥ ३ ॥ क्वचित्स शै-
लानुत्पाट्य तैर्देशान्समचूर्णयत् ॥ आनर्तान्सुतरामेव यत्रास्ते मित्रहा हरिः ॥ ४ ॥ क्वचित्समुद्रमध्यस्थो दो-
र्भ्यामुत्क्षिप्य तज्जलं ॥ देशान्नागायुतप्राणो वेलाकूले न्यमज्जयत् ॥ ५ ॥ आश्रमानृषिमुख्यानां कृत्वा भग्न-
वनस्पतीन् ॥ अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ॥ ६ ॥ पुरुषान्योषितो दृप्तः क्ष्माभृद्द्रोणीगुहा-
सु सः ॥ निक्षिप्य चाप्यधाच्छैलैः पेशस्कारीव कीटकं ॥ ७ ॥ एवं देशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रियः
श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥ ८ ॥ तत्रापश्यद्यदुपतिं रामं पुष्करमालिनं ॥ सुदर्शनीयस-
र्वांगं ललनायूथमध्यगं ॥ ९ ॥ गायन्तं वारुणीं पीत्वा मदविह्वललोचनं ॥ विभ्राजमानं वपुषा प्रभि-
न्नमिव वारणं ॥ १० ॥ दुष्टः शाखामृगः शाखामारूढः कंपयन्द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मा-
नं संप्रदर्शयन् ॥ ११ ॥ तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसुर्बलदेवपरि-
ग्रहाः ॥ १२ ॥ ता हेलयामास कपिर्भ्रूक्षेपैः संमुखादिभिः दर्शयन्स्वगुदं तासां रामस्य च निरीक्षतः
॥ १३ ॥ तं ग्राव्णा प्राहरत्क्रुद्धो बलः प्रहरतां वरः ॥ स वंचयित्वा ग्रावाणं मदिराकलशं कपिः ॥ गृहीत्वा
हेलयामास धूर्तस्तं कोपयन्हसन् ॥ १५ ॥

प्लावयामास ॥ ५ ॥ आश्रमस्थान्वनस्पतीन्भंक्त्वा आहवनीयादीनभिभूय शकृदादि क्षिप्तवान् ॥ ६ ॥ अप्यधात् ॥ पि-
दधे पेशस्कारी भ्रमरी ॥ ७ ॥ भिन्नं मत्तं ॥ १० ॥ जात्या स्वभावेनैव चापलं
यासां ताः हेलयामास अवज्ञत ॥ १३ ॥ निरीक्षतो निरीक्ष्यमाणस्य तं मत्वा हे

८

स्कं० १० ५१

आस्फालयत॥योषितोवासांसि॥आकृष्यपाटितवान्॥विप्रचक्रेऽपवमपकृतवान्॥२५॥सालेहते॥१७॥सनंदे
नमुसलेनाहननं॥अहन्निसर्थः॥१८॥तेवानरंमलिंषंमल्लकावयवशेषः॥गैरिकयालोहितयाधातुना॥
नावचिंतयन्॥१९॥अहरुनन्तं॥ताडयामास॥२२॥जत्रौकंठबाहुमूलेटंकाः॥सतोयाविवराणितत्सादितः
निर्भिद्यकलशंदृष्ट्वावासांस्यास्फालयद्बले॥कदर्थीकृत्यबलवान्विप्रचक्रेमदोद्धतः॥२५॥तंतस्या
विनयंदृष्ट्वादेशांश्चतदुपद्रुतान्॥क्रुद्धोमुसलमादत्तहलंचारिजिघांसया॥२६॥द्विविदोपिमहावी
र्यःसालमुद्यम्यपाणिना॥अभ्येत्यतरसातेनबलंमूर्धन्यताडयत्॥२७॥तंतुसंकर्षणोमूर्ध्निपतं
तमचलोयथा॥प्रतिजग्राहभगवान्सुनंदेनाहनच्चतं॥२८॥मुसलाहतमस्तिष्कोविरेजेरक्तधा
रया॥गिरिर्यथागैरिकयाप्रहारंनानुचिंतयन्॥२९॥पुनरन्यंसमुत्क्षिप्यकृत्वानिष्पत्रमोज
सा॥तेनाहनत्ससंक्रुद्धस्तंबलःशतधाभिनत्॥३०॥ततोऽन्येनरुषाजघ्नेतंचापिशतधाभिनत्
एवंयुध्यन्भगवताभग्नेभग्नेपुनःपुनः॥३१॥आकृष्यसर्वतोवृक्षान्निर्वृक्षमकरोद्वनं॥ततोमुच
छिलावर्षंबलस्योपर्यमर्षितः॥तत्सर्वंचूर्णयामासलीलयामुसलायुधः॥३२॥सबाहूतालसंका
शौमुष्टीकृत्यकपीश्वरः॥आसाद्यरोहिणीपुत्रंताभ्यांवक्षस्यरूरुजत्॥यादवेंद्रोपितंदोर्भ्यांत्यक्त्वामु
सललांगलौ॥जत्रावभ्यर्दयत्क्रुद्धःसोपतद्रुधिरंवमन्॥३५॥चकंपेतेनपततासटंकःसवनस्प
तिः॥पर्वतःकुरुशार्दूलवायुनानौरिवांभसि॥३६॥जयशब्दोनमःशब्दःसाधुसाध्वितिचां
बरे॥सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणां॥३७॥एवंनिहत्यद्विविदंजगद्व्यतिकरावहं॥सं
स्तूयमानोभगवाञ्जनैःस्वपुरमाविशत्॥३८॥इतिश्रीभागवतेदशमस्कंधेद्विविदवधोनामसप्तम
२५॥नगतोव्यतिकरेनारामावहन्तीतितथातं॥ इतिसुबोधिन्यांसप्तषष्टितमः॥६७॥ रामनाम॥६७

अष्टाषष्टितमे साम्बो निबद्धः कौरवैर्युधि ॥ तद्विमोक्षाय रामेण नागाह्वयविकर्षणम् ॥ रामचरितं ज्ञानेनैव निरूपयितु-
माह ॥ दुर्योधनसुतामिति ॥ समितिंजयः संग्रामजित् ॥१॥ नोऽस्माकं महीं ॥ अस्माभिर्दत्तामनन्तरं ते सम्यक् पालयन्तीति
भावः ॥३॥ यान्ति याः संति प्राणा इन्द्रियाणीव सुसंयताः प्राणायामादिभिर्दमिताः ॥४॥ कुरुवृद्धो भीष्मः तेनानुमोदि-

श्रीशुक उवाच ॥ दुर्योधनसुतां राजंल्लक्ष्मणां समितिंजयः । स्वयंवरस्थामहरत्साम्बो जाम्बवतीसुतः ॥
१॥ कौरवाः कुपिता ऊचुर्दुर्विनीतोऽयमर्भकः । कदर्थीकृत्य नः कन्यामकामामहरद्बलात् ॥२॥ बध्नीते-
मं दुर्विनीतं किं करिष्यन्ति वृष्णयः । येऽस्मत्प्रसादोपचितां दत्तां नो भुञ्जते महीम् ॥३॥ निगृहीतं सुतं श्रुत्वा य-
द्येष्यन्तीह वृष्णयः । भग्नदर्पाः शमं यान्ति प्राणा इव सुसंयताः ॥४॥ इति कर्णः शलो भूरिर्यज्ञकेतुः सुयो-
धनः । साम्बमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः ॥५॥ दृष्ट्वानुधावतः साम्बो धार्तराष्ट्रान्महारथः । प्रगृह्य
रुचिरं चापं तस्थौ सिंह इवैकलः ॥६॥ तं ते जिघृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति भाषिणः । आसाद्य धन्विनो
बाणैः कर्णाग्रण्यः समाकिरन् ॥७॥ सोऽपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनन्दनः । नामृष्यत्तदचिन्त्यार्भः
सिंहः क्षुद्रमृगैरिव ॥८॥ विस्फूर्ज्य रुचिरं चापं सर्वान्विव्याध सायकैः । कर्णादीन्षड्रथान्वीरांस्तावद्भि-
र्युगपत्पृथक् ॥९॥ चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् । रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूज-
यन् ॥१०॥ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् । एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनम् ॥११॥
तं बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि । कुमारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन् ॥१२॥

ताः तत्सहिताः षड्रथानेवर्य्यः ॥५॥ कर्णाग्रण्यः कर्णो येषां ते ॥७॥ अमृष्यत् असहत् ॥ अचिन्त्यस्य भगवतोऽर्भकः अ-
चिन्त्यश्चासावर्भकश्चेति वा ॥८॥ तत्तस्य चयति ॥ चतुर्भिश्चतुर इत्य नवीर्यास्तु संधेयानन्तकर्मेति समानितवन्तः स-
सपदुर्योधनस्य कन्यां चादायेति ॥१२॥

श्री॰ भा॰ ए॰ टी॰ भ

वेदं यथापि भवतस्तथापि मनमात्रेणैव वयं कृतार्थास्तथापि पृच्छामः तवैतन्न वयं हैमे प्रसन्नो भगवान्तानि
त्वयः ७ ननु त्वन्नोपि किमन्यो भगवत्प्रसादपात्रमस्ति तत्राह अहं किलेति भुवि प्रजार्थोऽपूजयं पुत्रत्वाभ
प्रायाजननःमनःपूजितवान् किलेति स्मृतौ शुद्धे भगवद्भक्तिमन्तु स्मरति ८ अतो यथा मुच्येमहि तथा नोस्मात्
प्राधिशाधि ९ विचित्राणि व्यसनानि यस्मिन् तस्मात्संसारात् तथा विश्वतः सर्वतो भयं यस्मिन् तस्मात्

ब्रह्मंस्तथापि पृच्छामो धर्मान्भागवतांस्तव यान्श्रुत्वा श्रद्धया मर्त्यो मुच्यते विश्वतो भयात् ७
अहं किल पुरानन्तं प्रजार्थो भुवि मुक्तिदं अपूजयं न मोक्षाय मोहितो देवमायया ८ यथा विचित्र
व्यसनाद्भवद्भिर्विश्वतो भयात् मुच्येमह्यञ्जसैवाद्धा तथा नः शाधि सुव्रत ॥ ९ ॥ शुक उवाच ॥ राजन्
नेवं कृतप्रश्नो वसुदेवेन धीमता प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः ॥ १० ॥ नारद उवाच
सम्यगेतद्व्यवसितं भवता सात्वतर्षभ यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान् ११ श्रु
तोऽनुपठितो ध्यात आदृतो वानुमोदितः सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि १२ श्रीराम

भवी[?]दं तन्मूर्तैः श्रवणसाधनायासेन श्रद्धासाद्भावात् ९ हरेर्गुणैर्वर्णनीयत्वेन प्रस्तुतैर्हरिः संस्मारितश्च प
र्षः १० प्रीतिमाविष्करोति सम्यगिति त्रिभिः एतत्स्मेयं पृच्छसि विश्वभावनात् सर्वशोधकान् ११ आदृतः आ
दिकेन गृहीतः अनुमोदितः परैः क्रियमाणोः संस्तुतः सद्धर्मो भागवतो धर्मः देवद्रुहं संदेवत्येथः यद्वा देवभ्यो

द्वितीयेनिमिजायंतसंवादेनाहनारदः धर्मान्भागवतान्भक्त्यावसुदेवायपृच्छते अभीक्ष्णंप्रस्थापितोपिपु
नःपुनरवात्सीदित्यर्थः नतुनारदस्यदक्षादिशापान्नैकत्रवासःसंभवतिइत्याशंक्याह गोविंदभुजगुप्तायामि
ति नतस्यांशापादेःप्रभावइत्यर्थः कृष्णोपासनेलालसाऔत्सुक्यंयस्यसः १ यद्वाजन्मभृतामपीदृशमौ
त्सुक्यंतत्कोनुनामनभजेदित्याह कोन्विति इंद्रियवानिति इंद्रियवत्त्वमात्रमेवयत्रापेक्षितंविशेषणमि
त्यर्थः सर्वतःसर्वेषांपिलोकेमृत्युर्यस्यसः २ ३ यथापित्रोर्यात्रागमनंअपत्यानांस्वस्तयेमंगलाय

शुकउवाच॥ गोविंदभुजगुप्तायांद्वारवत्यांकुरूद्वह अवात्सीन्नारदोभीक्ष्णंकृष्णोपासनलालसः १
कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजं नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २ तमेकदातु
देवर्षिंवसुदेवोगृहागतं अर्चितंसुखमासीनमभिवाद्येदमब्रवीत ३॥ वसुदेवउवाच॥ भगव
न्भवतोयात्रास्वस्तयेसर्वदेहिनां कृपालूनांयथापित्रोरुत्तमश्लोकवर्त्मनां ४ भूतानांदेवचरि
तंदुःखायचसुखायच सुखायैवहिसाधूनांत्वादृशामच्युतात्मनां ५ भजंतियेयथादेवान्देवा
अपितथैवतान् छायेवकर्मसचिवाःसाधवोदीनवत्सलाः ६

यथाचउत्तमश्लोकस्यवर्त्मभूता
नांमहतांयात्राकृपालूनांस्वस्तये तथाभगवद्रूपस्यभवतोयात्रासर्वदेहिनांस्वस्त्यइति ४ देवैरपिम
हतामुपमानमनुचितमित्याह भूतानामिति देवानांचरितमिति वृष्ट्यादिनाभूतानांदुःखायापि त्वादृ
शांत्वच्युतात्मनांयेषांतेषां ५ किंच सेवाकुर्वतोपिदेवाभजनेनानुसारेणकुर्वंतिनतथासा
धवइति भजंतीति छायेवयथापुरुषोयावत्करोतितावदेवतच्छायापितथाकर्मसचिवाःकर्मसहायाः

ईशोऽपि यो न्यथयितुं ब्रह्मशापनिमित्तेनैव व्यक्रमात् कर्माणीति कर्माण्येवमाह तत्र कर्माणि कृत्वा निसृष्टाः मुनयः पिंडा
रकं समगमन्नित्यन्वयः निसृष्टाः प्रस्थापिताः पूर्वोक्तासुदारकीर्तिनो विशेषणवत्कर्माणि विशिनष्टि पुण्यानि
वहानीत्यादिभिः पदैः कानिचिदश्वमेधादिकर्माणि पुण्यमेव जनयन्ति पुत्रोपलालनादीनि तु तत्कालसु
खमेव कुर्वन्ति प्रायश्चित्तादीनि तु पापमेव हरन्ति एतानि तु सर्वतोमुखानीत्याह पुण्यानि वहन्ति कीर्तनादिना
पुण्यानि निवहन्ति प्रापयन्तीति तथा सुमंगलानि श्रोतृसुखात्मकानि गायतो जगतः कलिमलापहराणि कृ

कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा कालात्मना निव
सता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ११ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगि
राः कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः १२ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः उपसंगृ
ह्य पप्रच्छुरविनीता विनीतवत् १३ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं एषा पृच्छति वो वि
प्रा अंतर्वत्न्यसितेक्षणाः १४ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः प्रसोष्यंती पुत्रकामा

त्वा मुनिप्रस्थापने हेतुः कालात्मना संहारकरूपेण यदुदेवगेहे वसुदेवगेहे निवसता सता स्वकुलं संजिहीर्
षेत्यर्थः पिंडारके ततो नातिदूरे तीर्थविशेषे ११ १२ उपसंगृह्य पादग्रहणं कृत्वा १३ प्रश्नप्रकारमाह
द्वयेन ते वेषयित्वेति हे अमोघदर्शना विप्राः एषा अंतर्वत्नी गर्भिणी १४ वः युष्मान् साक्षात्प्रष्टुं विलज्जती
लज्जमाना अप्रसन्नमुखेन पृच्छति प्रसोष्यंती आसन्नप्रसवा किंस्वित् संजनयिष्यति कन्यां वा पुत्रं वेत्यर्थः

श्री
भा॰ ए॰
टी॰
४

प्रलब्धा वंचिताः ॥ १६ ॥ तस्मिन्नुदरे अयस्मयं लोहमयं ॥ १७ ॥ मंदभाग्यैर्नः अस्माभिः किमेतत्कृतं ते ॥ नः अस्मान्किं वदिष्यंतीति विह्वलिताः संतो मुशलमादाय गेहान्ययुः ॥ १८ ॥ राज्ञे उग्रसेनाय न तु श्रीकृष्णाय ॥ १९ ॥ २० ॥ आहुकः उग्रसेनः सोपि श्रीकृष्णमपृष्ट्वैव प्रास्यत् प्रतिपन्नवान् ॥ अस्य मुशलस्य चूर्णीक्रियमाणस्यावशेषितं लोहं च

एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप ॥ जनयिष्यति वो मंदा मुशलं कुलनाशनं ॥ १६ ॥ तच्छ्रुत्वा तेतिसंत्रस्ता विमुच्य सहसोदरं ॥ सांबस्य ददृशुस्तस्मिन्मुशलं खल्वयस्मयं ॥ १७ ॥ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः ॥ इति विह्वलिता गेहानादाय मुशलं ययुः ॥ १८ ॥ तच्चोपनीय सदसि परिम्लानमुखश्रियः ॥ राज्ञ आवेदयां चक्रुः सर्वयादवसंनिधौ ॥ १९ ॥ श्रुत्वामोघं विप्रशापं दृष्ट्वा च मुशलं नृप ॥ विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः ॥ २० ॥ तच्चूर्णयित्वा मुशलं यदुराजः स आहुकः ॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं ॥ २१ ॥ कश्चिन्मत्स्योग्रसील्लोहं चूर्णानि तरलैस्ततः ॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥ २२ ॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्यं लुब्धकोऽकरोत् ॥ २३ ॥ भगवान्ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥ २४ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे प्रथमोध्यायः ॥ १ ॥ ॥

प्रास्यत् ॥ २१ ॥ तरलैः तरंगैः ॥ २२ ॥ अन्यैर्मत्स्यैः सह शल्यं शराग्रे ॥ २३ ॥ ज्ञातः सर्वोर्थो येन सः ईश्वरोपि समर्थोपि सन् अन्यथा कर्तुं नैच्छत् किं त्वन्वमोदत यतः कालरूपी ॥ २४ ॥ इति श्रीभावार्थदीपिकायामेकादशे प्रथमोध्या

४
यः १

२१ तेषां पारमहंस्यचरितमाह द्वाभ्यां त एत इति भगवद्रूपं विश्वं पश्यंतः सदसदात्मकं स्थूलसूक्ष्मरूपं तच्च स्वाव्यतिरेकेण पश्यंत्यः २२ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते मुक्ताः अनासक्ताः २३ महात्मनो निमेः वितायमाने अनुष्ठीयमाने अजनाभे भारतवर्षे २४ यजमानो निमिः अग्नयः

कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः २१ त एते भगवद्रूपं विश्वं सदसदात्मकं आत्मनोऽव्यतिरेकेण पश्यंतो व्यचरन्महीं २२ अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान् मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामं २३ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया वितायमानमृषिभिरजनाभे महात्मनः २४ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप यजमानोऽग्नयो विप्राः सर्व एवोपतस्थिरे २५ विदेहस्तानभिप्रेत्य नारायणपरायणान् प्रीतः संपूजयांचक्रे आसनस्थान्यथार्हतः २६ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव पप्रच्छ परमप्रीतः प्रश्रयावनतो नृप २७ विदेह उवाच मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः विष्णोर्भूतानि लोकानां पावनाय चरंति हि २८

आहवनीयादयः विप्रा ऋत्विगादयः २५ अभिप्रेत्य ज्ञात्वा २६ स्वरुचैव रोचमानान् नत्वाभरणादि प्रकाशैः ब्रह्मपुत्रोपमान् सनत्कुमारादिसदृशान् २७ परमप्रीत्या तद्दर्शनमभिनंदति द्वाभ्यां मन्ये इति ननु भगवतः पार्षदानां कथमत्रोपलब्धिः तत्राह विष्णोरिति विष्णुभक्ता लोकपावनार्थे सर्व

किंच त्वया मम महाननुपकारः कृत इत्याह त्वयेति पुण्ये श्रवणकीर्तने यस्य सः १३ अत्रापि भगवद्धर्मनिरू
पणेपि विदेहस्य जनकस्य १४ आर्षभाणामृत्यञ्जिसान्वयां विविच्य कथयति प्रियव्रत इति १५ मोक्षध
र्मविवक्षया मोक्षधर्माणां प्रवर्तनेच्छया अवतीर्णं वासुदेवांशमाहुः तस्य चैव वेदपारगं सुतशतमासीत् १६
तेषामृषभसुतानां मध्ये नववर्षेश्वराणां चरितं वक्ष्यन्नितरेषां चरितं न तावद्विविच्याह तेषामिति एतदज

त्वया परमकल्याणः पुण्यश्रवणकीर्तनः स्मारितो भगवानद्य देवो नारायणो मम १३ अत्रा
प्युदाहरंतीममितिहासं पुरातनं आर्षभाणां च संवादं विदेहस्य महात्मनः १४ प्रियव्रतो नाम
सुतो मनोः स्वायंभुवस्य यः तस्याग्नीध्रस्ततो नाभिरृषभस्तत्सुतः स्मृतः १५ तमाहुर्वासुदेवांश
मोक्षधर्मविवक्षया अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं १६ तेषां तु भरतो ज्येष्ठो नारायणप
रायणः विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतं १७ स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिं
उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः १८ तेषां नव नवद्वीपपतयोस्य समंततः कर्मतंत्रप्रणे
तार एकाशीतिर्द्विजातयः १९ नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः श्रमणा वातरशना आ
त्मविद्याविशारदाः २०

नाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत् एतेन तस्य
धर्मातिरेको निरूपितः १७ इमां पृथ्वीं गृहान्निर्गतः हरिमुपासीनः सेवमानः सन् १८ नव सुताः नवद्वीप
पतयः नवानां ब्रह्मावर्तादिभूखण्डानां पतयः अस्य भारतवर्षस्य एकाशीतिः सुताः कर्ममार्गप्रवर्तकाः
ब्राह्मणाश्च अभूवन् १९ अर्थशंसिनः परमार्थनिरूपकाः श्रमणाः श्रमवंतः आत्माभ्यासे कृतश्रमाः उत्त
पैः वातरशनाः दिगंबराः आत्मविद्यायां विशारदा निष्णाताः २०

प्रथममात्यंतिकंक्षेमंकथयति मन्यइति नकुतश्चिद्भयंयस्मात्तदकुतश्चिद्भयं अत्रसंसारे असदात्मभा
वात् असतिदेहादावात्मभावनातः नित्यंसर्वदाउद्विग्नबुद्धेः विश्वात्मनासर्वथानिःशेषंयत्रपादांबुजो
पासनेभीर्निवर्ततेतत् ३३ भागवतधर्मलक्षणमाह येवैइति मन्वादिमुखेनवर्णाश्रमादिधर्माउ
क्तानिरस्यत्वात् स्वमुखेनैवभगवताविदुषामपिपुंसां अंजःसुखेनैवात्मलब्धयेयेवैउपायाःप्रोक्ताः
तान्भागवतान्धर्मान्विद्धि ३४ अंजःपदेनोक्तंसुकरत्वंविवृणोति यानिति यानास्थायआश्रित्य

कविरुवाच॥ मन्येऽकुतश्चिद्भयमच्युतस्यपादांबुजोपासनमत्रनित्यं उद्विग्नबुद्धेरसदात्मभा
वाद्विश्वात्मनायत्रनिवर्ततेभीः ३३ येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये अंजःपुंसा
मविदुषांविद्धिभागवतान्हितान् ३४ यानास्थायनरोराजन्नप्रमाद्येतकर्हिचित्
धावन्निमील्यवानेत्रेनस्खलेन्नपतेदिह ३५

योगादिष्विवनप्रमाद्येतविघ्नैर्नविहन्येत
किंच निमील्यनेत्रेधावन्नपिइहएषुभागवतधर्मेषुनस्खलेत् निमीलनंनामाज्ञानंयथाहुः श्रुति
स्मृतीउभेनेत्रेविप्राणांपरिकीर्तिते एकेनविकलःकाणोद्वाभ्यामंधःप्रकीर्तितइति अज्ञात्वापीत्य
र्थः यथापदन्यासस्थानमतिक्रम्यशीघ्रंपरतःपदन्यासेनगतिर्धावनं तद्वज्ज्ञापिकिंचित्किंचिदति
क्रम्यातिशीघ्रमनुष्ठानंधावनं तथाभूतोतिष्ठन्नपिनस्खलेत् नप्रत्यवायीस्यात्तथानपतेत्फलात्

मपाडुर्लभंलब्ध्वेप्यदेहोमागपभित्याह डुर्लभइति बहवोदेहाभवंतियेषांतेदेहिनोजीवास्तेषांक्षणभंगुरो
पिमानुषोदेहोडुर्लभः परमपुरुषार्थसाधनत्वात् वैकुंठःप्रियोयेषांवैकुंठस्यवाप्रियास्तेषांदर्शनं २९
हेप्यनघानिरवद्याः भवतःआत्यंतिकंक्षेमंपृछामः यतःक्षणार्द्धकालभवोपिसत्संगःशेवधिर्नि
धिःनिधिलाभयथानंदोभवतितथात्रपरमानंदइत्यर्थः ३० तदर्थंचभागवतान्धर्मान्ब्रूत यदिनो

डुर्लभोमानुषोदेहोदेहिनांक्षणभंगुरः तत्रापिडुर्लभंमन्येवैकुंठप्रियदर्शनं
२९ अतआत्यंतिकंक्षेमंपृछामोभवतोनघाः संसारेस्मिन्क्षणार्द्धोपिसत्सं
गःशेवधिर्नृणां ३० धर्मान्भागवतान्ब्रूतयदिनःश्रुतयेक्षमं यैःप्रसन्नःप्रप
न्नायदास्यत्यात्मानमप्यजः ॥३१॥ **नारदउवाच** ॥ एवंतेनिमिनापृष्टावसुदेव
महत्तमाः प्रतिपूज्याऽब्रुवन्प्रीत्यासमसदस्यर्त्विजंनृपम् ३२ कृष्णायनमः

क्षमंश्रुतयेश्रवणायक्षेमंयोग्यंभवति कथंभूतान्यैर्धर्मैःप्रपन्नायभक्तायाजोहरिःआत्मानम
पिदास्यतितान् ३१ महत्तमाःसदस्यैर्ऋत्विग्भिश्चवर्त्तमानंतोपिभगवद्धर्मपरावभूवुरित्यर्थः भगवद्धर्मान्त
द्धेतुमायातत्तरणानिच ब्रह्मकर्मावतारेहाभक्तप्राप्यपुराक्रमान् तानेक्रमेणकृतवान्नव
प्रश्नान्निमिनेवएकैकस्योत्तरंप्रोचुःकविमुख्यामुनीश्वराः ३२ ॥ ॐनमोभगवतेवासुदेवाय॥

श्री° भा° ए° टी° ८

ननुविषयपरित्यागमकृतोऽव्यभिचारिणीभक्तिःसंभवतिकुतस्तरामभयंतत्रनतावद्विषयोनामवास्तवोऽ स्तिकिंतुमनोविलासमात्रंअतोमनोनियमनेनभजनादभयंस्यादित्याह अविद्यमानोपीति द्वयःद्वैतप्रपंचः ध्यातुःपुंसःधियामनसास्वप्नमनोरथश्चयथेत्यर्थः तत्तस्मात्कर्माणिसंकल्पयतिविकल्पयतिचयन्मन स्तन्निरुंध्यात्नियच्छेत्ततश्चकथाभजन्याभजनादभयंस्यादित्यर्थः ३७ ननुएतदत्यंताशक्यमित्याशंक्य सुगममार्गमाह शृण्वन्निति तदर्थकानिजन्मानिकर्माणिचअर्थोयेषांतानि एतान्यपिसाकल्येनत्तात

अविद्यमानोप्यवभातिहिद्वयोध्यातुर्धियास्वप्नमनोरथौयथा तत्कर्मसंकल्पविकल्पकंमनो बुधोनिरुंध्यादभयंततःस्यात् ३८ शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके गीतानिनामानितदर्थकानिगायन्विलज्जोविचरेदसंगः ३९ एवंव्रतःस्वप्रियनामकीर्त्या जातानुरागोद्रुतचित्तउच्चैः हसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः ४० राम

मशक्यानीत्याशंक्याह यानिलोकेगीतानिप्रसिद्धानितानिएवंगायंश्चविचरेत् असंगोनिस्पृहः ३९ एवंचभजतःसंप्राप्तप्रेमलक्षणभक्तियोगस्यसंसारधर्मातीतांगतिमाह एवमिति एवंव्रतंदृढंयस्यसः स्व प्रियस्यहरेर्नामकीर्त्याजातोऽनुरागःप्रेमयस्यसः अतएवद्रुतंचित्तंश्लथहृदयः कदाचिद्भक्तपराजितंभग वंतमाकलय्योच्चैर्हसति एतावंतंकालमुपेक्षितोस्मीतिरोदिति अप्राप्यात्मक्याउच्चैरतिक्रोशति हेहरेमामु द्धरेतिरौति अतिहर्षेणगायति जितंजितमितिनृत्यति किंदांभिकवत्परान्प्रतिप्रकाशयितुंन उन्मादवत्तत्र

ननुकेतेभागवताधर्माःईश्वरार्पितानिसर्वकर्माणयेवेत्याह कायेनेति आत्मनाचित्तेनाहंकारेणवाअनुसृतो
यःस्वभावस्तस्मात् अयमर्थः नकेवलंविधितःकृतमेवेतिनियमः स्वभावानुसारिलौकिकमपीति तथाच
भगवद्गीतासु यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति यद्वा
ननुकायादीनामेवकर्मनात्मनइत्याशंक्याह अध्यासेनानुसृतात्ब्राह्मणत्वादिस्वभावाद्यद्यत्करोतीत्यर्थः
तत्सकलंपरस्मैपरमेश्वरायनारायणायेतिसमर्पयेत् तथासकलमपिकर्मभागवताधर्मोभवतीतिभा
वः ३६ ननुकिमेवंपरमेश्वरेभजनेनअज्ञानकल्पितभयस्यज्ञानैकनिवर्त्यत्वादित्याशंक्याह भयमिति येन

कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात् करोतियद्यत्सकलंपरस्मैनारायणाये
तिसमर्पयेत्तत् ३६ भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोस्मृतिः तन्माययातो
बुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा ३७

भयंतन्मायययाभवेत् अतोबुधोबुद्धिमान्तमेवभजे
त् ननुभयंदेहाद्यभिनिवेशतोभवतिसचदेहाहंकारतःसचस्वरूपास्मरणात् किमत्रतस्यमायाकरोति
एतआह ईशादपेतस्येति ईशविमुखस्यतन्माययास्मृतिःभगवतःस्वरूपास्फूर्तिस्ततोविपर्ययोदेहोस्मी
ति ततोद्वितीयाभिनिवेशाद्भयंभवति एवंप्रसिद्धलौकिकोवश्यमायासउक्तंभगवता दैवीह्येषागुणमयी
मममायादुरत्यया मामेवयेप्रपद्यंतेमायामेतांतरंतिते एकयाअव्यभिचारिण्याभजेत् किंच गुरुदेवता
त्मागुरुरेवदेवताईश्वरः आत्माप्रेष्ठश्चयस्यतथादृष्टिःसन्नित्यर्थः ३७ ॐनमोभगवतेवासुदेवायनमोनमः

श्री॰
भा॰ए॰
टी॰
४

यतधर्मस्योत्तरमाहत्रयेण। सर्वभूतेष्विति आत्मनःस्वस्यसर्वभूतेषुब्रह्मभावेनसमन्वयंयःपश्येत् तथा
ब्रह्मरूपेआत्मन्यधिष्ठानेभूतानिचयःपश्येत् यद्वा आततत्वाच्चमातृत्वाच्चात्माहिपरमोहरिरितितंज्ञे।
यः आत्मनोहरेःसर्वभूतेषुमशकादिष्वपिनियंतृत्वेनवर्तमानस्यभगवद्भावंनिरतिशयैश्वर्यमेवयःप।
श्येत्नतुतत्तारतम्यं तथात्मनिहरावेवभूतानिचपश्येत् कथंभूतेभगवतिविग्रहप्रभुतेऐश्वर्यादिरूपे न
तुनमंदमलिनभूताश्रयत्वेनजाड्यादिप्रसक्त्याऐश्वर्यादिप्रचुरेतिपश्येत् सस्वर्वेषुपरिस्फुरणंभगवदेनपश्ये।

हरिरुवाच॥ सर्वभूतेषुयःपश्येद्भगवद्भावमात्मनः भूतानिभगवत्यात्मन्येषभागवतोत्त
मः ४५ ईश्वरेतदधीनेषुबालिशेषुद्विषत्सुच प्रेममैत्रीकृपोपेक्षायःकरोतिसमध्यमः
४६ अर्चायामेवहरयेपूजांयःश्रद्धयेहते नतद्भक्तेषुचान्येषुसभक्तःप्राकृतःस्मृतः ४७
गृहीत्वापीन्द्रियैरर्थान्योनद्वेष्टिनहृष्यति विष्णोर्मायामिदंपश्यन्सवैभागवतोत्तमः ४८॥

भागवतोत्तमइत्यर्थः ४५ प्रेमचमैत्रीचकृपाचउपेक्षाचताः ईश्वरादिषुचतसृषुयःकरोतिसमध्यमोभा
गवतः एवंभूतस्यभेदस्यदर्शनात् ४६ अर्चायांप्रतिमायांपूजामीहतेकरोतिननतद्भक्तेषुअन्येषुचस्व
तरांनकरोतिप्राकृतःप्रकृतिःप्रारंभःअधुनैवप्रारब्धभक्तिःशनैरुत्तमोभविष्यतीत्यर्थः ४७ पुनस्त्रिभिः
श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैवलक्षणान्याह गृहीत्वापीति श्रीवासुदेवाविष्टचित्तानगृह्णाति
तावदिन्द्रियैरर्थानगृहीत्वाऽपीत्यपिशब्दार्थः इदंविश्वम् ४८॥

किंच खमिति सत्त्वानि भूतानि आकाशादि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत् संभावनायो-
ग्यः ४१ ननु विषमा हृठयोगानामपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भ
वेदित्याशंक्य सदृष्टांतमाह भक्तिरिति प्रपद्यमानस्य हरिं भजतः प्रेमभक्तिः प्रेमलक्षणा परेशानुभवः प्रेमा
स्पदभगवद्रूपस्फूर्तिः तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिकः एककालः भजनस्य समकाल
एव स्यात् यथाश्नतो भुंजानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः उपलक्षणमेतत्श्र

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् सरित्समुद्रांश्च हरेः शरीरं यत्किंच
भूतं प्रणमेदनन्यः ४१ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः प्रपद्यमानस्य
यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुग्रासं ४२ इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगव
त्प्रबोधः भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात् ४३ ॥राजोवाच॥ अथ भागव
तं ब्रूत यद्धर्मो यादृशो नृणां यथाचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः ४४ ॥ श्रीगुरवे नमः ॥

तित्रयमपि यथा स्युः तद्वत् एकमेकैकस्मिन्भजने किंचित्किंचित्प्रेमादित्रिके जायमाने ऽनुवृत्त्या भज
तः परमप्रेमादि जायते बहुग्रासभोजिन इव परमतुष्ट्यादि ४२ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्या
ह इत्यच्युतांघ्रिमिति ४३ भागवतस्य भवेतीत्युक्तेन तस्य लक्षणं पृच्छति अथेति यद्धर्मः यस्मिन्धर्मे प्र
तिष्ठितः यादृशः यत्स्वभावः यथाचरति वर्तते भुंक्ते वा यैश्च लिंगैर्भगवतः प्रियो भवति ४४ ॥ ❀

श्री: भा० ए० टी० ९

श्चापि च विषयाभिसंधिना चलने कामेनाति संतापे सति भवेत् सत भगवत्सेवा निर्वृत्तो न संभवतीत्याह भ
गवत इति उरुविक्रमो चरणशाखा अंगुलयः तासां नखानि चंद्रमणयस्तेषां चंद्रिकाशी
तलादीप्तिस्तया निरस्तः कामादितापो यस्मिन् तस्मिन् उपसीदतो भजतो हृदि कथं पुनः संतापः प्रभवति
चंद्रोदिते सति अर्कस्य ताप इव न यस्य स्वः पर इत्यादिना श्लोकद्वयेन याठ्योप्यस्योत्तरमुक्तं वेदितव्यं
यद्भुतेइत्यस्य च हरिनामानीति व्याख्यातव्यं ५४ उक्तमसमस्तलक्षणसारमाह विसृजतीति हरिरेव स्वयं सा

भगवत उरुविक्रमांघ्रिशाखानखमणिचंद्रिकया निरस्ततापे हृदि कथमुपसीदतां पुनः स प्र
भवति चंद्र इवोदितेऽर्कतापः ५४ विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोप्यघौघनाशः
प्रणयरशनया धृतांघ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥ ५५ ॥ इति श्रीभागवते एकादश
स्कंधे द्वितीयोध्यायः ॥ २ ॥ राजोवाच ॥ परस्य विष्णोरीशस्य मायिनामपि मोहिनीं मायां वेदितुमि
च्छामो भगवंतो ब्रुवंतु नः १ ॥ राम

त्वाद्यस्य हृदयं न विसृजति न मुंचति कथंभूतः अवशेनाप्यभिहितमात्रोपि अघौघं नाशयति यः सः ना
त्किं न विसृजति यतः प्रणयरशनया धृतं हृदये निबद्धमंघ्रिपद्मं यस्य सः भागवतप्रधान उक्तो भवति ५५
इति श्रीभावार्थदीपिकायां एकादशस्कंधे द्वितीयोध्यायः ॥ २ ॥ मायातत्तरणोपायकर्मब्रह्मचतुष्टये ततो
ये वक्तुं रंद्रमार्थमेभ्यो निमिः पृच्छति विष्णोर्मायामिदं पश्यन्नित्युक्तमतो मायां पृच्छति परस्येति हे भागवंतः १

किंच देहादीनांसंसारधर्मैर्जन्माप्ययादिभिर्योहरेःस्मृत्याऽविमुह्यमानःसभागवतप्रधानःतत्रदेहस्यजन्मा
प्ययौप्राणस्यक्षुद्धियस्तर्षोमनसोभयं इंद्रियाणांकृच्छ्रंश्रमःतैः ४९ कामश्चकर्माणिचबी।
जानिचवासनाः तेषांवासुदेवएकोनिलयआश्रयोयस्यसः एतेनगृहीत्वापीत्यादिश्लोकत्रयेणद्वेषहर्षमो
हकामादिरहितश्चरतीतियथाचरतीत्यस्योत्तरमुक्तं ५० येर्लिंगैर्भगवत्प्रियस्तत्स्योत्तरमाह नयस्येति ज
न्मसत्कुलेकर्मतपआदिजातयः अनुलोमप्रतिलोमजाःमूर्द्धावसिक्तादयः अस्मिन्देहेअहंकाररहितःस

देहेंद्रियप्राणमनोधियांयोजन्माप्ययक्षुद्भयतर्षकृच्छ्रैः संसारधर्मैरविमुह्यमानःस्मृत्याहरेर्भाग
वतप्रधानः ४९ नकामकर्मबीजानांयस्यचेतसिसंभवः वासुदेवैकनिलयःसवैभागवतोत्त
मः ५० नयस्यजन्मकर्मभ्यांनवर्णाश्रमजातिभिः सज्जतेस्मिन्नहंभावोदेहेवैसहरेःप्रियः ५१
नयस्यस्वःपरइतिवित्तेष्वात्मनिवाभिदा सर्वभूतसमःशांतःसवैभागवतोत्तमः ५२ त्रिभुवन
विभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् नचलतिभगवत्पदारविंदाल्लवनि

त्कुलकर्मादिलिंगैर्देहेहरेःप्रियोभवतीत्यर्थः ५१ वित्तेष्वात्मीये ५२ त्रिभुवनविभवहेतवेपित्रैलोक्यराज्यार्थमपिल
वार्धमपिनिमिषार्धमपिभगवत्पदारविंदभजनाद्योनचलतिसवैष्णवाग्र्यः नतुलवार्धमात्रभजनेनापरमेच
नावाल्लाभोभवेत तत्कृतेनचलेदित्याह अकुंठस्मृतिः भगवत्पदतोऽन्यत्सारंनास्तीतिवेत्तियस्याऽकुंठाअन
पगतास्मृतिर्यस्यसः भगवत्पदारविंदादन्यत्सारंनास्तीतिकुतः अतआह अजितेहरावेवआत्मायेषांत
र्महत्तैःसुरादिभिरपिदुर्लभात् किंतुकेवलंविमृग्यात् तदेपलपासवेस्यनलवंस्मरन्योनचलतीत्यर्थः

स जीव आत्मनोनन्योपि गुणाश्रयो निजैर्गुणैरिंद्रियैर्गुणान्विषयान्भुंजान इदं स्वसृष्टं शरीरमात्मानं अहमेवमन्यमान इह शरीरादौ सज्जते अतएव संसरतीति भावः ५ ननु भुंजानः कथं सज्जते भुंजानो भोगसमासक्तो मुच्यत इति चेत्तत्राह कर्माणीति कर्मभिः कर्मेंद्रियैः सनिमित्तानि सवासनानि कर्माणि कुर्वन् भ्रमतीह संसारे ननु अतः कथं सुखेतरं सारदुःखात्मकं कर्मद्रूपं गृह्णन् ६ कियत्कालं भ्रमतीत्याह बहूनि अभद्राणि वहंती

गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः मन्यमान इदं सृष्टमात्मानमिह सज्जते ५ कर्माणि कर्मभिः कुर्वन्सनिमित्तानि देहभृत् तत्तत्कर्मफलं गृह्णन्भ्रमतीह सुखेतरं ६ इत्थं कर्मगतीर्गच्छन्बह्वभद्रवहाः पुमान् आभूतसंप्लवात्सर्गप्रलयावश्नुतेवशः ७ धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकं अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ८ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ९ पातालतलमारभ्य संकर्षणमुखानलः दहन्नूर्ध्वशिखो विष्वग्वर्द्धते वायुनेरितः १० संवर्तको मेघगणो वर्षति स्म शतं समाः धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ११

गतीर्यातः सर्गप्रलयौ उत्पत्तिमरणे ७ एवं मायामयीं सृष्टिमुक्त्वा मायामयं प्रलयं दर्शयितुमारभते धातूपप्लवेत्यादि धातूनां महाभूतानामुपप्लवे नाशहेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं अव्यक्ताय अव्यक्तं कारणं प्रति नेतुमाकर्षति ८ नाशहेतुमाह शतवर्षेति तस्मिन्काले उपचित ऊष्मासौ अस्यासावर्कश्च एतावता कालेनोपचितशक्तित्वं यस्य सः ९ ऊर्ध्वशिखः ऊर्ध्वज्वालः विष्वक्परितः १० संवर्तकः प्रलयकर्ता धाराभिर्जलबिंदुभिर्हस्तिहस्ताभिस्त

ननु कथं त्वं भागवतो भूत्वा कृतार्थः स्याः किं बहुप्रश्नैः अत आह नानृप्य इति संसारतापैर्नितरां तप्तोऽहं तस्य तापस्य भेषजं हरिकथामृतं तद्रूपं युष्मद्वचो जुषमाणोऽस्मान्नानृप्यामि २ मायायाः स्वरूपतो निरूपणासंभवात्तस्याः कार्यद्वारेण निरूपयितुमाह एभिरिति आद्यः पुरुषः एभिराकाशादिभिर्भूतानामात्मा कारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज एषा माया भगवतः शक्तिश्चरमश्लोकपादस्य प्रतिश्लोकमनुषङ्गः किमर्थं ससर्ज स्वमात्रात्मप्रसिद्धये स्वा मिमीते प्रमिमीते यः उपाधिः सः स्वमात्रा तानि तस्यात्मनो जीवस्य प्रकृष्टा

नानृप्ये जुषन् युष्मद्वचो हरिकथामृतं संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजं ॥२॥ श्रीअन्तरिक्ष उवाच ॥ एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ३
एवं सृष्टानि भूतानि प्रविष्टः पंचधातुभिः एकधा दशधात्मानं विभजन्जुषते गुणान् ४

सिद्धये यद्वा स्वांशानां भूतानां जीवानां मात्रार्थं सिद्धये विषयभोगाय आत्मप्रसिद्धये मोक्षाय चेत्यर्थः तदु क्तं वेदस्तुतौ बुद्धीन्द्रियमनःप्राणान्जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं च आत्मनेकल्पनाय चेति ३ एवं जीवोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतानि अन्तर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा च बाह्येन्द्रियरूपेण आत्मानं विभजन् गुणान्ननेन्द्रियानजुषते जोषयते इत्यर्थः यद्वात्मात्मानं शतगुणान्विभ

श्री·
भा·ए·
टी·
११

भागवते भगवत्प्रतिपादके अन्यत्र शास्त्रादौ या अनिन्दा तां मनसः प्राणायामैः वाचो मौनेन कर्मणो निरीहया दण्डं सत्यं यथार्थभाषणं शमदमौ अन्तःकरणबाह्येन्द्रियनिग्रहौ २६ हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थे इष्टं देवान सर्वकर्म विशेषतश्च यज्ञनादि यत्नततत्तदर्थे शिक्षेत २७ इष्टं दत्तमित्यादेर्यो भावनिष्ठः वृत्तं सदाचारः आत्मनः प्रियं गन्धपुष्पादि दारादीनपि तत्सर्वं परमेश्वराय निवेदनं तेन सेवकतया समर्प

श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि मनोवाक्कर्मदण्डं च सत्यं शमदमावपि २६ श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं २७ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं २८ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं परिचर्यां चोभयत्र महत्सु नृषु साधुषु २९ परस्परानुकथनं पावनं भगवद्यशः मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ३० स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिं भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ३१

यन्तं शिक्षेत २८ कृष्ण एवात्मा नाथश्च येषां कृष्णस्य वात्मनो जीवस्य नाथो येषामिति वा तेषु उभयत्र स्थावरजंगमे च या परिचर्या तां विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीलेषु ततोऽपि महत्सु श्रीभागवतेषु २९ तेषु सह संगम्य पावनं भगवद्यशः तस्य परस्परानुकथनं शिक्षेत यद्वा यशः श्रुत्वा तत्र संस्पर्शादि परित्यागेन मिथो या रतिः रमणं या च तुष्टिः सुखं या च निवृत्तिः समस्तदुःखनिवृत्तिः तां च शिक्षेत ३० एवं वर्तमानानां परमानन्दप्राप्तिमाह स्मरन्त इति द्वयेन

भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या ३१

उत्तमंश्रेयोज्ञातुमिच्छुः शाब्देब्रह्मणिवेदाख्येन्यायतोनिष्णातंतत्वज्ञं अन्यथासंशयनिरासकत्वायोगात् प
रेचब्रह्मण्यपरोक्षानुभवेननिष्णातं अन्यथाबोधसंचारायोगात् परब्रह्मनिष्णातत्वद्योतकमाह उपश
माश्रयमिति २१ गुरुरेवात्मादैवतंचयस्यसः अमाययानुवृत्त्यासेवयायैःधर्मैःतुष्येत आत्माआत्मप्रदश्चोपासका
नां यथाबालप्रभृतीनां २२ यथोचितमितिहीनेषुदयां समेषुमैत्रींउत्तमेषुप्रश्रयंचशिक्षेदित्यर्थः २३ शौ
चंबाह्यंमृज्जलादिभिः आभ्यंतरंचदंभमानादित्यागेन तपःस्वधर्माचरणंतितिक्षांक्षमां मौनंवृथावाचा।

तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तमं शाब्देपरेचनिष्णातंब्रह्मण्युपशमाश्रयं २१ तत्रभागव
तान्धर्मान्शिक्षेद्गुर्वात्मदैवतः अमाययानुवृत्त्यायैस्तुष्येदात्मात्मदोहरिः २२ सर्वतोम
नसोसंगमादौसंगंचसाधुषु दयांमैत्रींप्रश्रयंचभूतेष्वद्धायथोचितं २३ शौचंतपस्तितिक्षांच
मौनंस्वाध्यायमार्जवं ब्रह्मचर्यमहिंसांचसमत्वंद्वंद्वसंज्ञयोः २४ सर्वत्रात्मेश्वरान्वीक्षां
कैवल्यमनिकेततां विविक्तचीरवसनंसंतोषंयेनकेनचित् २५ ॐनमोनारायणाय

मनउच्चारणे स्वाध्यायंयथाधिकारानुरूपंवेदपाठादिकं आर्जवंसरलतां ब्रह्मचर्यंयथाश्रमयथोचितं ऋतौस्व
दारनियमादि अहिंसांभूतेष्वद्रोहंद्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोर्हर्षविषादराहित्यंसमत्वं
२४ सर्वत्रात्मेश्वरान्वीक्षांसच्चिद्रूपेणात्मनईक्षांनियन्तृरूपान्वीक्षांच कैवल्यमेकान्तशीलतां अनिकेततांगृ
हाद्यभिमानराहित्यंविविक्तचीरवसनंविजनपतितानांवस्त्रखंडानां शुद्धानांवावल्कलानांपरिधानं २५

श्री॰
भा॰ पं॰
११
१८

त्रिवर्णा त्रिगुणा माया श्रवणाभीनेराज्ञानेतन्निहृत्युपायश्रवणे स्वच्छंदयति किं भूय इति १६ एवमत्र केऽपि तस्त
न्निहृत्युपायमेव पृच्छति यथैतामिति यद्यपि तन्मायया नाश्रयभगवत्तमिति भक्तिस्तत्तारकत्वेनोक्तैव न
थापि किं भक्त्येव अन्योऽपि वा तत्रोपायोऽस्तीति सा तत्पुनः प्रश्नः अकृतात्मभिः अवशीकृतान्तःकरणैः स्थूलधि
यः स्थूलशरीरग्रहधीर्येषां ते १७ भक्तिव्यतिरेकेणानान्यस्तदुपाय इति अभिप्रेत्य भक्तिमेव ससाधनां निरूपय
ति तत्र प्रथमं वैराग्यहेतोरसुरूपसन्तिमाह चतुर्भिः कर्माणीति दुःखहत्यै दुःखशान्तिकारणाय पाकविपर्ये

एषा माया भगवतः सर्गस्थित्यन्तकारिणी त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि ॥ १६ ॥
राजोवाच ॥ यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः तरन्त्यञ्जः स्थूलधियो महर्ष इदमुच्यतां १७
प्रबुद्ध उवाच ॥ कर्माण्यारभमाणानां दुःखहत्यै सुखाय च पश्येत्पाकविपर्यासं मिथुनीचारि
णां नृणां १८ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना गृहापत्याप्तपशुभिः का प्रीतिः साधितै
श्चलैः १९ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितं सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनां २०

सं फलवैपरीत्यं मिथुनीचारिणां मिथुनीभूय प्रवर्तमानानां १८ कर्मभिः साधिता अपि वित्तादयो न सुख
हेतव इति च पश्येदित्याह नित्यार्तिदेनेति आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः आप्तादिभिश्च १९
एवं लोकं परमिति कर्मनिर्मितत्वान्नश्वरं तथा च श्रुतिः तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र
पुण्यजितो लोकः क्षीयत इति किं च वर्तमानसमयेऽपि दुःखश्रुतं पश्येदित्याह सतुल्यातिशयध्वंसं सतुल्य
त्वेनातिशयेन ध्वंसेन च वर्तमानं अतस्तुल्यस्पर्धा अतिशयेऽसूया ध्वंसालोचने भयादिकं चापरिहार्यमि

ततउपाधिलयाद्वैराजः पुरुषोऽव्यक्तंकारणंप्रविशति ननुब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृत
तात्मानः प्रविशंतिपरंपदमितिश्रुतेर्यावदधिकारमवस्थितिरधिकारिकाणामितिन्यायाच्चवैराजस्याभि
धेयस्यचब्रह्मणः परमभागवतत्वान्मोक्षएवसंगच्छतेननान्येषामिवकारणमात्रप्रवेशःसत्यं अस्यमेधाद्यैन
सत्यलोकंगतानामप्यभक्तानामाब्रह्मभुवनादित्यभक्तत्वेब्रह्मणोपिप्रकृतौलयः पुनरुत्पत्तिश्चेतिमोक्षदौ
र्लभ्यसूचनायैवमुक्तमित्यविरोधः यद्वाकेनापिप्रमाणेननव्यंजनतइत्यव्यक्तंब्रह्मैवतत्प्रवेशनंचमोक्षए
वोक्तइतिद्रष्टव्यं १२ एवंविराजोलयमुक्त्वातत्कारणानांमहदादीनांव्यस्तानांप्रातिलोम्येनलयमाह वा

ततोविराजमुत्सृज्यवैराजःपुरुषोनृप अव्यक्तंविशतेसूक्ष्मंनिरिंधनइवानलः १३ वायुनाहृतगं
धाभूःसलिलत्वायकल्पते सलिलंतद्धृतरसंज्योतिषिप्रविलीयते हृतरूपंतुतमसावायौज्यो
तिःप्रलीयते १४ हृतस्पर्शोवकाशेनवायुर्नभसिलीयते कालात्मनाहृतगुणंनभआत्मनि
लीयते १५ इंद्रियाणिमनोबुद्धिःसहवैकारिकैर्नृप प्रविशंतिह्यहंकारंस्वगुणैरहमात्मनि १६

युनेति वायोर्हिगंधहरत्वंप्रसिद्धंसोवर्तकेनवायुनाहृतगंधाअतएवगंधस्यभावतकत्वात्स
लिलत्वायकल्पतेसलिलेलीयतइत्यर्थः तद्धृतरसंतेनवायुनैवहृतोरसोयस्यतत् तमसारूपतिरस्का
रित्वंप्रसिद्धंसोवर्तकेनतमसा १४ अवकाशेनआकाशेनस्वकारणेनकालात्मनाशब्दस्यहिकालमए
वनाशःप्रसिद्धःतद्रूपेणात्मनाईश्वरेणआत्मनितामसाहंकारे १५ इंद्रियाणिबुद्धिश्चराजसाहंकारेमनोवै
कारिकैर्देवैःसहसात्विकाहंकारे एवंत्रिविधैःस्वगुणैःस्वकार्यैःसहितःअहंअहंकारःआत्मनिमहतिसच

नतु सर्वात्मकं चेद्इदं तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्वाद्ब्रह्मणोऽपि तत्प्रसंगः स्यादत आह ना॰
त्मेति आत्मा ब्रह्म न जजान न जातः जन्माभावादेव तदनंतरमस्तिताल्लक्षणोऽपि विकारो नास्ति नैधते न
वर्द्धते वृद्ध्यभावादेव विपरिणामोऽपि निरस्तः न क्षीयते हि यस्मात् व्यभिचारिणां आगमापायिनां बाल्ययुवा
दिदेहानां सवनवित् तत्तत्कालद्रष्टा न ह्यवस्थावतो द्रष्टा तदवस्थो भवतीत्यर्थः निरवस्थः कोऽसा॰

नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि
सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ३८

वात्मा अत आह उपलब्धिमात्रमिति नन्वायातेनं तद्दीक्षणिकत्वेनेत्याह सर्वत्रेति सर्वत्र देशे शश्वत्स
र्वदा अनपायि अनुवर्तमानं ननु नीलं ज्ञातं जातं पीतं ज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यापायित्वं प्रत
त्याह इंद्रियबलेनेति सदेकं ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकारग्रहणप्रकारेण जायते नश्य
तीव च भातीति भावः व्यभिचारिषु अव्यभिचारे दृष्टांतः प्राणो यथेति ३८

ननु तर्हि प्रमाणाविषयत्वान्नास्त्येव ब्रह्मेति प्रसज्यते तत्राह सत्वमिति सन् स्थूले कार्ये असत् सूक्ष्मे का-
रणे तत्सर्वं ब्रह्मैव भाति अतः यत् परमात्मनयोः सदसतोः परं कारणं कार्यं कारणाद्भिन्नं न भवति ननु कथ-
मेकं बहुविधस्य कारणं तत्राह उरुशक्तिः अनेकशक्तिमत् उरुमहती मायालक्षणा शक्तिर्यस्य तदिति वा
बहुधा भानमेव आदौ यदेकं ब्रह्म तदेव सत्वरजस्तम इति त्रिवृत्प्रधानं प्रवदंति ततः क्रियाशक्त्या सूत्रं ज्ञा-

सत्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवम् ज्ञा-
नक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ३७

नशक्त्या महानिति तदेव प्रवदंति ततः अहमिति जीवं जीवोपाधिमहंकारं च तदेव प्रवदंति ततश्च ज्ञा-
नक्रियार्थफलरूपतया ज्ञानशब्देन देवताः क्रियाशब्देन्द्रियाणि अर्थाः विषयाः फलं तत्प्रकाशः सुखा-
दि वा तद्रूपतया ब्रह्मैव भवति नहि सर्वरूपेणास्येताभासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति
भावः ३७ ॐ नमो भगवते वासुदेवाय नमो नमः ॥

यवैदीत्यनेनाविषयत्वेप्राप्तेनिषेधति नैतीदीति एतत्परंतत्वंमनोनविशतिनविषयीकरोतिवाग्(
तवागोपिशब्दश्चग्रात्माचदेहश्चप्राणाश्चक्रियाशक्त्यात्मप्राणोपि ग्रन्यानिचेंद्रियाणि यथानलेस्वाः
स्वांशभूताग्र्चिषोविस्फुलिंगादयः नप्रकाशयंतिनदहंतिच यथानुशासमनयादित्ननिषेभिव्या(
ज्यमानस्यात्मप्रकाशस्यचनतुहंतिप्रकाशस्यनचतत्प्रकाशविषयत्वं प्राणस्यप्राणमुतचक्षुष
श्चक्षुरुतश्रोत्रस्यश्रोत्रमन्नस्यान्नंमनसोयेमनोविदुरिति तथा यतोवाचोनिवर्त्ततेत्रप्राप्यमन
सासहेत्यादिश्रुतेः नतुतेवांपिनिषेधेप्रतुयपेक्षामीतिश्रुतेःशब्दोपाचरत्वप्रतीयतेनतत्राह शब्देपीति

नैतन्मनोविशतिवागुतचक्षुरात्माप्राणेंद्रियाणिचयथानलमर्चिषःस्वाः
शब्दोपिबोधकनिषेधतयात्ममूलमर्थोक्तमाहयदृतेननिषेधसिद्धिः ३६

शब्दोपिग्रात्ममूलंग्रात्मनिप्रमाणंसन्नर्थोक्तमर्थाउक्तंयथाभवतितथाहनसाक्षात्कुतःबोध
कोनिषेधतयाग्रस्यैवबोधकस्यनिषेधरूपत्वात् यतोवाचोनिवर्त्ततेत्रप्राप्यमनसासह यद्वाचाना
भ्युदितंयेनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धियन्मनोनमनुतेनचक्षुषापश्यतिकश्चनेत्यादिश्रुतेः
नतुतदिदंतयावादश्रुतिःकिमिदमुच्यते अर्थोक्तमाहेतितत्राह यदृतइति तथाह्यादेशोनेतिनेतिय्य
स्थूलमनणु यतोवाचोनिवर्त्तंते यद्वाचानाभ्युदितमित्यादिनिषेधस्ययत्त्रवधिभूतंब्रह्मस्मृतेवि

श्चनेदार भ्रमशीलयंतिततल्लीलाश्चभिनयंतीति एवंपरमेत्यप्राप्यनिर्वृताः संतस्तूष्णींभवंति ३२ उपरमंद
रोति इतीति ३३ भागवतधर्मोत्पन्नयाभक्त्यानारायणपरोमायांतरतीत्युक्तं श्रुत्वेति नारायणाभिधान
स्यतिनिष्ठांस्वरूपं पृच्छति अयंभावः ब्रह्मैवतत्त्वंनारायणइतिभगवानितिपरमात्मेतिचोच्यते तदुक्तं वदंतितत्त
त्त्वविदस्तत्त्वंयज्ज्ञानमद्वयं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यतइति तथानारायणोभगवानितिदि
दंविश्वमाविर्भूतंमायारूपगुणाःसर्वादावगुणःस्वतइत्यादिषुतत्रकिमेभिःशब्दैर्निर्विशेषंतदेवब्रह्म

क्वचिद्रुदंत्यच्युतचिंतयाक्वचिद्धसंतिनंदंतिवदंत्यलौकिकाः नृत्यंतिगायंत्यनुशीलयंत्य
जंभवंतितूष्णींपरमेत्यनिर्वृताः ॥३२॥ इतिभागवतान्धर्मान्शिक्षन्भक्त्यातदुत्थया नारायण
परोमायामंजस्तरतिदुस्तराम ॥३३॥ राजोवाच ॥ नारायणाभिधानस्यब्रह्मणःपरमात्मनः
निष्ठामर्हथनोवक्तुंयूयंहिब्रह्मवित्तमाः ॥३४॥ पिप्पलायनउवाच ॥ स्थित्युद्भवप्रलयहेतुर
हेतुरस्ययत्स्वप्नजागरसुषुप्तिषुसद्बहिश्च देहेंद्रियासुहृदयानिचरंतियेनसंजीवितानित
(दवेहिपरंनरेंद्र ३५ राम

उच्यते यत्त्वियाकोपिविशेषोस्तइति ३४ अत्रोत्तरंस्थित्युद्भवेति अ
यमर्थः अस्यविश्वस्यस्थित्युद्भवप्रलयानांहेतुःस्वयंचाहेतुःहेतुरहितःसनारायणइतिपरमेवतत्त्वम
वेहिस्वप्नजागरसुषुप्तिषुसत् अनुवर्तमानंयत् बहिश्चतदतीतंतुरीयंचसंततमिति वेहिश्रममाध्यादे
यत्सत्तद्ब्रह्मेतिपरमेवतत्त्वमवेहि देहेंद्रियप्राणमनांसियेनसंजीवितानिसंतिविचरंतिस्वस्वकार्येषुप्रवर्तं
ते तत्परमात्मेतिपरमेवतत्त्वमवेहि एवंलक्षणभेदैर्नारायणादिनामभिरुच्यमानमपिपरमेवतत्त्वंज्ञा

श्री॰
भा॰ ए॰
टी॰
२९

ननु यदि सुषुप्तौ कूटस्थात्मानुभवो भवेत्कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादि-
ति चेत् कदा तर्हि तन्निवर्तकोऽनुभवो भवेत् अत आह यर्हीति चित्तैषणाच्छिविदायै केवलमब्जनाभस्य
चरणैषणया उरुभक्त्या पुमान् चेतसो मलानि विधमेत् नाशयेत् चेत एव वा कर्तृस्वरूपाणि म-
लानि तथा भक्त्या क्षालयेत् तदा तस्मिन् विशुद्धे चेतसि मति साक्षाद्व्यवधानेनात्मतत्त्वमुपलभ्यते
अमलयोर्दृशोः सत्योर्यथा सूर्यमेव सिद्धः सवितृप्रकाश इति ४० भक्तेः कर्मयोगाधीनत्वात्तं पृच्छति

यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि ॥ तस्मिन्विशुद्ध उपलभ्य-
त आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः ॥ ४० ॥ राजोवाच ॥ कर्मयोगं वदत नः पुरुषो
येन संस्कृतः ॥ विधूयेहाशु कर्माणि नैष्कर्म्यं विंदते परं ॥ ४१ ॥ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरंति-
के ॥ नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां ॥ ४२ ॥ आविर्होत्र उवाच ॥ कर्माकर्मविकर्मेति वेद-
वादो न लौकिकः ॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ॥ ४३ ॥

कर्मयोगमिति नैष्कर्म्यं कर्मनिवृत्तिसाध्यं ज्ञानं ४१ प्रश्नांतरमाह एवमिति प्रश्नं पृष्टवानस्मि पितुः इक्ष्वाकोः
ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि नाब्रुवन् ४२ गहनत्वद्योतनाय प्रथमं द्वितीयप्रश्नस्योत्तरमाह कर्मे-
ति कर्म विहितं अकर्म तद्विपरीतं निषिद्धं विकर्म विगतं कर्म विहिताकरणं ईश्वरात्मत्वात् ईश्वरादुद्भूत-
त्वात् अपौरुषेयत्वादित्यर्थः एवं वाक्येऽपि वक्तुरभिप्रायतोऽर्थज्ञानं शक्यं अपौरुषेये न केवलं वाक्यपौर्वा-
पर्येणैव तात्पर्यावधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसोऽपि मुह्यंति किमुतान्ये अतस्तव न युक्तो बाल

२९

दृष्टांतं विहायान्विंद्रियादिलयेनापि निर्विकारात्मोपलब्धिं दर्शयति अंडेष्विति पेशिषु जरायुजेषु तरुषु उ
द्भिज्जेषु अविनिश्चितेषु स्वदेहजेषु उपधावति अनुवर्तते एवं दृष्टांतेन निर्विकारत्वं प्रदर्श्य दार्ष्टांतिकेपि
दर्शयति कथं तद्वदात्मा सविकारइव प्रतीयते यद्यदा जाग्रदिंद्रियगणाः यदा च स्वप्ने तत्संस्कारके ना
हंकारः यदा तु सुप्तं तदा तस्मिन्सुप्ते सन्ने इंद्रियगणे सन्ने लीने अहमि अहंकारे च सन्ने कूटस्थः निर्वि
कार एवात्मा ज्ञातः आशयमृते लिंगशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः नन्वहंका

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र सन्ने यदिंद्रियगणेऽह
मि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ३९ राम

रपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्यते तत्कथं तदा कूटस्थ आत्मा अत आह तदनुस्मृतिर्नः तस्य
विशेषस्तान शून्यस्य सावात्मनः सुषुप्तिसाक्षिणः स्मृतिरस्माकं भवति एतावंतं कालं सुखमहंस
मः न किंचिदवेदिषमिति अतो नानुभूतस्य स्मरणादस्त्येव सुषुप्तावात्मानुभवः विषयसंबंधाभावा
त्तु न स्पष्टज्ञानभावः तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो

श्री॰
भा॰ पु॰
टी॰
३

ननु यदवब्राह्मणेभ्यः [illegible]भ्यो वा विप्राः कुप्यंति [illegible] तत्राह ब्रह्मण्यानामित्यादिना किंच कोपजातो [illegible] चेतसां कथमभूत् कथं प्रादुरभूदित्यर्थः ८ अतः स एव शापनिमित्तस्याभावान्निमित्तांतरं पृच्छति यन्निमित्त इति एकात्मनामेकचित्तानां कथं भेदः कलहः ९ ईश्वरेच्छैवात्र निमित्तमिति परिहरति बिभ्रदिति सकलानां सुंदरवस्तूनां सन्निवेशो विन्यासविशेषो यस्मिंस्तत्तद्वपुर्बिभ्रत् तर्हि किमि

श्रीराजोवाच॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां॥ ८ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे॥ ९ श्रीशुक उवाच॥ बिभ्रद्वपुः सकलसुंदरसन्निवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः॥ आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः॥ १०॥

निर्वीर्य [illegible] कर्माचरन्न तत्किं कयापि कामनया न आप्तकामः तर्हि किमिति कर्माचरति धाम द्वारवत्याख्यं गृहमास्थाय रममाणः गृहे रममाणात्कर्मयोग्याह[illegible] इत्यर्थः [illegible] उदारकीर्तिः बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिविस्तारार्थमित्यर्थः एवं प्रवर्तमान एव कुलं संहर्तुमैच्छत तत्र हेतुः स्थितः कृत्यस्य भूभारहरणस्य शेषो यस्य सः १० राम

तोऽहं रम्यमन्यैः पात्यतां तत्राह नैवेति अन्यतः देवादिभ्योऽपि यादवकुलस्य परिभवस्तिरस्कारो न भवेत् कुतः म
त्तेभ्यः … श्रयत इति मत्तैश्वर्यं कुलं तस्य किंच नित्यं विभवोन्नद्धस्य विभवैर्गजतुरंगादिभिः उच्छृंखलस्य
यद्वा … मितिमदनेनोन्नद्धस्य … विभवोन्नद्धस्येति तस्मादेव करिष्यामीत्याह अंतः कलिमिति प्रांतिउ
पायेन … मिव वर्तमानं … प्रवर्तमानवह्नावुपेक्ष्यामि तदनंतरं धाम च वैकुंठाख्यमुपैष्यामीत्यर्थः ४ व्यवसि
तः … उपसंहृतवान् ५ तदेवमवतारप्रयोजनं संपाद्य स्वलोकं जिगमिषुराह श्लोकद्वयेन
स्वमूर्तीति लोकानां लावण्यस्य निर्मुक्तिः … त्यागाय … लोकेषु लावण्यं … तात्पर्यः यद्वा लोकेभ्यो।

नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यं अंतः कलिं यदुकुलस्य वि
धाय वेणुस्तंबस्य वह्निमिव शांतिमुपैमि धाम ४ एवं व्यवसितो राजन्सत्यसंकल्प ईश्वरः शापव्या
जेन विप्राणां संजह्रे स्वकुलं विभुः ५ स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां गीर्भिस्ताः स्मर
तां चित्तं पदैस्तानीक्षतां क्रियाः ६ आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ तमोऽनया तरिष्यंती

लावण्यस्य निर्मुक्तं दानेन यतः यत्संपर्केल्लोकाः लावण्यवंतो भवंतीत्यर्थः तया स्वमूर्त्या नृणां लोचनमाच्छिद्य आ
कृष्य ततोऽन्यस्य लोके न लोचनस्य प्रवृत्तेः तथा स्वगीर्भिस्ताः गिरः स्मरतां चित्तं आच्छिद्य तथा पदैस्तत्र तत्रां
कितैः तानि पदानीक्षतां सतां गमनादिकाः क्रिया आच्छिद्य तदानीं तन्नां सर्वेषां चक्षुरादि
हेतोः स्वकर्मनिष्ठाः … ६ किंच इतः परं जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां शोभनाः श्लोकाः स
श्लोकाः कवीनां यस्यां तां च कीर्तिं वितत्य … अनया कीर्त्या अंजसा सुखेनैव तु निश्चितं तमस्तरिष्यंतीत्य

भगवदवतारत्वद्योतकं परमोपशमं दर्शयितुमितिहासमाह इंद्रइति दशभिः धामस्थानं तपसाधक्ष्य
तीमिच्छतीति विशंक्य तत्तपोनाशाय कामं सपरिवारं प्रेषयामास स कामः वदरीभिरुपाख्यायतेऽभ्यः ते
तस्याश्रमे अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणास्त्रवर्षवाणास्त्रैः नतस्य महिमानं जानाती
ति यतन्महिम्नः ७ अक्रमेअपराधं अहो अहेऽथो इति विस्मयो गर्वः तद्धितः पूजमानान् शापभियाकं
पमानान् भोविभो मममथेदेवबधूः माभैष्ट वलिमातिथ्यं तानं प्रार्थयेयतेऽममस्माकंआश्रमेआतिः

इंद्रो विशंक्य ममधामजिहृक्षतीति कामं न्ययुंक्त सगणं सबदर्युपाख्यं गत्वाप्सरोगणवसंत
सुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञायशक्रकृतमक्रममादिदेवः प्राहप्र
हस्यगतविस्मयएजमानान् माभैष्टभोमदनमारुतदेवबधो गृह्णीतनोवलिमशून्यमिमं कु
रुध्वं ८ इत्थं ब्रुवत्यभयदेनरदेवदेवाः सव्रीडनम्रशिरसः सघृणं तमूचुः नैतद्विभोत्वयिपरेऽवि
कृतेविचित्रं स्वारामधीरनिकरानतपादपद्मे ९

यथाभावे शून्यप्रायः स्यादित्यर्थः ८ हे नरदेव
अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडनिनम्राणि शिरांसि येषां ते लज्जाभरेणो
वावनतशिरस्काइत्यर्थः सघृणं यथा भवति कृपां नयतेइत्यर्थः कृपाशुकंतमिति वामायातःप
रयतो विकृते स्वारामाश्चतेधीराश्चतेषां निकरैरानतं पादपद्मं यस्य तस्मिन् त्वयि परतत्त्वे भागवतं पा

ग्रस्यगुणकर्मोण्याह इयेन यत्काय इति यस्याधिष्ठेयः काय एषः काय इति समभीवा तनुभृतां म
ध्ये ह्यष्टिजीवानां ज्ञानकर्मप्रदानि यस्य स्वतः स्वरूपभूतात्सत्वात् तनुभृतां ज्ञानं यस्य स्वतः सिद्धं ज्ञा
नमिति वा यस्य श्वसनतः प्राणात् बलं देहशक्तिः ओजः इंद्रियशक्तिः ईहा क्रियाः यश्च सत्वादिभिर्वि
श्वस्थितिलयोद्भवे आदिकर्ता ४ आदिकर्तेत्यनेन तत्पूर्वकं कर्तृत्वमपि सूचितं तद्दर्शयितुं गुणाव
तारद्वारा चराचरसृष्ट्यादिकर्तृत्वमाह आदाविति यस्य त्वनुषंगः यस्य रजसा अस्य जगतः सर्गे का

यत्काय एष भुवनत्रयसन्निवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ज्ञानं स्वतः श्वसनतो
बलमोज ईहा सत्वादिभिः स्थितिलयोद्भव आदिकर्ता ४ आदावभूच्छतधृती रजसास्य सर्गे
विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिल-
याः सततं प्रजासु ५ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः
नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋषिवर्यनिषेवितांघ्रिः ६

येशतधृतिर्ब्रह्माभूत् स्थितौ च विष्णुः यस्य सत्वेनेति शेषः क्रतुपतिः तत्फलदाता द्विजानां वा तद्धर्माणां
च सेतुः पालक इत्यर्थः यस्य तमसा अस्याप्ययाय रुद्रोऽभूत् इत्येतैर्ब्रह्मादिभिर्निमित्तभूतैः प्रजासु
उद्भवादयो यतो भवंति स आद्यः पुरुष इत्यन्वयः ५ धर्मस्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारा-
यणो नर इति मूर्तिद्वयेन अजनिष्ट जातः तच्चरितमाह नैष्कर्म्यं आत्मस्वरूपं लक्ष्यते येन तत्कर्म कर्म-
निहारं रूपं वा उवाच नारदादिभ्यः स्वयं च चचार च योऽद्यापि कर्माचरन्नास्ते ऋषिवर्यैर्निषेविताङ्घ्रिर्यस्य

तमसमवलंबनायासादयः संदंति ग्रहहेतवः वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्पर्शाश्मस्यादिष्क तिमथुनत्वसिद्धमिव यः ॥ न केवलं शुष्कतालोत्तुभूता ॥ किंतु अजनशार्वयोश्च ॥ अतः स्वस्वसमर्पितयेव ॥ एवं यद्यपि नको चिदपिक स्यापि स्यातेषु अवस्थिदारूयेऽवन ॥ त्वमर्वांति नेऽपि वागादिभिर्भजतां प्रेमसंभाववेषु ॥ अहो कृपालुतानं वेत्यर्थः ॥ न तु क धमा वायाप्तादिप्रवर्तकोऽपमेश्वरत्वादावयोरिति वेत्त्वारः ॥ ४२ ॥ हे भगवन् भगवतस्तव श्रमेस्तनौ त्रिलोक्याः हे मायापालनायतापविरमायद्रः त्वमिति सम्मेरत्तुजितेषोऽत्मायवनतत्त्वकस्यापिपञ्चत्वत्यर्थः ॥ अत्रर हेतः ॥ येऽथ देव

संदंति वेत्तु भूतामनशार्वयोश्च स्वस्वमर्पणयापि भजतामसिभाववेषु ॥ ४२ ॥ मूर्त्तोऽस्मे भगवतो भगवंस्त्रि लोक्याः त्वमायतापविरमायचमस्तुजितेषे ॥ नानाविभर्षविततमसनंन्दयेऽथ दसहापुनश्चसमसिसवेसि वेयानाम्भिः ॥ ४३ ॥ तस्यावितः स्थिरचराशितरं ध्रिमूलयत्स्थन कर्मगुणकालरजः स्पृशांति ॥ यदेव सवे तिवितमेतिपजनाभेतानाध्यायं तिवेदहृदयामुनयस्तदास्य ॥ ४४ ॥ ॥ नारायण

समवितं ॥ यस्मात्त्वं मंस्यकूर्मादिलक्षणैः नानानेकप्रकारैर्विभर्षितहृत ॥ न केवलं पालनात्सिमात्रेन तवकिंत स्थिलयावृषियादसहृति ॥ नत्राप्यत्वनिरपेक्षतावदस्येतः ऊणेनाभिरिवेति ॥ ४३ ॥ यस्मादेवंभूतस्तंत्रसादवोध्रि मूलमजामीह ॥ तस्यावितःपालकस्यस्थावरजंगमानामीश्वरस्यभजामीतिरत्नोधलोकस्यानुषंगः कथंभूतस्य घ्रिमूलंयस्य अस्थितकर्मगुणकालानां रजोमलंअन्यं च मूढाक्तास्तापादयान स्पृशंति रुजइतिवापाठः ॥ यन्नो वेदाहृदयेयंतेवदनानयविदामुनयःपदेवस्तवंति निर्वाणमेतितनत्वामेयपवस्तवनादिकुर्वति ॥ ४४ ॥ ॥

नरनारायणाश्रमे उपासीत ॥ यावत्तत्र वर्षसहस्राणि तिष्ठाम्यां ॥ ३२ ॥ तेस्य वंक्रम्याणि नेवल्कलं चांबरं यपोस्तितो ॥ पवित्रपाणयो पि ग्रोस्तोवि
हितगुणानवर्ततव्यसितिवा ॥ त्रिवृद्वृदिः पवमाननमित्याद्यैन चत्वारिंशत् मिमेय ॥ ३४ ॥ वेदं चदर्भमुष्टिं किंच मालतानपवर्तीतत्रदे
तः ॥ तपनदेहरूपो दीप्यमान नदिगन्तकाशेयत्तिविगागावित्नेनद्रुपिणिम मूर्तिमतो ॥ ताहदृक्तेजसाप्रुक्तस्नृ निम्याततपोमयत्वेन
प्रकाशमानावितयथो ॥ पात्रुत्रंतो ॥ ३४ ॥ उच्चैर्महत्ताग्रादेशे ॥ ३५ ॥ तयोः संदर्शनेन यथानंदस्तेनन्निहृत्ताउपशान्ताश्र

तसिवेक्षुजनतस्थितितपः स्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥ ३२ ॥ तोत्सज्ञात्क्षसोन
वकेत्तलोचनोचत भुजोगौरवल्कलावृतौ ॥ पवित्रपाणिउपवीतकत्रिवृत्कमंडलुदंडप्रत्नंचवैणवे ॥ ३३ ॥
पद्माक्षमालामृतजनमानेनवेदसात्त्वानपपवद्रूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषाप्रांशूद्दधानौविबुधर्ष
भार्चितौ ॥ ३४ ॥ ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥ ३५ ॥ सतत्
संदर्शनानंदनिर्वृतात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ॥ ३६ ॥ उत्थायप्रांजलिः प्र
ह्वऔत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ ३७ ॥ तयोरासनमादाय पादयोरवनि
ज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ४० ॥ सुखमासनमासीनौ प्रसादाभिमुखौ मुनी ॥ पुनरा
नम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ४१ ॥ श्रीमार्कंडेय उवाच ॥ किं वर्णये तव विभो यदुदीरितोऽसुः संस्पंद
तेनमनुवाङ्मनइंद्रियाणि ॥

स्पंदतियाथयादेहेंद्रियमनांसि यथासः ॥ न सेहे नाशक्नोत ॥ ३६ ॥ आश्लिष
न्नालिंगयन्निव ॥ ३७ ॥ पादयोरवनिज्य पादोद्रव्यतालक्ष्यदेशोनार्वेणा ॥ ४० ॥ पादावानम्य गरिष्ठौ सज्जनेभ्यो नो श्रुति
श्रुतयो मिन न सं से व प्राणादिप्रवर्तकत्वादात्मन सन्त्वतावस्थानं अंपशण्त्वाह ॥ किमिति ॥ ४१ ॥ हे विभो नव त्वं
किमहं वर्णये कथं स्तौमि ॥ यद्येन त्वयैवोदीरितः प्रेरितो असुः प्राणः संस्पंदते ॥ ॥ ॥ रामाय

तदेवमसतं तेजोयः ॥ सोहं तवांघ्रिमुपगतः शरणं प्राप्तः नतिंद्रियपरतंत्रस्य एतदपि कुतस्तत्राह ॥ तच्चापीति हे ई
शाश्वतयोमिन ॥ तदंघ्र्युपागमनमसतां दुरापं यतस्ततो भवतोनुग्रह एवेत्यहं मन्ये अनुग्रहे सतीति वा ॥ ननु सतां से
वयैवं भवति किं मदनुग्रहेणेत्यत आह ॥ पुंस इति ॥ जीवस्य संसारस्यापवर्गः ॥ समाप्तिर्यदा तत्कृपया भवेत्
संभावनास्पदं भवति ॥ हे अब्जनाभ तदा सदुपासना संपद्यते ॥ तस्यैव त्वयि मतिर्भवेत् ॥ त्वत्कृपां विना सत्सेवा
नतरां त्वन्मतिः ॥ ततो नतरां मुक्तिरित्यर्थः ॥ पादयोः पतन ॥ प्रार्थयते नमइति ॥ २८ ॥ द्वयेन ॥ विज्ञानमे
वमात्रा मूर्तिर्यस्य तस्मै ॥ अत एव सर्वप्रत्ययहेतवे सर्वस्य ज्ञानकारणाय किंच पुरुषेश प्रधानाय पुरुषस्य

सोहं तवांघ्र्युपगतोस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणाप
वर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥ २८ ॥ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ॥ पुरुषे
शप्रधानाय ब्रह्मणेऽनंतशक्तये ॥ २९ ॥ नमस्ते वासुदेवाय सर्वभूतक्षयाय च ॥ हृषीकेश नमस्तु
भ्यं प्रपन्नं पाहि मां प्रभो ॥ ३० ॥ इति श्रीभागवते दशमस्कंधे श्रीकृष्णस्तवश्चत्वारिंशोध्यायः ॥ ४० ॥
श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः ॥ भूयः समाहरत्कृष्णो नटो नाट्यमि
वात्मनः ॥ १ ॥

येईशाः सत्त्वदुःखादिप्रापकाः कालकर्मस्वभावादयः तेषां प्रधानाय नियंत्रे
कुतो ब्रह्मणे परिपूर्णाय किंचानंतशक्तये अनंताः शक्तयो यस्य यद्वा अनंताख्या शक्तिर्यस्य तस्मै अथवा
प्रथाते पक्षांतरं तत्पवर्गैकः ईशः कालः एतत्त्रितयात्मने ब्रह्मणेवस्थितिच भगवान् श्रीकृष्णस्तस्यापादा
नमाधारः ॥ पुरुषः परः ॥ सत्तोभिव्यंजकः कालो ब्रह्मानंत नियतं महत् मिति ॥ सर्वभूतयदे तस्मै व मामिवंज
नोनित मस्तेइति ॥ २९ ॥ वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतानां क्षयाय आश्रयः अहंकारस्वरूपाणि नामा
श्रयः ॥ नमस्त्वाहंकाराधिष्ठात्रे संकर्षणाय इत्यर्थः हृषीकेशेति बुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरु

भगवतां पतये परब्रह्मणे॥ एवं स्तुत्वा वेधमोहं यापार्थयितुमाह॥२२॥ भगवन्निति अस्ति देहादौ अ
हं ममाग्रहो यस्य सः॥ मनु अहं देहो यस्य निवानकेवलमयं लोकः किं नहं मपितथैवेत्याह॥ अहं देहे॥२३
महं त्वमेव प्रकटयसि विपर्ययमतिरिति॥ अनित्ये कर्मफले नित्यमिति अनात्मनि देहे॥ आत्मेति दुः
खरूपे देहादौ सुखमिति विपरीतमतिरित्यर्थः॥ द्वंद्वे सुखदुःखादिद्वारमनेकीडनीतिनयासः नतु
नमस्ते नु तसिंहाय पूलोक भयापह॥ वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च॥१९॥ नमो
भगवणांपतये दृप्तक्षत्रवनच्छिदे नमस्ते रघुवर्याय रावणांतकराय च॥२०॥ नमस्ते वासुदे
वाय नमः संकर्षणाय च॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः॥२१॥ नमो बुद्धाय शु
द्धाय दैत्यदानवमोहिने॥ म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे॥२२॥ भगवन्जीवलो
कोयं मोहितस्तव मायया॥ अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु॥२३॥ अहं चात्मात्मजागा
रदारार्थस्वजनादिषु॥ भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया प्रभो॥२४॥ अनित्यानात्म
दुःखेषु विपर्ययमतिर्ह्यहं॥ द्वंद्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियं॥२५॥ यथाबुधो
जलं हित्वा प्रतिच्छन्नं तदुद्भवैः॥ अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः॥२६॥ नोत्सहे
ऽहं कृपणधीः काममकर्महतं मनः॥ रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः॥२७॥
दुः खिक्रूतोरतिस्तयाह॥ नमो विष्टस्तमसा व्याप्तः आत्मनः॥ प्रियं प्रेमास्पदं त्वां न जाने इत्यर्थः नथा
तदृष्टांतमाह॥ यथेति जलस्थाने जलोद्भवैस्तृणादिभिः प्रतिच्छन्नं जलं हित्वा॥ तथा मायाच्छन्नं त्वां मह्दं हित्वा पराङ्मु
खो देहादिषु भ्रमामीत्यर्थः॥ न केवलं ज्ञानतः कृतो विषयाभिमुखत्वात् नान्यथा इत्याह नोत्सहे इति॥२७॥ कृ
पणा विषयवासनायुक्ता धीर्यस्य सः अतः काममकर्मभ्यां हतं तत्तथाभिर्हितं हियेषु अवलिभिर्विष

श्री॰
भाग॰
द॰
९०

अग्निर्मुखमित्यादि द्वाभ्याम् ॥ अग्न्यादीनां तद्रूपेणावयवत्वं विधीयते ॥ योयमग्निः स त्वन्मुखमित्यादि वचन शब्दार्थस्त्वाणां चक्षुः अवयवेन्द्रियकर्मणां प्राण अबलं ततं ॥१३॥ अद्रयः परस्य ते अस्थिनखानि न केवल मेतावदेव सर्वोपि प्रपंचस्त्वदवयवभूत एवेति वदन्नेवं सत्यपि प्रपंचस्य विकारास्त्वयि न प्रसज्यन्ते तेन तस्य त्वयि कल्पितत्वादित्याह ॥ त्वयीति ॥१४॥ अव्ययात्मनि पुरुषे त्वयि लोकादयः संजिहते प्रवर्त्तन्ते ॥ हे अव्ययात्मन्निति वा कथंभूते त्वयि मनोमये मनः प्रधाने मनोवृत्तिव्यंग्ये इत्युपपत्तेन व्यया बुद्ध्या ममैवानुद्

अग्निर्मुखं तेवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ॥ द्यौः कं सुरेंद्रास्तव बाहवोर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितं ॥१३॥ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेद्रयः ॥ निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते ॥१४॥ त्वय्यव्ययात्मन्पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः ॥ यथा जले संजिहते जलौकसोप्युदुंबरे वा मशका मनोमये ॥१५॥ यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ॥ तैरामृष्टशुचो लोका मुदा गायंति ते यशः ॥१६॥ नमः कारणमत्स्याय प्रलयाब्धिचराय च ॥ हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥१७॥ अकूपाराय बृहते नमो मंदरधारिणे ॥ क्षित्युद्धारविहाराय नमः शूकरमूर्तये ॥१८॥

दृष्टान्तमित्यादि दृष्टान्तः जले यथा जलौकसः मत्स्यादयः उदुंबरे वा मशकाः परस्परबाधाबाधमिताः ॥ एवमनन्तानि ब्रह्माण्डानि त्वयि संचरन्तीत्यर्थः ॥ तस्मादेवंभूतेन त्वया स्वरूपं दुरवगाहमिति तत्स्वावतारकथामेव सन्तः सेवन्त इत्याह यानीति ॥१५॥ आमृष्टशुचः परिमार्जिता शुगपघाते यैस्तैः स्वयमप्यवतारान्नमस्यति ॥१६॥ हयशीर्ष्णे हयग्रीवाय मधुकैटभयोर्मृत्य

७२

९०

देसर्वदेवमयत्वेनेपरस्परदेवताविद्वेषेणाकुलदृष्ट्याकुलचित्ताः कथमेकमेवयजंतीत्युक्तंतत्राहयद्यप्यन्यधियइ
ति॥बुद्धिमात्रभेदोनवस्तुभेदइत्यर्थः॥नत्वात्मदैवपिमार्गोपन्नयेवप्रथ्यवत्सनीतिदृष्टांतमाहयथाद्रेति॥९॥अद्रेःसका
शात्सर्वतःप्रभवंतियानद्यः॥पुनःपर्जन्यापूरितास्ताः बहुस्रोतसः॥समुद्रं सर्वतः सिंधुमेवविशंतितद्वत्॥तथापि
नानागतयोमार्गाः॥अंततस्त्वामेवविशंतीत्युक्तमपदेनुमाह॥सत्वमिति॥१०॥भवतःशक्तिर्याप्रकृतिस्तस्याः
सत्वादयोगुणाः अतः प्राकृताः प्रकृतिकार्योपाधयः ब्रह्मपर्यंताः स्थावरादयोजीवाः॥इयापिहारानेप्रयस्तु
गुणात्मकाः प्रविष्टास्तेवप्राकृतोः॥प्रकृतौसाचत्वयीति अतःत्वमेवोपाधिलयात्सर्वेपित्वामेवप्रविशंतीतियद्वा
त्वामेवान्यैरिवोक्तेनमार्गेणाप्युपवदंपिणा॥वक्ष्याचार्यविभेदेनभगवंतमुपासते॥५॥सर्वेषप्रवयजंति
त्वांसर्वदेवमयेश्वरं येप्यन्यदेवताभक्तायद्यप्यन्यधियःप्रभो॥९॥यथाद्रिप्रभवानद्यःपर्जन्यापूरि
ताःप्रभो॥विशंतिसर्वतःसिंधुंतद्वत्त्वांगतयोंततः॥१०॥सत्वंरजस्तमइतिभवतःप्रकृतेर्गुणाः॥ते
षुहिप्राकृताःप्रोताआब्रह्मस्थावरादयः॥११॥तुभ्यंनमस्तेत्वविषक्तदृष्टयेसर्वात्मनेसर्वधियांचसा
क्षिणे॥गुणप्रवाहोयमविद्ययाकृतःप्रवर्ततेदेवनृतिर्यगात्मसु॥१२॥
भवतः॥प्रकृतेर्गुणेषुप्रोताब्रह्मादयोभवद्व्यतिरिक्तानभवंतिअतस्त्वमेवसर्वदेवमयइति॥ननुभवतःप्रकृ
तेविनिवदन॥ममापिप्रकृतिसंबंधंब्रवीषितेर्षाममचकोविशेषःस्यादित्याशंक्याविशेषमाहतुभ्यमिं
ति॥१२॥अविषक्तदृष्टये अविलग्नबुद्धयेकुतःसर्वात्मनेसव्यतिरिक्ताभावादविषक्तदृष्टित्वमित्यर्थः
किंचसर्वधियांसाक्षिणेसर्वबुद्धिसाक्षित्वान्नक्कापिबुद्धिलोपइत्यर्थः॥इतरेतुसंसरंतीत्याह॥गुणप्रवाहइदे
वनृतिर्यक्षु॥आत्मनोयेषांतेषुदेवादिशरीराभिमानिषुइत्यर्थः सर्वात्मनेइत्यनेनोक्तंसगुणरूपंत्वोति

१२॥नारायणनिरंकारायनमः॥रामश्रीनमो
नमः॥कृष्णायनमः

श्रीभा॰
स॰ टी॰
२

समस्यापि तिमिरभेदेन वैषम्येदृष्टांतः ॥ ज्योतिर्यथा काष्ठादिषु जलं च यथा पात्रेषु आकाशं च यथा घटादिषु तथा नाना उपाधिषु भाति न तु तत्त्वतः । किंच देहविवेकेन प्रतीयते न तत्राह संघातान्नरादिदेहान्न विविच्यते न पृथक्क्रियते न दृश्यते नापि भज्यतीति कुतो ज्ञायते इत्यत आह ॥ विदंतीति ॥ आत्मस्थं परमात्मानं कवयो निपुणाः ॥ मथित्वा कार्यदर्शिनो लिंगेन विचार्य ज्ञानेनेति ॥ अंततः सभावकर्मादिवाद निषेधेन विदंतीति पाठे त्वामेव पिता तत्सर्वं वपि ज्योतिरादिरिवेति दृष्टांतं ॥ यथा सूर्यकांतादौ दाहकत्वात् ज्योतिर्ज्ञायते ॥ यथा चरं यदर्शनादायुरित्यादि ॥ ९ ॥ तदेवं मायागुणावृतो ऽनेन देहेषु प्रत्यक्स्वभाविकर्मसंगं ॥ तर्हि गुणातीतः स्यादनीश्वरत्वमायातः ॥ यदा आत्मनो जीव स्वभावस्य गुणा व्यतिकरं गताः ॥ परः परमेश्वरः स्थित्यर्थं भवति ॥ तदा साम्येन स्थितेन रजः पृथक्सृजति ॥ विविधाः शक्तयः पुरुषेरिताः क्षोभिता इति ॥ संसृष्टा पृथक्सृजति ॥ शक्तिभिः

ज्योतिरादिरिवाभाति संघातान्न विविच्यते ॥ विदंत्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ ९ ॥ यदा ससर्ज तं परो रजः सृजत्येष पृथक्स्वमायया ॥ संवैव विद्याहरिरंहसेश्वरः शाष्यमाणान्प्रतिपाति सौ ॥ १० ॥ कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् ॥ य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ॥ तत्प्रत्यनीकानसुरान्सुरप्रियो रजस्तमस्कान्प्रमिणोत्युरुश्रवाः ॥ ११ ॥

संहरिष्यति ॥ तमः पृथग्गीरयतीत्यर्थः ॥ १० ॥ पदार्थस्य स्थितिनिर्देशात् ॥ अतीते कालपारं तं व्यवारयत ॥ प्रधानपुरुषयोरंतं प्रमर्पिवा अयति ॥ कालमिति हे नरदेव प्रधानपुंभ्यामिति निमित्ताभ्यां ॥ सत्यकृत् मोघकारीश्वरस्तयो ॥ सत्यकारी अनेनाभूतप्रभृतिं नवेन मान्येकालेन स्वयमेव सृजति ॥ स चेष्टारूपत्वात् कालस्य न तत्र आरंभ इत्यर्थः ॥ न चापि प्रवृत्तावेव माया नेत्याह ॥ य एष कालः समस्तमेधयति ... देवेभ्यो ... ईशितापीश्वरोऽपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयत्येव तमस्प्रतीक ... उरुश्रवाः कीर्तिर्यस्य सः कालशक्ति

वेतनापिवेपेणाकु

श्रीमन्नारायणस्य गुणान् व॥ अत्र ... त्यदीत्यर्थः ॥ तत्र संशयं ॥३॥ भागवतस्य भक्त्यादेः समाहात्म्यं ॥४॥ कृष्णाय व्या सपुत्र कृष्णसुनिते इत्यर्थः ॥५॥ यस्मात् प्रकृतेः परः ॥ अतो निर्गुणः अत एव अजः ॥ अत एव अव्यक्तः ॥ रागद्वेषा दिनिमित्तभूतदेहद्वयादिरहितः सोऽपि स्वमायागुणान् सत्त्वादिकमाविश्य ॥ अधिष्ठाय ॥ बाध्यानिति अस् रादीन्ति ॥ बाधकः सुरपक्षः यद्वा देवासुरादीनां यथा परस्परं बाध्यबाधकतां गतः ॥ प्राप्तः तत्रदेहतज्जी

इति नः सुमहाभाग नारायणगुणान् वद ॥ संशयः सुमहान् जातस्तद्भवांश्छेत्तुमर्हति ॥३॥ श्रीसूत उवाच ॥ साधु पृष्टं महाराज हरेश्चरितमद्भुतं ॥ यद्भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ गीयते परमं पुण्यमृषिभिर्नारदादिभिः ॥ नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ॥४॥ निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥५॥ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ न तेषां युगपद्राजन् ह्रास उल्लास एव वा ॥६॥ जयकाले तु सत्त्वस्य देवर्षीन् रजसासुरान् ॥ तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥७॥ ॥

तदर्थः ॥६॥ तत्र गुणानां सत्त्वादीनां वै प्राकृतत्वेऽपि विषमः स्यात् ॥ तत्र तदसत्त्वात् सत्त्वमिति तत्र से व्याख्यागुणाधिष्ठानेनापि पक्षपाते वैषम्यं स्यात् ॥ न तत्स्वकालकृतत्वादित्याह ॥ न तेषामिति सार्धेन उल्ला सो वृद्धिः ॥ सत्त्वस्य जयकाले देवादीन् ॥ ऋषींश्च अभजत ॥ तत्तद्देहं प्रविश्य एव वर्धयतीत्यर्थः ॥ रजसो जयका ले तमसो जयकाले इत्यन्वयः तत्स्वकालस्यानुगुणः सन् ॥८॥ ॥

अतोक्रूरातिविख्यात ॥ द्वादश ॥ अक्रूरसहितं स्त्रयोदशादर्शयति । आसंग इति ॥ ८ ॥ श्वफल्केरेकः ॥ विदूरथाद्या
अन्यश्चैव बहवः ॥ १० ॥ श्वफल्कयुधाजितोरिति पाठे आदिशब्देन विदूरथोपक्रमः ॥ तनयस्त्वभूत् विदूरथादासीदि
ति वक्ष्यमाणनिर्देशोपपत्तिः ॥ ११ ॥ कुकुरादयस्त्वन्धकस्य तनया इति ज्ञेयं ॥ तथा श्रीपराशरः कुकुरभज

आसंगः सारमेयश्च मृदुरो मृदुविर्गिरिः ॥ धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोरिमर्दनः ॥ १६ ॥ शत्रुघ्नो गं
धमादश्च प्रतिबाहुश्च द्वादश ॥ तेषां स्वसा सुचाराख्या द्वावक्रूरसुतावपि ॥ १७ ॥ देववानुपदेवश्च तथा
चित्ररथात्मजाः ॥ पृथुर्विदूरथाद्याश्च बहवो वृष्णिनंदनाः ॥ १८ ॥ कुकुरो भजमानश्च शुचिः कंबलब
र्हिषः ॥ कुकुरस्य सुतो वृष्णिर्विलोमा तनयस्ततः ॥ १९ ॥ कपोतरोमा तस्यानुः सखा यस्य च तुंबुरुः
अंधकोदुंदुभिस्तस्मादविद्योतः पुनर्वसुः ॥ २० ॥ तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ॥
देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ २१ ॥ देववानुपदेवश्च सुदेवो देववर्धनः ॥ तेषां स्वसारः
सप्तासन्धृतदेवादयो नृप ॥ २२ ॥ शांतिदेवोपदेवा च श्रीदेवा देवरक्षिता ॥ सहदेवा देवकी च वसु
देव उवाह ताः ॥ २३ ॥ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहुस्तथा ॥ राष्ट्रपालोथ सृष्टिश्च तुष्टि
मानौग्रसेनयः ॥ २४ ॥ कंसा कंसवती कंका शूरभू राष्ट्रपालिका ॥ उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥ २५ ॥

मानश्च शुचिः कंबलबर्हिषाख्यः ॥ तथा अंधकस्य पुत्रा इति ॥ १९ ॥ अतो रंधक ॥ अंधकात ॥ दुंदुभिरि[illegible]पित
हवनादव ज्ञेय ॥ २० ॥ धृतदेवा आदिर्यासां ॥ शांतिदेवादीनां षण्णां तानां ॥ सप्तमे उग्रसेनयः ॥ उग्रसेनस्य सुताः
२४ ॥ वसुदेवस्य येनुजा देवभागादयस्तेषां स्त्रियो भार्याः ॥ अंधकस्य सुतनानोच वर्णाप्रथमस्य कुकुरस्य वंश

ततो दशरथात् कुनिः पुराणांतरात् देवमाढ्यादिविशेषो द्रष्टव्यः ॥ ततः कुरुवशादनुः ॥५॥ अंशोः पुत्रः पुरुहोत्रः ॥६॥ महाभोज स्त्वेकं समसमारिषहे त्वार्य ॥७॥ ततज्ञ पदेशाभेदेन ये पंच वृष्ण्यादिसंख्याः पुरुषाः ते अमृतत्वं मोक्षं प्राप्ताः ॥१०॥ तस्य पुत्रा

क्रथस्य कुन्तिः पुत्रोऽभूद्वृष्णिस्तस्याथ निर्वृतिः ॥ ततो दशार्हो नामाभूत्तस्य व्योमः सुतस्ततः ॥३॥ जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः ॥ ततो नवरथः पुत्रो जातो दशरथस्ततः ॥४॥ करम्भिः शकुनेः पुत्रो देवरातस्तदात्मजः ॥ देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥५॥ पुरुहोत्रस्त्वनोः पुत्रस्तस्यांशुः सात्वतस्ततः ॥ भजमानो भजिर्दिव्यो वृष्णिर्देववृधोऽन्धकः ॥६॥ सात्वतस्य सुताः सप्त महाभोजश्च मारिष ॥ भजमानस्य निम्लोचिः किंकिणो धृष्टिरेव च ॥७॥ एकस्यामात्मजा पत्न्यामन्यस्यां च त्रयः सुताः ॥ शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥८॥ बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठंत्यमू ॥ यथैव शृणुमो दूरात्संपश्यामस्तथान्तिकात् ॥९॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्ट च ॥१०॥ येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ महाभोजोऽपि धर्मात्मा भोजा आसंस्तदन्वये ॥११॥ वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परंतप ॥ शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥१२॥ सत्राजितः प्रसेनश्च निम्नस्याथासतुः सुतौ ॥ अनमित्रसुतो योऽन्यः शिनिस्तस्य च सत्यकः ॥१३॥ युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ॥ युगंधरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः ॥१४॥ श्वफल्कश्चित्ररथश्चैव गांदिन्यां तु श्वफल्कतः ॥ अक्रूरप्रमुखा आसन्पुत्रा द्वादश विश्रुताः ॥१५॥

जितः शिनिरनमित्रश्च ॥१२॥ सात्यकिः सत्यकस्य पुत्रो युयुधानः तस्य कुणिः ततः कुणेर्युगंधरः अनमित्रस्यैवापरः वृष्णिर्नाम पुत्रः अक्रूरः प्रमुखो येषां द्वादशानां ते द्वादश विश्रुता बहुव्रीहिः ॥१५॥ ॥ ॥

भार्यायां स्वपादे वैकभार्यस्सवं ध्यापतिर्न्योमवसापुत्रम् ॥ तद्दयमेन पुत्र प्रदमभवदितिदर्शयन्नाह ॥ ज्या मघ्नमिति ॥ ३४ ॥ यदि मे सपत्नीस्यात् ॥ तर्हिलक्षयेयं पुत्रमेनापिताषिनन्वेत दत्तीत्याह ॥ असपत्नीचेति ३५ ॥ प्रतिभयव्याकुलस्त्वाह ॥ ३६ ॥ जनिष्यसीति ॥ भार्यामभयप्रकं पमानस्विन्नसर्वांगस्यराज्ञः ॥ प्रासमेक टमौलीनाम्यानकांपिता सेनसर्वं वहुकालमाराधिनाविश्वेदेवाःपितरश्च ॥ नयास्मिन्पतनमोदन ॥ ततश्च ज्यामघ्नमन्नप्रजोयान्या भार्याशैव्याापतिर्मयात ॥ नाविंदत्वत्तु भवनाझोज्यां कन्यामहार्षीत ॥ १७ ॥ स्नुषा ३४ ॥ यस्मात्तां निरीक्ष्याहशैव्यापतिममर्षिता ॥ कोयं कुहकमस्थाने रथमारोपितेति वै ॥ ३५ ॥ स्नुषा तवेत्यभिहिते स्मयंती पतिमब्रवीत् ॥ अहं वंध्यासपत्नी च स्नुषा मे युज्यते कथं ॥ ३६ ॥ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥ अन्वमोदंत तद्विश्वे देवाः पितर एव च ॥ ३७ ॥ शैव्या गर्भमधात्काले कु मारं सुषुवे शुभं ॥ स विदर्भ इति प्रोक्त उपयेमे स्नुषां सती ॥ ३८ ॥ इति भा व न म पंचदशो ध्यायः ॥ २३ ॥ शुक उवाच ॥ तस्यां विदर्भोजनयत्पुत्रौ नाम्ना कुशक्रथौ ॥ तृतीयं रोमपादं च विदर्भकुलनंदनं ॥ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ॥ उशि

॥ १ ॥ ॥ रामायनमः ॥

उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृपाः ॥ २ ॥ ता देवताप्रसादेन जननयिष्यसीति प्रतिवचनमुक्तं तस्मान्च निहन्न रजस्कापि शैव्या गर्भमधात् ॥ तेषां स्वचमहिमा पराशरादिभिः क्रमाः यथोक्तं ॥ भार्यावश्यास्तु ये केचिद्भविष्यंत्यथवा मृताः ॥ तेषां तु ज्यामघः श्रेष्ठः शैव्यापतिरभून्नृपः ॥ ३८ ॥ ३ च्छी वा दी का यां वम ये यो शो ज्यायः ॥ ४२ ॥ चतुर्विंशो विदर्भस्य पुत्रत्रयसमुद्भवाः ॥ वंशा नानामुखाः प्रोक्ता रामकृष्णोद्भवावधि ॥ १ ॥ चेयाद्योरमचोषाद्यः ॥ २ ॥ ॥

अवश्यं विप्रशोचितं येन तयावियं स्मरणेय मम ॥ अत्र पश्च हस्त्र षडिंद्रियविषयं भुंजे ॥२५॥ और्वस्येन जमास्य वारे
णा पस्य हतं मित्र यः ॥२६॥ तेषां तालजंघानां श्रेष्ठः ॥ तस्य मधोः पुत्रशतं ह्यासीत् वृष्णिज्येष्ठाय यस्मिन ॥ यतो मधोर्वृष्णे
यं दाशार्हेता ॥२८॥ वंशं दृश्यमहात्मानो नित्यं तत्तानि श्रेष्ठानि यस्यमः ॥ तानि च मार्कंडेय पुराणे वर्णितानि ॥ या
अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरो भवत् ॥ दत्तात्रेयाद्धैहयेशात्प्राप्तयोगमहायशाः ॥२३॥ ननूनं का
र्तवीर्यस्य गतिं यास्यंति पार्थिवाः ॥ यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥२४॥ पंचाशीतिसहस्रा
ण्यव्याहतबलः समाः ॥ अकरोदर्जुनो राज्यं हरिर्वैवान्वहं स्मरन् ॥ अनष्टवित्तस्मरणो बु
भुजेऽक्षय्यषड्वसु ॥२५॥ तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे ॥ जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥
२६ ॥ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् ॥ तत्रैव तालजंघाख्यमौर्वतेजोपसंहृताः ॥२७॥ तेषां
ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ॥ तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलं ॥२८॥ माधवा
वृष्णयो राजन्यादवाश्चेति संज्ञिताः ॥ यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥२९॥ स्वाहितोतो
रुशेकुर्वै तस्य चित्ररथस्ततः ॥ शशबिंदुर्महायोगी महाभागो महानभूत् ॥३०॥ चतुर्दशमहार
त्नश्चक्रवर्त्यपराजितः ॥ तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥३१॥ दशलक्षसहस्राणि पु
त्राणां तास्वजीजनत् ॥ तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ॥३२॥ धर्मो नामोशना तस्य हय
मेधशतस्य याट् ॥ तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु ॥ पुरुजिद्रुक्मरुक्मेषु पृथुज्या
गजवाजिरथस्त्रीषु निधिमाल्यांबरद्रुमाः ॥ शाल्विपाशामणिकं चैव विमानानि चतुर्दश ॥ नि दशानां पत्नी
सहस्राणां भार्याणां तस्य प्रत्येकं लक्षं लक्षमितं वै तासु पुत्राणां दशलक्षसहस्राणि जनयामास ॥ पृथु
श्रवाः पृथुकीर्तिः पृथुयशाः इत्यादयः ॥ षट्प्रधाना नाः श्रेष्ठाः येषां तेषां मध्ये पंचात्मजाः आसन् ॥ ता

शौचेयेन यस्य पादरजसः क्षालनोदकेन गङ्गा नद्यपि तेन श्लोकः पुण्यकीर्तिरीहः॥ एवं तं भक्तानां च या
गतिं तां च लेभे॥ ११॥ अधुना नृप विज्ञयेनः पादिशङ्किः स्वः स्वर्याताः॥ आत्मनः प्रार्थ्यमानो नमस्करोति अ
नः परमन्यत्कृपयानास्तीति मत्वा बहुधा संबोधयति॥ आदौ नाव यदु च काय दुस्तरेति॥ यदुचक्रद्रुहं कं
सः नेहत्वा सुहृत्प्रियं वितरिष्येदास्यामि॥ रामकृष्णावानीनाविति॥ स्वकृतं कर्मावेद्य समर्प्यति गोपैः प
रिवारितः प्राविशत॥ यां तत्र हर्म्यपुरीमनुवर्णयति चतुर्भिर्ददर्शतामिति॥ १२॥ स्फाटिकानि तुंगा

पुनीहि पादरजसा गृहान्नो गृहमेधिनां यच्छौचेनानुतृप्यन्ति पितरः साग्नयः सुराः॥ १३॥ अ
वनिज्यांघ्रियुगलमासीच्छ्लोक्यो बलिर्महान्॥ ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या॥ १४॥
आपस्तेंघ्र्यवनेजन्यस्त्रींल्लोकान्शुचयोपुनन्॥ शिरसाधारयच्छर्वः स्वर्याताः सगरात्मजाः॥ १५
देवदेव जगन्नाथ पुण्यश्रवणकीर्तन॥ यदूत्तमोत्तमश्लोक नारायण नमोस्तु ते॥ १६॥ श्री
भगवानुवाच॥ आयास्ये भवतो गेहमहमार्यसमन्वितः॥ यदुचक्रद्रुहं हत्वा वितरिष्ये सु
हृत्प्रियं॥ १७॥ श्रीशुक उवाच॥ एवमुक्तो भगवता सोक्रूरो विमना इव॥ पुरीं प्रविष्टः कं
साय कर्मावेद्य गृहं ययौ॥ १८॥ अथापराह्णे भगवान्कृष्णः संकर्षणान्वितः॥ मथुरां प्राविश
द्गोपैर्दिदृक्षुः परिवारितः॥ ददर्श तां स्फाटिकतुंगगोपुरीं ताम्रारकोष्ठां परिखादुरास

तिरोपुराणि पुरद्वाराणि अन्यानि च द्वाराणि यस्यास्तां ताम्रं च आरश्च॥ आरकूटं तन्मयाः कोष्ठा धान्या
गारागाराः शालादयो वा यस्यास्तां परिखाः परितः खातगर्ताः ताभिर्दुरासदां दुर्गमां उद्यानानि वना
नि तै रूपशोभितां॥ सौवर्णाः शृंगाटकहर्म्यनिष्कुटानेः श्रेणीसभाभिरुपवेशस्याने॥ भवनैरदै
आरकूटरूपपक्कजामलकृतां अमलाः स्फाटिकाः रजितैः मरकतानां वैदूर्यादिभिर्वेष्टितवलभ्या

पककारिंषाकेदृत्वजनकंपविषान्गुरी॥ ततोवरानदानुष्टः सुदामोवायकस्यच॥ सशंकमक्रूरमनः प्रमोघस्तथामसंदर्शनमक्षपातः स्वराजधानीमथुरामपश्यपदलोकृतानंतुमतोत्सवाद्यां॥ ४॥ भूमौवियति जलेवायावेसमंकृतालिनानितुष्यवंसंति॥ तचताविपश्यतोमेकिमङ्गनदृष्टमपितुसर्वदृष्टमित्यर्थः ननुमत्वामेः पूर्वमेवविस्मितमुखालासितोसि यतोभूमौ विद्यतिवाजलेकिमेश्रद्भुतंवदेत्याह॥ ५॥ यत्रासोपिचानर्हितंवीक्ष्यजलाद्रुन्मज्ज्य सत्वरः॥ कृत्वाचावश्यकंसर्वंविस्मितोरथमागमत्॥ ३॥ तमपृच्छद्धृषीकेशः किंतेदृष्टमिवाद्भुतम्॥ भूमौवियतितोयेवा तथात्वालक्षयामहे॥ ३॥ अक्रूरउवाच॥ अद्भुतानीहयावंतिभूमौवियतिवाजले॥ त्वयिविश्वात्मकेतानिकिंमेदृष्टंविपश्यतः॥ ४॥ यत्राद्भुतानिसर्वाणिभूमौवियतिवाजले॥ तंत्वानुपश्यतोब्रह्मन्किंमेदृष्टमिहाद्भुतम्॥ ५॥ श्रीशुकउवाच॥ इत्युक्त्वाचोदयामासस्यंदनंगांदिनीसुतः॥ मथुरामनयद्रामंकृष्णंचैवदिनात्यये॥ ६॥ मार्गेग्रामजनाराजंस्तत्रतत्रोपसंगताः॥ वसुदेवसुतौवीक्ष्यप्रीतादृष्टिंनचाददुः॥ ७॥ तावद्व्रजौकसः सर्वेनंदगोपादयोग्रतः॥ पुरोपवनमासाद्य प्रतीक्षंतोवतस्थिरे॥ ८॥ तान्समेत्याहभगवानक्रूरंजगदीश्वरः॥ गृहीत्वापाणिनापाणिंप्रश्रितंप्रहसन्निव॥ ९॥ भवान्प्रविशतामग्रेसहयानः पुरींगृहं॥ वयंत्विहावमुच्याथततोद्रक्ष्यामहेपुरीम्॥

द्भुतानीति॥ यत्रत्वयिसर्वाण्यद्भुतानितंत्वामिहपश्यतोमेअन्यत्रभूम्यादौ किमद्भुतंदृष्टंत्वांविनानत्रकिंचिदद्भुतमित्यर्थः ब्रह्मन्निति परमेश्वरेत्यर्थः॥ ब्रह्मेतिवापाठः॥ गांदिनीसुतोक्रूरः दृष्टिंनाददुः पश्यंतएवस्थितास्त्वर्थः॥ ग्रामकुलाग्रामनंप्रतीक्षमाणाः स्थिताः॥ ८॥ प्रश्रितंविनीतं॥ ९॥ सहरहुचविशातता॥ अथवमुच्यामोचयित्वाग्रामायेत्यर्थः॥ १२॥

पा२

भा. टी. ५०

विभूत्यादिकं च तत्राधिकमित्याह ॥ अथो अविद्यानिवृत्त्यनंतरं विभूतं समस्तलोकादिगतं भोगसंप
त्तिमणिमाद्यष्टांगमैश्वर्यं मनुप्रवृत्तं भक्तिमनुसरत एव प्राप्तमपि भागवतीं च श्रियं वैकुंठस्थां संप
त्तिं अस्पृहयंति ॥ न स्पृहयंतीत्यर्थः ॥ तथापि तत्र मे लोके वैकुंठे अश्नुवते प्राप्नुवंत्येव ॥ ३७ ॥ नन्वेवं तर्
हि लोकत्वाविशेषात्स्वर्गादिवत् तद्भोग्यानां कदाचिद्विनाशः स्यात् ॥ नेत्याह ॥ हे शांतरूपे ॥ यद्वा शांते
शुद्धसत्वे न रूपे वैकुंठे मत्पराः कदाचिदपि न नंक्ष्यंति भोगहीना न भवंति ॥ अनिमिषो मे हेतिः मदीयं
कालचक्रं च तान्न लेढि तान्न ग्रसति ॥ न ग्रहेत ॥ येषामिति ॥ सततस्नेहविषयः सखेव विश्वासास्पदं (?)

अथो विभूतिं मम मायिनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं ॥ श्रियं भागवतीं वास्पृहयंति भद्रां प
रस्य मे तेऽश्नुवते तु लोके ॥ ३७ ॥ न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मेऽनिमिषो लेढि हेतिः
येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं ॥ ३८ ॥ इमं लोकं तथैवामुमात्मानमुभ
यायिनं आत्मानमनु ये चेह ये रायः पशवो गृहाः ॥ ३९ ॥ विसृज्य सर्वानन्यांश्च मामेवं विश्वतो
मुखं भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥ ४० ॥ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात्
आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥ ४१ ॥ मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात्
वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ४२

हृदि वोपदेष्टा सुहृद्दिवहितकारी ॥ इष्टं दैवमिव पूज्यः एवं सर्वभावेन मां ये भजंति तान्मदीयं काल
चक्रं न ग्रसतीत्यर्थः ॥ ३८ ॥ एवंभूतानां भक्तिं एकांतभक्तेभ्यो ददामीत्याह ॥ इममिति द्वाभ्यां ॥ उभयायि
नं लोकद्वयगामिनं आत्मानं सोपाधिकं ॥ आत्मानमनु ये पुत्रकलत्रादयः ये च पश्वादयो रायः धना
नि ॥ अनन्याश्चव्यवहिताद् ॥ मृत्योः संसारात् ॥ अतिपारये ॥ अतितारयामि ॥ ४० ॥ अभक्तानां तु न कथंचि
दपि मोक्ष इत्याह ॥ नेति ॥ मद्भगवतोऽन्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः भगवद्वा विशेष
णत्रयेण सामर्थ्यं निरपेक्षत्वं हितकारित्वं चोक्तं ॥ वेपथुं (?) स्फुरयति ॥ ४१ ॥ मद्भयादिति ॥ श्रुतिश्च भी

कार्यविवयं विना भक्तिरिति दृष्टात्तमां भक्तिं लक्षयति ॥ गुणा विषयाः लिंग्यंते ज्ञायंते यैस्तेषां देवानां
यो नेत्रात्मकानामिंद्रियाणां तदधिष्ठातृणां वा सत्वे सत्वमूर्त्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेर
पि गरीयसी तत्रेणान्वयः ॥३२॥ कथं भूतानुनिमित्ता निष्कामा स्वाभाविकी अप्रयत्नसिद्धा ॥ तेषामे
वं विधवृत्तौ हेतुमाह ॥ गुरोरुक्ताचरणमनुश्रवणं तेन उक्तमनुश्रवो वेदस्तद्विहितमानुश्रविकं तद्देवकर्म्म ये
षां तत्कर्मैकरूपमविकृतं तन्मनो यस्य तु सः पुरुषस्तस्यैव ॥ मुक्तिस्तु या संसारकी भवस्मेवत्याह
या भक्तिः कोशं लिंगशरीरं जरयति दहयति स्वप्रयत्नं विनैव सिद्धो दृष्टान्तः निगीर्णं भुक्तमन्नमन
लो जाठर ॥ श्रीभगवानुवाच ॥ देवानां गुणलिंगानामानुश्रविककर्म्मणां ॥ सत्व एवैकमनसो वृ
त्तिः स्वाभाविकी तु या ॥३२॥ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥ जरयत्याशु या कोशं नि
गीर्णमनलो यथा ॥३३॥ नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः ॥ येन्योन्यतो
भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ॥३४॥ पश्यंति ते मे रुचिराण्यंब संतः प्रसन्नव
क्त्रारुणलोचनानि ॥ रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ॥३५॥ तैर्दर्शनीया
वयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गति
रोपयानरयतीति ॥३६॥ भक्तेर्गरिष्ठत्वमेवोपपादयति ॥ नैकात्मतामिति पंचभिः एकात्मतां सायु
ज्यमोक्षं मदीहा मत्सेवा क्रिया येषां प्रसज्यासक्तिं कृत्वा पौरुषाणि वीर्याणि ॥३४॥ प्रसन्नानि वक्त्राणि अरु
णानि लोचनानि येषु तैर्मे रूपैः साकं सह नित्यं परमेश्वरस्तु भवत्सर्वभक्तावयिक मितिभावः ॥३५
प्रात्मानं दर्शनीयावयवा भावी त्याहेतेरितिट शनीयामनोहरा ॥ अवयवाः मुखनेत्रादयो येषु तैः हृता
त्मापवित्ते येषां ॥ हृता आकृष्टाः प्राणा इंद्रियाणि च येषां तानात्मजनो निष्कृत तदिच्छाहीनानपि अण्वी
गतिं मुक्तिं प्रापयति ॥ कैः साधनैर्हेतुभिः उदारैः विलासादिभिः तत्र विलासो लीलावामे मः

श्री०
भा० द०
पू०
२०५

हेमैमयस्यानांचोदर्शनेन ग्रथममसंजाते दिष्टाभ्रंशमाधवः मथोर्वंशजः योधनुर्मखच्छग्रामं देशोयस्य यदर्थं वा
एतानादिभिर्वीनतनार्थं ॥ अथ स्वकुलस्यसजनमकुलजनम ॥ श्रानकदुंदुभेः सकाशात् ॥ विजितस्तु विशोषेणा०
ज्ञापयामास नुः ॥ १० ॥ सोपि नंदः गोपान्समादिशत् मस्सज्ञामित्यादिना ॥ गोरसः क्षीरादिः उपायना
तु ननमवस्तु निरसात्व स्नुताद्दीन् ॥ शाद्वलेनैवसृतचयति ॥ अपि किंतस्यस्योरास्य विकि स्मार्थ रसान्दा
दिष्टाद्यदर्शनेस्तानाम यवः मोम्यकांतिन ॥ सज्ञानं वर्णतानाव जवागमनकारणं ॥ श्रीशुकः ॥
दृष्टाभगवतासर्ववर्तीयामामसमाधवः ॥ वेदानुवर्षं यदुभवसहदेववथोद्यमे ॥ ८ ॥ यस्तदेशेय
इर्थंवाहनं संप्रेषितः स्वयं ॥ यदुकेनारदनास्यस्तजन्मानकदुंदुभेः ॥ ९ ॥ आनाहूय वचः कृ०
लावनस्य परवीरहा ॥ अहस्यनंदपितरं राज्ञादिष्टं विनिस्तनुः ॥ १० ॥ गोपान्समादिशन्सोपि गर
सानांसर्वगोरसः ॥ उपायनानि गर स्त्रीध गृह्य सांपाचनानि च ॥ ११ ॥ यास्याम सांप्रधगुणीरस्या०
मान्तूपनेरसात् ॥ इस्ताम सममरनवंयाति जानपदाः किल ॥ १२ ॥ एवमाघोषयन्क्षत्रानंदगो०
ते ॥ १४ ॥ काश्चिन्मल्लेन हतमापयविस्लानत सुवाश्रियः ॥ समडकुलवलयकेशग्रथ्य स्रकाश्च न १५
स्यामइति ॥ १६ ॥ तदाब्रजरखाधिकृतेनेनश्राद्धोपयत्सर्वं लोद्योषितवान् ॥ १७ ॥ कृत्स्नेकजीवनास्ताः नमद्दा
कृत्समाता नमयपमृत्येतियथा लिमान्यारूपं च मिः काश्चिदिति ॥ १८ ॥ नेनश्रवणेन हृतायो हृतायस्त
नस्तोमः नेनसत्ता नामु स्वस्त्रीयोसानाः बभूवुरिति ॥ दुकूलानि च वलयानि च केशपाशग्रथ्य स्रस्तसं
नः दुकूलादयायासानाः ॥ नष्टाभूताः ॥ काश्चन बभूवुरिति ॥ १५ ॥ तत्स्य श्रीकृष्णस्य स्यानुध्याने नरनिवृ
तायशेषाः ॥ चलनादिहनयायासानाः ॥ इमंलोकदेहमपि नसानं निस्मनुस्कार इवेति ॥ १६ ॥

प०

१०५

५

निरनुग्रहतामाह ॥ योवधीदिति ॥ ४१ ॥ तोकान् तोकानितस्य कंसस्य प्रजानां देशकुरवयेषां जीवनमात्रमपि
दुर्लभं तेषां वः किंनु कुशलं विचारयामेति ॥ मधुरया वाचा सत्कृतः तयैव वाचा परिपृष्टेन प्रश्नेन अध्वप
रिश्रमं संसारपरिश्रमं ॥ ४३ ॥ इति श्रीदशमे भावार्थदीपिकायां अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ नवत्रिंशे पुरींग
न्तुं स्वाच्युते गोपिकोत्कयं ॥ अक्रूरेणाथ कालिंद्यां विश्वलोकस्य दर्शनम् ॥ भक्तानां मनोरथाः सत्या भवं
तीति दर्शयन्नाह ॥ सुखोपविष्ट इति ॥ कृष्णरामाभ्यामधिकं मानितः ॥ हे तात सौम्य स्वागतं तयथाभव

योवधीत्स्वस्वसुस्तोकान्क्रोशंत्यादीनदीनवत् ॥ किंनुस्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥ ४२ ॥
इत्थं सूनृतया वाचा नंदेन सुसभाजितः ॥ अक्रूरः परिपृष्टेन जहावध्वपरिश्रमं ॥ ४३ ॥ इ
ति श्रीभागवते दशमस्कंधे अक्रूरागमनं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ श्रीशुक उवाच ॥ सुखोपविष्टः
पर्यंके रामकृष्णोरुमानितः ॥ लेभे मनोरथान्सर्वान्पथि यान्स चकार ह ॥ १ ॥ किमलभ्यं भ
गवति प्रसन्ने श्रीनिकेतने ॥ तथापि तत्परा राजन्न हि वांछंति किंचन ॥ २ ॥ सायंतनाशनं कृत्वा भ
गवान्देवकीसुतः ॥ सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥ ३ ॥ श्रीभगवानुवाच ॥
तात सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः ॥ अपि स्वज्ञातिबंधूनामनमीवमनामयं ॥ ४ ॥ किं
नु नः कुशलं पृच्छे एधमाने कुलामये ॥ कंसे मातुलनाम्नांग स्वानां नस्तत्प्रजासु च ॥ ५ ॥ अ
हो अस्मदभूद्भूरि पित्रोर्वृजिनमार्ययोः ॥ यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ॥ ६ ॥

नित्यागतः स्वज्ञातिबंधूनां सुहृदः ज्ञातयः सपिंडाः संबंधिनः तेषामपि किमनमीवमपापमङ्गलव
मिति यावत् ॥ अनामयं ॥ आरोग्यं ॥ एवं प्रश्नोपि नास्ति संगत इत्याह ॥ ५ ॥ किंनु इति ॥ अंग हे अक्रूर एधमाने
वर्धमाने कुलस्यामये रोगे मातुल इति यस्य तस्मिन् ॥ नः स्वानां ज्ञातीनां तस्य प्रजासु च अ
हो अस्मदस्मत्तो निमित्तात् वृजिनं दुःखं आर्ययोर्निरपराधयोः यद्धेतोः योहमेव हेतुस्तस्मात् ॥ ६ ॥

श्री८
कि५

चतुस्त्रिंशेऽहिना ग्रस्तं नंदं विरमोचयत् ॥ विद्याध्रं चांगिरःशापाद्वृश्चं शंखचूडेन यावधीत् ॥ रासोपदेशा
नः कामं किंकरीकृत्य कामतः ॥ अनुगत्य न शांतिस्तेय यथा विद्याधरापि च ॥ १ ॥ तदेव मानुग्रहं सुखेनका
म विजेयं प्रतिपादयते येव विद्याधराधिप विजयं प्रतिपादयितुं तस्य संगं प्रदर्शयति ॥ एकदेति ॥ गावः
गाः मधुमधुरं मधु अन्नं मधुना सहितं अन्नं ॥ १ ॥ जलमात्रं प्राश्य धृतव्रताः उपोषिताः स्नानि शा न ऊषुः

श्रीशुक उवाच ॥ एकदा देवयात्रायां गोपाला जातकौतुकाः ॥ अनोभिरनडुद्युक्तैः प्रययुस्ते
ऽंबिकावनम् ॥ १ ॥ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं प्रभुम् ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपते
ऽंबिकां ॥ २ ॥ गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीय
तामिति ॥ ३ ॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ॥ रजनीं तां महाभागा नंदसुनंदका
दयः ॥ ४ ॥ कश्चिन्महानहिस्तस्मिन्विपिनेऽतिबुभुक्षितः ॥ यदृच्छयागतो नंदं शयानमुर
गोऽग्रसीत् ॥ ५ ॥ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयं ॥ सर्पो मां ग्रसते तात प्रपन्नं परि
मोचय ॥ ६ ॥ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः ॥ ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं वि
व्यधुरुल्मुकैः ॥ ७ ॥ अलातैर्दह्यमानोऽपि नामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाभ्येत्य भगवान्सा
त्वतां पतिः ॥ ८ ॥ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्पवपुर्हित्वा रूपं विद्याध
रार्चितं ॥ ९ ॥ तमपृच्छद्धृषीकेशः प्रणतं समवस्थितं ॥ दीप्यमानेन वपुषा पुरुषं हेममा
लिनं ॥ १० ॥ को भवान्परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितो
ऽवशः ॥ ११ ॥ महानहिः उरगः उरसा गच्छतीति अलिखितनवमूलं ग्रथसीद्ग्रास ॥ ५ ॥ विव्यधुः ताड
यामासुः ॥ उल्मुकैर्ज्वलत्काष्टैः अलातैस्तैरेव ॥ ७ ॥ विद्याधरैरर्चितं ॥ ९ ॥ गोपेषु पश्यत्स्वेव स्व
यं प्रकाशप्रकाशयितुमविद्यानिवर्तनमपृच्छद्दीप्यमानेन वपुषा समवस्थितं ॥ १० ॥ परया लक्ष्म्या शो

टी॰ ॥ २२ ॥

भागवतदशम ॥ २२

श्री॰ भा॰ द॰ प॰ ८१

प्राह सम्मुपदर्शितवानस्मि ॥ प्रलब्धेरूपदर्शितैः मदीयेनैव पापेन निमित्तेन ॥ १० ॥ यद्यतः आपृच्छे
स्वलोकं गन्तुमन्वज्ञां याचे ॥ अमी वदन्तु खिन्ना प्राज्ञ ॥ अद्दिदेवं नित्यमेव मां गन्तुं समस्तदर्शनम् ॥ ने
हंतुं मा दिनकृत्सः प्राग्वच्चूडमताडयत ॥ तत्संगमाद्धि कदाचिदिति ॥ ११ ॥ विरजस्तोऽब्रवीद्यः

समेऽउवाच ॥ अहं विद्याधरः कश्चित्त्वद्दर्शनतुष्टितस्ततः श्रिया स्वरूपसंपन्नो विमानेना
चरं दिवम् ॥ १२ ॥ ऋषीन्विरूपान गौरसः प्राह संरूपदर्पितः ॥ ते रिमा प्रापितो योनिं प्रल
ब्धैः स्वेन पाप्मना ॥ १३ ॥ शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ यदहं त्रिलोकगुरु
णा पादस्पृष्टो हताशुभः ॥ १४ ॥ तं त्वाहं भवभीतानां प्रपन्नानां भयापह ॥ आपृच्छे शापनि
र्मुक्तः पादस्पर्शाद् अमीवहन ॥ १५ ॥ प्रपन्नोऽस्मि महायोगिन्महापुरुषसत्पते ॥ अनुजानीहि
मां देव सर्वलोकेश्वरेश्वर ॥ १६ ॥ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवन्द्य च ॥ सुदर्शनो दि
वं यातः कृच्छ्रान्नंदश्च मोचितः ॥ १७ ॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मित
चेतसस्ततः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः ॥ १८ ॥ कदाचि
दथ गोविंदो रामश्चाद्भुतदर्शनः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषिताम् ॥ १९ ॥ उपगीयमा
नौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौ स्रग्विनौ विरजाम्बरौ ॥ २० ॥ निशा
मुखं मानयंतावुदितोडुपतारकम् ॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना ॥ २२ ॥ जग
तुः सर्वभूतानां मनःश्रवणमंगलम् ॥ तौ कल्पयंतौ युगपत्स्वरमंडलमूर्छितम् ॥ २३ ॥
योस्त्रीलोकिं चानिशाप्रवेशा सन्क्रुवैं नोउदितउडुपस्तारकाश्च यासिस्तत ॥ मल्लिकागंधेन मत्ता अल
योयासिस्तत ॥ ८२ ॥ अतिबद्धत्वाद् स्वैपु गायंत्कल्पयितुमशक्यमपि तौ स्वरमंडलमूर्छितेपु गाय
कल्पयंतौ मनःश्रवणयोर्मंगलं यथा भवति तथा जगतुः अगायतामिति ॥ २३ ॥

८१

प्रतीपं प्रतिकूलमधर्ममित्यर्थः ॥ आचरत्स नवान् ॥ नचैवार्थमेमात्रफलं करंजभक्षणादिवत् ॥ किं
तु महासाहसमित्याह ॥ परदाराभिमर्शनमिति ॥ २८ ॥ आप्तकामस्य नायमधर्मः इति चेत् ॥ यद्येवं
कामाभावात्किं इति केनाभिप्रायेण कृतवानिति पृच्छति ॥ आप्तकाम इति ॥ २९ ॥ परमेश्वरे कैमुत्य
न्यायेन परिहर्तुं सामान्यतो महतां दूषणमाह ॥ ३० ॥ धर्मव्यतिक्रम इति साहसं च दृष्टं प्रजापतीन्द्रसो
म विश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषाय न भवति ॥ नादृशं यदाचरति श्रेष्ठ इति न्यायेनान्योपिकु

राजोवाच ॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥ अवतीर्णो हि भगवानंशेन जगदी
श्वरः ॥ २७ ॥ स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्श
नं ॥ २८ ॥ आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं ॥ किमभिप्राय एतन्नः संशयं छिंधि
सुव्रत ॥ २९ ॥ श्रीशुक उवाच ॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं ॥ तेजीयसां न दोषा
य वह्नेः सर्वभुजो यथा ॥ ३० ॥ नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ॥ विनश्यत्याचरन्मौढ्या
द्यथा रुद्रोऽब्धिजं विषं ॥ ३१ ॥ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥ तेषां यत्स्ववचोयु
क्तं बुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥ कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वा
नर्थो निरहंकारिणां प्रभो ॥ ३३ ॥ किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसां ॥ ईशितुः

र्यादित्याह ॥ नैतदिति ॥ ३१ ॥ अनीश्वरो देहादिपरतंत्रः (श्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥
द्रः यथा रुद्र इव निरीश्वरो विषं भक्षयन् ॥ कथं तदा सदाचारस्य प्रामाण्यं अत आह ईश्वराणामिति ॥ ३२ ॥ ये
षां वचः सत्यं अतस्तदुक्तं आचरेदेव ॥ आचरितं तु क्वचित् सत्यं अतः स्ववचोयुक्तं ॥ तेषां वचसा यद्युक्तं
अविरुद्धं तदेवाचरेत ॥ ननु तर्हि तेऽपि किमेवं साहसं समाचरंति तत्राह ॥ कुशलेति ॥ ३३ ॥ आरब्धकर्म

यदितिः ॥ यस्यपादपंकजपरागनिषेवणोनतमाः ॥ यद्वायस्यपादपंकजपरागोनिषेवायेषांतेत
थातेचतृप्ताश्चतिभक्तात्र्यर्थः ॥ तथाज्ञानिनश्चनन्नह्यमानाः नबंधतंप्राप्नुवंतः परदारत्वंगो
पीनामसीकृत्यपरिहृते ॥ इदानीं श्रीभगवतः ॥ सर्वांतर्यामिनः परदारसेवानामनकाचिदित्या
ह ॥ गोपीनामिति ॥ ३५ ॥ योंतश्चरत्यध्यक्षोबुद्धिसाक्षीसएवक्रीडनेनदेहभाक् ॥ नत्वस्यदारित्व
यत्पादपंकजपरागनिषेवतृप्तायोगप्रभावविधुताखिलकर्मबंधाः ॥ स्वैरंचरंतिमुनयो
पिनह्यमानास्तस्येच्छयात्तवपुषःकुतएवबंधः ॥ ३४ ॥ गोपीनांतत्पतीनांचसर्वेषामेवदेहि
नां ॥ योंतश्चरतिसोध्यक्षःक्रीडनेनेहदेहभाक् ॥ ३५ ॥ अनुग्रहायभक्तानांमानुषंदेहमास्थि
तः ॥ भजतेतादृशीःक्रीडायाःश्रुत्वातत्परोभवेत् ॥ ३६ ॥ नासूयन्खलुकृष्णायमोहितास्त
स्यमायया ॥ मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ॥ ३७ ॥ ब्रह्मरात्रउपावृत्तेवा
सुदेवानुमोदिताः ॥ अनिच्छंत्योययुर्गोप्यःस्वगृहान्भगवत्प्रियाः ॥ ३८ ॥ विक्रीडितंव्रजव
धूभिरिदंचविष्णोःश्रद्धान्वितोनुशृणुयादथवर्णयेद्यः ॥ भक्तिंपरांभगवतिप्रतिलभ्य
कामंहृद्रोगमाश्वपहिनोत्यचिरेणधीरः ॥ ३९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे ।
त्यः येनदोषःस्यादिति ॥ नन्वेवंचेत् ॥ आप्तकामस्यनिंदितेकुतः प्रवृत्तिरित्यतआह ॥ अनुग्रहायेति
३६ ॥ शृंगाररसाकृष्टचेतसअतिबहिर्मुखानपिस्वपरान्कर्तुमितिभावः ॥ नन्वन्येपि ॥ क्षित्राचारास्त
चेष्टितमेवचेतिवदंतितत्राहनासूयन्निति ॥ ३७ ॥ एवंभूतैस्त्वर्यीभावेनधाकुर्वनः पापांन्नियाइतिभा
वः ब्रह्मरात्रब्राह्मेमुहूर्ते उपावृत्तेप्राप्तेभगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामजयफ
लमाह ॥ ३८ ॥ विक्रीडितमिति ॥ अचिरेणधीरः सन् हृद्रोगंकाममाश्वपहिनोतित्यजतीति ॥ ३९ ॥

अपराः स्त्रियः शौरेर्मीकः स्मेरंस्यः संसमुद्रः कथंमुमूकः कथं हताः अनुरागेणायस्मितेनेवनिताः हृदिस्थाः म
नोज्ञाश्रित्रगणिपदानियासुताः विरहेणाकातराविह्वलाः॥ अच्युतेन्याशायस्त्रिन्नेयासोतः कुसुसंगतिविधा
यविद्युटयतीति॥ विधातारे स्वसेवकामाकोपायमयाह॥ मेघ्याहितानाचरणेनप्रणायेनस्नेहेनअक्रूतार्थानं
शामभोगान्नपितान॥ विधुनेन्द्रिवियोजयसियस्मान्नवनदयावालिशोपिनामित्याह॥ अपार्थकमिति
विगाहितेनचनवेदकर्मेत्याह॥ यत्त्वमिति॥ २७॥ शोकमपनुदतीतिशोकापनोदः सचासौ स्मितलेशा

स्मेरस्यअपराः शौरेः सानुरागस्मितेवनिताः॥ हृदिस्थशाखितपदागिरः संसमुद्रः स्त्रियः॥ २७॥
गतिसलललिताच उपस्थितावदासावलोकने॥ शोकापहानिनर्मगिराः प्रोद्दामचरितानि च॥ २८॥
विनतयन्त्यामुकुंदस्मभीनाविरहकातराः समेताः सेव्यगाः प्रोत्तुरहुनुख्योऽच्युताशया॥ २९॥
गोप्यकृतुः॥ ॥ अहोविधातस्तवनकचिद्दयासंयोज्यमैत्र्याप्रणयेनदेहिनः तांश्चाकृतार्थान्वि
युनंक्ष्यपार्थकंविक्रीडितंतेर्भकचेष्टितंयथा॥ ३०॥ यस्त्वंप्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रंसु
कपोलमुन्नसम्॥ शोकापनोदस्मितलेशसुंदरंकरोषिपारोक्ष्यमसाधुतेकृतं॥ ३१॥ क्रूरस्त्वमक्रू
रसमाख्ययानस्त्वहिंदहरसेव्यतासवत॥ येनैकदेशोखिलसर्गसौष्ठवंत्वदीयमद्राक्ष्मवयंम

अरत्नहासलेनसुंदरंमुकुंदस्यवक्त्रसज्जनस्वदर्पणेननस्वस्थपातोसदृश्यनाकरोषि॥ (शुद्धिः)॥
अनत्तवत्हितेनकर्मअमाधुनिद्यमित्यर्थः॥ किंचदत्तापहारित्वेनातिक्रूरस्त्वमित्याह॥ ३१॥ नचअक्रूरो
दत्तिनाहमितिचेदाह॥ अक्रूरसमाख्ययेति॥ नसेवंकर्तुमन्यः प्रभवति॥ अतोनाममात्रेणत्वमक्रूरत्वं
नमेवाच्यनामितसंदर्शमितुपुष्पचन्तरितिवेत॥ येनतद्दत्तेनवल्लभामधुद्विषएकदेशेनेत्र
वक्रादौनदीयसमग्रसृष्टिसौष्ठवंनेत्रगाम्यमद्राक्ष्मदृष्टवन्तः॥ नचलतः॥ अयंभावः ममसर्वस्वस्यमाभि
सौंतमित्यमपेक्षावसविशेषायसमाज्ञातथीकरोषीतिविधातारंविरूपयपरस्परमभवरिति॥ ३२॥

ननु चेद्दृक्षणभंगमस्थिरं सौहृदं यस्य सः स्वदासीर्विहाय ॥ अद्धा साक्षात् ॥ तद्देव दास्यमुपगताः स्वकृतातुराः
स्वकृतेनैव विस्मितादिना प्रवेशनाश्रपितः ॥ अद्धा न ॥ समीक्षिष्यते ॥ नवं प्रियं यस्य सः ॥ अतएव निवास्याम
इति भावः ॥ सैष्यस्त्रयः साव प्रभातेति ॥ २२ ॥ व्रजस्पतेः कृष्णस्य मुखं पास्यंति ॥ आदरेणाद्रक्ष्यति ॥ कथंभू
तम् अपांगेन नेत्रान्तेन ॥ उत्कलितमुद्गमितं स्मितमेवासवं रसो यास्मिन् तत् ॥ यद्वा अपांगोत्कलितस्मितेन

न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा वत ॥ विहा
य गेहान्स्वजनान्सुतान्पतीं स्तद्दास्यमद्धोपगतान्नवप्रियः ॥२३॥ सु
खं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवं ॥२४॥
याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवं
॥२५॥ तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्य
पि ॥ कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्याः सलज्जस्मितविभ्रमै
र्भ्रमन् ॥२६॥ श्रीरामानुजायनमोनमः ॥ रामानुजायनमः ॥२७॥

आसवं हर्षयन्मुखं तत् अपानं सावमेव संभावयेति ॥ ननु दिनानि दिनानि तथा भवन्तु नाम तत्याप्य
स्मत्स्नेहेनाकृष्टः पितरादिभिस्यावलितं आगमिष्यतीत्याशंक्याहुः ॥२४॥ तासामिति ॥ हे अबलाः तासां
मधुमंजुभिर्भाषितैः ॥ वशीकृतचित्तः ॥ तथा तासां सलज्जस्मितैः विभ्रमैर्भ्रमन् परवान् पित्रादिपर
तंत्रोपि यद्वा व्रजे परे अत्र ते वधवाः संति यस्य स तथा मनस्वी धीरोपि ग्राम्याः अविदग्धाः नः कथं प्रतिया
स्यते प्रत्येष्यति न कथंचिदित्यर्थः ॥ किंचास्मदुन्नवभाग्यो न्यापरम विष्यंतीत्याहुः अद्येति ॥२५॥

तत्र पुरे दाशार्हादीनां हृष्टो हर्षः महानुत्सवो भविष्यति ये देवकीसुतं द्रक्ष्यंति तत्र याये चान्ये ध्वनिगळं तं द्र
क्ष्यंति तेषामपि हर्षो भविष्यतीति॥ यद्वा हृदयशब्दं निहितौ वा तेषां हृष्टो नेत्राणि महोत्सवो भविष्यते प्राप्स्यति
प्राप्स्यथ्येस्य भवेतेन आत्मनेपदित्वात्॥ २६॥ अक्रूरेणापनेष्यमाणं प्राहुः एषा वियावियथानेकनयस्यापि वनिक्रूपस्य
अक्रूरत्वं निष्ठो भवतेनाम समाभूत॥ अत्र चेदंतुः अनीवदारुणा इति मियान्याणादपि प्रियं हन्ति समधुनः पत्नि
स्वसदेशो च वक्ता इति तर्हि देशं नेष्यति॥ अहो पि वा स्नजीव वनमित्याहुः अनार्द्रधीरिति॥ ३१॥ अनार्द्रं काठि
न्ययुक्ता वत तत्र हृष्टो भविष्यते दाशार्हभोजान्धकवृष्णिसात्वतां॥ महोत्सवः श्रीरमणं गुणास्पदं द्र
क्ष्यंति ये चाध्वनि देवकीसुतम्॥ २९॥ मतं हि यस्याकृतरागस्य नाम भूदक्रूर इत्येतद् तीव दारुणः
योसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः॥ ३२॥ अनार्द्रधीरेष समास्थितो
रथं तमन्वमी च त्वरयंति दुर्मदाः। गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकूलमीहते॥
३३॥ निवारयामः समुपेत्य माधवं किं नोकरिष्यन्कुलवृद्धबांधवाः॥ मुकुंदसंगान्निमिषार्धदु
स्त्यजाद्दैवेन विध्वंसितदीनचेतसां॥ ३४॥ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरि
रंभणरासगोष्ठ्याम्॥ नीताः स्मनः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतं॥ ३८॥
अत्यर्थः किं च दैवमित्ययंभावः यदि दैवमस्माकमनुकूलं भवेत॥ विघ्नैः कश्चिद्देवामथ्येश निहन्मेन अयं
रूः निवारयाम इति॥ ३८॥ अकरिष्यति॥ निमिषार्धदुस्त्यजात् मुकुंदसंगात्॥ दैवेन विध्वंसितानि वियोजितानि
अतएव दीनानि चेतांसि यासां॥ एवंभूतानामस्माकं नमुत्सोरपि भयमित्यर्थः॥ इत्येपि कारणान्तरं स्वरूपमाह
समवाय वलवनीयमित्याहुः॥ ३५॥ हे गोप्यः यस्य ललितस्मितवल्गुमंत्रलीलापरिरंभणाच अनुरागेः

हणदाराः त्वयः हणामिवनीताः तमसं मुक्तं संविनाकुरु तंमः विरहदुःखं कथं नुम्प्रति तरेम न कथंचिदित्याह ॥ योह्नयति ॥२९॥ अह्नः क्षये दिनावसाने खुररजोभिः छुरिता धूसरा अलकाः स्रजश्च यस्य स अनंतः विश्वानस्मितेन यत्कटाक्षनिरीक्षणं तेन नस्त्रिचित्तं हरणोति ॥ अ मुक्तस्य विना कथं भवेम सजीवेमेति ॥ कृष्णे निषक्तानि मानसानि यासां ताः सुस्वरं उच्चैः रुरुदुः स्म सुकृतैः श्रुत्वा कस्य सति स्नेहः ॥ गोपीमनोरथारा
योह्नः क्षये व्रजमनंतसखः परीतो गोपैर्विशन्खुररजश्छुरितालकस्रक् ॥ वेणुं क्वणन्स्मितकटाक्षनिरीक्षणेन चित्तं हितोयात्ममृते नु कथं भवेम ॥२९॥ ॥श्रीशुक उवाच ॥ एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः ॥ कृष्णनिषक्तमानसाः ॥ विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर माधवेति ॥३०॥ स्त्रीणामेवं रुदंतीनामुदिते सवितर्यथ ॥ अक्रूरश्चोदयामास कृतमैत्रादिको रथम् ॥३१॥ गोपास्तमन्वसज्जंत नंदाद्याः शकटैस्ततः ॥ आदायोपायनं भूरि कुंभान्गोरससंभृतान् ॥३२॥ गोप्यश्च दयितं कृष्णमनुव्रज्यानुरंजिताः ॥ प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ॥३३॥ तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ॥ सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥३४॥ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च ॥ अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥३५॥ भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ॥ रथेन वायुवेगेन कालिंदीमघनाशिनीम् ॥३६॥ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ॥ वृक्षषंडमुपव्रज्य सरामो रथ
मः सरामः स्वपुरं ययौ ॥३७॥ स्त्रीणामिति ताभ्रूता हृत्वा कृतमैत्रादिकः ॥ मैत्रं मित्रं देवतं संध्योपासनं तदादि कर्म येन सः ॥ अन्वसज्जंत अन्वगच्छन् ॥ अनुरंजिताः परा हृष्टा रीत्या गादिभिः ॥ किंचिदनदेहिताः प्रत्यादेशं प्रत्याख्यानं तप्यतीः संतप्यमानाः ॥ आयास्ये शीघ्रमागमिष्यामीति दूतवाक्यैः ॥ अनुप्रस्थापिता आत्मान
श्चित्तानि याभिस्ताः लेख्यमयपुत्रिका इव निश्चलाः स्थिताः तावदेव समूहमनुव्रज्य ॥३८॥

श्रीः दः स्कं भा ७७

दशम

ग्रन्थः शोकितः सन् वयोपरि निवेशप्रवयसे वेदं जपन् ॥ क्रमो बालो कृतो मल्लाविनिशोकितश्चेतसे ॥ श्रृङ्गयद्दरीरूपमस्यास्येऽयमदर्शयत् सिद्धादिभिः स्तूयमानसद्दसशिरांशिरस्य तमसः सफणाग्रमौलये मेतीतितथाने ॥ नीलेषु वरस्य तं ॥ विकसितकमलकदंबवच्छ्रितस्य शृंगोः श्वेतकैलाससमिवस्थितं ॥ [illegible] नस्यात्मगोष्टदलीकृतरंद्राधैविलोकोसकादश्चोनानाब्यः ॥ ४८ ॥ शोभने भुवो [illegible] चतानासाय स्यतं च

प्रक्रस्तानुपामं सन्निवेशप्रचवयोपरि ॥ कालिंद्याह्रदमागासस्नानं विधिवदाचरन् ॥ ३९ ॥
निमज्जतस्मिन्सलिले जपन्ब्रह्म सनातनं ॥ तावदद्दर्श शक्रूरो राममक्रूरो समन्वितो ॥ ४० ॥
नोरयस्योकयमिहस्तावानकदुंडभः ॥ तदृष्टिस्तितस्यंदनेनस्तरूस्वमसृत्यमचहृस्य ॥ ४१ ॥
तत्रापि च यथापूर्वं मासीनो पुनरेव सः ॥ समजुहरीनयस्मेमृषाकिंसलिलेनयोः ॥ ४२ ॥
भूयस्तत्रापि सोद्राक्षीत्स्तूयमानमहोरगम् ॥ सिद्धचारणगंधर्वैर्महर्षिनेनकंधरैः ॥ ४३ ॥
सहस्रशिरसंदेवं सहस्रफणमौलिनं ॥ नीलांबरं विशस्यतशृंगैः श्वेतमिवस्थितम् ॥ ४४ ॥
तस्योत्संगेघनश्यामं पीतकौशेयवाससं ॥ ब्रह्मरूपचतुर्भुजं शांतेपद्मपत्रारुणेक्षणं ॥ ४५ ॥
चारुप्रसन्नवदनं चारुहासनिरीक्षणं ॥ सुभ्रूत्रसंचारुकर्णं सुकपोलारुणाधरं ॥ ४६ ॥
प्रलंबपीवरभुजं तुंगांसोरःस्थलश्रियं ॥ कंबुकंठनिम्नविल्लिमसत्पत्रवोदरम् ॥ ४७ ॥
बृहत्कटितटश्रोणिकरभोरुद्वयान्वितं ॥ चारुजानुयुगंचारुजंघायुगलसंयुतम् ॥ ४८ ॥

तुंगावंसो यस्य उरःस्थले श्रीर्यस्य तंच तेच वल्लिमत्पल्लवोदरं वलयत्रिर्यक्तिनिम्ना रेखा यस्य तं नितह लितन्च ॥ पलंवच दलमहृशा महदरं यस्य तं कटितटं च श्रोणिस्वकरभसहृशौ मरूरुद्वयं बृहच्चतन्कटि तटश्रोणिकरभोरुद्वयं चतेनान्वितं यद्वा ॥ बृहत्याकटितटश्रोणिभ्यां करभोरुद्वयेन चान्वितं ॥ ४९ ॥

शोभनौ कपोलौ यस्य सः शोऽध. [illegible] रूपस्य तं चतंच

स्वस्पद [illegible]

श्री भाग॰ द॰ ३९

तुंगपीवरवृत्तो गुल्फो यस्य रुणतया नखानां दीप्तिभिर्लक्ष्यमाणं ...तेषां दीप्तितिभिस्तथा न नवांगुलयः अग्रे गुहीच तान्येवदलानि तैः स्वविलसत्शोभमानं पादपंकजं यस्य तं ॥ ५० ॥ महार्हमणिव्राताय ये युतैः किरीटादिभिः तत्र पार्षदैः स्तूयमानैः सनकादिभिर्ब्रह्मेतिब्रह्मा ईशो महादेवः ईश्वरा इति मरीच्यादिभिर्द्विजोत्तमैः परः प्रजापतिरितिवसु रूपविचवः प्रह्लादनारदवसवः ये पानेः ॥ परदेवतमिति ॥ अष्टैर्वचोभिः पृथक्पृथक् भावोभिस्त

तुंगगुल्फारुणनखव्रातदीप्तिभिर्युतं ॥ नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ॥ ५० ॥
सुमहार्हमणीव्रातकिरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ॥ ५१ ॥
भ्राजमानं पद्मकरं शंखचक्रगदाधरं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥ ५२ ॥
सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ ५३ ॥
प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥ ५४ ॥
श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया ॥ विद्ययाविद्यया शक्त्या मायया च निषेवितं ॥ ५५ ॥ विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः ॥ हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥ ५६ ॥ गिरा गद्गदया स्तौषीत्सत्त्वमालंब्य सात्वतः ॥ प्रणम्य मूर्ध्नावहितः कृतांजलिपुटः शनैः ॥ ५७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे अक्रूरप्रयाणं एकोनचत्वारिंशोध्यायः ३९

योरेषां तैः पृथग्भावैः इति वा विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू माया तयोः कारणं ॥ शक्तिर्वा निसेवितं ज्ञानसूत्रानस्यामिस्त्रनिषेवितं विलोक्य सुभृशं प्रीत ॥ अस्य हृष्टो मार्गे भक्त ॥ परमेश्वरं निज्ञाना ॥ ५७ ॥ इत्येकोनचत्वारिंशोध्यायः ३९ चत्वारिंशे तु नत्वा क्रूरः कृष्ण सम त्वेश्वरं ... भक्त्या तुष्टाव सगुणागुणभेदतः ॥ १ ॥ श्रीरामानुजाय नमः १ रामजीन मो नमः ॥ राम १

व५

९

१०८

श्रीकृष्णे प्रणाम इति ॥ नतोस्मीति ॥ हे कृष्ण त्वां नतोस्मि त्वम् अस्मासु दयस्व कुतो मां बाले न नतोसीति तत्राह ॥ आद्यं पुरुष
मव्ययं च ॥ अनादिनिधनमित्यर्थः कुतः यतः अखिलहेतूनां हेतुं ॥ स तु नारायणः नाहमिति चेत् ॥ नारायण॰
त्वं किं नारायण इति मां स्तौषि ॥ कात्र स्तुतिः ॥ सत्यमेवाह ॥ यन्नाभिजातादिति ॥ यतो ब्रह्मणः ॥ अखिलहेतुहेतुत्वं
प्रपंचयति भूरिति ॥ २ ॥ खमादिरहंकारः ॥ अजा माया तत्स्थाः ॥ आदिः पुरुषः एते ये जगतो हेतवः ते सर्वे तवांग
भूताः ॥ अंगाद्भूताः सर्वे भूताः उपसर्जनभूता वा न तु स्वतंत्रास्ततः कथं क्रियते ॥ अहमेव अस्य ततउपत्रस्त्यत इ भूश्च
त्याशावाद ॥ तवैवेषां तत्त्वमर्मार्थं तु न कोपीत्याह ॥ नैते इति ॥ ३ ॥ एते अजादियेषां ते आत्मनस्ते स्वरूपं न वि

अक्रूर उवाच ॥ नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययं ॥ यन्नाभिजातादरविंदको
शाद्ब्रह्माविरासीद्यत एष लोकः ॥ १ ॥ भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि
सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः ॥ २ ॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो॰
नात्मतया गृहीताः ॥ अजोनुबद्धः स गुणैरजाया गुणात्परं वेद न ते स्वरूपं ॥ ३

दुः ॥ अनात्मतया जडत्वेन
कारणेन जडत्वे हेतुः गृहीताः प्रत्यक्षादिभिर्दृष्टाः न स्वतंत्रो दृग्गोचर इति भावः ननु जडा मा मा जानंतु
जीवस्तज्ज्ञास्यत इत्याह ॥ अज इति ॥ अजो ब्रह्मापि ॥ अजाया गुणैरनुबद्ध आवृतः ॥ गुणातीतं स्वरूपं न वेद॰
अन्यः कुतो ज्ञास्यतीति ॥ यद्वा प्रत्यक्षत्वादय आत्मनः स्वरूपं च न विदुः जडत्वादेव जीवस्तु तान् ॥ आत्मानं च वेत्ति
न तत्स्वरूपमिति ॥ यथोक्तं हंसगुह्ये ॥ देहोऽसवो मनो वा भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पुमान्वे
द सर्वज्ञमनंतमीडे इति ॥ ननु यदि जीवो न जानाति कथं तर्हि संसारं निहंति जीवा मिथ्यापाशं कासांस्तारस्मा गोव
रक्षेपि येन केनापि मार्गेण भजंतां त्वां गम्योसीत्याह ॥ ३ ॥ त्वां योगिन

श्री भा. टी. प. ९६

हे रण्यगर्भादयो ध्यानाभिमानादिदेवदेवमातिगां महापुरुषं ॥ नदं तत्र यो मिश्ररूपेणेश्वरं च यजन्ते ॥ नदेवं साख्ययोगावेकौ च्छेत्याकौ त्रयी मार्गे कर्मज्ञानभेदेन दर्शयति व्याचतिश्लोकद्वयेन ॥ ४ ॥ वैतानिकाः कर्मयोगिन स्तावेतामेव यजन्ते ॥ नतु ते इन्द्राद्यादीन भजन्ते ते न तमामित्याह ॥ नानावस्तूदस्तादीनि रूपाणि येषां ते अमरास्तेषां माख्यायाना स्तानामेवयजन्ते इत्यर्थभावः ॥ ये तु वारुणावेदस्तेः इन्द्रादयः स वैस्वयेणाम कामपतेनच सर्वे स्वावदस्सभवति ॥ अतोनामभेदेनयजन्ते इति वातव्याचक्षेति ॥ सप्त

तां यो गिनो यजन्तं महा महापुरुषमीश्वरं ॥ साध्यात्मं माधिभूतं च माधिदेवं च माथ वः ॥ ४ ॥ व्याचविद्यधाके वित्वावैवैतानिकाजनाः ॥ यजन्त [illegible] येज्ञेनीना वितते रूपामराख्यया ॥ ५ ॥ एके त्वाखिलकर्माणि सम्यस्योपशमे गताः ॥ ज्ञानितो ज्ञान यज्ञेन यजन्ति ज्ञानविग्रहं ॥ ६ ॥ अन्ये च सं स्कृतात्मानो विधिनाभिहितेनते यजन्ति त्वन्मया स्त्वां वै बहुमूर्त्येकमूर्तिकं ॥ ७ ॥ रामानुजाय नमो नमः ७

यमः ॥ प्रकृतिर्विश्वकर्मा सप्रथमो मित्रावरुणावध्रिः ॥ सप्रथमो वृह स्पतिश्चि किन्स्वत्वा नस्मा इंद्रायद्ध ति राजसूतो निति ॥ ५ ॥ ज्ञानयज्ञेन समाधिना ॥ ७ ॥ सांख्ययोगत्रयीमार्गेऽत्र नः ॥ वैसवस्त्रावसार्गावाद्द हृदयेन ॥ ८ ॥ अन्ये चेति ॥ संस्कृतात्मानः ॥ वैसवस्त्रावद्दीक्षया दीक्षिताः सन्तः तेनयाञ्च भिहितेन पाञ्च रात्रादिविधिना त्वन्मयास्त्वन्मयेन मामात्मानं चिन्तयन्तः ॥ त्वदेकप्रधाना इति वा वासुदेव संकर्षण प्र द्युम्नानिरुद्धमूर्त्तेनारायणैकमूर्त्तिकं च त्वा मेव यजन्ते ॥ ७ ॥ बहवाचार्य विभेदेन निनानाभेद

श्री. भा. द्वा. टी. १६

स्रज्यकर्मस्रजताकारकवर्गाणांचोभयोः स्रज्यस्रष्टोः परमार्थश्रेयः फलमपि ॥ अतः स्रज्यस्रष्टृफलैरनिर्तोजीवस्य अहंकारात्मकोपद्रवनास्ति । अतएवोत्पादितोनिरस्तोबाध्यबाधकोयस्मिन । तदेतत्समात्मस्वरूपमित्यर्थः । तन्नस्मिन ऊर्मीअम्बदंकारादीन्विषिध्यविरमेत ॥ विशेषणाक्रीडेदित्यर्थः ॥ ३१ । यतस्त्वदेहसर्वपरमामनंतीत्याह ॥ यदेतेन्नदेवपरेवस्वंपरस्वरूपमामनंतितेन ॥ अतत ॥ आत्मव्यतिरिक्तं ॥ उतिमस्त्ववः त्यक्तमिच्छवः ॥ अनन्यसौहृदाः ॥ नास्तिअन्यस्मिन्सौहृदयेषांते ॥ ऊतः दारात्मदेहाघेदभावंविसृज्यदेहेदंकाराभादन्यत्रसौहृदन्नास्ति ॥ अतस्यत्क्तमिच्छवइत्यर्थः ॥ कथंतेतिने

नयचसर्वंस्रजतोभयोःपरंश्रेयश्चजीवस्थिभिसन्वितस्तद्वदे । तेदतद्उत्पादितबाध्यबाधकेनिषिध्यचोर्मीनिदमस्तयस्त्रुतिः ॥ ३१ ॥ परंपदंवैसर्वमामनंतितद्यन्नोतिनेतोत्यतदुत्तिसदत्वं ॥ विसृज्यदौरात्म्यमनन्यसौहृदोपगुह्यावहितेसमाहितेः ॥ ३२ ॥ तएतदधिगच्छतिविस्तार्थतत्परमंपदं ॥ अहंममेतिदौर्जन्यनयेषांदेहगेहजे ॥ ३३ ॥ अतिवादांस्तितिक्षेतनावमन्येतकंचन ॥ नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित ॥ ३४ ॥ नमोभगवतेतस्मैकृष्णायाकुंठमेधसे ॥ यस्यपादांबुजद्वंद्वध्यानात्संहितामध्यगामिमा ॥ ३५ ॥

नीत्येवं ॥ अत्रविहृदङ्भवेमपिप्रमाणायति ॥ हृदोपगुह्यध्यानादिनाततः समाहितैरवसितेनिश्चितं ॥ यद्दावसितमवबुद्धं ॥ आत्मतयाऽवरुद्धंतमित्यर्थः ॥ एवंप्रमाणावधिकामित्यादर्शयति ॥ तएतदिति ॥ ३३ ॥ देहजेअहंममेति ॥ गेहजेममेति ॥ प्रासंगपाठमाह ॥ श्रीमत्समानोगुरुंश्यामतिनमस्रति ॥ ३४ ॥ कृष्णायअकुंठमेधसे ॥ अध्यगां ॥ अधिगतवानस्मि इमांसंहितामध्यगामित्युक्ते । तेनपुराणसंहितामविभागो ॥ विशेषतोवृक्षन्तः वेदविभागामपिप्रसंगात्सूचितं ॥ पैल्यादिभिरिति ॥ ३५ ॥ ॥

१६

मेस्थिः येतमसाप्यतो अभिचारिकं हिंसाफलं दिष्टं प्राचीनं कर्म ॥ सर्पादष्टं प्रयुक्तमप्यतवाप्ययं नापराय इति भावः ॥२२॥
वाक्यान्लिंगहृदमपतिनन्तु कथं विदुषामपि संमोहः यतो ब्रह्मकोपात्पीडितो मत्तः ॥ जनमेजयके अस्यान्सर्पाणामिनादि
तेनाहं संघते ॥२४॥ तस्यामहत्त्वेदं शीयतिसलमाणानलक्ष्मते ज्ञनलताः ॥ यत्र नकौन्याह ॥ कामावितयत आह ॥ ययापवि
सोरवान्मस्मृताः ॥ आत्मारामस्मृतः प्रधानः गुणाबृत्तिभिः क्रोधादिभिः ॥ भूतेषु देहेषु स्वयं निवाध्य बाधकत्वात्तु ज्ञानतो
तद्र्थः ॥ नन्तु स्वयमादिनाबाधितयातया अतो मोहः स्यान्नेत्याह ॥ अवाध्यया वाधितमस्य शक्यापाक थं तर्हि मायातत्कार्य
निवृत्तिरित्याशंक्य अविस्तस्वरूपानिरूपणापूर्वकं तद्ज्ञानान्सर्वार्थं निह तिरिति शास्त्रसुपसंहरति नन्यत्रेति द्वाभिः

तस्मात्त्वमिदं राजन्नेस्थीयेतामभिवारकं ॥ सर्पाअनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥२७॥ इत्युक्तः सन तथेत्या
ह सहर्षमानयन्नवः ॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिं ॥२८॥ सैषा विष्णोर्महामायाबाध्ययालक्षणाया
सुह्यन्त्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः ॥२९॥ न यत्र दंभीत्यभया विराजिता मायात्मवादेसकृदात्मवादिभिः ॥ न यद्वि
वादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति यत ॥३०॥ ॥
॥२९॥ दंभीति यामायाकपटवान येषु
मानितेवं स्मृतायं वृहावमकु इलिस्यमानायामासेत्यर्थः ॥ माया आत्मवादेक्रियमाणा आत्मवादिभिर्यं चाभया
तु विराजिता न प्रकाशिता किं तु भीतेव स्वकार्यमोहादिकमकुर्वती कथं विहर्त्ते तेऽतप्रतिपादितेत्यर्थः ॥ तदु
क्तं ॥ तस्मै नमो भगवते वासुदेवाय धीमहि ॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं ॥ विलज्जमानया यस्य स्थातुं
ईक्षापथेमुया विमोहिता विकत्थन्ते ममाहमिति दुर्धियः इति किंच यस्मिन्तदाश्रयः ॥ मायाश्रयो विविधो
वादोपि नास्तीति ॥ विशेषविषयत्वाद्धि वादानां तस्य च विशेषातीतत्वादिति भावः संकल्पविकल्पात्मकं यो यस्य
तन्मनोपि यत्र नास्ति संकल्पविकल्पानामपि विशेषविषयत्वात ॥३०॥ ॥ ॥ नारायणाय

देसकृदात्मवा

श्रीराम

भा
द्वारी
२५

संक्रुद्ध इति कस्मात्तत्को न दृश्येनेमुक्ताः संतोद्विजाद्दुःखमिति ॥१०॥ नरेंद्रेण सौ सर्पः ॥११॥ द्विजः प्र
ति प्राह ॥ स हेंद्रं द्विजसहितः किमिति न पात्यते ॥१२॥ नहुषस्तो वचः श्रुत्वा प्राजहृद्धुः सात्वेपमाह्वानंदर्हः
यति ॥ इहाप्राप्तवाशुपतनस्वमहत्त्वतामहङ्कृतवतां इंद्रेण सह ॥१३॥ ब्राह्मणैरिहके रात्रेयैः पदबद्धाकैः
सततकैः ॥१४॥ अंगिरसः पुत्रो बृहस्पतिः प्राह ॥१५॥ भवतनामाजरामरत्वं प्राप्य पिपिलिकारकं धस्या

सर्पं सर्वे समिद्धाग्नौदस्सुमानान्महोरगान् ॥ दृष्ट्वेंद्रं भयसंविग्नस्तत्तकः शरणं ययौ ॥१६॥ अथ
यमस्तत्केन तत्र राजा पारिक्षितो द्विजान् ॥ उवाच तत्तकः कस्मान्न दह्येतोरगाधमः ॥१७॥ तं गोप
यति राजेंद्र शक्रः शरणमागतम् ॥ तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥१८॥ पारीक्षि
तइति श्रुत्वा प्राह स्विन्नउदारधीः ॥ सहेंद्रस्तत्तकोविप्रानाग्नौ किमिति पात्यते ॥१९॥ तच्छ्रुत्वा
जुहुवुर्विप्राः सहेंद्रं तत्तकं मखे ॥ तत्तकाशु पतस्वेह सहेंद्रेण मरुत्वता ॥२०॥ इति ब्रह्मोदि
ताक्षेपैः स्थानादिंद्रः प्रचालितः ॥ बभूव संभ्रांतमतिः सविमानः सतत्तकः ॥२१॥ तं पतंतं
विमानेन सहतत्तकमंबरात् ॥ विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः ॥२२॥ नैष त्वया
मनुष्येंद्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतमथवा अजरामरः ॥२३॥ जीवनं मरणं
जंतोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोन्यो नास्यास्य प्रदाता सुखदुःखयोः ॥२४॥ सर्पचोराग्नि
विद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छते जंतुर्भुंक्ते प्रारब्धकर्म तत् ॥२५॥

मीति चेत्तत्राह ॥ जीवितमिति ॥२४॥ गतिः परलोकः अतो दुर्मरणनिमित्तापि दुर्गतिः स्वेनैव कृ
तेनैवाचिन्त्यं कनीयमिति सर्वेषु ॥२५॥ कथममृतः सुखदुःखप्रदाता न भवति ॥ सर्पादीनां शुपलब्धमा
नत्वादिति चेत्तत्राह ॥ सर्पादिभिर्नृप जंतुः पंचत्वमृच्छति प्राप्नोतीति यत् ॥ तदा प्रारब्धकर्मैव भुंक्ते स्वक
र्मप्रयुक्तोपपद्यस्य सर्पादयो न स्वतंत्रा इति भावः ॥२६॥ ॥ ॥ ॥ ॥ ॥ ॥

वैकारानंसंस्काराद्वत्तत्वं तत्करूपं पर्यवेत्याहं भवतेति ॥७॥ आत्मना बुद्ध्या आत्मानं मनः आत्मनि प्रत्य
कात्मसमाधाय परमात्मानं दध्यौ ॥ अस्पंदासुः लीनप्राणः यथा तरुः स्थाणुः तमेव विधिं दर्शयन्नाह प्राकू
ले इति ॥९॥ प्राक्कूलेषु प्रागग्रेषु बर्हिषि दर्भेषु तदेव ब्रह्मभूतेत्यस्मिन् ॥ तत्तकागमनादिकं पिष्टपेषणमि
वाभवदिति दर्शयति ॥ तक्षक इति त्रिभिः ॥११॥ द्रविणैः निवर्त्य विषचिकित्सया परीक्षिद्रक्षणोद्यमान्नेता

अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदं ॥७॥ सूत उवाच
इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥८॥ परीक्षि
दपि राजर्षिरात्मन्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः ॥९॥ प्राक्कूले ब
र्हिष्यासीनो गंगाकूले उदङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः ॥१०॥ तक्षकः प्र
हितो विप्राः क्रुद्धेन द्विजसूनुना ॥ हंतुकामो नृपं गच्छन् ददर्श पथि कश्यपं ॥११॥ तं तर्पयित्वा
द्रविणैर्निवर्त्य विषहारिणं ॥ द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपम् ॥१२॥ ब्रह्मभूतस्य रा
जर्षेर्देहोऽहिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां ॥१३॥ हाहाकारो महा
नासीद्भुवि खे दिक्षु सर्वतः ॥ विस्मिता ह्यभवन्सर्वे देवासुरनरादयः ॥१४॥ देवदुंदुभयो नेदु
र्गंधर्वाप्सरसो जगुः ॥ ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥१५॥ जनमेजयः स्वपि
तरं श्रुत्वा तक्षकभक्षितं ॥ यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः ॥१६॥

पाणाक्लेते ॥११॥ तत्र स्थालीस्थवटवृक्षस्य भस्मीभूतस्य पुनरंकुरादिक्रमेणोक्त्यापनादि घहाविशेण तद
पेतितम् ॥ द्रविणैः सत्तर्प्य ॥ ततो निवेश्य द्विजरूपेणातिरोहितः सन् ॥ अदशत् ॥ तत्र पूर्वब्रह्मत्वमिव
ज्ञानमित्याह ॥१३॥ तत्र ब्रह्मणः सर्वं प्रांशुः खे तननः परमात्मं वाह हा भाम ॥१४॥ प्रासंगिकमाह ॥ जन
मेजय इत्यादि ॥१६॥ सर्पाभिचारसत्रे द्विजैः सह वर्तमानः यथा वहान्जुहाव इति वा ॥ सर्वे सर्पा वाहवे

श्री॰
भा॰ द्वा॰
टी॰
३९

ऋग्वाद्यधीत्य द्विजो मधुकुल्यादिरूपं स्वर्गं विंदते तत्फलमेतां पठित्वानुविंदते इति ॥६३॥ किंच प्रोक्तमिति ॥६४॥ रा
जन्य उदधिमेखलां पृथ्वीं मेधिराधेः ॥ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह ॥ कलिमलानां संहतिं समूहं

द्वादश्यामेकादश्यां वै शृण्वन्नायुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ॥६०॥ पुष्करे मथु
रायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥६१॥ देवता मुनयः सिद्धाः पि
तरो मनवो नृपाः ॥ यच्छंति कामान्गृणतः ॥ शृण्वतो यस्य कीर्तनात् ॥६२॥ ऋचो यजूंषि सामानि द्विजो
धीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ॥६३॥ पुराणसंहितामेतामधीत्य प्रयतो द्वि
जः ॥ प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ॥६४॥ विप्रोधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां ॥ वैश्यो नि
धिपतित्वं च शूद्रः शुध्येत पातकात् ॥६५॥ कलिमलसंहतिकालनोखिलेशो हरिरितरत्र न गी
यते ह्यभीक्ष्णं ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितोनुपदं कथाप्रसंगैः ॥६६॥ तमहम
जमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं ॥ द्युपतिभिरजशक्रशंक
राद्यैर्दुरवसितस्तवमच्युतं
नतोस्मि ॥६७॥ ॥

कालयति विनाशयतीति ॥ न गीयत इतरत्र शास्त्रांतरे इह पुनः प्रतिपादितं भगवंतं नमस्करोमीति ॥ तमिति द्वाभ्यां ॥ जग
दुदयस्थितिसंयमात्मानो रजशक्राद्यः शंकराद्यः द्युपतिभिर्देवैर्दुरवसितमज्ञातानंतं स्तवः स्तोत्रं यस्य तं ॥६७॥ ॥

३९

नैष्कर्म्यमिति तत्र का वार्ता केवलज्ञानस्येति तो निरंजनमुपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेन्न शोभते । नापरोक्षाय पर्याप्तं भ
वतीत्यर्थः ॥ ईश्वरे न चेदर्पितं तर्हि परं तु उत्तमं सर्वोत्तमं सर्वमपि कर्म ॥ तदपि पुनः कुतः शोभते ॥ यतः शश्वत् साधनकाले फलका
ले चाभद्रं दुःखात्मकं किं च ॥५२॥ वर्णाश्रमाचारादिषु पुरुषः परो महानपि यः श्रमः ॥ स यशः श्रियामेव कीर्तिः संपत्ति
श्च केवलं न परमपुरुषार्थ इत्यर्थः ॥५३॥ गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ ततः किमत आह
॥५४॥ क्षिणोति नाशयति । अथ येदानीं श्रोतॄन् स्तुवन्नात्मानं वाभिनन्दन्नाह यूयमिति द्वाभ्याम् ॥५५॥ हे द्विजाग्र्याः यद्यस्मा

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् । कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म य
दप्यनुत्तमम् ॥५२॥ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु । अविस्मृतिः श्रीधरपादपद्मयो
र्गुणानुवादश्रवणादिभिर्हरेः ॥५३॥ अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च । सत्त्व
स्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥५४॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिला
त्मभूतम् । नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥५५॥ अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे
परमर्षिवक्त्रात् । प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥५६॥ एतद्वः कथितं विप्राः
कथनीयोरुकर्मणः । माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥५७॥ य एवं श्रावयेन्नित्यं यामक्षणमनन्य
धीः । श्रद्धावान्योऽनुशृणुयात्पुनात्यात्मानमेव सः ॥५८॥

तान्संस्तौति करणे श्रीनारायणस्याविवेशः प्रभ
जनतः संभावनायोग्ये तो भूरिभागाः बहुपुण्याः कथं यच्छश्वत् अखिलात्मभूतं सर्वान्तर्यामिनं ॥ अत एव देवं सर्वोपा
स्यं अदेवं न देवान्तरोपास्यं ॥ कुत ईशं यद्वा ॥ यस्मात् यूयं भूरिभागाः तत एव आदिसंपन्नाः तेन नारायणं भजते निविश्य मे
मयाकृतं । एतस्याः पुराणकीर्तनादिफलं प्रपंचयितुमाह । एतद्वः अष्टभिः ॥५७॥ यामं क्षणं च तस्यार्थः । आत्मानमेव साक्षात्

पेचवंशावराटयस्तिष्ठो माहात्म्यप्रभावः ॥ ४७ ॥ एकादशमध्यमाह । विवशायेति । धर्मनिर्णयः वर्णाश्रमधर्मनिश्चयः मन्वेव
पितामहः मनुष्यानमानधानं ॥ ४८ ॥ द्वादशाध्यमाह । पुरालवणेनेत्युक्त्वा रूपाहूतिश्रुत्यर्थः । विविधशाकृतिकीर्तनमिति को
निर्णयोवति ॥ ४९ ॥ अथेच्यासस्यमुद्रयस्य च विमासः स्यर्थः ॥ ५० ॥ इति चाक्रमिति च कारादम्बरपिवः । पुष्कासिराहयन्स्होति

स्तनमानयतं स्हतोः पुनः मां दीपनेशोरोः ॥ मधुरायांनिवसतापदुचक्रस्य पुनिर्यं ॥ ५१ ॥ कृतमुहुर्वरामाभ्यां पुः
मेनदेवागादिजाः जरासंधमसमानीतमेनस्य वक्रगोवधः ॥ ५२ ॥ वाननरथवने द्रस्य क्रूरास्य स्यानिवशनं । यादवे
पारिजातनसमुपमोयाः सपालुपात ॥ ५३ ॥ कृकिमण्यादस्यापुहेवासस्यभजहातने ॥ प्रोज्ज्योतिषपतिहत्वाकः
न्यानोहरंगवयत ॥ ५४ ॥ चैद्यपौण्ड्रकसाल्वानांदंतवक्रस्य दुर्मतेः । शंबरोद्विविदः पीठो मुरः पंचजनादयः ॥ ५५ ॥
माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनं । भारावतारणाम्मेमितिमित्री कृत्वा पांडवान् ॥ ५६ ॥ विप्रशापापदेशेः
नसंहारः स्वकुलस्य च । उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ ५७ ॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनि
र्णयः ॥ ततो मर्त्यपरित्यागआत्मयोगानुभावतः ॥ ५८ ॥ युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः । चतुर्वि
धश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ५९ ॥ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः । शाखाप्रणयनमृषेर्मार्कंडेय
स्य सत्कथाः ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ६० ॥ इतिचोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः । लो
लावतारकर्माणि कीर्तितानीह सर्वशः ॥ ६१ ॥ पतितः स्खलितश्चार्त्तः क्षुत्त्वा वा विवशो ब्रुवन् । हरये नम
इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ६२ ॥ संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसां ॥ ६३ ॥ । ॥

तेउक्तमिति । किमेवं नानार्थं कथनेनेत्यत्राह लीलेति सर्वतः । तन्नदर्थं कीर्तनहारे गोत्सर्गः । तत्कीर्तनेनापि किमि
त्यपेक्षायां तत्फलमाह ॥ ६४ ॥ पतितः कूपादिपतनस्खलितः सोपानादावस्थितः दुःखितः तत्वात्सतेहृत्वा विवशोपि ॥ ६५ ॥

संकीर्तनः । पद्यक्रमेणोक्तमोक्षः ॥

श्री भा० द० टी० ३५

प्रेम्णा विज्ञं प्रविशन्ति । शेषं स्पष्टं । एवं विधं लीला विग्रहं तिमताममन्त्र भवं प्रमाणमिति ॥ अर्कोऽगिरिशृङ्गादिचेष्टां तेनन्तिवन्नेय तान्यपरिलोपाद्दृष्टान्तो न तस्मात् ॥ अतिवातः ॥ अभ्रमिवेति दोरसंकोचेनैवमेव महाफलं तद्धेतिरिक्तं सर्वं मिथ्या । लापमात्रमिति प्रपंचयति ॥ मृषागिर इति चतसृभिः ॥ ४७ ॥ मृषागिरो मिथ्या वाचः असतीरसत्यः असत्ताकथा यासु ताः यत्र ॥ यास उत्तमश्लोकस्य यशोऽनुगीयते अनेन यत् ॥ तदेव हि सत्यं तदेव हि मङ्गलं हरतीति ब्रुवः ॥ भगवद्गुणानामस्फुटत्वाय यस्मात् ॥ ४९ ॥ नवं नवं यथा भवति ॥ तथा रुचिरं रुचिप्रदं महोत्सवाय यस्मात् ॥ ५० ॥ विज्ञाणाप्रद

प्रविश्य पवित्रं तेन विपुलो न्यशोषयत् तमोऽर्कोऽभ्रमिवातिवातः ॥ ४८ ॥ मृषागिरस्ता ह्यसतीरसत्कथा यान्ति का ख्यापयन्ते भगवाननुधाव्रजः ॥ तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ४९ ॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ५० ॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्ध्वाङ्क्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५१ ॥ स वाग्विसर्गो जनताघसंप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ५२ ॥

नियस्मिन् ॥ तदपि जगत्प विज्ञयतीति ॥ तथा तद्ध्वाङ्क्षं येन शब्दगणीत न वर्णयेत ॥ तद्वचः काकतल्पनरागोरतिस्थानेन न तु हंसैर्नीतिभिः सेवितम् ॥ तत्र हेतुः यत्रेति ॥ ५१ ॥ स वाग्विसर्गः स एव वाग्व्यः प्रयोगः ॥ जनताघसंप्लवः ॥ जनसमूहाघनाशकः ॥ यद्यस्मान्नान्येव प्रत्येकः ॥ कोऽस्मिमानानि शृण्वन्ति ॥ श्रोतरि सति गायन्ति वा वेत्त्वयमेवं गृणन्ति ॥ इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिष्वेवादरः ॥ कार्य इत्याह ॥ ५२ ॥ नारायणाय नमः ॥

३५

उपचिताभिरुरुशक्तिभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्वयात्मन्येवोपरचितस्थिरजंगमालयाय तस्मै भगवते ॥ ६८ ॥ श्रीगुरुं नमस्करोति ॥ स्वसुखेति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः ॥ तेनैव व्युदस्तोऽन्यभावोऽन्यस्मिन्भावो यस्य तथाप्यजितरुचिराभिः लीलाभिः ॥ आकृष्टः सारः स्वसुखे गतं स्थैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोऽस्मि ॥ ६९ ॥ इति भावार्थदीपिकायां द्वादशः ॥ पुराणसंख्या कथिता तदेवादशाय याज्ञ मयरमानं दमहिमा नारदस्य शुकस्य च ॥ सर्वपुराणानां ख्यातो ज्ञवा विष्णुस्तत्र

उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय ॥ भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥ ६८ ॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयं ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥ ६९ ॥ **इति श्रीभागवते महापुराणे संहितायां पारमहंस्यां द्वादशोऽध्यायः ॥ १२ ॥** यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायन्ति यं सामगाः ॥ ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥ पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु नः ॥ ॥

नियायद्देवं परमतियमिति ॥ स्तवैर्वेदैः स्तुन्वन्ति स्तुवन्ति उपनिषद्भिः सम्यक्कारान्तस्य छन्दोऽनुरोधेन ध्यानेनावस्थितेनिश्चलेन तद्गतेन मनसा ॥ यस्यान्तं न विदुः सुरासुरगणाः तीरोदमथनादौ दृष्टमपि तत्त्वमेव पूर्वदर्शितं कर्मावतारमनुस्मरन्नाशिषं प्रार्थयते पृष्ठे इति ॥ पृष्ठे भ्राम्यन् ॥ यो मन्दरगिरिस्तस्य दृषदां ग्रावाणस्तेषामग्राणि तैः कण्डूयनाद्धेतोः निद्रालोः निद्राशीलस्य यः श्वासानिलास्तेषां कला अंशलेशास्तदनुवर्तनेन पान्तु ॥ ज

श्री॰
भा॰ मू॰
टी॰
१२

नत्रु मस्तुद्दत्तोभादेवनत ॥ नमस्कारस्वगात ॥ तत्राहवेल्लतोभस्तत्सानिभेनमिषेण ॥२॥ पुराणसंख्यासंभो
संभूतिंमस्यवाच्यंच ॥ अस्यतच्छ्रीभागवतस्यवाच्यंविषयप्रयोजनंचादानेचपाठादेश्चमाहात्म्यंचतितिबोधत

यन्नमस्कारकलानुवर्तनवशाद्धेलानिभेनांभसो यातायातमतंद्दितंजलनिधेर्नौयापिविश्राम्यति
२॥सूतउवाच॥ पुराणसंख्यासंभूतिमस्यवाच्यप्रयोजने॥ दानंदानस्यमाहात्म्यंपाठादेश्चनि
बोधत॥३॥ ब्राह्मंदशसहस्राणिपाद्मंपंचोनषष्टिच॥ श्रीवैष्णवंत्रयोविंश
च्चतुर्विंशतिशैवकं॥४॥ दशाष्टौश्रीभागवतंनारदंपंचविंशतिं
मार्कंडेयंनववाह्नंचदशपंचचतुःशतं॥५॥ चतुर्दशभ
विष्यंस्यात्तथापंचशतानिच॥ दशाष्टौब्र
ह्मवैवर्तंलिंगमेकादशै
वतु॥६॥ ॥श्री॥
कृष्णाय
नमः

३ त्रयोविंशत्त्रयोविंशतिः चतुर्विंशतिसहस्राणि शैवकं शिवपुराणं ४ वाह्नं तु अग्निपुराणं दशपंचसहस्राणि च

स्कंधे ५६॥

श्रीष्टपद्यां भाद्रपद्यां हेमसिंहसमन्वितं ग्रवर्णसिंहासनारूढं ॥ तद्रूपमेवास्तु तेतेनतत्समन्वितंतस्य ॥२५॥ परमहं
सपरमहंसः प्राप्येन श्रीकृष्णं सर्वकर्मा परमः भक्त्यानन्दुवर्णादिपूः ॥ विमुच्येत ॥ विमुच्यते ॥२६॥ श्रीभागवतस
प्रदायश्रवणेनकरूपेणाभगवद्ध्यानेनलज्ञाणामप्रलामावृंरति ॥ कस्मैरति ॥ कस्मैब्रह्मणेश्रुतलः श्रमसमः ॥ श्रयंश्री
भागवतरूपः ॥ पुराकल्पादौतद्रूपेणाब्रह्मरूपेणातद्रूपिणानारदरूपिणायोगीन्द्रायशुकायतद्वात्मनाशुकः

श्रीष्टपद्यां पौर्णमास्यां हेमसिंहसमन्वितं ॥ ददातियोभागवतंसयातिपरमांगतिं ॥२२॥ राजन्सन्तावदा
न्यानिपुराणानिसमंततः ॥ यावद्भागवतंनैवश्रूयतेऽमृतसागरं ॥२३॥ सर्ववेदान्तसारंहिश्रीभागव
तमिष्यते ॥ तद्रसामृततृप्तस्यनान्यत्रस्याद्रतिः क्वचित् ॥२४॥ निम्नगानांयथागंगादेवानामच्युतोय
था ॥ वैष्णवानांयथाशंभुः पुराणानामिदंतथा ॥ क्षेत्राणांचैवसर्वेषांयथाकाशीह्यनुत्तमा तथा
शास्त्रजातीनांश्रीमद्भागवतंद्विजाः ॥२५॥ श्रीमद्भागवतंपुराणममलंयद्वैष्णवानांप्रियंयस्मि
न्पारमहंस्यमेकममलंज्ञानंपरंगीयते ॥ यत्रज्ञानविरागभक्तिसहितंनैष्कर्म्यमाविष्कृतंतच्छृण्वन्वि
पठन्विचारणपरोभक्त्याविमुच्येन्नरः ॥२६॥ कस्मैयेनविभासितोयममलोज्ञानप्रदीपः पुरातद्रूपेणचना
रदायमुनयेकृष्णायतद्रूपिणायोगीन्द्रायतदात्मनाथभगवद्रातायकारुण्यतस्तच्छुद्धंविमलंविम
लंविशोकममृतंसत्यंपरंधीमहि ॥२७॥ ॥

रूपेण ॥ तत्परंसत्यंश्रीनारायणाख्यंतत्त्वंधीमहि ॥ नारायणैकवपुषोपक्रममुपसंहारम ॥ नायशाख्याब्रह्मविद्येय
मितिदर्शयति ॥ तमवदेवनारूपेणाग्रहरूपेणाचप्रणामतिनमस्त्वेतद्वाभ्या ॥२७॥ ॥ नारायणायनमः ॥

स्कांदंशताधिकैकाशीतिसहस्रकं ॥६॥ सैयांगीगारुडप्राणंएकोनविंशतः एकोनविंशतिः ॥७॥ महाभारते
तिनिदाम॥ रामायणंचऋषिप्रोक्तंकाव्यं ॥ एतःपुराणानांसंदोहस्य ॥ चतुर्लक्षसंख्याकस्यव उदानीमम्यवाच्यस्ये

चतुर्विंशतिवाराहमेकाशीतिसहस्रकं ॥ स्कांदंशतंतथाचैकंवामनंदशकीर्तितम् ॥९॥ कौर्मंसप्तद
शाख्यातंमात्स्यंतत्तुचतुर्दश ॥ एकोनविंशत्सौपर्णंब्रह्मांडंद्वादशैवतत् ॥१०॥ एवंपुराणसंदोह
श्चतुर्लक्षउदाहृतः ॥ रामायणंभारतंचव्याख्यातंकाव्येतिहासकं ॥ तत्राष्टादशसाहस्रंश्रीभाग
वतमिष्यतेइदंभगवतापूर्वंब्रह्मणेनाभिपंकजे ॥ स्थितायभवभीतायकारुण्यात्संप्र
काशितं ॥११॥ आदिमध्यावसानेषुवैराग्याख्यानसंयुतं हरिलीलाकथाव्रातामृता
नंदितसत्सुरं ॥१२॥ सर्ववेदांतसारंयद्ब्रह्मात्मैकत्वलक्षणं ॥ व
स्त्वद्वितीयंतन्निष्ठंकैवल्यैकप्रयोजनं ॥१३॥
नारायणायनमः ॥

जनादीन्वक्तुमाह नवेत्यादिना ॥८॥ हरिलीलाकथानांव्रातः समूहः सएवामृतंतेनानंदिताः संतःसु
राश्चयेनतत्तथा ॥९॥ तन्निष्ठंतद्विषयं ॥१०॥ ॥ नारायणायनमः ॥

श्री· भा·द्वा· टी· २४

नवमार्थमाह राजन्वंशोति ॥२७॥ सोमवंशादिभूतस्यैलस्य चरितं ॥ २५ ॥ ततस्तस्यभीष्मस्य ॥ २८ ॥ दशमार्थमाह तस्य कर्माणीति ॥ २७ ॥ सुतनायाः ॥ यस्य महितस्य स्तनपयमः पानपयसः पानम ॥ २८ ॥ सहभ्रातः समावस्य ॥ २९ ॥

कौमेंयमात्स्येनारसिंहं वामनं चजगत्पतेः ॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां ॥ २० ॥ देवासुरं महायुद्धं राजवंशानुकीर्तनं ॥ इक्ष्वाकुजन्मतद्वंशः सुद्युम्नस्य महात्मनः ॥ २१ ॥ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च ॥ सूर्यवंशानुकथनं शशादाद्या नृगादयः ॥ २२ ॥ सौकन्यं चाथ शर्यातेः काकुत्स्थस्य च धीमतः ॥ खट्वाङ्गस्य च मान्धातुः सौभरेः सगरस्य च ॥ २३ ॥ रामस्य कोसलेन्द्रस्य चरितं किल्बिषापहं ॥ निमेरङ्गपरित्यागो जनकानां च संभवः ॥ २४ ॥ रामस्य भार्गवेन्द्रस्य निःक्षत्रीकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥ २५ ॥ दौष्मन्तेर्भरतस्यापि शन्तनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः ॥ २६ ॥ यत्रावतीर्णो भगवान्कृष्णाख्यो जगदीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥ २७ ॥ तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः ॥ पूतनासुपयःपानं शकटोच्चाटनं शिशोः ॥ २८ ॥ तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः ॥ धेनुकस्य सहभ्रातुः प्रलम्बस्य च संक्षयः ॥ २९ ॥ गोपानां च परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं कालियस्याहेर्महाहेर्नन्दमोक्षणं ॥ ३० ॥ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं ॥ ३१ ॥ गोवर्धनोद्धारणं च शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥ ३२ ॥ शङ्खचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ ३३ ॥ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥ ३४ ॥ ॥ रामायनमः

यज्ञाभिषेकं ॥ यज्ञः इन्द्रयागस्तभिषेकश्च तयोर्द्वन्द्वैक्यम ॥ ३४ ॥ ॥ ❧ ॥ रामायनमः ❧ ॥

१४

प्राकृतिकः प्रकृतिभवः ॥ आद्यो भगवद्रूपः वैकृतिका महदादयः वैकारिकाद्याश्चैतयोस्तेषां च सर्गः ॥ ९ ॥ गतिः
स्वरूपं उद्धरणं उद्धारणं ॥ १० ॥ यथाशास्त्रानारीचनरस्मृतम् ॥ ११ ॥ संतानो धर्मपत्नीनां मितिनचवहन्समुत्पत्तिरित्यस्या
नेन संदृष्टव्यं ॥ १२ ॥ चतुर्थस्कंधार्थमाह ॥ नवब्रह्मणां मरीच्यादीनां सम्प्रवृत्तिः संतानः ॥ १३ ॥ पंचमस्कंधार्थमाह
ततः प्रैयव्रतं प्रियव्रतस्य चरितं ॥ १५ ॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेपतः ततो द्वीपादीनां यस्मिन्वयः ॥ नद्यस्तेषामुप

ततः प्राकृतिकः सर्गः सप्तवैकृतिकाश्च ये ॥ ततो ब्रह्माण्डसंभूतिर्वैराजः पुरुषो यतः ॥ ९ ॥ कालस्य स्थूलसू
क्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुव उद्धरणेऽम्भोधौ हिरण्याक्षवधो यथा ॥ १० ॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथै
व च ॥ अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः ॥ ११ ॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ संतानो धर्म
पत्नीनां कर्दमस्य प्रजापतेः ॥ १२ ॥ अवतारो भगवतः कपिलस्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन
च धीमता ॥ १३ ॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ १४ ॥ ना
रदस्य च संवादस्ततः प्रैयव्रतं द्विजाः ॥ नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च ॥ १५ ॥ ततो द्वीपसमुद्राद्रिवर्षन
द्युपवर्णनं ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥ १६ ॥ दक्षजन्म प्रचेताभ्यस्तत्पुत्रीणां च सं
ततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥ १७ ॥ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्ये
श्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ १८ ॥ मन्वन्तरानुचरितं गजेन्द्रस्य च मोक्षणम् ॥ मन्वन्तरावताराश्च
विष्णोर्हयशिरादयः ॥ १९ ॥

वर्णनं पातालनरकादीनां च स्थितिः ॥ एतेनैव नरकनिवर्त
कमजामिलोपाख्यानं गृहीतम् ॥ ततः परां षष्ठार्थमाह दक्षजन्मेति ॥ १६ ॥ सप्तमार्थमाह ॥ त्वाष्ट्र
स्येति ॥ १७ ॥ अष्टमार्थमाह ॥ मन्वन्तरानुचरितमिति ॥ क्वचित्किंचित्सविदस्युक्तिः सुमुक्ति
मोक्षे भक्तिरमानुकूलत्वेनेति द्रष्टव्यं ॥ १९ ॥ ॥

श्री· भाग· टी· २५

व्याचचक्षे याख्यातवान् ॥ २४ ॥ विस्मृतं नैव रोचितं ते ॥ २५ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां अष्टादशसाहस्र्यां अष्टादशसाहस्र्यां संहितायां भावार्थदीपिकायां द्वादशस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ भावार्थदीपिकामेतां भगवद्भक्तवत्सलः । परमानंदपादाब्जभृंगः श्रीधरोऽकरोत् ॥ २ ॥ स्वबालचपलालापैः स्व-

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ २४ ॥ योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥ २५ ॥ भवे भवे यथा भक्तिः पादयोस्तव जायते ॥ तथा कुरुष्व देवेश नाथस्त्वं मे यतः प्रभो ॥ २६ ॥ नामसंकीर्तनं यस्य सर्वपापप्रणाशनं ॥ प्रणामो दुःखशमनस्तं नमामि हरिं परं ॥ २७ ॥ इति श्रीभागवते महापुराणे वैयासिक्यां संहितायां द्वादशस्कंधे पुराणसंख्यावर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ समाप्तमिदं श्रीभागवतं नाम महापुराणमित्योम् ॥ शुभमस्तु ॥ ॥ रामाय नारायणाय नमः ॥ श्रीकृष्णाय ॥ नमः ॥ ॥

बालचपलालापैः स्वलीलापरिवर्जितैः ॥ प्रीयतां परमानंदः सद्गुरुः स्वयं ॥ १ ॥ श्रीपरमानंदसंप्रीत्यै रासे भागवते मया ॥ विहितं तन्मनो नेदं न नमन्यातिविभवात् ॥ २ ॥ समाप्ता चेयं श्रीपरमानंदपादशिष्यश्रीश्रीधरस्वामिविरचिता श्रीभागवतमहापुराणटीकेयं ॥ ॐकारपीठनिरतो परवान्नवस्यावीजे सद्देवदयनीमसंकाशराजेशनतान्वितोकपरः ॥ श्रीमशाहनुपाडमोनमामाम्यदो त्रिपुरांच भक्तो ॥ ॥ २ ॥ संवत् १८५

श्री· भ· २५

ततो बलेः सकाशादभवत् ॥ तस्य बलेरनुभावमनुभावः स्तम्भो कंपुराणकीर्त्यर्द्देः यद्वाः नुभावमेसङ्किं स्तयते ॥ स्तनुभावं ॥ स्तम्भोकं यशाइतिशोव ॥ २६ ॥ तस्य गणेषु मुख्यस्तं शाधानं ॥ २७ ॥ सात्म मां समानेत्रय ना ॥ देवत्वं प्रापिता ॥ २० ॥ प्राट ते सादं ॥ प्रत्यमिततां हतं ॥ प्रथिव्दूर्थ्यं पुक्तं ॥ सनमयतमाश्रयो यस्य हेस यणारौवका ॥ २१ ॥ पार्लियादेनेहृतः सहायेन ॥ २२ ॥ मान्दहंतारं इंद्रं मारयित्वा स्वर्गविनीस्वामि प्रत्तुल्यादस्य सर्वां योवाप्तलोम हिवस्तया ॥ विरोचनस्तु प्राह्लादिर्दैत्यांतस्याभवद्बलिः ॥ २४ ॥ बाणज्येष्ठं पुत्रशतमशुनायां ततोभवत् ॥ तस्यानुभावं च श्लोकं पश्चाद्देवाभिधास्यते ॥ २५ ॥ बाणआराध्य गिरिशं लेभे तद्गणमुख्यतां ॥ यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥ २७ ॥ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ॥ त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मतां ॥ २८ ॥ रा जोवाच ॥ कथंत आसुरं भावमपोह्यौत्पत्तिकं गुरो इंद्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥ २९ ॥ इमेश्रद्दधते ब्रह्मन्नृषयो हि मया सह परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥ ३० ॥ सूत उवाच ॥ तद्विष्णुरातस्य स वादरायणिर्वचो निशम्यादृतमल्पमर्थवत् ॥ सभाजयन्संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः ॥ ३१ ॥ शुक उ० ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत् ॥ ३२ ॥ कदा नु भ्रातृहंतारमिन्द्रियारामदुर्मदं ॥ अक्लिन्नहृदयं पापं घातयित्वा शयेसुखं ॥ ३३ ॥ कृमिविड्भस्मसंज्ञासीद्यस्येशाभिमानिनः ॥ भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः ॥ इति चिंतयामास दितिः ॥ उल्बणं क्रूरं अक्लिन्नहृदयं कठिनचित्तं ॥ ३२ ॥ तनुराजात्मदेहदस्तार्य मवेषां वातं करोत्येव किमस्य चिन्तनगाह ॥ किमीति ॥ ईशाः प्रभुरित्यभिमानिनः स्यापि य स्य पूर्वं पारातो दहमरणानंतरं ॥ कि मिविड्भस्माना वशिष्यत सकिमयहुतिस्थादिभिर्भक्षितस्य तु विष्ठैव ॥ दग्धस्य भ

श्री·
भा· ष·
५८

इंद्रं द्रोहादिकं ध्रुवं निश्चितं आशासानस्य मन्यमानस्य प्रत उन्नद्धं उद्धतं चेतो यस्य तस्य इंद्रस्य यो मदस्तस्य शोषकः पुत्रो मे येन हेतुना भूयात्तथैव त्वं ॥२५॥ भर्तुः प्रियाचरणमेव विभावेन सा भर्तुः प्रियमसकृदाचचार ॥२६॥२७॥ विवशो ह्रीपरतंत्रः सन् ॥ बाढं तव मनोरथं पूरयिष्यामीति यदाह तत्र चित्रं ॥२८॥ तत्र हेतुमाह विलोक्येति ॥ एकांतभूतानि निःसंगानि ॥ मैथुनेन सृष्टिवृद्ध्यर्थं स्वदेहार्धमेव स्त्रियं चक्रे ॥२९॥

आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ॥ मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे ॥२५॥ इति भावेन सा भर्तुराचचारासकृत्प्रियं ॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥२६॥ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो जग्राह भावज्ञा सस्मितापांगवीक्षणैः ॥२७॥ एवं स्त्रिया जडीभूतो विद्वानपि मनोज्ञया ॥ बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥२८॥ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः ॥ स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता ॥२९॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया ॥ प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ॥३०॥ ॥कश्यप उवाच॥ ॥ वरं वरय वामोरु प्रीतस्तेऽहमनिंदिते ॥ स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥३१॥ पतिरेव हि नारीणां दैवतं परमं स्मृतं ॥ मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥३२॥ स एव देवतालिंगैर्नामरूपविकल्पितैः ॥ इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ॥३३॥

एवं स्त्रिया शुश्रूषितः सन् ॥३०॥ इह च कारात्परत्र च आगमः प्रमाप्यः ॥३१॥ तत्र परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह ॥ पतिरेवेति मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः ॥ एवं देवमिति प्रसिद्धं सत्यम् ॥ स एव साधिकारेण रूपभेदैः पूज्यत इत्याह ॥ मानस इति सार्धेन देवतानां लिंगैर्मूर्तिभिः उपलक्षितः नामेत्याह ॥ नाम इंद्रादि रूपं वज्रहस्तत्वादि ताभ्यां विविधं कल्पितः ॥३३॥ ॥

५८

प्रतिशापंदातुमलंतमः समर्थतमोपि ||३८|| असुरयोनावेवसुरभावेनोत्पत्तेर्भगवतिभक्तेश्च ||३९|| एतदेवं ४०
इतिषष्ठस्कंधेसप्तदशः ||१७|| आदित्यानांचतुर्थस्यत्वष्टुर्वंशप्रसंगतः || प्रोक्तमिंद्रकृतंविश्वरूपहत्यावधादि
कं || १ || पृश्निरिति पंचमादीनांपुत्राणामन्वयोक्तितः अष्टादशेदितेर्गर्भेशक्रेणमरुतांभिदा ||१|| त्वष्टुर्वंशम
नुक्रम्यप्रसंगंयथाक्रमं || आदित्यानामथान्येषांवंशानाहमुनीश्वरः ||२|| दत्तकन्यान्वयानुकथनेअ
दित्यांद्वादशपुत्राः प्रोक्ताः विवस्वानर्यमापूषात्वष्टाथसविताभगः || धाताविधातावरुणोमित्रः शक्र

इतिभागवतोदेव्याः प्रतिशप्तुमलंतमः || मूर्ध्नासंजगृहेशापमेतावत्साधुलक्षणम् ||३८|| जज्ञे
त्वष्टुर्दक्षिणाग्नौदानवींयोनिमाश्रितः || वृत्रइत्यभिविख्यातोज्ञानविज्ञानसंयुतः ||३९|| एतत्ते
सर्वमाख्यातंयन्मांत्वंपरिपृच्छसि || वृत्रस्यासुरजातेश्चकारणंभगवन्मतेः ||४०|| इतिहासमिमंपु
ण्यंचित्रकेतोर्महात्मनः || माहात्म्यंविष्णुभक्तानांश्रुत्वाबंधाद्विमुच्यते ||४१|| यएतत्प्रातरुत्था
यश्रद्धयावाग्यतः पठेत् || इतिहासंहरिंस्मृत्वासयातिपरमांगतिम् ||४२|| इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेसप्तदशोध्यायः ||१७|| श्रीशुकउ० || पृश्निस्तुपत्नीसवितुः सावित्रींव्याहृतिंत्रयीं
अग्निहोत्रंपशुंसोमंचातुर्मास्यंमहामखान् ||१|| सिद्धिर्भगस्यभार्यांगमहिमानंविभुंप्रभुम् आ
शिषंचवरारोहांकन्यांप्रासूतसुव्रतां ||२|| धातुः कुहूःसिनीवालीराकाचानुमतिस्तथा ||
सायंदर्शमथप्रातः पूर्णमासमनुक्रमात् ||३|| अग्नीन्पुरीष्यानाधत्तक्रियायांसमनंतरः ||४||

उरुक्रमइति || तत्रादौधातादीनांतरमात्मविस्तरेणवक्ष्यमाणत्वात्तेः नत्वष्टुर्वंशमनुवर्णयिष्यन्सवितुर्वं
शमाह || पृश्निरिति || सावित्रीमित्यादिपुत्राः सूतेत्यनुवर्त्स्यानुषंगः || पशुंपशुयागंमहामखान्पंच
यज्ञान् ||१|| धातुर्भार्याकुहूः सायंपुत्रमसूत || एवंसिनीवालीदर्शमित्यनुक्रमात् || समनंतरोवि

चर्षणी वरुणस्य भार्यासीत ॥ पूर्वं ब्रह्मणः पुत्रो भृगुः यस्यां पुनर्जातः वाल्मीकिर्वरुणस्यैव पुत्रोऽभूत् ॥ पत्नीव रुणस्य साधारणी पुत्रौ तयोरुत्सर्गादयो मित्रस्यासाधारणाः तयोरेव साधारणौ पुत्रौ द्वौ चाह ॥ अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोरभवतां ॥ यत्प्रभावयितुं कुंभे रेतः सिषिचतुः संवेदृत्ताता विषितात्मनोर्भिः कुंभे रेतः सिषिचतुः समानमिति श्रुतेः द्रुतं क्रत्वा ॥५॥८॥ पश्चाद्वक्ष्यामहे स्कंधे ॥९॥ अथेति कश्यपदायादैः पुत्राणां द्वादशादि

चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ॥४॥ अगस्त्यश्च वसिष्ठश्च मित्रावरुणयो ऋषी ॥ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतम् ॥५॥ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ पौलोम्यामिंद्र आधत्त त्रीन्पुत्रानिति नः श्रुतं ॥६॥ जयंतमृषभं तात तृतीयं मीढुषं प्रभुः ॥७॥ उरुक्रमस्य देवस्य मायावामनरूपिणः ॥ कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः ॥ पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥८॥ अथ कश्यपदायादान्दैतेयान्कीर्तयामि ते ॥ यत्र भागवतः श्रीमान्प्रह्लादो बलिरेव च ॥९॥ दितेर्द्वावेव दायादौ दैत्यदानववंदितौ ॥ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥१०॥ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ॥ जंभस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥११॥ संह्रादं प्रागनुह्रादं ह्रादं प्रह्रादमेव च ॥ तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥१२॥ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतं ॥ संह्रादस्य कृतिर्भार्यासूत पंचजनं ततः ॥१३॥ ह्रादस्य धमनिर्भार्यासूत वातापिमिल्वलं ॥ योऽगस्त्याय त्वतिथये पेचे वा

सातां संततिमुक्त्वा दितेः पुत्रान्कथयामीत्यर्थः हिरण्यकशिपुर्हिरण्याक्षश्च प्रथमं द्वावेव ॥ तौ च कीर्तितौ तृतीयस्कंधे ॥११॥ विप्रचितो दानवाद्भर्तुः सकाशाद्राहुं पुत्रमग्रहीत् ॥१२॥ ततः संह्रादादसूत ॥१३॥ योऽमेषरूपं वातापिं पेचे तमिल्वलः ॥ यः पेचे तं च वातापिं चासूतेत्यन्वयः ॥१४॥ ॥॥

ननैवं भूतविषमस्य शीलस्य किं कारणं प्रियादिवैषम्याभावादित्याशंक्य यथा चित्रियादयो न संति
तथापि न तत्कर्मैव पापात्मकं वंवदतत्त्वाह न तस्येति द्वाभ्यां ॥ प्रतीपः अप्रियः न ज्ञातिर्वंधुः श्रेष्ठः स्वर्यः
सर्वत्र समस्य ॥ ततः कुतो निरंजनस्य निःसंगस्य ॥ अतएव न त्रिमिते सुखे रागो नास्ति ॥ रागाद्युद्भवो
दोषः कुतः स्यात् ॥ २५ ॥ यद्यप्येवं तथापि तस्य शक्त्यात्मा मायया यो विसर्गः पुण्यपापादिलक्षणं

न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिवंधुर्न परो न च स्वः ॥ समस्य सर्वत्र निरंजनस्य
सुखे न रागः कुत एव रोषः ॥ २५ ॥ तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिता
य बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतये वकल्पते ॥ २६ ॥ अथ प्रसादये न
त्वां शापमोक्षाय भामिनि ॥ यन्मन्यसे ह्यसाधूक्तं मम तत्क्षम्यतां सति ॥ २७ ॥ इति प्रसा
द्य गिरिशौ चित्रकेतुररिंदम ॥ जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २८ ॥ त
तस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् ॥ देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वता
म् ॥ २९ ॥ दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः ॥ माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महा
त्मनां ॥ ३० ॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति ॥ स्वर्गापवर्गनरकेष्वपि

कर्मपथायो शरीरिणां सुखाद्यर्थमेव कल्पते समर्थो भवति ॥ यथोक्तं ॥ तुल्यार्थदर्शिनः ३१
गीतासु ॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति ॥ २६ ॥ अथ तस्मात् ॥ हे भामिनि तिकोपु
नेनात्केवलं प्रसादयामि ॥ न तु शापमोक्षाय ॥ नहि किं प्रसादनेन अतस्मात् ॥ ममसाधूक्तं इति
साधु वन्मन्यसे तत्क्षम्यतां ॥ २७ ॥ गिरिशौ भवानीशंकरौ प्रसाद्य ॥ स्मयतोर्विस्मयं कुर्वतोः

नवत्तदुक्तमेवहेतुमाहद्वाभ्यां॥ देहिनांसुखदुःखेमिथ्यादिद्वंद्वानि॥ ईश्वरस्यलीलयामाययाभवे-
न्ति॥२९॥ तेषुचगुणदोषविकल्पश्चमेवात्मन्यपिइत्यानिभेदइवयःस्फुरति॥ आत्मन्यर्थभेदःपुंसःस्व-
भेद्यथाःविवेककृतोभवति॥ स्रजिवत्सर्पमालादिभिदायथाततदेवकृतइत्यर्थः॥ स्रग्वदितिव-
क्तव्येस्रजिवदितिमार्षःपाठांतरंतुस्रग्गामं॥३०॥ अतोभगवद्भक्तानांनिःस्पृहत्वमुचितमेवेत्याहवास-

देहिनांदेहसंयोगाद्द्वंद्वानीश्वरलीलया॥ सुखंदुःखंमृतिर्जन्मशापोनुग्रहएवच॥२९॥ अ-
विवेककृतःपुंसोह्यर्थभेदइवात्मनि॥ गुणदोषविकल्पश्चभिदेवस्रजिवत्कृतः॥३०॥ वा-
सुदेवेभगवतिभक्तिमुद्वहतांनृणां॥ ज्ञानवैराग्यवीर्याणांनेहकश्चिद्व्यपाश्रयः॥३१॥ ना-
हंविरिंचोनकुमारनारदौनब्रह्मपुत्रामुनयःसुरेशाः॥ विदामयस्येहितमंशकांशकानतत्स्व-
रूपंपृथगीशमानिनः॥३२॥ नह्यस्यास्तिप्रियःकश्चिन्नाप्रियःस्वःपरोपिवा॥ आत्मत्वात्स-
र्वभूतानांसर्वभूतप्रियोहरिः॥३३॥ तस्यचायंमहाभागश्चित्रकेतुःप्रियोनुगः॥ सर्वत्र
समदृक्शांतोह्यहंचैवाच्युतप्रियः॥३४॥ तस्मान्नविस्मयःकार्यःपुरुषेषुमहात्मसु॥ महापु-
रुषभक्तेषुशांतेषुसमदर्शिषु॥ श्रीशुकउ॥ इतिश्रुत्वाभगवतःशिवस्योमाभिभाषितं॥ बभू-
वशांतधीराजन्देवीविगतविस्मया॥३६॥

देवइतिज्ञानवैराग्यवीर्याणांयेषांतेषांव्यपाश्रयःविशिष्टबुद्ध्याआश्रयणीयोर्थोनास्ति॥
३१॥ अस्यचहरेरीदृशत्वेनतत्स्वभावत्वान्नचित्रमितिवक्तुंहरेर्माहात्म्यमाहनाहमितिद्वाभ्यां॥
ईहितमभिप्रायंलीलांवायद्वावयंनविद्मःतदातत्स्वरूपमंशकांशकाअपिसंतःपृथगीशमा-
मानिनोनविद्युरेव॥३२॥ अतएवहरेरपिसर्वेषांभूतानांप्रियेऽप्यहंचैवाच्युतप्रियःनस्मात्ममे-
मास्तिचत्वमोद्योतस्पृहेतिभावः॥३५॥

ष्टका४

६५

मत्तः सह ॥ ६६ ॥ ६७ ॥ दित्या हि निष्कपटमुक्ते सति इंद्रोपि निष्कपटमेवाह ॥ एवं वेति लब्ध्यमंतरं येन ॥ अर्थे एव बुद्धिर्यस्य ॥ न तु धर्मे ॥ ७० ॥ ७१ ॥ अपि परं मोक्षमपि ॥ ७३ ॥ गुणस्पर्शं विषयभोगं ॥ बुधः को वृणीत ॥ यद्यस्मान्न

मनु सिंद्रेणपंचाशद्देवास्ते मरुतोभवन् ॥ अपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥ ६६ ॥ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इंद्रेण सहितान्देवी पर्यतुष्यदनिंदिता ॥ ६७ ॥ अथेंद्रमाह ताताहमादित्यानां भयावहं ॥ अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुष्करं ॥ ६८ ॥ एकः संकल्पितः पुत्रः सप्त सप्ताभवन्कथं ॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा ॥ ६९ ॥ इंद्र उवाच ॥ अंब तेहं व्यवसितमुपधार्यागतोंतिकं ॥ लब्धांतरोच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७० ॥ कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ॥ तेपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७१ ॥ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया ॥ महापुरुषपूजायाः सिद्धिः काप्यानुषंगिणी ॥ ७२ ॥ आराधनं भगवत ईहमाना निराशिषः ॥ ये तु नेच्छंत्यपि परं ते स्वार्थकुशलाः स्मृताः ॥ ७३ ॥ आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरं ॥ को वृणीत गुणस्पर्शं बुधः स्यान्नरकेपि यत् ॥ ७४ ॥ तदिदं मम दौर्जन्यं बालिशस्य महीयसि ॥ क्षंतुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥ ७५ ॥ श्रीशुक उ॰ ॥ इंद्रस्तयाभ्यनुज्ञातः शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७६ ॥ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ मंगलं मरुतां जन्म किं भूयः कथयामि ते ॥ ७७ ॥ इति श्रीभागवते षष्ठस्कंधे अष्टादशोध्यायः ॥ १८ ॥

रकेपि स्यात् ॥ ७४ ॥ महीयसि हे महत्तमे ॥ मृतः सन् उत्थितः ॥ ७५ ॥ ७६ ॥ इति श्रीभागवते षष्ठस्कंधे अष्टादशोध्यायः १८ ॥ ॥

पुंसवनं प्रवृत्तिकरं तन्मंतव ॥५१॥ ५२॥ हरिरिंद्रो व्रतस्य छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः साधुवेषः स मृगहा लुब्धको यथा मृगवेषं च नायमृगावेशो भवति तद्वत ॥५३॥ केन मे श्रेयः स्यादिति चिंतां प्राप्तः ॥५४॥ अस्पृष्ट

सांवत्सरं पुंसवनं व्रतमेतदविप्लुतं ॥ धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥५३॥ बाढमित्यभ्युपेत्याथ दिती राजन्महामनाः ॥ काश्यपं गर्भमाधत्त व्रतं चांजो दधार सा ॥५४॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥५५॥ नित्यं वनात्सुमनसः फलमूलसमित्कुशान ॥ पत्रांकुरमृदोपश्च काले काल उपाहरत ॥५६॥ एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ॥ प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥५७॥ नाध्यगच्छद्व्रतच्छिद्रं तत्परोथ महीपते ॥ चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥५८॥ एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ॥५९॥ लब्ध्वा तदंतरं शक्रो निद्रापहृतचेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया ॥६०॥ चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम ॥ रुदंतं सप्तधैकैकं मा रोदीरिति तान्पुनः ॥६१॥ ते तमूचुः पात्यमानाः सर्वे प्रांजलयो नृप ॥ नो जिघांससि किमिंद्र भ्रातरो मरुतस्तव ॥६२॥ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो मरुतां गणान ॥६३॥ न ममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान ॥६४॥ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यतां ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥६५॥

वार्यस्पृष्ट्वा सा अधौतांघ्रिश्च ॥५९॥ निद्रयापहृतं चेतो यस्याः ॥६०॥ मा रोदीरित्युपलालयन्निव तान्पुनः सप्तधा चकर्त विच्छेद ॥६२॥ कौशिक इंद्रः गणान् सप्तगणान्वै मरुत इति श्रुतेः ॥६३॥

श्री॰ भा॰
ष॰ टी॰
५५

कार्याण्यावश्यकानि व्रतयानि न व्रतिन्यावश्यकानि। न च निषिद्धानि किं तन्मपृष्टत्तानाह॥ तानि सर्वाण्यपि
ब्रूहि॥४५॥ तत्रैकविंशतिं निषेधानाह॥ न हिंस्यादिति पंचभिः॥ न शपेन्नाक्रोशेत्॥ यदमंगलं नकपालास्था
दिकं तन्न स्पृशेत्॥४६॥ नाप्सु प्रविश्य स्नायात्॥ पूर्वं विधृतां स्रजं पुनर्न धारयेत्॥४७॥ भोजने पंच निषे
धानाह॥ नोच्छिष्टमिति॥ चंडिकान्नं भद्रकाल्यै निवेदितं सामिषं॥ पिपीलिकादिदूषितं वा॥ अंजलि

दितिरुवाच॥ धारयिष्ये व्रतं ब्रह्मन् ब्रूहि कार्याणि यानि मे॥ यानि चेह निषिद्धानि न व्रतं घ्नंति या
न्युत॥४५॥ कश्यप उवाच॥ न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत्॥ न छिंद्यान्नखरोमाणि
षिवाणिज्यादिलक्षणा वृत्तिर्वैश्यस्य ॥ शूद्रस्य द्विजशुश्रूषा विहिता ॥ स्वामिनो हि तस्य तच्छुश्रूषा हत्तिश्च ॥ २२ ॥ विप्रस्य वृत्त्यां तु कल्पभेदेन हस्तेन राणाह ॥ वार्त्ता विविक्ता कृ ष्यादिरूपा शालीनं याच्ञाविनैव प्राप्तमप्याचितं ॥ यायावरं प्रत्यहं धान्यप्राप्यादिक्षिलम् ॥ शा लितेषादो ॥ स्वामित्यक्तकणिशोपादानं ॥ उंछनं आपणादिपतितकणोपादानं शिलोंछ नं द्वयमेकीकृत्य ॥ चतुर्धा इत्युक्त ॥ श्रेयसी उत्तमा ॥ २१ ॥ इति श्रेष्ठव्यवस्था दर्शायत ॥ आपह

आत्मेति दैवतेति च बुद्धिः ॥१०॥ श्रवणश्रीकृष्णस्य श्रवणादयो नव ॥ इज्या अर्चनं ॥ एवंविधास्त्रिंशल्लक्षण
वान् ॥११॥ इदानीं वर्णधर्मान् ॥ वक्तुं द्विजानां लक्षणमाह ॥ संस्कारा यस्य अवेतो गर्भाधानादयो य
स्मिन् ॥ नविच्छिन्नाः स द्विजः तर्हि शूद्रस्यापि संस्कारा विद्यंते स किं द्विजत्वस्यान्नमाह ॥ अतोऽय
मादयमेवंभूतसंस्कारयुक्तं जगाद ॥ स द्विजः शूद्रे तन न मंत्रवत्संस्कारयुक्तं जगाद न चोपन
यनवंत ॥ अतो नासौ द्विजः ॥ तथा च स्मृतिः विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ॥ न केन
चित्समसृजच्छंदसां प्रजापतिरिति श्रुतिः गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं ॥ जग

ब्रह्माद्याद्यैः संविभागो भूतेभ्यश्च यथार्हतः ॥ तेषामात्मदेवताबुद्धिः सततं स्तरपांडव ॥१०॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ॥ सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ॥११॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति ॥१२॥
संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यं ॥ इज्याध्ययनदानानि विहितानि द्विजन्मनां ॥
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥१३॥

त्या वैश्यं न केनचिच्छूद्रमिति ॥ अतो विवाहश्चेति
रिक संस्कारस्य नावश्यकत्वात् उपनयनस्य तु सर्वथा निषेधाच्च न तस्य द्विजत्वमित्यर्थः ॥ प्रावांतरे
वैदिकादय इति ॥ गर्भाधानादय इत्यर्थः ॥ त्रैवर्णिकानामावश्यकान्धर्मानाह ॥ इज्येति ॥१३॥ ज
न्मना विशुद्धेन कुलेन कर्मणा च ॥ आचारेण ॥ अवदातानां शुद्धानामाश्रमचोदिताः चेतानि
विहितानीत्यर्थः ॥ ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च स्युः वर्णधर्मा एव ॥ आश्रमभेदकृत

भा० सटी० ८६

नतु स्मृतिकारैर्धर्म उक्त एव ॥ तत्राह ॥ नारायणपरा इति ॥ ४ ॥ श्रुतायश्रीनारायणाय तस्मै एवं मुखो
क्ते ॥ ५ ॥ तस्य वा आत्मनः श्रवणं संभावयन् विशिनष्टि य इति ॥ ६ ॥ प्रथमं तावद्धर्मे प्रमाणमाह
धर्मस्य मूलं प्रमाणं स्मृतं च ॥ स्मृतिः तद्विदां वेदविदां येन चात्मा मनः प्रसीदतीति तथा च या
ज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमि
दं स्मृतमिति ॥ मनुश्च ॥ वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां ॥ आचारश्चैव साधूना

नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ॥ करुणाः साधवः शांतास्त्वद्विधा न तथापरे ॥ ४ ॥
नारद उ० ॥ नत्वा भगवतेऽजाय लोकानां धर्मसेतवे ॥ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः
लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥ धर्ममूलं हि भगवान्सर्ववेदमयो हरिः
स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ॥ ७ ॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं ॥ ८ ॥ संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥ ६ ॥ स्वदेहतत्वे ॥ वक्ष्ये सनातनं धर्मं नारा
यणमुखाच्छ्रुतं ॥ ५ ॥

मात्मनस्तुष्टिरेव चेति ॥ ७ ॥ तत्र तावत्सर्वसाधारणं धर्ममाह ॥ स
त्यमिति पंचभिः ॥ तपः एकादश्युपवासादि ॥ ईक्षा युक्तायुक्तविवेकः ॥ शमो मनसः संयमः
दमो मनसः संयमः ॥ दमो बाह्येंद्रियाणां त्यागो दानं ॥ स्वाध्यायो यथोचितं जपः वाचः ॥ ८
संतोषो यादृच्छलाभेन अलंबुद्धिः समदृशां महतां सेवा ॥ ग्राम्येहोपरमः प्रवृत्तिकर्मभ्यो निवृ
त्तिः विपर्ययेहेक्षा निष्फलक्रियाणामीक्षणं ॥ मौनं वृथाप्रलापनिवृत्तिः आत्मविमर्शो

विमानयानानि संकुलानि संकीर्णानि येषां ते देवा दृष्टाः ॥ ६९ ॥ आदित आरभ्य स्कंधार्थं निगमयति ॥ एवंविधानीति ॥ नरलोकं नराकारमात्मनो विडंबमानस्यानुकुर्वतः ॥ ७० ॥ इति श्रीसप्तमस्कंधटीकायां दशमोऽध्यायः ॥ १० ॥ एकादशे नराणां धर्माः साधारण्येन वर्णिताः । विशेषेण च वर्णानामाश्रमाणां च योषितां ॥ १ ॥ एवं दशभिरध्यायैर्भक्तियो

दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः ॥ देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ॥ ६८ ॥ अवाकिरन्जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥ एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ॥ ६९ ॥ ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमात्मनः वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किं ॥ ७० ॥ इति श्रीभागवते सप्तमस्कंधे युधिष्ठिरसंवादे त्रिपुरविजयो नाम दशमः ॥ १० ॥ श्रीशुक उ० श्रुत्वेहितं साधु सभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः युधिष्ठिरो दैत्यपतेर्मुदान्वितः पप्रच्छ भूयस्तनयं स्वयंभुवः ॥ १ ॥ युधिष्ठिर उवाच ॥ भगवन्श्रोतुमिच्छामि नृणां धर्मं सनातनं ॥ वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं ॥ २ ॥ भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः ॥ सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३

गात्तु दीरितो ॥ अथ पंचभिरध्यायैः कर्मयोगोऽत्र वर्ण्यते ॥ २ ॥ दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतमीहितं चरितं श्रुत्वा तु नन्नारदं पप्रच्छ कथंभूतस्य महत्तमानामग्रण्यः मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य ॥ १ ॥ श्रवणेच्छाया हेतुः यत ॥ यतो धर्मा

तस्मउद्धिताद् ॥ परंसांतंभक्तिंचविंदते ॥ १

श्री॰ भा॰ स॰ टी॰ ७

किंच संतुष्टा यथालाभेन। तावन्मात्रभोगेष्वलोलुपा। दक्षा अनलसा। प्रियासत्या च वाग्यस्याः। सर्वत्रापि अप्रम-
त्ता। अवहिता। अपतितं महापातकरहितं। यथाह याज्ञवल्क्यः। आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति
॥ तत्परा सती भजेत्॥ श्रीः हरिमिव॥ हर्यात्मना पत्या सह॥ प्रतिलोमजातीनां वृत्तिमाह॥ वृत्तिरिति॥ तत्त-
त्कुलकृता कुलपरंपराप्राप्ता॥ परंपराप्राप्तमपि चौर्यहिंसादिकं च निषेधति॥ अचौराणामपापानां चेति॥ त-
त्र प्रदर्शनार्थं॥ कांश्चित्प्रतिलोमजविशेषानाह॥ अंत्यजेति॥ रजकश्चर्मकारश्च नटो बुरुड एव च॥ कैवर्तमेद

संतुष्टालोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक्॥ अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत्॥ या पतिं ह-
रिभावेन भजेच्छ्रीरिव तत्परा॥ हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते॥ २९॥ वृत्तिः संकरजातीनां तत्त-
त्कुलकृता भवेत्॥ अचौराणामपापानामंत्यजांतेवसायिनां॥ ३०॥ प्रायः स्वभावविहितो नृणां धर्मो यु-
गे युगे॥ वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत्॥ ३१॥ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् क
हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात्॥ ३२॥

भिल्लाश्च सप्तैते अंत्यजाः स्मृताः॥ अंतेवसायिनस्तु चं-
डालपुक्कसमातंगादयः तेषां परंपराप्राप्तमेव वर्तनं निर्णेजनादि न तु चौर्यादीत्यर्थः॥ श्रेष्ठादपि परधर्मात्स्वो-
ऽपि स्वधर्म एव श्रेयानित्याह॥ प्राय इति॥ ३१॥ स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः प्रामाण्यं तस्य वद-
न्नुः स्मृतः वेददृग्भिः इत्युक्तं चत्तुः यथोक्तं भगवता चोक्तं॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥ स्व-
धर्मे निधनं श्रेयः परधर्मो भयावह इति तत्तु स्वाभाविकर्मकरणं बंधहेतुत्वात् कथं मुक्तिहेतुस्तत्राह वृ

चतुर्विधं पूर्वोक्तं विप्रवृत्तिमिति तेषामपि दर्शयन्नाह ॥ ऋतामृताभ्यामिति श्लोकं व्याचष्टे ॥ ऋतमिति ॥ २०
तयोर्महत्त्वे हेतुमाह सर्ववेदमय इति ॥ २३ ॥ वर्णानामभिव्यंजकरूपाण्यभिनीतानाह ॥ शम इति चतुर्भिः
अच्युतात्मत्वं श्रीविष्णुरूपत्वं ॥ २४ ॥ शौर्यं युद्धोत्साहः वीर्यं प्रभावः तेजः प्रागल्भ्यं ॥ २५ ॥ अमंत्रयज्ञः नमस्का
रेणैव पंचयज्ञानुष्ठानं ॥ तथा च याज्ञवल्क्यः ॥ नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति ॥ २७ ॥ २८ ॥ स्त्री

ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ २० ॥ ऋतमुंछशि
लं प्रोक्तममृतं यदयाचितं ॥ मृतं तु नित्ययाच्ञा स्यात्प्रमृतं कर्षणं स्मृतं ॥ २१ ॥ सत्यानृतं तु वाणिज्यं
श्ववृत्तिर्नीचसेवनं वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सितां ॥ २२ ॥ सर्ववेदमयो विप्रः सर्वदेवमयो
नृपः ॥ २३ ॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणं २४
शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणं ॥ २५ ॥ देवगु
र्वच्युते भक्तिस्त्रिवर्गपरिपोषणं ॥ आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं ॥ २६ ॥ शूद्रस्य सं
नतिः शौचं सेवा स्वामिन्यमायया ॥ अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणं ॥ २७ ॥ स्त्रीणां च पतिदे
वानां तच्छुश्रूषानुकूलता ॥ तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं ॥ २८ ॥ संमार्जनोपलेपाभ्यां गृ
ते हमंडलवर्तनैः स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा ॥ २९ ॥ कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन

धर्मानाह ॥ स्त्रीणामिति पंचभिः ॥ पतिरेव देवो यासां तासां पत्युः शुश्रूषा तदनुकूलता च तस्य यद्बंधुषु वि
यमस्तस्य धारणं ॥ एतच्चतुष्टयं ॥ पतिव्रतानां लक्षणं मध्ये किंच ॥ संमार्जनोपलेपाभ्यामित्यादिभिः पति
भजेदित्युत्तरेणान्वयः परिमृष्टाः उद्वर्तनादिना निर्मलीकृताः परिच्छदा गृहोपकरणानि यया ॥ ३० ॥

चरन् ॥ एवमाचरन् ॥ विदितं विज्ञानं विज्ञेयं येन सः ॥ १६ ॥ ऋषिलोकं महर्लोकं ॥ १७ ॥ अकृष्टम् अकृष्टपच्यं अकाल
तः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः ॥ अर्कपक्वं फलादि आहरेत् ॥ अश्नीयात् ॥ १८ ॥ वन्यैः नीवारादिभिः का
लेनोदितान् ॥ नित्यान् ॥ पुराणं पूर्वसंचितं ॥ १९ ॥ हिमादीन् सहेत इति ॥ २० ॥ नखकेशादीन् ॥ मलं वा प्रक्षालनेन
न धारयेत् ॥ कमंडल्वादीन् दधत् ॥ २१ ॥ कृच्छ्रतः तपःक्लेशाद्यथा बुद्धिर्न विपद्येत तथा चरेत् ॥ द्वादशाब्दा[?]

एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ॥ चरन् विदितविज्ञानः परं ब्रह्माधिगच्छति ॥ १६ ॥ वानप्रस्थस्य व
क्ष्यामि नियमान्मुनिसम्मतान् ॥ यानातिष्ठन्मुनिर्गच्छेद् ऋषिलोकमिहांजसा ॥ १७ ॥ न कृष्टपच्यमश्नीया
दकृष्टं वाप्यकालतः ॥ अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥ १८ ॥ वन्यैश्चरुपुरोडाशान् निर्वपेत्काल
चोदितान् ॥ लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥ १९ ॥ अग्न्यर्थमेव शरणमुटजं वाद्रिकंदरां ॥ श्रये
त हिमवाय्वग्निवर्षार्कातपषाट् स्वयं ॥ २० ॥ केशरोमनखश्मश्रुमलानि जटिलो दधत् ॥ कमंडल्वजि
नेदंडवल्कलाग्निपरिच्छदान् ॥ २१ ॥ चरेद्वने द्वादशाब्दान् अष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथा बुद्धिर्न
विपद्येत कृच्छ्रतः ॥ २२ ॥ यदाकल्पः स्वक्रियायां व्याधिभिर्जरयाथवा ॥ आन्वीक्षिक्यां वा विद्यायां कु
र्यादनशनादिकं ॥ २३ ॥ आत्मन्यग्नीन् समारोप्य संन्यस्याहं ममात्मतां ॥ कारणेषु न्यसेत् सम्यक् संघातं तु

तं तत्र मयि यदि स्वधर्मानुष्ठाने शक्तः ॥ तर्हि वन एव वसेत् ॥ यदि तु ज्ञानाभ्यासयोग्यः तर्हि संन्यसेदित्युत्तराध्याये
वक्ष्यति ॥ तत्र समयरहितं स्वयं लक्षयंतं तदाह ॥ ॥ यदाकल्पः असमर्थः ॥ आन्वीक्षिक्यां ज्ञानाभ्यासे ॥ अनशनादि
करिष्यतः पूर्वकृत्यमाह ॥ २३ ॥ आत्मनीत्यादि यावत्समाप्तिः यथार्हतः यथायोग्यं ॥ खं कारणेषु आकाशादि

तत्वमिथ्यात्वादति कथमलत्वाद्धस्य त्यक्तप्रायं ह्यादिजन्यादिति कोयमतिनिर्बंधः ॥ तत्राह ॥ कल्पयित्वे
ति ॥ आत्मतत्वस्वरूपसाक्षात्कारेणाद्धं देहेंद्रियादिग्राभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीवई
श्वरः ॥ स्वतंत्रो न भवेत् ॥ तावद्वैतं अद्वैतं प्रमातियंत्रीत्यादिभेदो न विरमेत् ॥ ततः किमत आह ॥ ततोद्वि
हेतोद्विपर्ययः श्रवणाध्यासेन भोगमतावुद्धिः अतो जन्मादेवीत्यर्थः ॥ २० ॥ एतत्सर्वं सुशीलत्वमस्यायुक्तं
शूद्रस्य सविशेषमाह ॥ गुरुद्वाविति ॥ २१ ॥ अंजनादीनामाभिर्घातान्तं देहेकं ॥ अंजनं शरीरस्पत्र

कल्पयित्वा तत्ता यावद्धाभासमिदमीश्वरः ॥ द्वैतं तावन्न विरमेत् ततोस्यस्य विपर्ययः ॥ २४ ॥ एतत्स
र्वं शूद्रस्य ससमान्नातं यतेरपि ॥ गुरुद्वा निर्विकल्पेन शूद्रस्यस्त्वेगामिनः ॥ २५ ॥ अंजनाभ्यंजनतो
ल्पद्ध स्वबले स्वामिर्घमपु ॥ स्वर्गंधलेपालंकारांस्त्यजेत्पुर्ये तत्र ताः ॥ २६ ॥ उषित्वैवं गुरुकुलेद्वि
जो धीत्यावबुध्य च ॥ त्रयीं सांगोपनिषदं यावदर्थं यथाभवल ॥ २७ ॥ दत्वा वरमनुज्ञातो गुरोः कामं
यदीश्वरः ॥ गृही वनं वा प्रविशेत्प्रव्रजेत्तत्र वावसेत् ॥ २८ ॥ अग्नौ गुरावात्मनि च सर्वभूतेषु धोक्षज
भ्यंजनं शिरसः स्त्रियं वस्त्रवलेखं विचित्रकर्मसंस्त्रीरागं ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥
ग्राद्वीलेखं तं वा तन्निरीक्षणं वा ॥ अत्रा अंगादिस्वरूपतो निषिध्यते ॥ पूर्वं तु कथं विदा पदि भासमपि
स्त्रीकर्तृकं तिषिद्धमिति भेदः ॥ २२ ॥ अंगैः शिक्षादिभिः उपनिषद्भिश्च सहितां वेदत्रयीमध्येतव्या बु
ध्वा चतदर्थं च विचार्य यावदर्थं स्वाधिकारानुसारेण ॥ २३ ॥ यदीश्वरः शक्तः तर्हि गुरोः काममपेक्षितं
वरं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात् ॥ तत्रैव वाऽवसेत् ॥ नैष्ठिकः स्यादित्यर्थः ॥ २४ ॥ स्वधाम
भिः स्वाश्रयैर्भूतैर्जीवैः ॥ सहितं नियंतृतया ॥ २५ ॥

भा॰स॰
टी॰ ५४

द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः ॥ चतुर्वर्णाश्रमाणां च साधारण्येन कृत्स्नशः ॥१॥ वर्णादीनां धर्मा उक्ताः ॥ इदानीमाश्रमधर्मा उच्यंते ॥ तत्रास्मिन्द्वादशेऽध्याये ब्रह्मचारिवनस्थयोरसाधारणा एवोच्यंते ॥ त्रयोदशे यतेर्धर्माः ॥ चतुर्दशे गृहस्थस्य ॥ पंचदशे सर्वधर्मसारसंग्रहः ॥ ब्रह्मचारी गुरुकुले वसन् ॥ गुर्वादीनुपासीतेत्युत्तरेणान्वयः ॥ ब्रह्म गायत्रीं जपन् ॥ संध्यात्रयमुपासीत ॥ उभे संध्ये तु यतवाग्भवेत् ॥ सायंप्रातः संध्याकालयोर्निमित्तमौनं कुर्यादित्यर्थः ॥२॥ गुरोश्चरणौ नमेत् ॥३॥ यथोदितं पालाशो दंडो ब्राह्मणा

नारद उ॰ ॥ ब्रह्मचारी गुरुकुले वसन्दांतो गुरोर्हितं ॥ आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥१॥ सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ॥ संध्ये उभे च यतवाग्जपन्ब्रह्म समाहितः ॥२॥ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः ॥ उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥३॥ मेखलाजिनवासांसि जटादंडकमंडलून् ॥ बिभृयादुपवीतं च दर्भपाणिर्यथोदितं ॥४॥ सायं प्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत् ॥ भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ॥५॥ सुशीलो मितभुग्दक्षः श्रद्दधानो जितेंद्रियः ॥ यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥६॥ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः ॥ इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः ॥७॥ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं ॥ गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥८॥ त

सेत्यादि नियममनतिक्रम्य जटाधारणं तु केशप्रसाधनाभावमात्रं ॥४॥ यावदर्थं प्रयोजनमात्रमेव ॥६॥ बृहद्व्रतः ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोऽपि वर्जयेत् ॥ तत्र हेतुः इंद्रियाणि बलवंति संयतस्यापि मनो हरंतीति ॥७॥ ॥८॥ नकारयेदित्यत्र हेतुः नन्विति ॥ रहः एकांते ॥ अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे ॥ नैकांतावस्थानं वा यावदर्थं तदर्थं तत्रैकं कुर्यात् ॥९॥ ॥

५४

न तु काम्यानि कर्माणि कुर्वतस्तत्फलोपभोगपरस्य कथं तैर्गुणैः स्यात् ॥ तदुक्तं प्रह्लादेन ॥ औपस्थ्यजैह्वं बहु मन्यमानः कथं विरज्येत दुरन्तमोहः इत्यादि ॥ तत्र सदृष्टान्तमाह ॥ उप्यमानमिति द्वाभ्यां ॥ पुनः सूत्यै सस्यप्रसवाय ॥ ३४ ॥ कामाश्रयं रतेवासनारूपेण यस्मिन् तत् ॥ अयं भावः ॥ उत्कटवासनाविष्टस्य सद्यस्सर्वकामत्यागासंभवादेकदैव नियमेन बहुशः कामाञ्जुषतः सेवनात्ययेन निर्मितिके विशुद्धचेतसः तद्दर्शनेनाययाति सा भोगेच्छा स्वात्मानमिव शनैः शनैर्विरागो भवति ॥ यथा सवीर्यं क्षेत्रं शनैः शनैर्निर्वीर्यं भवति ॥ यथा च भुज्य-

उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् ॥ न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥ ३३ ॥ एवं कामाशयं चित्तं कामानामतिसेवया विरज्येत यथा राजन्नग्निवत्कामबिंदुभिः ॥ ३४ ॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकं ॥ यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥ ॥ इति श्रीभागवते सप्तमस्कंधे एकादशोऽध्यायः ॥ ११ ॥ ॥

लिनोऽग्निर्घृतबिंदुभिर्नश्यति ॥ महता तु घृतपूरेण शाम्यत्येव न दहति ॥ प्रह्लादकृतस्तु कौमार एव निवृत्युपदेशो मंदवासनानामधिकारेण तदुक्तं तेनैव ॥ बालानदूषितधियामहमंग रामे वित्तेप्सिते वितत ब्रह्मतः सर्वमनत्वयं शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः न जातिमात्रादित्याह ॥ यस्येति ॥ ३५ ॥ यद्यदि अन्यत्र वर्णांतरेऽपि दृश्येत ॥ तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव वर्णेन विनिर्दिशेन्न तु जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥ ॥ इति सप्तमे एकादशः ॥ ११ ॥ ॥

तत्र विकारवतः कथं परे लयः स्यात् विकारदेहतां सर्वोपाधीनां लयद्वारेणेत्याह । अप्स्विति । अदो ज्योतिः त
च्च तमः कूटस्थे अहंतत्त्वे तच्च कूटस्थं महति महत्तत्त्वे । तदव्यक्ते प्रधाने । तच्चाव्यक्तं अक्षरे परमात्मनि ॥ ३ ॥ इति
सर्वोपाधिलयाद्धेतोः अवशेषितं चिन्मात्रमात्मानं तेनाक्षरत्वमद्वयतया ज्ञात्वा द्वयः सन् विरमेत् । दग्धकाष्ठा
यथानलः ॥ ३४ ॥ इति भागवते सप्तमे द्वादशः ॥ १२ ॥ ॥ त्रयोदशे यतेर्धर्माः साधकस्योच्यते महान् । अवधू

अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुं । कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ॥ ३३ ॥ इत्यक्षरत
यात्मानं चिन्मात्रमवशेषितं ज्ञात्वाद्वयोऽथ विरमेद्दग्धयोनिरिवानलः ॥ ३४ ॥ इति सप्तमस्कंधे द्वाद
शोऽध्यायः ॥ १२ ॥ ॥ नारद उ० ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः । ग्रामैकरात्रविधिना निरपे
क्षश्चरेन्महीं ॥ १ ॥ बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परं । त्यक्तं न लिंगाद्दंडादेरन्यत्किंचिदनापदि
॥ २ ॥ एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः । सर्वभूतसुहृच्छांतो नारायणपरायणः ॥ ३ ॥ पश्येदात्मन्य
दो विश्वं परे सदसतोऽव्यये । आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥ सद

तेति दासेन सिद्धावस्थाचर्यार्पिते ॥ १ ॥ एवं ध्यात्वा कल्पोऽनशनादिकं कुर्यात् । आन्वीक्षिकीवत्कल्पस्त्वेवं यथा
लापरिव्रज्येति संबंधः । किंयदत्र त्याज्यं देहव्यतिरिक्तं सर्वमित्याह । देहमात्रेति तस्य धर्मानाह । ग्रामैक
रात्रेति नवभिः । कौपीनमाच्छाद्यते यावता तावन्मात्रं परं केवलं । अन्यदिति वा त्यक्तं । अपेक्षोच्चारणसमर्थमेव
मेव ॥ २ ॥ ३ ॥ सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥

तदेव विभज्य दर्शयति ॥ खे आकाशे खानि देहगतछिद्राणि ॥ आत्मवान् ॥ धीमान् ॥ शेषमस्थिमांसादिकं क्षि-
तावाम ॥ ३४ ॥ एवं स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीररूपस्याध्यात्मादित्रयस्य लयमाह ॥ वाचमित्यादिना ।
तत्र यद्यपि यथोद्भवं मिथुनत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहंकारादिषु लयो वाच्यः ॥ तथापीह
तेषां लयभावनेयमद्वितीयात्मप्रतिपत्तिपरेति ॥ यथाकथंचिल्लये भाव्ये देवतानामवर्जकत्वेन प्राधान्या-
दिन्द्रियतद्विषययोर्देवतासु लयः कथ्यते ॥ वक्तव्यसहितां वाचमग्नौ न्यसेत् ॥ एवं सर्वत्र पदानि पादौ वय-
सि विष्णौ ॥ ३६ ॥ सनादेन शब्देन सह ॥ अध्यात्मनि वायौ ॥ अध्यात्मविदिति ॥ पादे वायाविति ज्ञातव्यं ॥ ३७ ॥ ज्यो-

रेवदानिवायोनिः श्वासं सेन सह प्राणमात्मवान् ॥ अयं वस्त्रकप्लेषमश्यातितितौ योवयथो ज्ञवं ॥ ३५
वाचमग्नौ सवक्तव्यामिंद्रे शिल्पकरावपि ॥ पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ ३८ ॥ मृत्यो पायुं वि
सर्गं च यथास्थानं विनिर्दिशेत् ॥ दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचं ॥ ३९ ॥ रूपाणि चक्षुषा राजन्
ज्योतिष्यभिनिवेशयेत् ॥ अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ ४० ॥ मनो मनोरथैश्चंद्रे बुद्धिं
बोध्यैः कवौ परे ॥ कर्माण्यध्यात्मना रुद्रे यदहंममताक्रिया सत्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ ४० ॥

लिपिश्यादिसेर सगं ययोस्तिं द्वियादिकर्षवत्वेन प्राधान्यविवक्षया देवतासहितस्येन्द्रियस्य विषये लयमाह
प्रचेतसा सह जिह्वां रसनां ॥ अप्सु रसमहपास्त्र घ्राणं गन्धेनाश्विनोरप्युपलक्षणं ॥ अश्विभ्यां सह घ्राणं घ्रेयैर्गं-
धैरुपलक्षितां क्षितौ विन्यसेत् ॥ ४१ ॥ परे कवौ ब्रह्मणि अध्यात्मतामहंकारेण अध्यात्मताभिमतिपादकर्मी
णि पहंकार एवेत्यर्थः ॥ कथंभूते रुद्रे यस्मादहंममता प्रवृत्तिका क्रिया भवति तस्मिन् ॥ सत्वेन चेतनया गुणो
गुणकार्यैः प्रमाविशिष्टैः देवैः सह यद्वा सत्वादिभिर्गुणैर्हेतुभूतैर्वैकारिकं भोक्तृत्वादिविकारवंतं क्षेत्रज्ञं

॥ १० ॥ श्रीभागवतटीकापत्र

तस्यैवज्ञानदार्ढ्याभावेयोगभ्रंशपरिहारायमाह ॥ नबहिर्व्यक्तंलिंगंयस्य ॥ व्यक्तोर्थः प्रयोजनमात्मानुसंधा
नंयस्यसः मनीष्यपिउन्मत्तवद्बालवच्चकविरपिमूकवदात्मानंनृणांदृष्ट्यादर्शयेत ॥ नयथात्मज्ञानादिरूपं
न्येरत ॥ नयावन्नेनत ॥ स्पष्टश्चेति ॥ पाठेवाप्यात्मानुसंधानाभावेतेत्यर्थः ॥१०॥ परमहंसधर्ममेवेतिहासेनस्फुट
यति अत्रापीतियावदध्यायसमाप्तिः अजगरव्रतस्यमुनेश्च ॥११॥ धरोपस्थेभूपृष्ठेसह्यसानौसह्यपर्वततटे ॥ रजोभि
र्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलंतेजोयस्यतं ॥१२॥ कर्मादिभिर्जनायंनविदुः ॥१४॥ तंपादयोःशिर

अव्यक्तलिंगोव्यक्तार्थोमनीष्युन्मत्तबालवत ॥ कविर्मूकवदात्मानंसदृष्ट्यादर्शयेन्नृणां ॥१०॥ अ
त्रापुदाहरंतीममितिहासंपुरातनं ॥ प्रह्लादस्यचसंवादंमुनेराजगरस्यच ॥११॥ तंशयानंधरोपस्थे
कावेर्यांसह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसं ॥१२॥ ददर्शलोकान्विचरंल्लोकत
त्वविवित्सया ॥ वृतोमात्यैः कतिपयैः प्रह्लादोभगवत्प्रियः ॥१३॥ कर्मणाकृतिभिर्वाचालिंगैर्व
र्णाश्रमादिभिः ॥ नविदंतिजनायंवैसोसावितिनवेतिच ॥१४॥ तंनत्वाभ्यर्च्यविधिवत्पादयोःशि
रसास्पृशन ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः ॥१५॥ बिभर्षिकायंपीवानंसोद्यमोभोग
वान्यथा ॥ वित्तंचैवोद्यमवतांभोगोवित्तवतामिह ॥ भोगिनांखलुदेहोयंपीवाभवतिनान्यथा ॥१६॥
नतेशयानस्यनिरुद्यमस्यब्रह्मन्नुहार्थोयतएवभोगः ॥ अभोगिनोयंतवविप्रदेहः पीवायतस्तद्व

सास्पृशन्नात्मप्रश्नांतीदित्युत्तरेणान्वयः ॥१५॥ उद्यमसहितभोगवानिवपीवानंस्थूलंदेहंधारय
सि तत्रहेतुंवदेतितृतीयेनान्वयः ॥ उद्यमंविनैवममभोगोस्तीतिचेत्तत्राह ॥ वित्तंचेति ॥१६॥ उद्यमतिनिश्चेये

तत्त्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः ॥ तद्विंबहुमुक्तयोरैक्यं संभवति ॥ तत्राह ॥ स्वप्नेति
स्वप्ने हि तमसाहृतमात्मानं तत्त्वं जाग्रत्त्वप्रयोस्तु विदितं संप्रकाशते ॥ संयोगस्तु ननु तमोतापि विक्षेपः ॥ अतएव
दात्मानं दृक् आत्मानं लक्षीकृत्य स्थितः सन् ॥ आत्मनोगतिं तत्त्वं प्रपश्यन् ॥ अत एव बंधं मोक्षं च माया
मात्रं प्रपश्यन् ॥ आत्मानं परं ब्रह्म सर्वत्र प्रपश्येदित्यन्वयः ॥ तद्भक्तयोर्योगं ग्रंथेन ॥ निद्रादौ जागरस्यांते यो भाव
उपजायते तं भावं भावयन्नित्यमुच्यते नेन तरोयन्तिरिति ॥ ४ ॥ अस्य देहस्य प्रभवाप्ययस्थयस्थानं काले

स्वप्नप्रबोधयोः संध्याव्यात्मनो भाति मात्मदृक् ॥ पश्यन् बंधं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥ ताभि
तदेहं देहस्तु मधुवेवास्य जीवितं ॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥ नासच्छास्त्रेषु सज्जेत
नोपजीवेत जीविकां ॥ वादवादांस्त्यजेत्तर्कान् पक्षं कंचन नाश्रयेत् ॥ ७ ॥ न शिष्याननुबध्नीत ग्रंथा
नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुञ्जीत नारंभानारभेत्क्वचित् ॥ ८ ॥ न यतेराश्रमः प्रायो धर्महेतु
महात्मनः ॥ शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत्
९ ॥ असच्छास्त्रेषु अनात्मपरेषु जीविकां तत्र विद्या
दिहीनं वा दवादात् ॥ तल्पवितंडादिनिष्ठान् ॥ तर्कान् ॥ तर्कमाश्रित्य कंचन कमपि पक्षं निर्बंधेन न संश्रये
त् ॥ ७ ॥ नानुबध्नीत प्रलोभमानादिना बलात्तापादयेत् ॥ आरंभान्मठादिव्यापारान् ॥ ८ ॥ परमहंसस्य विशे
षमाह ॥ न यतेराश्रमो धर्मार्थः कथं भूतस्य महात्मनः तस्य लक्षणं शांतस्येत्यादि ॥ प्रायश्चर्य स्याश्रमभा
वः ज्ञानोत्पत्ति पर्यंतं ॥ बहूदकादिलिंगमाश्रित्य सन्नप्यश्रयमाश्रियमाचारं त्वेव ज्ञानोत्पत्ते पश्चात्तन
उपवेतज्ञानेन नियमैः कृत्यमस्ति ॥ यमाश्रमस्वतएवस्युः ॥ अतस्तदा लिंगादिभिः प्रयोजनाभावात् ॥ लोक
संग्रहार्थं ॥ धारयेत्त्यजेद्वेति ॥ ९ ॥

कालः मासादिः देशः मेर्वादिः क्रियाः तत्तदनुष्ठानं कर्त्ता ब्राह्मणादिः कारणं स्रुगादि कार्यं यागादि आगमो मंत्रादि द्रव्यं व्रीह्यादि फलं स्वर्गादि ॥३२॥ तत्र च कालरूपधारी भगवान्सूर्यश्चरति मध्वादिषु चैत्रादिषु लोकतंत्राय लोकयात्रानिर्वाहाय ॥३३॥ तानेव गणानाह द्वादशभिः ॥ धाता सूर्यः कृतस्थली अप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृद्यक्षः पुलस्त्यः ऋषिः तुंबुरुः गंधर्वः ॥३४॥ अर्यमा सूर्यः पुलह ऋषिः अथौजा यक्षः प्रहेतिः राक्षसः नारदः गंधर्वः कच्छनीरो नागः माधवं वैशाखं ॥३६॥ मित्रः सूर्यः पौरुषेयो राक्षसः रथस्वनो यक्षः शुक्रमासं ज्येष्ठं नयंति

मध्वादिषु द्वादशसु भगवान्कालरूपधृक् । लोकतंत्राय चरति पृथग्द्वादशभिर्गणैः ॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने । पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ॥३५॥ अर्यमा पुलहोथौजाः प्रहेतिः पुंजिकस्थली । नारदः कच्छनीरश्च नयंत्येते स्म माधवं ॥३६॥ मित्रोत्रिः पौरुषेयोथ तक्षको मेनका हहाः । रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ॥३७॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः । शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी ॥३८॥ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः । प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ॥३९॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः । अनुम्लोचा शंखपालो नभस्याख्यं नयंत्यमी ॥४०॥ पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा । घृताची गौतमश्चेति तपोमासं नयंत्यमी ॥४१॥

॥३७॥ वरुणः सूर्यः सहजन्या अप्सराः शुक्रो नागः चित्रस्वनो गंधर्वः शुचिमासं आषाढं ॥३८॥ इंद्रः सूर्यः विश्वावसुर्गंधर्वः श्रोता यक्षः एलापत्रो नागः वर्यो राक्षसः इति स्वयमेव व्याख्यातं नभोमासे श्रावणं ॥३९॥ विवस्वान्सूर्यः उग्रसेनो गंधर्वः व्याघ्रो राक्षसः आसारणो नागः नभस्याख्यं भाद्रपदं ॥४०॥ धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः सुरुचिर्यक्षः तपोमासं माघं । मासक्रमानिलं घनेकाम्यं कादिक्रमाद्भगोरणं वक्ष्यन्मासक्रमेणोक्तिः क्वचिन्नामव्यत्यय

काल्ये द्वि ५२ ॥

ऋतस्थलः वर्चागोतमः पर्जन्यः सूर्यः सेनजित्त्वष्टा विश्वो गंधर्वः ऐरावतः नामतः तपस्याख्ये फाल्गुणे ॥४५॥ अंशुः
सूर्यः कश्यपतार्क्ष्यश्च नागोऽस्य मृताः ऋतसेनो गंधर्वः विद्युच्छत्रुः राक्षसः महाशंखो नागः सहोमासं समागतः पौषे
धरे भगः स्फूर्जो राक्षसः अरिष्टनेमिः गंधर्वः ऊर्णायुः आयुः अरिः काकोंदको नागः ॥४६॥ त्वष्टा कतनयो
जमदग्निः कंबलाख्यो नामः ब्रह्मापेतो राक्षसः शतजित् पर्वतः धृतराष्ट्रो गंधर्वः वृषभः अश्विनपालकाः ॥४७॥ वि
ष्णुर्गोदस्यः अश्वतरो नागः सूर्यवर्चा गंधर्वः सत्यजित् यज्ञोपेतो राक्षसः ऊर्जमासे कार्तिके ॥४८॥ एते वारि
मादयः कौशिकविभज्योतकाः ॥ धाता येमा च मित्रश्च वरुणश्चेन्द्र एव च ॥ विवस्वान्पूषा च पर्जन्यश्चांशुरेव च भग
ऋतवश्चाभरद्वाजः पर्जन्यः सेनजित्तया ॥ विश्वश्चैरावतश्चैव तपस्याख्येन यत्समी ॥४९॥ अंशुः कश्यप
स्ताक्ष्यश्च ऋतसेनस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशंखः सहोमासेन यत्समी ॥५०॥ भगः स्फूर्जोऽरिष्टनेमिरूर्णायु
रायुरेव च ॥ काकोंदकः पूर्वचित्तिः पुष्यमासेन यत्समी ॥५१॥ त्वष्टाऽथ जीकतनयः कंबलाश्च तिलो
त्तमा ब्रह्मापेतो यशातजिद्धृतराष्ट्रर्षभराः ॥५१॥ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् विश्वामित्रो
मखोपेत ऊर्जमासेन यत्समी ॥५२॥ एता भगवतो विष्णोरादित्यस्य विभूतयः सततो संध्ययोन्द्र ... आहरं
त्वष्टा च विश्वश्च आदित्या द्वादशा मता एते होदिवे दिने ॥५३॥ ताः ॥ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोऽथांगिरा भृ
गुः ॥ गौतमो भरद्वाजः कश्यपः क्रतुरेव च ॥ जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥ रथकृच्चारिष्टनेमि
ग्रामणीश्च रथस्वनः ॥ रथचित्रस्वनः श्रोताश्च रुचः सेनजित्तया ॥ तार्क्ष्यश्चारिष्टनेमिश्च ऋतजित्सत्यजि
त्तथा सत्यजित्तयाः ॥ एतेषता ऋतिहेतिः प्रहेतिश्च पौरुषेयो वधस्तथा ॥ वर्यो व्याघ्रस्तथा पश्च वायुर्विद्युद्दिवा
करः ॥ ब्रह्मापेतश्च विप्रेन्द्र यज्ञोपेतश्च राक्षसाः ॥ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः ॥ ॥५७॥ ॥

प्रौ॰ अं॰ २ टी॰ ४२

४२

पैलापत्रः शंखपालस्तथैरावणसंज्ञितः ॥ धनंजयो महापद्मस्तथा कर्कोटको द्विजाः कंबलोश्वतरश्चैव वहंत्येवं यथाक्रमं ॥ तुंबरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा ॥ उग्रसेनो वसुरुचिर्विश्वावसुस्तथापरः ॥ चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमः ॥ सूर्यवर्चा द्वादशैते गंधर्वा गायतां वराः ॥ कृतस्थल्यप्सरा श्रेष्ठा तथान्या पुंजिकस्थली ॥ मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः ॥ अनुम्लोचा घृताचीति ॥ विश्वाची चोर्वशी तथा ॥ अन्या च पूर्वचित्तिः स्याद्रम्भा चाति तिलोत्तमाः ॥ रंभा वेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृता इति ॥ एतेषां पृथक् नामानि निरूपयति द्वादशस्वपीति त्रिभिः ॥ ४४ ॥ अथो

द्वादशस्वपि मासेषु देवोसौ षड्भिरन्वहं ॥ चरन्समंतात्तनुते परत्रेह च संततिं ॥ ४५ ॥ सामर्ग्यजुर्भिस्तल्लिंगैर्ऋषयः संस्तुवंत्यमुं ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोग्रतः ॥ ४६ ॥ उन्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः ॥ चोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः ॥ ४७ ॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोमलाः ॥ पुरतोभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ॥ ४८ ॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः ॥ कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ॥ ४९ ॥ इति श्रीद्वादशस्कंधे एकादशोध्यायः ॥ ११ ॥ सूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् ॥ १ ॥ सूर्यं देवः षड्भिः गंधर्वादिभिः सह जनतस्य सम्यक्ताकुर्वन् ॥ शुभां मतिं तनुते ॥ गायत्र्यादीनेव सूचितः ॥ ४५ ॥ तल्लिंगैः सूर्यप्रकाशकैः ॥ ४६ ॥ उन्नह्यंति दृढं बध्नंति ॥ ग्रामण्यो यक्षाः ॥ नैर्ऋता राक्षसाः ॥ किंच वालखिल्या इत्येते प्रतिमासं तथैव विभुं सूर्यं ॥ ४८ ॥ व्यूह्य विभज्य ॥ ४९ ॥

इति श्रीभावार्थदीपिकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे तु पुराणानां सर्वार्थानुक्रमः कृतः ॥ प्रथमस्कंधमारभ्य पार्थक्येन समासतः ॥ तदेवास्मिन्पुराणे कीर्तितपदार्थानुवर्णयिष्यन्धर्मादीन्प्रणमति ॥ १ ॥ नम इति ॥ महते हरिभक्तिलक्षणाय धर्माय ब्राह्मणेभ्यो ब्राह्मणान् ॥ सनातनानन्यधर्माननपेक्षतया पुराणकार्यानो ॥ १ ॥ ॥

पुरुषोचितं अवितं श्रवणादियोग्यं॥ एतत्प्रपंचयति अत्रेति॥२॥ भगवान्नैश्वर्यादिषड्गुणः सात्वतां संकीर्तित इति देवता कांडार्थः ब्रह्मकांडार्थमाह॥३॥ गुह्यमिति गोप्यं प्रभवाप्यये प्रभवत्यस्मादिति प्रभवश्चाप्ययश्च॥ अप्येत्यस्मिन्निति अप्यये तं ब्रह्मज्ञानेनाश्रयशब्दोदर्शितः विज्ञानसंयुतं अपरोक्षज्ञानपर्यंतं ज्ञानं तदुपाख्यानं तत्त॥ ज्ञानमुपाख्यायते प्रकाश्यते। तेयेन तत् ज्ञानसाधनमित्यर्थः कर्मकांडार्थमाह॥४॥ भक्तिरूपश्च साध्यसाधनरूपः॥ तदाश्रयं भक्तियोगेन निष्पा

एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं॥२॥ अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः॥ नारायणो हृषीकेशो भगवान्सात्वतांपतिः॥३॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं॥ ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं॥४॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं पारीक्षितमुपाख्यानं नारदाख्यानमेव च॥५॥ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः॥६॥ योगधारणयोत्क्रांतिः संवादो नारदाजयोः॥ अवतारानुगीतं च सर्गः प्राधानिकोग्रतः॥७॥ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः॥ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः॥८॥ ॥ राम॥

दितं एवं सामान्यतो निरूप्य इदानीं द्वादशस्कंधात्मकग्रंथार्थमनुक्रामति॥ पारीक्षितमुपाख्यानं परीक्षिज्जन्मादि तत्प्रसंगाच्च नारदाख्यानं च॥५॥ ब्रह्मर्षेः शुकस्यागमो नमस्येति प्रथमस्कंधार्थः॥६॥ उत्क्रांतिर्विशादिगतिः॥ प्राधानिकः प्रधानकार्यं विराड्रूपः॥ अग्रत आदितः महदादिक्रमेणोत्पत्तिः द्वितीयार्थः॥७॥ महापुरुषसंस्थितिः प्रलये नृसीमवस्थानं॥८॥॥ राम

अनपायिनीत्यादेः शक्तिस्तत्त्वदेवतः साक्षादात्मनः स्वस्वरूपस्य विरूपत्वात्तस्यास्तदभेदादिति शेषः ॥ तंत्रमूर्त्तिः पंचरात्रा-
द्यागमरूपः योगमार्गयोरेश्वर्यगुणाः तदुक्ते द्वारपाला नंदादयः ॥२०॥ तस्यैव चतुर्व्यूहोपासनामाह ॥ वासुदेवादिशब्दैः श्र-
रूपः श्रीनारायण एव स्वयं मूर्तिभेदरूपास्य रत्वभिधीयते ॥ तस्यैवाध्यात्मनि चतुर्व्यूहोपासनामाह ॥२१॥ स एव भगवा-
न्विश्वादिशब्दैः वृत्तिविभिन्नो यदा ध्येयस्ताभिः परिभाव्यते ॥ तदा तत्स्वरूपाध्येन नामाह ॥ अर्थो बाह्य इंद्रियमनः प्राणाः
स्तद्भेदयसंस्कारयुक्तमज्ञानं ज्ञानेचित्तयमाश्रिते ॥ उक्तं च तत्स्वरूपाध्यायामनेपि सर्वोक्रमणाद्युपासनमाह ॥२२॥ अ

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तंत्रमूर्त्तिर्विदितः पार्षदाधिपः ॥२०॥ नंदादयोऽष्टौ
द्वास्थाश्च तेणिमाद्या हरेर्गुणाः ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं ॥ अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहो-
ऽभिधीयते ॥२१॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः ॥ अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते ॥२२॥ अंगो-
पांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं ॥ बिभर्ति स्म चतुर्मूर्त्तिर्भगवान्हरिरीश्वरः ॥२३॥ द्विजऋषभ स एव ब्र-
ह्मयोनिः स्वयंदृक्स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्ययानावृताक्षो विवृत
इव निरुक्तस्तत्परैरात्मलभ्यः ॥२४॥

अंगादिभिरुपलक्षितो भगवान्हरिर्वासुदेवादिचतुर्मूर्त्तिः ॥ सन्
विश्वादिचतुष्टयं बिभर्ति स्म विश्वादिभावेपि ॥ नियंतृत्वस्य न जीवत्वं इत्याह ॥ विश्वादिचतुष्टयं बिभ्रदपि
भगवानीश्वर एवेति ॥ तस्यैव ब्रह्मादिविभूत्येनामाह ॥२४॥ स एव भगवान्ब्रह्मयोनिर्वेदस्य कारणमित्यादि
तत्र एव स्वतो भेदाभावेपि स्वगतमायया सृजति हरति इत्याख्यया ब्रह्मादिरूपधानावृताक्षः ॥ अनावृतज्ञानो
नापि विवृत इव भिन्न इव निरुक्तः ॥ शास्त्रैः प्रतिपन्नः ॥ अतएव हृदि स्वभावेन मायायाति ॥ यतस्तत्परैरात्मत्वेनैवल-
भ्य इति एवं तदुपासनमुक्तं ॥ तत्र श्रीकृष्णस्यापार्थ्यते ॥ श्रीकृष्णेति ॥२५॥ ॥

श्री·
श्री·द्वा
टी·
३१

कृष्णस्य सखे वृष्ण्यृषभ अवनिध्रुहो ये राजन्याः तेषां वंशस्य दहन अनपवर्गोऽक्षीणं वीर्यं यस्य गोपवनिता
नां व्रजाः समूहाः भृत्याः नारदादयश्च तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य एतज्जपमात्रस्यापि
ब्रह्मज्ञानफलमित्याह ॥२६॥ कल्यउषःकालस्तच्चित्तः प्रयतः शुचिर्भूत्वा जप्त्वा गुहाशयं हृदिस्थं ब्रह्म पश्यति ॥२७॥
मंडलं देवयजनमित्यत्रोक्तं द्वादिमासगः इति यदुक्तं सौरो गणो विस्तरेण श्रोतुं पृच्छति ॥२८॥ पंचभिः यदाह तत्प्राप्येच
श्रवणे यो वो ... नानाभूतो वसति ... केकशो गणाः सप्तत्वादिवासोपि सूर्यः सर्वं ...

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य । गोविंद गोपवनिताव्रजभृत्यगीत
तीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥२६॥ य इदं कल्य उत्थाय महापुरुषलक्षणं । तच्चित्तः प्रयतो जप्त्वा
ब्रह्म वेद गुहाशयं ॥२७॥ शौनक उवाच ॥ शुको यदाह भगवान् विष्णुराताय शृण्वते । सौरो गणो मासि मासि नाना वसति सप्तकः ॥२८॥ तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः । ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो
हरेः ॥२९॥ सूत उवाच ॥ अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनां । निर्मितो लोकतंत्रोयं लोकेषु परिवर्तते ॥३०॥
एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः । सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥३१॥ कालो देशः
क्रिया कर्ता करणं कार्यमागमः । द्रव्यं फलमिति ब्रह्मन्नवधोक्तो जया हरिः ॥३२॥ ॥ रामाय

णः ॥२८॥ तेषां संयुक्तानामधीश्वरैः तत्तत्पतिभिः तत्तन्मासाधिपतिसूर्यैर्वा व्यूहं विभागं तत्तत्ता बहूहं हेति स्वरूपं
तेषु प्रथमं सूर्यस्य स्वरूपमाह ॥२९॥ अनाद्यविद्यया मायया यः सूर्यो लोकतंत्रः लोकयात्रा प्रवर्तकः अनेकस्य
क्रियाभेदोपाधिकमेव नानात्वेन स्वतः इत्याह ॥३०॥ सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः अतो जगदात्मा
आदिकृत् स्रष्टा हरिरेव सूर्यः सर्वासां वेदोक्तक्रियाणां मूलं समत ॥ तेनोपाधिना बहुधोक्तः कालरूपधारि
णो हरेर्देशादि स्वरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तेर्मायाकृतनवधाभेदमाह ॥३२॥ ॥

३१

परिचर्यायामुपासनायां विषये केवलस्य चैतन्यघनस्य अंगानि पादादीनि ॥ उपांगानि गरुडादीनि आयुधानि सुदर्शनादीनि ॥ आकल्पाः कौस्तुभादयः तेषां द्वंद्वैक्यं ॥ तद्यथा कल्पयंति येश्च तत्त्वैः कल्पयंति ॥ २ ॥ तन्नो वर्णयेति ॥ एतत्पदं गायम्यत्वादहं सूर्यायं स्तनत्वं नमस्कारपूर्वकमाह ॥ ३ ॥ विभूतीर्विराडादिरूपाः अंगानि कल्पनाभूतादिभिर्दर्शितं प्रथमं तावद्यथा कल्पयंतीति प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैः ॥ नवभिस्तत्त्वैर्विकाराः एकादशेंद्रियाणि पंच महाभूतानीति षोडशात्मको विराट् ॥ स च सिद्धो निर्मितः ॥ यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं

लोकत्रिकाः परिचर्यायां केवलस्याखिलात्मनः ॥ अंगोपांगायुधाकल्पं कल्पयंति यथा च यैः ॥ २ ॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सतां । येन क्रियानैपुणेन मर्त्यो यायादमर्त्यतां ॥ ३ ॥ सूत उवाच ॥ नमस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ॥ ४ ॥ मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ॥ ५ ॥ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्योक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥ प्रजापतिः प्रजननमपानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः ॥ ७ ॥ लज्जोत्तरोऽधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः ॥ रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्धजाः ॥ ८ ॥ यावानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसावपि महापुरुषो लोकसंस्थया ॥ ९ ॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभाव्यापिनी साक्षाच्छ्रीवत्समुरसा विभुः ॥ १० ॥ यं दृश्यते ॥ एतेन नागादि

कल्पनामौलिभ्यं दर्शितं ॥ ५ ॥ एतद्वै पौरुषं रूपं पुरुषस्य विराजः स्वरूपं मे वेश्वरेणाधिष्ठितत्वात्तदभेदविवक्षया तत्स्वरूपमुच्यते ॥ अंगकल्पनामाह ॥ भूः पादावित्यादिभिस्त्रिभिः ॥ भ्रमो यज्जृंभादेन भगवन्मायादारिभावना [illegible] ॥ ६ ॥ प्रजननं मेढ्रं अपानः पायुः ॥ ७ ॥ एवं क्रममन्यदप्येवमूह्यमित्याह यावानिति यावानयं वै पुरुषः स्वमाननः समवितस्तिसंस्थया अवयवसन्निवेशेन मितः ॥ ९ ॥ भूषणादीन्याह । स्वात्मज्योतिः शुद्धजीवचैतन्यं भावयेत् तस्य कौस्तुभस्य प्रभा

श्री· भा·द्वा· टी· ३०

विद्यात्वं विमात्रेणवे ॥ १२ ॥ पारमेष्ठ्यं ब्रह्मलोकं ॥ १३ ॥ अव्याकृतं प्रधानं यत् ॥ अधिष्ठितः अधिशय्य स्थितः तदास
नरूपं तत्पद्मं सत्वं सत्त्वगुणः ॥ १४ ॥ मुख्यतत्त्वं प्राणतत्त्वं प्राणो वै मुख्य इति श्रुतेः ॥ दरवरं शंखं ॥ १५ ॥ आकूतीः क्रिया
शक्तिरुक्तं मनः ॥ अस्य स्यन्दनं रथं अभिव्यक्तिं बहिः अभिव्यक्तरूपं मुद्रया अभयरूपतया ॥ अर्थक्रियात्मतां वरदाभयदानादिरूपं वि
भक्तित्वं मुद्रयातनया भावयेदित्यर्थः ॥ १७ ॥ मंडलं देवयजनं देवपूजाभूमिः तत्स्वयं मंडलत्वेन भावयेदित्यर्थः परि

कौस्तुभ वनमालाख्यां नानागुणमयीं दधत् ॥ वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ॥ १२ ॥ बिभर्ति सां
ख्यं योगं च देवो मकरकुंडले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं ॥ १३ ॥ अव्याकृतमनंताख्यमासनं य
दधिष्ठितः ॥ धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥ १४ ॥ ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत् ॥ अपां त
त्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं ॥ १५ ॥ नभोनिभं नभस्तत्त्वमसिं चर्म तमोमयं ॥ कालरूपं धनुः शार्ङ्गं तथा क
र्ममयेषुधिं ॥ १६ ॥ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनं ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां
॥ १७ ॥ मंडलं देवयजनं दीक्षा संस्कार आत्मनः ॥ परिचर्या भगवत आत्मनो दुरितक्षयः ॥ १८ ॥ भगवान्भगशब्दा
र्थं लीलाकमलमुद्वहन् ॥ धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् ॥ १९ ॥ आतपत्रं तु वैकुंठं द्विजा धामा
कुतोभयं ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं ॥ २० ॥

चर्येति भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयाय ॥ एवं रूपं भावयेदित्यर्थः ॥ १८ ॥ पूर्वं मासनपद्मं युक्तमिदानीं
लीलापद्ममाह ॥ भगशब्दार्थमिति ॥ भगवच्छब्दार्थ ऐश्वर्यादिषाड्गुण्य ॥ १९ ॥ द्विजा हे शौनकादयः वैकुण्ठं धाम अकुतोभ
यं कैवल्यं अभजत ॥ पद्मा च अकुतोभयं यद्धामेति विवृतं ॥ त्रिवृत्त्रयः सामरूपो वेदः सुपर्णो
गरुत्मान् मंत्रलिंगात् ॥ यज्ञं यज्ञरूपं पुरुषं इति श्रुतेः ॥ २० ॥ ॥ रामाय नमः

३०

अयं वा लोकसंग्रहमात्रमेतदित्याह ॥ ३० ॥ प्रवक्तारोपि यत्स्वयं देहिनां धर्मम् आचरंति तिन नेतत्स्वप्रभावतिरस्कारकं क

र्म यत्क्रियते तत्राह नेति ॥ ३१ ॥ एतावता लोकसंग्रहमात्रेणैतैः नमनादिभिः कर्मभिः स्वमायामयीवृत्तिर्येषु तैः भ

गवतो मायिनः स्वावानुभावो न दुष्यति यतः प्रसिद्धमायिनः कुहककपटं यथा ॥ न दुष्यन्ति नमनादीनि यत स्वमाया

याकुहकेनानुभावो न दुष्यतेति तद्वत ॥ न दुष्यतेति पादेन कारस्यानुषंगः ॥ दृष्टांतः मायाचेष्टितप्रपंचयति ॥ सृष्ट्वेति ॥ ३१ ॥ स

त्वादिगुणैर्यथा चेष्टितैः दृष्टांतः ॥ त्रिगुणात्वेन जीववत्तदभिभूतता यत्कित गुणानामात्मने नियंत्रे वरमेकं वृणोमीति य

धर्मं ग्राहयितं प्रायः प्रवक्तारः स्वयं देहिनां आचरंत्यनुमोदंते क्रियमाणं नमस्तवेति च ॥ ३० ॥ नैतावता भगवतः स्वमाया

मयवृत्तिभिः न दुष्यत्यनुभावस्तैर्मायिनः कुहकं यथा ॥ ३१ ॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः

कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ॥ ३२ ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे

ब्रह्ममूर्तये ॥ ३३ ॥ कं वृणे नु परं भूमन्वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत् ॥ ३४ ॥

वरमेकं वृणेथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ ३५ ॥ सूत उवाच ॥ इ

त्यर्चितोभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह भगवाञ्छर्वः शर्वया चाभिनंदितः ॥ ३६ ॥ कामो महर्षे

सर्वोयं भक्तिमांस्त्वमधोक्षजे ॥ आकल्पांताद्यशः पुण्यमजरामरता तथा ॥ ३७ ॥ ज्ञानं त्रैकालिकं ब्रह्मन्विज्ञा

नं च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते ॥ ३८ ॥ सूत उवाच ॥ एवं वरान्स मुनये दत्त्वा भ

गवांस्त्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरामुना ॥ ३९ ॥ ॥ कुतस्तत्राह कमिति ॥ ३३ ॥ त्वद्वरदर्शनं यस्य तस्मात्त्व

त्तः परं कं नु वरं वृणोमि यस्य तव दर्शनात्पूर्णकामः ॥ सर्वानंदसंदोहरूपः सत्यकामः ॥ यथेच्छप्राप्तसर्वानंदः ॥ ३४ ॥

वरदानापेक्षायामेव प्रश्नः शर्वयो मया चाभिनंदितो नमोदितः ॥ सन्नाह ॥ ३५ ॥ कामोयं सर्वोपि यस्त्वया प्रार्थितः य

स्मादिव्रह्मवर्चस्विनस्ते भूयादित्यन्वयः यतस्त्वमधोक्षजे भक्तिमान् ॥ ३८ ॥ ॥ ॥ ॥ ॥

श्री
भा॰द्वा॰
टी॰
३९

तस्य कर्मेतप प्रादियम् नानुभूतं भगवन्मायावैभवं तत्प्रकथयन् ॥ ३९ ॥ अवाप्तो योगमहिमा येन सः ॥ ४० ॥ एतन्मा-
र्कण्डेयस्य वर्णितं तेनानुभूतं च भगवन्मायावैभवं तेनैव वर्णितं ॥ ४१ ॥ नन्वेवमप्यस्य तत्कालीनत्वात्सर्वस्य समकल्पायु-
षो दृश्यमानं विरुद्धमेवेत्याह एतन्मार्कण्डेयेनानुभूतं मायावैभवं नानाकल्परूपं कादाचित्कमीश्वरेच्छया तस्यैव कं-
स्मिंश्चित्तं न तु सर्वसाधारणमेतत् केचिदविद्वांसो अनादिवत्कालक्रमावर्तितं देवयुगसहस्रव्यवधानेनैव पुनः पुनः प्रवर्तितं तेन के-
नेन्द्रियाणां संसृतिं मर्गप्रलयादिलक्षणां प्रत्येकं भगवतो मायैव भवं प्रविशन्ति। विद्यामस्त मायाया आभासः श्लोको ह्यास

सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः । विचरत्यधुनाप्यद्धा हरावैकान्तिकतां गतः ॥ ४० ॥ एवं वर्णितमेतत्ते मा-
र्कण्डेयस्य धीमतः । अनुभूतं भगवतो मायावैभवमद्भुतं ॥ ४१ ॥ एतत्केचिदविद्वांसो मायासंसृतिमात्मनः । अना-
द्यावर्तितं नॄणां कादाचित्कं प्रचक्षते ॥ ४२ ॥ य एवमेतद्भृगुवर्य वर्णितं रथाङ्गपाणेरनुभावभावितं । संश्रावये-
त्संशृणुयादु तावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ४३ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे
दशमोऽध्यायः ॥ १० ॥ शौनक उवाच ॥ अथेमम् अर्थं पृच्छामो भवन्तं बहुवित्तमम् । समस्ततन्त्रराद्धान्ते भवान्
भागवततत्त्ववित् ॥ १ ॥ ॥ ॥

साक्षात्संस्कृत्य सत्कृत्य दशमे निर्ग मप्रविशन्तः ॥ मसकल्पत्वेनान्तानामा-
वेशानितिवदंति प्रतीतानविरोधयन्तत्पर्थीः ॥ ४२ ॥ संशृणुयादुतं संश्रावयेद्वा योनायुभौ तयोः कर्मवासनाकृता
संसृतिर्न भवेदिति ॥ ४३ ॥ इति श्रीभावार्थदीपिकायां दशमोऽध्यायः ॥ १० ॥ एकादशे तु सर्वाङ्गं महापुरुषवर्ण-
नं ॥ रविव्यूहस्य चाख्यानं प्रतिमासं सपर्यया ॥ पूजनार्थमन्त्रमापन्नां मन्त्रोऽसौ भागवतोत्तमः ॥ नैष्ठिकक्रिया
योगः संयोगोऽप्यन्योन्यकल्पिते ॥ १ ॥ अथेति हे भार्गव यतो भवान् समस्ततन्त्रराद्धान्ते तत्त्ववित् पृष्टव्यमाह ॥ ॥ १ ॥

श्री॰
भा॰ टी॰
२८

नो ममात्र: इयोर्ब्रह्माविष्णुमहेश्वरा: यतः पेभ्यस्तेव यं ॥ १५ ॥ सदा नादिना भवेत्सैव वा साभि: क्रियते । न तत्र ग्रहः खगा देघ
वा इत्यामिति ब्रह्मणा नैश्वात्रि ब्रह्मणाः त्वामभेदेन । पेमा यव: सदाचारा: शांतामत्सरादिरहिता: नि:संगा निष्कामा:
॥ १६ ॥ न केवलं तप एवं किंचाहं वेदादिकं श्रुतमत्वेवं देवंतरमाह ॥ १७ ॥ प्रागवपि युगमाश्रमेपि वर्तते पश्यति । तन्मात्रादेवे
युतान् । युमान् । ईश्वरमिहमं जेम ॥ १८ ॥ ब्राह्मणाभ्यो ब्राह्मणान् । ध्यानसमाधाने विनेकाग्यतप आलोचनस्वाध्याय: । अथ

सूत उवाच ॥ एवं स्तुत: स भगवान्महादेव: सतांगति: । पवित्रः प्रसन्नात्मा प्रहस्य संस्तभाषत ॥ १९ ॥ श्रीशि
व उवाच ॥ वरं वृणीध्व न: कामं वरदेशा वयं त्रय: । अमोघं दर्शनं येषां मर्त्यो यद्विंदतेमृतं ॥ १९ ॥ ब्राह्मणा: साध
व: शांता नि:संगा भूतवत्सला: । एकांतभक्ता अस्मासु निर्वैरा: समदर्शिन: ॥ २० ॥ सलोका लोकपालास्तान्व
दंत्यर्चंत्युपासते । अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वर: ॥ २१ ॥ न ते मय्यच्युतेजे च भिदामण्वपि चक्षते । नात्मन:
श्च जनस्यापि तद्युष्मान्वयमीमहि ॥ २२ ॥ न ह्यम्मयानि तीर्थानि न देवाश्चेतनोज्झिता: । ते पुनंत्युरुकालेन यूयं द
र्शनमात्रत: ॥ २३ ॥ ब्राह्मणेभ्यो नमस्यामो येस्मद्रूपं त्रयीमयं ॥ २४ ॥ बिभ्रत्यात्मसमाधानयोगतप: स्वाध्यायसं
यमै: ॥ २४ ॥ श्रवणाद्दर्शनाद्वापि महापातकिनोपि व: । शुध्येरन्नंत्यजाश्चापि किमु संभाषणादिभि: ॥ सूत उवा
च ॥ इति चंद्रललामस्य धर्मगुह्योपबृंहितम् ॥ वचोमृतायनमृषिर्नातृप्यत्कर्णयो: पिबन् ॥ २६ ॥ स चिरं माय
या विष्णोर्भ्रामित: कर्शितो भृशम् । शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् ॥ २७ ॥ अहो ईश्वरचेष्टेयमेवं विभा
व्या शरीरिणां यन्नमंतीशितव्यानि स्तुवंति जगदीश्वरा: ॥ २८ ॥ ॥ यतेनं संयम: वागादिनियमस्तै: ॥ २५ ॥ किंच

श्रवणादित्यादि । चंद्रोल्ललामो भूषणं यस्य तस्य धर्मरहस्ययुक्तमस्तनास्पदं वच: कर्णाभ्यां पिबन्नात्र प्तृत
मलमिति । नामस्तत्कर्णयोरमृतायनं र्यतिवामय: ॥ २७ ॥ शिवस्य वागेवामृतं तेन ध्वस्त: क्लेशपुंज: यस्य स: ॥ २८ ॥
इयं लीला इविभाव्या वितर्क्या यत् यस्मादीशितव्यानि स्वनियम्यानि नमस्कुर्वंति तानि जगदीश्वरा: स्वयं नमंति

॥ स्कंदेविद्ये ॥ २८ ॥

२८

याशिषः प्रमुदयन्नवतासि व ॥ अत्र देहि नः भक्तिमिति ॥ ६ ॥ संवदिष्याम संवादं करिष्यामः ॥ ७ ॥ सा त्वं तां गतिं तन्वेदे
तत्त्वं मानइति ॥ ८ ॥ रुद्राधियोऽन्तःकरणवृत्तयो येन सः ॥ ९ ॥ न केवलं विहारे वाक्ये न्यपि प्रामं शिवं विचक्ष्य विस्मितः कथ
प्राप्तमदः नाः कस्मादेव हृदि भाति कथं भ्रान्तेनेदिद्वान्त्यशो गाजटाधारयतीति तथ्यां तञ्जो एव लीलाय स्मृते ॥ ११ ॥ सुलादि

श्रीशिव उवाच ॥ नैवेच्छन्त्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ॥ १२ ॥ अ
थापि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥ १३ ॥ सूत उवाच ॥ इत्युक्त्वा तमु
पेयाय भगवान्स सतां गतिः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ॥ १४ ॥ तयोरागमनं साक्षादीशयोर्जगदा
त्मनोः ॥ न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥ १५ ॥ भगवांस्तदभिज्ञाय गिरिशो योगमायया ॥ आविशत्तद्गुहा
काशं वायुश्छिद्रमिवेश्वरः ॥ १६ ॥ आत्मन्यपि शिवं प्राप्तं तडित्पिङ्गजटाधरम् ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यन्तमिव भास्क
रम् ॥ १७ ॥ व्याघ्रचर्माम्बरं शूलधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरुककपालपरशुं सह ॥ १८ ॥ बिभ्राणं सहसा भा
तं विचक्ष्य हृदि विस्मितः ॥ किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ १९ ॥ नेत्रे उन्मील्य ददृशे सगणं सोमयागतं
रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ २० ॥ तस्मै सपर्यां व्यदधात्सगणाय सहोमया ॥ स्वागतासनपाद्यार्घ्य
गन्धस्रग्धूपदीपकैः ॥ २१ ॥ आह त्वात्मानुभावेन पूर्णकामस्य ते विभो ॥ करवाम किमीशान येनेदं निर्वृतं जगत्
॥ २२ ॥ नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च ॥ रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे ॥ २३ ॥ ॥

बिभ्राणं सहसा भातमक्षमालादीनि बिभ्राणमित्यन्वयः ॥ अक्षमालादीनां द्वेद्वे कं विस्मयपूर्वकं वदिदेश नमाह ॥ २३ ॥ सोमया उमया
सहागतं रुद्रं ददर्श ॥ २४ ॥ तेनैव नाम केनचिद्व्याचौ चक्रे इत्याह ॥ २५ ॥ पूर्णकामस्य तवानुभावेन त्वया जगन्निर्वृतं भव
तीति निश्चयात्तेन च नमस्करोति नमः शनि ॥ २६ ॥ नमः शिवायेति शान्ताय सत्त्वाय सत्त्वमधिष्ठात्रे ॥ अतएव प्रमृडयतो

ध्यात्मसमाधिनाचिंतैकाग्र्येणवर्यैःनेपमितश्छाःस्मेतिबहुवचनंसर्वदेवाभिप्रायेण ॥ अभ्रदेशादित्येकवचनंहृदयेरेका-
भिप्रायेण। प्रतीच्छगृहाण ॥३॥ वरेणालंइत्यत्रानन्यानिजितंउत्कर्षोदर्शितः ॥ समस्तवराकांक्षानास्तीत्याह ॥४॥ यस्यतवश्री-
मत्पादाब्जदर्शनंमनसायोगपक्वेनगृहीत्वाप्राप्यप्राकृताअप्यजादयोभवंति ॥ सभवान्मेक्षिगोचरोजातोस्तिकिमितःपरंवरेण
तथा ॥५॥ द्रष्टुमिच्छामिलोकपालैःब्रह्मादिभिःसहितोययालोकःजनःसद्भिदांसतिवस्तुनिभेदंपश्यति ॥६॥ नेय

श्रीभगवानुवाच ॥ भोभोब्रह्मर्षिवर्योसिसिद्धआत्मसमाधिना ॥ मयिभक्त्यानपायिन्यातपःस्वाध्यायसंयमैः ॥
२॥ वयंतेपरितुष्टाःस्मत्वद्बृहद्व्रतचर्यया । वरंप्रतीच्छभद्रंतेवरदेशादभीप्सितं ॥ २ ॥ **ऋषिरुवाच** ॥ जितंतेदेवदेवेश
प्रपन्नार्त्तिहराच्युत वरेणैतावतालंनोयद्भवान्समदृश्यत ॥४॥ गृहीत्वाजादयोयस्यश्रीमत्पादाब्जदर्शनं ॥ म-
नसायोगपक्वेनसभवान्मेक्षिगोचरः ॥५॥ अथाप्यंबुजपत्राक्षपुण्यश्लोकशिखामणे । द्रक्ष्येमायांययालोकः
सपालोवेदसद्भिदां ॥६॥ **सूतउवाच** ॥ इतीडितोर्चितःकाममृषिणाभगवान्मुने ॥ तथेतिसस्मयन्प्रागाद्बद-
र्याश्रममीश्वरः ॥ ७ ॥ तमेवचिंतयन्नर्थमृषिःस्वाश्रमएववसन् ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥८॥
ध्यायन्सर्वत्रचहरिंभावद्रव्यैरपूजयत् । क्वचित्पूजांविसस्मारप्रेमप्रसरसंप्लुतः ॥९॥ तस्यैकदाभृगुश्रेष्ठ
पुष्पभद्रातटेमुनेः उपासीनस्यसंध्यायांब्रह्मन्वायुरभून्महान् ॥१०॥ तंचंडशब्दंसमुदीरयंतंबलाहकाअन्व-
भवन्करालाः । अक्षस्थविष्ठामुमुचुस्तडिद्भिःस्वनंतउच्चैरभिवर्षधाराः ॥११॥ ततोव्यदृश्यंतचतुःसमुद्राःसमं-
ततःक्ष्मातलमाग्रसंतः । समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥१२॥ तिरुद्भवसीतिसईश्वरःस

यन् ॥ प्रागात् ॥ पादांतरे ॥ क्रियाविशेषणंतमेवार्थंमायादर्शनरूपंप्रार्थितंचिंतयन्निति ॥८॥ भावद्रव्यैर्मनोमयैरेवद्रव्यैःक्वचि-
त्कदाचित्प्रेमप्रसरसंप्लुतःप्रेमोद्रेकपात्रः । मायादर्शनमाह ॥१०॥ तंवायुंसमवलाहकामेघाअन्वभवन्नान्वविवभूवुः । ते
चतडिद्भिःसहिताउच्चैःस्वनंतोगर्जंतःअक्षेत्ययोगंनद्धस्थविष्ठाअभितोवर्षधाराममुचुः ॥११॥ चतसृदिक्स्वर्तमानाःस

ग्राः समीरवे, ... ॥१२॥

आत्मनामहज्जनायुज्जादिचतुर्विधं जगदंतर्वेदिश्रोपतापितं वीक्ष्य स्वं च जलाल्लतोवीक्ष्य मुनिः सम्भ्रमन् ॥ भयंश
पकेनोपनामितं खड्गिः कथंभूताभिरति द्युतिः ॥ प्रतिकांतायोपाधिभिः खरैस्तस्य रश्मिभिर्वायुभिश्चेतिशेषः ॥ शतह्र
दाभिर्विद्युद्भिः दीर्घमार्षभ्रूदोन्नुसारेण ॥१२॥ प्रभंजनेनाघूर्णिता प्रकंपिता वारुदकं यस्मिन्नसः ॥ अप्पथान्तछादय

श्चेन्तर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभिरुपतापितं जगत् ॥ चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लु
तां क्ष्मां विमनाः समत्रसत् ॥१३॥ तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो
वरषद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समं ॥१४॥ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सहदि
ग्भिराप्लुतं ॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांधवत् ॥१५॥ क्षुत्तृट्परीतो मकरैस्ति
मिंगिलैरुपद्रुतो वीचिनभस्वताहतः ॥ तमस्यपारे पतितो भ्रमन् दिशो न वेद खं गां च परिश्रमेषितः ॥१६॥
क्वचिद्गतो महावर्ते तरलैस्ताडितः क्वचित् ॥ यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः ॥१७॥ क्वचिच्छो
कं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयं ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥१८॥ अयुतायुतव
र्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः ॥१९॥ स कदाचिद्भ्रमंस्तस्मिन्पृथि
व्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितं ॥२०॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं
॥ शयानं पर्णपुटके ग्रसंतं प्रभया तमः ॥२१॥ ॥श्री॥

यामास ममंसद ॥१४॥ सत्वा तं निलंभ्रमं तमिलस्य प्राणिमहितं सदिवं स्वर्गस्य देवसहितं ॥ भगणा ज्योतिर्गणा
गणास्तैः सहितं त्रदाविदिप्याविकीर्य ॥१५॥ परिश्रमेणा ईषितः व्याप्तस्तृष्णः ॥ उषसर्पणा अन्यस्मात् ॥१६॥ अन्योन्य
घातिभिस्तन्न लाभायपरस्परं घ्नद्भिः ॥१७॥ विष्णुमायावृतात्मनः इति सत यहं ष्षवा नित्यर्थः ॥१८॥ ककुदि उ
न्नतप्रदेशे न्यग्रोधपोतं कोमलं वटं ॥१९॥ तस्य शानादिकं शाखायामिशुमपि ॥२०॥ ॥

श्री
भा॰द्वा॰
टी॰
१०
७८२

देहं देवेत्तोकं चकीट्यन स्वप्ने मायामयात्तत्त्वासित पूर्वेके नापं मनिरी क्षणेन निरीक्षितः सन् ॥१०॥ अथ तं बालकं मयोक्तमेव मिथ्याकं मयाद्यादिति द्वयोरन्वयः कथंभूतं नेत्राभ्यां हृदि धिष्ठितं ॥२०॥ तावत्स विष्णुर्गलाभात्स्वं वैभवं ज्ञेषं सत्यं ततो दृष्टेन वभूव तदुद्यमवेकल्प दृष्टातः ॥ भूतो योग्यो निदेवः तेन निर्मिताई हा क्रीडाय येति ॥२१॥ तमंतर्दृतं भगवंतमनुवदः सलिले लोक संप्लवं जानि गच्छ्रेत तर्हितः स च स्वाश्रमे पूर्ववत् पश्यन् सर्वे स्थित इति ॥२२॥ इति भावार्थदीपिकायां नवमोऽध्यायः ॥९॥

हिमालयं पुष्पवती च तां नदीं निजाश्रमं तत्र ऋषीनपश्यत। विश्वं विपश्यञ्छ्रमितात्ततो वै बाहिरितो लोकपूर्वल्पयाद्भुत ॥२४॥ तस्मिन् पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं। तोकं च तत्प्रेमसुधास्मितेन निरीक्षितो पांगनिरीक्षणेन ॥२९॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि। अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजम् ॥३०॥ तावत्स भगवान् साक्षाद्योगाधीशो गुहाशयः। अन्तर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ॥३१॥ तमन्वथ वटो ब्रह्मन् सलिलं लोकसंप्लवः। तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥३२॥ इति श्रीभागवते नवमः ॥९॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितं। वैभवं योगमायायास्तमेव शरणं ययौ ॥१॥ मार्कंडेय उवाच ॥ प्रपन्नोऽस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे। यन्माययापि विबुधा मुह्यन्ति ज्ञानकाशया ॥२॥ सूत उवाच ॥ तमेवं निभृतात्मानं वृषेण दिवि पर्यटन्। रुद्राण्या भगवान् रुद्रो ददर्श स्वगणैर्वृतः ॥३॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत। पश्येमं भगवन्विप्रं निभृतात्मेन्द्रियाशयम् ॥४॥ निभृतोदझषव्रातो वातापाये यथार्णवः। कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥५॥ ॥ रामाय नमः मुनेस्तस्यैव वरा-
दशमे शिवप्रसादात्
नदानं ॥ ततः स्तोकमतिप्रीत्या समभाभाष्य समभाजयत् ॥ ज्ञानकाशया ज्ञानवत्प्रकाशमानया तत्त्वज्ञानं विना विद्यमाप्रियस्य तव मायया ज्ञानिनो व्यामित्यहं कारणास्वयं तोऽस्म्यर्थः ॥ श्रीनारायणात् एव स्वमायादर्शनेत्राने श्रीशिवरूपेणात्मानं पायोपि मनदा हतमवनित्यादिना ॥१॥ निभृतात्मानं समाहितचित्तं रुद्राण्या भवान्या ॥३॥ निभृता आत्मेन्द्रियाशया देहेन्द्रियमनांसि ॥४॥ निभृतानि झषव्रातः यस्मिन् सः संसिद्धिं फलं साक्षात् कुरु प्रकटी कुरु यतो भवान्सि-

॥ भा॰ ॥ टि॰

१०

श्रीमद्रामं वदनपंकजं यस्य तेन केयूरवद्भिर्बाहुभिर्नाग्रीवा च स्यात् ॥ महोरस्कं विशालवक्षसं ॥ मनासं सोभमनानामाय स्यात् सेदे

भ्रुवौ च स्यात् ॥ ११ ॥ स्वामी रेजे नः कंपमाना ग्रलकाः स्वेराभाते शोभिते केयूरवत ॥ ग्रनवलयेन श्रीयं पौः कर्णौ यो दाडिमपुष्पेषु

ते विद्रुमतल्यामभासोष्ठद्वयं गणायिते सुधान्वयस्मितेय स्यात् ॥ १० ॥ पद्मगर्भवदारेषत ॥ श्रुतागावपीनोनेत्रौ नो च स्यात ॥ दृष्ट्वा

हासाय स्मिन ॥ तरवलोकनं च स्याते ॥ स्वामी रेजे न्यचलन ॥ यावलयसि पीयि ग्रसेरखासनाभिः मोविश्रवंचलानि स्वागश्रीरान ॥

पिवैसमिन ॥ तरलवन ॥ प्रसन्न्यपत्र सकामसुदरं च स्याते ॥ १३ ॥ वासवौ गलयोपयो स्तामापाउन्नोयाकृष्यथ यंतपिवंते ॥ १४

महामरकतश्यामं श्रीमद्वदनपंकजं ॥ कंबुग्रीवं महोरस्कं सनासं सुंदरभ्रुवं ॥ ११ ॥ स्वामी सेजदलकाभाते केयूरश्रीकु

णिडाडिमविद्रुमाधरभासेष्ठद्वयोगणायित सुधास्मिते ॥ १२ ॥ पद्मगर्भारुणापांगहृद्यहासावलोकने ॥ स्वामीसेजह्वलिसीव

ग्रनिस्वनाभिदेलोदरे ॥ १३ ॥ वाचेगलिभ्यापाणिभ्या सन्नीयचरणांबुजे ॥ मोविनिथायविग्रहे थे यंतवीसविस्मितः ॥

१४ ॥ तद्देवानाद्भुतपीस्थेमा मुद्रा [illegible] पीलकलहृत्य सविलोचनांबुजः ॥ प्रहृष्टो माद्भुतभाववशंकितः पश्चपुस्त

प्रसमासवालक ॥ १५ ॥ तावद्धि शोर्वेश्वसितेन भागवंसंतः शरीरं सुषेको ययाविशत ॥ तत्राप्येदान्यसम चक्षु

ष्मोन्नसगायपाउरासमुद्रतातोवविस्मितः ॥ १६ ॥ विरोदसीभगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभः सुरास

रान् वनानि देशान्सरितः पुराकरान्खेटान्व्रजान्नाश्रमवर्णवृत्तयः ॥ १७ ॥ महांति भूतान्यथ भौतिकान्यसौ

कालं च नानायुगकल्पतन ॥ यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितम् ॥ १८ ॥ ॥ राम

हृत्यमेचविलोचनांबुजे च पोलकुलानितानि यस्समः ॥ अद्भुतभावमन्याश्च यद्रूपं तेन शंकितः ॥ सन्नपि शंकुपुरंगः प्र

मसासस मीपं मतः ॥ १९ ॥ यदः इदं जगद्यथा पुरा पलयातं देवतास्ते विन्सं लहृष्ट्वा चातीवविस्मितः ॥ सन्न श्रूयत ॥ २० ॥

कुक्ष्यन्तो यो दर्शितं विश्वं यवनिवमिसादिना ककुभो दिशः ॥ पुराणि आकरा श्च खेटा न कर्षक ग्रामान् ॥ व्रजान् गोकु

लानि ग्रामाश्रमान्वर्णा श्च तेषां वृत्तीश्च तेषां यः ॥ २१ ॥ नाना युगानि कल्पाश्च कल्पयतितेवो कल्पनरोनि ॥ तथाने का

लेच सदिवपरमार्थ इवेत्यवभासितं नैव ॥ २२ ॥ ॥ नारायण

कल्प

अतो यः पुरुषार्थो न स्मीत्याह ॥ नान्यमिति ॥ अन्यमपुनर्भवात् श्रीमच्चरणाम्भोजे अन्यं देवं न वि मः परितः सर्वेष्वपि लोकेषु भयं यस्मात् तस्माज्जनस्य देवाह ॥ द्विपरार्धं ॥ धिष्ण्यं स्थानं यस्य एष सः ब्रह्मापि ते कालरूपात् त्वत्तो बिभेति तस्मात्कालादेव बिभेति ॥ अतः किमुत वक्तव्यं नेव ब्रह्मणाकृतान्नाभीति कानां प्राणिनां भयमिति ॥ ४४ ॥ यस्माद्देवं तन्न स्मात्त्वत्पादमूलं भजामि कथं भूतं तस्य अर्तस्य यः सत्त्वानस्वरूपस्य ॥ यद्वा सत्पार्थोऽर्थस्य यस्मिन्वा तस्मात्स्वगुणैः जीवति यतः ॥ अतः कारणात्त्वयस्मि किं कृत्वा आप्तश्चौरस्मात्मा वरकं ॥ अपार्थं च निष्कलं प्रसचतस्तुं अत्यचनस्मरं ॥ ईश्वेदाहिद्वितादेहादिभजनेनेत्यक्ता अस्मिन्कथं भूतीयने ॥ अभितमाकेन स्नेन्यतमसत ॥ किन्तान्न माजेनन तः स्यगासीत्यर्थः ॥ नन्वपवर्गाय भवनमङजनेन फलान्तराय

नान्यं तव त्वा अपुनर्यादपवर्गमूर्तेः तेमं जनस्यपीतो भिययं शविभः ॥ ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ॥ ४५ ॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥ देहाद्यपार्थमसदन्त्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं ॥ ४६ ॥ सत्त्वं रजस्तम इतीश तवात्मबन्धो मायामयाः स्थितिलयोदयहेतवोऽस्य लीला धृता यदपि सत्त्वमयी प्रशान्त्यै नान्ये नृणां व्यसनमोहभियश्च याभ्यां ॥ ४७ ॥ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजन्ति ॥ यत्सात्वताः पुरुषरूपमुशन्ति सत्त्वं लोको यतोऽभयमुतात्मसुखं च नान्यत्

नन्यभजनं कार्यमेवत त्राह ॥ तद्वैति यदि त्वां भजन्ति पुरुषाः ॥ तर्हि तेन त्वप्रव सर्वमनीषितमर्थं विंदते तेन न ब्रह्मरुद्रावपि सेवत इत्याह ॥ तस्मा अतो मामेव किमस्य तत्र ॥ ह्रियसेत त्राह सत्त्वमिति ॥ ४६ ॥ यद्यपि एषापि तवैव मायया कृताः पतन्ती लीला स्व्ये यवधृतः ॥ तथापि या सत्त्वमयी सा प्रशान्त्यै मोक्षायन केवलं सत्त्वशान्त्यै वमात्रमन्यभजनं किं न निश्चयं कि विदन्य या त्वमवेदित्याद्रक्षमनेनेति ॥ तदेव सदाचारेणाद्रढयति तस्मादिति ॥ ४७ ॥ हे भगवन् तव शुक्लां तनुं श्रीनारायणाख्यां अथ तावकानां च शुक्लां तनुं नरादिरूपां यस्मात्सात्वताः ॥ सत्त्वमेव पुरुषस्याधीश्वरस्य रूपमुशन्ति मन्यते तेन तत्त्वन्यत ॥ रजस्तमश्चेति ॥ यत्त्वरेन ॥ यतः सत्त्वा लोको वैकुण्ठाख्यः लोकतत्त्वसन्यभयंच

अतस्तेभ्यो नमामीति ॥ तस्मै नमस्करोति ॥ हंसाय शुद्धाय संयतगिरे नियतवाचे अथ च निगमेश्वराय वेदमार्गप्रवर्त्तकाय वे
दार्थेश्वराय प्रवर्त्तने हृतत्त्ववदनस्तोतियामिति ॥ ४७ ॥ कुपदेंद्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः पुमान् ॥ स्वेंद्रियादि
षु निर्यदं त्वेनसंतमपि यं त्वा न वेद हृत्कार्येषु विषयेषु बुद्धिविक्षेपहेतुः ॥ तन्माययावृतमतिः तवैव मायया आवृता ज्ञान
निष्ठा मतिर्यस्य ॥ उ एवापि आद्य एव ब्रह्मैव महांतं वयाखिलगुरोस्तव तत्त्व वर्णितं वेदं स्वयमुपसाद्य प्राप्य तत्त्वं त्वा साक्षादाहृदे ॥ ४८ ॥
वेदेनैव तत्त्वज्ञानमित्युपपादयन्नमामीति ॥ यद्दर्शनमिति ॥ यस्य तव दर्शनं निगमे भवति किंभूतमात्मनः स्वरूपस्य प्रका

तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै ॥ नारायणाय ऋषये च नरोत्तमाय हंसाय
संयतगिरे निगमेश्वराय ॥ ४७ ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः ॥ संतं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्मा
ययावृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदं ॥ ४८ ॥ यद्दर्शनं निगम आत्मरहःप्रकाशं मु
ह्यंति यत्र कवयोऽजपरा यतंतः ॥ तं सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधम् ॥ ४९ ॥
इति श्रीभागवते महापुराणे द्वादशस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कंडेयेन
धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहं ॥ १ ॥ ॥ ॥ ॥

शं कं त्वमग्याद्वैतं यतामाह ॥ अजपरा ब्रह्मसु मुख्याः कवयोऽपि सांख्ययोगादिभिर्यतमानाः यत्र त्वयि मुह्यंति कुत इ
त्यत आह ॥ सर्वेषां सांख्यादिवादानां विषया भेदादयस्तेषां प्रतिरूपं तत्तदनुसारि शीलं स्वभावो यस्य तं तत्कुत आत्म
नां देहादिसंघातेन ॥ निगूढो बोधो यस्य तं ॥ एवंभूतं महापुरुषं त्वा वंदे ॥ ४९ ॥ इति भावार्थदीपिकायामष्टमो द्वा
दशस्कंधटीकायामष्टमः ॥ ८ ॥ नवमे भगवन्मायादिदृक्षोर्दर्शनं स्फुटं ॥ मायाभिषेणोल्लयश्चाच मुनेर्निर्वेदनिर्गमौ
॥ भगवतः परितोषपूर्वकं तदभीप्सितवरदानं कथयितुमाह ॥ १ ॥ ॥ नामाय

एवं दशभिर्लक्षणैर्विख्यायानुवर्णयंति महत्पुराणमिति यदुक्तं तदाह ॥ तदा सर्गादीनां मायामयत्वात्तुच्छत्वेन ब्रह्म
देवाद्वैतमस्य पक्षे निर्विशेषमत ॥ रक्षेत्वा तु हितेन योगेन वा देवहूत्यादिवत ॥ तदा विक्षेपाभावादात्मानं वेद ॥ तदा वा विद्या
निवृत्तेरीहायाः संसाररूपाया निवर्त्तनमित्यर्थः ॥ पुराणविभागप्रस्तावेन तल्लक्षणादि प्रासंगिकमुक्तमुपसंहरन्नाह ॥ २१ ॥
एवंविधलक्षणैर्लक्ष्याणि ॥ २२ ॥ त्रिषट् अष्टादश ॥ २४ ॥ उपसंहरति ब्रह्मन्निति ॥ मुनेर्व्यासस्य शिष्यादीनां ब्रह्मतेजोऽभि

विश्वमेतद्यदा वित्ते हित्वा हीनि चयं स्वयं ॥ योगेन वा तदात्मानं वेदेहाया निवर्तते ॥ २१ ॥ एवं लक्षणलक्ष्याणि
पुराणानि पुराविदः ॥ मुनयोऽष्टादश प्राहुः क्षुल्लकानि महांति च ॥ २२ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारु
डं ॥ नारदीयं भागवतमाग्नेयं स्कंदसंज्ञितं ॥ २३ ॥ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं ॥ वाराहं मात्स्यं
कौर्मं च ब्रह्मांडाख्यमिति त्रिषट् ॥ २४ ॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्यप्र
शिष्याणां ब्रह्मतेजोविवर्धनं ॥ २५ ॥ इति श्रीभागवते द्वादशस्कंधे वेदशाखाप्रणयनं नाम सप्तमो
ध्यायः ॥ ७ ॥ शौनक उवाच ॥ सूत जीव चिरं साधो वद नो वदतां वर तमस्यपारे भ्रमतां नृणां त्वं पारद
र्शनः ॥ १ ॥ आहुश्चिरायुषमृषिं मृकंडुतनयं जनाः ॥ यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥ २ ॥

वर्धनं तद्विवर्धनं तेजो न्यूनमिति शेषः ॥ २५ ॥ इति द्वादशस्कंधे भावार्थदीपिकायां सप्तमोऽध्यायः ॥ ७ ॥
अष्टमे तु नृपश्यर्षिर्मार्कंडेयस्य मोहकैः ॥ कामादिभिरसंमोहान्नरनारायणस्तुतिः ॥ १ ॥ पुराणविभागप्रसंगे
न पुराणके मार्कंडेयस्य चरितं प्रस्तुतमाह ॥ सूतेति ॥ तमेव वक्तुं योगपरत्वमाह ॥ तमसि संसारे भ्रमतां पार
दर्शनस्त्वं निवर्तकः ॥ १ ॥ वक्तव्यमाह ॥ आहुरिति ॥ उर्वरितः अवशिष्टः ॥ येन कल्पांते न पतत्कथं घटते इत्य
त्येकः प्रश्नः ॥ २ ॥ ॥ रामायनमः ॥ ॥ ॥ ॥

फलयाभ्भवादयेतत्रात्रादतेऽत्याह ॥ यतो भार्गववृषभः कोपि शाकुनिको नैमित्तिको वा । ग्रन्थदेवाचरितमित्याह ॥ एक
एवेति ॥ ३ ॥ नोकंबालकं ॥ ४ ॥ कौतूहलं उत्पन्नं तेसंशयं न केवलं त्वं महायोगी । किंतु पुराणाद्यपि जानासि तेन संमतः ॥ अथ
प्रश्नमभिनंदति प्रश्नइति ॥ ५ ॥ हेमहर्षे त्वया यं प्रश्नः । तत्र हेतुः । नारायणेति । यत्र प्रश्नविषये तत्र मार्कंडेयस्तपसा भगवंतमा
राध्य मायादर्शनं वव्रे ततश्च तेनैव भगवन्मायया । ममेकल्पादृष्टाः । नान्यैरित्युक्तं रेवं कमादित आरभ्य तस्य चरितमाह

सवाक्यस्तक्तलोभिः कल्पेस्मिन् भार्गववृषभः । नैवाधुनापि भूतानां संप्लवः कोपि जायते ॥ ३ ॥ स एक एवार्णवे
भ्राम्यन्ददर्श पुरुषं किल । वटपत्रपुटे त्वेकं शयानं त्वेकमद्भुतं ॥ ४ ॥ एष नः संशयो भूयान् सूत कौतूहलं यतः
तं नश्छिन्धि महायोगिन्पुराणेष्वपि संमतः ॥ ५ ॥ सूतउवाच ॥ प्रश्नस्त्वया महर्षेयं कृतो लोकभ्रमापहः ॥ ना
रायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥ प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात् । छंदांस्यधी
त्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः । बिभ्रत्कमंडलुं दंडमु
पवीतं समेखलं ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये । अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययो
र्हरिम् ॥ ९ ॥ सायं प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः । बुभुजे गुर्वनु[illegible] सकृन्नो चेदुपोषितः ॥ १० ॥

॥ ६ ॥ मार्कंडेयोपि तत्तुल्य इति पंचमश्लोकेनान्वयः । मध्यमधर्मेण तपप्रधर्मः कथ्यते । प्राप्तो द्विजातिसंस्कार
उपनयनाख्योयेनसः । पितुः सकाशात्तगर्भाधानादिक्रमात् छंदांसि वेदान् ॥ ७ ॥ बृहद्व्रतधरः । नैष्ठिकब्र
ह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये अग्न्यादिषु पंचसु हरिमर्चयन् ॥ ९ ॥ भैक्ष्यं गुरवे माहृत्य तेनानुज्ञातः
सकृद्भुंजे नो चेत्कदाचिदुपोषितो भवति ॥ १० ॥ नारायणाय नमः

श्री॰ सां॰ टी॰ २१

वेशमाह ॥ ब्रह्मणः सकाशात्सम्भूतिर्येषां शुद्धानामित्यर्थः ॥ तेषामन्वयो वंशः तेषां ब्रह्मणे ये चतद्वंशयतास्तेषां च ब्रह्मणे
वेशानुवर्तिन उच्यते ॥ ३ ॥ अस्य विशुद्धस्य स्वभावतो मायातो यन्निष्पन्नं सयदा मायातो स्वतो वियोलयइति ॥ ४ ॥ अस्य ज
गतः सर्गादेर्हेतुर्निमित्तं जीवः सोत्रहेतुरुच्यते इत्यर्थः ॥ तस्य निमित्तत्वमाह ॥ अविद्यया कर्मकारकः कर्मकर्ता जीवा
द्दष्टमधुक्तत्वादिह सर्गादेः मततदेहेतुरित्यर्थः ॥ तत्त्वनुशायीनि मितमिति केचित ॥ अव्याकृतमित्यपरे ॥ तत्राह यमि
ति ॥ चैतन्यप्रधानेनानुशायिनं ॥ उपाधिप्रधानमविवक्षया अव्याकृतमपाश्रयमाह ॥ १२ ॥ जाग्रदादिष्ववस्थासु जो

यो जीवस्य प्रकृतानां वंशस्य कालिकोन्वयः ॥ वंशमानुचरितं तेषां ब्रह्मणे वंशधरा ह्ये ॥ १७ ॥ नैमित्ति
कः प्राकृतिको नित्य आत्यन्तिकालयः ॥ संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ॥ १८ ॥ हेतुजी
वोस्य सर्गादेरविद्याकर्मकारकः ॥ यं चानुशायिनं चाहुरव्याकृतमुतापरे ॥ १९ ॥ व्यतिरेकान्व
योयस्य जाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ २० ॥ पदार्थेषु
यथा द्रव्यं सन्मात्रं रूपनामसु ॥ बीजादिपंचतान्तासु ह्यवस्था
सु युतायुतं ॥ २१ ॥ ॥ राम

वनयावर्तते इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु सादिनत्वान्व ॥ य सम[illegible]दो च व्यतिरेको ।
यस्य तद्ब्रह्म संसारप्रतीतिर्वा य योरधिष्ठानावधिभूतं मया अपाश्रय उच्यते इत्यर्थः ॥ तदेव च ह[illegible]तप्रपंचयति पदार्थे ।
ष्विति ॥ २० ॥ पदार्थेषु घटादिषु द्रव्यं मृदादि ॥ यथा युतमन्वितं अयुतं च बहिरवस्थानात ॥ रूपनामसु सन्मात्रं
सन्मात्रं च यथा च बीजं गर्भाधानमादिर्यासां पंचतान्ते च यासां ता नव देहावस्थासु नवस्वप्यधिष्ठानत्वेन सा
न्वित्वेन च युतमयुतं च यत ॥ तदपाश्रय इति ॥ २१ ॥ ॥ नारायणाय नमः ॥ ॥

२१

दशभिरिति लक्षणैर्युक्तं महापुराणं विदुः केचित्तु पंचविधं ॥ सर्गोऽस्य प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ वंश्यानुचरितं चेति
पुराणं पंचलक्षणम् इति ॥ महत्स्वल्पाणामल्पं चेति व्यवस्थया ॥ यच्चापि दशलक्षणानि पृथग्द्रष्टव्यानि तन्महापुराणं ॥ एतत्तु
षां च अनभावसंविवेचना भूतसूक्ष्मेन्द्रियार्थानां ततः स्वल्पमिति व्यवस्थयेत्यर्थः ॥ सर्गादिलक्षणानि व्याचष्टे अव्याकृतेत्यादि-
ना ॥ ११ ॥ प्रधानस्य गुणानां क्षोभात् महान् ॥ तस्मात्त्रिवृदहंकारस्तस्माद्भूतमात्राणामिन्द्रियाणां च देवतानां च स्थूलाना-
मेतेषां नानां च संभवः ॥ सर्गः कारणसृष्टिः सर्ग इत्यर्थः ॥ उच्यते इति पाठे ... सर्गं व्याचष्टे ॥ ११ ॥ ९८

दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया ॥ १० ॥ अव्याकृतगुणक्षोभा-
न्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेंद्रियार्थानां संभवः सर्ग उच्यते ॥ ११ ॥ पुरुषानुगृहीतानामेतेषां वासनामयः ॥ वि-
सर्गोऽयं समाहारो बीजाद्बीजं चराचरं ॥ १२ ॥ वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृता स्वेन नृणां तत्र का-
माच्चोदनयापि वा ॥ १३ ॥ रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यंते यैस्त्रयीद्वि-
षः ॥ १४ ॥ मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ॥ ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते ॥ १५ ॥ ॥ ॥

पुरुषेणानुगृहीतानामेतेषां महदादीनां पूर्वकर्मवासनाप्रधानोऽयं समाहारः कार्यभूतस्य चराचरप्राणिरू-
पो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यते ॥ इत्यर्थः ॥ १२ ॥ चराणां भूतानां सामान्यतोऽचराणि चकाराच्चराणि
वृत्तिः ॥ तत्र स्वेन नृणां स्वभावेन कामाच्चोदनया वा यानि यानि वृत्तिर्जीविका कृता साऽपि वृत्तिरुच्यते इत्यर्थः ॥ १४ ॥
तिर्यङ्मर्त्यर्षिदेवेषु येऽच्युतावताराः तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः ॥ येरवतारैरिति ॥ समासान्वि-
कृष्णकथा विन्यस्यः ॥ त्रयीद्विषो दैत्याः ॥ १५ ॥ षड्विधं मन्वंतरमुच्यते ॥ षड्विधत्वमेवाह ॥ मन्वादयः ॥ षडेते चांशाः स-
माधिकारेण यत्र प्रवर्तंते तं मन्वंतरमित्यर्थः ॥ १६ ॥ ॥ रामायनमः ॥

श्री॰
भा॰ द्वा॰
टी॰
२०

आंगिरसः शुनकस्य शिष्यः बभ्रुः सैंधवायनश्च ॥ तदुक्तं ॥ शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे ॥ द्वितीयां संहितां
प्रादात्सैंधवायनसंज्ञिने इति ॥ अथर्वणपथ्याः सैंधवादीनां शिष्याः ॥ २४ ॥ नक्षत्रकल्पः शांतिकल्पश्चेति द्वे ॥ तदुक्तं ॥ न
क्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः तथैव च ॥ चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति ॥ नक्षत्रकल्पादीनां कर्तारो लेख
नाम्नाभिरुच्यंते ॥ ४ ॥ मंत्रितसंवादितिशयमुख्यास्तु संहिताः कृत्वा मतिं वेदमहर्षणाय प्रादात् ॥ तस्य च मुख्योदेतेन बा
ध्यामनपादयः एकैकां संहितामधीयंत ॥ एते पाथ्यस्य शिष्या संहिताः सर्वाः समर्थानवान् ॥ २६ ॥ रामशिष्योऽकृतव्रणः ॥

कुमुदः शुनको ब्रह्मन् जाजलिश्चाथर्ववित् ॥ बभ्रुः शिष्योऽथांगिरसः सैंधवायन एव च ॥ ३ ॥ अधीयेतां सं
हिते द्वे सावर्णो यास्तथापरे ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादयः ॥ एते आथर्वणाचार्याः शृणु पौराणिका
न्मुने ॥ ५ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ शिंशपायनहारीतौ षड्वै पौराणिका इमे ॥ ६ ॥ अधीयंत व्या
सशिष्यात्संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ॥ ७ ॥ कश्यपोऽहं च सावर्णी रामशि
ष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः ॥ ८ ॥ पुराणलक्षणं ब्रह्मन्ब्रह्मर्षिभिर्निरूपितं ॥ शृ
णुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥ ९ ॥ सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षांतराणि च ॥ वंशो वंशानुचरि
तं संस्था हेतुरपाश्रयः ॥ १० ॥ रा[illegible]मः

एवं चत्वारो वयं सकलसंहिताध्ययनेन ततः ॥ संहिताबाहुल्यं सूचयति ॥ शुकपरीक्षित्संवादे लक्षणान्यपि पुराणल
क्षणं ॥ तदेव कथयन् आदर्शयति ॥ शृणोति ॥ ९ ॥ अस्य विश्वस्य ॥ सर्गः सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वंतरेशा
नुकथा निरोधो मुक्तिराश्रयः इत्युक्तेः स्थानं पोषणमूतिरन्ताशाश्च भावास्तु एते अन्तराणि मन्वंतराणां वंशानुचरितं वंशानु
चरितं वेतीशानुकथाः संस्था निरोधः ॥ अनेनैव वास्तविककल्प हेतुपाश्रितिस्मृता देहेन जीवाश्रयवासना आहुर्वाचा

कृतयोगटीका ॥ २० ॥

२०

सुकर्मणः शिष्यावेकः कौशल्यो हिरण्यनाभः पौष्यंजिर्नामैकः ततो जगृहतुः ॥ आवंत्यश्चान्यस्तस्यैव शिष्यः सोपि ज
ग्राह ॥ ७७ ॥ पौष्यंज्यावंत्ययोरपि कौशल्याद्धिरण्यनाभस्यापि पंचशतानि शिष्या आसन् ॥ तेनावंत्यौ सामगा यथा यथा
तानुदीच्यानाहुः ॥ कालक्रमेणास्य प्राच्यत्वमपि प्रवर्तते तत्र दृष्टांतः ॥ यथा लोके वसंत ॥ उदीच्याः सामगाः शिष्यास्तस्य
स्तताः ॥ हिरण्यनाभान्तेवासी संहिता पंच द्विजोत्तमः ॥ तदीयास्तेपि चोच्यंते पंडितैः प्राच्यसामगा इति ॥ पुनश्च
णां सुकर्मणः ॥ शिष्याणां शिष्यास्तैः समस्तस्य दर्शयति द्वाभ्यां ॥ ७९ ॥ कृतो नाम हिरण्यनाभस्य शिष्यः ॥ स्वशि

हिरण्यनाभः कौशल्यः पौष्यंजिश्च सुकर्मणः ॥ शिष्यो जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तमः ॥ ७७ ॥ उदीच्याः साम
गाः शिष्या आसन्पंचशतानि वै ॥ पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान्प्रचक्षते ॥ ७८ ॥ लौगाक्षिर्मांगलिः कुल्यः
कुशीदः कुक्षिरेव च पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं ॥ ७९ ॥ कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः
शिष्य ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्मवान् ॥ ८० ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे षष्ठो
ऽध्यायः ॥ ६ ॥ सूत उवाच ॥ अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां ॥ संहितां सोपि पथ्याय वेददर्शा
य चोक्तवान् ॥ १ ॥ शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु

शातं

षोडशकृत्वेशोषाश्चान्या अपि याः प्रसिद्धाः शाखाः ताश्चावंत्यः स्वशिष्येभ्यः ऊचे इति ॥ ८० ॥ इति भावार्थदीपिकायां षष्ठो
ऽध्यायः ॥ ६ ॥ सूतमसेयवैविस्तारः पुराणाख्यमनंतरं ततः पुराणलक्षणादीनि फलं भागवते कृते ॥ १ ॥ क्रमप्राप्तमथर्ववेद
विभागमाह ॥ शिष्यं कबंधनामानं स्वकां स्वकीयां संहितां शिष्यापि तां द्विधा विभज्य ॥ तदुक्तं वैष्णवे ॥ अथर्ववेदं स
मुनिः सुमंतुरमितद्युतिः ॥ शिष्यमध्यापयामास कबंधं सोपि तं द्विधा ॥ कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति ॥ १ ॥
तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास ॥ पथ्योपि चतुर्धा विभज्य त्रीनिति सार्धेनाह ॥ २ ॥

श्री॰
भा॰ द्वा॰
टी॰
१८

तच्छिष्यः शाकल्यशिष्यः स्वसंहितां चतुर्धा विभज्य वत्सेभ्यो वैदिकपदार्थैर्वैदिकपदार्थव्याख्यानरूपेण निरुक्तं च कृत्वा बलाका
दिभ्यश्च समर्पितवान् ॥ ५७ ॥ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः ॥ बालायन्यादयस्तां
दधुः ॥ ५८ ॥ तदीतक्तं अकुशाखापमेहवपूर्वकं तच्छ्रवणफलमाह ॥ ५९ ॥ एतेषां छन्दसां ॥ ६० ॥ यजुर्वेदेतेतिरीयशा
खोत्पत्तिप्रस्तावमाह ॥ चरकनामानिरुक्ते माद्यस्य हेतोः ब्रह्महत्यारूपमेंहः तपयंतीति तत्र यातं त्वंगुरोर्व्रतं
व्रतं चरणं त्वत्तत्त्वं ब्रह्मेत्यर्थः ॥ ६१ ॥ तच्छिष्यो वैशम्पायनशिष्यः अल्पसाराणामेतेषां चरितेन किं यत्ता दुश्चरं व्रतं चरिष्यामो
जातुक र्णपश्च तच्छिष्यः स्वनिरुक्तं स्वसंहितां ॥ बलाकपैजपैजालविरजेभ्यो ददौ मुनिः ॥ ६२ ॥ बाष्कलिः प्रतिशा
खाभ्यो बालखिल्याख्यसंहितां ॥ चक्रे बालायनिर्भज्यः कासारश्चैव तां दधुः ॥ ६३ ॥ बह्वृचाः संहिता एता एभिर्ब्रह्मर्षिभि
र्धृताः ॥ श्रुत्वैतच्छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६४ ॥ वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहः क्ष
पणं स्वगुरोर्व्रतं ॥ ६५ ॥ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्कियत् ॥ चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरं ॥ ६६ ॥
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥ ६७ ॥ देवरातसुतः सोऽपि छर्दित्वा
यजुषां गणं ॥ ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ६८ ॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ॥ तैत्तिरी
या इति यजुःशाखा आसन्सुपेशलाः ॥ ६९ ॥ याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधिगवेषयन् ॥ गुरोरविद्यमानानि सूपतस्थे
ति ॥ ६७ ॥ विप्रावमन्त्रा अवज्ञाकर्त्रा मत्तोऽधीतं मा त्यजेदिति ॥ ६८ ॥ देवरातसुतो याज्ञवल्क्यः ... र्कमीश्वरम् ॥ ६६ ॥
हिंसा प्रदाने विप्राणां चरितमिति निरामस्त्वा पाप विशेषाभ्यत्वाय्राह ॥ ततस्ते तित्तिरीयाः । तित्तिराः सुपेशलाः प्रतिरम्या
स्त्रकृचवचनमवान्तरभेदविवक्षया ॥ ६७ ॥ कामम्मात्थेरिलादिषा स्वाप्रमेगमाह ॥ याज्ञवल्क्य इत्यादिना ॥ गुरोर्वैशम्पायनस्याऽ
सेन विभज्या सकलत्वादविद्यमानानि ग्रथि ग्रथिकानि गवेषयन्नन्वेषयन्नुपतस्थे सम्यक्प्राह्वई सर्ववेदानां तथा च श्रुतिः
सिः सर्वाङ्कदिवि देवाऽइत्येतत्तयजुर्वेदे न तिष्ठति मध्ये त्रः सामवेदेनास्तमेषं समहीयते वेदैः शून्यस्त्रिभिरेतिसूर्य इति ॥ ६८ ॥ ॥

१८

तीतमायुषोजनान्॥नरहिपुरुषबुद्धिप्रभवेनादत्तदर्शाणीसमादित्याशंक्याह॥हृदिस्थेति॥एवंसामान्यतोवेदविभागउ
क्तमधुनाविवस्वत्समन्वंतरेविशेषतोनिरूपयितुमाह॥४७॥अंशःसूर्यांतस्यांशःसत्तेतस्यकलयांशेनावतीर्णःसन्॥वा
नर्वैवमेवाह॥४८॥ऋगादिमंत्राणांराशीन्वर्गशः॥तत्तत्करणभेदेनहौत्रत्वयथानेकविधमंत्रराशीन्मंत्राणांगणाःपद्म
रागादयोविविच्योद्धृत्यतत्तद्रूपहौत्रनैमर्यसंमतःऋगादिसंहिताश्चक्रे॥५०॥तासामिति॥संहितानामेकैकमेकैकां॥५१॥ऋक्

क्षीणायुषःक्षीणसत्त्वान्दुर्मेधान्वीक्ष्यकालतः॥वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनोदिताः॥४७॥अस्मिन्नप्यंत
रेब्रह्मन्भगवाल्लोकभावनः॥ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये॥४८॥पराशरात्सत्यवत्यामंशांशकल
याविभुः॥अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं॥४९॥ऋगथर्वयजुःसाम्नांराशीनुद्धृत्यवर्गशः॥चतस्रःसंहि
ताश्चक्रेमंत्रैर्मणिगणाइव॥५०॥तासांसचतुरःशिष्यानुपाहूयमहामतिः॥एकैकांसंहितांब्रह्मन्नेकैकस्मैद
दौविभुः॥५१॥पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह॥वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणं॥५२॥सा
म्नांजैमिनयेप्राहतथाछंदोगसंहितां॥अथर्वांगिरसींनामस्वशिष्यायसुमंतवे॥५३॥पैलःस्वसंहितामूचेइं
द्रप्रमितयेमुनिः॥बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकांचतुर्धाव्यस्यबोध्याययाज्ञवल्क्यायभार्गव
पराशरायाग्निमित्रइंद्रप्रमितिरात्मवान्॥५४॥अध्यापयत्संहितांस्वांमांडूकेयमृषिंकविं॥तस्यशिष्योदेवमित्रः
सौभर्यादिभ्यऊचिवान्॥५५॥शाकल्यस्तत्सुतःस्वांतुपंचधाव्यस्यसंहितां॥वात्स्यमुद्गलशालीयगोखल्यशिशि
रेष्वधात्॥५६॥

मुदायरूपत्वात्॥बह्वृचाख्यांनिगमप्रश्लेषाणामुपमानत्वान्निगदाख्यं॥५२॥छंदसगीयमानत्वाच्छंदोगाख्यांसंहि
तांतत्रबह्वृचेशाखाविभागमाह॥५३॥स्वसंहितांद्वेधाविभज्यइंद्रप्रमितयेबाष्कलायच॥५४॥सबाष्कलोपिस्वसंहि
तांचस्वबोध्यादिभ्यः॥चतस्रोप्याव्यस्यशिष्येभ्यःप्राह॥हेभार्गवइंद्रप्रमितिरपिस्वांसंहितांस्वसुतं॥मांडूकेयस्यशिष्याद्देव
मित्रः॥५६॥तस्मात्तान्मांडूकेयसुतःशाकल्योवात्स्यादिभ्यःपंचधायात॥नानध्यापयामासेत्यर्थः॥५७॥ ॥ ॥

नमो भगवते तस्मा आदित्याय यो भवानिमामेकपवलोकयात्रामनुवदतीत्यन्वयः ॥ तद्देवदर्शयति ॥ अखिलजगतामात्म
स्वरूपेणांतर्हृदयेषु कालस्वरूपेण च बहिः पिवर्तमान इति ॥ अखिलजगतामित्युभयत्रान्वय ॥ यव्रतविंशति ॥ हृदयांतर्वर्तित्वे
पि नाववृजेनाल्पधियाच्यवधीयमानः अनाच्छाद्यमानः कालस्वरूपेण चेत्युभयत्र च ॥ लोगतित्वाल्लवादयो येऽवयवास्तै रु
पचिताः संवत्सरास्तेषां गणेन अपस्य ह्रसमपादन्ने यो ष्याणां विसर्गो वृष्टिः ॥ तस्मा समेनेनरः ॥ यत्रोत्पत्यमपादोकालेनवेरणए नादर्शितो
हितो यथा दार्यानुवर्तनेन स्तौति यदुहे रति ॥ इविबुधर्षभसवितः यदण्डोभगवतस्तव मंडलंतपतितत्समभिधीम

याज्ञवल्क्य उवाच ॥ ओं नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण च ॥ चतुर्विधभूतनि
कायानां ब्रह्मादिस्तंवपर्यंतानामंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाव्यवधीयमानो भगवानेक एव क्षणल
वनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ १ ॥ यदुह वाव वि
बुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभ
र्जनभगवतः ॥ समभिधीमहि तपनमंडलं ॥ २ ॥ य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइंद्रिया
सुगणाननात्मनः स्वयमात्मांतर्यामी प्रचोदयति ॥ ३ ॥ ॥ नारायणनमः ॥

हि ॥ तस्य गामभिमुखोन ध्यायेम पुनस्तस्यैव मंत्रोपनंप्रत्यहं त्रिषवणं वैदिककर्ममार्गेण स्तुवतो भक्तानां यान्य
खिलानि दुरितानि तत्फलानि वृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषामवभर्जनं विनाशकं तेनपतेति ॥ १ ॥ तृ
तीयपादेन स्तौति य इहेति यो भवानस्थावरजंगमसमूहानां स्वाश्रयाणां जीवानां निजनिकेतनानां मनइंद्रि
यप्राणगणान् ॥ अनात्मनो जडान् ॥ स्वयमात्मैवांतर्यामीसन् ॥ प्रचोदयति प्रवर्तयति ॥ तृतीयपादमेव ॥ मंडलस्य
एतत्पाप्राव लागाः स्तौति य एवेति ॥ २ ॥ ॥ नारायणाय

श्री भा ह टी. १५

यएकएवभवान् ॥ भृतिकरालवदनोघोंथकारसंज्ञोजगरग्रवदनेनमीलितं ॥ अतएवमस्तकमिवविवेतनंस्वयमोक्षंपदात्मा
वस्थानेप्रवसुवमत्वतदेवश्रेयस्तस्मिन्प्रवर्त्तयति ॥ किंचयोभवावनिपातितिविश्वदतिगच्छति ॥ ४ ॥ पतितग्रामपालैर्विधिभिः
कमलकोशपुटैस्तत्रस्तैर्वीजलिभिरुपहृतादेगाःदन्वाचे ॥ ५ ॥ एतएवंभूतस्त्वंश्रयातःदस्फटयानस्मामीति ॥ अन्येपयाव
द्विज्ञातानिविज्ञेषितन्कामोदउपसरामिभजामि ॥ ६ ॥ एवंस्तुतःप्रसादितम्म ॥ ७ ॥ पंचदशशाखावायाःशोतर्षयमितेर्यजु
भिरकुरोत ॥ संतेसितिपाठेसएवार्थः ॥ सएवयाज्ञवल्क्यस्तैर्यजुर्भिरकरोदिति ॥ जगदूरर्थीतवेतः ॥ रविणाश्रस्वरूपेण

यएवेमंलोकमतिकरालवदनोथकारसंज्ञाजगरग्रदृगिलितंमस्तकमिवविचेतनमवलोक्यानुकंपयापरम
कारुणिकईत्ववेत्याप्यादरहरनुसवनंश्रेयसिस्वयमाप्मात्मावस्थानेप्रवर्त्तयत्यवनिपतितिरिवासाधूत्नाभय
मुदीरयन्वर्त्ततिइति ॥ ४ ॥ पतितग्रामपालैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः ॥ ५ ॥ अथयद्भगवस्तवचरणन
लिनयुगलंत्रिभुवनगुरुभिर्वंदितमहमयातयामयज्ञस्कामउपसरामीति ॥ ६ ॥ सूतउवाच ॥ एवंस्तुतःसभग
वान्वाजिरूपधरोहरिः ॥ यजूंष्ययातयामानिमुनयेदात्प्रसादितः ॥ ७ ॥ यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः ॥ ज
गृहुर्वाजसन्यस्ताःकाण्वमाध्यंदिनादयः ॥ ८ ॥ जैमिनेःसामगस्यासीत्सुमंतुस्तनयोमुनिः ॥ सुत्वांस्तुतस्ताभ्या
मेकैकांप्राहसंहिताम् ॥ ९ ॥ सुकर्माचापितच्छिष्यःसामवेदतरोर्महान् ॥ सहस्रसंहिताभेदंचक्रेसाम्नांततोद्विजाः ॥ १० ॥

वाजिभ्यःकेसरेभ्यः ॥ वाजिनवेगेनवासन्यस्ताःसृष्टाःशाखावाजसनीसंज्ञाःस्नाः ॥ शाखांअंतेवासामसशाखाविभा
विभागमाहजैमिनेरिति ॥ ८ ॥ तस्यतनःसमन्तुसुतः ॥ ताभ्यांपुत्रपौत्राभ्यांक्रमेणैकैकांप्राह ॥ ९ ॥ तीच्छिष्योजैमिनेः
शिष्यःसुकर्माचैतिसिथावीसहस्रसंहितारूपंभेदंचक्रेसमाम्नासंहिताभेदंततस्तदन्ततरे
॥ १० ॥ ॥ ॐनमःशिवायनमः ॥ ॥

८

म

१५

देसौम्य ॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह त्रिभिः ॥ ३७ ॥ ब्रह्मणो हृदिस्थ आकाशः तस्मान्नादोऽभूत् । यः कर्णपुटपि-
धाने श्रोत्रवृत्तिनिरोधात् स्वदादिभिर्विभाव्यते वितर्क्यते ॥ प्रसंगान्नादोपासकानां फलमाह ॥ ३८ ॥ यस्य नादस्यो-
पासनया आत्मनो मलं हत्वा अपुनर्भवं यान्ति । कथंभूतं मलं तमाह ॥ द्रव्यमधिभूतं क्रिया अध्यात्मं कारणाख्यमधिदैवं ॥ एवं त्रिधाभू-
ता आत्मोपाधिं सति न यान्ति ॥ ३९ ॥ त्रिवृतो त्रिमात्रः अकारादिभिः उच्चार्यमाणस्योंकारस्योत्पत्तिस्थानमाह यतो भवान् ॥ तत्र
तदेव तं विशिनष्टि ॥ अव्यक्तः प्रभवो यस्य सः ॥ स्वेनैव राजते इति स्वराट् ॥ स्वत एव हृदि प्रकाशमानः ॥ तमेव कार्येण लक्षयति ॥ यत्र

शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ॥ ३६ ॥
सूत उ० समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ ३७ ॥ यदुपास-
नया ब्रह्मन्योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवं ॥ ३८ ॥ ततोऽभूत्त्रिवृदोंकारो यो-
ऽव्यक्तप्रभवः स्वराट् यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥ शृणोति य इमं स्फोटं सुप्तश्रो-
त्रे च शून्यदृक् ॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ ४० ॥

दिति नपुंसकत्वं लिंगशब्दविशेषणत्वात् ॥ लिंगमेकं कोसौ परमात्मा तमाह ॥ ३९ ॥ इमं स्फोटमव्यक्तमोंकारेण
व्यक्तं जीव एव शृणोति तत्राह ॥ सम श्रोत्रे कर्णापिधानादिना वृत्तिकार्ये श्रोत्रे सति जीवस्य करणाभावेन ज्ञानत्वा-
त् न तदा श्रोता ॥ तदुपलब्धिस्तु तस्य परमात्मनः साक्षिकैवेति भावः ॥ ईश्वरस्त्वनेव ॥ यतः सुप्तदृक् ॥ सुप्तेऽपीन्द्रि-
यवर्गे दृक्ज्ञानं यस्य ॥ तथाहि सुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते ॥ न तदा जीवः श्रोता विलीनेन्द्रियत्वात् ॥ अतो य-
स्तदा शब्दं श्रुत्वा जीवं प्रबोधयति ॥ स यथा परमात्मैव तद्वत् ॥ कोसौ वोंकारस्तं विशिनष्टि सार्धेन ॥ येन वाक् शब्दो
व्यज्यते यस्य च हृदयाकाश आत्मनः सकाशाद्व्यक्तिः ॥ अभिव्यक्तिः किंच ॥ ४० ॥

क

श्री॰ भा॰ टी॰ १२

स्वधाम्नः स्वस्याश्रयः कारणं यत् ॥ ब्रह्म तस्य किंच परमात्मनोभिव्यक्तस्य समस्तदेवतावाचकोपीत्याशयेनाह सर्वेति सर्वमंत्राणामुपनिषत् रहस्यं स्वरूपमित्यर्थः ॥ तत्र हेतुः वेदानां बीजं कारणं । बीजत्वेप्यविकारितामाह । सनातनं सदैकरूपं ब्रह्मस्वरूपत्वात् ॥ इदानीं ततः सर्वप्रपंचोत्पत्तिप्रकारमाह ॥ ४१ ॥ त्रयस्त्रिसंख्या उक्ताभावा येकारेको वमकारे धार्यंते तन्नकारणान्नात ॥ तदेवाह गुणाः सत्त्वादयः । नामानि च ऋग्यजुःसामानि । अर्थाः भूर्भुवःस्वर्लोकाः वृत्तयो जाग्रदाद्याः ॥ ४२ ॥ ततस्तेभ्यो वर्णेभ्यो वर्णानां समाम्नायं समानं भवतमेवाह । अंतस्था यरलवाः ऊष्माणः

स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनं ॥ ४१ ॥ तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ॥ धार्यंते यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥ ४२ ॥ ततोक्षरसमाम्नायमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ॥ ४३ ॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः सव्याहृतीकान्सोंकारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् तेतु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ४६ ॥

शषसहाः ॥ स्वरा अकाराद्याः स्पर्शाः कादयः ह्रस्वदीर्घौ आदिशब्दाज्जिह्वामूलीयादयः एवं लक्षणं स्वरूपं यस्य तं ॥ ४३ ॥ विभुर्ब्रह्मा तं स्वस्वरूपेण भगवानसृजत् इति निष्कर्षेण वा पुत्रेणाः ॥ चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिताः ऋत्विजः स्ववेदोक्ताः ॥ तत्र वषट् होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ॥ ४४ ॥ पुत्रान्मरीच्यादीन् ॥ तान्वेदान् ब्रह्मकोविदान् ॥ वेदोच्चारणाभिनिपुणान् ॥ एवं च तत्तद्युगेषु प्राप्ताः द्वापरादौ द्वापरमादिर्येषां तेषु कलांशेषु तत्सहापरांतेषु विभागशः स्मृताः ॥ शांतनुसमकालव्यासावतारप्रसिद्धे व्यस्ता विभक्ताः ततद्वृत्तः ॥ ४६ ॥

तेनस्ततवेन ॥ १२ ॥ यस्मात् क्लेशागमाद्येयोयस्यतेनोततात्मना भव्यहृत्तेन मनसा ॥ १३ ॥ तस्मात पोविशिष्टामितिज्ञात्वासे
नवृणोयति ॥ पलरिस्याद्विना ॥ १४ ॥ अन्यस्मिन्मममेमन्वंतरे तपसामम त्वदेयहिह्याघ्नतोतिविशोकितः ॥ १५ ॥ मुनेयमुनिश्च
शापितेराजमस्लोकमतीपिययमपत्यं वलोभः मदश्च ॥ १६ ॥ तदाश्रमपदं प्रविष्टावायुर्वाविविक्तिरतोयेनानवः पुष्प
द्रुमेलेनाभिश्रुवितपपुष्पादिजातासर्वाणां कैलैः संकीर्णं पुष्पाद्यत्यमलाजल्वाशयायस्मिन् ॥ १७ ॥ मत्तभ्रमरा

एवं तपः स्वाध्यायपरोवर्षाणामयुतायुतं ॥ आराधयन्हृषीकेशं जितेयसेसमद्रुजेयं ॥ ११ ॥ ब्रह्मामस्यभवेवाद
तोवरमपुत्रत्रयेपरेत्वदेवपितरस्तृतानितिनामस्वतिविस्मितः ॥ १२ ॥ इत्यंहेतुहस्तुतथरस्वपः स्वाध्यायस
यमे ॥ दध्यानवधोत्त्वंयोगीश्रममन्त्केशानतरात्मना ॥ १३ ॥ तस्यैवयुजतश्चित्तमहोयोगेनयोगिनः ॥ अतीया
यमहान्कोलामन्वंतरषडात्मकः ॥ १४ ॥ एतत्स्मरदेशेतान्वासममेस्मिन्किलांतरे ॥ तपोविशोकितोवस्तुवा
देमेतद्दिवानने ॥ १५ ॥ गंधर्वाप्सरसः कामं वसंतमलयानिलो ॥ मुनयेप्रेषयामास राजस्तोकमदे ॥
तथा ॥ १६ ॥ तेवेतदाश्रमंजग्मुर्हिमाद्रेः पार्श्वउत्तरे ॥ पुष्पभद्रानदीयत्र चित्राख्या च शिला विभो ॥ १७ ॥
तदाश्रमपदं पुष्पपुष्पद्रुमलतान्वितं ॥ पुष्पादिजकुलाकीर्णं पुण्यामलजलाशयं ॥ १८ ॥ मत्तभ्रमरसं
कीर्णं मत्तकोकिलकूजितं ॥ मत्तबर्हिनटाटोपमत्तद्विजकुलाकुलं ॥ १९ ॥ वायुः प्रविष्ट आदाय हिमनि
र्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तंभयन्स्मरं ॥ २० ॥

गंसंगीतंयस्मिन् ॥ मत्तकोकिला
नोकूजितंयस्मिन् ॥ मत्तबर्हिगणपवनटाटोपमाटोपः संभ्रमोयस्मिन् ॥ मत्तद्विजानांपक्षिणांकुलैराकुलं
व्याप्तं ॥ २१ ॥ एवम्भूतंतदाश्रमपदंप्रविश्य मत्तवायुः ॥ मलयानिलः ववौप्रससार ॥ उत्तंभयन् ॥ उद्दीपयन्
नवरूतेषप्रवेशान्माचंहिमनिर्झरशीकराणांशैत्यंपुष्पपरिष्वंगात्सौगंध्यंचाहकिंच ॥ २० ॥ ॥ राम

श्री॰
भा॰ द॰
टी॰
२२

इयं चंद्रोदयस्मिंस्तत ॥ निशावक्त्रं रजनीमुखं यस्मिंस्तः प्रवालस्तबकानामालयः श्रेणी येषु तैः गुणैर्निविदैः संश्लिष्टो गोपीनां पङ्क्तिमालतानां तेषां जालैः सम्बद्धैः यत्किंच भूषकिंच ॥ २२ ॥ तदा मीनवादित्रवस्थ कैः मायकादिसमुदायैरिमं गंधैर्लब्धायमानः तथा स्वः स्त्रियो भ्रमरसञ्ज्ञा माद्यू यस्य पतिः ॥ श्रीकेवापमिथुर्वैर्न ससमरश्रुतजाद्यपत ॥ २४ ॥ इदायथैमम्भि विन्नमयाकर ॥ २५ ॥ सेषणमोहनसंदीपननापनोन्मादनाख्यानि पंचसु बाणानि यस्य तदस्त्रं संदधे ॥ तदेवमग्रुवेसंतः रजः

श्च चुंबतनिशावक्त्रः प्रवालस्तबकालिभिः ॥ गोपडुमलताजालेसत्राग्सीत्कुसुमाकरः ॥ २६ ॥ अन्वीयमानोगंधवैर्गीतवादित्रयूथकैः ॥ यश्यमानं चापश्रुःस्वः स्त्रीय्यथपतिः स्मरः ॥ २७ ॥ हन्त्वाग्निमुपासीनं दहशुः शक्रकिंकराः ॥ मीलितानं द्विपथर्षेन्द्रं तिमितमिवानलं ॥ २८ ॥ ननृतस्त्रस्य पुरतः स्त्रियो यो गायकाजगुः ॥ मृदंगवीणाप णवेवीणायचक्रुसेनोरमं ॥ २५ ॥ संदधेस्त्रंस्वधनुषिकामः पंचमुखं तदा ॥ मधुर्मनोरजस्तोकं इन्द्रभृत्या व्यकंपयन् ॥ २५ ॥ क्रीडन्त्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् ॥ भृशमुद्विग्नम [illegible] ध्याः केशविस्रंसितस्रजः ॥ २६ ॥ इतस्ततो भ्रमद्दृष्टेश्चलन्त्या अनुकंदुकं ॥ वायुर्जहारतद्वासः सूक्ष्मं त्रुटितमेखलं ॥ २७ ॥ विसृजंतद्वावा ऌामत्वाते स्वजितेस्मरः ॥ सर्वे तत्राभवन्मोघमनीशस्य यथोद्यमः ॥ २८ ॥ त इत्थमपकुर्वन्तो मुनेस्तत्तेजसा मुने दह्यमानानिवृत्ताः प्रबोध्याहिमिवार्भकाः ॥ २९ ॥ इतीन्द्रानुचरैर्ब्रह्मन् धर्षितोपि महामुनिः ॥ यन्नागादहमो भावं न तच्चित्रं महत्सु हि ॥ ३० ॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान् स्वराट् ॥ श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परम ॥ ३१ ॥ ॥ रामायनमः

लोकस्य पुंस्त्वमार्षे ॥ अन्येवेदृश्यत्वास्तमस्मनोव्यकंपयन ॥ २५ ॥ किंच वायुर्मलयानिलः पुंजिकस्थल्याः तत्स्त्रवासोजद्दार ॥ २७ ॥ सर्वे तेषां कर्मत ततस्मिन्मोघं व्यर्थं अनीशस्य निर्दैवस्य ॥ २८ ॥ मुनेरपकुर्वन्तः धर्षितुं स्वमाचरेतः दह्यमानः ॥ २९ ॥ अहंकारस्य भावं विकारं ॥ ३० ॥ निस्तेजसं म्लानवदनं स्वराट् इंद्रः ॥ ॥ ३० ॥ ॥

२२

किं च नोस्मान् ॥ नारहन्तिदे अरिंदम कामलोभादिपायदमन भवतः पादाग्रयोः पतितदेहानामन्यास्मादि
गतिरपि न भवेत् ॥ मा भूत् ॥ तस्मात्ह्यस्मेव विधेहि ॥ ३० ॥ मयाउपेतान् अनुज्ञाताः प्रमत्तदेवान्प्र दर्शपाद देवाग्रपी
ति ॥ तथापि नास्मं नशक्रुम इतिचेन्नवाद ॥ नतिपीतयेसखायअन्तुरागायस्तदृहृदवैअगमसंगः अगाभ्यासरा:
प्रतत्स्यवः अद्दोषहृष्टयः ॥ देहमिति ॥ तदीयं देहं त्यक्त्वा विहाय चेतनमेनं भगवतं प्राप्तेत्यर्थः ॥ ३५ ॥ अनुशीलयन्नु
कुर्वन् ॥ योगगोपीनामिति कर्माणि षष्ठी ॥ रूपवाकृतैः रूपेण चावाकृतं अरिते अरमयन् ॥ रमयित्तु रेमे इत्यर्थः ॥ अ

स्तत्तानि नोन पतयः पितरौ सुतावा न भ्रातृबंधुसुहृदः कृतएव चान्ये ॥ तस्मात्त्व तत्पदयोः पतितात्मनो
नोनान्यास भवेद्गतिरिदमतद्विधेहि ॥ श्रीभगवानुवाच ॥ पतयोनाभ्यसूयेरन्पितृभ्रातृसुतादयः
लोकाश्रयो मयापेता देवाअप्यनुमन्वते ॥ ३१ ॥ नप्रीतयेनुरागाय ह्यंगसंगो नृणामिह ॥ तन्मनो मयि युंजा
नाना अचिरान्मामवाप्स्यथ ॥ ३२ ॥ स्मरणाद्दर्शनाद्ध्यानात्मयि भावानुकीर्तनात ॥ नतथासंनिकर्षेण
प्रतियात ततो गृहान् ॥ ३३ ॥ शुक उवाच ॥ इत्युक्ता द्विजपत्न्यस्ता यज्ञवाटं पुनर्गताः ॥ तेचानसूयव:
स्वाभिः स्त्रीभिः सत्रमपारयन् ॥ ३४ ॥ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रुतं ॥ हृदोपगुह्यविजहौ देहं क
र्मानुबंधनं ॥ ३५ ॥ भगवानपि गोविंदस्तेनैवान्नेन गोपकान ॥ चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः
एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगोपीनां रमयन्रूपवाक्कृतैः ॥ अथानुस्मृत्य विप्रा
स्ते अन्वतप्यन्कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृविडंबयोः ॥ ३७ ॥ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्ति
मलौकिकीम् ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ ३८ ॥ विप्रा ऊचुः ॥ धिग्जन्म नस्त्रिवृ
(तं धिग्व्रतं धिग्बहुज्ञतां ॥ धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ३९
तुस्मानि प्रकारमाहु ॥ नरानुक
रणावतो विश्वेश्वरयोः याञ्चापदहन्म नवेन: तत्कृतागसो वयमनुस्मृत्येति तप्ताः स्वभार्याः गुरुमिव मानयंतो भ
गवद्भक्तिरहितमात्मानं व्यनिंदन्नित्याह द्वाभ्यामिति ॥ ३९ ॥ अलौकिकीं लोकातीतां ॥ त्रिवृत् ॥ शौक्रसावित्रदैक्षमि
ति ॥ त्रिगुणितं ब्रह्मचर्यं क्रियाः कर्माणि दाक्ष्यं च क्रियादाक्ष्यमित्येकपदं यमिति वाचित्तपः ॥ एवमस्यो त्वजे

प्रायो बहुशः कृतान्ये प्रियतमस्योदयाय त्वषोत्तपएव कर्णपूराः कर्णौ पूरयंति कृता यैः कुर्वंतीति ॥ तथा
नेः कर्णाभरणीकृतिर्वा यस्मिन् श्रीकृष्णे निमग्नमनसः ॥ आविष्टचेतसः लोचनहारैरेनः सदैव सपत्नविरम्
पहृयता पजकुः अभिमतयोहृह्नयः प्राज्ञस्तुभिसात्तिरण परैरम्यतस्मिन्न येआण्ययथेति ॥ अखिल
दृष्टा सर्वेषु हि साक्षीनां तथा आत्मा विज्ञायापि ॥ तथेत्येतहि हृष्णोति ॥ त्वत्कृताः सर्वाश्रयाया भिस्ताः के
वलमात्मनः समेव दिह्नयेति ॥ २३ ॥ हे महाभागाः स्वागतमुभमानमनेनदेवाह ॥ यद्यस्मात्त्वंतिवध
निरस्करेण ॥ अस्मा कदिहत्वयाया मा इति ॥ इदमुपपन्नं सपत्नं शुक्रोमितिवा पुकृतमेवाह ॥ नवेति ॥ आत्मपि
याः कृतं प्रियतमोदयकर्णपूरेय स्मिन्निमग्नमनसस्तमथ्यादिवधेः ॥ अनः सदैव सपत्नविरपरि
रभ्यताप आज्ञयथाभिमतयो विजकुनेरेह ॥ २३ ॥ नात्वत्यात्मक्र सर्वाश्रयाः प्राज्ञा आत्मदिह्नयाः ॥ वि
ना या खिल दृष्टा पाहृ प्रह सिताननः ॥ २४ ॥ स्वागतं वो महाभागाः आस्यतां करवाम किम् ॥ यस्मे
दिह्नया प्राप्ता उपपन्नमिदं हि वः ॥ २५ ॥ नन्वद्धा मयि कुर्वंति कुशलाः स्वार्थदर्शिनः ॥ अहैतुक्यव्य
वहितां भक्तिमात्मनि ये यथा ॥ २६ ॥ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥ यत्संपर्कात्प्रिया
आसंस्ततः कोन्वपरः प्रियः ॥ २७ ॥ न यात साधो यजनं पतयो वो हि ज्ञातयः ॥ स्वसत्रं पारयिष्यंति
युष्माभिर्गृहमेधिनः ॥ २८ ॥ पत्न्य ऊचुः नैवं वचो हितिभवान् गदितुं नृशंसं सत्यं कुरुष्वनिगमं तव पा
दमूलं ॥ प्राप्ता वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् ॥ २९ ॥
ये आत्माच प्रियश्चेत्तस्मिन्त्वयि कुशला विवेकिनः ॥ अत एव स्वस्यात्मनः ॥ अर्थं परंपतिये तेय था वज्ञंमि
कुर्वंति ॥ यथार्थत्वमेवाह ॥ प्राणेत्यादि ॥ अहेतुक्ययहेतु ॥ अहेतुक्याविवहितां फलाभिसंधिरहिता अत एवाव्य
वहितां निरंतरां ॥ आत्मानः सर्वतः प्रेष्ठतमुपपादयति प्राणेति ॥ २६ ॥ स्वाज्ञातयः ॥ आत्मा देह ॥ एते
सर्वे यत्संपर्कात् ॥ यस्मात्प्राक् तेनोपकरणत्वेन वा ततस्मात्कृतार्था एयं देवयजनं यज्ञवाट कृतार्थाः
किमिपास्यामहति ॥ पारयिष्यंति पतीनामनुग्रहाय ते त्वपर्यः नृशंसं परुषं प्रतिज्ञानमेभक्तः प्रणपंपत्नी

घोविद्यतु गुह्यिनतु दुरंतभावं भक्तिं पद्यपने तिद्विजातिसंस्कारदुपनयनं क्रियाः संध्योपासनादयः स्वात्मदोषापवर्गेणाचोचलत्वावादित्यागेन इत्यनूपवन् एवंसर्वेच कृतवतोनत्याणीतिनचाचलन् नयोर्दर्शनायजग्मुः ब्राह्मणाः कंसाद्भीताः स्वाश्रमस्थाएव श्रीभगवंतमभजन्नित्यर्थः ॥४०॥ इति ॥

नूनंभगवतोमायायोगिनामपिमोहिनी ॥ यद्वयंगुरवोनृणांस्वार्थेमुह्यामहेद्विजाः ॥४१॥ अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ ॥ दुरंतभावंयोविध्यन्मृत्युपाशान्गृहाभिधान् ॥४२॥ नासांद्विजातिसंस्कारोननिवासोगुरावपि ॥ ननपोनात्ममीमांसानशौचंनक्रियाःशुभाः ॥४३॥ अथापिह्युत्तमश्लोकेकृष्णेयोगेश्वरेश्वरे ॥ भक्तिर्दृढानचास्माकंसंस्कारादिमतामपि ॥४४॥ ननुस्वार्थविमूढानांप्रमत्तानांगृहेहया ॥ अहोनःस्मारयामासगोपवाक्यैःसतांगतिः ॥४५॥ अन्यथापूर्णकामस्यकैवल्याद्याशिषांपतेः ॥ ईशितव्यैःकिमस्माभिरीशस्यैतदिहेहितं ॥४६॥ हित्वान्यान्भजतेयंश्रीःपादस्पर्शाशयासकृत् ॥ स्वात्मदोषापवर्गेणतद्याच्ञाजनमोहिनी ॥४७॥ देशःकालःपृथग्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः ॥ देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ॥४८॥ सएवभगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः ॥ जातोयदुष्वित्याशृण्मह्यपिमूढानविद्महे । अहोवयंधन्यतमायेषांनस्तादृशीःस्त्रियः ॥ भक्त्यायासांमतिर्जातास्माकंनिश्चलाहरौ ॥५०॥ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे ॥ यन्मायामोहितधियोभ्रमामःकर्मवर्त्मसु ॥५१॥ सवैनआद्यःपुरुषःस्वमायामोहितात्मनां ॥ अविज्ञातानुभावानांक्षंतुमर्हत्यतिक्रमं ॥५२॥ इतिस्वाघमनुस्मृत्यकृष्णेतेकृतहेलनाः

श्रीभागवते भा० दशमे त्रयोविंशोध्यायः ॥२३॥ वनं विशामहे इत्यमलं व्याख्या वक्ष्यते नेमिः कृष्णः सर्वज्ञोपि मासगोवर्धनमखोत्सवं ॥१॥ भूमहत्वाणां क्रियायागं निरस्यसः स्वरेषु च ॥ मघवन्मदभंगायनमखं

श्रीः भा॰ द॰ ८०

व्रास्त्रणाः कं साद्दीनाः स्वाश्रमस्थाएव भगवंतमभजन् भगवानपि तत्रैव निवसन्॥ इंद्रियागकृतोद्यमान् गो
पान् पश्यदिति संबंधः कृष्याश्रमेमोयनभवति॥ मखो यमित्येव वदेत्किमत्र फलं को वा च देवता को नाधिकारि
णा केनवा साधनेन साध्यते न साध्यते न हृदि॥ महान्कामो मम श्रवणे वर्तते॥ यद्वा न वमहान्कामो हृदयगत इति
हृत्ती स्थितं प्रसादनेनेति॥ सर्वात्मना सर्वेषां समदृष्टीनां॥ अतएव नाविद्यते स्वः पर इति दृष्टिर्येषां पर इति दृष्टअ
भावादेव न द्वेष्यामित्रादयो येषां न सन्तीत्याह॥ अमित्रेति॥ न मित्रं उदास उदासीनो विद्विट् येषां तेषां कृत्यमस

श्रीशुक उवाच॥ भगवानपि तत्रैव बलदेवेन संयुतः। अपश्यन्निवसन् गोपानिंद्रयागकृतो
द्यमान्॥१॥ तदभिज्ञोपि भगवान्सर्वात्मा सर्वदर्शनः॥ प्रश्रयावनतोपृच्छद्वृद्धान्नंदपुरोगमा
न्॥२॥ कथ्यतां मे पितः कोयं संभ्रमो व उपागतः॥ किं फलं कस्य चोद्देशः केनवा साध्यते म
खः॥३॥ एतद्ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः॥ न हि गोप्यं हि साधूनां कृत्यं सर्वात्मना
मिह॥४॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां॥ उदासीनोरिवद्वर्ज्यः आत्मवत्सुहृदुच्य
ते॥५॥ ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुतिष्ठति॥ विदुषः कर्मसिद्धिः स्यात्तथा नावि
दुषो भवेत्॥६॥ तत्र तावत्क्रियायोगो भवतां किं विचारितः॥ अथवा लौकिकस्तन्मे पृच्छतः
साधु भण्यतां॥७॥ श्रीनंद उवाच॥ पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः॥ तेभिवर्ष

र्वं कर्म न गोपनीयम्॥ किंचिदस्त्यस्यार्थः सत्यपि भेददर्शने उदा १ सीनमित्रामित्राणां जीवनमयः॥ ८
सीनः शत्रुवद्वर्ज्यः आत्मतुल्यत्वात्सुहृन्मित्रं गुनवर्जनीय इत्याह॥ उदासीन इति॥ किंच सुहृद्भिः सह
विचार्य ज्ञात्वेति कर्म कर्तव्यमननुगता नुगतिकमात्रेणेत्याह॥५ ज्ञात्वाज्ञात्वाचे॥ तत्र विदुषो यथा कर्म
मफलं॥ तत्र यथानाविदुषः भवतामयं क्रियायोगः॥ शास्त्रतो विचारितः यद्वा लौकिक आचार प्राप्तो
वेति साधु सोपपत्तिको भवप्रतो कथ्यतामिति॥ आचार प्राप्त एवेति सहेतुकमाह॥ पर्जन्य इति॥७॥ आत्ममूर्त

टी॰ द॰ ८०

न मिंइं वार्मुचां मेघानां न इंद्र साम तृप्ति यया सा उपजीवंति उपजीविकां कल्पयंति यथा मीथं सिद्धये ननु कृष्यादि भिर्जीवतां किमिंद्रेण प्रसामिति ॥५॥ फलभावनः फलसाधकः पर्जन्य विना कृष्यादि वैक ल्यादित्यर्थः इंद्रायमन्यु जनयन् इति कोपजनना गोवर्धनादिद्रुमवतारयितुं देवतानिराकरणं न तमेवाभिप्राय इत्यर्थः ॥ प्रथमना वत्कर्मवादेन देवान्निराकरोति कर्मणेति ॥ ननु जगदंतकर्मणः केव लात् कथं फलसिद्धिः प्रहोप्रशीलितमीमांसानास्वमतिविलसितं प्रहा ॥ कर्मणः फलकारण नेतानवयमन्ये च वार्मुचां पतिमीश्वरम् ॥ इत्येवं देवतासिद्ध्ये यजंते कनुभिर्नराः ॥९॥ नत्क्षे विपर्येपि फलदेतनवेपुत्रपुरुषकारणापर्जन्यः फलभावनः ॥१०॥ यथ एवं विसृज्येद्दं मेघा रपर्यायगतेन नरः ॥ कामात्मा भाद्र यादृ यान्तवे वामीति शोभनम् ॥११॥ श्रीभग॰ कर्मणा जायते जंतुः कर्मणैव हि लीयते ॥ सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥१३॥ अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणाम् ॥ कर्तारं भजते सोपि नह्यकर्तुः प्रभुर्हि सः ॥१४॥ स्वभावतंत्रो हि जनः स्वभावमनुवर्तते ॥ स्वभावस्थमिदं सर्वं सदेवासुरमानवम् ॥१५॥ नेव चननोवगाते ॥ किं न तेनानुपपन्नं नामके चिन्नु नरनिसाहस मीनाः कर्मवरतंत्रमीश्वरं मन्यन्ते न ल्ल न मनू घनिराकरोति ॥१३॥ अस्ति चेदिति स्वयं कर्मभिरलिप्तः अन्ये यथावा कर्मणा फल दाता कर्मा रंभजने ॥ नत्कर्मफलदानेन अनस्वकर्मणा पवफलसिद्धं स्यात्तमेव ॥ अजावलस्तत स्वत्याय देवतयोक्तस्यामि स्याह ॥१४॥ किं मिह्रेणेति ॥ ननु कर्मणोपि प्रवृत्तिरस्ति नर्यापक्षेवकथं सर्वयादेवतानुपयोग इत्याशंक्याह ॥ स्वभावविहितमिति ॥ स्वभावेन प्राक्तनसंस्कारेणैव विहितं

तस्मात्स्वभावतो निष्पन्नस्य कर्मणः प्रवकारणत्वात्कर्मैव श्रेष्ठमित्याह ॥ देहानिति सार्धेन ॥ संसृजन्येत्स्मानये
त ॥ ननु देवतोद्देशेन द्रव्यत्यागात्मकत्वात्कर्मणः ॥ कथं देवतां विना सिद्धिरित्याशंक्य कर्मणामात्रं देवतेति य
तन्मुपसंहरन्निव वदन्नेवाह मात्रिमात्रमेव देवतां समर्थयते ॥ अजसेनि हन्तु बलेन व विपदे दोषमाह ॥ आजीव्ये
ति ॥ १८ ॥ उपजीवति सेवते सत्पत्रवत्को हृष्टा न तेन न ॥ वर्णानां वृत्तिभेदमाह ॥ १९ ॥ वर्तेतेति ब्रह्मणा वेदाध्ययना
दिना ॥ वैश्यवृत्तेरवृत्तिविधिमाह ॥ कृषीति ॥ कृषिवाणिज्यरक्षादिना गोरक्षा ॥ एवं च यकृसीदं द्विजो वनं च न्त
देहानुद्याववान्नेतुः प्राप्योन्तर्जनतिकर्मणा ॥ शत्रुर्लिंगेड दासीनः कर्मैव गुरुरीश्वरः ॥ १७ ॥ तस्मा
त्संपूजयेत्कर्म स्वभावस्थः स्वकर्मकृत् ॥ अन्नं सायेन वर्तेत न तद्देवास्यहि दैवतं ॥ १८ ॥ आजीव्यैकतरं भा
वं यस्त्वन्यमुपजीवति ॥ न तस्माद्विंदते क्षेमं जाराद्यन्नार्यसती यथा ॥ १९ ॥ वर्तेत ब्रह्मणा विप्रो राजन्यो र
क्षया भुवः ॥ वैश्यस्तु वार्तया जीवेच्छूद्रस्तु द्विजसेवया ॥ कृषिवाणिज्यगोरक्षाकुसीदं तुर्यमुच्यते
वार्ता चतुर्विधा तत्र वयं नो वृत्तयो निशं ॥ २१ ॥ सत्त्वं रजस्तम इति तिस्रः स्युः प्रकृतेर्गुणाः ॥ रजसोत्पद्य
ते विश्वमन्योन्यं विविधं जगत् ॥ २८ ॥ रजसा नो दिनानि संघावर्षेत् प्रभूतानि सर्वतः ॥ २३ ॥ तस्माद्भवान्
स्मणानां तेइन्द्रारभ्यतामवेः ॥ यं इद्धमखसमाराज्ञेरयसाध्यतामवेः ॥ २४ ॥ पंचधा ताविविधाः या
काः सपानाः पायसादयः ॥ २५ ॥ ननु गवामपि वृष्टिर्मदेद्भाधीनेवेत्याशंक्यानिरीश्वरसांख्यमतमाश्रये
ण निराकरोति सत्वमिति श्लोकेन ॥ २० ॥ अन्योन्यं स्त्रीपुरुषयोगेन संभवत इति ॥ सम्यग्वृष्टिलोपः प्रादिष्ट
पितृष्टिदर्शनान्नपेक्षावत्सर्वकत्वं वृष्टेरिति भावः ॥ तेरेवमेचे देवस्मिन्नातिजीवति ॥ तथापि योगाद्देः
मार्य देवतापेक्षेति वेदत्प्राह ॥ ननः पुरः पत्तनादिजनपदादेः प्राणः अस्माकं योगाहे मदेहनुर्वन शैला
दयएवेतिभावः ॥ २३ ॥ ब्राह्मणानपि संगृह्य त्रिगमयतितस्मादिति स्वयमेव मूलेनयागकल्पतामाह
यद्दृश्यमस्वसंभावात्तिसार्धैः पंचभिः संभाराः साधनानि सर्वमोदे ॥ पायसं केवलं पयसि पक्वं संयावादयो

याराषोभार्यग्रहोत्पादनार्थंचादहूयंतामिति॥ येनदक्षिणाधेनुसहितादक्षिणाः वोयुष्माभिर्यवसंदत्त
णं॥ सर्वाग्निरः कपेनानुमोदयन्नाह॥ गोब्राह्मणाद्रीणामितिमह्यंममच॥२०॥ तद्द्रव्येणतेनमदेहनमाव
द्रव्येणद्विजान्स्वनियथायथंबलीनुपहृत्यदत्वा॥ आहृताः सादराः अनडुद्युक्तानि॥ उक्तमानडुद्भिर्युक्ता
निसद्विजाशिषः द्विजाशीर्भिः सहिताः गोपविश्रंभनेगोपानांविश्वासजनकंरूपंगताः शैलः सन्
बलिमुपहारमादत्त॥ अभक्षयत॥२४॥ अस्मैआत्मनेआत्मनास्वयंव्रजजनैः॥ सहनमस्कृतोअहोइति
सख्याबाहूपशाकुल्यः सर्वदोहस्यग्रहस्रनाम॥२५॥ हूयंतामग्नयः सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः॥ अ
न्नंबहुविधंतेभ्योदेयंवोधेनुदक्षिणाः॥२६॥ अन्येभ्यश्चश्वचंडालपतितेभ्योयथार्हतः॥ यवसंच
गवांदत्वागिरयेदीयतांबलिः॥२७॥ स्वलंकृताभुक्तवंतः स्वनुलिप्ताः सुवाससः॥ प्रदक्षिणांचकु
रुतेगोविप्रानलपर्वतान्॥ एतन्ममसतंतातक्रियतांयदिरोचते॥ अयंगोब्राह्मणाद्रीणांमह्यं
चदयितोमखः॥२९॥ श्रीशुकः॥ कालात्मनाभगवताशक्रदर्पजिघांसया॥ प्रोक्तंनिशम्यनं
दाद्याः साध्वगृह्णंततद्वचः॥ तथाचव्यदधुः सर्वंयथाहमधुसूदनः॥ वाचयित्वास्वस्त्ययनंतद्द्रव्ये
णगिरिद्विजान॥३१॥ उपहृत्यबलीन्सर्वानादृतायवसंगवां॥ गोधनानिपुरस्कृत्यगिरिंचक्रुः प्रद
क्षिणं॥३२॥ अनांस्यनडुद्युक्तानितेचारुह्यस्वलंकृताः गोप्यश्चकृष्णवीर्याणिगायंत्यः सद्विजा
शिषः॥३३॥ कृष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः॥ शैलोस्मीतिब्रुवन्भूरिबलिमादद्बृहद्वपुः॥ तस्
मैनमोव्रजजनैः सहचक्रेत्मनात्मने॥ अहोपश्यतशैलोसौरूपीनोनुग्रहंव्यधात॥ एषोवजानतो
मर्त्यान्कामरूपीवनौकसः॥ हंतिह्यस्मैनमस्यामःशर्मणेआत्मनोगवां॥३६॥ कमैवालेयाकस्मावोगुणोवाकर्मोगः
वामदेवाः वार्तावर्त्तीदेवतेएवमुक्तादेवतोभक्तमतोनत्वभीषणम्॥ इतिश्रीभागवतेदशमस्कंधेभावा॰

पंचविंशोरुषाशमेत्रजनानाशयवपीति ॥ ३ ॥ इत्युक्तानि गिरिमासावादरत्वहोकुलं प्रभुः ॥ ४ ॥ कृष्णस्यैनायो ये
यातेभ्यः क्रुद्धस्मसंत्रिद्धः ॥ सांवर्तकं नाम सवर्तनैः प्रलयस्तत्कर्मणि मेघानां प्रसिद्धं गणं प्राचोदयत् ॥ प्रे
षयामास ॥ ननु कथं कृष्णस्यानायानावाते प्रवृत्ते इत्याशंक्य ॥ आत्मसंभावनया निरस्तविवेकत्वादित्या
शयेनाह ॥ वाचालं बालमित्यादिपंचभिः ॥ अहमेवेश्वर इति गर्ववान् ॥ देवहेलनं देवस्य ममावज्ञा ॥ अदृ
ढैरसमर्थैः ॥ कर्ममयैः क्रियानिर्वृत्तैः ॥ अतएव नाममनोऽनिभैः ॥ आन्वीक्षिकीमात्मानुसृतिरूपाम्
श्रीशुक उवाच ॥ इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप ॥ गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्य
श्चुकोप सः ॥ १ ॥ गणं सांवर्तकं नाम मेघानां चांतकारिणाम् ॥ इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चा
हेशमानिनः ॥ २ ॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रु
र्देवहेलनं ॥ ३ ॥ यथाऽदृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षंति
भवार्णवं ॥ ४ ॥ वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रु
रप्रियं ॥ ५ ॥ एषां श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां ॥ धुनुत श्रीमदस्तंभं पशून्नयत
संक्षयं ॥ ६ ॥ अहं चैरावतं नागमारुह्यानुव्रजे व्रजं ॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ॥ ७
नन्वाचालं बहुभाषिणं बालिशं शिशुं ॥ पंडितमानिनं पंडितमन्यं अतः स्तब्धमविनीतमिति नि
दायां यो जिताः पीड्यमाना इति श्रीकृष्णस्तोत्राणि ॥ नन्वाचालं शास्त्रयोनिं बालिशं एवमपि शिशुत्व
विरहि मानिनं तं च मत्यस्य तु स्तब्धत्वाभावाद् नम्रं अज्ञं ज्ञानात्मनो यस्मात्सर्वज्ञमित्यर्थः ॥ पंडित
मानिनं ब्रह्मविदां बहुमाननीयं ॥ कृष्णं सदानंदरूपं परब्रह्म समर्थं तथापि मर्त्यवामस्त्य नमनुष्य
याप्रतीयमानमिति नित्यालिमानां ममाना ॥ आध्मापितात्मनां हृदि निदेह्यानां धुनुतापनयत ॥ श्रीम

स्थूणावत्स्थूलाः अभ्रेषु मुंचत्सु सत्सु नतोन्नतं नतं निम्नं॥ उन्नतं तद्विपरीतं यथा भवति तथा भूर्नादृश्य
त॥ जातवेपनाः जातकंपाः तत्र पशूनामात्यविशेषेण हि शीतार्ता इति गोगोपगोपीनां प्रार्थितमाह कृ
ष्णकृष्णेति॥११॥ त्वमेव नाथो यस्य तद्गोकुलं गवां कुलं त्वं वशे नोस्माकं॥ देवादिंद्रात् रक्षितुमर्ह
सि विज्ञापनाः स्वमेव कुपितेंद्रमेघगणैः कृतं तदर्हमेवेनेन ददर्श॥ अपर्त्विति॥ अपगतः ऋतुर्यस्य
तदर्षं अतिप्रवृत्तिं वातो यस्मिंस्तदतिवातं शिलामयं शिलाप्रचुरं तत्र प्रतिज्ञां पूर्वं गोवर्धनोद्ध

स्थूणास्थूलावर्षधारामुंचत्स्वभ्रेष्वभीक्ष्णशः॥ जलौघैः प्लाव्यमानाभूर्नादृश्यतनतोन्न
तं॥९॥ अत्यासारातिपातेन पशवो जातवेपनाः॥ गोपागोप्यश्च शीतार्ता गोविंदं शरणं य
ययुः॥१०॥ कृष्णकृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो॥ त्रातुमर्हसि देवान्नः कुपिताद्भ
क्तवत्सल॥११॥ शिलावर्षातिपातेन हन्यमानमचेतनं॥ निरीक्ष्य भगवान्मेने कुपितेंद्र
कृतं हरिः॥१२॥ अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं॥ स्वयागे विहतेस्माभिरिंद्रो ना
शाय वर्षति॥१३॥ तत्र प्रतिविधिं सम्यगात्मयोगेन साधये॥ लोकेशमानिनां मौढ्या
द्धरिष्ये श्रीमदं तमः॥१४॥ न हि सद्भावयुक्तानां सुराणामीशविस्मयः॥ मत्तोसतां मान
भंगः प्रशमायोपकल्पते॥१५॥ तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहं॥ गोपाये॰

णोमाह॥१४॥ वर्षतीति प्रतिविधिप्रतीकारं स्वसामर्थ्येन साधयिष्यामि तेन मौढ्याल्लोकेशमानि
नां श्रीमदलक्षणं तमो हरिष्यामि वरुणवचनेन वरुणादीनभिप्रैति॥ ननु देवाः सात्विकास्तत्क
थं अज्ञानं तन्नाशे तात्पर्यमत आह॥ नहीति॥१५॥ सद्भावः सत्वमाहुः किं वा नयुक्तानां सुराणामीशा वय
मिति विस्मयो गर्वः हि यस्मादत एव॥ अतः असतां किं चैतेषां मानभंगः प्रत्युत ग्रह एवेत्याह मत

धारासुतांश्च
कायेन प्रच्छा
द्यासारपीडि
ताः॥ वेपमा
ना भगवतः
पादमूलमु
पाययुः॥१२

सव्रजाः शकटमंडलीसहिताः ॥ सोपजीविनः भृत्यपुरोहितसहिताः पदात्स्थानात् ॥ व्युदप्रायाः विग
तोदकप्रायाः स्वल्पजला इत्यर्थः ॥२५॥ शकटोढोपकरणं शकटे ऊढमुपकरणं यथा भवति तथा
स्थविराः वृद्धाः ॥ यथा यथोचितं परिरंभणादिभिः समीयुः रूपजग्मुः सदाशिषः श्रेष्ठाः ॥
न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने ॥ वातवर्षभयेनालं तत्त्राणं विहितं हि वः ॥२१॥ त
था निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः ॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः
क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः ॥ वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत्प
दात् ॥२२॥ कृष्णयोगानुभावं तं निशाम्येंद्रोतिविस्मितः ॥ निःस्तंभो भ्रष्टसंकल्पः स्वान्मे
घान्संन्यवारयत् ॥२३॥ खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणं ॥ निशाम्योपरतं गोपा
न्गोवर्धनधरोब्रवीत् ॥२४॥ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः ॥ उपारतं वात
वर्षं व्युदप्रायाश्च निम्नगाः ॥२५॥ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनं ॥ शकटो
ढोपकरणं स्त्रीबालस्थविराः शनैः ॥२६॥ भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्रभुः ॥ प
श्यतां सर्वभूतानां स्थापयामास लीलया ॥२७॥ तं प्रेमवेगान्निर्भृता व्रजौकसो यथा
समीयुः परिरंभणादिभिः गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदा
शिषः ॥२८॥ यशोदा रोहिणी नंदो रामश्च बलिनां वरः कृष्णमालिंग्य युयुजुराशिषः स्ने
प्रीतीर्वादान ॥ ततो गोवर्धनस्थानात् ॥ अस्य श्रीकृष्णस्य तथाविधानि गोवर्धनोद्धरणरूपाणि
कर्माणि साधयंत्यः ईडुः ईषुः कथंभूताः ॥ एवं प्रेमगाहदिस्पृशंतीति हृदिस्पृशः श्रान्ताः यद्वा क
थंभूतस्य मे हृत्वेन तनासाहृदिस्पृक्तस्य ॥२९॥

इति श्रीभावार्थदीपिकायां दशमे पंचविंशः २५ षड्विंशे विस्मितान्गोपान्कृष्णस्याद्भुतकर्मणा ॥ नंदो गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् ॥ समभ्येत्य नंदमभिगम्य यदूचुस्तदाह ॥ २ ॥ बालकस्येति ॥ यद्यस्मात् अद्भुतानि कर्माणि तस्माद्ग्राम्येषु कथं जन्मार्हति ॥ आत्मजुगुप्सितं आत्मनो हेयं अद्भुतानि कर्माण्याह द्वादशभिः कथं बिभ्रत् स्थितः इति पुष्करं पद्मं गजराट् महागजइव ॥ महौजसो महाबलायाः तमो ततोनुवर्त्तैः पद्मपैः परिषिक्तो राजन्सगोष्ठः सबलो विशंकितैः ॥ तथा विधान्यस्य कृतानि गोपिकागायत्त्यं पुत्रसबला हृदि स्पृशः ॥ २२ ॥ इति श्रीदशमस्कंधे पंचविंशोध्यायः २५ श्रीशुक उवाच ॥ एवं विधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते ॥ अतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिताः ॥ १ ॥ गोपा ऊचुः ॥ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि च ॥ कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितं ॥ २ ॥ यः सप्तहायनो बालः करेणैकेन लीलया ॥ कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ॥ ३ ॥ तोकेनामीलिताक्षेण पूतनाया महौजसः ॥ पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥ ४ ॥ हिन्वतोधः शयानस्य मास्यस्य चरणावुदक् ॥ अनोपतद्विपर्यस्तं रुदतः प्रपदाहतं ॥ ५ ॥ एकहायन आसीनो ह्रियमाणो विहायसा ॥ दैत्येन यस्तृणावर्त्तमहन्कंठग्रहातुरं ॥ ६ ॥ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उलूखले ॥ गच्छन्नर्जुनयोर्मध्ये बाहु
वयः प्राणः यौवनवयः कालेन यथापीयते तद्वत् यमिमनुवर्त्तते ॥ अनसः अधः शयानस्य मासस्य मासः परिच्छेदको यस्य ॥ उदक् ऊर्ध्वं चरणौ हिन्वतः क्षालयतः प्रपदेन पादाग्रेणाहतं विपर्यस्तं अनः कथमपतत् ॥ यो दैत्येन ह्रियमाणः सन् तं तृणावर्त्तं दैत्यं कथमहन् ग्रीमस्थः ॥ हैयंगवस्तैन्ये नवनीतचौर्येण बाहुभ्यां गच्छन् ॥ तिरात्रिमर्थः स्वावनादनुकामोयस्मात् बकवेषामरिं बाहु

श्रीभाग० द० ८

भा०टी० द० स्क० पत्र ८

श्री. भा. द. ५८

प्राणी विषतमः ॥ प्रतिकूलविषस्यासावहो हि श्रुतं ॥ ९ ॥ औत्पत्तिकः स्वाभाविकः कथमिति ॥ किंस
वैषा मान्या स्यादिति शंकां उत्तमस्य विस्मयेनाभिनयेनाभिवदति ॥ १३ ॥ कुसमद्वायन इति ॥ शाक
टेन श्वेव डागीचार्येवाकूत तस्य रिंगोलेनेन निहत्वा सभावनस्यानंदस्य हस्तस्य तत्त्वावधीतकंना
वत्सेषु वत्सरूपेणाप्रविशंतं जिघांसया ॥ हत्वान्यपातयत्तेन कपित्थानि च लीलया ॥ ९ ॥
हत्वा रासभं दैतेयं तद्बंधूंश्च बलान्वितः ॥ चक्रे तालवनं क्षेमं परिपक्वफलान्वितं ॥ १० ॥
प्रलंबं घातयित्वोग्रं बलेन बलशालिना ॥ अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ॥ ११ ॥
आशीविषतमाहींद्रं दमित्वा विमदं हृदात् ॥ प्रसह्योद्वास्य यमुनां चक्रे सो निर्विषोदकां ॥
१२ ॥ दुस्त्यजश्चानुरागोस्मिन्सर्वेषां नो व्रजौकसां ॥ नंद ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः
कथं ॥ १३ ॥ क्व सप्तहायनो बालः क्व महाद्रिविधारणं ॥ ततो नो जायते शंका व्रजनाथ
तवात्मजे ॥ १४ ॥ श्रीनंद उवाच ॥ ॥ श्रूयतां मे वचो गोपा व्येतु शंका च वोऽर्भके ॥ एनं कुमा
रमुद्दिश्य गर्गो मे यदुवाच ह ॥ १५ ॥ वर्णास्त्रयः किलास्यासन्गृह्णतोऽनुयुगं तनूः ॥ शु
क्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १६ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥
वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ १७ ॥ बहूनि संति नामानि रूपाणि च सुतस्य ते ॥
गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १८ ॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः ॥
तेन सर्वे इदानीं तेन वाक्येन गोपा नु पदिशति श्रूयतामिति ॥ १४ ॥ अनेन सर्वदुःखानि निहूय मंज
नन स्वाव्रस्य कर्म सविस्मयो नास्तीति नंदस्याभिः ॥ इत्यद्वा सा हानमोष्विति ॥ गर्गश्च सत्यप्रहं गानेम
ति ॥ तदानीं तपश्चात्तस्मात्तो पि इदानीं कृष्णं नारायणस्यांशमन्ये अत्र हेतुः आश्लिष्टकारिण

(margin) इत्यादि व्याख्याने सर्वमाहुर्गर्गवाक्येन संगतं १० ... नारायणांशत्वं स्फुटं ... शिष्टकारिणम्

सिसि १०

५८

गोवर्धनोद्धरणं सप्तविक्रमम् अनुस्मरन्त्य् अकरिते स्वर्यस्य श्रीकृष्णस्य प्रीतिं शार्यय्यनेदेवइति ॥२४॥ यज्ञविघ्न
वेनयामहूत्तयाद्देवेन्द्रेवर्षतिसतिवज्राश्मवर्षानिलैः अयानिजललशाकरातीव्रवायुभिः सीदत्पा
लपशुस्त्रियाशीदंतः पालाः पशवस्त्रियश्चय्यमितस्तत ॥ तथाभ्रात्मासयमेवशरणायस्वनङ्क्रोहद्व
नुकंपीउत्स्मयन ॥ ह्रमतं ॥ प्रोत्थिमाविकुर्वन ॥ शैलमुत्पाद्यवलोलीलार्थमस्तिलिध्रयथातथा ॥ एके
नकरेणविभ्रदधत् ॥ गोहममपत्यालितवान ॥ गोहमपात्यालितवान् ॥ एवंमहेन्द्रमदभिन्न ॥ गावामिन्द्र
पुरानेनव्रजपतेसाधुवोदस्युपीडिताः ॥ अराजकेरत्नमाणाजिगुर्देस्वन्समेयिता ॥२१॥ एपनास्मि
स्महाभागाः शीतिकुर्वतिमानवाः ॥ नारयोभिभवंस्येतानिस्पन्नानिवासुराः ॥२२॥ तस्मात्वदात्म
नागोप्तानेवज्ञोकमः ॥ हृष्टश्रुतानुभावस्यकृष्णस्यामिततेजसः ॥२४॥ मुदितानेदमानुचुः कृष्ण
चगतविस्मयाः ॥२५॥ देववर्षतियज्ञविघ्नवर्षावज्राश्मवर्षानिलैः ॥ सीदत्पालपशुस्त्रियात्म
शरणादृष्ट्वानुकंप्युत्स्मयन ॥ उत्पाट्यैककरेणशैलमबलोलीलास्तिलिध्रयया बिभ्रद्गोष्ठ
मपान्महेन्द्रमदभित्प्रीयान्नइन्द्रोगवाम ॥२९॥ इतिश्रीभागवतेदशमस्कंधेषड्विंशतितमो
ध्यायः ॥२६॥ श्रीशुक उवाच ॥ गोवर्धनेधृतेशैलेआसारादिविलिते व्रजे ॥ गोलोकादाव्रजत्कृ
ष्णंसुरभिःशक्रएवच ॥ इति राधायार्थवस्मरातिसपवभूतः श्रीकृष्णनापीयान्नीयनामिति ॥२९॥ षड्विंशेदशमेव्यक्तः ष
ड्विंशः ॥२६॥ सप्तविंशतदालस्तसस्वप्रभवपर ॥ वगपितेसुरभीन्द्राभ्यामभिषेकमहोत्सवं गो
वर्धनेधृतेशैलेइतिशक्रस्यभयेनागमनदेतः तेनेन्द्रआगत्यकिंकृतवान्स[illegible]दाह ॥ विविक्तइत्यादि

ग्रस्य श्रीकृष्णस्याज्ञातस्वात्मावनुभावस्य स्वप्रज्ञातानुभावः दृष्टः श्रुतोनुभावो येन सर्वेशः ॥ नष्टत्रि
लोकेशमद इति मदो यस्य सः तत्र ममापराधं क्षमस्वेति वक्तुं तत्त्वतावदपराधाभावस्त्वयानु
ग्रहः एव कृत इत्याह ॥ ३ ॥ विशुद्धसत्त्वमिति चतुर्भिः ॥ धाम स्वरूपं शान्तमेकरूपं अत एव तपोमयं
यं प्रपञ्चतत्स्वरूपज्ञानं सर्वज्ञमित्यर्थः ॥ कुतो ध्वस्तरजस्तमस्कं ध्वस्ते अविद्यमाने रजस्तमसी य
स्मिन् ॥ अत एव मायामयः सर्गादिप्रवृत्तिरूपमानः मायाकार्यरूपः गुणप्रवाहः ॥ ग्रहणैः संयो
गत इति तथा संसार इत्यर्थः ॥ स तेन तव न विद्यते यतो ग्रहणेनाज्ञानेनानुबध्यते इति ॥ तथा
हि अज्ञातानुभावोस्य कृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेशमद इन्द्र आह कृताञ्जलिः ॥ २
इन्द्र उवाच ॥ विशुद्धसत्त्वं तव धाम शान्तं तपोमयं ध्वस्तरजस्तमस्कं ॥ मायामयोयं गुणसं
प्रवाहो ॥ न विद्यते ते ग्रहणानुबन्धः ॥ ४ ॥ कुतो नु तद्धेतव ईश तत्कृता लोभादयो ये
बुधलिङ्गभावाः ॥ तथापि दण्डं भगवान्बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ॥ ५ ॥ पिता
गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदण्डः हिताय चेच्छातनुभिः समीह
स सर्वज्ञस्य तेनास्तीत्यर्थः ॥ अज्ञान (से मानं विधुन्वञ्जगदीशमानिनाम् ॥ ६ ॥
संबन्धः ॥ यदा ज्ञानं न तत्कृतदेहसंबन्धो न स्यात् ॥ तदा तत्कृता नानाकावार्तेत्याह ॥ ५ ॥ कुतो नु इति अ
विभेदात् ॥ देहलोभयोः परस्पराश्रयतानान्तत्कृतादेहसंबन्धकृताः ॥ तद्धेतवः पुनरन्यदेहस्य
हेतवः ॥ ननु ज्ञानिनामपि तेहरूपेण ते ॥ अत आह ॥ अबुधलिङ्गभावाः अज्ञानिनां गमकाः ॥ या
वद्रागादिसत्त्वं तावत् ॥ ज्ञानित्वमेव न सिद्धमित्यर्थः ॥ लोभाद्यभावेपि मत्स्यान् भग्नोद्दण्डो धर्मि
त्याह ॥ तथापीति ॥ ननु त्वद्देहे मम गोपदग्रस्तस्य कापराधिः किंच कारणं को वा दण्डो मया हि

देवनिकायेषु स्वर्गके तव इंद्रवद्दर्शनीयाम् अत्र अर्थः ॥ गावः गां पृष्ठं क्षीरपयोभिः दुग्धामनयन् ॥ प्रकर्षेण स्रवंति स्वर्धीः नानारसौघाः क्षीरादिवाहिन्यः ॥ अकृष्टपच्याः कर्षणं विनैव पक्वाः ओषधयो व्रीह्यादयः कृष्णरणीन् ॥ गर्भगतान् ॥ मणीन् ॥ उद्धतान् ॥ बहिः प्रकटान् ॥ अबिभ्रत् ॥ प्रविभक्तः ॥ ३० ॥ इति श्री दशमस्कंधे भावार्थदीपिकायां सप्तविंशो ॥ २७ ॥ अष्टाविंशे ततो नंदानयनं वरुणालयात् ॥ वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते ॥ १ ॥ गोवर्धनं समुद्धृत्य वशेकृत्वा मरेश्वरं ॥ नंदानयनतः कृष्णो वरुणं च वशेऽनयत् ॥ २ ॥ कलाम श्रायोद्वादशपारणा

तथा गातास्तं तुरुं नारदादयो गंधर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशो लोकमलापहं हरेः ॥ सुरांगनाः संननृतुर्मुदान्विताः ॥ २५ ॥ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन्पयोद्रुतां ॥ २६ ॥ नानारसौघाः सरितो वृक्षा आसन्मधुस्रुतः ॥ अकृष्टपच्यौषधयो गिरयो बिभ्रदुन्मणीन् ॥ २८ ॥ कृष्णेऽभिषिक्त एतानि सर्वाणि कुरुनंदन ॥ निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २९ ॥ इति गोगोकुलपतिं गोविंदमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवं ॥ ३० ॥ इति श्रीभागवते दशमस्कंधे सप्तविंशोऽध्यायः

को नानात्वमन्विच्छन्योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ १३ ॥
अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ॥ अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु
अंतः शरीर आकाशात्पुरुषस्य विचेष्टतः ॥ ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥ १४ ॥

तन्महिमानमाह ॥ द्रव्यमुपादानं कर्मादीनि निमित्तानि जीवो भोक्ता यस्यानुग्रहात्संति कार्यक्षमा भ-
वंतीत्यर्थः ॥ १२ ॥ योग एव तल्पं शय्या तस्मात् ॥ वीर्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलं तस्यै-
व प्रपंचः ॥ अथेत्यादिना ॥ १४ ॥ अंतः शरीरे य आकाशस्तस्मात् ॥ क्रियाशक्त्यात्मकविविधं चेष्टमा-
नस्य सतः ॥ ओज इंद्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः ततः प्राणात्मकात्सूक्ष्मरूपात्प्रा-
णः सूत्रमतः महानसुः असवः प्राणाः सूत्रमतः सर्वेषां ॥ महत्त्वं दर्शयति ॥ १५ ॥

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनुपश्याकृत्तिभिः शोपाधिभिः सह शयनं तल्लयो निरोधः अन्यथारूप
मविद्यया यात्वंकर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया अवस्थितिर्मुक्तिः ॥ ८ ॥ आभासः सृष्टिः निरोधो ल
य आश्रयतो भवति ॥ अध्यवसीयते ॥ प्रकाश्यते च स ब्रह्मेति परमात्मेति ॥ प्रसिद्धः आश्रयः कथ्यते आ
श्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह ॥ योयमध्यात्मिकः पुरुषः च
क्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकः ॥ चक्षुराद्यधिष्ठाता सूर्यादिः ॥ तत्रैकोस्मिन्
योभयोर्द्विरूपो विच्छेदो यस्मात्स आधिभौतिकः चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुषः इति
पुरुषस्य जीवस्योपाधिः ॥ स वा एष पुरुषोन्नरसमय इत्यादिश्रुतेः ॥ ८ ॥ एकमेकतराभावे यस्मे तेषा

निरोधोस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ८
आभासश्च निरोधश्च यतश्चाध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ॥ यो
ध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ॥ ८
एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥ ॥

मन्योन्यसापेक्षसिद्धित्वेनानात्मत्वं दर्शयति ॥ तथाहि दृश्यं विना न तत्प्रतीत्यनुमेयं करणं न सिध्यति
नापि द्रष्टा न च तदधिष्ठाता करणं तदधिष्ठाता सूर्यादिः ॥ न च तं विना करणप्रवर्तनं न च तद्धिनाह दृश्यमि
त्येकतरस्याभावे एकं नोपलभामहे ॥ तत्र तदा त्रितयमालोचनात्मकेन प्रत्ययेन यो वेद स आत्मा त्रितया
पश्यति ॥ स परमात्मा आश्रयः ॥ तेषामपि परस्परमाश्रयत्वमस्त्येवेति ॥ तद्व्यवच्छेदार्थं विशेषणं ॥
स्वाश्रयः अनन्याश्रयः स वासावन्येषामाश्रयश्चेति तथा च भगवान्वक्ष्यति ॥ हरूपमाकैवपुरत्रे
धेपरस्यरंसियतिनः स्वतः ले ॥ आत्मायदेषामपरोयआद्यं स्वधाम्नभ्रमतादिलसिद्धसिद्धेरिति ॥ प

ततो भागवतव्याख्याहारैर्दशमे स्फुटं॥ यत्र प्रश्नोत्तरं व्यक्तमारेभे वादरायणिः॥ प्रतीतानन्तरं व्या-
ख्याते दशलक्षणं प्राहेत्युक्तं तानि दशलक्षणानि दर्शयति॥ अत्रेति॥ मन्वन्तराणि ईशानुकथा चेति
द्वन्द्वः सर्गादयः अत्र द्वादश्यात्मके लक्ष्यन्ते॥ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह॥ दशमस्याश्रयस्य वि-
शुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं पृथक्से वयाधान्यानां यद्दोषदर्शनार्थं॥ २॥ ननु श्रुतेनैवं प्रती-
यते॥ अत आह॥ श्रुतेन श्रुत्यैव तत्तत्स्थानेषु अञ्जसा साक्षात् दर्शयन्ति॥ अर्थेन तात्पर्यवृत्त्या च
तत्तदाख्यानेषु॥ ३॥ सर्गादीनां प्रत्येकं लक्षणमाह॥ भूतानि आकाशादीनि मात्राणि च शब्दादीनि र

शुक उवाच॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः॥ मन्वन्तरेशानुकथा निरोधो मुक्तिरा-
श्रयः॥ १॥ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणं॥ वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्ज-
सा॥ २॥ ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः॥ भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः
॥ ३॥ स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः॥ मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः॥ ४॥
अवतारानुचरितं हरेरस्यानुवर्तिनां॥ पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः॥ ५॥

हिरण्यगर्भाणि च॥ धीग्रहणेन महदहंकारौ॥ ३॥ गुणानां वैषम्यात् परिणामात्॥ ब्रह्मणः परमेश्वरात् कर्तृ-
भूतादीनां यद्विराड्रूपेण स्वरूपतश्च जन्म सर्गः॥ पौरुषो वैराजः तत्कृतः पौरुषश्चराचरसर्गो विस-
र्ग इत्यर्थः॥ ३॥ वैकुण्ठस्य भगवतो विजयः॥ सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं स्व-
भक्तेषु तस्यानुग्रहः पोषणं तदनुगृहीतानां सतां मन्वन्तराधिपतीनां धर्मः॥ कर्मणां वासनाः ऊतयः
वेनतन्त्वसन्तानो॥ उयन्ते कर्मभिः संतन्यन्ते तत ऊतयः॥ यद्वा हरेरव्यर्थास्ते एवाविद्यावयन्ते याता रिदं
रूपं॥ उयन्ते कर्मभिर्वध्यन्ते संसिञ्च्यन्ते इति वा ऊतयः॥ ४॥ हरेरवतारानुचरितं अस्यानुवर्तिनां च

भा°
द्विती°
३०

तदनंतरं एवोक्तो ब्रह्मनारदसंवादः प्रवृत्तस्तमाह ॥ प्रजापतिरिति त्रिभिः ॥ प्रजानां भद्रमन्विच्छन्नैव स्वार्थकाम्यया स्वप्रयोजनेनैकं तपाय यमनियमानन्वतिष्ठत् ॥ ३५ ॥ रिक्थादानामनुव्रतः प्राणमथोप्रियतमः तत्पितरं सेवमानः शीलादिना परितोषयामास ॥ ३६ ॥ किमिच्छन् विष्णोर्मायां विविदिषन् ॥ ३७ ॥ निशाम्य दृष्ट्वा तत्त्वेनार्थः मायां ॥ ३८ ॥ भगवता चतुःश्लोक्यां संक्षेपेण प्रोक्तं विस्तरेणाह ॥ द

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ॥ भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥ ३५ ॥ तं नारदः प्रियतमो रिक्थादानामनुव्रतः ॥ शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ३६ ॥ मायां विविदिषन्विष्णोर्मायेशस्य महामुनिः ॥ महाभागवतो राजन्पितरं पर्यतोषयत् ॥ ३७ ॥ तुष्टं निशाम्य पितरं लोकानां प्रपितामहं ॥ देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ॥ ३८ ॥ तस्मा इदं भागवतं पुराणं दशलक्षणं ॥ प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥ ३९ ॥ नारदः प्राह मुनये सरस्वत्यास्तटे नृप ॥ ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥ ४० ॥ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं ॥ यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४१ ॥ इति द्वितीये नवमः ॥ ९

शालक्षणानि लक्षणीयान्यर्थाविर्यं तेयस्मिंस्तत ॥ ३९ ॥ तत्संप्रदायतो भागवतं मया ज्ञातमित्याशयेनाह ॥ नारद इति ॥ ४० ॥ भागवताख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह ॥ यदुतेति ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिता इत्यादिना वैराजात्पुरुषादिदं विश्वं कथमासीदिति यदहं त्वया पृष्टः ॥ तद्यथावदुपाख्यामि प्रश्नांश्चेति ॥ ४१ ॥

३०

ऋतेऽर्थं विनापि वास्तवमर्थं यत्प्रतः किमप्यनिरूप्य मामनधिष्ठाने प्रतीयेत । यद्यपि च न प्रतीयेत तदा त्मनो मम मायां विद्यात् । यथाऽऽभासो द्विचन्द्रादि वेति । अर्थं विना प्रतीतौ दृष्टान्तः । यथा तमः इति स तोऽप्रतीतौ यथा तमो राहुर्ग्रहराशिमध्ये सन्नपि न प्रतीयते यथाऽऽभासः स्वत्वे न तत्स्मृष्टयति ॥३३॥ यथा महा भूतानि भौतिकेषूच्चावचेषु देहेषु ततं प्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च प्राग्भावकारणमय नेषु विद्यमानत्वात् । तथा तेषु भूतभौतिकेषु अहं न च तेष्वहं । एवंभूतं माममसज्ञेत्यर्थः ॥३४॥ साधनमा ह । एतावदेवेति । आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्यं नेदं वाह । अन्वयं कार्येषु कारण

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥३३॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ॥३४॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः । अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥३५॥
एतन्मतं समातिष्ठ परमेण समाधिना । भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥३६॥
श्रीशुक उवाच ॥ संप्रदिश्यैवमजनो जनानां परमेष्ठिनम् । पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ॥३७॥
अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः । सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥३८॥

तेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः । तथा जाग्रदाद्यवस्थासु तन्नुसाक्षितयाऽन्वयः । व्यतिरेकश्च समाध्यादौ । एवमन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा च तदेवात्मेति ॥३५॥ यत्त्वयार्थितं ते हमानः प्रजासर्गमिति तत्र प्रसादीकरोति । एतन्मतं समातिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु विकल्पाः विविधाः सृष्टयः तेषु विमोहे कर्तृत्वाभिनिवेशं तथा स्मृतीति । एवं तत्त्वं संप्रदिश्योपदिश्य जनानां परमेष्ठिनं ब्रह्माणमात्मनस्तद्रूपं न्यरुणत् ॥ अन्तर्हितवान् ॥३७॥ अन्तर्हितः इन्द्रियार्थः प्रम तद्रूपं येन तस्मै बद्धाञ्जलिः सन् ॥३८॥ ॥

द्वितीयस्कंध

भा
द्वि॰टी
५५

यावदिति ॥ भो ईश तेऽत्र या लौकिकस्य सृष्टुः सख्येवाहं कृतः करस्पर्शादिना मम त्वेन संमानितः स
न् ॥ प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितो विक्लवोऽस्यां कल्पे एव यावज्जनेन विभजामि ॥ उतमम
धर्मादिभेदेन स्वजामि तावत् ॥ तत्संमानादहमजः ॥ स्वतन्त्र इति मानितो मे समुन्नद्धद्रुकृतोम
दो माभूत् ॥ यद्वा मदो मा समुन्नद्ध मा समुन्नद्धसंतोऽब्धिकोन भवेदित्यर्थः ॥ २९ ॥ ज्ञानं परमगुह्यं मे विज्ञा
नमनुभवः ॥ रहस्यं भक्तिः समाणोपमपि वक्ष्यामीति निर्देशात् ॥ तस्यांगं साधनं ॥ ३० ॥ न च त्वद्दर्शनेप
समर्थोहं कथं तज्ज्ञानाधिकारी स्यामत आह यावानिति ॥ यावान् ॥ यत्स्वरूपतः यथाभावः याहक्स

यावत्सत्तासत्वगुणविशेषेण ते कृतः प्रजाविसर्गे विभजामि भोजनं ॥ अविक्लवस्ते परिकर्म
णि स्थितो मा मे समुन्नद्धमदोऽजमानिनः ॥ २९ ॥ श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्वि
ज्ञानसमन्वितं ॥ सरहस्यं तदंगं च गृहाण गदितं मया ॥ ३० ॥ यावानहं यथाभावो यद्रू
पगुणकर्मकः ॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥ अहमेवासमेवाग्रे नान्य
द्यत्सदसत्परम् ॥ पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३२ ॥

तावान् ॥ यानि रूपाणि गुणाः
कर्माणि च यस्य ॥ ३१ ॥ एतदेव सम्यगुपदिशन् ॥ यावानित्यस्यार्थं स्फुटयति ॥ अहमेवाग्रे सृष्टेः पू
र्वमासं स्थितः ॥ नान्यत्किंचित् ॥ यत्स्थूलं ॥ असत्सूक्ष्मं परं तयोः ॥ कारणं प्रधानं तस्यान्तर्मु
खतया ॥ तदा मय्येव लीनत्वात् ॥ अहं एव तदाग्रासमेवलेन वान्यद्दकरव ॥ पश्चात्सृष्टेरनंतरमा
पि ॥ अहमेवास्मि ॥ यदेतद्विश्वं तदप्यहमस्मि ॥ प्रलये योऽवशिष्येत सोऽप्यहमेव अनेन चानाद्यनंतत्वाद
द्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति ॥ यथाऽऽत्ममायायोगेनेत्यनेन मायाया अपि हृष्टत्वाहस्य

सांगोपकितिलाद्य सांकेतिद्रूपति ॥ ३९

तदपि त्वां प्रति मयैवाविश्योपदिष्टं ॥ कदा तत्त्वतस्तस्यारंभे त्वयि कर्मणि कार्ये यैर्विमोहिते सति
किं च तपो नाम ममैव शक्तिरित्याह ॥ तपो मे हृदयं मनेतरंगा शक्तिः आत्मस्वरूपं यस्य ज्ञानमयं तप
इति स्फुरते ॥ २२ ॥ ग्रसामि संहरामि बिभर्मि पालयामि वीर्यं शक्तिः ॥ २३ ॥ वरं वरयेत्युक्ते भगवता नेत्या
ह भगवन्निति ॥ अध्यक्षः अपि ब्रह्मा गुहायां बुद्धावेवस्थितः यद्यपि वेद तथापि त्वत्तरेणात्वयं
नाथमानस्य याचमानस्य उपनयमानस्येति वा ॥ हे नाथ नाथय यच्च असेशायेप्रपन्न नाथितं याचितं
नाथ नाथय याज्ञायतापैश्वर्यापीशः ॥ नाथितमेवाह ॥ परे सूक्ष्मवरे स्थूले च ते रूपे यथा जानीयां

मत्त्वादिहेममयातत्त्वविकर्मविमोहिते ॥ तपो मे हृदयं साक्षादात्माहं तपसोनघ ॥ २२ ॥ सृ
जामि तपसैवेदं ग्रसामि तपसा पुनः ॥ बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥ २३ ॥ ब्रह्मोवाच
भगवन्सर्वभूतानामध्यक्षोवस्थितो गुहां ॥ वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥ २४
तथापि नाथमानस्य नाथ नाथय नाथितं ॥ परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥ यथात्ममाया
योगेन नानाशक्त्युपबृंहितम् ॥ विलुंपन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना ॥ २६ ॥ क्रीडस्य
मोघसंकल्प ऊर्णनाभिर्यथोर्णुते ॥ तथा तद्विषयां धेहि मनीषां मयि माधव ॥ २७ ॥ भवे

२४ ॥ यथा वर्तं क्रीडसि तथा तद्विषयां मनीषां मयि विधेहि अन्तरेणान्वयः ॥ नानाशक्त्युपबृंहितं
विश्वं लुंपन् ॥ विविधं सृजन् बिभ्रत् पालयन् ॥ आत्मना स्वयमेवात्मानं ब्रह्मादिरूपं गृह्णन् क्री
डसि ॥ ऊर्णनाभिः तंतुभिरात्मानमाच्छादयति ॥ न किंचिदपि हि हिंसः ॥ एवं तत्त्वज्ञानं प्रार्थ्य प्रसंगेन्याह
भगवता त्वया शिक्षितमनुशिष्टं अतंद्रितः ॥ अनलसः सन् ॥ करिष्यामि ॥ तर्हि किं मनेनेन नत्वयाने
नेत्याह ॥ यस्मादेवं भक्ता त्वयानुग्रहात्प्रजासर्गमीहमानः ॥ कुर्वन्नपि अहंकारादिभिर्न बद्धो न भ
वेयं ॥ इममेवार्थमदो भविता सत्वं केचित्कालं मा भूदिति प्रार्थयते ॥ २८ ॥

भा
द्वि टी
२४

...द्वैर्भगैः स्वाभाविकैरैश्वर्यादिभिः ॥ इतरत्र योगिषु ब्रह्मादिषु चाध्रुवैः आगन्तुकैः साधारणोपि तस्यार्थः ॥ एवं सन्नपि स्वधामनि स्वस्वरूपे रममाणम् अत एवेश्वरं ॥१६॥ तस्य दर्शनेन यआह्लादः तेन परिप्लुतं व्याप्तमन्तरमन्तःकरणं यस्य ॥ हृष्यन्ती रोमांचिता तनुर्यस्य प्रेमभरेणास्रूणि लोचने यस्य ॥ विश्वसृक् ब्रह्मा पारमहंस्येन पथा ॥१७॥ तं प्रीयमाणं भगवान् बभाषे प्रजासर्गकार्ये निजशासनार्हणं स्वनियोगार्हं प्रजाविसर्गे समुपस्थितमिति वान्वयः ॥ ईषत्स्मितेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा ॥१८॥ सिसृक्षया हेतुना

युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्रममाणमीश्वरं ॥१६॥ तं दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः। ननाम पादाम्बुजमस्य विश्वसृग्यत्पारमहंस्येन पथाधिगम्यते ॥१७॥ तं प्रीयमाणं समुपस्थितं कविं प्रजाविसर्गे निजशासनार्हणं। बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥ **श्रीभगवानुवाच** ॥ त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया। चिरं भृतेन तपसा दुस्तोषः कूटयोगिनां ॥१९॥ वरं वरय भद्रं ते वरेशं माभिवाञ्छितं। ब्रह्मञ्छ्रेयः परिश्रामः पुंसां मद्दर्शनावधिः ॥२०॥ मनीषितानुभावोयं मम लोकावलोकनं। यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥२१॥

चिरं संभृतेन तपसाहं सम्यक् ॥ तोषितः दुस्तोषः तोषयितुमशक्यः ॥१९॥ मामभीष्टश्रेयसां फलानां परिश्रामः साधनप्रयासः मद्दर्शनमवधिर्यस्य सः तथाप्यधिकं न पुनः फलेनास्तीत्यर्थः ॥२०॥ एतच्च मत्कृपयैव त्वया प्राप्तमित्याह ॥ मनीषितमिच्छा ॥ तस्यामिदं ज्ञातव्यमिति या मम सेच्छा तस्याश्च भावोयं कोसौ तमाह ॥ मम लोकस्यावलोकनं यत् ॥ न चेदं ममैव तपोबलेन प्राप्तमिति स्यात् तत्प्रेमस्य ॥ तत्र हेतोरपि मत्कृतत्वादित्याह ॥ रहसि तपत्येति यदुपश्रुत्य परमं तपः चकर्थ कृतवानसि ॥ २१ ॥

२४

प्रवालादिवद्वैडूर्यवर्णैर्येषांते परिस्फुरंति कुंडलानि मौलयो मालाश्च संति ये तेषां ॥ पार्षदाननुवर्त्त्येदु
नरवपि स्तोकमनुवर्णयति ॥ भ्राजिस्नुभिर्दीप्यमानाभिः प्रमदोत्तमानां दिवः कांतयस्ताभिः विद्योतमा
नः सह विद्युद्भिर्वर्त्तमानाः सविद्युतः ताभिरभ्रावलिभिः नभविद्युत इव स्थितः अभ्रपंक्तय इव विमाना
नि ॥ नभ इव लोकः ॥२१॥ श्रीः सपत्नरूपिणी मूर्तिमती ॥ मानं दर्जो विभूतिभिर्नानाविभवैः प्रेंखस्त्रांदोल
नं संश्रिता ऊरुक्रमाकरो वसंतः तस्यानुगा भ्रमराः तैर्विविधं गीयमाना स्वप्रियस्य हरेः ॥ कर्म गाय

प्रवालवैडूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः ॥ भ्राजिष्णुभिर्यः परितो विरा
जते लसद्विमानावलिभिर्महात्मनां ॥२२॥ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलि
भिर्यथा नभः ॥ श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ॥२३॥ प्रेंखं श्रि
ता या कुसमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ ददर्श तत्राखिलसात्वतां पतिं श्रियः
पतिं यज्ञपतिं जगत्पतिम् ॥२४॥ सुनंदनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवि
तं विभुं ॥ भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम् ॥२५॥ किरीटिनं
कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ॥ अध्यर्हणीयासनमास्थितं परं वृतं
चतुःषोडशपंचशक्तिभिः ॥२६॥

तीति ॥२३॥ य एवंभूतो लोकः तत्र तस्मिन् ॥२४॥ भृत्यानां
प्रसादे प्रभिमुखं दृगेवासवः दृष्टिर्णां हर्षकरी यस्य तं ॥ प्रसन्नहासमरुणलोचनं चाननं यस्य व
क्षसि स्थितया च श्रिया लक्षितमलंकृतमित्यर्थः ॥२५॥ अध्यर्हणीयं वरिष्ठं सिंहासनम् ॥ चतसृभिः
प्रकृतिपुरुषमहदहंकाररूपाः षोडश ॥ एकादशेंद्रियमहाभूतानाख्याः पंचतन्मात्ररूपायाः शक्त
यः ताभिर्वृतम् ॥२६॥

भा
द्वि
टी
३४

एवं निशम्य तस्य वचसो वक्रदृष्ट्या नतः प्रचलितः सन्॥ दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय के
न चित्यस्य तनिष्क्रम्य वनं स्वात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः॥१॥ ततस्तु सोऽखिला
लोकानां तापनं प्रकाशकं तपः॥ अतप्यत कृतवान्॥ तपतपेत्यस्य वचसोऽर्थः प्रमोदं दर्शनं यस्य जितः
अनिलः प्राणो मनश्च येन॥ विजितानि उभयेंद्रियाणि ज्ञानकर्मात्मकानि येन तपस्तेन तपश्चरणं स
र्येन पीयान्॥ अतिशयेन तपस्वी॥२॥ तस्मै स्वलोकं वैकुंठाख्यं परं श्रेष्ठं न यत्परं॥ यतः पर

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः॥ स्वधिष्ण्यमास्थाय विमृश्य
तद्धितं तपस्युपादिष्ट इवादधे मनः॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितो
भयेंद्रियः॥ अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः॥७॥ तस्मै स्वलो
कं भगवान्सभाजितः संदर्शयामास परं न यत्परं॥ व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भि
र्विबुधैरभिष्टुतं॥८॥ प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः॥ न यत्र मा
या किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः॥९॥ श्यामावदाताः शतपत्रलोचनाः पिश
ङ्गवस्त्राः सुरुचः सुपेशसः॥ सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः॥१०

मुत्कृष्टं प्रमयवास्ति॥ तमेव लोकमनुवर्णयंति पंचभिः व्यपेताः संक्लेशादयो यस्मात्॥ स्वदृष्टवद्भिः
यद्वा स्वस्य दृष्टं दर्शनं अस्ति येषां आत्मविद्भिरित्यर्थः॥ तामसमिश्रं सत्त्वं च न प्रवर्तते॥ किं त्वशुद्धमे
व सत्त्वं कालविक्रमो नाशः॥ अपरे रागलोभादयो न संतीति किमु वक्तव्यं अनुव्रताः पार्षदाः॥१०॥
श्यामाश्च ते अवदाताश्च॥ पद्मनेत्राः पीतांबराः सुरुचः अतिकमनीयाः सुपेशसः अतिसुकुमा
राः उन्मिषंत इव॥ प्रभावंतो मणिप्रवेकाः मणिश्रेष्ठास्तानि निष्काणि पदकाख्याभरणानि ये

व्यंते स्वर्वसः अतिशेतमतिः ११

२४

आत्मनोजीवस्यतत्त्वविशुद्ध्यर्थंतत्त्वज्ञानार्थंतद्रूपस्यैव॥यत्तपआदिनाभजनेनब्रह्मणोभगवानाह किं
कुर्वन्ब्रह्मणेस्वंचिह्नंरूपंदर्शयन्नदर्शनेहेतुःअव्यलीकेनछद्मेतेन॥तपसाआदृतःसेवितःसन्
प्रपंचभावःजीवस्याविद्ययामिथ्यारूपदेहसंबंधः॥ईश्वरस्यतुयोगमाययालीलाविग्रहाविर्भाव
इतिमहान्विशेषः॥अतस्तद्भजनान्मोक्षोपपत्तिरिति॥४॥भगवद्भजनादेवतत्त्वज्ञानमित्येतत्प्रपं
चयिष्यन्॥ब्रह्मणोपितत्त्वज्ञानंतत्प्रसादादेवेतिदर्शयितुमितिहासमाह॥सइत्यादिनापरोगु
रुःभक्तिरहस्योपदेष्टास्वधिष्ण्यंपद्मम्आस्थायाधिष्ठाय॥तस्याधिष्ठानान्वेषणाय॥एवंजले

आत्मतत्त्वविशुद्ध्यर्थंयदाहभगवानृतं॥ब्रह्मणेदर्शयन्रूपमव्यलीकव्रतादृतः॥४॥सआ
दिदेवोजगतांपरोगुरुःस्वधिष्ण्यमास्थायसिसृक्षयैक्षत॥तांनाध्यगच्छद्दृशमत्रसम्मतां
प्रपंचनिर्माणविधिर्यथाभवेत्॥५॥सचिंतयन्द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितंव
चोविभुः॥स्पर्शेषुयत्षोडशमेकविंशंनिष्किंचनानांनृपयद्धनंविदुः॥६॥ ॥

निमग्नःपराहूतस्वधिष्ण्येस्थितेनसर्वः॥येनतत्कथंस्रष्टव्यमित्यालोचितवान्॥तांदृशंप्रज्ञाम
त्रसृष्टिविषयेसंमतामव्यभिचारिणींविधिःप्रकारःसृष्टिंचिंतयन्॥कदाचिद्व्यक्षरंवचःअंभसि
उपाशृणोत्॥उपसमीपेश्रुतवान्॥तेवाक्येद्विर्गदितंदर्शयति॥कादयोमावसानाःस्पर्शाःतेषुषोडशं
तकारः॥एवंएकविंशंपकारः॥वचसोनिर्देशार्थंतद्दर्शमाह॥हेनृपनिष्किंचनानांयद्धनंविदुः
येनतपोधनाइतिप्रसिद्धाः॥तच्चद्विर्गदितं॥तपतपेतिलोकेमध्यमपुरुषैकवचनंतस्यवी

६

भा॰
द्वि॰
२०

परस्य नभसः कारणत्वेनान्वयात् ॥ शब्दवांश्च वायुः तस्यैव बलस्वरूपं प्राणो देहधारणं ॥ ओजः सहो बलानि इंद्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥२६॥ स्वतो रूपवत्तेजः वायुनभसोः कारणभूतयोरन्वयात् स्पर्शशब्दवत् ॥ एवमंभसः पृथिव्याश्च परान्वयाधिक्यात् ॥२७॥ घोषः शब्दः ॥२८॥ विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यं ॥२९॥ मनः साहंकारं तदधिष्ठाता चंद्रोपींद्रादयः अन्ये च देवाः दश वैकारिकाः सात्विकाहंकारकार्याः ॥ नानादिग्वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पंच श्रोत्रत्वक्

नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः ॥ परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं ॥२६॥ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥२७॥ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकं ॥ रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् ॥२८॥ विशेषस्तु विकुर्वाणादंभसो गंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥२९॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोऽश्विवह्नींद्रोपेंद्रमित्रकाः ॥३०॥ तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ ॥ श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ॥३१॥

चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वह्निश्च इंद्रश्च उपेंद्रश्च ॥ मित्रश्च कश्च प्रजापतिः ॥ एते च पंच वाक्पाणिपादपायूपस्थानामधिष्ठातारः ॥३०॥ यतो ज्ञानशक्तिः बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहंकारकार्यौ ॥ अतो ज्ञानक्रियाविशेषरूपाणि इंद्रियाण्यपि तैजसादभवन् ॥ इत्यर्थः ॥ तान्याह ॥ श्रोत्रमिति दोःपाणिः मेढ्रमुपस्थः क्रमोऽत्र न विवक्षितः ॥ एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह ॥ ३१॥

कालमिति ॥ कर्म जीवादृष्टं विबुभूषुः विविधं भवितुमिच्छन् ॥२१॥ गुणानां व्यतिकरः क्षोभः स्वभावतः परिणामो रूपान्तरापत्तिः पुरुष ईश्वरस्तेनाधिष्ठितत्वं त्रयाणां विशेषणं ॥२२॥ महतस्तु महत्तत्त्वाद्विकुर्वाणात् विक्रियमाणात् ॥ तस्य च क्रियाज्ञानशक्तित्वात् ॥ त्रिगुणत्वेऽपि रजःसत्त्वाभ्यामुपबृंहितत्वं ॥ अहंकारस्यावरकत्वात्तमःप्रधानत्वम् अत एवाहंकारकार्येषु तामसांशाधिक्यमाकाशादिष्व[illegible] सात्त्विकं चाल्पं ॥ एवं तदुपाधिकेषु जीवेष्वपि तथैव तामसाधिक्यं ॥२३॥ स च विकुर्वन् ॥ रूपान्तरं गच्छन् ॥ त्रैविध्यमेवाह वैकारिकः सात्त्विकः तैजसो राजसः यद्भिदा यस्य भे-

कालं कर्म स्वभावं च मायेशो मायया स्वया ॥ आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥२१॥
कालाद्गुणव्यतिकरः परिणामः स्वभावतः ॥ कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥
महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् ॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥२३॥
सोऽहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा ॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥२४॥
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ तामसादपि भूतादेर्विकुर्वाणादभून्नभः ॥२५॥
तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः ॥२६॥

दाः ॥ द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि ॥ द्रव्येषु महाभूतेषु शक्तिर्यस्य क्रियासु ॥ इंद्रियेषु शक्तिर्यस्य ॥ ज्ञाने देवेषु शक्तिर्यस्य ॥ हे प्रभो बोधुंशाक ॥२४॥ भूतादेरिति तामसस्य विशेषणं ॥ न त्र तामसात्स्वगुणमेव शब्दो भवतीति प्रसिद्धं ॥ सत्यं सत् तस्य नभसो मात्रा सूक्ष्मं रूपं ॥ गुणः असाधारणः ॥ व्यावर्तको धर्मः शब्दद्वारा नभस्त्वं [illegible] ॥ एवमेव सर्वेषां द्रष्टव्यं ॥ शब्दस्य लक्षणं लिंगमिति ॥ [illegible] न केनचिद्दैवं नो गतः [illegible] द्रष्टा [illegible] तेन द्रष्टा [illegible] ॥ तयोर्लिंगं बोधकं लिंगविशेषणत्वात् ॥ यत्र

नारायणः परं कारणं येषां ते॥ अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तं॥ देवाश्च त
देहाज्जाताः अतो न तद्व्यतिरिक्ताः लोकाः स्वर्गादयः तदानंदांशाः मखास्तत्साधनभूताः योगः प्राणायामा
दिः॥ तपस्तत्साध्यं॥ चित्तैकाग्र्यं ज्ञानं॥ तत्साध्या गतिस्तत्फलम् अनेनैव सर्वं तदधीनमित्युक्तं॥१६॥ नहि
किं करोषीत्यपेक्षायामाह॥ तस्य सृज्यमपि तेन सृष्टोऽहं सृजामि॥ ईक्षया कटाक्षेण तत्र हेतवः द्रष्टुरित्याद
यः॥१७॥ ननु कुतोऽयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः स च प्रेरकः स्यादित्यपेक्षायां॥ जीवेश्वरविभागहेतुमा
ह त्रिभिः सत्त्वमिति॥ निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नंतीत्युत्तरेणान्वयः कथंभूतास्तेनैव स्वातंत्र्ये

नारायणपरा वेदा देवा नारायणांगजाः॥ नारायणपरा लोका नारायणपरा मखाः॥१५॥ ना
रायणपरो योगो नारायणपरं तपः॥ नारायणपरं ज्ञानं नारायणपरा गतिः॥१६॥ तस्या
पि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः॥ सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः॥१७॥
सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः॥ स्थितिसर्गनिरोधेषु गृहीता मायया विभोः॥१८॥
कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः॥ बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः॥१९॥
स एष भगवाँल्लिंगैस्त्रिभिरेभिरधोक्षजः॥ स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः॥२०॥

णस्थित्याद्यर्थं मायया गृहीताः वस्तुतः सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं॥ जीवं बध्नंति क
कार्यमधिभूतं कारणमध्यात्मकं कर्त्ता अधिदैवतं तेषां भावस्तत्त्वं॥ तस्मिन्द्रव्यभूतानि ज्ञानशब्दे
न देवताः क्रियाणि तदाश्रयास्तेषां कारणभूताः तत्तदभिमानेन बध्नंति॥१९॥ अतः स एव ब्रह्ममायः
पभिन्नो लिंगैः जीवानामावरकैरुपाधिभिः॥ स्वलक्षितागतिस्तत्त्वं यस्य सः स्वैर्भक्तैरेव लक्षि
तागतिर्यस्येति वा तस्य स्वरूपप्रकारमाह॥२०॥ ॥

येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि तदेवाभिव्यक्तं करोमि ॥ यथार्कादयश्चैतन्यप्रका
शमेव प्रकाशयंति ॥ तथा च श्रुतिः ॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः तमे
व भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति ॥ ११ ॥ तस्मै नमो धीमहि ॥ यस्य मायया मोहिता
संतो मां गुरुं जगद्गुरुं जगत्कर्तारं वदंति तस्मै ॥ १२ ॥ यन्मायया येति ॥ मायासंबंधो मे कस्तस्याद्दुर्नेय
त्वात्केचन ॥ तस्यापि किं माहात्म्यं संसारं नैवेत्याह ॥ मत्कपटमसौ जानातीति यद्दृष्टिपथे स्थातुं विलज्ज
मानयैवेतस्मिन् ॥ स्वकार्यमकुर्वंत्या अमुया मायया विमोहिता असदादयो दुर्धियः प्रवियाहन

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं ॥ यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥ ११ ॥
तस्मै नमो भगवते वासुदेवाय धीमहि ॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं ॥ १२ ॥ वि
लज्जमानया यस्य स्थातुमीक्षापथेऽमुया ॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः ॥ १३
द्रव्यं कर्म्म च कालश्च स्वभावो जीव एव च ॥ वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥ १४

तानाप्येव केवलं विकत्थंते श्लाघंते ॥ अनेन यदुक्तमित्यस्य प्रश्नोत्तरमुक्तं भवति ॥ १३ ॥ तदेवं स्वस्या
दृश्य परमेश्वरं निरूप्येदानीं यदुक्तं यदधिष्ठानमित्यादि नव प्रश्नानां स्वरूपं वाधिष्ठानादिकं ॥ सर्वं भिन्न
नेवं वस्तु तद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति ॥ द्रव्यं महाभूतानि ॥ उपादानरूपाणि ॥ कर्म
जन्मनिमित्तं ॥ कालस्तत्क्षोभकः ॥ स्वभावस्तत्परिणामहेतुः ॥ जीवो भोक्ता ॥ वासुदेवादन्यो
र्थो नास्ति ॥ कारणाव्यतिरेकात्कार्यस्य तत्पंचयनिदाम्याम ॥ १४ ॥

भा० द्वि० २५

तस्मादहं तस्मिन् परस्तत्त्वं मे ब्रूहि परमं यत्सत्यं मन्यसे च तत्रापि नाम मम त्वत्तो हिरण्यगर्भादिभिर्दत्तादिगुणः श्रुत्वा त्वादिते भोग्यं साध्यं तत्रापि सदसत् स्थूलं सूक्ष्मं वा किंचिदन्यतो न वेद ॥ किं तत्त्वं तत्र एव सर्वं वै भवतीति मन्ये सत्तया वियोगोपि भवान् ॥ तपो घोरं दितियत ॥ तेन नः अस्मान् खेदयसे मोहयसि ॥ यतः परां शंकां मीश्वरान्तरशंकां प्रयच्छसि ॥ यथैवाहं त्वया अनुशासितः शिक्षितः सन् बुध्ये बुध्ये तथा विशेषेण विज्ञापय ॥ प्रश्नमभिनंदयति ॥ हे वत्स एव तवेदं विचिकित्सितं संदेहः तत्सर्वं कः प्रश्नोयं सम्यगित्यर्थः यतः का

नाहं वेद परं ह्यस्मिन्नापरं न समं विभो ॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ॥ ६ ॥ स भवानचरद्घोरं यत्तपः सुसमाहितः ॥ तेन खेदयसे नस्त्वं परां शंकां च यच्छसि ॥ ७ ॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ॥ विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितम् ॥ यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ९ ॥ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः ॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥

रुणिकस्य तवायं प्रश्नः अत्र हेतुः यद्यतः परमयं भगवद्वीर्यप्रकाशने प्रवर्तितोस्मि ॥ अनृतं त्वेतिता त्वरपि मविद्धपामे कृतवानित्यर्थः ॥ न तु त्वमेव भगवानित्युक्तं त्वया ॥ एकः सृजसि भूतानीत्यादिना मतेषयामामीश्वरत्वेन प्रभाषसे ॥ तदपि तव भाषितं नासत्यं न मम स्वतंत्रमनः कारणात् ॥ एतावत्स्वभाव स्वभावः यत्त्वाचत्वं मे अस्ति किं तु मत्तः परमेश्वरमविज्ञाय ॥ कृपेश्वरतः स्पष्टं प्रज्ञानं ते वयं भोतिं ॥ न तु बुद्धिपूर्वमनृतमित्यर्थः यतः ईश्वरात्मम ॥ यत एतावत्त्वं मदविज्ञायेति वान्वयः तर्हि कोसावीश्वरस्तत्राह

पंचमेनारदेनापृष्टः स्वप्नादिवत्सानं ॥ हृदे स्त्री लीला विग्रह दृष्टिं काल कर्मादिशक्तिभिः ॥ नारदोपविष्टस्ते
वेदान्तमभ्यपादित्युक्तं तत्र नारदः प्रश्नमाह ॥ देवदेवेति ॥ हे भूतभावन ॥ अतएव सर्वेषां पूर्वज ॥ अनादे
ज्ञानयतेनेनेतिज्ञानं ॥ तत्साधनं यत हि ज्ञानीद्रिविशेषेण ज्ञापयेत्यर्थः कथं भूतमात्मतत्त्वनितरां दृश्य
ते येन तत् ॥ उपलक्षणमेतत् ॥ विश्वमेवात्मज्ञानसाधनं ॥ अतस्तद्विशेषं पृच्छति ॥ यद्रूपं येन रूपेणेश्व
कार्यपते पद्धिष्ठानं यदाश्रयं यतः येन सृष्टं यत्संस्थं यस्मिन् लीयते यत्परं यदधीनं यच्चैव विषदात्मकं स्व
तः सत्कारणं तोवेत्यर्थः ॥ तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद ॥ २ ॥ न जानामीति न वक्तव्यमित्याह ॥ सर्वमिति

नारद उवाच ॥ देवदेव नमस्तेस्तु भूतभावन पूर्वज ॥ तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं
१ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥ स
र्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३ ॥ यद्वि
ज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ॥ एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥ आ
त्मन्भावयसे तानि न पराभावयन्स्वयं ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥

भूतं ज्ञातं भवत्यं जनिष्यमाणं भवज्जायमानं तेषां प्रभुर्यतः अतः विशिष्टेन ज्ञानेनावसितं निश्चितं
आत्मानमिदमादौ ज्ञानवतामेव कथयेत्याह ॥ यज्ज्ञो विज्ञानं यस्य कस्य वा विज्ञानदत्यर्थः ॥ यदाधारः कस्य
वाश्रयः यत्परो यदधीनः यदात्मकः यत्स्वरूपः ॥ त्वमतत्त्वमेव स्वतंत्रः परमेश्वर इति बुद्धिं तव न प
श्यामो नन्वहं परं कंचन पृच्छामीत्याह सार्धेस्त्रिभिः ॥ एकः असहायः आत्मनि भावयसे पालयसि
स्वयमेव पराभवं प्राप्नुवन् ॥ अक्लमः श्रमरहितः यथोर्णनाभिरात्मनएव शक्तिमवष्टभ्य सृजति
तद्वत् ॥ ५ ॥

किंच पुराकल्पादौ अजस्य हृदि सतीं स्मृतिं विषयां स्मृतिं वितन्वता येन प्रचोदिता सती तस्य मुखतः किल प्रादुर्भूता सा अखिलत्वलक्षणानि शिक्षादियुक्तानि यस्याः सा स ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः॥२२॥ इदानीं स्ववाचं श्रोतृजनाह्लादिनीं शृंगारकरुणादिशोभां प्रार्थयते भूतैरिति स मेव वचांसि अलंकृषीष्टः अलंकरोतु॥ अमस्य वचसा मन्येनालंकारासंभवमाशंक्य तस्यानंतयोमितामाविष्करोति॥ यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु तेनयामित या शेते वसति॥ अत्र पुरुषसमाख्यां प्रमाणयति॥ यश्च स्यात् पुरुष इति॥ अतएव

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां॥२२॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः॥ भुंक्ते गुणान्षोडश षोडशात्मकः सोलंकृषीष्ट भगवान्वचांसि मे॥२३॥ नमस्तस्मै भगवते वासुदेवाय वेधसे॥ पपुर्ज्ञानमयं सौम्या यन्मुखांबुरुहासवम्॥२४॥ एतदेवात्मभू राजन्नारदाय विपृच्छते॥ वेदगर्भोभ्यधात्साक्षाद्यदाह हरिरात्मनः॥२५॥ इति श्रीभागवते द्वितीयस्कंधे चतुर्थोध्यायः॥४॥

यः एकादशेंद्रियपंचभूतरूपान्॥ षोडशगुणान् कलाः भुंक्ते प्रकाशयति तत्पालयतीति वा॥ तदात्मा॥ त्मने परमार्थमुत्रहेतः यतः षोडशात्मा मात्मा चेतयितार्थकः॥ नन्व अजीवस्तु उच्यते प्रार्थना विरोधात्॥२३॥ श्रीव्यासं नमस्करोति॥ सौम्या भक्ताः यस्य मुखांबुरुहे॥ आसवो मकरंदस्तं॥२४॥ इदानीमस्य श्रोतरंपराप्राप्तस्य नारदसंवादं प्रस्तौति॥ एतदिति॥ उत्पत्तिसमय एव वेदगर्भे यत्ससाक्षात्॥ हरिरिति दार
२५॥ इति द्वितीयस्कंधे टीकायां चतुर्थोध्यायः॥ ४॥

भक्तिमुख्यानां सर्वसाधनवैफल्यं दर्शयन्नमति ॥ तपस्विन इति ॥ मनस्विनो योगिनः सुमंगलाः सदाचाराः यशस्विनः ॥ तपआद्यर्पणं विना सुभद्रश्रवसे इत्यस्याहृतिर्यशःश्रवणादेः प्राधान्यसूचनाय भक्तैः परममुदितेन त्वेद्गीयमानत्वात् ॥ किरातादयो ये पापजातयः ॥ अन्ये च ये कर्मतः पापरूपाः ॥ यदपाश्रया भागवताः तदाश्रयाः संतः शुद्ध्यंति ॥ असंभावनाशंकां परिहरति प्रभविष्णवे प्रभवनशीलायेति ॥ १८ ॥ सर्वोपास्यमनुस्मरन्नाशंसते ॥ स एष आत्मवतां धीराणां आत्मा आत्मत्वेनोपास्यः समर्थः ॥ त्रयीमयत्वादिति विशेषणैः

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः ॥ क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥ किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खशादयः ॥ येऽन्ये च पापा यदपाश्रयाश्रयाः शुद्ध्यंति तस्मै प्रभविष्णवे नमः ॥ १८ ॥ स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां ॥ १९ ॥ श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ॥ पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतां पतिः ॥ २० ॥ यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति हि तत्वमात्मनः ॥ वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां ॥ २१ ॥

तत्र मार्गेणोपासनं विवृणोति ॥ गतव्यलीकैर्निष्कपटैर्भक्तैः ॥ वितर्क्यमनुसंधेयं ध्यानविषयं लिंगं स्वरूपं यस्य स प्रसीदतु सर्वपालकत्वमनुस्मरन्नाह ॥ श्रियः इति ॥ २० ॥ सर्वोपास्यत्वं ॥ २ ॥ ज्ञानप्रदत्वमनुस्मरन्नाह द्वाभ्यां ॥ यदंघ्र्योरनुध्यानमेव समाधिस्तेन धौतया शोधितया यथारुचं रुच्यनुसारेण सगुणनिर्गुणादिभेदैः यद्वा रुचं प्रतिभा यथा स्वतीत्यर्थः ॥ २२ ॥

भूयः पुनश्च नमः सतां यमेवं वृजिनं हरति न छिदे दुःखहर्त्रे असतामयमेषीलानामसंभवायातुद्भवहेत
वे अखिलसत्वमूर्त्तये येन तदेवादिरूपेणानमलदायेत्यर्थः॥ समग्रसत्वमूर्त्तये इति वा पुनरपि द्वयोरुभयवैलक्षण्य
माह पारमहंस्यप्रत्यक्तिरूपे आश्रमे अवस्थितानां पुंसामनुमृग्यमात्रविस्मतेन पुनः पुनर्नमः स्वयंप्रदात्मनस्तदे
नमस्तदास्तदृदेशे॥१३॥ सात्वतां भक्तानामृषभाय पालकाय॥ कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिशापि
यस्य दुर्लभायेत्यर्थः॥ न देववैषम्यप्रतीतावपि निर्दोषत्वायाचिन्त्यमैश्वर्यमाह॥ निरस्तसाम्यमतिशय

भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्वमूर्त्तये॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थि
तानामनुमृग्यदाशुषे॥१३॥ नमो नमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्त
साम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः॥१४॥ यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वं
दनं यच्छ्रवणं यदर्हणं॥ लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः॥१५॥ विचक्ष
णा यच्चरणोपसादनात्संगं व्युदस्योभयतोंतरात्मनः॥ विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्र
श्रवसे नमो नमः॥१६॥

श्रियस्य यद्वैदग्ध्यात्सम्यक् साम्यमतिशयश्च नास्ति तेन राधसैश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि र-
ममाणाय॥१४॥ सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन् प्रणमति यत्कीर्तनमिति द्वाभ्यां॥ अर्हणं पू
जनं तस्मै सुभद्रं मंगलं श्रवो यशो यस्य तस्मै॥१५॥ विचक्षणा विवेकिनः॥ यस्य चरणयोरुपसादनात्॥ उभ
यतोंतर्भजनात्॥ अंतरात्मनो मनसः उभयत्र इह च परत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः॥१६

पुनश्च वेदितुमिच्छामि इदं दुर्विभाव्यमवितर्क्यं विश्वं यथा सृजति ॥ ७ ॥ गोपायति पालयति संयच्छते संहरति ॥ पुरुशक्तिर्बहुशक्तिमान् ॥ आत्मानं ब्रह्मादिरूपिणं क्रीडयन् ॥ विकरोति ॥ विविधं करोति ॥ ८ ॥ एकं पुरुषरूपेण गुणान् जन्मभिः ब्रह्माद्यवतारैः क्रमशो वा युगपद्वा प्रकृतेर्गुणान् गृह्णाति ॥ १० ॥ विविकित्सितं संदिग्धं शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिंश्च भवेन ॥ ११ ॥ उपामन्त्रितः प्रार्थितः उपचक्रमे देवतानु

भूय एव विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ७ ॥ यथा गोपायति विभुर्यथा संयच्छते पुनः ॥ यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ ८ ॥ आत्मानं क्रीडयन्क्रीडन्करोति विकरोति च ॥ नूनं भगवतो ब्रह्मन्हरेरद्भुतकर्मणः ॥ दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितं ॥ ९ ॥ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा ॥ बिभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः ॥ १० ॥ विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा ॥ शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ॥ ११ ॥ सूत उवाच ॥ इत्युपामन्त्रितो राज्ञा गुणानुकथने हरिः ॥ हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ १२ ॥ श्रीशुक उवाच ॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ॥ गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १३ ॥

एवं नमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ तदेवाह त्रयोदशभिः ॥ १२ ॥ परस्मै सर्वोत्तमाय ॥ तत्र हेतुः भूयसे पूर्णाय परिमितमहिम्ने तद्दर्शयति ॥ स तु सम्यगुद्भवादिभिर्निमित्तभूताभिर्लीलाभिर्गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रयं येन तस्मै अन्तर्भवाय ॥ अन्तर्यामिने ॥ अत एव सर्वैरनवगतत्वादनुपलक्ष्यं वर्त्म यस्य ॥ विचित्रफलदातृत्वमुक्तं स्मरन् ॥ प्रणमति ॥ १३ ॥

अश्मवत्सारो बलं काठिन्यं यस्य॥ विक्रियालक्षणमाह॥ अथेति॥ गात्ररुहेषु रोमसु हर्षः हर्षोद्गमः यस्मा
द्भक्तस्य सर्वमेतत्स्यात्॥२४॥ मनसोनुकूलं प्रियं च कथय॥ अथातः साधु पृष्टः सन्॥ वैयासकिर्यदात्मवि
द्यां यदाह॥ तदभिधेहीति॥२५॥ इति श्रीभावार्थदीपिकायां द्वितीयस्कंधे तृतीयोध्यायः॥३॥ चतुर्थे परीक्षिता
पृष्टस्सृष्ट्यादि हरिचेष्टितम्॥ शुकेन ब्रह्मनारदसंवादेनोपवर्ण्यते॥ राज्ञः प्रश्नं कथयितुं प्राक्तनीं स्थिति

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः॥ न विक्रियेताथ यदा विकारो नेत्रे जलं गात्र
रुहेषु हर्षः॥२४॥ अथाभिधेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः॥ यदाह वैयासकिरात्मवि
द्याविशारदो नृपतिं साधु पृष्टः॥२५॥ इति श्रीभागवते द्वितीयस्कंधे तृतीयोध्यायः॥३॥ सूत उवाच
वैयासकेरिति वचस्तत्वनिश्चयमात्मनः॥ उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात्॥१॥ आत्मजाया
सुतागारपशुद्रविणबंधुषु॥ राज्ये चाविकले नित्यं विरूढां ममतां जहौ॥२॥ पप्रच्छ चेममेवा
र्थं यन्मां पृच्छथ सत्तमाः॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः॥३॥ संस्थां विज्ञाय संन्यस्य
कर्म त्रैवर्गिकं च यत्॥ वासुदेवे भगवति आत्मभावं दृढं गतः॥४॥ राजोवाच॥ समीचीनं वचो ब्र
ह्मन्सर्वज्ञस्य तवानघ॥ तमो विशीर्यते मह्यं हरेः कथयतः कथाम्॥५॥

माह चतुर्भिः॥ वैयासकेः शुकस्येति एवमुक्तमात्मनस्तत्वस्य निश्चयो यस्मात्॥ तद्वचः उपधार्य कृ
ष्णे सतीं कृष्णैकसेवो नान्य इत्येवंभूताम्॥१॥ आत्मा देहः पश्वादो गजादयः॥२॥ इममेवार्थं हरि
लीलालक्षणं॥३॥ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं॥ संन्यस्य त्यक्त्वा आत्मभावं परप्रेमाणं
भगवदात्मतां गतः प्राप्त इत्यस्य प्रश्नः॥४॥ मह्यं मम नश्यः अज्ञानं नश्यति॥ तव कथयतः सतः अतः
समीचीनं॥५॥

नतु नेयोनिः स्यासोनास्ति ॥ नहि भस्त्राः चर्मकोषाः न तु तासामासारादिकं नास्ति तत्राह ॥ नखाद्वंतिनाश्रे
तिन मेहेति ॥ रेतः सेकं मेश्चनेन कुर्वंति ॥ किं तत्पिनराकारेण श्वे मत्वाह ॥ अपरे इति ॥ १९ ॥ स्याद्रिभिः स
त्वनः स्मृष्टयोनिः दूषितः यस्य कर्णपथे कदाचिदपि नागतः सः अवक्ता स्यदत्वात ॥ स्वाभिः ऊसित विष
यासक्तत्वाद्दिहूगाहे श्रीमस्तकैः कंटकवत ॥ दुःखदविषयासक्तत्वात ॥ गहे श्रीरवाहत्वात्त्वैरसत्वस
इमथ्यैः ॥ २० ॥ नसांगानि च निष्फलानीत्याह ॥ विलेइति पंचभिः ॥ वनेति खेदेनि न स्पृएव तेन रस्य पेक

नरवः किं न नीवंति भस्त्राः किं न श्वसंत्युत ॥ नखाद्वंतिन मेहंति किं ग्रामपशवोपरे ॥ १९ ॥ स्वविड्
गहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ॥ नयत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ २० ॥ बिले वतोरु
क्रमविक्रमान्ये न स्पृण्वतः कर्णपुटे नरस्य ॥ जिह्वासती दार्दुरिकेव सूतनचोपगायत्युरुगा
यगाथा ॥ २१ ॥ भारः परंपट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदं ॥ शावौ करौ नो कुरुतः स
पर्यां हरेर्लसत्कांचनकंकणौ वा ॥ २२ ॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो
ये ॥ पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २३ ॥ जीवच्छवो भागवतांघ्रिरे
णुं न जातु मर्त्योभिलभेत यस्तु ॥ श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसन्छवो यस्तु न वेद गंधं ॥ २४ ॥

श्रोपुटे तेन विले इत्याह श्रेयहे ॥ न चेदुपगायति ॥ तस्य जिह्वा असती दार्दुरी भेकः ॥ नदी वा जिह्वेव
२१ ॥ पट्टवस्त्रैः सौष्ठवा किरीटे न च जुष्टमपि शिरो यदि न नमेत ॥ नहि केवलं भार एव शावौ मृतकं न
त्कर एव लसती कांचनकंकणाय यो ते ॥ अपर्याय वा पाठः ॥ २२ ॥ ये नयने विष्णोर्मूर्तीर्न निरीक्षते
ते बर्हायिते मयूरपिच्छतुल्ये ॥ द्रुमवज्जन्म भजन इति ॥ तथा स्वत्व तन्व्या विपर्ययः ॥ २३ ॥ नाभिलभेत य
भिलोन स्पृशेत ॥ नधारयेत ॥ श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः ॥ न वेदेति ॥ अवघ्राय नाभिनंदे

भा॰
द्वि॰
११

यत्तया श्रवणकथासक्तानां भवति कीदृशं ज्ञानं सर्वतः प्रतिनिवृत्तं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मा
त्तत् ॥ उतानंतरं तद्देव आत्मप्रसादश्च यत्र यास्मनः प्रसादहेतुः गुणेषु विषयेष्वसंगो वैराग्यं
वा ॥ अथ यद्वेति पाठे इहात्र च गुणेष्वसंगः कैवल्यमिति सम्मतः ॥ पंथा भक्तियोगः निर्वृतः श्रव
णसुखेन अन्यत्रानिर्वृत इति वा ॥ तासु हरिकथासु को रतिं न कुर्यात् ॥ ११ ॥ अभिव्याहृतं पुत्रकं ऋषिं
परब्रह्मदर्शनेन कविं शास्त्रज्ञं वैयासिं निशाम्य ॥ १२ ॥ श्रवणेच्छायां हेतुः हरिकथैवोदर्के उत्तरफले या

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्वथ
भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ १२ ॥ शौनक उवाच ॥ इत्यभिव्याहृतं राजा नि
शम्य भरतर्षभः ॥ किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविं ॥ १३ ॥ एतच्छुश्रूषतां विद्वन्सूत
नोर्हसि भाषितुं ॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥ स वै भागवतो राजा पां
डवेयो महारथः ॥ बालक्रीडनकैः क्रीडन्कृष्णक्रीडां य आददे ॥ १५ ॥ वैयासकिश्च भगवान्वा
सुदेवपरायणः ॥ उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥ १६ ॥ आयुर्हरति वै पुंसामुद्य
न्नस्तं च यन्नसौ ॥ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥ १७ ॥

सतां कथाः सतां भागवतानां सदसि समायां स्युः ॥ १४ ॥ एतत्प्रपंचयति स वा इति द्वाभ्यां कृष्णस्य
लीलादिरूपां क्रीडां यः स्वीकृतवान् ॥ १५ ॥ उरुगायस्य गुणैरुदाराः महत्यः कथाः स्युः ॥ १६ ॥ किं च हृदये
वली यमानामायुः हरिकथया सफलं कर्तव्यं प्रायेणाह त्रिभिः ॥ आयुः असौ सूर्यः उद्यन्नस्तं च यन्
ग्रस्तमदर्शनेनैव यत्नाक्रमतः येन तत् क्षणो नीतः ॥ तस्यायुः ऋते वर्जयित्वा हरत्येव हरति ॥ न तु जीवनमेव

नेत्रकथुघः फलमस्त्विनार नारदक्ति १२
११

यज्ञं यज्ञोपाधिं विष्णुं कोशो धनसंचयः वसुकामस्त्वत्र धनमात्रमिति भेदः दांपत्यमन्योन्यप्रीतिः
न देवा यो यस्यतः ॥७॥ धर्मार्थः धर्मकामः उत्तमश्लोकोपाधिं विष्णुं तंतुं तन्वन् संतानवृद्धिमन्वि
च्छन् ॥ रक्षां बाधानिवृत्तिः तत्कामः पुण्यजनान् ॥ यक्षान् ॥ ओजो बलं तत्कामः मरुद्गणान् देवान् ८
राज्यं राज्यत्वं तत्कामो मनून्देवान् ॥ मन्वन्तरपालान् ॥ राज्ञः कर्म राज्यं ॥ तत्कामो विश्वान्देवानिति विवि
रोधः अभिचरन् शत्रुमरणमिच्छन् ॥ निर्ऋतिं राक्षसं कामकामः भोगेच्छुः अकामः वैराग्यक

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं ॥ विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ॥७॥
धर्मार्थ उत्तमश्लोकं तंतुं तन्वन्पितॄन्यजेत् ॥ रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान्
८॥ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत् कामकामो यजेत्सोमम् अकामः पुरुषं परं ॥९॥
अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥१०॥
एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥११॥

मः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरम् ॥९॥ अकामः एकांतभक्तः ॥ उक्तानुक्तसर्वकामो
वा पुरुषं पूर्णं निरुपाधिं ॥१०॥ पूर्वोक्तनानादेवतायजनस्यापि संयोग एव यत्कृतेन भक्तियोगफ
लमाह ॥ एतावानिति ॥ इंद्रादीनामपि यजतामिह ॥ तत्तद्यजनेन भागवतानां संगतो भगवा-
त्यचलो भावो भक्तिर्भवति ॥ यत् ॥ एतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयो लाभं
प्रत्यन्नसर्वं तत्फलमित्यर्थः ॥ भागवतसंगतस्त्वनेन सूचितो हरिकथारतिं तोनित्यानमिति ॥११

कामफलप्राप्त्यर्थमन्येषां देवानां भजनमाह २

तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं स्वल्पोच्यते॥ भक्त्याद्येकेन तत्कर्मश्रवणादर ईर्यते॥ इदानीमन्यदेवताभजनस्यापि प्रसङ्गादभिधानमनन्यदेवताभजनफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति॥ एवमिति मम त्वं मां कदाचिद्दैवयोगेन मच्चेष्टनं यन्मनुष्येषु मनीषिणस्तेषां तत्रापि ये म्रियमाणास्तेषां विशेषतः॥ एवमेतद्धरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ब्रह्मणस्पतिं वेदपतिं ब्रह्मा

शुकउवाच॥ एवमेतन्निगदितं पृष्टवान्यद्भवान्मम॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां॥१॥ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं॥ इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन्॥२॥ देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं॥ वसुकामो वसून्रुद्रान्वीर्यकामोथ वीर्यवान्॥३॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामोदितेः सुतान्॥ विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशां॥४॥ आयुष्कामोश्विनौ देवौ पुष्टिकाम इलां यजेत्॥ प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ॥५॥ रूपाभिकामो गंधर्वान्स्त्रीकामोप्सरउर्वशीं॥ आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम्॥६

णं इंद्रियपाटवकामस्तु इंद्रं प्रजापतीन्दक्षादीन्॥ मायां दुर्गां॥ विभावसुमग्निं॥ वसुकामो धनार्थी वीर्यं प्रभावः तत्कामो वीर्यवान्सन् रुद्रान्यजेत अन्नाद्यं भोज्यं भक्ष्यं च अदितेः सुतान्द्वादशादित्यान्॥ विशां देशस्य प्रजानां स्वाधीनतामिच्छन्॥ साध्यान्॥ यजेत॥ इला पृथ्वी प्रतिष्ठा स्थानादरप्रवृत्तिः रोदसी द्यावाभूमी॥ अप्सरसामुर्वशीं चतामुपरमेष्ठिनं ब्रह्माणम्॥६॥ ॥

संसृतिं संसरतः पुंसो बहवो मोक्षमार्गाः तपोयोगादयः समीचीनत्वमेवास्याह ॥ नहीति ॥ यतोनुष्ठिताद्भ
क्तियोगो भवेत् ॥ अतोन्यः सर्वदुःखरूपो निर्विघ्नश्च नास्त्येव ॥ ३३ ॥ उक्तमर्थं तत्र प्रमाणमाह ॥ भगवान् ॥ ब्रह्मा कूटस्थः
निर्विकारः एकाग्रचित्तः सन् त्रिरावर्त्य ॥ त्रिः त्रिवारान् ॥ कार्त्स्न्येन साकल्येन ब्रह्म वेदं अन्वीक्ष्य विचार्य य
त आत्मनि हरौ रतिर्भवति ॥ तदेव मनीषया अध्यवस्यत् निश्चितवान् ॥ ३४ ॥ ननु भूतेषु रतिर्भ
वति ॥ अननुभूते भगवति कथं रतिः स्यात् तत्राह ॥ भगवान् ॥ लक्षितः दृष्टः कथं स्वात्मना द्रष्टा
न योग्यनुमापकैर्दृश्यैर्बुद्ध्यादिभिः ॥ तदेव हेतुत्वाद्दर्शयति ॥ दृश्यत्वेनोद्दर्शनं स्वप्रकाशद्रष्टारं विनान

न ह्यतोन्यः शिवः पंथा विशतः संसृताविह ॥ वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३३ ॥ भ
गवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ॥ तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥ ३४ ॥ भग
वान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३५ ॥ तस्मात्स
र्वात्मना राजन्हरिः सर्वत्र सर्वदा ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ३६ ॥ पिबंति
ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं ॥ पुनंति ते विषयविदूषिताशयं
व्रजंति तच्चरणसरोरुहांतिकम् ॥ ३७ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे द्वितीयो
ध्यायः २

घटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाशं तद्योग्यलक्षणैः तथा बुद्ध्यादीनि कर्तृ
प्रयोज्यानि करणत्वाद्वास्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रप्रकर्ता इत्येवमीश्वरसि
द्धिः ॥ ३५ ॥ यस्मादेवमिस्यादि प्रश्नोत्तरमुपसंहरति तस्मादिति ॥ ३६ ॥ श्रवणादिफलमभिनयेना
ह पिबंतीति सतामात्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतं विषयविदूषितं मलिनीकृतमाश
यं पुनंति शोधयंति ॥ तस्य चरणपद्मांतिकं श्रीविष्णुपदं व्रजंतीति ॥ ३७ ॥ इति द्वितीये द्वितीयः २

सयोगी विकार्यं संसाध्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्यो ऽहंकारः स त्रिविधः तामसो राज
सः सात्विकश्चेति ॥ तत्र तामसाद्भूतसूक्ष्माणि जायंते ॥ राजसात् ॥ बहिर्मुखाणि दशेंद्रियाणि सा
त्विकान्मनः इंद्रियदेवताश्चेत्येवं लयश्च तत्तदहंकारेण स विज्ञानतत्त्वं महत्तत्त्वं याति ॥ ततो गुणानां
तत्र भूतसूक्ष्माणामिंद्रियाणां च सन्निकर्षं लयस्थानं तामसं राजसं च मनोमयं देवमयं च सात्विकं
प्राप्य गत्या एवं गमनेनेत्तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति ॥ ततो गुणानां सन्निरोधो लयो
यस्मिंस्तत् ॥ तत्प्रधानं याति ॥ ३० ॥ तेनात्मना प्रधानरूपेणानंदमयः सन् ॥ उपाधीनामवसाने शांतम
विकृतमानंदं परमात्मानमुपैति ॥ न विषज्जते नावर्तते इत्यर्थः ॥ ३१ ॥ सृती मार्गौ प्रकारौ वित्यर्थः हे

**सभूतसूक्ष्मेंद्रियसन्निकर्षं मनोमयं देवमयं विकार्यं ॥ संसाध्य गत्या सह तेन याति विज्ञान
तत्त्वं गुणसन्निरोधम् ॥ ३० ॥ तेनात्मनात्मानमुपैति शांतमानंदमानंदमयो ऽवसाने ॥ एतां ग
तिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंग ॥ ३१ ॥ एते सृती ते नृप वेदगीते त्वयाभिपृष्टे
च सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥ ३२ ॥**

नृप त्वं न पेतः निर्भयमर्थयन् ॥ विस्तरेण रागानतुगतिर्यासद्योमुक्तिः एकास्त्रतिः यदि ब्रह्मयाद्यनित्यादि
नाकमगुक्तिश्च द्वितीया सृतिः ॥ एते सृती वेदे नगीते उक्ते नत्वोन्योक्ति तेन तत्र यथा सर्व प्रश्नेते कामाये
श्च ह रि शिता ॥ प्रथम त्वां मस्तोभवन्नत्र चव्रह्म समन्नूनेरतिः सद्योमुक्तिः नैविव भिसंभवं तीत्यादि
नाकमगुक्तिश्च वेदे नोक्ता ॥ यद्धानकर्मभिःतागतिमा भुवंतीति ॥ द्वितीया मार्गे स्वामयि सृचितत्वाद
तेसृती इति द्विवचनेन त्वयाभिपृष्टे यत्क्रोतन्नमित्यादि प्रश्नेनार्थान्नाकिं विषये हे सृती पृष्टे बृ
हि ॥ एवं हाविपर्ययमिति ॥ द्वितीया मार्गे [illegible] एतेन यापृष्टे ॥ एते सृती नृप वयः ॥ ३२ ॥

तदेवं प्रक्रिया ॥ ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्त्वं भवति ॥ तस्यांशेनाहंकारः तस्यांशे
न शब्दतन्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः ॥ तस्यांशेन रूपतन्मात्रद्वारा तेजः तस्यांशे
न रसतन्मात्रद्वारा पृथ्वी ॥ तैश्च मिलित्वा चतुर्दशभुवनात्मकं विराट्शरीरम् ॥ तस्य पंचाशत्कोटि
योजनविशालस्य ॥ पृथिव्येवांडकटाहविशेषपशाहवाच्याकोटियोजनविशालं प्रथमावरणं पं
चाशत्कोटिविशालमित्येके ॥ तस्य पंचाशत्कोटियोजनविशालस्य ॥ पृथिव्येवांडकटाहविशेषप
शाहवाच्याकोटियोजनविशालं प्रथमावरणं पंचाशत्कोटिविशालमित्येके ॥ ततस्त्वबादीनां
शेषपरिणतोः प्रथमां ॥ तान्येवोत्तरोत्तरदशगुणान्यावरणानि ॥ सृष्टं तन्महदावरणव्यापकमे
व ॥ तदेवं स्थिते ॥ पृथिव्याद्यावरणभेदप्रकारः कथ्यते ॥ ततो विशेषं प्रतिपद्य लिंगदेहेन पृथिव्या

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ॥ ज्योतिर्मयो वायुमुपेत्य काले
वाय्वात्मना खं बृहदात्मलिंगं ॥ २८ ॥ घ्राणेन गंधं रसनेन वै रसं रूपं तद्दृष्ट्या श्वसनं त्वचैव

स्तेनोपाध्येत्यर्थः ॥ एवमुत्तरत्रापि ॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥

दृष्टेवं निर्भयः कथं स्यामीति शंकायामस्तेनेनात्मना पृथिवीरूपेण त्वरितं तत आपः प्रतिपद्य प्र
त्वरन्त्वरामकुर्वन् ॥ तत्तदात्मत्वेन क्लेददाहादिशंकाभावात् ॥ यथेष्टं भोगान् ॥ भुंजानः इत्यर्थः
एवं ज्योतिर्मयः सन् काले भोगावसाने बृहत् ॥ आत्मनो लिंगं परमात्ममूर्तित्वेनोपासने एके
यद्दावेदशाहात्ममूर्तिना तस्य प्रमापकमिति ॥ २८ ॥ इंद्रियार्थानां भूतसूक्ष्माणां चातिक्रममाह
घ्राणेनाधिष्ठितेन गंधमुपेत्य श्वसनेन स्पर्शेन ॥ नभोगुणत्वं शब्दात्मनां प्राणेन तत्कर्मेंद्रियेण
आकूतिं तत्तत्क्रियाम् ॥ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वानंतरावरणभूतमहंकारमात्मन्याम
हरादिश्यामित्याह ॥ २९ ॥

नहिसोःर्वकंविश्वस्यनाभिंसर्योद्याख्यमनं॥प्राविष्टलिंगत्वाच्चाभिप्राहस्यनखेदनं॥प्रतिवर्त्यां
त्रिकस्यपरतः स्वर्शिंगेंगत्वभावादेकएवनिर्मलेनलिंगशरीरेण॥ब्रह्मविदांस्याते॥अत्रैवतेमहू
नेमहर्लोकमुपैति॥यद्यस्मिन्निर्वर्यामहाकल्पायुषोभ्रस्यवाद्यं॥२५॥अथोअनन्तरेकल्पान्तेविश्व
त्रैलोक्यंअनिशयेनदंदह्यमानंनिरीक्ष्य॥ततएकमप्राप्ते॥यद्धिपरार्धस्थायितस्मात्पारमेष्ठ्यंपदंप्रति
निर्याति॥सिद्धेश्वरैर्जुष्टानिधिष्ण्यानिविमानानियस्मिंस्तत्॥उद्भातिप्रेक्ष्यंसर्वविने॥तदेवाहनय
त्रेति॥२६॥आर्तिः दुःखंउद्वेगोभयंकिंतुचित्तदेतोर्यत्न॥दुःखमदः स्यतेनदेकंविनानस्कृतोभव

अथोअनंतस्यमुखानलेनदंदह्यमानंसनिरीक्ष्यविश्वं॥नि
र्यातिसिद्धेश्वरयुष्टधिष्ण्यंयद्वैपरार्ध्यंतदुपारमेष्ठ्यं॥२६॥
नयत्रशोकोनजरानमृत्युर्नार्तिर्नचोद्वेगऋतेकुतश्चित्॥
यच्चित्ततोदःकृपयानिदंविदांदुरंतदुःखप्रभवानुदर्शनात्॥२७

त्ति॥अनिदंविदांइदंभगवत्तोध्यानमजानतांदुरंतदुःखोदयः॥प्रभवोजन्मतस्यानुदर्शनात्॥तेषांकृप
यावृणाचित्ततोदोमनःपीडेति॥यत्तद्विनाकुतश्चिदपियत्रशोकादयोनसंतीति॥नत्रब्रह्मलोके
मनानांत्रिविधागतिः येशुभ्रएपोत्कर्षेणागतास्तेकल्पान्तेशुभ्रएवनारतम्यनाधिकाधिकाभवेति॥ये
तुहिरण्यगर्भोपासनाबलेनगताः तेब्रह्मणासहमुच्यंते॥येतुश्रीभगवदुपासकाः तेस्वेच्छया
ब्रह्मांडंभित्वावैष्णवंपदमारोहंति॥तत्रपक्षतत्रस्यभगवद्दर्शनविष्णोःभेदनप्रकारमाह॥ततरथा

टि॥२॥

यदि त्वं पारमेष्ठ्यं पदं प्रयास्यसि भवति ॥ वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानं कीदृशं अ
ष्टाधिपत्यमष्टानि अणिमाद्यैश्वर्याणि यस्मिन् ॥ तदपि प्रयास्यन् ॥ गुणसन्निवाये गुणसमुदाये ब्र
ह्माण्डे सर्वं त्रैलोक्यं ॥ तर्हि देहत्यागावसरे मनसेन्द्रियाणि च नश्यन्ते ॥ किं तु तैः सहैव तत्र लोके भोगार्थं ग
च्छेत ॥२२॥ एतत्कर्मगतिवद्योगगतिः परिच्छिन्नेत्याह ॥ योगेश्वराणां त्रिलोक्या अन्तर्बहिश्च महर्लो
कादिष्ववस्थानं हृदि गतिमाहुः ॥ अत्र हेतुः पवनस्यान्तः आत्मा लिङ्गशरीरं येषामिति ॥ विद्यातपस
नात योगभगवद्धर्म ॥ योगो हठयोगः समाधिर्ज्ञानं तान् ॥ ये भजन्ति तेषां या गतिः सतां ॥२३॥ तामाह वै

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं ॥ अष्टाधिपत्यं गुणसन्निवाये सहैव
गच्छेन्मनसेन्द्रियैश्च ॥२२॥ योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनां ॥ न
कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजां ॥२३॥ वैश्वानरं याति विहायसा ग
तः सुषुम्नया ब्रह्मपथेन शोचिषा ॥ विधूतकल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमार
म् ॥ तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपैति
कल्पायुषो यद्विबुधा रमन्ते ॥२४॥

स्थानं रमन्ते यत्र ॥ विहायसा आकाशेन तत्र तत्र स्वलोकप
थेन गतः सन् प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति केनोपायेन सुषुम्नया नाड्या सा च दे
हाद्बहिरपि वितता स्तीत्याह ॥ शोचिषा ज्योतिर्मया विधूतं नष्टं कल्कं मलं येन सः कायस
ञ्ज्ञमानन्तर्यं ॥ उदस्तात् उपरिष्टात् ॥ वर्त्मा नेहरेः संबंधि तारारूपं नारायणस्याधिष्ठितं शिंश
र्शः शैशुमारं चक्रं पञ्चमस्कंधे वक्ष्यमाणं ॥ शिशुमाराख्यं ज्योतिश्चक्रं ॥ चक्रस्यास्य ॥ आदि
त्यादिष्वसक्तानामिपदानि प्रयाति तन्नैर्यं ॥२४॥

भा॰
टी॰
७

परमितियद्यस्मात् ॥ अतत् ॥ आत्मव्यतिरिक्तं नेति नेतीत्येवं ॥ उत्सिसृक्षवो दौरात्म्यं देहाद्यभिमानं विसृ
ज्य अर्हं सहजस्य श्रीविष्णोः पदं पदे पदे क्षणे क्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन्सौहृदं येषां तथा
भूताः संतः तद्वैष्णवं पदं ॥ अतत्परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः ॥ १८ ॥ तस्मादिंद्रियजयसाधनेन प्रवृत्तो
मुनिरुपरमेत् ॥ नचाहं न यदि प्रयासं विना विवशमाणानस्कापादि श्रोत्रजः ॥ तमाह ॥ विज्ञायते नेनेति
विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तत्स्य वीर्यं बलं तेन सुरंधिता विहिंसिताः आशया विषयवासनाय
स्य सः ॥ इदानीं तत्स्वदेहत्यागप्रकारमाह ॥ स्वपार्ष्णिना पादमूलेन गुदं मूलाधारं आपीड्य निरुध्य ॥

परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृ
दोपगुह्यार्हपदं पदे पदे ॥ १८ ॥ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः
स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥ १९ ॥ नाभ्यां स्थितं हृद्यधिरो
प्य तस्मादुदानगत्योरसि तं ततो नयेत् ॥ ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्न
येत ॥ २० ॥ तस्माद्भ्रुवोरंतरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः ॥ स्थित्वा मुहूर्तार्धमकुंठदृष्टि

र्निर्भिद्य मूर्धन्विसृजेत्परं गतः ॥ २१ ॥

निलं प्राणं उन्नमयेत् ॥ ऊर्ध्वं नयेत् ॥ जितः क्लमो ये
न षट्सु स्थानेषु नाभ्यादिषु ॥ १९ ॥ नाभ्यां मणिपूरकचक्रे स्थितं मनाहतचक्रे अधिरोप्य उरसि कंठदेशे
देशे स्थिते विशुद्धिचक्रे मनस्वी जितचित्तः स्वतालुमूलं तस्यैव चक्रस्याग्रदेशं ततो बहुधा गमन
संभवाच्छनकैर्विसृजेत् ॥ २० ॥ तस्माद्भ्रुवोरंतरं आज्ञाचक्रे निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं स
प्तायतनानि प्राणमार्गा येन सः ॥ अनपेक्षः स्वर्गादिष्वनिच्छः ततः सन् ॥ मूर्धं निर्भिद्य ब्रह्मरंध्रं निर्भिद्य देह
मिंद्रियाणि च विसृजेत् ॥ सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह ॥ यदीतिदशभिः ॥ २१ ॥ ॥

प्रोग्रेहेयाजन ॥ एवंभूतोयतिर्यदा इमं लोकं ॥ निहासुर्दोत्वमिच्छति ॥ तदादेशे शुभे एते चैव काले चोत तदा यदा दे
मन्त्रो न सज्जयेत ॥ संगं न प्रापयेत ॥ तदेषा कालो योगिनः सिद्धिहेतु ॥ किं तयोगाय वेति हृदनिश्चयो भ
त्वा स्थिरं सुखकरं चासनमास्थितः प्राणं नियच्छेदिन्द्रियः ॥ ५ ॥ एतां बुद्धिं तेजसि बुद्ध्यादिदृष्टिरिति निन
येत प्रविलापयेत ॥ तं चदेतेज्जन्मात्मनि शुद्धे तेचशुद्धात्मा ते ॥ आत्मैवाहमिति ॥ आत्मनि शुद्धे वस्त
नि श्चवस्त्वएकीकृत्य मलञ्जोपशान्तिः प्राप्तनिर्वृतिः सन ॥ कृत्याद्विरमेत ॥ ततः परं प्राप्याभावात ॥ ९

स्थिरं सुखं चासनमाश्रितो यतिर्यदा निहासुरिमं इमं लोकं ॥ काले च देशे च मन्त्रो न सज्जये ।
त्प्राणं नियच्छेन्मनसा जितासुः ॥ ५ ॥ मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्म
नि ॥ आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात ॥ ९ ॥ न यत्र कालो निमि
षां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ॥ न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्प्रधा
नं ॥ १० ॥

तदेवाह ॥ यत्रात्मस्वरूपे कालो न प्रभुः किमपि कर्तुं न समर्थः अतो देवा न प्रभवन्तीत्या
ह ॥ अनिमिषां देवानां परः प्रभुः कालोपि यत्र न प्रभुः ॥ तत्र कुतो नु देवाः प्रभवेयुः देव नियम्या
जगतां प्राणिनां का वार्तेत्याह ॥ जगतामिति ॥ कुतो न प्रभवं तम्यपेता यानि हपायित्वादित्याह ॥ न
यत्रेति ॥ यद्वा जगत्कारणान्यपि तत्र प्रसरन्तीत्याह न यत्रेति विकारो हंकारः ॥ [illegible]
यितं कुतरत्याह ॥ १० ॥

उन्निद्रं विकसितं यत् हृत्पुंडरीकं तस्य कर्णिकैवालयः स्थानं तस्मिन् योगीश्वरैः स्थापितौ पादपल्लवौ यस्य श्रीरे
व लक्ष्म चिह्नं तद्युक्तं पामादिविविहितो मल्लवर्यो येण प्रस्पृष्टः कौस्तुभरत्नं कंधरायां यस्य ॥ अम्लाना लक्ष्मीः
शोभा यस्याः तया वनमालया चितं व्याप्तं ॥ १० ॥ स्निग्धादिविशिष्टैः विरोचमाने स्वानने यो हासः तेन पेशलं
सुंदरं ॥ ११ ॥ अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन् ॥ उल्लसंतो ये भ्रूविक्षेपाः तैः संसूचितो भक्ति
रत्नुग्रहो येन चिंतयाग्राविभं वेत ॥ १२ ॥ अस्यैव ध्यानमाह ॥ एकैकश इति ॥ अत्र भावयेत् ॥ ध्यायेत ॥ पद्य

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरम्
म्लानलक्ष्म्या वनमालया चितं ॥ १० ॥ विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादि
भिः स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ॥ ११ ॥ अदीनलीलाहसितेक्ष
णोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठ
ते ॥ १२ ॥ एकैकशोंऽगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानम
पोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥ १३ ॥ यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्ट
रि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥

जितं मनसा तत्तः स्फुरितं पादगुल्फादि स्थानं तेन त्यक्त्वा यत्समकार परं परं जंघाजान्वादि धारयेत् ॥ शुध्यति
तस्मिंश्चित्तं निर्मला भवति ॥ १३ ॥ एवंभूतवैराग्य धारणया पतद्वारेणागत्य माह यावदिति ॥ परे ब्रह्मादयः
अवरे वयं तस्मात्कुतं ॥ विश्वेश्वरे द्रष्टरि तत्र दृश्यवेचे तन्य वचनत्वात् ॥ भक्तियोगः प्रेमलक्षणः ॥ क्रियावसा
ने आवश्यककर्मानुष्ठानानंतरे ॥ अनेन कर्मापि भक्तियोगपर्यंतमेवेत्युक्तं ॥ एवं तावदासन्नमृत्योः
मुमुक्षोः कृत्यमुक्तं ॥ इदानीं तस्यैव सद्यः देहत्यागमिच्छतः कृत्यमाह ॥ स्थिरमिति सार्धैः चतुर्भिः ॥ १४ ॥

तदा तेन किं कर्तव्यं इत्यत आह ॥ एवं विरक्तः संलभमनेन भजनीय एते हेतवः स्वचित्ते स्वत एव सिद्धः य
त आत्मा तत एव प्रियः प्रियस्य सेवा स्वत एव स्पष्टैव अर्थः स्पष्ट इत्यर्थः ॥ न त्वनात्मवत् मिथ्या भगवान् भजनीयस्त
णश्चनेन तस्तु निर्वृतः य एवंभूतं तं भजेत ॥ नियतार्थः निश्चलस्वरूपः तदनुभवानंदेन निर्वृतः सन् इति
स्वतः संसारात्मत्वं दर्शितं ॥ किंच यत्र यस्मिन् भजने सति संसारहेतोरविद्यायाः उपरमो नाशो भवति य
त देवात्मचिंतां निरूपयाइट यति करत्ति ॥६॥ तां तथाभूतां परमेश्वरानुचिंतां यास्तामनादृत्य एव मूढ
मेनरा विना ॥ यथा पशुरेव स देवानामिति श्रुतेः ॥ असतीं विषयचिंतां को नाम कुर्यात् ॥ तथाविनया

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियो र्थो भगवाननंतः ॥ तं निर्वृतो नियतार्थो भजेत संसारहेतू
परमश्च यत्र ॥६॥ कस्तां त्वनादृत्य परानुचिंतामृते पशूनसतीं नाम कुर्यात् ॥ पश्यन् जनं पति
तं वैतरण्यां स्वकर्मजान् परितापान् जुषाणम् ॥७॥ केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरु
षं वसंतं ॥ चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति ॥८॥ प्रसन्नवक्त्रं नलिनायते
क्षणं कदंबकिंजल्कपिशंगवाससं ॥ लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलं ॥९॥

वैतरण्यां पतितं ॥ तत्र च स्वकर्मजान् ॥ आध्यात्मिकादिक्लेशान् सेवमानं जनं पश्यन् ॥ वैतरणी यमद्वार
स्था नदीति तत्स्मृता संसृतिर्वैतरणी ॥ तामेव धारणां सविशेषणामाह केचिदिति षड्भिः स्वदेहस्यांत
र्मध्ये यद्धृदयं तत्र योवकाशः ॥ तस्मिन्वसंतं ॥ प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्य
ति ॥ हृदयपरिमाणं तत्त्वोपपत्ते ॥ कंजं पद्मं रथांगं चक्रं ॥८॥ नलिनं पद्मं तद्वदायते दीर्घे
ईक्षणे ॥ यस्य कदंबकुसुमस्य किंजल्काः केसराः तद्वत्पिशंगे पीते वाससी यस्य लसंति महारत्नानि
येषु तानि ॥ सुवर्णमयान्यंगदानि यस्य स्फुरंति चलंति ॥ महारत्नानि च तन्मयानि किरीटकुंडलानि
यस्य ॥ ९ ॥ ॥

भा
टी
५

थनप्रकारः ॥ कोसौ ग्रर्थम्रत्तैरेवस्वर्गादिनामभिः ॥ साधकस्य धीर्ध्यायति ॥ ननु दिव्यलोकयोनीतियतः ॥ अ
पार्थकत्वमेवाह ॥ तत्रमायामयेपथिसत्वमितिवासनयाशय्यानः स्वमान्यप्रवृत्रिवपरिभ्रमन् ॥ ग्रर्थो
न्नविंदतितत्तल्लोकेप्रामोपिनिरवद्यं सत्वं नलभतेरस्यर्थः ॥ २ ॥ तर्हि सर्वे याकर्मफलत्यागेसद्यएव
देहपातः स्यादित्याशंक्याह ॥ ग्रतः कविर्नाममात्रेषुभोगेषुयावतार्थेनदेहनिर्वाहोयस्य ॥ तथाभूतः
स्यात् ॥ अप्रमत्तः तावन्मात्रेप्यनासक्तः ॥ व्यवसायबुद्धिर्नेदं सत्वमितिनिश्चयवान् ॥ तथापितत्रतस्मि
न्नर्थे यद्येवसिद्धे सति ॥ तत्रयत्नेपरिश्रमं नपश्यन् ॥ नयतेन अन्यथाहिइमाहहाभ्यांसत्यामिति

प्राहुः स्म हि ब्राह्मणपर्षप्रेथायन्नामभिर्ध्यायतिधीरपार्थैः ॥ परिभ्रमंस्तत्र नविंदतेर्थान्मा
यामयेवासनयाशयानः ॥ २ ॥ ग्रतः कविर्नामसुयावदर्थः स्यादप्रमत्तोव्यवसायबुद्धिः ॥ सिद्धे
न्यथार्थेनयतेतभत्र्यः परिश्रमंतत्रसमीक्षमाणः ॥ ३ ॥ सत्सांस्थितौकिंकशिपोः प्रयासैर्बा
हौस्वसिद्धे ह्युपबर्हणैः किं ॥ सत्यंजलौकिंपुरुधान्नपात्र्या दिग्वल्कलादौसतिकिंदुकूलैः ॥ ४
चीराणि किं पथिनसंतिदिशंतिभिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन् ॥ रुद्धाः गुहाः
किमजितोवतिनोपसन्नान्कस्माद्भजंतिकवयोधनदुर्मदांधान् ॥ ५ ॥

३ ॥ कशिपोः शय्यायाः सतः सिद्धेबाहौसति ॥ उपबर्हणैरुपधानैः पुरुधाबहुप्रकारयाः न्नपात्र्याभो
जनपात्रेण ॥ ननु दिक्सद्भावोनामनग्नत्वमेवबल्कलमपत्नोयंवासः स्यानेचवात्राप्यपत्नंविनाक
थंप्राप्यतत्राह ॥ ४ ॥ चीराणि वस्त्रखंडानिपरान्नबिभ्रतिपुरसेतिफलादिभिर्यो ॥ गुहाभिरिदर्थः न
नुकदाचिदेषाममलाभेकिं कार्यंतत्राह ॥ अजितोहरिः उपसन्नान्शरणागतान् ॥ किंनावतिनर
क्षति ॥ किंप्राहस्यपूर्वजापि संबंधः पनेनयोदुर्मदस्तेनांधान् ॥ ५ ॥

इयानेतावान्सन्निवेशः अवयवसंस्थानं ॥ अस्मिंस्थूलात्मनि मनः संधार्यते मुमुक्षुभिः ॥ यतो व्यतिरिक्तं किंचि
न्नास्ति तस्मिन् ॥ ३८ ॥ नवै वैविन्नस्य पर्याः ॥ विराड्देहे जीवेश्वराणामभेदेनोपासनमुक्तं ॥ तत्र देहे जीवा
वीश्वरे प्रविलाप्य स एव ध्येय इति ॥ निर्धारयति स इति ॥ सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एक एव
सर्वान्तरात्मा ॥ तमेव सत्यं भजेत अन्यत्रोपलल्त्वेन न सज्जेत ॥ आसंगाद्धात्मनः पातः संसारो भवति यथा
स्वप्नजनदृष्टा एकः तत्र दिद्वियैः सर्वं पश्यति तद्वत् ॥ ईश्वरस्य तु विद्याशक्तित्वान्न बंधः ॥ ३९ ॥ इति श्रीभा
गवते भावार्थदीपिकायां द्वितीयस्कंधे प्रथमोऽध्यायः ॥ १ ॥ द्वितीये तु ततः स्थूलधारणातो जितं मनः ॥ स

इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ॥ संधार्यतेऽस्मिन्वपुषि स्थविष्ठे मनः
स्वबुद्ध्या न यतोऽस्ति किंचित् ॥ ३८ ॥ स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः
तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥ इति श्रीभागवते द्वितीयस्कंधे महा
पुरुषसंस्थानुवर्णने प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्र
त्यवरुध्य तुष्टात् ॥ तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः ॥ १ ॥

वैशारिणिसर्वैशोविसौधार्यमितीर्यते ॥ २ ॥ इष्टापालंद्यन इप्यैवमुक्तावैराजधारणा ॥ ब्रह्मोच्यते त
तत्साध्या सर्वान्तर्यामिधारणा ॥ २ ॥ तत्र तावत्सर्वान्तर्धारणायाः अवान्तरफलमाह ॥ एवं पुराधार
णया तयात्मयोनिः तुष्टात् हरेः पुराप्रलयसमये नष्टां स्मृतिं प्रत्यवरुध्य लब्ध्वा प्रलयात्प्रागिदं विश्वं
यथासीत् ॥ तथा ससर्ज अव्यवसायात्मिका बुद्धिर्यस्य अत एवामोघा दृष्टिर्यस्येति ॥ अतस्तया धा
रणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥ उपासनाफलादपि विरक्तस्य तु आत्मधारणायामधि
कारः ॥ अतो वैराग्यार्थं सर्वं कर्मफलं निंदति ॥ शाब्दस्य हि ब्रह्मणः एष पंथाः कर्मफलबो

भूम्नः विभोः अव्यक्तं प्रधानं सम प्रसिद्धं चंद्रमाः तदीयं मनः सर्वेषां विकाराणां कोश इवाश्रयभूतं ॥३४॥ वि
ज्ञानशक्तिं चित्तं महिं महत्तत्त्वं अंतःकरणं अहंकारं गिरित्रं श्रीरुद्रं ॥ गर्दभाद्वडवायामुत्पन्नाः अश्वतरी
॥३५॥ वयांसि पक्षिणः तस्य व्याकरणं नाम रूपे व्याकरणं वाणी इति श्रुतं तत् शिल्पनैपुण्यं यथाहुः ॥ येन
शुक्लीकृता हंसाः शुकाश्च हरितीकृताः मयूराश्चित्रिता येन स मे वृत्तिं विधास्यतीति ॥ मनुः स्वायंभुवः
मनीषा बुद्धिः मनुजः पुरुषः निवासः आश्रयः पुरुषत्वे चाविस्तरामात्मेति श्रुतेः गंधर्वादीनां देवै

ईशस्य केशान्विदुरंबुवाहान्वासस्तु संध्यां कुरुवर्य भूम्नः ॥ अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः
सर्वविकारकोशः ॥३४॥ विज्ञानशक्तिं महिमामनंति सर्वात्मनोंतःकरणं गिरित्रं ॥ अश्वाश्वत
र्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ॥३५॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनी
षा मनुजो निवासः ॥ गंधर्वविद्याधरचारणाप्सरःस्वरस्मृतीरसुरानीकवीर्यः ॥३६॥ ब्रह्मान
नं क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः ॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः
कर्म वितानयोगः ॥३७॥

कौ गंधर्वादयः स्वरस्मृतीः षड्जादिस्वरस्मरणं येषां ते ॥ असुरानीकं वी
र्यं यस्य ॥ स्मृतिरसुरानीकवर्य इति पाठे गंधर्वादयः स्वरः अप्सरसः स्मरः श्रेष्ठः प्रह्लादः स्मृतिरस्ये
ति ॥३६॥ ब्रह्मविप्रास्तस्याननं मुखत्वं तत्त्रियो भुजा यस्य ॥ विट् वैश्य ऊरुर्यस्य अंघ्रिश्रितः कृष्णः शूद्रो
यस्य नानाभिधानानि येषां ते च अभीज्याः देवास्तेषां गणैर्वसुरुद्रादिभिरुपपन्नो युक्तः द्रव्यात्मको
हविःसाध्यः वितानयोगो यज्ञप्रयोगः तस्य कर्म कार्यं आवश्यकोऽभिप्रेत इत्यर्थः ॥३७॥

ज्योतिरनीकं ज्योतिषां समूहं स्वर्गं महर्लोकं ग्रीवेति मन्यन्ते ॥ जनो लोकं रराटं ललाटं सत्यं सत्यलोकं ॥ २८ ॥ उस्रा देवाः तेजस्त्वात् सपक्षशरीरत्वात् ते बाहव इन्द्राद्याः ॥ दिशः श्रवसदाधिष्ठात्र्यो देवताः कर्णौ श्रोत्रस्याधिष्ठानं ॥ शब्दः श्रोत्रविषयः स तस्य श्रोत्रेन्द्रियम् ॥ एवं नासिकादिष्वपि ॥ नासत्यदस्रावश्विनौ नासे नासापुटे इद्धः दीप्तः ॥ २९ ॥ द्यौर्नेत्रविस्तं अदितिर्णीनेत्रगोलके चक्षुरिन्द्रियं पतङ्गः सूर्यः ॥ अहनी रात्र्यहनी पक्ष्मे

उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ॥ तपो वराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥ इन्द्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥ नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः ॥ २९ ॥ द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च ॥ तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥ ३० ॥ छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि ॥ हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ॥ ३१ ॥ व्रीडोत्तरौष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः ॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ॥ ३२ ॥ नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ॥ अनन्तवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥ ३३ ॥

परमेष्ठिधिष्ण्यं ब्रह्मपदं ॥ तालू रपि स्थाने जिह्वा रसेन्द्रियं ॥ ३० ॥ छन्दांसि वेदाः शिरो ब्रह्मरन्ध्रं स्नेहकलाः ॥ प्रजादिष्वेव स्नेहलेशाः द्विजानि दन्ताः ॥ यं दृत्वमार्षे ॥ दुरन्तः अपारः सर्ग इति यत् ॥ स तस्य कटाक्षः ॥ ३१ ॥ अधर्ममार्गो यस्य स पृष्ठभागः ॥ कः प्रजापतिः ॥ मित्रौ मित्रावरुणौ ॥ ३२ ॥ अनन्तवीर्यस्य वयः कालः तस्य गमनं गुणप्रवाहः प्राणिनां संसारकर्म तस्य

भा॰
टि॰
२

यतोयस्यांक्रियमाणायांयोगभद्रंसत्वात्मकमाश्रयंविषयंपश्यतः ॥ तत्रैवक्षीतिर्भवति ॥२१॥ यथायत्रयादृशी
चेतिकर्तव्यताविषयतद्विशेषणानांप्रश्नाः ॥२२॥ यथोमसोतरंजितासनइतिविषयमाहस्थूलइतिसार्धे
न ॥२३॥ विशेषोविराड्देहः अतिस्थूलानामपिस्थूलतरःसत्कार्यमात्रं ॥२४॥ अस्यचोपलक्षणत्वेनविष
यत्वेवक्तुंविराड्जीवनियंताभगवानेवविषयइत्याह ॥ अंडकोशंतवेर्तिनिकदाहएवहपृथिव्यावरणं
ततः ॥ अमेनोवाद्याकाशाहंकारमहत्तत्वानीतिसप्त ॥२५॥ विराट्स्तज्जीवतद्देहतदभिमानमभेदमारो

यतःसंधार्यमाणायांयोगिनोभक्तिलक्षणः ॥ आशुसंपद्यतेयोगआश्रयंभद्रमीक्षतः ॥२१॥ राजो
वाच ॥ यथासंधार्यतेब्रह्मन्धारणायत्रसंमता ॥ यादृशीवाहरेदाशुपुरुषस्यमनोमलं ॥२२॥ शुक
उवाच ॥ जितासनोजितश्वासोजितसंगोजितेंद्रियः ॥ स्थूलेभगवतोरूपेमनःसंधारयेद्धिया ॥२३॥
विशेषस्तस्यदेहोयंस्थविष्ठश्चस्थवीयसां ॥ यत्रेदंदृश्यतेविश्वंभूतंभव्यंभवच्चसत् ॥२४॥ अंड
कोशेशरीरेस्मिन्सप्तावरणसंयुते ॥ वैराजःपुरुषोयोसौभगवान्धारणाश्रयः ॥२५॥ पातालमे
तस्यहिपादमूलंपठंतिपार्ष्णिप्रपदेरसातलं महातलंविश्वसृजोथगुल्फौतलातलंवैपुरु
षस्यजंघे ॥२६॥ द्वेजानुनीसुतलंविश्वमूर्तेरूरुद्वयंवितलंचातलंच ॥ महीतलंतज्जघनं
महीपतेनभस्तलंनाभिसरोगृणंति ॥२७॥ ॥

प्योपासनंकर्तव्यमित्याशयेनाह ॥ पातालंपा
दमूलंपादस्याधोभागं ॥ पातालादीनांतद्वयवत्वंविधीयते ॥ पातालादीनिसप्ततलानि अथ
स्तनादारभ्यसप्तविवराणिपठंति ॥ तथाहीत्यादि ॥ प्रमाणप्रदर्शने ॥ पार्ष्णिप्रपदेपादस्यपश्चा
त्पुरोभागौ ॥२६॥ ऊरुद्वयंतस्याधोभागेवितलमुपरिभागे ॥ अतलमितिज्ञेयम ॥ नभस्तलंभुव
र्लोकं ॥ नाभिरेवसरः ॥२७॥ ॥

किंचगृहात्प्रव्रजितः निर्गतः गृहेस्थितस्यपुनरप्यासक्तिसंभवात् । तत्राष्टांगयोगमाह ॥ धीरइतिब्रह्म
चर्यादियमोपलक्षणं ॥ पुण्यतीर्थेतिस्नानादिनियमोपलक्षणं । आसनमाह ॥ शुचाविति ॥ विविक्तए
कांतेविधिवत् ॥ कुशाजिनचैलैः क्रमेणोपरिनिर्मिते ॥ १६ ॥ जपगर्भंप्राणायामंवक्तुंजपमाह ॥ त्रिवृत् ॥ त्रिभि
रकारादिभिर्वर्तितंनश्यतीतिब्रह्माक्षरंप्रणवंमनसाभ्यसेदावर्तयेत् ॥ मनसाइंद्रियप्रत्याहारंवक्तुंप्रा
णायामेनमनोनियमनमाह ॥ मनोयच्छेत् ॥ ब्रह्मबीजंप्रणवमविस्मरन्नेवजितश्वासःसन् ॥ १७ ॥ प्रत्या
हारमाह ॥ नियच्छेदक्षान् ॥ इंद्रियाणि ॥ निश्चयात्मिकाबुद्धिःसारथिर्यस्यसः धारणामाह ॥ मनइति ॥ शु

गृहात्प्रव्रजितोधीरः पुण्यतीर्थजलाप्लुतः ॥ शुचौविविक्तआसीनोविधिवत्कल्पितासने ॥ १६ ॥ अ
भ्यसेन्मनसाशुद्धंत्रिवृद्ब्रह्माक्षरंपरं ॥ मनोयच्छेज्जितश्वासोब्रह्मबीजमविस्मरन् ॥ १७ ॥ नियच्छे
द्विषयेभ्योक्षान्मनसाबुद्धिसारथिः ॥ मनःकर्मभिराक्षिप्तंशुभार्थेधारयेद्धिया ॥ १८ ॥ तत्रैकावय
वंध्यायेदव्युच्छिन्नेनचेतसा ॥ मनोनिर्विषयंयुक्त्वाततःकिंचननस्मरेत् ॥ १९ ॥ पदंतत्परमंविष्णो
मनोयत्रप्रसीदति ॥ रजस्तमोभ्यामाक्षिप्तंविमूढंमनआत्मनः ॥ यच्छेद्धारणयाधीरोहंतियात

भकर्मभिः ॥ तद्वासनाभिराक्षिप्तमाह शुभार्थेभगवद्रूपे ॥ १८ ॥ ध्यानमाह (त्कृतंमलं ॥ २० ॥
तत्रैति ॥ एकमेकंपादाद्यवयवं ॥ अव्युच्छिन्नेनसमग्ररूपाद्वियुक्तेनआप्रत्यर्थविशेषेसामान्यतःचित्त
स्थिरीकरणंधारणा ॥ अवयवावयविविभावनयातद्ध्यानमितिभेदः ॥ समाधिमाह ॥ निर्विषयं
मनोयुक्त्वासमाधायस्थिरीभूतेमनसिस्फुरत्परमानंदमात्राकारेकृत्वेत्यर्थः ॥ १९ ॥ प्रसीदतिउपशा
म्यति एवंचालनरूपिदोषेसतिधारणमेवस्थिरीकुर्यादित्याह ॥ रजसाआक्षिप्तंतमसाविमूढं
लीयंमनोनिरुंध्यात् ॥ तत्कृतंरजस्तमोभ्यांकृतंमलं ॥ २० ॥ ॥

भा
द्वि
२

महापुरुषो विष्णुः तदीयः यस्य यस्मिन् श्रद्धां कुर्वतां सतीं श्रद्धेतत्की ॥ १० ॥ साधकानां सिद्धानां चतानः
परमश्रेयोऽस्तीत्याह ॥ एतदिति ॥ इच्छतां कामिनां तत्फलसाधनमेतदेव निर्विद्यमानानां मुमुक्षू-
णां मोक्षसाधनमेतदेव निर्णीतं ॥ नात्र प्रमाणं वक्तव्यमित्यर्थः ॥ ११ ॥ अल्पमेवायुरवशिष्टं तत्किमहं
साधयेयमिति मा भैषीरित्याह ॥ किमिति त्रिभिः ॥ परोक्षैरलक्षितैर्हायनैर्वर्षैः ॥ विदितं ज्ञायायाती-
तिज्ञानं ॥ यतो येन ज्ञानेन घटेत यत्नं करोति ॥ खट्वाङ्गो मेदिदेवपदेऽस्थित्वा देवासान जयत् ॥ ततः प्र-

तदत्तं तेऽभिधास्यामि महापौरुषिको भवान् ॥ यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः स-
ती ॥ १० ॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयं ॥ योगिनां नृप निर्णीतं हरेर्नामानुकी-
र्तनं ॥ ११ ॥ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ॥ वरं मुहूर्तं विदितं घटेत श्रेयसे यतः
१२ ॥ खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः ॥ मुहूर्तात्सर्वमुत्सृज्य गतवानभयं ह-
रिम् ॥ १३ ॥ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः ॥ उपकल्पय तत्सर्वं तावद्यत्सा-
म्परायिकं ॥ १४ ॥ अन्तकाले तु पुरुष आगते गतसाध्वसः ॥ छिन्द्यादसङ्गशस्त्रेण स्पृहां

त

सप्रैर्दैवैर्वरं वृणीष्वेत्युक्ते नोक्तं प्रथमं तावन्ममायुः कथ्यतामि- देहेऽनु ये च तम् ॥ १५ ॥
ति ॥ ततो देवैरुक्ते तव मुहूर्तमात्रमस्तीति ॥ ततोऽतिशीघ्रं विमानेन भुवमागम्य हरिं शरणं गत इति
यदिदं स्वर्गभूमिः रजोधिका कर्मभूमिः इष्टीः ॥ १२ ॥ तवत ॥ एतर्ह्यपि ॥ इदानीमपि तावदिति ॥ ता-
वत्या कालेन साम्परायिकं पारलौकिकं साधनं सम्पादय ॥ तत्र वैराग्यं तावदाह ॥ अन्तकाले इति ॥ १४ ॥
गतसाध्वसः मृत्युभयशून्यः ॥ असङ्गो नाम अनासक्तिः ॥ तेन शस्त्रेण स्पृहां स्वेच्छां ॥ तं देहमनु
ये पुत्रकलत्रादयः तेष्वपि स्पृहां छिन्द्यात् ॥ १५ ॥

नत्वनश्वरं कुटुंबादिर्यं कथमावृण्वीयं कुर्यात् तत्राह देहादिष्वात्मनः सैन्येषु परिकरेषु असत्सु मिथ्या
भूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादीनां निधनं नाशं पश्यन्नपि नानुसंधत्ते ४ एवं विपर्ययमग्न
स्यानर्थकाश्रोतव्यादिष्वास्योत्तरमाह तस्मादिति हे भारत भरतस्य वंश्य सर्वात्मेति सेव्यत्वमा
ह भगवानिति सौंदर्यं ईश्वर इत्यावश्यकत्वं हरिरिति विघ्नहारित्वं अभयं मोक्षमिच्छता ५ अतः
परमन्यच्छ्रेयो नास्तीत्याह एतावानेव जन्मनो लाभः फलं तमाह नारायणस्मृतिरिति सांख्यादिभिः
साधनैर्यतितेषां स्वान्ते यत्र भवेत्तावत्यति सांख्यमात्मानात्मविवेकः योगोष्टांगः अंते स्मृतिः

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ४
तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं ५
एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया जन्मलाभः परः पुंसामंते नारायणस्मृतिः ६
प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ७
इदं भागवतं नाम पुराणं ब्रह्मसंमितं अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम् ८ प
रिनिष्ठितोपि नैर्गुण्ये उत्तमश्लोकलीलया गृहीतचेता राजर्षे आख्यानं यदधीतवान् ९

परो लाभः तत्र महिमानं वक्तुं एषा काष्ठेत्यर्थः तत्र सदाचारं प्रमाणयति प्रायेणेति ६ विधिनिषे
धतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि रमंते ७ किमिदमपूर्वं कथय
सि सत्यं अत्यपूर्वमेवेदमित्याह इदं भगवतोक्तं तन्नाम येषां प्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतु
ल्यं यद्वा ब्रह्मसत्तानेसम्मितं येन कृतस्तद्यापाप्तसतत्राह अधीतवानिति ८ निर्गुणस्य तव कुतो
ध्ययने प्रवृत्तिः तत्राह परिनिष्ठितोपीति गृहीतचेता आकृष्टचित्तः ९

सवयस्कान्बालानपिविष्णुनेनज्ञानमयेनस्वस्वरूपावैकुंठंश्रीकृष्णमेवापश्यत॥एवंश्रीकृ[illegible]पान्स
मात्मनोज्ञात्वाकृष्णस्यदृष्टाकृष्णोपदेशेनविशेषितोज्ञातवानित्याह॥नैतइति॥३८॥अयमर्थःपाल्य
मानान्वत्सान्वश्चानामेषाःपालाश्चदेवानामेषाइतितावद्वेद्मिइदानींतुतथाकिंतस्मिन्निदा
नयेपिवमेवपश्यामि॥अतस्तान्सर्वेषुपृथग्विविच्यकथयितुमिति वदेत्युक्तेनप्रसक्षेणावज्ञादयोपिनिगमा

इतितेभ्योविनिद्राशंहोवत्सान्सवयसानपि॥सर्वमाचष्टवैकुंठंवत्सपावपुनेनमः॥३८॥ नैतेसुरे
शाऋषयोनचैतेत्वमेवभासीशभिदाश्रयेपि॥सर्वंपृथक्त्वंनिगमात्कथंवदेत्युक्तेनवृत्तंप्र
भुणाबलोवैत॥३९॥तावदेत्यात्मभूरात्ममानेनत्रुट्यनेहसा॥पुरोवदाब्दंक्रीडंतंददृशेसक
लंहरिम्॥४०॥यावंतोगोकुलेबालाःसवत्साःसर्वएवहि॥मायाशयेशयानामेनाद्यापि
पुनरुत्थिताः॥४१॥इतएतेत्रकुत्रत्यामन्मायामोहितेतरे॥तावंतएवतत्राब्दंक्रीडंतोविष्णु
नासमम्॥४२॥एवमेतेषुभेदेषुचिरंध्यात्वासआत्मभूः॥सत्याःकेकतरेनेतिज्ञातुंनेष्टेकथं
चन॥४३॥एवंसम्मोहयन्विष्णुंविमोहंविश्वमोहनं॥स्वयैवमाययाजोपिस्वयमेवविमोहितः

तस्तेपतनएवोक्तेवृत्तंबलः॥अवैदितिनवानु॥ततःकिंवृत्तमित्यपेक्षायामाह॥तावदिति॥३९॥व
र्षेयातेआत्मनोमानेनत्रुट्यनेहसात्रुटिमानेनकालेनसकलंसानुचरंहरिंददर्शदृष्टावनकेयरि
त्याह यावंतइतिद्वाभ्यां॥४१॥मेमायाशयेमन्मायायांमोहिताभइतएतेकुत्रत्याइतिवितर्कयत्रमनुष्यरि
मर्थःएवमेतेषुचिरंध्यात्वासआत्मभूरितिपाठः॥ननुमायाशयस्यतस्यकुतोमोहइत्यतआह॥४३॥
तम्यामितिमहामायाविनिभगवतिअल्पमायायाआवरणविक्षेपकत्वाभावेदृष्टांतद्वयमाह॥४४॥

तम्यां तु निशायां रात्रौ नैहारं हिमकरणप्रभवं॥ तमश्च वत्तदितार्थौ पर्जन्यस्थापितमौ नैहारमिति विशेषणा
द्धादस॥ तत्र मोघ यथा हृष्ट्यगावरणं न करोति॥ किं तत्रैव लीयते॥ यथा खद्योतार्चिरिवाहनि हृष्ट्युपका
कारं न करोति॥ एवं महति पुरुषे युञ्जतः पुंसः इतरानीचा माया॥ तत्र न किंचित्करोति किं त्वात्मनि स्वाश्रि
तेव पेयं सामर्थ्यं निहन्ति इत्यस्मद्याश्चर्यमाह॥४४॥ तावदिति॥ वत्सपालाश्च सर्वे यष्टिविषाणादयश्च
४७॥ श्रीवत्सप्रभा पुरुकानि सुगदादानि येषां रत्नमयानि कंबुवत्त्रिधा रासिकं कंकणानि पाणिषु॥ येषां ते च ते॥

तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि॥ महतीतरमायैश्यं निहन्त्यात्मनि युञ्जतः॥४५॥ ताव
त्सर्वे वत्सपालाः पश्यतोजस्य तत्क्षणात्॥ व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः॥४६॥
चतुर्भुजाः शंखचक्रगदाराजीवपाणयः॥ किरीटिनः कुंडलिनो हारिणो वनमालिनः॥४७॥
श्रीवत्सांगददोरत्नकंबुकंकणपाणयः॥ नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः॥४८॥ आं
घ्रिमस्तकमापूर्णास्तुलसीनवदामभिः॥ कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः॥४९॥ चं
द्रिकाविशदस्मेरैः सारुणापांगवीक्षितैः॥ स्वकार्थानामिव रजःसत्वाभ्यां स्रष्टृपालकाः
५०॥ आत्मादिस्तंबपर्यंतैर्मूर्तिमद्भिश्चराचरैः॥ नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः॥५१॥
अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः॥ चतुर्विंशतिभिस्तत्वैः परीता महदादिभिः॥५२॥ का
लस्वभावसंस्कारकामकर्मगुणादिभिः॥ स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः॥५३॥

च तथा भूरि बहुजन्मार्जितं पुण्यं पुण्यवत्सु युक्तैर्जनैरर्पितैः॥ चंद्रिकाविशदस्मितं येषां सत्वाङ्गुणागुणो
नवर्तमानायेषां गाः॥ तैर्वीक्षितैः॥ स्वकार्याथीनां स्वभक्तमनोरथानां रजःसत्वाभ्यां स्रष्टृपालका इव॥ ह
ष्टास्सन्त्वे वदिषदस्मितेन पालकाश्च वरेणावरुणगुणेन स्रष्टारश्च वनादृक्कृदादित्येर्युतमाना इत्यर्थः॥
आत्मा ब्रह्मा जडादि स्तंबपर्यंतैरनेकार्हैः अनेकार्हणैः अन्नाद्याभिर्मायाजनितादिभिर्विभूतिभिः शक्तिभिः

सर्वेषामस्तित्विमत्तेपिविशेषमाद॥ सत्यज्ञानेपि॥ सत्याश्चज्ञानस्वरूपाश्चानंतात्रानंदरूपाश्चतत्रापितदेवतदेक
मात्राविजातीयभेदरहिताः तत्रापिचैकरसाः॥तदेकरूपाम्नतयोयेषांतेयद्वासत्यज्ञानादिमात्रैकरसंयद्ब्रह्मतं
देवमनिर्येषामिति॥ अतएवोपनिषदात्मज्ञानमेवदृक्शास्त्रंयेषांतेतेषामप्यहितिमित्तं अस्पृष्टभूरिमाहात्म्याः
नस्पृष्टस्पर्शयोगमभूरिमाहात्म्यंयेषांतेतथाभूताः॥ सर्वेप्यरूपेणनेति॥५५॥ एवं सकृदेकदेवदृष्टदर्शी॥ पर
ब्रह्मणोविशेषणंयस्येति॥ अनिरुद्धकेनाश्चर्येणउद्भवदृष्टिपराहृत्सदृश्यदृष्टेनिपात्यतिवाक्रुतुकश
क्षेनतत्तीयायाश्छादनमलकृ॥ यद्वाउद्भूत्यतिच्छेदः॥ अनिरुद्धकेनोद्भूत्यविलोक्यविचार्यविपर्ययस्तस्सितिव
सत्यज्ञानानंदमात्रैकरसमनंतं॥ अस्पृष्टभूरिमाहात्म्यापियुपनिषदृष्टा॥५६॥ एवंसकृद
दर्शाजः परब्रह्मात्मनोखिलान॥ यस्यभासासर्वमिदंविभातिसचराचरं॥५६॥ ततोनिरुद्धकोद्भूत्य
विमितेकारणेदिय॥ तदामाभूदजस्तस्मीपूर्दैमंतोवयुविका॥५७॥ इत्तीरेशानकोनिजमहिम
निस्वप्रमितिकेपरत्राजातोनतविरसनमुखब्रह्मकमितो अतीशोपिदृष्टाकिमिदमितिवासुस्तति
तियावन्यात्तातरेपिअनिरुद्धकेनोद्भूतः(सततिचछादाजोज्ञात्वासपदिपरमोजाजवनिका॥५८॥
तेषांथात्राततजसात्स्त्वसर्वेदियोब्रह्मातसीतिश्चलोभक्त॥ अयदृश्यस्तानः पूर्वीवब्रजापियशोकाविदेव
तानस्याअतिसमीपेरविकाचतम्बुवीक्षतमतिमेव॥ एवंमोहमग्रमस्तज्ञहारेन्याप॥५७॥ इत्तीतिश्वेषोब्र
सरस्वतोनस्याईशोब्रह्माकिमिदमितिमुख्यतिसतिपश्चाद्दृष्टमप्यतीशोसतिपरमोजः क्रीडकः सएवे
अताकुवतिकामायापापातिरस्करणीययाद्भुतंदर्शितंतानाचछादितिरोधनापसारितवानित्यर्थः॥ अयवाय
लोकाभिमानोममैस्वर्यंद्रष्टमयोग्यइति॥ तस्याप्यविमायाप्रसारितवानिनिश्चमुह्यतिसति अनंतेनतकोते
वरेनिजअद्यावारणोमहिमायस्यतस्मिन्नितिमोहदृष्टृनुरूपः दर्शनायोग्यत्वायशीणाविशेषणानिस्वप्र

श्री॰
भा॰ द॰
५५

प्रबोधविरिः ॥ अजितस्य स्थानिष्यत्वीयितेनसः परेतवत् ॥ मृतोयदिकाये चितनस्य विष्टतितय्यादृष्टीः नेत्राणि
५९ ॥ ततो नाना जीवं दुर्मैरा कौमारं समाप्य संततानिश्वास मंतानिश्वास विपद्य तिष्ठत् ॥ तदाह ॥ यत्रेति ॥ ६० ॥
नैसर्गदुर्वैराः स्वाभाविकार्ये वैरवंतोपि नराः सिंहादयश्च मित्राणीव यत्र सहैवासन् ॥ अजितस्यावासेन दु
ताः पलायिताः ॥ रुडर्षादयः क्रोधलोभादयो यस्मात्तथाभूतं वृंदावनमपश्यदिति तत्र च परमेष्ठी ब्रह्मा पुरा
दृष्टं वत्सं ब्रह्मा च ऋषपश्यत् ॥ कथंभूतं ब्रह्मापश्यच्च पशुपालशिशुत्वनाट्यमित्यत्र हेतुः ॥ अद्वयमित्यादि अद्वयं व
ननोवी क्रांतिलब्धातः कः परे तवद्स्थितः श्रीकृष्णं इत्यार्थवेहशी गाचष्टेदं सहायमना ॥ ५९ ॥ सपद्येवा
भितः पश्यन्दिशोऽपश्यत्पुरः स्थितं ॥ वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियं ॥ ६० ॥ यत्र नैसर्गदुर्वैराः
सहासन्नृमृगादयः मित्राणीवाजितावासद्रुतरुट्तर्षकादिकं ॥ ६१ ॥ तत्रोद्वहत्पशुपवंशशिशुत्व
नाट्यं ब्रह्माद्वयं परमनंतमगाधबोधं ॥ वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं पर
मेष्ठ्यचष्ट ॥ ६२ ॥ दृष्ट्वा त्वरेण निजधोरणतोवतीर्य पृथ्व्यां वपुः कनकदंडमिवाभिपात्य ॥ स्पृष्ट्वा चतु
र्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकं ॥ ६३ ॥ उत्थायोत्थाय कृष्णस्य चिरस्य पादयोः
पतन् ॥ आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ॥ ६४ ॥ शनैरथोत्थाय विमृज्य लोचने मुकुंदमु
द्वीक्ष्य विनम्रकंधरः ॥ कृतांजलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैलतेलया ॥ ६५ ॥ इति श्रीभा
स्मा विचिन्वत् ॥ एवं च सर्वीत अगाधबोधं च विचिन्वत् ॥ अनंतं च परितो विचिन्वत् ॥ परं पिण्डमुद्वहत् व
त्स पाणिकवलमिति नाट्यमेवोद्वहदित्यर्थः ॥ निजाधोरणतः स्ववाहनात् ॥ त्वरेणावेगेनावतीर्य दंडवद्वत्वा
वत्सांश्च मुकुटानामग्रैरंघ्रियुगमस्पृशन्मुदश्रुसुजलेरानंदाश्रुरूपैः सजलैरभिषेकमकरोदिति चिरस्य चिरं पा
दयोः पतनास्ते न वेपथुः सकंपः अतएव गद्गदयानुकरणमेतत् ॥ इलया वाचा पेलनयाः स्तोत् ॥ ६५ ॥ इति

वेदाहमिति त्रिभिः पूर्वमिति सनकादीनंतर्योगवहत्वे ॥ ऐश्वर्यं प्रह्लादः मनुः स्वायंभुवः ॥ तस्य पत्नी शतरूपास
नाः पुत्रो कन्या च प्राचीनवर्हिर्यो विसर्गो लोमपद्धोदसः ॥ अंगो वेन्यपिता ॥ ध्रुवः ॥ शतधनुः अत्र प्रसंगेथितराधेः रंतिदे
वः पादः सुनामः एकपदेयो ॥ एते सहितोदेववतरर्षयः ॥ ध्रुवः ॥ उपेंद्रदत्तः सुकः विभीषणादयोऽभ्यागुः येषां
ते ॥ ध्रुवः ॥ किं बहुना सत्संगेन सर्वेपि विदंतीत्याह तेवेदुरिति ॥ प्रकुलाः क्रमाः पादन्यासायसहं देहलनयणा
लहूताः तेषां शीलेशिक्षा येषां ते ॥ तथापि दिमवंतिनतर्हि ते पि विदंतीत्यथ ॥ प्रभेभगवतो धारणामनोति
यमनये षांते विदंतीति किमु वक्तव्यं ॥ किं तद्भगवतः स्वरूपं यस्मिन्नतोधारणां विधाय मायां तरंतीत्यपेक्षा

वेदाहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ॥ पत्नी मनोः स च मनुश्च तदात्मजाश्च
प्राचीनवर्हिऋभुरंग उत ध्रुवश्च ॥ ध्रुवः ॥ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयना
हुषाद्याः ॥ मांधात्रलर्कशतधन्वनुरंतिदेवदेवव्रतोबलिरमूर्त्तरयोदिलीपः ॥ ध्रुवः ॥ सौभर्युतंकशि
विदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः ॥ येन्ये विभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टि
षेणविदुरश्रुतदेववर्याः ॥ ध्रुवः ॥ ते वै विदंत्यतितरंति च देवमायां स्त्री शूद्रहूणशवरा अपि पापजीवाः
यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ध्रुवः ॥ शश्वत्प्रशांतमभयं प्र
तिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं ॥ शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभि
मुखे च विलज्जमाना ॥ ध्रुवः ॥

यस्माह ॥ शश्वदिति द्वाभ्यां ॥ ध्रुवः ॥ यद्ब्रह्म विदुर्ज्ञानयः तदेव भगवतः स्वरूपं (
किं तद्भ्रूयतेत्याह ॥ प्रशांतं नित्यं च तत्सुखं च विशोकं चेति ॥ प्रशांतं नित्यं च तत्सुखं च विशोकं चेति ॥ प्रशस्त
सत्वेन्वेहेतुः ॥ शश्वत्सदा प्रशांतमनोतिसुखस्वरूपं विशोकत्वे हेतुः अभयं कुतः यतः समं भेदशून्यं अतएव
अभयं ॥ द्वितीयाद्वै भयं भवतीति श्रुतेः ततश्च यतः प्रतिबोधमात्रं ज्ञानैकरसं ॥ न तु ज्ञानस्यापि नीलपीताद्या
कारेण वैलक्षण्यं विकरणभेदेन च भेदोऽस्त्येवेत्यत आह ॥ शुद्धं निर्मलं न तद्विनोतिविषयकरणोपरागाह योमलं ॥ र
न नमहाह ॥ सदसतः परं विषयकरणसंगशून्यमतएवतत् उपरागो न तत्र नास्तीति भावः न तु तत्रापि तावताह

स्मात्व॥ स्यात्मनत्वमात्मवेत्तावः स्वरूपमेव ननु॥ ननु तोभिन्ने॥ तत्र वक्तं तोपनिषदं पुरुषं पृच्छामीति श्रु
हृद्वोध्यत्वयतीतैः कृतो वोधरूपत्वेन वाह॥ यत्प्राहो नघ्नेति श्रोरोपितनिहत्तावेव शाहस्य व्यापारो ननु द्वोप
रमपर्थः॥ तत्र भवतनामनिरस्तभेदत्वान हृपत्वादि विशोकत्वं॥ स्वत्वस्वनानाकारकसाध्यक्रियाफल
त्वात्॥ कथमजस्रसुखं नसेम्यतस्त्राह॥ यरवहूकारकसाध्यं क्रियाधुमन्यायप्राप्यविकार्यसंस्कार्य
हृपं च तत्तद्वैयर्थ्यं क्रियाफलं वुनात्रित्विवक्रियाभिरानेद्वाप्राभिव्यक्तिमात्रं क्रियते॥ नामम्यादिकमिति
भावः॥ ननु मन्यायभावेपिसायामलापाकरणेन विकार्यत्वस्यादेवत्रीहित्वमिवतत्ववापाकरणेन
मायोकारः॥ मायाः भिन्नत्वेस्यात्तद्विलक्षमानेव यस्मात्प्रवैतिहरत्तोपसरति॥ ४॥ तस्मादेवम

तद्वैपदंभगवतः परमस्यपुंसोब्रह्मेतियद्विदुरजस्रसुखंविशोकम्॥ स
ध्र्यङ्नियम्ययतयोयमकर्त्तहेतिंजह्युः स्वराडिवनिपानखनित्रमिंद्रः॥ ४८॥

तं भगवति नियमितं मनः संहृतान्यार्थानां न किमपि कृत्यमस्तीत्याह॥ सध्र्यंचतीति सध्र्यक् सम्यहवत्
मनः यथेष्टं प्रतिनियम्य यस्मिन् स्थिरीकृत्य यतयः॥ यत्नशीलाः कर्तृभेदः॥ तन्निरासकं तं॥ तत्र
हेतिं साधनं योगाद्यपि जह्युः त्यजेयुः॥ अत्र प्रयोगात् त्वादि यतो हेतु र्थः॥ उपयोगाभावेन साधना
नादरे दृष्टांतः विपीयते स्विन्निति निपानं कूपः॥ तस्य खनित्रं खननसाधनं॥ यथा स्वराट् स्वयमेव
यत्नेस्वरूपेण विराजमानं इंद्रो नादरेण नदृष्टेतियद्वासेनैव राजते इति स्वराट् इद्विरिंद्रः सयथेंद्रः स
सहः सन्॥ कर्मकारदत्त्वाद्योग्यगृहीतेन निपानखनित्रं जहातितद्वदित्यर्थः॥ ४८॥

१

एवंतावदजस्यतत्त्वंविशोकंब्रह्मैवभगवतःस्वरूपंतत्प्रमाणानांवचनप्राप्यंकृत्स्नंवाकिंविदन्तीत्युक्तं इदानीं
तत्प्राकृतस्यैवसर्वफलदातासर्वकर्मप्रवर्तकश्चेत्याह॥ सएवश्रेयसांफलानांविभुःदातायतश्चेदे
तःभावानांब्राह्मणादीनांस्वभावैःशमदमादिभिःविशेषैर्विहितस्यसतःशुभस्यकर्मणोयतःप्रव
र्तकात्प्रसिद्धिः यद्वाभावानांमहदादीनांस्वभावेनपरिणामेनविहितस्यसतःकार्यस्यप्रसिद्धिः सएवस्वर्गादी
नांदातेत्यर्थः॥ ननुकर्मकर्तुर्मर्तस्यकथंस्वर्गादिफलंस्यात्तत्राह॥ स्वारंभकधातूनांविगमेवियोगेसतिअ
नुविशीर्यमाणेपिदेहेतत्रस्थेव्योमेवघटलेनसहनविशीर्यतेः जन्मलेनसहनजातःतस्यपुरुषस्यश्रेय

सश्रेयसामपिविभुर्भगवान्यतोस्यभावस्वभावविहितस्यसतःप्रसिद्धिः॥ देहेस्वधातुविगमेऽनु
विशीर्यमाणेव्योमेवतत्रपुरुषोनविशीर्यतेजः॥४९॥ सोयंतेभिहितस्तातभगवान्विश्वभाव
नः॥ समासेनहरेर्नान्यदन्यस्मात्सदसच्चयत्॥५०॥ इदंभागवतंनामयन्मेभगवतोदितम् संग्र
होयंविभूतीनांत्वमेतद्विपुलीकुरु॥५१॥ यथाहरौभगवतिनृणांभक्तिर्भविष्यति॥ सर्वात्मन्य
खिलाधारेइतिसंकल्प्यवर्णय॥५२॥ मायांवर्णयतोमुष्यईश्वरस्यानुमोदतः शृण्वतःश्रद्धया
नित्यंमाययात्मानमुह्यति॥ इतिश्रीभागवतेद्वितीयस्कंधेब्रह्मनारदसंवादेसप्तमोध्यायः ७

सोयमभुरित्यर्थः॥४९॥ अध्यायद्वयस्यार्थमुपसंहरति॥ सोयंतेसमासेनसंक्षेपेणाभिहितःतमेवाह स
दसत्कार्यंकारणंचहरेरन्यन्नभवति॥ ननुहरेस्तदव्यतिरेकेनह्नुतविकारप्रसंगःस्यात्॥ नअन्यस्मात्का
रणभूतोहरिः॥ कार्याद्व्यतिरिक्तइत्यर्थः॥५०॥ अयंचविभूतीनांसंग्रहउदितः॥५१॥ यथावर्णितेनृ
णांभक्तिर्भविष्यतीत्येवंसंकल्प्यसंक्षिप्ततयाहरिलीलाप्राधान्येन॥ श्रीभागवतंवर्णय॥ ननुभक्तिर
सविद्यानेनकेवलंतत्त्वमित्यर्थः॥५२॥ ननुलीलामायाश्रयाःकिंतद्वर्णनेनेत्याह॥ मायामिति॥५३
इतिश्रीभागवतभावार्थदीपिकायांद्वितीयस्कंधेसप्तमोध्यायः ७॥

भा॰
टि॰टी॰
११

ग्रहमेदेहसंबंधमात्रिपत्रीपानीवयोः॥ बहुत्परीलिदाप्टक्तस्यारागायैस्तुधुस्तितान॥ नमेतद्दिपुली
कर्विंतकंतदेवविपुलीकरणंप्टछतिग्रसलोतित्रिभिः॥ ग्रतणस्तणातीतस्यापिदेववद्धाने
पस्पसः॥१॥ निःसंगंमनः श्रीकृष्णेनिवेशयेति स्वप्रपन्नोदर्शिनः॥२॥ सोपिग्रहयाप्पवतोनावस्य
करस्माह॥ स्पवतस्ति॥ स्वप्रपत्वेविनाभगवान्स्वयमेवहृदिविशति॥४॥ भावसरोरुहेत्तदयक
मलेप्रविष्ट॥ तद्रूतेसर्वंमलंधुनोति॥ सलिलस्येति॥ इध्यानस्यामिश्रणादिना॥ कुंभस्थजले
सोथितेतदेवकेवलंस्पृश्यति॥ ततनदीतडागादिगतंसचमलःकुंभस्थानमलिप्टस्येवनतसर्वं

राजोवाच॥ ब्रह्मणानोदितोब्रह्मनुगणाद्योनेगुणस्य च॥ यसैकस्मैयथाशाहता
रहोदेवदर्शनम्॥१॥ एतद्वेदितमिच्छामितत्त्ववेदविदांवर॥ हरेरद्भुतवीर्यस्यक
थालोकसुमंगलाः॥२॥ कथयस्वमहाभागयथाहमखिलात्मनि॥ कृष्णेनिवे
श्यनिःसंगंमनस्त्यक्ष्येकलेवरं॥३॥ स्पएवतःश्रद्दधानिसंगरणतश्रस्वचेष्टितं
कालेननातिदीर्घेणभगवान्विशतेहृदि॥४॥ प्रविष्टःकर्णरंध्रेणस्वानांभाव
सरोरुहं॥ धुनोतिशमलंकृष्णःसलिलस्ययथाशरत्॥ धौतात्माउरुषःकृ
लपादमूलंनमुंचति॥ मुक्तसर्वपरिक्लेशःपांथःस्वशरणंयथा॥५॥

याविलीयते॥ ग्रतएवकिंचिद्बलनेनपुनःसम्भवति॥ एवंतपोदानादिप्रायश्चित्तेनसर्वथासर्वेषां
सर्वपापधुनोतिकिंतुसावशेषंतच्चकस्यचिदेवकिंचिदेवतद्विप्रविष्टस्यात्रत्तश्रीकृष्णःसर्वे
पापानांनिःशेषंहरतीत्यनेननहष्टांतेनोक्तंसलिलस्यमलंयथाशरदिति॥६॥ ततस्पृकृतार्थोभ
वतीत्याह॥ धौतात्मानिष्पापःपुरुषःसर्वरागद्वेषादयःपरिक्लेशायेनसपांथः प्रवासादागतः
स्वशरणंगृहंयथानमुंचतितद्वत्॥ तदेवंश्रवणोत्तरकमाविष्कृत्यसंदिग्धानध्यानस्यछति॥६॥

अथ यद्धातुमतः धातवो भूतानि तत्संबंधि यः ब्रह्मन् अस्य लौकिकस्यात्मनः धातुभिर्देहारंभो भवति यत् ॥ तत्किं
यदृच्छया वा निर्निमित्तं हेतुना वा कर्मादिना भवेत्तद्यथावज्जानीतेति ॥ अतः कथयेति शेषः ॥ ७ ॥ आ
सीदीश्वरः सोप्येतत्तत्स्वदेहवानुक्तः ॥ अतस्तस्य को विशेष इत्यपेक्षायां प्रकृतिमासीदिति सार्धेन ॥ लो
कानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरादासीत् ॥ असावीश्वरः इयत्तावृक्तैः परि
मितैरवयवैः ॥ अयं लौकिकः पुरुषो यावान् ॥ यत्संख्याकावयवयुक्तः तावान् प्रोक्तः संस्थावानवयववा
निव वप्रोक्तः अतः को विशेषस्तस्येति ॥ ८ ॥ अवयवपदविशेषो वा ब्रह्मन् इत्याह ॥ अजो ब्रह्मा भूतानां सृष्टा

यद्धातुमतो ब्रह्मन्देहारंभोस्य धातुभिः ॥ यदृच्छया हेतुना वा भवंतो जानते यथा ॥ ७ ॥ आसी
द्यदुदरात्पद्मं लोकसंस्थानलक्षणं ॥ यावानयं वै पुरुष इयत्तावयवैः पृथक् ॥ ८ ॥ तावानसा
विति प्रोक्तः संस्थावयववानिव ॥ अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥ ९ ॥ ददृशे येन तद्रू
पं नाभिपद्मसमुद्भवः ॥ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ॥ १० ॥ मुक्त्वात्ममायां मायेशः
शेते सर्वगुहाशयः ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ ११ ॥ लोकैरमुष्यावयवाः
सपालैरिति शुश्रुम ॥ १२ ॥

पाधीनो ब्रह्मा भूतानि यं तासमस्यपाधित्वात् ॥ येन चानुग्रहेणात
स्वरूपं ददर्श सोऽपि दृष्टवान् ॥ यत्र येन स्वापि दृष्टरी शय्यादिलाभतः स्वं स्वनाभिस्थो हमीत्यैवाभि
वादितस्यादिलोकमनूद्यते अग्रेतस्त्वं भविष्यति ॥ ९ ॥ अस्मात्परमाह ॥ स चापि यत्र शेते येन रू
पेण आवर्ति हत्ते विश्वस्य दयो यस्मात् ॥ एवमादिप्रश्नानां तत्त्वतोऽहं सृष्टा इदं तमिति सर्वान् किया
याः संबंधः ॥ १० ॥ प्रश्नांतरमाह ॥ पुरुषस्यावयवैः पूर्वकल्पिताः यस्येहावयवैर्लोकान्कल्पयंती
त्यादौ लोकैरमुष्यावयवा इति यात्मलमेतस्य द्विपादमूलमित्यादौ च तत्तद्भेवात् श्रुतवतो वय

इदानीमस्मात्तान्बहूनर्थान्संकलितयावानित्यादिना॥ कल्पोमहान्॥ विकल्पोवांतरः भूतादिपाठो
पस्मायस्सवाचकइतिवास्मतः स्थूलदेहाभिमानिनोमनुष्यमित्स्देवादेः आयुषःप्रमाणमनुमा
नप्रकारः हष्टुः॥१८॥ विशेषंप्रकृतिकालसेमिश्रनुगतिः हष्टुजितिः कर्मगतयः कर्मप्राप्यानिस्थाना
निपादृशीर्यादृशव॥१९॥ गुणानांसत्त्वादीनांपरिणामंदेवादिरूपमिक्षंतांगुणिनांजीवानांमध्येपत्ति
मविशेषमेकर्मणांघ्रणपापानांसमवायः समुदायः केनकर्मसमुदायेन॥ कथंभूतेनकोधिका

यावान्कल्पोविकल्पोवायथाकालोनुमीयते॥ भूतभव्यभवच्छब्द आयुर्मानंचयत्सतः॥१८॥
कालस्यानुगतिर्यातुलक्ष्यतेण्वीबृहत्स्वपि॥ यावत्यःकर्मगतयोयादृशीर्द्विजसत्तम॥१९॥
यस्मिन्कर्मसमावायोयथायेनोपगृह्यते॥ गुणानांगुणिनांचैवपरिणाममभीप्सतां॥२०॥
भूपातालककुब्व्योमग्रहनक्षत्रभूभृतां॥ सरित्समुद्रद्वीपानांसंभवश्चैतदोकसां॥२१॥ प्र
माणंअंडकोशस्यबाह्याभ्यंतरभेदतः॥ महतांचानुचरितंवर्णाश्रमविनिश्चयः॥२२॥ अव
तारानुचरितंयदाश्चर्यतमंहरेः॥ युगानियुगमानंचधर्मोयश्चयुगेयुगे॥२३॥ नृणां
साधारणोधर्मःसविशेषश्चयादृशः॥ श्रेणीनांराजर्षीणांचधर्मःकृच्छ्रेषुजीवताम्॥२४॥

रीदेवादिभावंप्राप्नोतीत्यर्थः॥२०॥ भूरादीनांसंभवः एतानितदोकांसियेषांप्राणिनांतेषांचसंभवः
यद्वैतिसर्वत्रानुषंगः॥ वर्णानामाश्रमाणांचविनिश्चयः तत्तत्स्वभावेनिर्धारः॥२२॥ युगेयुगेप्रति
युगेयोधर्मः॥ यश्चहरेरवतारानुचरितंसविशेषः॥ वर्णाश्रमनिवेषनः॥ श्रेणीनांतत्तद्व्यवसायोपजी
विनांव्यवहारनियमलक्षणोधर्मः॥ राजर्षीणांप्रजापालनाधिकारिणाम्॥ कृच्छ्रेषु॥ आपत्सुजीव
ताम्॥२४॥ ॥

सर्वेषां तत्त्वानां प्रकृत्यादीनां परिसंख्याने संख्यालक्षणं स्वरूपं हेतुतो लक्षणं ॥ ततः कार्यहेतुत्वेन लक्षणमित्यर्थः पुरुषाराधनस्य विधिः देवहूत्या प्रकाशः अष्टांगयोगस्य च विधिः ॥ २१ ॥ योगेश्वराणामैश्वर्याणि अणिमादि नाम्ना विद्या इति ॥ लिंगशरीरस्य भंगः प्रलयः वेदाः ऋग्वेदादयः उपवेदाः आयुर्वेदादयः धर्माः धर्मशास्त्राणि तेषामितिहासपुराणयोश्चागतिः ॥ २२ ॥ संभवः प्रवांतरप्रलयः यदा सम्यक् कल्प एव कल्पः उद्भवः विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः ॥ इष्टं वैदिकं कर्म पूर्तं स्मार्तं ॥ वापीकूपतडागादिदेवतायतनानि च ॥ अवांतरप्रदानमारामः पूर्तमित्यभिधीयते इति ॥ तत्र चकाम्यानामग्निहोत्रादीनां विधिः ॥ प्रविरोधप्र

नद्वानां परिसंख्यानं लक्षणं हेतुलक्षणं ॥ पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥ २१ ॥ योगेश्वरैश्वर्यगतिर्लिंगभंगस्तु योगिनां ॥ वेदोपवेदधर्माणामितिहासपुराणयोः ॥ २२ ॥ संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः ॥ इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥ २३ ॥ यश्चात्मोपासिनां सर्गः पाखंडस्य च संभवः ॥ आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः ॥ २४ ॥ यथात्मतंत्रो भगवान् विक्रीडत्यात्ममायया ॥ विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ॥ २५ ॥ सर्वमेतच्च भगवन् पृच्छतो मे अनुपूर्वशः ॥ तत्त्वतो र्हसि उदाहर्तुं प्रपन्नाय महामुने ॥ २६ ॥ अत्र प्रमाणं हि भवान् परमेष्ठी यथात्मभूः ॥ परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं ॥ २७ ॥ न मे सवः प्रयास्यंति ब्रह्मन्न नशनादमी ॥ पिबतो अच्युतपीयूषमन्यत्र कुपिताद्द्विजात् ॥ २८ ॥ ॥

कारः ॥ २५ ॥ आत्मोपासिनां लीनोपाधीनां जीवानामात्मनो जीवस्य अवस्थानं बंधमोक्षानिरिक्तस्वरूपे एतावस्थानं ॥ २४ ॥ उदास्ते प्रलये च साक्षाद्दृष्टमपि ॥ २५ ॥ प्रमाणं सम्यग्वक्ता नाधतस्त्वं च ब्रह्मसुना रदव्यासकं मे राम समदायोक्ती ति ॥ सा माल्म प्राप्येनाह ॥ परे चेति ॥ यदा त्वदन्ये प्रायशो गतानुगतिका एव न तत्त्वविदस्तथापि ॥ परे वेति ॥ पूर्वेषां पूर्वजैर्यत्कृतं तदेव परे अनुतिष्ठंति ॥ न तु नवा न यानं हि नको पाख्या माकुलस्य कृतः प्रवर्तनवाद ॥ २७ ॥ नेतिन मदायं तिनरां क्षतिन या कुलीभवंती प्रत्यर्थः अच्युतकी

भा
द्वि
११

उपामंत्रितः इष्टः संस्थासोपतिसूतस्य ॥२८॥ ब्रह्मकल्पेसहष्ठपद्मकल्पेभागवताख्यानेनैवप्रश्नाना
मुत्तरंदातुमुपक्रांतवानित्यर्थः ॥२९॥ पांडूनामृषभः श्रेष्ठः आनुपूर्व्येणेति प्रश्नस्वावक्रमोनविवक्षितः
नप्रश्नक्रमः ॥३०॥ इति श्रीभावार्थदीपिकायां द्वितीयस्कंधे अष्टमोध्यायः ॥८॥ राजप्रश्नोत्तरंवक्तुंस्वल्पसूत्रगणे
हरिलीलाहिते ॥ कथयामास नवमे शुको भागवतं पुनः ॥१॥ ननु यत्तावदुक्तं यद्धातुमतो ब्रह्मन्नेनतन्नी
वस्य कथं देहसंबंधः ॥ इति तत्रोत्तरमाह ॥ आत्मनो हरेर्मायामंतरेण शुद्धानुभवरूपस्यात्मनः अर्थेन
देहेन देहादिना संबंधः अंजसा तत्त्वतो न घटेत स्वप्नद्रष्टुरिवेति परस्येति ॥ स्वप्नद्रष्टुर्यथा स्वप्नदेहसंबं

सूत उवाच ॥ स उपामंत्रितो राज्ञा कथायामिति सत्पतेः ॥ ब्रह्मरातो भृशं प्रीतो विष्णुरातेन सं
सदि ॥२८॥ प्राह भागवतं नाम पुराणं ब्रह्मसंमितं ॥ ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥
२९॥ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति ॥ आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥३०॥
इति श्रीद्वितीयस्कंधे ब्रह्मविधिर्नामाष्टमोध्यायः ॥८॥ शुक उवाच ॥ आत्ममायामृते राज
न् परस्यानुभवात्मनः ॥ न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥१॥ बहुरूप इवाभाति
मायया बहुरूपया ॥ रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥२॥ यर्हि वाव महिम्नि
स्वे परस्मिन्कालमाययोः ॥ रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ॥३॥

धो न घटते तद्वत् ॥ संसारोपि मायैवेत्याह ॥ बहुरूप इति बालयुवादिरूपः देवनरादिरूपश्चाभाति गु
णेषु देहादिषु ॥२॥ अतएव भक्तियोगेन तन्निरासे सति मोक्षोपि घटत इत्याह ॥ यर्हीति वाव शब्द एव
वार्थे ॥ स्व एव महिम्नि यदा रमेत तदैवाह ॥ कालमाययोः पुरुषप्रकृत्योः परस्मिन् ॥ तदोभयं अहं मम
मेति वस्मत्कारदोर्लेपरीत्या स्वरूपेणावतिष्ठते ॥ तदुक्तं ॥ यया संमोहितो जीव आत्मानं त्रिगुणात्मकं ॥
परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते ॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतो
व्यासश्चक्रे सात्वतसंहितामिति ॥ यद्वोक्तं परमेश्वरस्यापि देहसंबंधः विशेषात्कथं न दृश्यते मोदंसा

यदा एते असंगताः अमिलिता आसन् ॥ अतएव यदायतनस्य शरीरस्य निर्माणे न शेकुः ॥ ३२ ॥ सदसत्त्वं गुणप्रधानभा
वं उपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ॥ ३३ ॥ कालकर्मस्वभावान् अधिष्ठाय स्थितः ॥ जीवयतीति जीवः
परमात्मा अजीवम् अचेतनं ॥ अजीवयत् चेतयति स्म ॥ ३४ ॥ निर्भिद्य पृथक्कृत्य स्थितः समर्थः ॥ ३५ ॥ तदवयवैर्लोक
रचनामाह ॥ यस्येति ॥ कटिरिति ॥ उरुस्थलयोः पश्चाद्भागः जघनं पुरोभागः अधः सप्त लोकान् अतलादीन् ॥ ऊर्ध्वं
महादीन् ॥ ३६ ॥ वर्णानामुत्पत्तिं निदर्शयति ॥ पुरुषस्येति ॥ ब्रह्म ब्राह्मणः क्षत्रमिति ॥ कार्यकारणयोरभेद

यदैते संगता भावा भूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणेन शेकुर्ब्रह्मवित्तम ॥ ३२ ॥ तदा संहत्य चा
न्योन्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥ ३३ ॥ वर्षपूगसहस्रान्ते तदं
डमुदकेशयम् ॥ कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ॥ ३४ ॥ स एव पुरुषस्तस्मादंडं निर्भिद्य
निर्गतः ॥ सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥ ३५ ॥ यस्येहावयवैर्लोकान्कल्पयन्ति मनीषि
णः ॥ कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥ ३६ ॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ॥ ऊर्वोर्वै
श्यो भगवतः पद्भ्यां शूद्रो व्यजायत ॥ ३७ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः ॥ हृदा स्वर्लो
क उरसा महर्लोको महात्मनः ॥ ३८ ॥ ग्रीवायां जनलोकस्य तपोलोकः स्तनद्वयात् ॥ मूर्धभिः सत्य
लोकस्तु ब्रह्मलोकः सनातनः ॥ ३९ ॥

विवक्षितोक्तं वा स्वयमुत्तिवत्तदंतरियः ॥ ३७ ॥ इदानीमुपास
नार्थं लोककल्पनाभेदान्तरं यत्सप्तलोकपद्ममाह द्वाभ्यां ॥ ३८ ॥ भूर्लोका पातालमारभ्य पद्भ्यां कटिपर्यंता
भ्यां ॥ स्तनद्वयादिति उपासनार्थत्वादूर्ध्वाधोभावव्यत्ययेपि न दोषः यद्वा स्तनव्यूहे ऊर्ध्वं ॥ यद्वा हृदयंत
स्मादिमर्यादा ॥ ब्रह्मलोकः वैकुंठः सनातनः नित्यः तत्त्वसप्तप्रपंचान्तर्वर्तीति चेमर्थः ॥ इदानीं चतुर्दशलोक
पक्षे चतुर्दशयति ॥ तत्र जघनादिभिः भूरादयः सप्तलोका एव सम ॥ कट्यादिभिरधः सप्तलोकानाह तलकया
मिति द्वाभ्याम् ॥ ४० ॥

मुहेंद्रविभक्तनिवासत्वात्॥४१॥ त्रिलोकपक्षमाह॥ भूर्लोकः पातालादिसहितः॥४२॥ इतिश्रीद्वितीयस्कंधे पंचमोध्यायः॥५॥ षष्ठे विराड्विभूतिश्च प्रोक्ता ध्यानादिभेदतः। दृष्टीकृते च सर्वांशे सर्वं पुरुषसूक्ततः॥१॥ इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्ण्यते॥ वाचां मग्न्यादिवागिंद्रियाणां तदधिष्ठातृ वह्नेश्च तस्य मुखं तस्य जन्मतिस्थानं छंदसां गायत्र्यादीनां सप्तानां सप्तसप्तधातवः त्वगादयः तेषां॥ हव्यं देवानामन्नं कव्यं पितॄणां अन्नं तत्तदुभयं शेषं मनुष्याणां॥ तेषामन्नानां सर्वरसस्य मधुरादेः षड्विधस्य च कारणं तस्य

तत्कथं वातलं स्कमसमरूप्यं वितलं विभोः॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं॥४॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं॥ पातालं पादतल इतिलोकमयः पुमान्॥४१॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः॥ स्वर्लोकः कल्पितो मूर्ध्ना इतिवा लोककल्पना॥४२॥ इतिश्रीभागवते द्वितीयस्कंधे पंचमोध्यायः॥५॥ ब्रह्मोवाच॥ वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्तधातवः॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च॥१॥ सर्वासूनां च वायोश्च तन्नासे परमायने॥ अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः॥२॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी॥ कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः। तद्गात्रं वस्तुसाराणां सौभाग्यस्य च भाजनम्॥३॥

यदिरसनेंद्रियस्य तदधिष्ठातृवरुणस्य च॥५॥ तस्य जिह्वा तेषां उत्पत्तिस्थानं॥ एवं सर्वत्रानुक्रमेणान्वेयं॥१॥ सर्वासूनां प्राणादीनां तन्नासे परमायने॥ तत्र मत्तेजमोदप्रमोदयोः चसामान्यविशेषगंधयोः घ्राणं घ्राणेंद्रियं परमायनं तत्॥२॥ रूपाणां तेजसां रूपप्रकाशानां च चक्षुरिंद्रियं॥ अक्षिणी नेत्रगोलकौ॥ सर्वत्र षष्ठ्यंतानां परमायनं तेन द्रष्टव्यं कर्णौ श्रोत्राधिष्ठाने श्रोत्रमिंद्रियं॥ तस्य गात्रं शरीरं वस्तूनां ये साराः श्रेष्ठाः तेषां भाजनं स्थानम्॥३॥

अस्तवकर्मणोस्य वायोश्च स्पर्शः ॥ सर्वस्य मेध्यस्य यत्नस्य तु द्विजन्मनां सर्वेह द्वाराणि येहं तेयेन संसक्ताधियं तं ते
षामेव चा ॥ ४ ॥ केशानमेवानां देवेश्वरं ईश्वरं तयोक्तेः प्रमस्थ गिरि विद्युता पादकवनवातिशिलोह्यो हा नानि निसाहस्या
हर्यं ते मकर्मणां पालनकर्त्तृणां ॥ ५ ॥ विक्रमः पदन्यासो भूरादिलोकानां नास्यदमाश्रयः ॥ भूरादिशाह्रानाम
यथत्वात् ॥ ६ स्मालन्नु ॥ ते मोलवरतनां शरणं भयाद्रक्षणं सर्वेषां कामानां वरस्य वरणस्यापि हरेर्वेर्द्धि प्राप्ति
हे ॥ ६ ॥ वीर्यस्य शुक्रस्य शिश्नोपि हानं ॥ उपस्थलिंगं द्विविधम नान्यानेदः संतानार्थः संभोगसुखेननिर्वृतिः तापहानि

तन्गस्य स्पर्शो वायोश्च सर्वमेधस्य चैव हि ॥ रोमाण्युद्भिज्जजातीनां येर्वा यज्ञस्तु संभृतः ॥ ४ ॥ केशाश्मन
नखान्यस्य शिलालोहाभ्रविद्युताम् । बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ॥ ५ ॥ विक्रमो भूर्भुवः
स्वश्च क्षेमस्य शरणस्य च ॥ सर्वकामवरस्यापि हरेश्चरण आस्पदम् ॥ ६ ॥ अपां वीर्यस्य सर्गस्य पर्जन्य
स्य प्रजापतेः पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥ ७ ॥ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८ ॥ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ॥ नाड्यो नदन
दीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥ अव्यक्तरससिन्धूनां भूतानां निधनस्य च ॥ उदरं विदितं पुंसो ह
दयं मनसः पदं ॥ १० ॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥ विज्ञानस्य च सत्त्वस्य परस्यात्मा परायण
णाम् ॥ ११ ॥

ससा ॥ ७ ॥ परिमोक्षस्य मलत्यागस्य पायुरिंद्रियं तद्गुदस्थानं निर्ऋतेर लक्ष्म्याः ॥ ८ ॥ तमसोः
ज्ञानस्य पश्चिमः पृष्ठभागः गोत्राणां गिरीणामस्थिसंघातः ॥ ९ ॥ अव्यक्तं प्रधानं ॥ रसः अन्नादिरसः सिं
धवः समुद्राः तेषां निधनस्य उदरं ॥ पदं स्थानं विदितं ज्ञातं तैर्भिः मनसः अस्मदादिलिंगशरीरस्य ॥ १०
धर्मं तवकुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमायनं ॥ ११ ॥

भा
टि
११

एवं तावत्परमेश्वराज्जातं विश्वं ततो न भिन्नं यथा कटकं सुवर्णात्‌ इत्युक्तं ॥ सत्तु सर्वं नियंता सर्वप्रकाशकोऽपि
तस्य तत्स्पर्शाद्युक्तं ॥ एतदेव पुरुषसूक्तार्थकथनेन द्रढयति ॥ तत्र सहस्रशीर्षेत्यस्यार्थं चेस्वासस्रेण स्वृ
त्वमासीदित्यादेश्च ऋक्‌द्वयस्यार्थः पूर्वाध्याय एव दर्शितः ॥ पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति ॥ अहं भ
वानिति सार्धैस्त्रिभिः ॥ ते अग्रजा इमे सनकादयः ॥ मरीच्यादयश्च जलं च नभश्चौकांसि येषां तेन भौकस इ
ति संधिरार्षः ॥ १४ ॥ सर्वं पुरुष एवेत्यतः इत्यादि स्पष्टार्थः प्रपंचेन तस्यापरिच्छेदं वक्तुं सभूमिमित्यस्यार्थमा
ह तेन पुरुषेणावृतमिति भूमिपदस्यार्थः वितस्तिमितिदशांगुलपदस्य अधितिष्ठतीत्यधिपाद्व्याप्य वितस्ति

अहं भवान्भवश्चैव त इमे मुनयोऽग्रजाः ॥ सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥ १२ ॥ गंधर्वाप्स
रसो यक्षा रक्षोभूतगणोरगाः ॥ पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥ १३ ॥ अन्ये च विविधा
जीवा जलस्थलनभौकसः ॥ ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥ १४ ॥ सर्वं पुरुष एवेदं भूतं भ
व्यं भवच्च यत्‌ ॥ तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥ १५ ॥ स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतप
त्यसौ ॥ एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान्‌ ॥ सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्‌ ॥ १६ ॥

मधिकं व्याप्य तिष्ठतीति प्राधिक्यमात्रं विवक्षितम्‌ ॥ न प्रमाणम्‌ ॥ अनंतपरिमाणस्यापरिच्छिन्नत्वाच्च ॥ एतदेव
स्पष्टीकुर्वन्नाह ॥ १५ ॥ असौ प्राणः असौ वा आदित्यः प्राण इति श्रुतेः ॥ स्वधिष्ण्यं मंडलं प्रकाशयन्‌ यथा बहि
श्च प्रकाशयति ॥ एवं विराड्देहं प्रकाशयन्‌ ॥ तदंतर्बहिश्च प्रकाशयति ॥ किंच पुरुषस्येदं शीर्षोक्तं उतामृ
तत्वस्येशानस्यार्थमाह ॥ स इति ॥ अभयस्येति मृतत्वगतस्यामृतपदव्याख्यानं अन्नेनेति पदं ॥ विभक्तिव्यत्ययेन अन्न
वच्छेममसेमरणाय मर्त्यं कर्म ॥ अन्नं कर्मफलं यस्मादत्यगादतिक्रांतवान्‌ ॥ अतो न केवलं सर्वात्मकः किंतु

प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य ॥ तत्परिहारायैतावानस्येत्यस्यार्थमाह ॥ महिमेति ॥ महि
मेति प्रपंचात्मकस्याप्यमृतत्वेशानत्वमित्येष महिमा तु रस्यपः प्रमाणः प्रपंचानभिभूतत्वादिति भावः स चै
णा ॥ एतावानस्य महिमा विभूतिः ॥ स तु मायापात्मह त्वस्य रतिवदताय मेवार्थे उक्तं तदेवमीश्वरो नि
त्यमुक्त इत्युक्ते ॥ तदाश्रितानां बंधमोक्षौ व्यवस्थापयितुं दर्शयति ॥ पादोस्य विश्वा भूतानीत्यस्यार्थमा
ह ॥ पादे स्थिति तिष्ठन्त्यत्र ति स्थितयो भूरादिलोकाः ॥ ते पादा इव पादाः प्रशायस्यस्य स्थितिपात्
तस्य पादेष्वग्रेश भूतेषु लोकेषु सर्वा जीवा निविष्टाः मंत्रे तु पादोस्य विश्वाभूतानीति सामानाधि
करण्यमपि ह्यानाधिष्ठेयाभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति ॥ ४ ॥ भूतेषु एत
वैचित्र्यं दर्शयन् ॥ त्रिपादस्यामृतं दिवीत्यस्यार्थमाह ॥ प्रसेश्वरस्य सर्वेध्वर्थिन्त्रिपादमृतं नित्यस्वं

महिमैष ततो ज्यायान्पुरुषस्य तु रत्मयः ॥ पादेषु सर्वभूतानि येषु सः स्थितिपदो विदुः ॥ ४ ॥
अमृतं क्षेममभयं त्रिमूर्ध्नोधायि मूर्धसु ॥ पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥ ५ ॥

दिवि द्युर्ध्वलोकेषु त्रिलोकामित्यर्थः तदेव त्रिपाद्व्दोकं वैचित्र्यं दर्शयन्नाह ॥ त्रयाणां लोका
नां मूर्धा महर्लोकः तस्य मूर्धानस्तदुपरितना लोकाः तेषु यथाक्रममृतादिक्रमधायि निहितं
तत्र जनलोके तावदमृतमेव सत्त्वे महर्लोकस्य कर्मभुक्तिस्थानत्वेपि कल्पान्ते तत्रस्थानां स्थानत्यागात् ॥ त्वा
विनाशिसत्त्वे जनलोके तु ममृतमविनाशि सत्त्वे यावज्जीवं तस्य स्थानापरित्यागात् ॥ किंतु जनलोके
महर्लोकवासिनां कल्पान्ते त्रिलोकदाहोष्मपीडितानां तदा तत्रागमनादस्ति भयदर्शनमस्ति ॥ त
पोलोके तस्याभावात्क्षेममेव वस्तुनि हि ॥ त्रिलोकादहनात्यासंस्या संकर्षणाग्निना ॥ पाःस्व
णां महर्लोकाज्जनलभ्य वादयोर्हिताः इति ॥ सत्यलोके तु भयं मोक्षं तत्र त्यासतेः ॥ एतदेव वैचित्र्य
मधिकारिभेदेनोपपादयन्त ॥ त्रिपादूर्ध्व इत्यस्यार्थमाह ॥ नप्रजानां यत्वेषु यादिरूपेणात्मप्रजानां ते

गृहमेधस्त्वंतः यस्मात् || अबृहद्व्रतः ब्रह्मचर्यव्रतरहितः || अयं चाधिकारभेद एकस्यैवावस्थाभेदेन न
त्वसंततमित्व विषय इति || दर्शितं यस्ततो विष्वगित्यस्यार्थमाह || विविधं स्वरूपं वतीति विष्वङ् पुरुषः
देवज्ञः सृती मार्गौ द्वितीयोनसो || विचक्रमे चलतिस्म कथंभूते सृती साशनानशने भोगापवर्गसा
धिसाधनभूते || अत्र हेतुत्वेन पूर्वविशेषणं || यतः अविद्या कर्मरूपा एका विद्या च तत्साधनोपासन
रूपान्या || १८ || तदेवं विराडंतर्वर्तितां फलत्वे विश्वसृक्तात्तत्कारणे स्वस्मिन् द्वैलत्वं प्रदर्शयिवे || न
स्यादित्युक्ता यतेमस्यार्थमाह | यस्मादंडं जज्ञे तत्र च भूतेन्द्रियगुणात्मको विराड् जज्ञे सर्वस्य || न

अंतस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः || सृती विचक्रमे विष्वङ् साशनानशने उभे || १९ ||
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः || यस्मादंडं विराड् जज्ञे भूतेन्द्रियगुणात्मकः || २०
तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् || यदास्य नाभ्यान्नलिनादहमासं महात्मनः || २१
नाविदं यज्ञसंभारान्पुरुषावयवादृते || तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः || २२ ||
इदं च देवयजनं कालश्चोरुगुणान्वितः || वस्तून्योषधयः स्नेहा रसलोहमृदो जलम् || २३

द्विषं विराड्देहं द्रव्यमत्यगादतिक्रांतवान् || सूर्य इवेति स्वौजः प्रकटयन् || २० || नन्वेवं पुरुषश्चेत्सर्वं तर्हि
यज्ञस्य तत्साधनानां च पृथक्त्वाभावात् || यज्ञैः पुरुषाराधनं न सिद्ध्येदित्याशंक्य न तत्र विहाय यज्ञपुरु
षेणाहविषेत्यादिमंत्रार्थं संगृह्य दर्शयति यदेत्यादिना || अस्येति विराड्देहं नाभिस्थितः || तस्यैव महत्त्वता
त || तस्माद्यज्ञस्य संभारान् साधनानि विना विदं || २१ || तदा तेषु संभारेषु साध्येषु सत्सु पुरुषावयवैः प
ते संभाराः संपन्ना इतिविवलंघेनाब्यः वनस्पतयो यूपाः देवयजनं यज्ञभूमिः || इदं चेति वचमाद्यज्ञा
हृस्यानादपविष्टः कथयतीति गम्यते बहुगुणान्वितो वसंतादिकालः || २२ || वस्तूनि पात्रादीनि गे

वा तहौत्रं हौत्रादिकं कर्म ॥ २४ ॥ नामधेयानि ज्योतिष्टोमादीनि ॥ ऋग्यजुःसाम्नां प्रकृतत्वात् ॥ मंत्रा इति सूत्रा हरकारा
दयः देवतानामनुक्रमउद्देशः कल्पा बौधायनादिकर्मपद्धतिग्रंथाः अनेनाहं यजे इति संकल्पः तंत्रमनुष्ठा
नप्रकारः ॥ २४ ॥ गतयो विष्णुक्रमाद्याः मतयो देवध्यानानि ऋतं तस्य भगवत्यसमर्पणं ॥ २५ ॥ संभृताः संपा
दिताः संभाराः येन तस्तोऽहं ॥ तेनैव यज्ञेनैव अनेन यज्ञेन यज्ञमयं जनं तेनेति मंत्रार्थः सूचितः ॥ २६ ॥ तेन दे

ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥ २४ ॥ नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च ॥ देवता
नुक्रमः कल्पः संकल्पस्तंत्रमेव च ॥ २५ ॥ गतयो मतयश्चैव प्रायश्चित्तं समर्पणं ॥ पुरुषावयवैरेते सं
भाराः संभृता मया ॥ २६ ॥ इति संभृतसंभारः पुरुषावयवैरहं ॥ तमेव पुरुषं यज्ञं तेनैवायजमी
श्वरं ॥ २७ ॥ ततस्ते भ्रातर इमे प्रजानां पतयो नव ॥ अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥ २८ ॥ त
तश्च मनवः काले ईजिरे ऋषयोऽपरे ॥ पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं ॥ २९ ॥ ना
रायणे भगवति तदिदं विश्वमाहितं ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥ ३० ॥

वाश्रयणं तेन स्वार्थे समर्पं चेदं संयजनि ॥ ततइतिद्वाभ्यां ॥ इंद्रादिरूपेण व्यक्तं स्वतः अव्यक्तं अनेनाव
रूपं नाम मयजन इमस्य स्वार्थो दर्शितः ॥ २८ ॥ काले स्वस्वावसरे ॥ २९ ॥ यद्यपि ज्ञानमिस्नेन तस्यश्रोत्रया
र्थेषु प्रसंहरति नारायणे इति सा हितम यि इति भगवत्येव हेतुः यः स्वतो गुणः सर्गादौ गृहीता
मायया उरवो गुणाः येन तस्मिन् ॥ ३० ॥ यस्य स्मरणमित्येतस्य श्रोतरं यदुक्तं स एष भगवान् ॥ सर्वेषां

पालनंतत्स्वयमेवकरोतीत्याह॥ विश्वमिति॥ पुरुषरूपेणविष्णुरूपेण॥ त्रिशक्तिर्मायांतांधरतीतितथा
सः॥ ३२॥ यद्वेदंविश्वंयदात्मकञ्चत्वमित्येवमादिसर्वप्रश्नानांसमाधानंकृतं॥ यदुक्तं॥ वासुदेवात्परोब्रह्म
न्नवान्योऽर्थोस्तितत्त्वतइति॥ पुरुषएवेदंसर्वमितिनिरूप्यावयवद्वौहृतेतदुपसंहरति॥ इतीतिकार्य
कारणात्मकं॥ भाव्यंसत्त्वंभगवतःसकाशादन्यत्पृथक्नभवतीत्यभिहितं॥ ३३॥ यदुक्तं॥ एतावत्त्वंयतो

सृजामितन्नियुक्तोहंहरोहरतितद्वशः॥ विश्वंपुरुषरूपेणपरिपातित्रिशक्तिधृक्॥ ३२॥
इतितेभिहितंतातयथेदमनुपृच्छसि॥ नान्यद्भगवतःकिंचिद्भाव्यंसदसदात्मकं॥ ३३॥ न
भारतीमेंगमृषोपलक्ष्यतेनवैक्वचिन्मेमनसोमृषागतिः नमेहृषीकाणिपतंत्यसत्प
थेयन्मेहृदौत्कंठ्यवताधृतोहरिः॥ ३४॥ सोहंसमाम्नायमयस्तपोमयः॥ प्रजापतीनाम
भिवंदितःपतिः॥ आस्थाययोगंनिपुणंसमाहितस्तन्नाध्यगच्छंयतआत्मसंभवः॥ ३५॥

हितमेतन्मवितथमासीत्सर्वंमत्रवीषितदुपपादयोपसंहरति॥ नभारतीति॥ यद्यस्मान्मेमया औ
त्कंठ्यंभक्त्युद्रेकःतद्युक्तेनहृदाहरिर्धृतः॥ ध्यातः॥ अंगहेनारद अतोमेवाङ्मनइंद्रियाणांहतथ्यं
सत्यार्थत्वंनतमत्यभावेसोऽस्मर्थः॥ ३४॥ प्रत्यक्षानुभवमेवान्वयव्यतिरेकाभ्यांप्रमाणयतिद्वाभ्यांस
सोहंसमाम्नायादिभिःसर्वोत्कृष्टोपियोगमास्थितोपि॥ यतआत्मनोममसंभवोजन्मतमेवन
ज्ञातवान्॥ कुतोन्यस्यवार्त्ता॥ यतइत्यत्रतीयत्कंपेवस्यते॥ ३५॥

तदेवं समीयुषां शरणागतानां संसारनिवर्तकं ॥ मंगलावहं स्वस्त्ययनं च तस्य चरणं नतोस्मि ॥ ततो विस्म
हि मत्तेन ज्ञातवानस्मीति कैमुत्यमाह येनाह योहीति स्वमायया विष्कारैः स्वयमपि पर्यगात् ॥ परिच्छे
नैव पै ॥ एतावानिति न ज्ञातवानित्यर्थः अपरे कुतो ज्ञानीयुः ॥ तस्य चरणं नतोस्मीति एवं वैराग्यसंबंधः ॥ न
हमस्वंतं कथं न जानासि ॥ अनंताभावादिति दृष्टांतेनाह ॥ यथा स्वसंतं नभो न जानाति ॥ न हि स्वश्रूप्या
रंते न सर्वे तत्वं तिरं तीति भावः ॥ तथा च वक्ष्यति ॥ द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरां
डनिचया ननु सावरणा इत्यादि श्रुतिश्च योस्याध्यक्षः परमे व्योमन् सो अंग वेद यदि वा न वेदेति ॥३४॥

नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं ॥ योह्यात्ममायाविभवं स्म पर्यगा
द्यथा नभः स्वांतमथापरे कुतः ॥३५॥ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सु
राः ॥ तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ॥३६॥ यस्यावतारकर्माणि
गायंति ह्यस्मदादयः ॥ न यं विदंति तत्वेन तस्मै भगवते नमः ॥३७॥ स एष आद्यः पुरुषः कल्पे
कल्पे सृजत्यजः ॥ आत्मात्मन्यात्मनात्मानं संयच्छति च पाति च ॥३८॥ ॥

एतत्स्पष्टं च यतिनाहमिति द्वाभ्यां वामदेवो रुद्रः यस्य ऋतां गतिं परमार्थस्वरूपं किं विदंति यं च रूपं त
न्मायया विनिर्मितं विचक्ष्महे विद्मः ॥ तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं मोहितबुद्धय इत्य
यं तदज्ञानेमयं वा ज्ञाने च हेतुः ॥३५॥ न तु सर्वैरपि न वर्ण्यते तो हं यत्नेन तन्नाह यस्येति ॥३६॥ अवतारक
र्माणि संक्षेपतो दर्शयति ॥ स एवाद्यो भगवान् यः पुरुषावतारः सन् ॥ सृष्ट्यादि करोति ॥ आत्मा म
न्नात्मानमिति कर्तृ अधिकरणं साधनं कर्म च स्व एवेत्यर्थः पुरुषावतारः सृष्ट्यादीनि करो
तीति संक्षेपोक्तिः ॥३७॥

भा
टी
२२

नयं विदंतितत्त्वेनेत्युक्ते किं तत्त्वमित्यपेक्षायामाह ॥ ज्ञानं केवलं सत्यमनंतं घटाद्याकाररहितं ज्ञानमद्य वक्ष्येद्वा
यं ॥ विशेषणानि विशुद्धं विषयाकाररहितं ॥ यतः प्रत्यक्तत्वान्तरं ॥ अतएव सम्यक्देहादिरहितम् ॥
अवस्थितं स्थिरं यतो निर्गुणं ॥ गुणकार्यं हि गुणव्यतिकराद्धि चलं भवति यद्यपि घटाद्याकाररहित
ज्ञानमपि स्वरूपज्ञानमेवेति ॥ नवाचस्मादिदोषयुक्ते ॥ तथाप्यंतःकरणवृत्तिदोषैस्त्यानत्वाश्रवतीति
यद्वक्ष्यते एभिरेव विशेषणैः सत्यत्वमपि समर्थितम् ॥ किंच यद्विकारवत्तदसत्यं दृष्टं ॥ न चास्य
तस्मादयं षड्विकाराः संतीत्याह ॥ अनाद्यंतं जन्मनाशरहितम् ॥ अतएव जन्मानंतरास्तित्ववलद

विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितं ॥ सत्यं पूर्णमना-
द्यंतं निर्गुणं नित्यमद्वयम् ॥ २४ ॥ ऋषयो विंदंति शुद्धयः प्रशां-
तात्मेंद्रियाशयाः ॥ यदा तद्देवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥ २५

णोपि विकारो नास्ति ॥ हि विपरिणामापक्षयावनसेति ॥ यतः पूर्णः पूर्णत्वे हेतुः नित्यमद्वयं नित्यं
सर्वदा द्वैतप्रतीतिसमयेपि परमार्थतोऽद्वयमिति ॥ २४ ॥ अत्र विद्वदनुभवं प्रमाणयति ॥ ऋषयो विंदं-
ति ॥ प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसः यदा भवंति तदा विंदंति ॥ अन्यदा तदज्ञाने
कारणमाह ॥ यदा तत्तदेव प्रकाशमानमेव असत्तर्कैः विप्लुतं स्यात्तदा तिरोधीयेतेति ॥ कर्मके
कस्ते आत्मानं स्वजनीत्युक्ते केनेत्यपेक्षमानाः अवताराश्रयान् ॥ अवतारान् ॥ विस्तरेणाह ॥ आद्य
पृथ्व्यादियावत्समाप्तिः ॥ २५ ॥

परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽवतारः ॥ वस्तुतो हि भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् ॥ स्वांशेन विष्टः पुरुषाभिधानम् अवाप नारायण आदिदेवः ॥ यथोक्तं ॥ विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते इति ॥ यद्यपि सर्वेषाम् अविशेषेणावतारत्वमुच्यते ॥ तथापि कालस्य स्वभावस्य सदसद् इति ॥ कार्यकारणात्मिका प्रकृतिस्तु ॥ एताः शक्तयः मनआ

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ॥ द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥४२॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ॥ स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ॥४३॥ गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ॥ ये वा ऋषीणाम् ऋषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ॥४४॥ अन्ये च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः ॥४५॥ ॥

दीनि कार्याणि तत्र स्यादयो गुणावताराः ॥ दक्षादयो विभूतय इति विवेकः ॥ मनः महत्तत्त्वं द्रव्यं महाभूतानि क्रमोऽत्र न विवक्षितः विकारोऽहंकारः गुणाः सत्त्वादयः विराट् समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरीरं ॥४२॥ अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो ये इमे प्रजेशाः तललोकपालाः पातालाधिपतयः ॥४३॥ गंधर्वादीनामीशाः यक्षादीनां नाथाः रक्षोरगं ति संधिरार्षः ऋषीणां पितॄणां च श्रेष्ठाः ॥४४॥ प्रेतादीनामधीशाः ॥४५॥

किं बहुनायत्किंचिद्भगवदुदितं तत्सर्वं परमेव तत्त्वमित्यन्वयः ॥ भगवत् ॥ ऐश्वर्ययुक्तं ॥ महस्तत्तेजोयुक्तं ॥ ओजः
सहसींद्रियमनःशक्तीनियुक्तं बलं दाक्ष्यं श्रीः शोभा ॥ ह्रीः कर्मजुगुप्सा विभूतिः संपत्तिः आत्मबुद्धिः तद्युक्ते
ग्रणीवर्णाः यदद्भुतानामाश्चर्यवर्णानामित्यर्थः ॥ रूपमेव स्वरूपं रूपवत् ॥ अरूपं यत् ॥ तत्सर्वं परं तत्त्वं न हि भ
तिरित्यर्थः ॥ ४४ ॥ सुहृष्टात्मावतारानुक्रममाह ॥ प्राधान्यत इति ॥ असत्कथाश्रवणीयं कर्णयोः कषाया
मलाः तान् शोधयंतीति ॥ तथा तान् ॥ सुपेशान्सुंदरान् ॥ हे स्वपते तेभ्यं अनुक्रमिष्येन दत्तमस्मरणास्तेन ते
पेयापीयतामित्यर्थः ॥ यद्वा आपीयतामितितरत्नेनेन ॥ आपिबतां कर्णकषायशोषानित्यर्थः ॥ ४५ ॥ इति

यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं
परं रूपवदस्वरूपम् ॥ ४४ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥ आपी
यतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान् ॥ ४५ ॥ इति श्रीभागवते महापुराणे द्विती
यस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ श्रीब्रह्मोवाच ॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सक
लयज्ञमयीमनंतः ॥ अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १

श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठः ॥ ६ ॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः ॥ नारदा
यसंततत्कर्म श्रद्धोन्नतयोः सह ॥ १ ॥ यत्र यदा क्षितितलोद्धरणाय वाराहीं तनुं बिभ्रत् ॥ उद्यतो वै
तं ॥ तदा तं समयसिद्धं हिरण्याक्षं दंष्ट्रया ददार ॥ २ ॥ यज्ञावतारमाह ॥ जात इति ॥ रुचेः प्रजापतेः स
काशात् आकूत्यां आहूतेः सुतः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमान् देवा
न् जनयत् ॥ स एवेंद्रः सन् ॥ यदार्तिं ॥ ४ ॥

महरत् ॥ नतु पूर्वं स्वयज्ञस्य कोपि अग्रे पश्चात् ॥ मनुना मातामहेन हरिरित्यनूक्तः अनेन देवो स्मादृशे
लोकत्रयार्तिहरणं च तस्य कर्म दर्शितं एवं सर्वेष्ववतारेषु तत्कर्म च ज्ञेयं ॥२॥ कपिलावतारमाह ॥ क
र्दमस्य प्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां जज्ञे नवभिः स्त्रीभिर्भगिनीभिः सह स्वस्य मात्रे आत्मगतिं
ब्रह्मविद्यामुक्तवान् ॥ यया आत्मगत्या आत्मनः शमलं मलिनं तत्कर्तृसंशयगासंगरूपं पंकमस्मिन्नेव जन्मनि
विधूय कपिलस्य गतिं मुक्तिं प्राप भवती ॥३॥ दत्तात्रेयावतारमाह ॥ मया अहमेव वत्सो दत्तः इति यत्प्रा
ह ॥ ततः स दत्तनामा दत्तो जातः स भक्तेभ्यो योगैश्वर्यं दानेन च वितरं दर्शयति ॥ यस्य पादपंकजयोः परा

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां ॥ लोकत्रयस्य महतीं
महरद्यदार्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः ॥२॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्री
भिः समं नवभिरात्मगतिं स्वमात्रे ॥ ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिल
स्य गतिं प्रपेदे ॥३॥ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः
यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥४॥ तप्तं तपो विविध
लोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्म
तत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥५॥

गः तेन पवित्रा देहा येषां ते ॥ उभयीमैहिकीमामु
ष्मिकीं च मुक्तिं संपदं वा ॥४॥ कुमारावतारमाह ॥ मया आदौ यत्तपस्तप्तं तस्मात्स्वतपसः सतपसो हे
तोः स हरिः स्वयं चतुःसनोऽभूत् ॥ सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दा ना
मसु यस्य सः ॥ कथंभूतात्स्वतपसः सनात् अखंडितात् ॥ यद्वा तपसः सनात् ॥ तस्मात् तत्त्वं समर्थेन
दिसर्गार्थं पालनाय वा ॥ स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टं लुप्तं चेत् संप्रदायं आत्मतत्त्वं ॥ इहास्मि
न्कल्पे सम्यग्जगाद उक्तवान् ॥ सम्यक्त्वं दर्शयति ॥ तद्दृष्टिमात्रमेव मुनयः आत्मन् मनसि ॥ अचक्ष

नरनारायणावतारमाह ॥ धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन जा
तः ॥ कथंभूतः स्वः असाधारणः तपःप्रभावो यस्य तदेवाह ॥ अनंगस्य पृतना देव्यो अप्सरसः भगवतः स
काशादात्मनः स्वप्रतिरूपाः उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटयितुं साधयितुं न शे
कुः यद्वा आत्मनः स्वस्य यो नियमः तपो नाशनरूपः तस्यावलोपं तं दृष्ट्वा भगवत्संघटयितुं न शेकुरि
ति ॥ एतद्व्याख्यानमेकादशे भविष्यति ॥ ६ ॥ अत्र कामविजयी क्रोधोपि बिभेति तत्र कामो न प्रभवती
ति किं वक्तव्यं ॥ इत्याह काममिति ॥ कृतिनः श्रीरुद्रप्रमुखाः रोषदृष्ट्या हरदृष्ट्या कामं दहंति रोषं त्वात्मा

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः ॥ दृष्ट्वा
त्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ॥ ६ ॥ कामं
दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत ते न दहंत्यसह्यम् ॥ सोयं यदं
तरमलं निविशन्बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥ विद्धः स
पत्न्युदितपत्रिभिरंति राज्ञो बालोपि सन्नुपगतस्तपसे वनानि ॥ तस्मा अ
दाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात् ॥ ८ ॥

नं दहंतमपि ॥ ते न दहंति ॥ क्रोधेनाभिभूयंते न त्वसह्यं ॥ ननु अहो सोयं रोषः यदंतरं यस्य स्वस्थं प्रविशन्न
लं बिभेति ॥ यद्वा यस्यांतः मनः कथंभूतममलं निर्मलं प्रविशन्निति ॥ प्रबोधचंद्रोदये रोषः ॥ अंधीक
रोमि भुवनं बधिरीकरोमि धीरं सचेतनमचेतनतां नयामि ॥ कृत्यं न पश्यति न चात्महितं शृणो
ति धीमानधीतमपि न प्रतिसंदधाति ॥ ७ ॥ बालेन ध्रुवेणैव कमप्यवतारं सूचयति ॥ मातुः सपत्न्या उदि
तानि उक्तानि वाक्यान्येव पत्रिणो बाणाः तैर्विद्धो ध्रुवः राज्ञ उत्तानपादस्य अंति समीपे ॥ तपसे तस्मै ध्रुवग
तिं ध्रुवपदं प्रददौ ॥ यां उपरि स्थितान्ता ॥ अधस्तात् स्थिताः दिवि भवा दिव्याः सप्तर्षयः स्तुवंति ॥ यद्वा

इद्धरवतारमाह ॥ यद्यदा ऋषिभिरर्थितः तदावेनं वात्वा अनर्घ्यं तत्स्वरूपनिपदं नामलेभे ॥ पुंनाम्नो नरका
द्यस्मात्पितरं त्रायते स तं तस्मात्पुत्र इति प्रोक्तः स एव मेव स्वयं भुवे मिपुत्रपदस्मृतमिति ॥ कथंभूतं दिनातो
ग्राप मेव वत्तं तेन विश्वं दृष्टं पौरुषं भगमे ष्वयं चपस्तं चरित्रं नरमाह ॥ येन वेदजगतिन्नगादयो
वसानि यत्रादिद्दुषाणि गुणा ॥ ४ ॥ सुषभावतारमाह अयो हरिर्नाभेरग्नीध्रपुत्रान्मेरुदेव्यां सुत्रुपा समा
वसानि यत्रादिद्दुषाणि गुणा ॥ ५ ॥ ऋषभावतारमाह असौ हरिर्नाभेरग्नीध्रपुत्रान्मेरुदेव्यां सुत्रुपसमा
भेभौ यां यामेरुदेव्याप वसुदेवीत्यपिसंज्ञा ॥ तत्र वयोगेन नित्यसमाधिना चर्या ॥ यदिति यां तव्रहेतः ९०
समदृक् ॥ तत्रापि देहे तः स्वस्थः स्वरूपे स्थितः ॥ यतः प्रशांतेंद्रियः तत्कृतः यतः परितो मुक्तसंगः
यदेन गुप्यमगतं हि जवा कस्व त्र विसृष्टपौरुषभगं निरयेपतंतं ॥ नात्वा विंतो जगति पुत्रपदं
वलेभे दुग्धावसन्निवसत्याशकलापिपेन ॥ ५ ॥ नाभेरसाहषभमत्रा सम्रदे विसूनुर्यो वै चचार
समदृग् जडयोगचर्या ॥ यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्त
संगः ॥ ९० ॥ सत्रेममास भगवान्हयशीर्षनामा साक्षात्स यज्ञपुरुषस्तपनीयवर्णः छंदोम
यो मखमयोखिल देवतात्मा वाचो बभूवुरुशतीः श्वसतोस्यनस्तः ॥ ९१ ॥ मत्स्यो युगांतसम
ये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ॥ विस्रंसितानुरुभये सलिले मुखा
न्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ ९२ ॥
हयग्रीवावतारमाह ॥ सत्र इति ॥ अयो हरिस्त्वध्वर्तीते
सप्त वसाता द्रुगवानमम ब्रह्मणः सत्रे पत्ते हयशीर्षं आस ॥ तपनीयं स्वर्णं तद्वद्वर्णो यस्य ॥ छंदो
मयो वेदमयः तद्विधेयाग्ये मखाः तन्मयः अमर तन्मयः इति वा पाठः ॥ मखेर्यजनीया अखिला देव
ता यस्यात्मा च ॥ अस्य श्वसतः नस्तः नासापुटात् ॥ उशतीः कमनीया वेदसंज्ञा वाचो व
भूवुः ॥ मत्स्यावतारमाह ॥ ९२ ॥ मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः क्षोणीमयः पृथ्वीप्रधानश
वे ॥ अत एव निखिलजीवनिकायानामाश्रयः मेरुवत् ॥ विस्रंसितान्पतितान् वे
दाश्च यद्वर्त्यर्थः ॥ अत एव निखिलजीवनिकायानामाश्रयः मे अर्थात् ॥ विस्रंसितान्पतितान् वे
दस्य मार्गान् ॥ वेदान्नादाय ॥ तत्र युगांतसलिले हर्षेण विजहार कूर्मावतारमाह ॥ ९३ ॥

क्षीरोदधौ कच्छपवपुः सन् गोत्रं मंथनार्थे मंदरगिरिं पृष्ठेन विधृतवान् ॥ कदाचन लब्धये क्षीराब्धिमन्
थनं सतो ॥ निद्रायाः त्वराः अवसरः ॥ अतस्तोयस्यसः अंते परिवर्तः परिभ्रमः कषाणां कषणं बभ
ञ्ज सख घर्षो यस्यां साकं दूर्यस्य सः ॥ पदाद्रिपरिवर्तनप्रवकर्षः कषणेन ॥ अरुणतिअप्रयातीति
कषणकं दूर्यस्य ॥ श्रीनृसिंहावतारमाह ॥ ३ ॥ दैत्यविष्णपादेवाह्लेयापुत्रभयं हेतीति तयासभगवा
नकथ्यमृतं भ्रमं स्तोमकुद्धो दंष्ट्राग्रयस्मिन् ॥ तत्करालवक्त्रं यस्मिन् ॥ तं देवं दृष्ट्वा रंजं ॥ आराह्नमी

क्षीरोदधावमरदानवयूथपानामुन्मथ्यताममृतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोद्रिपरिवर्तकषाणकंडूः ॥ ३ ॥
दैत्यविष्णोर्भयहास्त्रसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं ॥ दै
तेंद्रमाशुगदयाभिपतंतमाराद्दूरौ निपात्य विददार नखैः स्फुरंतम् ॥ ४ ॥
अंतः सरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः ॥ आ
हेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय ॥ ५ ॥
श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ॥
चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान्कृपयोज्जहार ॥ ६ ॥

प्रथम ॥ गदयोपलक्षितमभिपतंतं तेन दैत्यं विददार ॥ ४ ॥ हरिसंज्ञकावतारमाह ॥ अंतः त्रिकूटशैलेन ॥ ग
जेंद्रयूथपतिः ॥ तीर्थं रूपं श्रवो यस्य सः ॥ तीर्थश्रवाः हे तीर्थश्रव श्रवणेनैव मंगलं नामधेयं यस्य ॥ श्रु
त्वा हरिः तं शरणार्थिनं ॥ तं हस्ते गृहीत्वा प्रमदः ॥ किं कृत्वा नक्रस्य वदनं विनिपाट्य द्विधा कृत्वा तस्मा
त् ॥ वदनात् कृपया ॥ उज्जहार ॥ उद्धृतवान् ॥ वामनावतारमाह ॥ न्यायानिति ॥ ६ ॥

ऋद्धितेः सतानांत्वादृशाहि त्रालोमध्येत्रधिपतः यत्ताधि ष्ठानाविस्मः प्रवचनं कनीयानवितोर्णे ष्टः गुणमनेवाह ।। पद्यतत्रमांल्लोकान्विक्रमेपादस्यासैःक्रांतवान ।। अथ प्रतिष्ठतानंतरमेवमवदेत बलेः त्वांवामनरूपेणजगदे ।। नन्वीश्वरः स्वयं किमितितयाचकेतत्राहयोयाञ्चांविनाधर्ममार्गे वर्त मानोनबालःप्रेश्वर्यान्नभ्रंशनीयः ।। १९ ।। ननुतर्हियाञ्चयापि चालनमनुचितमेवेत्याशंक्याह ।। ततोपि कं स्वसालोकं दासामी स्यायायेनतद्भवानित्याह ।। नार्थ इति ।। यद्विभुर्याधिपत्यमिदानींबलात्ग्राम मनुदीयमानं ।। अयंबलेः पुरुषार्थोनभवति ।। कुतइत्यतआह ।। अस्य पद्मनिष्ठेदः ।। उरुक्रमस्य पा

त्मायानस्यैश्वरजोप्यदिनेः सतानांलोकान्विक्रमरमात्मदयाधिपतः ।। त्वांवामनेनजग दहेविपदःत्वेनयात्राम्रतेपाधिवरस्य भुमिनेवास्मः ।। १९ ।। नार्थो बलेरयमुरुक्रमपादशौ चमापःशिखाधृतवनोविबुधाधिपत्यं यो वै प्रतिष्ठनमतेनचिकीर्षदन्यदात्मानमंग गिरसाहरयेभिमेने ।। २० ।। तस्यैवचनारदस्य भगवान्विहृदभावेनसाधुपरिहृष्ट उवाच योगम् ।। ज्ञानेचभागवतमात्मसतत्त्वदीपंयद्ब्रह्मदेवशरणंविदुरंजसैव ।। २१ ।।

दृष्टोवं ।। वरणत्वालनदृष्यत्रपः ।। आसर्वतोहृतवतः कपिलापांमद्धीमर्थः ।। किंचस्वकेणवा तिनःशासोपिग्रंगहेनारदप्रतिष्ठतेविनाअन्यत्रचिकीर्षत्कर्तुंनैच्छत ।। यः तृतीयपादहरणार्थेह रयेआत्मानंदेहमपिअभिमेनेअंगीकृतवान् ।। एवंसदेहेहये लोकंअदपादत्वनोविबुधाधिप त्यमर्थोनभवतीत्यर्थः ।। २० ।। हंसावतारमाह ।। तस्मामितिमहयाविहृदहेनभावेनअन्तर्हितयाभ त्यापरितुष्टः सन्भक्तियोगंसाधुययातथा ।। उवाचज्ञानेचेति ।। विज्ञानसाधनंकिंतद्भागवतं नाम ।। कथंभूतंतत्वमेवसतत्वमात्मतत्त्वदीपकंविहृदभावेनेति ।। विशेषणस्यफलमाह ।। य

भा
टी
२९

स्ततेजः निजप्रभावमेव बधकं सर्वस्तं नेविभर्ति वकवदप्रतिहतं प्रभावं विभर्तीत्यर्थः ॥ तदेवाह ॥ मऊ
वेशपालकः सन् ॥ यथा एणं लोकानां स्वहेतुं परिस्थिते सत्यलोके कमनीयां स्वकीर्तिं विस्तारयन् ॥ रा
जसदेहं विधत्ते ॥ २॥ एवं तत्पूर्वं वतारमाह ॥ लोके प्रवर्तीयं यत्त्वेन तस्मिन् सन् ॥ गुरुर्नो महदरोगितां स्वना
म्नैव रुजः रोगान् हंति ॥ स्वयमेव कीर्तिं निवृत्तिः ॥ कीर्त्यं तिस्यायोक्तिः ॥ अमृतेन मरणमृत्युत्तमाग्रुर्यस्मात्तः
एव अवसन्नं हृदंदे यैः प्रतिहृहं यत्ते भागं यावदं धन्यलभत ॥ अवाप्नुहमिति ॥ याद्वेयमेवार्थः
प्राग्विविधं वेदं चात्र मुनिमवर्तयति ॥ २४ ॥ परशुरामावतारमाह ॥ जगतः तयाय विपिनादे
वक्रेचक्षत्रवद्दितं दयास्वस्ततेजोमस्वंतरेगुमत्रुवंशयरोविभर्ति ॥ इहेशुराजसदसंवद
यास्वकीर्तिं सत्येविष्टहज्ञातीमयं पश्चविचैः ॥ २ ॥ यत्वेन विष्णुभगवान्नूपमेव कीर्तिं
नोऽस्माहृणां गुरुर्नो हरजग्राग्रुर्हेति ॥ यत्तेव भागमस्ताग्रुरवाप्नुहमाग्रुश्च वेदमनुशास्त्रव
तीर्य लोके ॥ २५ ॥ तत्वंद्वयाय विपिनोपमस्तं महात्माग्रयगुरुज्झितनपथं नरकर्णितिलिसं ॥ इदं
मेसावववनिकेंटकगुप्रवीर्यस्त्रिः समहृत्वतरुधारयरशुधेन ॥ २४ ॥ अस्मत्प्रसादसमुखः कल
पाकलेशरत्नाकवंया अवतीर्यगरोर्निदेशो ॥ निष्टब्वनेसदयितानुजग्राविवेशयस्मिन्वि
वेनोपमस्तं संवर्धितं स्वस्ववेसमर्थेन मितिवाव्रासणोभ्योदू रुक्ष्वदशकेयरग्रार्तिमाहृत्न ॥ य
स्तीनितयाग्रतः ॥ उज्झितः येयावेदमार्गो येन ॥ अतएव नरकार्तिं लिस्पतीव ॥ एवंभूतमवनेः
कंटकत्वस्यंतत्वमसौ महात्मा हरिः ॥ उद्धर्तिपाटयति ॥ तीव्रादीवें धारेण परशुना ॥ २४ ॥ श्रीरामा
वतारमाह त्रिभिः अस्मा कंवस्मादीनांयसादे समुखः कलयाभरतादिरूपयास्सहकलामायात्मा
स्मार्दयाः गुरोर्दशरथस्यासान्नायोनिष्टन् ॥ सीता लक्ष्मणाभ्यां सहितो वनमाविवेश ॥ यस्मिन्विरो

यस्मैरामायउदधिर्मार्गंददौसयदिश्रीवृंदारण्येयथात्रिभुवनंदिधक्षुः तद्वद्त्रिभुवनंलंकांदग्धुमिच्छोः वह्नी
वतर्थ्यै॥ यद्वापंचमीऐंद्रियस्तोः रामाद्भयंयस्मात्मंतेनागवेगेयस्मेतिकथंभूतः उदधिः कुंठधामे
यद्भूयंतेनांगेभवेयः कंपोयस्य हरेवृंतेमानानांसहस्रीतानांतयानिमितंभूतयामथितः वृभितोते
यः तेनसक्षोभणः समस्तजंतुभिः तथा मंतेतत्पमानंमकरागणभुजगानांनक्राणांच चक्रपक्षिन॥ अथ
किंचभुद्हेनवणास्यवः तस्य लसफौनहरुयाभयायेमहेंद्रवाहसेनावणास्पदंतां नेविंदंविताः स
धवलिमाधवलीकृताः तत्र दिक्पतिनिः प्रकाशितानांसमर्थाः यावद्वंभूताः ककुभोदिशाः ताः॥ स्व

यस्मात्प्रदाड्उदधिरुद्धमथागवेगोमार्गंसपदित्रिभुवनंहरवद्दिधक्षोः॥ हरेसहस्रमथितरोव
सक्षोभणादृष्टानांतत्पमानमकरोरगनक्रचक्रः॥ अथ॥ वक्षस्थलसफौनहरणमहेंद्रवा
हदंतैर्विदंविताककुबपरदहासम्॥ सद्योसभिः सह्दविनेष्यतिदारकहंत्रेविस्फूर्जि
तैर्थंतुषतुच्चरतोपिसेषे २५

यतेसेवतेपालयतीतिवा॥ तस्यातसरदारहंतः रावणस्य
प्रहोमसस्मः कोस्मोस्तीतिमहागर्वेणकुंठधामंहासं॥ सहभिः प्राणैः सहसद्यः शीघ्रंविनेष्यति
प्रयनेष्यति॥ कैः यत्रणोविस्फूर्जितैः टंकारवत्रोषैरेव॥ कथंभूतस्य प्रथिसेमेसपरसैन्यमध्येउद्ध
तः उत्कर्षेणाविचरतः॥ ककुभपरदहासमितिपाठे॥ दंतैरुज्वलितानांककुभांनयेनयो हको
हासः संजातोगर्वः॥ तमपनेष्यतीत्यर्थः॥ श्रीकृष्णावतारमाह भूतेरितिदशभिः॥ २५॥
॥

भा०
द्वि०
२०

स्वेरेतवाः स्वसंयोगात्संभूताः॥ तन्नानः तेषांवद्वृधैः सैवैर्विमर्द्दितायामाचेरणपीड़ितायाः कलयात्मेण
सरज्ञातः सन्न॥ कोसौज्ञातः सितकृष्णोकेशोसवपसाढ्यास्तितकृष्णकेशात्वेशोभेवननवयः परिणा
मकृतमविकारित्वात॥ यत्तत्कं विष्णुपुराणे॥ उज्जहारात्मनः केशौसितकृष्णौमहाप्रभुनिरिति॥ यद्वुभा
रते॥ सवापिकेशोहरिरुज्जहारैकंशुक्लमेकमपरंचापिकृष्णं॥ तौचापिकेशावाविशतांयदूनांकुले
स्त्रियंरोहिणींदेवकींच॥ तयोरेकोबलभद्रोबभूवयोसौश्वेतस्तस्यदेवस्यकेशः॥ कृष्णोद्वितीयः
केशवःसंबभूवकेशोयोसौवर्णतः॥ कृष्णउक्तइति॥ तत्तनकेशमात्रावतारामिप्रायं॥ किंवभा

भूमेः सुरेतरवरूथविमर्द्दितायाः क्लेशव्ययायकलयासितकृष्णकेशः॥ जातःकरिष्यति
जनानुपलक्ष्यमार्गः कर्माणिचात्ममहिमोपनिबंधनानि॥ २६॥ तोकेनजीवहरणंयदुलू
किकायास्त्रैमासिकस्यचपदाशकटोपवृत्तः॥ यद्रिंगतांतरगतेनदिवस्पृशोर्वाउन्मूल
नंत्वितरथार्जुनयोर्नभाव्यम्॥ २७

तावतागणहृपंकार्यं॥ किंघटेतत्॥ मत्केशावेवैतत्कर्त्तुंशक्ताविति
द्योतनार्थंरामकृष्णयोः शुक्लवर्णस्यचनार्थंकेशोद्धरणमितिगम्यते॥ अन्यथातत्रैवपूर्वापरविरोधाप
त्तेः॥ कृष्णस्तुभगवान्स्वयमित्येतद्विरोधाच्चकथंभूतः परमेश्वरत्वंयानजनैरनुपलक्ष्योमार्गोयस्य
तर्हिईश्वरत्वेकिंप्रमाणं॥ अतिमानुषकर्मान्यथानुपपत्तिरेवेत्याह॥ आत्मनोमहिमाउपनिब
ध्यतेअभिव्यज्यतेएषुतानि॥ २६॥ एतदेवप्रपंचयतितोकेनेत्यादिनाबालेनपूतनायाजीवह
रणंयत्॥ रिंगताजानुभ्यांगच्छतांतरगतेनदिविस्पृशोरत्युच्चयोरितरथाअनीश्वरस्येतेनभ

२०

विषतोयपीतान् ॥ विषमयं तोयं तस्य पानेन येषां पालान् ॥ गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति
एवं तत्पयःक्रीडन ॥ उरगं कालियं शुद्धादयिष्यति ॥ नकुलदयेतस्या हृदिस्थानि विषवत्तायमेति विषवीर्येण
विल्लोलो वंवलानि ह्रापस्य ॥ ४५ ॥ दिव्यमलौकिकमिवेति लोकोक्तिः ॥ उत्वेष्यति ॥ इहुदिष्यतिशुविशीर्ष
नसंवेधिनि वनेषु कुरुत्पर्थः ॥ अतो दावाग्रेर्हेतोः अवसितो निश्चितस्तत्कालोयस्ततं ॥ सबलः सग
मः ॥ अनघिगम्य दुर्लभं वीर्यं यस्य तत्वनिशि निःशयानमिति कालियं दग्नेरामांयश्चनाक्षी रेनेवे
पिधाय पिरिनेकारयित्वेति शुनाटव्यामिति तेयं ॥ ४६ ॥ उपवध्यनेनेनेतिउपबंधं तत्साधनेषु लं

ततो देवजनेव जनपद निविषतोयपीतान्यालोस्य जीवयदत्र गृहहष्टिरुष्णा ॥ नकुलदयेतिविषवीर्यवि
लोलसिद्धशुद्धाटयिष्यदुरगं विहरन्ह्रदिन्यां ॥ ४७ ॥ नत्कर्म दिव्यमिवयन्निशि निःशयानं दावाग्नि
नाशुविवनेपरिदह्यमाने ॥ उन्नेष्यतिव्रजमतो वसितांतकालेनेत्रेपिधाय सबलोऽनधिग
म्यवीर्यः ॥ ४८ ॥ गृह्णीतयद्यदुपबंधममुष्यमाता शुल्वं सुतस्य न तु तत्तदमुष्यमाति ॥ यज्जृंभतो
स्यवदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥ ४९ ॥ नंदं च मोक्ष्यति भयाद्व
रुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च ॥ अह्न्यापृतं निशि शयानमतिश्रमेण
दाम ॥ अमुष्यमाता यशोदा गृहीत ॥ अमुष्यनमाति वं लोके वैकुंठ उपनेष्यति गोकुलं सम ॥ ५०
धनु सस्मितं नमवतीति नहर्यंते इत्यर्थः ॥ गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता ॥ निजमैश्वर्यं
तापितास्यासीदितियत ॥ नचकर्मदिव्यमेवेति सर्वत्रसर्वेणवान्वयः ॥ ५० ॥ वरुणस्य पाशाद्यद्भयं
तस्मान्मोचयिष्यति ॥ मयसुतुनाव्योमः नाम्नासुरेण अह्नि अहनि ॥ निशि शयानमिति च वैकुंठस्था
निसाधनात् दृष्टानाभावो दर्शितः ॥ उपनेष्यति प्रापयिष्यति ॥ गोकुलवासिनं जनं सेस्माच्छ्रये

देवैरं देवपत्न्यो विरचितः विरचितविद्युरितमर्थः मुनवेष्वमरहिते॥ एकस्मिन्नेव करे सलीलं यथा तथा मही
ध्रं गोवर्धनं धाता धारयिष्यति॥ उच्छिलिंध्रं॥ उद्गतं छत्राकारमिव सप्तवर्षो गोपवयो यस्य सः॥ ३२
निशि रात्रौ निशाकररश्मिभिः गौर्यां धवलायां वने क्रीडन्॥ कलानि मंजुलानि पदानि यस्मिन्॥ तच्च
तदायतं दीर्घं मूर्छितं आलापविशेषयुक्तं गीतं तेनोद्दीपिता स्मररुक् यासां तासां गोपीनां हर्तुः शं
खचूडस्य शिरो हरिष्यति॥ ३३॥ ये च प्रलंबादयः ते सर्वे हरिणा हेतुभूतेन॥ तदीयं निलयं मदर्श
नं दर्शनायोगं वैकुंठं वमलं यास्यंतीत्युत्तरेणान्वयः खरो धेनुकः दर्दुरो बकः दर्दुरो बकः इभः कुवा

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून्कृपया रिरक्षुः॥ धर्तोच्छिलींध्रमिव
सप्तदिनानि सप्तवर्षो महीध्रमनघैककरे सलीलं॥ ३२॥ क्रीडन्वने निशि निशाकररश्मि
गौर्यां रासोन्मुखः कलपदायतमूर्छितेन॥ उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्य
ति शिरो धनदानुगस्य॥ ३३॥ ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्र
काद्याः॥ अन्ये च साल्वकपिबल्वलदंतवक्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः॥ ३४॥ ये वा
मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकैकयसृंजयाद्याः॥ यास्यंत्यदर्शन
मलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं॥ ३५॥ ॥

लयापीडः कपिर्द्विविदः कुजो भौमो नरकः॥ ३४॥ ये च मृधे आत्तचापाः॥ समितौ संग्रामे शालंते श्लाघंते स
मितिशालिनः॥ ननु प्रलंबखरकपिबल्वलरुक्मिप्रभृतयो बलभद्रेण निहताः कांबोजादयश्च भी
मार्जुनादिभिः एवं रः प्रद्युम्नेन यवनो मुचुकुंदेन ततः कथं हरिणा॥ तत्राह बलो भीमः पार्थोऽर्जुन इत्याद
यो व्याजाह्वयाः कपटनामानि यस्य तेन॥ सप्तोक्षा वा एवं सत्तेनेनदमिताः कालांतरे यास्यंतीति भावः
एतच्च सर्वमपि करिष्यमेव तत्रान्यथानमाख्यमितिह वैलक्ष्यं संक्षेपः॥ ३५॥

व्यासावतारमाह॥ अनुयुगं मीलिता संकुचिता धीर्येषां स्तोकमल्पमायुर्येषां स्वनिगमः स्वकृतो वेदरा
शिः बताहो दूरपारः इति युगे युगे स्वयमेव अवमृश्य सत्यवत्यामाविर्भूतः सन्॥ स एव हरिः विटपशः शा
खाभेदेन॥३६॥ बुद्धावतारमाह॥ देवद्विषां निष्ठितानां निगमवर्त्मनि स्थितानामपि तदुलेन च दृष्टिभिः पुरीभिः
अदृश्यतूर्भिः अलक्ष्यवेगाभिः॥ मतेर्विमोहः यो अपनामा मोहो यस्मात्॥ मतेः प्रलोभः अत्यन्तलोभः यस्मा
त्तं वेषं पाषण्डवेषं विधाय तेन औपधर्म्यं स्वार्थे ष्यञ् बहु भाषिष्यत इत्यन्वयः॥३७॥ कल्क्यवतारमा
ह॥ यर्हि यदा सतामप्यालये गृहे हरेः कथाः पाषण्डिनः स्युः शूद्राश्च राजानः स्युः तदा कल्कि

काले न मीलितधियामवमृश्य नॄणां स्तोकायुषां स्वनिगमो बत दूरपारः॥ आविर्हितस्त्व
नुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म॥३६॥ देवद्विषां निगमवर्त्मनि नि
ष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः॥ लोकान्घ्नतां मतिविमोहमतिप्रलोभं वेषं वि
धाय बहु भाष्यत औपधर्म्यम्॥३७॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाषण्डिनो द्विजजना
वृषला नृदेवाः॥ स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान्युगान्
ते॥३८॥ सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थानेऽथ धर्ममखमन्वमरावनीशाः॥ अन्ते त्वधर्म
हरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्ति

रूपेण कल्किः शास्ता भविष्यति॥ अत्र च वक्ष्य
नारदसंवादान्यावताराभाविनो वराहादयः॥ मन्वन्तरावतारास्तु भूता भाविनश्च यत्तु तेनान्तरे परशुरामोऽत
रावतैते श्रीरामादयस्तु भाविनः तत्र तत्र क्वचिद्भूतादिनिर्देशश्छान्दस इति द्रष्टव्यं॥ सृष्ट्यादिकार्य
भेदेन मायागुणावतारविभूतीराह॥ सर्गे इति॥३९॥ स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च
मनवश्च अमराः अवनीशाश्च॥ अन्ते संहारे हरः मन्युवशाः सर्पाः बहुशक्तिधारिणो भगवत
इमा विभूतयः॥ इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं न कोऽपि समर्थ इत्याह॥४०॥

भा
द्वि टी
२स्कं
७

हर्षियाः परमाणस्तनपियोविममेगणितवान्॥ नाहंयोपिकोनुविस्नोर्वीर्यगणनांकर्त्तुमर्हतीति॥ क
थंभूतस्ययोविस्नुः त्रिपृष्ठंसत्यलोकंचस्कंभधृतवान्॥ किमितिचस्कंभयस्माद्विक्रमे॥ अस्खलता
प्रतिवातशून्येनस्वरंहसास्वपादवेगेनमहःजनतपःसत्यादित्रिसाम्यसदनमपिस्थानंतस्मादा
रभ्यउरुअधिकंकंपयानंकंपेनधावनंयस्येतिवा॥ अतःकारणात्चस्कंभआत्रिपृष्ठमितिवाक्छेदःसत्य
लोकमभिव्याप्ययःसर्वंधृतवानित्यर्थः॥ तथाचमंत्रः॥ विस्नोर्नुकंमिति॥ अस्यार्थः विस्नोर्नुवीर्या
णिकंप्रवोचंकःप्रावोचदित्यर्थः यःपार्थिवानिरजांसिपिविममेसोपियोविस्नुः त्रेधाविचक्रममाणः

विस्नोर्नुवीर्यगणनांकतमोर्हतीह यःपार्थिवान्यपिकविर्विममेरजांसि
चस्कंभयःस्वरंहसास्खलतात्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानं॥४०॥
नांतंविदाम्यहममीमुनयोग्रजास्ते मायाबलस्यपुरुषस्यकुतोपरेये॥ गा
यन्गुणान्दशशताननआदिदेवः शेषोधुनापिसमवस्यतिनास्यपारम्॥४१॥
येषांसएषभगवान्दययेदनंतः सर्वात्मनाश्रितपदोयदिनिर्व्यलीकम्॥
तेदुस्तरामतितरंतिचदेवमायां नैषांममाहमितिधीःश्वसृगालभक्ष्ये॥४२

त्रिविक्रमंकुर्वन्नुत्तरलोकंचस्कंभअवष्टब्धवान्एतत्स्वरूपंचयतिनोनमितिः॥४०॥ पुरुषस्यमाया
बलेनस्यांतंनविदामि॥ नवेद्मिदशशताननानियस्येति॥ सोप्यस्यगुणान्गायन्पारेनसमवस्यतिन
प्राप्नोति॥४१॥ यदिनकेपिविदंतितर्हिकथंसंचरेरन्॥ तत्कृपयैवस्यादित्याह॥ येषामितिदययेत्दयो
कुर्यात्॥ तेचयदिनिष्कपटमाश्रितचरणाभवंति॥ तेदुस्तरांदेवमायामतितरंति॥ चकारान्माया
पिभवंविदंतिच॥ अयेतिवापाठः॥ अयत्मेवतेषांमायातितरणमित्याह॥ नैषामिति॥ श्वसृगाला
नांभक्ष्योदेहेबुद्धिः॥ अंततस्तेनाभावेपिमायेयमितिज्ञानंतत्कृपयावहनामत्स्यादित्याह॥४२॥

५५

श्री॰
भा॰ द॰
५०

विंशेप्रावृट्शरदोर्भावर्णनेनवर्णितोविस्तरः॥प्रावृट्क्रीडानिरूप्यंतेगोपरामपुत्रोर्हरेः॥हेयादेयोपमा
नेनप्रावृट्शरदृतुश्रियोः॥वर्णनेनतदन्तेस्वयंकृष्णलीलाविवक्षया॥२॥तत्रप्रावृड्वर्णनं॥ततश्रादिक्षा
विशता॥सर्वेषांप्राणिनांसमुद्भवः मृतप्रायाणांजीवनश्रयस्यासाप्रावृट्॥विद्योतमानाः परिधयः
परिवेशादिर्यस्यांसाविस्फूर्जितंसंजातंभितननभस्तलंयस्यांसा॥३॥सांद्रैर्निविडैर्नीलांबुदै

श्रीशुकउवाच॥ ॥तयोस्तदद्भुतंकर्मदावाग्नेर्मोक्षमात्मनः॥गोपाःस्त्रीभ्यःसमाचख्युःप्रलं
बवधमेवच॥१॥गोपवृद्धाश्चगोप्यश्चतदुपाकर्ण्यविस्मिताः॥मेनिरेदेवप्रवरौकृष्णरामौव्र
जंगतौ॥२॥ततःप्रावर्ततप्रावृट्सर्वसत्वसमुद्भवा॥विद्योतमानपरिधिर्विस्फूर्जितनभस्तला॥३
सांद्रनीलांबुदैर्व्योमसविद्युत्स्तनयित्नुभिः॥अस्पष्टज्योतिराछन्नंब्रह्मेवसगुणंबभौ॥४॥
अष्टौमासान्निपीतंयद्भूम्याश्चोदमयंवसु॥स्वगोभिर्मोक्तुमारेभेपर्जन्यःकालआगते॥५॥त
डित्वंतोमहामेघाश्चंडश्वसनवेपिताः॥प्रीणनंजीवनंह्यस्यमुमुचुःकरुणाइव॥६॥तपः
कृशादेवमीढाआसीद्वर्षीयसीमही॥यथैवकाम्यतपसस्तनुःसंप्राप्यतत्फलं॥७॥निशा
मुखेषुखद्योतास्तमसाभांतिनग्रहाः॥यथापापेनपाषंडानहिवेदाःकलौयुगे॥८॥श्रु
त्वापर्जन्यनिनदंमंडुकाव्यसृजन्गिरः॥तूष्णींशयानाःप्राग्यद्वद्ब्राह्मणानियमात्यये॥९॥

विद्युद्गर्जितसहितेनवृत्रसगुणागुणोराछन्नंजीवात्मविद्युद्गर्जितांबुदानांसत्वरजोभिरुपमा॥४
पर्जन्यः सूर्यः स्वगोभिः रश्मिभिः कालेयथाचितसमये॥अत्रराजोपमाकरादानतः समयेउ
न्नेनिरीक्ष्यानुकंपमानानांसहाघ्राप्त्नायस्तंजीवनमपिसृजंति॥तडित्वंतोमहामेघास्तडिद्वंतैः निरी
सविस्पष्टवायुभिर्वेपिताजीवनमुमुचुरितिनयसाग्रीष्मेणकृशारेवमीढापर्जन्येनसिक्ताचि

मुंजाटव्यामपि॥ सर्वगोपानां नाशहेतुर्वनवह्निः सर्वतः प्रादुरभूत॥ सारथिना वायुना कृच्छ्रात्कृच्छ्रे
घातद्रुमादिजनितात॥ तत्त्वतो भांडीरं नीतास्तान मोचयदित्यर्थः॥१२॥ ततोते च भांडीरं प्रापिताः तत
प्रबोधे एवं लीलया विस्मिताः॥१४॥ श्रीदामादिसगोपानां सारामा कृष्णसहकृष्णेन॥ सैश्वर्यमाविष्करोतीति व
मुंजाटव्यांभ्रष्टमार्गं क्रंदमानं स्वगोधनं संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्तयन॥४॥ ता आहूता भगवता
मेघगंभीरया गिरा॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ततः समंताद्दवधूमकेतुर्यदृच्छयाभू
त्क्षयकृद्वनौकसां॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंगमान्महान॥७॥ तमा
पतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभया
र्दिता जनाः॥८॥ कृष्ण कृष्ण महावीर्य हे रामामितविक्रम॥ दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्ह
सि॥९॥ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुं॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः॥१०॥
श्रीशुक उवाच॥ वचो निशम्य कृपणं बंधूनां भगवान्हरिः॥ निमीलयत मा भैष्ट लोचनानीत्यभा
षत॥११॥ तथेति मीलिताक्षेषु भगवानग्निमुल्बणं॥ पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमो
चयत॥१२॥ ततश्च तेऽक्षीण्युन्मील्य पुनर्भांडीरमापिताः॥ निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचि
ताः॥१३॥ कृष्णस्य योगवीर्यं तद्योगमायानुभावितं॥ दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरेऽमरं॥
१४॥ गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः॥ वेणुं विरणयन्गोष्ठमगाद्गोपैरभिष्टुतः॥१५॥ गोपी
नां परमानंद आसीद्गोविंददर्शने॥ क्षणं युगशतमिव यासां येन विनाभवत॥१६॥ इति श्रीभागव
ते दशमस्कंधे दावाग्निमोचनं नामैकोनविंशोऽध्यायः॥१९॥ रामजी नमो नमः॥ ॥

द्वितीयपातनः॥१९॥ ॥ ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे एकोनविंशोऽध्यायः॥१९॥

श्री० भा० द० ५५

आगतस्मृतिरभयश्च आत्मनः सार्थं पसमूहं विहाय हरंतं रिपुमहनत्॥ यद्वा विहायसा आकाशमार्गेण॥ आत्मनः सार्थमर्थमिव हरंतमिति वज्ररंहसा वज्रवेगेन मुष्टिना सुरपतिर्गिरिमिव॥ महारवं समीरयन् नदन्॥ तदर्हणं प्रशंसार्हं॥ ३४॥ इति श्री दशमस्कंधे भावार्थदीपिकायामष्टादशोऽध्यायः॥

अथागतस्मृतिरभयो रिपुं बलो विहायसार्थमिव हरंतमात्मनः॥ रुषाहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा॥२५॥ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन्रुधिरमपस्मृतोऽसुरः॥ महारवं व्यसुरपतत्समीरयन्गिरिर्यथा मघवत आयुधाहतः॥२६॥ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना॥ गोपाः सुविस्मिता आसन्साधु साध्विति वादिनः॥३॥ आशिषोऽभिगृणंतस्तं प्रशशंसुस्तदर्हणं॥ प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः॥३१॥ पापे प्रलंबे निहते देवाः परमनिर्वृताः॥ अभ्यवर्षन्बलं माल्यैः शशंसुः साधु साध्विति॥३२॥ इति श्रीभागवते दशमस्कंधे प्रलंबवधो नामाष्टादशोऽध्यायः॥१८॥ श्रीशुक उवाच॥ क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः॥ स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरं॥ अथ गावो महिष्यश्च निर्विशंत्यो वनाद्वनं॥ इषीकाटवीं निर्विविशुः क्रंदंत्यो दावतर्षिताः॥२॥ तेऽपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा॥ जातानुतापा न विदुर्विचिन्वंतो गवां गतिं॥३॥ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां॥ मार्गमन्वगमन्सर्वे नष्टाजीव्या विचेतसः॥४॥

ऊनविंशे निविष्टं तु गोपगोकुलमच्युतः॥ मुंजारण्यमहारण्याग्नेररक्षत् त्रिपानतः॥ दूरचारिणीः दूरचारिण्यः॥ वनाद्वनं निर्विशंत्यः दावेन तर्षिताः तृषिताः क्रंदंत्यः इषीकाटवीमगुः छिन्नवनत्वात् विशेषारण्यं निर्विविशुः रामकृष्णादयो येन तेन अनुगतास्ता गावो दूरे इति आच्छिन्नैः खुरैर्गोष्पदैः

तेषु तेषु चारयतोः सतोः तद्वने तस्मिन्वने तयोर्निर्धार्य यथायथा यथं वयो बलाद्यनुरूपं द्वंद्वीभूय यथ
विहृतो नायकौ तत्र केचन श्रीकृष्णसंघट्टिनः कृष्णपक्षीया वा समानाः दृष्टेनोस्मानाः कृष्णसंघट्टिव
चेनाय प्रवहन्सतेस्मिन्निमवरोहणमर्यादातः परं दूरमगात्॥२७॥ धरणीधरेंद्रवत् कृष्णगौरवं यस्स
तनिज्जमात्मस्वरं॥ वपुराश्रितः पुरटपरिच्छदः स्वर्णालंकारैः तडिद्युमान्विद्युद्दीप्तिमान्॥ इत्यंले
पश्यंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः गोपरूपी प्रलंबोगादसुरस्तज्जिहीर्षया॥१७॥ तं वि
द्वानपि दाशार्हो भगवान्सर्वदर्शनः॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन्॥१८॥ तत्रोपाहू
य गोपालान्कृष्णः प्राह विहारवित्॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथं॥१९॥ तत्र
चक्रुः परिवृढौ गोपा रामजनार्दनौ॥ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे॥२०॥ आचेरु
र्विविधाः क्रीडा वाह्यवाहकलक्षणाः॥ यत्रारोहंति जेतारो वहंति च पराजिताः॥२१॥ वहं
तो वाह्यमानाश्च चारयंतश्च गोधनम्॥ भंडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः॥२२॥ राम
संघट्टिनो यर्हि श्रीदामवृषभादयः॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप॥२३॥ उ
वाह कृष्णो भगवान्श्रीदामानं पराजितः॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं॥२४॥ अ
विषह्यं मन्यमानो बलं दानवपुंगवः॥ वहन्द्रुततरं प्रागादवरोहणतः परम्॥२५॥ तमु
द्वहन्धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः समास्थितः पुरटपरिच्छदो बभौ त
डिद्युमानुडुपतिवाडिवांबुदः॥२६॥ निरीक्ष्य तद्वपुरलमंबरे चरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं
कारोपमा उडुपतिवाडिति रामोपमा॥ उडुपतिं वहतीत्युडुपतिवाट् यद्वियथा चितस्यास्यानेषु।
स्थिता विद्युतो भवंति उपरिष्टादुडुपतिः तदा सोंबुदो यथा भवति तद्वद्बभावित्यर्थः॥२६॥ अलमति वे

ज्वलच्छिखं कटककिरीटकुंडलत्विषाद्भुतं हलधर ईषदत्रसत्॥२८॥

अगाधतोयेति ॥ अगाधानि तोयानि यासां तासां ह्रदिनीनां नदीनां तटोर्मिभिः पुलिनैः द्रवत्पुरीष्यः पंकोदय्याः तस्याः भुवः रसं शाद्वलितं शाद्वलयुक्तं तोयं विषवदुल्बणा अपि सूर्यकराः न गृह्णंति न हरंति ॥ न हरंति ॥ नदंतश्चित्रा मृगादिजा यस्मिन् ॥ गायंतो मयूरा भ्रमराश्च यस्मिंस्तत् ॥ कूजंतः कोकि

अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः ॥ न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णते ॥६॥ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजं ॥ गायन्मयूरभ्रमरं कूजत्कोकिलसारसं ॥७॥ क्रीडिष्यमाणस्तत्कृष्णो भगवान्बलसंयुतः ॥ वेणुं विरणयन्गोपैर्गोधनैः संवृतोऽविशत् ॥८॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ॥९॥ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे ॥१०॥ गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः ॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥११॥ भ्रमणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् ॥१२॥ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयं ॥ शशंसतुर्महाराज साधु साध्विति वादिनौ ॥१३॥ क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया ॥१४॥ क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया ॥१५॥ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुंजेषु काननेषु सरःसु च ॥१६॥

लाः सारसाश्च यस्मिंस्तत् ॥ काकपक्षधरौ चूडाकरणात्प्राक् नवे शोभामात्रादिप्रकारैः नियुद्धेन बाहुयुद्धेन विक्रीडतुः ॥१२॥ कुंभैः कुंभतुल्यफलैः अस्पृश्यनेत्रबंधेन चक्षुर्बंधनं यस्यां सा क्रीडा मृगाणां खगानां चेष्टया दर्दुरैः भेकैः प्लावैः मंडूकादिलम्फनैः स्पंदोलिकया दोलालम्बनेन नृपाणामिव लीलया ॥ नद्यः

कालाग्नेर्मृत्युरूपादग्नेः॥ नमृत्योर्बिभिमः किंतुत्वच्चरणवियोगादित्याह नशक्नुमइति॥२५॥ विभो

स्ववाक्किदंडेननतः स्वशरणागतान्॥ तोयानपादत्तनोसावननाद्दनवह्नितः॥२॥ इतिश्रीभागवतेभा

वार्थदीपिकायांदशमेसप्तदशः॥१७॥ ॥ अष्टादशेततोग्रीष्मेवसंतगुणलक्षिते॥ प्रलंबानयहलेना

लं॥ प्रलंबंवैलीलयाहरिः॥ हत्वान्नृत्यफणाग्रेषुकालियस्यसकौतुकं॥ बलेप्रलंबंतुगासमारोह्य

हत्वाजिहा॥२ गोपालछद्ममायया गोपालनमेवछद्मयस्यास्तया॥२॥ वसंतसाम्यमाह चतुर्भिः १

सुदुस्तरान्नःपाहिकालाग्नेःसुहृदःप्रभो॥ नशक्नुमस्त्वच्चरणंसंत्यक्तुमकुतोभयं॥२४॥

इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजगदीश्वरः॥ तमग्निमपिबत्तीव्रमनंतोनंतशक्तिधृक्॥२५॥

इतिश्रीभागवतेमहापुराणेदशमस्कंधेकालियदमनेनामसप्तदशोध्यायः॥१७॥ श्री

शुकउवाच॥ अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः॥ अनुगीयमानोन्यविशद्व

जंगोकुलमंडितं॥१॥ व्रजेविक्रीडतोरेवंगोपालछद्ममायया॥ ग्रीष्मोनामर्तुरभवन्नाति

प्रेयाञ्छरीरिणाम्॥२॥ सचवृंदावनगुणैर्वसंतइवलक्षितः॥ यत्रास्तेभगवान्साक्षाद्रा

मेणसहकेशवः॥३॥ यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं॥ शश्वत्तच्छीकरर्जीषद्रु

ममंडलमंडितम्॥४॥ सरित्सरःप्रस्रवणोर्मिवायुनाकह्लारकंजोत्पलरेणुहारिणा

नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले॥५॥

यत्रग्रीष्मेपिनिर्झराणांनिर्ह्रादेननिवृत्तस्वनाः छन्नध्वनयोझिल्लिकाकंठोरध्वनिस्स

ह्लकीबाः यस्मिंस्तथाभूतंभवति॥ किंचशश्वत्तेषांनिर्झराणांशीकरैरर्जीषबुकर्णैः॥ झल्लीबाः

क्लिप्यायेद्रुमाः तेषांमंडलैर्मंडितं॥४॥ यत्रग्रीष्मेवनेवानिदाघोग्रीष्मस्तेनतत्कालीनवस्यको

मांचभवतियोदवस्तायः॥ अतिशाद्वलेअतिहरिततृणाकीर्णेयदातिक्रांतशाद्वले॥ ननुशाद्व

श्री॰
भा॰ द॰
पं॰ ५०

तस्य गरुडस्यागमं श्रुत्वा अथ तया दुरासदः ॥८॥ तद्गम्यत्वे कारणमाह ॥ अत्रेति ॥ विवादितो यिलेलिहः स
र्पः न शवावात्सीत् ॥१२॥ ज्ञात्वा नंदः सर्वाणि तेनालेक्षन्तः ॥१३॥ असवः इन्द्रियाणि ॥ प्रमोदनिभृतात्मानः आ

अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति ॥ सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहं ॥११॥ तं
कालियः परं वेद नान्यः कश्चन लेलिहः ॥ अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः ॥१२॥
कृष्णं ह्रदाद्विनिष्क्रान्तं दिव्यस्रग्गन्धवाससं ॥ महामणिगणाकीर्णं जाम्बूनदपरिष्कृतं ॥१३॥ उ
पलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः ॥ प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे ॥१४॥
यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव ॥ कृष्णं समेत्य लब्धेहा आसंल्लब्धमनोरथाः ॥१५॥
रामश्चाच्युतमालिंग्य जहासास्यानुभाववित् ॥ नगा गावो वृषा वत्सा लेभिरे परमां मुदं ॥१६॥
नंदं विप्राः समागत्य गुरवः सकलत्रकाः ॥ ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥१७॥
देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे ॥ नंदः प्रीतमना राजन्गाः सुवर्णं तदादिशत् ॥१८॥
यशोदापि महाभागा नष्टलब्धप्रजा सती ॥ परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः ॥१९॥
तां रात्रिं तत्र राजेन्द्र क्षुत्तृड्भ्यां श्रमकर्षिताः ॥ ऊषुर्व्रजौकसो गावः कालिन्द्या उपकूलतः ॥२०॥ तदा शु
चिवनोद्भूतो दावाग्निः सर्वतो व्रजं ॥ सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥२१॥ तत उत्था
य संभ्रान्ता दह्यमाना व्रजौकसः ॥ कृष्णं ययुस्ते शरणं मायामनुजमीश्वरं ॥२२॥ कृष्णकृष्णसम
नं दह्यमानमनसः ॥२४॥ लब्धेहा लब्धचेष्टाः ॥२५॥ नगा वृक्षा अपि पूर्वं दुःखिताः सन्तः हे रामा
मयपवविरहात्स्वस्थाः ॥२६॥ न विप्रा ऊचुः लब्धनष्टप्रजा नष्टप्राप्यपुनर्लब्धा प्रजा यया सा ॥२९॥

उपहार्यैः सर्व्वजनैर्मासि मासीह यो बलिः॥

उपहार्यैर्भक्ष्यैः सर्पजनैः सर्पाख्यैर्जनैः वानस्पत्यः वनस्पतेर्मूले देयः॥ नागानां तदा यथा परिहाराय यो
बलिर्निरूपितः उपकल्पितः ते च नागाः स्वं स्वं भागं जनैर्दत्तं सुपर्णाय प्रयच्छन्ति ततो भीताः गोपीथाय
रक्षणाय विषवीर्याभ्यां यो मदस्तेनाविष्टः काद्रवेयः कद्रूपुत्रः गरुडं कदर्थीकृत्य विगणय्य स्वयं
ता उपहार्यैः सर्पाणां भक्ष्यैः सर्पाख्यैर्जनैः॥ नागानां यस्मिंस्त्रैकैको नागो दीयते तेन यथाभूतो यो ब
लिः॥ सुपर्णाय निरूपितः॥ तत्र स्वं स्वं भागं सर्वे नागाः प्रयच्छन्ति कालियस्तु न प्रयच्छति॥ किं त्विमं द

श्रीशुक उवाच॥ वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः॥२॥ स्वं स्वं भागं प्रयच्छन्ति नागाः पर्व
णि पर्वणि गोपीथायात्मनः सर्वे सुपर्णाय महात्मने॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु
कालियः॥ कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिं॥४॥ तच्छ्रुत्वा कुपितो राजन्भगवान्भग
वत्प्रियः॥ विजिघांसुर्महावेगः कालियं समुपाद्रवत्॥५॥ तमापतन्तं तरसा विषायुधः
प्रत्यभ्ययादुत्थितनैकमस्तकः दद्भिः सुपर्णं व्यदशद्ददायुधः करालजिह्वोच्छ्वसितोग्रलो
चनः॥६॥ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान्प्रचण्डवेगो मधुसूदनासनः पक्षेण सव्येन हिरण्य
रोचिषा जघान कद्रूसुतमुग्रविक्रमः॥७॥ सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः ह्र
दं विवेश कालिन्द्याः॥ तदगम्यं दुरासदम्॥८॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितं॥ नि
वारितः सौभरिणा प्रसह्य क्षुधितोऽहरत्॥९॥ मीनान्सुदुःखितान्दृष्ट्वा दीनान्मीनपतौ हते

त्वमपि तं बलिं स्वयं बुभुजे विषमेवायुधं यस्य (कृपया सौभरिः प्राह तत्रत्यक्षेममाचरन्॥१०॥
सः प्रत्यभ्ययात्॥ योद्धुं प्रतिजगाम॥ उत्थितनैकमस्तकः उन्नमितानेकफणः ददायुधः करा
लजिह्वः श्वासातुच्छ्वसिते उग्रलोचने उच्छ्वसितान्युन्नमितानि उग्राणि लोचनानि यस्य सः॥ तार्क्ष्य

श्री
भा॰ द॰
५९

द्वियस्मा भतन्मायात्यागो भवानिव कारणामिव त्वमनुग्रहं विधेहि ॥ ममाज्ञया वा दंतीति ईश्वरत्वानि
ग्रहं वा विधेहीति यतो गोभिर्नृभिश्च नदी भुज्यत इति न युष्मतो भयमाप्नुयात् ॥ तस्य युष्माभिर्भयं
नोत्पादनीयमित्याज्ञां ददौ पित्वयानिर्गंतव्यमित्याह ॥ ६८ ॥ योऽस्मिन्निति तत्र स्थिते तत्र संभवान् हि
भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ॥ ५९ ॥ श्रीशुक उवाच ॥
इत्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि माचिरं ॥ ५८ ॥ स्वज्ञा
त्यपत्यदाराढ्यो गोनृभिर्भुज्यतां नदी ॥ यत्र भिर्मुनिभिश्चैव यत्नो याहि ममाज्ञया ॥ य एतत्संस्मरेन्म
र्त्यस्तुभ्यं मदनुशासनं ॥ ५९ ॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥ ६० ॥ योऽस्मिन्स्नात्वा म
दाक्रीडे देवादींस्तर्पयेज्जलैः ॥ उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥ ६१ ॥ द्वीपं रमणकं हित्वा ह्र
दमेतमुपाश्रितः ॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं ॥ ६२ ॥ ऋषिरुवाच ॥ एवमुक्तो भ
गवता कृष्णेनाद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरं ॥ ६३ ॥ दिव्यांबरस्रङ्मणि
भिः परार्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्योत्पलमालया ॥ ६४ ॥ पूजयित्वा जगन्नाथं
प्रसाद्य गरुडध्वजं ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिवंद्य तं ॥ ६५ ॥ सकलत्रसुहृत्पुत्रो द्वीपमब्धे
र्जगाम ह ॥ तदैव सामृतजला यमुना निर्विषाभवत् ॥ अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः ॥ ६६ ॥
कृष्णोऽपि निरगात्तूर्णं पूजितः कालियह्रदात् ॥ गतेनसर्पं परिष्वज्य मृतं पुनरिवागतं ॥ ६७ ॥ टीका
गोपा नृपं भेनिदाघेर्न सिषिचुर्नेत्रजैर्जलैः क्लिष्टकर्माणमन्ये विस्मिनचेतसः ॥ ६८ ॥ तुष्टुवु
कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं वा मन्यसे तद्विधेहि नः ॥ ५५ ॥ वनीनिभावः नचनवगरुडभयं य
वेहि स्मारहृदीपमित्याहि ॥ ६६ ॥ इति श्रीभागवते दशमस्कंधे भावार्थदीपिकायां षोडशोऽध्यायः ॥ १६ ॥
नाग सप्रदशनागालयं तन्निर्याय यत् ॥ वेधून्स्तुङ्गः स्वतः श्रोतान्मोक्षः यदवादयात् ग्रसमेजनसमप्रिये ॥ १ ॥

१

पवेत्तावदंडनुमोदनेन नमस्कारैश्च भगवंतं प्रसादयेदात्मीतद्वयीनानां प्राणिनांकोपरायदन्याशये
वस्तः प्रार्थयंते ॥ त्वद्धीति ॥ अस्य लोकस्य जन्मादीन् त्वमेवाक्तुतश्चकरोः तत्तस्यतोस्मान्नस्वारहूपेल
स्ततः स्वभावात् ॥ गोरहूपत्वादीनप्रतिबोधयन्मोहमेक्रीडसि ॥ यद्वाः ह्मनानादियीकालशक्तिः
तोधारयतीति ॥ तथाचानन्तसमानम् ॥ ४८ ॥ अनन्तस्य तवैव अमूस्तनवः ॥ तन्वेन शनिक्रीडेपस्या
त्वस्यजन्मस्थितिसंयमान्विभोगुणैरनीहोकृतकालशक्तिधृक् ॥ तत्तत्स्वभावान्प्रतिबो
धयन्सतः समीक्षयामोघविहारईहसे ॥ ४९ ॥ तस्यैवतेमूस्तनवस्त्रिलोक्यांशान्ताअशा
न्ताउतमूढयोनयः ॥ शान्ताःप्रियास्तेह्यधुनाविभोसतांस्थातुश्चतेधर्मपरीप्सयेहतः
अपराधः सकृद्भर्त्रासोढव्यःस्वप्रजाकृतः क्षन्तुमर्हसिशान्तात्मन्मूढस्यत्वामजानतः
५१ ॥ अनुगृह्णीष्वभगवन्प्राणांस्त्यजतिपन्नगः स्त्रीणांनःसाधुशोच्यानांपतिःप्राणः
प्रदीयताम् ॥ ५२ ॥ विधेहितेकिंकरीणामनुष्ठेयंतवाज्ञया ॥ यच्छ्रद्धयानुतिष्ठन्वैमुच्यतेस
र्वतोभयात् ॥ ५३ ॥ श्रीशुक उवाच ॥ इत्थंसनागपत्नीभिर्भगवान्समभिष्टुतः ॥ मूर्छितंभ
ग्नशिरसंविससर्जांघ्रिकुट्टनैः ॥ ५४ ॥ प्रतिलब्धेंद्रियप्राणःकालियःशनकैर्हरिम् कृ
च्छ्रात्समुच्छ्वसन्दीनः कृष्णंप्राहकृतांजलिः ॥ कालीय उवाच ॥ वयंखलाःसहोत्पत्त्यातामसादी
र्घमन्यवः ॥ स्वभावोदुस्त्यजोनाथलोकानांयदसद्ग्रहः ॥ त्वयासृष्टमिदंविश्वंधातर्गुणवि
सर्जनम् ॥ ५६ ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृतिः ॥ वयंचतत्रभगवन्सर्पाजा
गः तथापितवबाधनाशक्ताः प्रियाकृतः सतोधर्मपालनेच्छयाईहतः प्रवर्तमानस्यअनन्ता
ननुस्यानुस्थितस्यप्रवचनवाप्रियाचरणायपरायणहिंसोदुष्टइतिप्रसादनुग्रहे ॥ अन्येषाम्
सुरैवजितेवत्रेमाकुः विषहीति ॥ ५८ ॥ त्वदासयापार्गिणानानायामेतिभावः यदसद्ग्रहइति

समनुष्टुर

कथं च तन्मूर्तिर्विनेत्यत आह। नमो गुणप्रदीपायेति॥ गुणाः अन्तःकरणानि तानि प्रदीपयतीति तथा तस्मै चिन्मात्रप्रविष्टान्तत्तेन च तत्संवित्तिरित्यर्थः॥ तथाप्येकस्यैव कथं चतुष्टयं तत्राह। गुणात्मच्छादकाय च तैरेव गुणैः स्वरूपस्य प्रकाशनोपलब्धे चिन्मात्रमात्मानमाच्छादयता तेन प्रकाशमानायेत्यर्थः ननु कथं तर्हि प्रतीतिः अत आह। गुणवृत्त्युपलक्ष्याय विषादीनां तत्तदवस्थादिवृत्तिभिरुपलक्ष्याय उपलक्षणमेवाह। गुणद्रष्ट्रे तस्याः क्षिणोः कथं विरुपलक्षणं यत्न ज्ञेयं तत्राह॥ स्वसंविदे स्वात्मचराचरेत्यर्थः। अगोचरत्वमुपलक्षणत्वं च दर्शयन्नमस्यति॥४६॥ अव्याकृतविहाराय तत्कर्ममहिम्नेत्यर्थः॥ सर्वव्याकृतसिद्धये सर्वकार्योत्पत्तिप्रकाशहेतवे तेनोपलक्षणायोग्यायेत्यर्थः॥ उपलक्षणान्तरं

नमो गुणप्रदीपाय गुणात्मच्छादकाय च॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे॥४६॥
अव्याकृतविहाराय सर्वव्याकृतसिद्धये॥ हृषीकेश नमस्तेऽस्तु मुनये मौनशालिने॥४७॥
परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेऽस्य च हेतवे॥४८

माह॥ हृषीकेश करणप्रवर्तक किं विषयलिप्सया नमनं ये आत्मारामाय॥ किं साधनवशेन नहि मौनमात्मारामत्वं तत्स्वभावाय कुतः परावरगतिज्ञाय॥ स्थूलसूक्ष्मात्मगतिं ज्ञानेन ज्ञाप्य सञ्ज्ञानायेत्यर्थः। किं च तद्द्रष्टे अपि च सर्वाध्यक्षाय सर्वस्याधिष्ठात्रे कुत एतत॥ अविश्वाय न विश्वं यस्मिंस्तस्मै ये थावत्ययो विश्वाय तदधिवर्त्माधिष्ठानायेत्यर्थः। किं च तद्द्रष्टे अध्यासोपपादकसाक्षिणोऽपि यासविश्वाध्यासस्य तद्यवादस्य चाविद्याविश्वाभ्यां हेतवे॥ यद्वाऽविश्वाय॥ विश्वतेजसाद्यवस्था रहिताय विश्वाय च मायया तास्ताः अवस्था नटवत् दधानायेत्यर्थः तद्द्रष्टे तासामवस्थानां भावाभावसाक्षिणोऽस्य सतत्स्मात्॥ तस्मात् सर्वगतित्व सर्वाधिष्ठातृत्वात्मारामत्वादिभिर्निरतिशयैश्वर्यायतनप्रतिनमस्कृति विशेषणैर्विशेषितैः पंचपंचाशत्ता नामभिः श्रीहरिः प्रसन्नो वस्तासामिव ममते हरिः॥४८॥

कालशक्त्या विश्वसृष्ट्यादिरूपेण नमस्यति॥ कालाय कालस्वरूपाय कालनाभाय कालप्रमाश्रया
य॥ कालावयवानां हेमाद्रिसमयानां सादितो॥ ततश्च विश्वाय विश्वरूपाय न हि किंजत्वेदं नहि नउ
परहस्तनचहस्तमायाय॥ किंच तत्कार्येण चक्रहेमाद्याद्य विश्वहेतवे सर्वकारणरूपायतदेवाह॥ भू
तन्मात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने आशयास्मिन्भूतादिरूपाय॥ अतः सर्वकारणरूपायेति अ
त्रिगुणाभिमानतः॥ तेन मरुच्छ्वासांशभूताना
हकारान्तत्वान्नमस्यति त्रिगुणेनेति॥ एवं सृष्टेः कार्यस्य त्रिगुणाभिमानतः॥ नमोनन्तायाहंकाराय परिच्छेदात॥ अत॥ स्व
मनुष्यतिर्यक्त्वे॥ तत्र हकारान्तत्वाद् इति स्तवति॥ ४२॥ अत एव विपश्चिते सर्वज्ञाय एवं
त्माद्याह प्रपत्तादत एव कूटस्थाय॥ उपाधिकृतविकाराभावात्॥ उपदृष्टे तत्कर्मे विश्वहेतवे॥ ४९॥
कालाय कालनाभाय कालावयवसाक्षिणे विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे॥ ४४॥ न
भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये॥ ४५॥
नमोनन्ताय सूक्ष्माय कूटस्थाय विपश्चिते॥ नानावादानुरोधाय वाच्यवाचकशक्तये॥ ४६॥ न
नमः प्रमाणमूलाय कवये शास्त्रयोनये॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥ ४७॥
क नमः कृष्णाय रामाय वसुदेवसुताय च॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः॥ ४८॥
वस्तुतः स्तुत्वा विस्मयात्तेन स्तवेति॥ नानावादानुरोधाय अस्तिनास्ति सर्वज्ञः कर्ता कर्मफलदः एकत्व
नेक इत्यादयोवादानुरोधाय यथानुवर्तते यस्तस्मैकिं॥ किंच वाच्यवाचकशक्तये अभिधाना
अभिधेयशक्तिभेदरहितेन नानात्वेन प्रतीताय तस्मै अनावृतत्वमेवदेहत्वेन शेषान्यपि सूचयन् स्तवति
नमः प्रमाणमूलाय चतुर्वादीनां चतुरादीनां चतुराचारिरूपाय अत एव कवये स्वयं नविरचेतुस्ता
नायकृतः शास्त्रयोनये॥ वेदात्मकनिःश्वासाय॥ किंच प्रवृत्ताय निगमाय नमो नमः अनाहमेष्य
र्यत्वादेवचतुर्मूर्तिरूपेण सर्वोपास्यत्वेन नमस्यति नमः कृष्णायेति श्लोकेन॥ ४९॥ रामाय सकर्ष
णाय वसुदेवसुताय वसुदेवशक्तिं प्रहसत्त्वं तत्र प्रकाशमानाय वासुदेवाय तस्मै॥ सात्वतां

तपआदिनाब्रह्मादयोप्ययस्याः श्रियाप्रसादमिछंतिसाश्रीर्ललनापिश्रीदेवललनाउत्तमास्त्रीयस्यतवदंघ्रि-
स्पर्शाधिकारस्यवाञ्छयातपश्चचरत॥अस्यसर्पस्यकिंकृतंनरइतिकोवेत्तीत्यर्थः यत्तवपादरजः प्रप-
न्नाः प्राप्ताः पारमेष्ठ्यादिकमपिनेच्छंमन्यन्ते॥अहोतदेषः अप्रयत्नेनैवप्राप्यअस्मै॥श्रियादिभिरपिदुर्-
लभंतत्पादरजः यदिच्छतः संसारेभवतीति॥प्रार्थ्ययत्नएवसमक्षः अप्रयत्नएवविभवः अपेक्षिता-
र्थसमूहोभवति॥३८॥ नमस्तुभ्यंभगवते॥अविभाव्यस्यगुणायतनस्योपपादनायदशभिः श्लोकैर्विशेष-
णानिपुरुषायपूर्णेदेहेषुशयानायांतर्यामिरूपेणावतीर्णमानायमहात्मने॥एवमपिनानापरिछिन्नायकु-

कस्यानुभावोस्यनदेवविद्महेतवांघ्रिरेणुस्पर्शाधिकारः॥ यद्वाञ्छयाश्रीर्ललनाचरत्तपोवि-
हायकामान्सुचिरंधृतव्रता॥३६॥ननाकपृष्ठंनचसार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यं॥न
योगसिद्धीरपुनर्भवंवावाञ्छन्तियत्पादरजः प्रपन्नाः॥३७॥तदेषनाथाप्दुरापमन्यैस्तमोज-
निः क्रोधवशोप्यहीशः संसारचक्रेभ्रमतः शरीरिणोयदिच्छतः स्याद्विभवः समक्षः॥३८॥
नमस्तुभ्यंभगवतेपुरुषायमहात्मने॥भूतावासायभूतायपरायपरमात्मने॥३९॥ज्ञानवि-
ज्ञाननिधयेब्रह्मणेनंतशक्तये॥अगुणायाविकारायनमस्तेप्राकृतायच ४०

तोभूतावासायआकाशायवायवेनरदपितुः भूतायपूर्वमपिसत्तेकुतः परायकारणायकिंचप-
रमात्मनेकारणातीतायकारणत्वकारणातीतत्वेचसमर्थयितुमाह॥ज्ञानविज्ञाननिधयेज्ञानंतत्त्वमि-
विज्ञानंविच्छक्तिः॥उभयोर्निधयेताभ्यांपूर्णायकथंतथातमनंडमःब्रह्मणेनन्तशक्तयेब्रह्मणोक्तुंकथंब्र-
तायागुणायाविकारायकथंभूतायाज्ञानानन्तशक्तये॥प्राकृतायप्रकृतिप्रवर्तकाय॥अप्राकृतायेत्येवंवाअ-
प्राकृतामूर्तत्वात्प्रकृताय॥अगुणत्वात्गुणान्तावदविकारत्वंब्रह्मत्वंनीनिमाकवत्वाकारणत्वंचप्रकृतिप्रव-
र्तकोनन्तशक्तिः॥विज्ञाननिधिर्ज्ञानीश्वरः॥कारणत्वमभयात्मनेनमस्तुभ्यमनन्तशक्तिमान्॥४०॥

गर्भेजगतिपस्तस्यातिभवेणवसन्नमाक्रांतेपार्श्वे॥पादष्टं॥ आयेश्रीक्षसंस्थेतोविसेसमानाव
वसाहयोयाशांताः शरणप्रपन्नाः सतसलप्रणाम्ः हविग्रमनसोपतिमलविंगाः भवीगतितसिन्स्यानेजलो
दयस्ताद्दातीरेवासमलस्यपापात्मनोपिभर्तुर्मोहोत्सवः॥भर्तुर्यच्छ मलेनस्वाभूजयनिशाणिमात्र
स्पयतिंशरणंदसाश्रयपदप्रथमंतावक्रुपितंभगावतम्॥दशानुमोदनेनोपशामयेत्सः स्तवेति त्याप्य
होति॥दशानुमोदनेपद्विर्दर्शामिभ्रहदे॥स्तुतिः प्रार्थनंपचभिः श्लोकैः स्तनः पन्नगयोषिताम्॥नचनि
कुलस्यगर्भजगतोतिभरावसन्नपार्श्विप्रहारपरिकगणाफणानतम॥दृष्ट्वाहिमाद्यमुपसेदुरमु
घ्यपत्न्यार्ताः पत्नः श्लथहसनभूषणाकेशावधाः॥३९॥तास्तस्यविग्रमनसोथपुरस्कृताभीः
कायंनिधायभुविभूतपतिंप्रणेमुः॥साध्व्यः कृतांजलिपुटाः समलस्यभर्तुर्मोक्षेप्सवः शर
णदशरणप्रपन्नाः॥३०॥नागपत्न्यऊचुः न्याय्योहिदंडः कृतकिल्बिषेस्मिंस्तवावतारः ख
लनिग्रहाय॥रिपोः सुतानामपितुल्यदृष्टेर्धत्सेदमंफलमेवानुशंसन्॥३१॥अनुग्रहोयंभ
वतःकृतोहिनोदंडोसतांतेखलकल्मषापहः॥यद्दंदशूकत्वममुष्यदेहिनः क्रोधोपितेनुग्र
हएवसम्मतः॥३४॥तपः सुतप्तंकिमनेनपूर्वनिरस्तमानेनचमानदेन॥धर्मोथवासर्वजना
ग्रहानुग्रहंवैषमस्मित्याहुः॥यत्सेदममिति(नुकपयायतोभवोस्तथ्यानिसर्वेजीवः॥३५॥
अनुशंसन्॥आलोचयन्॥निग्रहोप्यनुग्रहायेत्युक्तमिदानीमनुग्रहएवायंनतुनिग्रहइत्याहुः॥अनु
ग्रहइत्याहुः॥अनुग्रहइति॥३३॥नोस्माकंयतः॥यस्मादस्यसर्पत्वंहप्रपतो॥अतस्तत्कलपापानिवर्त
कोदंडोनुग्रहएवक्रोधस्तेनमतोयमानोपीत्यर्थः महास्तायमनुग्रहइति नसएवेदुष्णमभिन
दतिनपरइति॥३४॥स्वयमानरहिते॥नअन्येभ्योपिमानदेनव॥सर्वजीवयतीतिसर्वजीवः नन
पद्मादिनिमित्तपरभागयोदयः॥किंनुचित्पनवहुधावेभवमित्याहुः श्लोकचयेणकस्यानुभा

हरिस्तु क्रीडतमेसर्वं परिसमारपविनोवभासमग्रनिकरालाविषाग्निपुरुरहष्टिर्यस्पतेजिह्व ॥ याहिशिखव
यापरिलेलिहानावहन्तमोजोयस्पतेनतस्पमूर्धस्मयरत्ननिकरास्तेषांस्पर्शोनास्यरुणपादाबुजेयस्यसः ननु
कथंचवलेशुशिरःस्तनने ॥ तत्राह अखिलकलानामादिःगुरुः शानमेकानिमुख्यानिशीर्षाणियः
स्पनस्पदीर्णाणापुष्योपिपुनभ्रेमतः यद्यच्छिरोननमनेस्तदुनोननजहातिनत्रौच्छलनोद्विपानेस्तत्रम
तेजिह्वयाहिशिखयापरिलेलिहानेद्युस्तद्धिणीश्तनिकरालविषाग्निदृष्टि ॥ क्रीडत्रमुपरि
समारयथाखवेगेश्रोवभासमसौयवसरप्रसमीसमाणः ॥ २५ ॥ एवंपरिभमदतोजससमुत्रतो स
मानस्पतस्यपुशिरःस्पथिरकृष्ठ्याय्यः तन्मूर्धरत्ननिकरस्पर्शानिनाम्यपादाबुजोखिल
कलादिगुरुनेनर्त ॥ २६ ॥ तंनर्तमुपयतमवेक्ष्यतदान्तरीयगंधर्वसिद्धमुनिचारणादेववधूः
प्रीत्यामृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥ २७ ॥ यद्यच्छिरोनन
मेत्तशतैकशीर्ष्णस्तन्नममर्दखलदंडधरोंघ्रिपातैः ॥ क्षीणायुषोभ्रमतउल्बणमास्यतोसृक्
नस्तोवमत्परमकश्मलमापनागः ॥ २८ ॥ तस्याक्षिभिर्गरलमुद्वमतःशिरस्सुयद्यत्समुन्न
मतिनिः श्वसतोरुषोच्चैः नृत्यन्पदानुनमयन्दमयांबभूवपुष्पैः प्रपूजितइवेहपुमान्पु
राणः ॥ २९ ॥ तच्चित्रताण्डवविरुग्णफणातपत्रोरक्तंमुखैरुरुवमन्नृपभग्नगात्रः ॥ स्मृत्वाच
राचरगुरुंपुरुषंपुराणंनारायणंतमरणंमनसाजगाम ॥ ३० ॥

मर्द्यतदावग्रास्यतोमुखेभ्यः ॥ नस्तोनासाविवरेभ्यश्चअसृग्वमन् ॥ २८ ॥ पुनरपिरुषाउच्चैर्निःश्वस
तोयद्यत्समुन्नमति ॥ तत्तत्पदाघातेनानुनमयन् ॥ इहास्मिन्नवसरेहृष्टैर्गंधर्वादिभिः शोभासंपु
राणः पुरुषरवस्यसोदानेदनः पुष्पैः पूजितः यद्वातदागंधर्वादिभिः पुष्पैः प्रपूजितः गोप्यैः पु
राणः पुरुषरवरइतियद्वापुष्पैः प्रपूजितइवप्रसन्नः तंदमयांबभूवमितिअन्वयः तत्रवानिरापेःच्छ
रणाधारणाम् ॥ ३० ॥

भगवंतं लक्षयंति ॥ यानि तैः पदैः सूचितया पदव्या मार्गेण पदे मार्गज्ञानप्रकारमाह ॥ तइति ॥ विसृतैः
भगवंतं लक्षयंति ॥ यानि तैः पदैः सूचितया पदव्या मार्गेण पदे मार्गज्ञानप्रकारमाह ॥ तइति ॥ विसृतैः
श्रीकृष्णस्यान्वेषोपदक्षामत रातरेस ध्येम ध्ये ॥ तत्र दर्पो हते गावो ऋतीनां मार्गे सत्वरा अग्रमना योगि
नः तत्रद्रुपाध्यपवादेनयथा परे तत्वमृगयंति तद्द दिति भावः ॥ मतत्स्वसर्पशारी रवे ष्टितकृष्णसंहृता
विरीत्यगोपाः स्वपपू स्वतथातथानिरीक्षार्ताः परमोहमापुः ॥ प्रियेण श्रीकृष्णेन विरहितं तं वै लोकं
ते त्विष्यमाणादपि तं कृष्णस्य सूचितया पदैः ॥ भगवल्लक्षणैर्जग्मुः पदव्याय सुनानंदं ॥ १७ ॥ ते
तत्र तत्रास्ययवांकुशाशनिध्वजोपपद्मानिपदानि विसृतैः मार्गेण वामन्यपदांतरांत रेतिरी
त्यसमागणाय पुरतास्त्वराः ॥ १८ ॥ श्रृंतरुदेभुजगाभोगपरीतमृगांकुशनिरीद्दमुपलभ्य
जलाशयोंते गोपा स्वसृरुधिषणान्वीरतः पश्चस्वसंक्रंदतः परमकष्टमलमापुरा
नेः ॥ १९ ॥ गोप्योनुरक्तमनसोभगवत्यनंतेतत्सौहृतास्मितविलोकगिरः स्मरंत्यः ॥ ग्रस्तेहि
नाप्रियतमेभृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकम् ॥ २० ॥ ताः कृष्णमातरमप
त्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः तास्ताव्रजप्रियकथाः कथयंत्य आ
सन्कृष्णाननेर्पितदृशोमृतकप्रतीकाः ॥ २१ ॥ कृष्णप्राणान्निर्विशतोनंदादीन्वीक्ष्य तंह्रदे
प्रत्यषेधत्स भगवान्रामः कृष्णानुभाववित् ॥ २२ ॥ तृष्येस्सगोकुलमनन्यगतिंनिरीक्ष्य सस्त्रीकु
मारमतिदुःखितमात्महेतोः आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वामुहूर्तमुदतिष्ठदु
रंगबंधात् ॥ २३ ॥ तत्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान्भुजंगः
तस्थौ श्वसन्छ्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुक मुखोहरिमीक्षमाणः ॥ २४ ॥
मृत्युं दहृशुः ॥ अनन्यगतिमित्यस्य विरीसततयवान्महेतोः सगोकुलमतिदुःखितमात्मा वशु रंगबंधात्
दतिष्टदित्यन्वयः ॥ २३ ॥ तत्प्रथ्यमानेनवपुषाव्यथितात्मशरीरः कुंडलीभूत्वा उन्नमय्य काकु

भुजदंडाहतोदकघोषं श्रुत्वा ततः स्वसदनाभिभवं च निरीक्ष्य तदसहमानः सर्पः समसरत्समागम
म प्रेक्षणीयसुकुमारघनवदवदातं श्वेतं श्रीवत्सपीतवसनं हृदे निवसतः। श्रीवत्सेन संयुक्त
सुचलत्पीतवसनं यस्य तं भुजया भोगेन ॥ चछादावेष्टयत् तत्प्रियो येषां ते तत्प्रियाः ते च ते सखाय

तस्मिन्हृदे विचरतो भुजदंडघूर्णवार्घोषमंग वरवारणविक्रमस्य। आश्रुत्य तत्स्वसदना-
भिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः ॥८॥ तं प्रेक्षणीयसुकुमारघनावदा-
तं श्रीवत्सपीतवसनं स्मितसुंदरास्यं। क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्म-
सु रुषा भुजया चछाद ॥९॥ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः प-
शुपा भृशार्ताः। कृष्णेर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो नि-
पेतुः ॥१०॥ गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः। कृष्णे न्यस्तेक्षणा भीता रुदंत्य इ-
व तस्थिरे ॥११॥ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः। उत्पेतुर्भुवि दिव्यात्मन्यास-
न्नभयशंसिनः ॥१२॥ तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोगमाः। विना रामेण गाः कृष्णं
ज्ञात्वा चारयितुं गतं ॥१३॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः। तत्प्राणास्तन्मन-
स्कास्ते दुःखशोकभयातुराः ॥१४॥ आबालवृद्धवनिताः सर्वेंग पशुवृत्तयः। निर्जग्मुर्गो-
कुलाद्दीनाः कृष्णदर्शनलालसाः ॥१५॥ तांस्तथा कातरान्वीक्ष्य भगवान्माधवो बलः। प्र-
हस्य किंचिन्नोवाच प्रभावज्ञोनुजस्य सः ॥१६॥

इति भुवि भूकंपादयः दिवि उल्कापातादयः
आत्मनि वामनेत्रस्फुरणादयः आसन्नभयशंसिनं शीलं येषां नानालक्ष्य गोकुलान्निर्जग्मुरिति तत्

बहूनि युगान्यावासो यस्य तमहिं स वै अहिः अन्तर्जलचरोऽपि ॥ तस्मिन्नन्तर्जले यथा येन प्रकारेणासीत् ॥ अ
थवा बहूनि युगान्यावासो यथा भवति ॥ तथानेन प्रकारेणास वै तत्रासीदिति कथ्यतामिति ॥ गोपालेन
यदुदारं चरितं तदेवामृतं ॥ अतः कस्तृप्येतामिति ॥ श्रप्यमाणं पच्यमानं पयो यस्य सः ॥ अत उपरि गच्छन्तः
खगाः यस्मिन्पतन्ति ॥४॥ किंच विप्रुष्मताम्बुकणयुक्तेन विषोदकतरंगस्पर्शमारुतेन स्पृष्टा यस्य
तीरगा म्रियन्ते स ह्रद आसीदिति ॥ तं कालियं चण्डवेगो यस्य तद्विषमेव वीर्यं यस्य कदम्बमिति क्षाविना
राजोवाच ॥ कथमन्तर्जलेऽगाधे न्यगृह्णाद्भगवानहिं ॥ स वै बहुयुगावासं यथासीद्विप्र
कथ्यताम् ॥१॥ ब्रह्मन्भगवतस्तस्य भूम्नः स्वच्छन्दवर्तिनः ॥ गोपालोदारचरितं कस्तृप्ये
तामृतं जुषन् ॥२॥ श्रीशुक उवाच ॥ कालिन्द्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना ॥ श्र
प्यमाणपयो यस्मिन्पतन्त्युपरिगाः खगाः ॥४॥ विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शि
ताः म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजङ्गमाः ॥५॥ तं चण्डवेगविषवीर्यमवेक्ष्य तेन दुष्टां
नदीं च खलसंयमनावतारः कृष्णः कदम्बमधिरुह्य ततोऽतितुङ्गमास्फोट्य गाढरश
नो न्यपतद्विषोदे ॥६॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसिताम्बु
राशिः ॥ पर्यक्प्लुतो विषकषायविभीषणोर्मिर्धावन्धनुःशतमनन्तबलस्य किं तत् ॥७॥
श्रीकृष्णस्य चरणस्पर्शभाग्येन सपुत्रकलत्रो वैकुण्ठं गतः ॥ अमृतमाह ॥ एतागरुत्मताक्रान्तत्वादिति उ
रारणं न वध्यास्फोट्य बाहुं करतलेनाहत्य गाढं दृढं बद्धा रशना येन सः ॥ तदा सर्पस्य ह्रदः पुरुष
श्रेष्ठस्य पतनभारेण संक्षोभितानामुरगाणां विषैरुच्छ्वसितोऽम्बुराशिर्यस्य सः ॥ विषेण कषायीकृता
भयंकरा ऊर्मयो यस्य सः पर्यक्सर्वतः प्लुतः धनुःशतं प्रसृतः नैतच्चित्रमित्याह ॥ अनेनतस्य

रितोयेषां ॥ ५ ॥ पुरटंसवर्णंतूणाविशुधीप्रविक्तौप्रत्ययशरौपितामहःप्रह्लादः जलजं
शंखं ॥ ८ ॥ विप्रैरर्जितःसंपादितोयोधनार्थोयुद्धपरिकरोयस्यसैरेवकल्पितंस्वस्त्ययनं
मंगलवाचनादियस्यप्रामंमंत्र्यपृष्ट्वा ॥ ७ ॥ अथारुह्यराजेतिद्वयोरन्वयः सस्वगधरःशोभन

हविष्मत्सुकृतास्त्रक्तानामेवकेयोविद्यामामारः॥ हविष्मानिति॥१८॥ विसूच्यांनानःसत्व॥१९॥ प
आयुष्मतोंबुधारायामृषभोभगवत्कला॥ भवितायेनसंराद्धांत्रिलोकींभोक्ष्यतेद्भुतः॥२०॥
दशमोब्रह्मसावर्णिरुपश्लोकसुतोमहान्॥ तत्सुताभूरिषेणाद्याहविष्मत्प्रमुखाद्विजाः
तत्रापिजन्मभवतिहरेर्विश्वसृजोगृहे॥ स्मृतिरितिविख्यातोयेनाप्यायेनवैजगत्॥२१॥
हविष्मान्सुकृतिःसत्योजयोमूर्तिस्तदाद्विजाः॥ सुवासनविरुद्धाद्यादेवाःशम्भुःसुरेश्वरः॥२२॥
विष्वक्सेनोविषूच्यांवाशम्भोःसख्यंकरिष्यति॥ जातःस्वांशेनभगवान्गृहेविश्वसृजोविभुः॥
मनुर्वैधर्मसावर्णिरेकादशमआत्मवान्॥ अनागतास्तत्सुताश्चसत्यधर्मादयोदश॥२३॥
विहङ्गमाःकामगमानिर्वाणरुचयःसुराः॥ इन्द्रश्चवैधृतस्तेषामृषयश्चारुणादयः॥२४॥
आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः॥ वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति
२५॥ भवितारुद्रसावर्णीराजन्द्वादशमोमनुः॥ देववानुपदेवश्चदेवश्रेष्ठादयःसुताः॥२६॥
ऋतधामाचतत्रेन्द्रोदेवाश्चहरितादयः॥ ऋषयश्चतपोमूर्तिस्तपस्व्याग्नीध्रकादयः॥२७॥
स्वधामाख्योहरेरंशःसाधयिष्यतितन्मनोः॥ अन्तरंसत्यसहसःसूनृतायाःसुतोविभुः॥२८॥
मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान्॥ चित्रसेनविचित्राद्यादेवसावर्णिदेहजाः॥२९॥
देवाःसुकर्मसुत्रामसंज्ञाइन्द्रोदिवस्पतिः॥ निर्मोकतत्त्वदर्शाद्याभविष्यन्त्यृषयस्तदा॥३०॥
देवहोत्रस्यतनयउपहर्तादिवस्पतेः॥ योगेश्वरोहरेरंशोबृहत्यांसम्भविष्यति॥३१॥ मनु
र्वाइन्द्रसावर्णिश्चतुर्दशमएष्यति॥ उरुगम्भीरबुद्ध्याद्याइन्द्रसावर्णिवीर्यजाः॥३२॥
काद्यामरुत्यादिरार्षः॥३३॥ तस्यमनोरेतरंसाधयिष्यति॥ सत्यसहसःसूनृतायाश्चसुतःस

भा॰
स्कं॰
टी॰

क्रियातंतून्कर्मसंततीः वितायिता विस्तारयिष्यति ॥३५॥ युगसाहस्रेण पर्यंतं परिवर्तीयस्य
पुमस्सप्रमाणंब्रह्मणः ॥३६॥ अध्यमेत्रयोदशः ॥१३॥ चतुर्दशेतसर्वेषां मन्वादीनां यथा पंच
दृष्टाक्रमेणागावर्णंते भगवद्वृत्तावर्तिनाम् ॥ ब्रह्मवेणेश्वरेणपत्तायवतारैः शास्यंते निष्ठुमे
नेशनितयथा ॥२॥ नदेवाहयत्तादयघृति ॥३॥ स्मयादीनांकर्माण्याह चतुर्युगांतरतिचतुर

पवित्राश्चाक्षुषादेवाः शुचिरिंद्रोभविष्यति ॥ अग्निर्बाहुः शुचिः शुद्धोमागधाद्यास्तपस्वि
नः ॥३४॥ सत्रायणस्यतनयोबृहद्भानुस्तदाहरिः ॥ वितानायांमहाराजक्रियातंतून्विताय
ता ॥३५॥ राजंश्चतुर्दशैतानित्रिकालानुगतानिते ॥ प्रोक्तान्येभिर्मितः कल्पोयुगसाहस्रप
र्ययः ॥३६॥ शुकउवाच ॥ चतुर्दशमनूनांचकथांयः परिकीर्तयेत ॥ शृणुयाद्वापिराजेंद्र
तस्यविष्णुः प्रसीदति ३७ ॥ इतिश्रीभागवतेअष्टमस्कंधेमन्वंतरानुवर्णनेत्रयोदशः ॥१३॥ राजो
वाच ॥ मन्वंतरेषुभगवन्यथामन्वादयस्त्विमे ॥ यस्मिन्कर्मणियेयेननियुक्तास्तद्वदस्वमे
ऋषिरुवाच ॥ मनवोमनुपुत्राश्चमुनयश्चमहीपते ॥ इंद्राः सुरगणाश्चैवसर्वेपुरुषशास
नाः ॥२॥ यज्ञादयोयाः कथिताः पौरुष्यस्तनवोनृप ॥ मन्वादयोजगद्यात्रांनयंत्याभिः प्रचोदि
ताः ॥३॥ चतुर्युगांतेकालेनग्रस्ताञ्छ्रुतिगणान्यथा ॥ तपसाऋषयोपश्यन्यतोधर्मः सना
तनः ॥४॥ ततोधर्मंचतुष्पादंमनवोहरिणोदिताः ॥ युक्ताः संचारयंत्यद्धास्वेस्वेकालेमहीं
नृपाः ॥५॥ पालयंतिप्रजापालायावदंतंवि
र्भिः ॥ यज्ञः येभ्यः ऋत्विग्गणेभ्यः ॥४॥ उच्छिष्टपाः
उक्ताः संपन्नाः संतोमहीयधर्मंसंचारयंतिमंसाधर्मंप्रवर्तयंतीत्यर्थः ॥५॥ प्रजापालामनुपु
त्रास्तेधर्मंपालयंति ॥ यावदंतंमन्वंतरावसानंविभागशः पुत्रपौत्रादिक्रमेणयद्वा

११

श्रुण्वाप्यावर्तयन्निगमनं इतीति ॥ एतत्कीर्तनादेः फलमाह ॥ एतदिति ॥४५॥ भगवता कृतेन भक्तपदं
नोत स्मरन्नमस्करोति ॥ असत्ताम् अविषयं भावो भजनं तेन गम्यमंघ्रिं प्रपन्नान् ॥ सिंधुमथ्यं सिंधो
र्मथ्यमानात् मनस्तेयः खापयत् ॥ अभोजयत् ॥४६॥ इत्यष्टमे द्वादशः ॥१२॥ त्रयोदशे तु वर्ण्यंते सप्त
भूकानि इतीतेषु दिवस्वतो विकर्मः श्राद्धदेव इति ॥ सिंधोर्निर्मथ्यमानेषु ध्वनेषु तत्र देवमहाव
लः ॥४७॥ एतन्महत्कीर्तनं यतो गुणवतां नित्यं तेनावस पुण्यमः कचित ॥ यदमम श्लोक
गुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ॥४८॥ असदविषयमंघ्रिं भावगम्यं प्रपन्ना
नमृतममरवर्यानाशयत्सिंधुमथ्यं ॥ कपटयुवतिवेषो मोहयन्यः सुरारीं स्तमहमुपसृतानां
कामपूरं नतोऽस्मि ॥४९॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे शंकरमायामोहनं नाम द्वादशोऽध्यायः
॥१२॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्तमानो यस्तदपत्यानि
मे शृणु ॥१॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यंतोऽथ नाभागः सप्तमो दिष्ट उच्य
ते ॥२॥ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ॥३॥
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ॥४॥
कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥५॥
अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥६॥
संक्षेपतो मयोक्तानि सप्त मन्वंतराणि ते ॥ भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ॥७॥
सावर्णि [illegible] ॥ मन्वंतराणि सर्वाणि [illegible] ॥१॥ सप्त मादि मन्वंतराणि
हमतेति [illegible] दिनाया वद्ध्याय समाप्तिः आदित्याद्यो देवा इत्यन्वयः ॥ भगवतोनन्तश्रवना

भा
प्री
३२

अष्टमे मन्वन्तरे वक्तुं कथयामास ॥ विवस्वतः इति विभिः ॥ ७ ॥ एके वडवां चोत्तरीयामाहुः सवर्णसंज्ञैव वडवे
निमित्ते ॥ तदुक्तं ब्रह्मे ॥ सेव भूत्वा वडवा नासत्यौ सपवैवस्वतीति । यमश्च यमी च यमुना श्राद्धदे
वश्चेति त्रयः सुताः ॥ ९ ॥ सावर्णिः पुत्रः ॥ १० ॥ पदत्रयं याचमानाय पदत्रयमास सर्वा नहीं सममे ॥ मन्वन्तरेद

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ॥ संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ॥ ८ ॥ तृती
यां वडवामेके तासां संज्ञासुतास्त्रयः ॥ यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ॥ ९ ॥ सा
वर्णिस्तपती कन्या भार्या संवरणस्य या ॥ शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ ॥ १० ॥ अ
ष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ॥ निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥ ११ ॥
तत्र देवाः सुतपसो विरजा अमृतप्रभाः ॥ तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति ॥ १२ ॥
दत्त्वेमां याचमानाय विष्णवे यः पदत्रयं ॥ राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥ १३
योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ॥ निवेशितोऽधिके स्वर्गादधुनास्ते स्वराडिव ॥ १४
गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ॥ ऋष्यशृङ्गः पितास्माकं भगवान्बादरायणः
इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः ॥ इदानीमासते राजन्स्वे स्व आश्रममण्डले ॥ १६
देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः ॥ स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः ॥ १७ ॥
नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप ॥ १८
पारामरीचिगर्भाद्या देवा इन्द्रोऽद्भुतः स्मृतः ॥ द्युतिमत्प्रमुखास्तत्र भविष्यन्त्यृषयस्ततः १९

ताष्टमे मन्वन्तरे ॥ विस्लोः प्रसादाद्देवानां हत्वा बलिसिद्धपदं दिवे स्पर्धी ॥ २२ ॥ रामः परशुरामः द्रोणपु
त्रः अश्वत्थामा ॥ १५ ॥ इदानीमिति स्वयोगतः आसते ॥ १६ ॥ अद्भुतः इन्द्रः ॥ १९ ॥ ॥

सत्वसंतीवधंती॥नगाद्दिमोहयंती॥१९॥तोवीरस्देवःश्रीरुद्रः आत्मानमेतिकेस्थितास्तुमांसगणाश्च
नवेद॥कथंभूतंइत्येवंभूतयाकंडुकलीलयाईषद्धीडानयाःस्फुटस्मितेनतेनसह्विस्तृष्टोयःकदा
दः तेनयुष्टोविदितः॥ग्रतएवत्वपयत स्त्रियाः पेत्तणनयावप्रतिसमीदणम॥नाम्यांविहल
मृयुडुकूलंकवरीवविद्युतोसनयत्तीवामकरेणवल्गणा॥विविश्वतीमन्यकरेणकं
विसृष्टकरात्तमुष्टः॥सीमेतणमतिसमीतणविहल्लाला नात्मानमेतिकेडुमांसवगणा
श्रवेद॥२०॥तस्याःकरागात्सतकंडुकोयदागतोविदूरंतमनुव्रजन्त्स्त्रियः वासः ससूत्रल
युमारुतोहरद्भवस्यदेवस्यकिलानुपश्यतः॥२१॥एवंतोहविरापांगीदशानीयामनो
रमा॥दृष्ट्वातस्यांमनश्चक्रेविबद्धन्याभवःकिल॥२४॥तयापहृतविज्ञानस्तत्कृतस्म
रविहलः॥भवान्याअपिपश्यन्त्यागतह्रीस्तत्पदंययौ॥२५॥सातमायांतमालोक्यविवस्त्रा
दिताभृशं॥निलीयमानावृक्षेषुहसंतीनान्वतिष्ठत॥२६॥तामन्वगच्छद्भगवान्भवःप्रमु
षितेद्रियः॥कामस्यचवशंनीतःकरेणुमिवयूथपः॥२७॥सोनुव्रज्यातिवेगेनगृहीत्वानि
कोतीस्त्रियं॥केशबंधउपानीयबाहुभ्यांपरिषस्वजे॥२८॥सोपगूढाभगवताकरिणाक
रिणीयथा॥इतस्ततःप्रसर्पन्तीविप्रकीर्णशिरोरुहा॥२९॥आत्मानंमोचयित्वांगसुरर्षभ
आत्मानमनोयस्य॥३०॥तंकंडुकमनुव्रज भुजात्तगात्र॥प्राद्रवत्साप्यथश्रोणीमायादेवविनिर्मिता॥३१॥
तस्याःस्त्रियःसवृत्तस्वंवासःससूत्रकांचीसहितम॥२२॥तस्यहंतस्याःसमीपयथयो॥२५॥विध
नस्माकंविनकरादेरात्माने॥निरीतमाणाया॥२४॥ प्रेगा हेराजन्न॥ ३०॥

भा

एवंतामनुधावन्‌ ॥ सरित्सरस्सु शैलादिषु वसन्विहितो वभूव ॥ ३४ ॥ ततस्तु मायया जडीकरणा

तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ॥ प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ ३१ ॥ त
स्यानुधावतो रेतश्चस्कन्दामोघरेतसः ॥ शुष्मिणो यूथपस्येव वासितामनुधावतः ॥ ३२ ॥ य
त्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥ ३३ ॥
सरित्सरःसु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र सन्निहितो हरः ॥ ३४ ॥ स्क
न्ने रेतसि सोऽपश्यदात्मानं देवमायया ॥ जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात्‌ ॥ ३५ ॥
अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदु हाद्भुतम्‌ ॥ ३६ ॥ त
मविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुम्‌ ॥ ३७ ॥
श्रीभगवानुवाच ॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः ॥ यन्मे स्त्रीरूपस्वैरेभिर्मोहि
तोऽप्यंग मायया ॥ ३८ ॥ को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान्‌ ॥ तांस्तान्विसृजतीं भावान्दु
स्तरामकृतात्मभिः ॥ ३९ ॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन
कालरूपेण भागशः ॥ ४० ॥ श्रीशुक उवाच ॥ एवं भगवता राजन्‌ श्रीवत्सांकेन सत्कृतः ॥ आ
मंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४१ ॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः
शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥ ४२ ॥ अयि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः प
रदेवतायाः ॥ अहं कलानामृषभोऽपि मुह्ये यां स्ववशोऽन्ये किमुतास्वतंत्राः ॥ ४३ ॥ यं मामपृच्छ
स्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो न यत्र कालो
विशते न वेदः ॥ ४४ ॥

म ॥ ३८ ॥ स्वां निष्ठां स्वकृतिम् ॥ ३९ ॥ कालेन सह सृष्टादि निमित्तेन मया ॥ ४४ ॥ ॥ ॥ ॥
कालरूपेण भागशो रजआद्यंशेन समेता मदधीनासती

३१

श्री
भा॰ त॰
टी॰
१९

कपिलोपप्याविनृम्भं नदेवप्रपंचयतिकपिल्लोपीतित्रिभिः॥ समनुज्ञाप्यअनुज्ञांसंप्राप्य॥३३॥ द
नमर्हणमर्पनिकेतनंवयसैम॥३४॥उपशोन्तयुद्धेसमाहितआस्ते॥३५॥ प्रकरणार्थमुपसंहरति प

कपिलोपिमहायोगी भगवान्पितराश्रमात्॥ मातरंसमनुज्ञाप्यप्रागुदीचींदिशंययौ
३३॥ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः॥ स्तूयमानःसमुद्रेणदत्तार्हणनिकेत
नः॥३४॥ आस्तेयोगंसमास्थायसांख्याचार्यैरभिष्टुतः॥ त्रयाणामपिलोकानामुपशा
न्त्यैसमाहितः॥३५॥ एतन्निगदितंतातयत्पृष्टोहंतवानघ॥ कपिलस्यचसंवादोदेवहू
त्याश्चपावनः॥३६॥ यइदमनुशृणोतियोभिधत्तेकपिलमुनेर्मतमात्मयोगगुह्यं भ
गवतिकृतधीःसुपर्णकेतावुपलभतेभगवत्पदारविंदम्॥३७॥ इतिश्रीभागवतेम
हापुराणेतृतीयस्कंधेकापिलेयेत्रयस्त्रिंशोध्यायः॥३३॥॥ शुभमस्तुसर्वजगतामित्योम्
रामजी॥॥॥ ॐश्रीकृष्णायवासुदेवायगोविंदायनमोनमः
श्रीराजाभिकरमजीतसंवत्॥१८४०॥

गारउध्वजोउपल
मतेमप्राप्ति॥

नदितिजचतया॥३६॥ एतच्छ्रवणकीर्तनफलमाह॥ यइति॥ सुपर्णकेतौ॥ इतिश्रीभागवतभा
वदीपिकायांश्रीधरस्वामिविरचितायांतृतीयस्कंधेत्रयस्त्रिंशोध्यायः॥३३॥ समाप्तोयंतृतीयस्कंधः॥

विश्वतोमुखत्वे हेतुः स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूते मायायाः गुणैर्विशेषणं परिच्छेदो यस्य
ब्रह्मणि ॥ आत्मनां जीवानां संश्रये भगवति ॥ तस्या जीवत्वं किमाह सार्थं विशिनष्टि ॥ कथंभूते
ति जीवभावो यस्याः तस्याभावस्तत्त्वं तस्मात् हि गतक्लेशा प्राप्तनिर्वृतिः निवृत्ता जीवापत्तिर्जीवभाव
गुणत्वयः ॥ २४ ॥ नित्यं तदा विगुणानां विद्यमानत्वात्कथं समस्मरणं तदाह ॥ नित्यारूढेति ॥ स्व

युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना ॥ २४ ॥ विशुद्धेन तदात्मानमात्मना विश्वतोमुखं ॥
स्वानुभूत्या तिरोभूतमायागुणविशेषणं ॥ २५ ॥ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये ॥
निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः ॥ २६ ॥ नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा ॥
न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः ॥ २७ ॥ तद्देहः परतः पोषोऽप्यकृशश्चाध्यसंभवात् ॥
बभौ मलैरवच्छन्नः सधूम इव पावकः ॥ २८ ॥ स्वाङ्गं तपोयोगमयं मुक्तकेशं गताम्बरं ॥ दैव
गुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ २९ ॥ एवं सा कपिलोक्तेन मार्गेणाचिरतः परं ॥ आत्मा
नं ब्रह्मनिर्वाणं भगवन्तमवाप ह ॥ ३० ॥ तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं ॥ नाम्ना सि
द्धपदं यत्र सा संसिद्धिमुपेयुषी ॥ ३१ ॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् ॥ स्रोतसां प्र
वरा सौम्य सिद्धिदा सिद्धसेविता ॥ ३२ ॥

यत्र गार्हस्थ्ये क्षीरफेननिभाः मृदु शुभ्राः शय्या आस्तरणानि भांति ॥ दंतचरितामे चकास्थस्वर्णमयाः प रिकराः आसनानि पीठादीनि सुस्पर्शान्यास्तरणानि येषु ॥ १६ ॥ बहुभिरमरद्रुमैः रम्यं ॥ १८ ॥ यत्रोद्याने प्र विष्टमात्मानं देवहूतिं मिति ॥ १९ ॥ आखंडल इंद्रस्तस्य योषितः तासामपीप्सिततमं धामसमि तमं तत ॥ हित्वा तत्राभिमानेन मलिना ॥ २० ॥ सहहि योगमङ्गः सहतामारत्वमिति ॥ नष्टे वत्से वत्स ला गौरिवाभूत ॥ २१ ॥ विरहकृतध्यानफलमाह ॥ निःस्पृहा निर्वासनावस्थविद्ध ॥ २२ ॥ ततः स्वसुतः

पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च ॥ १६ ॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नप्रदीपा आभांति ललनारत्नसंयुताः ॥ १७ ॥ गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः ॥ कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं ॥ १८ ॥ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः ॥ वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितं ॥ १९ ॥ हित्वा तदीप्सिततममप्याखंडलयोषितां ॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरा ॥ २० ॥ वनं प्रव्रजिते पत्यावपत्यविरहातुरा ॥ ज्ञाततत्वाप्यभून्नष्टे वत्से गौरिव वत्सला ॥ २१ ॥ तमेव ध्यायती देवमपत्यं कपिलं हरिं ॥ बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे ॥ २२ ॥ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं ॥ सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया ॥ २३ ॥ भक्तिप्रवाहयोगेन वैराग्येण ब लीयसा

कपिलो यदाह ॥ तद्भगवतो रूपं ध्यायती तदा आत्मानं च विषयतो एवं सर्वगतं ध्यायती ब्रह्मत्वेव स्थितमतिर्बभूवेति त्र्यंबस्यैवार्थ संगः ॥ केन ध्यायती विष्णुहेनाल मनसा विष्णुहो का य णान्याह ॥ भक्तिप्रवाहरूपेण योगेन वैराग्येन च युक्तानुष्ठानेन ज्ञातेन पश्चात्तेन च युक्ताच ज्ञानेन च गी तास्वकं ॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहेति ॥ ब

त्रिंशेन कापथकानां दिलसनाकुलचेतसां॥ कामिनां तामसीपापाद्योगातिरुदीर्यते॥१॥ कालप्रभावव-
र्णनपूर्वकं वैराग्याय विविधकर्मकृतां संसृतिमध्यायत्रयेण संवर्णयति॥ तस्यैतस्य बलिनः कालस्य
बलिनेति वायोः दृ॰ कालमानो विचाल्यमानः वायोर्विक्रमं यथा मेघपंक्तिर्न वेद॥१॥ विक्रममेवाह
यद्यमर्थं दुःखेन प्रयासेन॥ उपादत्ते॥ आपादयति॥ तं भगवान्कालो धुनोति विनाशयति यत्कृते
यन्निमित्ते॥२॥ ध्रुवो केहेतुः यद्यस्मात्सानुबंधस्य कलत्रादिसहितस्य देहस्य संबंधी निग्रहार्दी।

कपिल उवाच॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं॥ कालमानोऽपि बलिनो वायोरिव घनाव-
लिः॥१॥ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे॥ तं तं धुनोति भगवान्पुमान्शोचति यत्कृते॥२॥
यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः॥ ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च॥३॥ जं-
तुर्वै भव एतस्मिन्यां यां योनिमनुव्रजेत॥ तस्यां तस्यां स लभते निर्वृतिं न विरज्यते॥४॥
नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति॥ नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः॥
५॥ आत्मजायासुतागारपशुद्रविणबंधुषु॥ निरूढमूलहृदय आत्मानं बहुमन्यते॥६॥
संदह्यमानसर्वांग एषामुद्वहनाधिना॥ करोत्यविरतं मूढो दुरितानि दुराशयः॥७॥
आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनां च मायया॥ रहोरचितयालापैः शिशूनां कलभाषिणां

ति॥ वसहद्वं॥ अनुबंधसमूहं यापर्यप्रकारः॥३॥ दुर्मतिर्देहदर्शी यत्न॥ दुःखं प्रयत्नं वा ... सू॥८॥
ति॥ नेन निर्वृतिं चन्तद्देशभि॥४॥ नारक्यां नरकाहारादिभिर्जातायां॥५॥ निरूढमूलं प्रसूतम-
नोरथं हृदयं यस्य बहुमन्यते कृतार्थोऽहमिति॥६॥ उद्वहनाधिना पोषणचिंतया॥७॥ दुराश-
यत्वमाह आक्षिप्त आत्मा इन्द्रियाणि च यस्य कया असतीनां पुंश्चलीनामपि रहसि रचितया
संभोगादिरूपया मधुरभाषिणां शिशूनां मालापैश्च वशवन्नमन्यते इत्यन्तरेणान्वयः॥८॥

यतदेव भगवतो रूपं काल इत्यभिधीयते॥ कीदृशं रूपभेदास्पदं वस्तूनामन्यथात्वस्यास्पदमाश्रयः
कारणं॥ उक्तं हि॥ कालाद्गुणव्यतिकर इति वक्ष्यते च॥ गुणव्यतिकरः काल इति॥ दिव्यमद्भुतप्रभा
वम्॥ तदेवाह भूतानामिति पावस्थायसमाप्तिः॥ ३७॥ महदादीनां तत्तदभिमानिनां जीवानां भ
यहेतुत्वमाह यद इति॥ भूतैरेव भूतान्यत्ति संहरति॥ अधियज्ञः यज्ञफलदाता कलयतां वशीकर्तॄ
णां॥ ३८॥ दयस्याद्दीनः॥ ३९॥ यतो भीताः सरितः स्रवंति॥ इंधे दीप्यते सह गिरिभिर्भूः॥ ४२॥ अदः नभः श्व

रूपभेदास्पदं दिव्यं काल इत्यभिधीयते॥ ३७॥ भूतानां महदादीनां यतो भिन्नदृशां भयं॥ योन्तः प्र
विश्य भूतानि भूतैरत्त्यखिलाश्रयः॥ स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः॥ ३८॥ न
चास्य कश्चिद्दयितो न द्वेष्यो न च बांधवः॥ आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमंतकृत्॥ ३९॥ य
द्भयाद्वाति वातोयं सूर्यस्तपति यद्भयात्॥ यद्भयाद्वर्षते देवो भगणो भाति यद्भयात्॥ ४०॥
यद्वनस्पतयो भीता लताश्चौषधिभिः सह॥ स्वे स्वे कालेऽभिगृह्णंति पुष्पाणि च फलानि च॥ ४१॥
स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः॥ अग्निरिंधे सगिरिभिर्भूर्न मज्जति यद्भयात्॥ ४२॥
नभो ददाति श्वसतां पदं यन्नियमाददः॥ लोकं स्वदेहं तनुते महान्सप्तभिरावृतं॥ ४३॥ गुणाभि
मानिनो देवाः सर्गादिष्वस्य यद्भयात्॥ वर्त्तंतेनुयुगं येषां वश एतच्चराचरं॥ ४४॥ सोऽनंतोऽन्तकरः
कालोऽनादिरादिकृदव्ययः॥ जनं जनेन जनयन्मारयन्मृत्युनांतकं॥ ४५॥ इति तृतीयस्कंधे एको

श्वसतां प्राणिनामवकाशं ददाति॥ महान्महत्तत्त्वं अंडरूपमात्मनं स्वदेहं लोकत्वेनाव्ययं विस्तारयति॥ ४३॥ गुणाभिमा
निनो इंद्रियाभिमानिनो देवा अत्र सर्गादिषु प्रवर्त्तंते॥ अनुयुगं यथावसरं येषां वशे इति॥
४४॥ जनेन पित्रादिना जनं पुत्रादिं जनयन् मारयन्॥ आदिकृत्॥ मृत्युनान्तकमपि मारयन्॥ अंतकः
यमस्तस्याप्यंतकः॥ ४५॥ इति श्री भावार्थदीपिकायां तृतीये त्रिंशः॥ २९

त१

श्री भाटी ३ २५

रूपभेदविदः काकादयः उभयतोदंतास्तेषां ॥ अपादेभ्यः तेभ्यो बहुपादाः तेभ्यश्चतुष्पादा इत्यर्थः
द्विपान्मनुष्यः ॥२९॥ ततस्तेषु वर्णाः ॥३०॥ संशयच्छेत्ता मीमांसकः ॥ ततोपि केवलात् ॥ स्वधर्मकृत् मु-
क्तसंगः स्वलक्षणः ॥ आत्मनो धर्ममदोग्धा निष्काम इत्यर्थः ॥३१॥ अर्पिता अशेषाः क्रिया अर्था आत्मा
दिश्चात्मा देहश्च येन अतएव निरंतरः अभेददर्शी ॥ अकर्तुः कर्तृत्वाभिमानशून्यात् ॥३२॥ जीवा-
नां कलया परिकलनेन ॥ अंतर्यामितया प्रविष्ट इति द्रष्टोस्यर्थः ॥३३॥ उक्तं भक्तियोगं पूर्वोक्तेनाष्टां-

रूपभेदविदस्तत्र ततश्चोभयतोदतः ॥ तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥२९॥ त-
तो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ॥ ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोभ्यधिकस्ततः ॥३०॥ अ-
र्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् ॥ मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ॥३१॥
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरंतरः ॥ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ॥
न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥ मनसैतानि भूतानि प्रणमेद्बहुमानयन् ॥ ई-
श्वरो जीवकलया प्रविष्टो भगवानिति ॥३३॥ भक्तियोगश्च योगश्च मया मानव्युदीरितः ॥
ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥३४॥ एतद्भगवतो रूपं ब्रह्मणः परमात्मनः ॥ परं प्र-

गयोगेन सहोपसंहरति भक्तियोगेनेति द्वाभ्यां मानवि पुरुषं (धानं पुरुषं देवं कर्मविचेष्टितं ३५
परमस्वं ॥३४॥ एतदन्यत्पृष्टं जीवस्य संसृतीः कालस्य स्वरूपं वा च वक्ष्यामीति ॥ तदाह ॥ एतदिति सार्धेन
एतत्सर्वनियंतृ यद्भगवतो रूपं कीदृशं प्रधानपुरुषात्मकं परं तस्य गतिरिति लिंगं च एतद्देवदेवमित्यभिधी-
यते कीदृशं कर्मणा विचेष्टितं नानानामरूपतिलक्षणं यस्मात् ॥ तर्हि देवप्रेरितकर्मकृताः संसृतयो वि-
चित्रा इत्यर्थः ॥३५॥ रामजीनमः ॥ ॥

१०५

सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद ॥ स्वकर्मकृतं कर्मविरोधेन यथावकाशं ॥ अनेन कर्मनि
ष्ठाया अपि समप्रवाववधिरित्युक्तं भवति ॥२५॥ अन्तरात्मानं भेद उत ॥ अपि अरमल्पमपि भेदं यः पृथक्
तीत्यर्थः ॥ यद्वा अन्तरात्मन्युदरं शारीरं स्वस्वरूपं तस्य भयं विदधे करोमि ॥२६॥ अथ यातः सर्वभूतेषु भू
तालयं कृतावासं ॥ नरदेहः भूतानामात्मानमन्तर्यामिनं ॥ अभिन्नेन चक्षुषा समदर्शनं ॥२७॥ नग

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं ॥२५॥ आ
त्मनश्च परस्यापि यः करोत्यन्तरोदरं ॥ तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं ॥२६॥ अथ
मां सर्वभूतेषु भूतात्मानं कृतालयं ॥ अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥२७॥ जीवाः
श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ॥ ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥२८॥
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ॥ तेभ्यो गंधविदः श्रेष्ठास्ततः शब्दविदो वराः ॥२९॥

विषयोत्तरं ॥ मानाद्यतिशयः कर्तव्यः इति वक्तुं तारतम्यमाह ॥ सार्धैः षड्भिः अजीवानामचेत
नेभ्यः ॥ ततस्तेष्वपि प्राणभृतः प्राणवृत्तिमन्तः सचित्ताः ॥ ज्ञानवन्तः इन्द्रियाणां वृत्तयो येषु इं
द्रियवृत्तयो वृत्तानामपि स्पृहत्वाः संत्येव ॥ तथाहि महाभारते मोक्षधर्मेषु स्मर्यते तस्मात्पश्यं
ति पादपाः ॥ तस्माज्जिघ्रंति पादपा इत्यादि ॥ अभन्तानुस्पष्टानेन्द्रियवृत्तिरेव ॥२८॥ अतस्तेभ्यः
स्पर्शवेदिभ्यः ॥ रसवेदिनो मत्स्यादयः श्रेष्ठाः गंधविदो भ्रमरादयः शब्दविदः सर्पादयः ॥२९॥

निषेवितेन सम्यगनुष्ठितेन अनिमित्तेन स्वधर्मेण नित्यनैमित्तिकेन महीयसा अश्रद्धादिशून्येन क्रिया
योगेन पंचरात्राद्युक्तसमार्चनप्रकारेण शस्तेन निष्कामेन ||१५|| मद्धिष्ण्यं मत्प्रतिमादि तस्य दर्शनादिभिः
सत्त्वेन धैर्येण असंगमेन वैराग्येण ||१६|| मद्धर्मणः भगवद्धर्मानुष्ठातुः पुरुषस्याशयश्चित्तं ||१९|| प्र
यत्नं विनैव मामभ्येति दृष्टांतः वातो रथः प्रापको यस्य स गंधः आशयात् स्वस्थानात् घ्राणमावृंक्ते आत्मसात्करोति

निषेवितेनानिमित्तेन स्वधर्मेण महीयसा || क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ||१५||
मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः || भूतेषु मद्भावनया सत्त्वेनासंगमेन च ||१६|| मह
तां बहुमानेन दीनानामनुकंपया || मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ||१७|| आध्यात्मि
कानुश्रवणान्नामसंकीर्तनाच्च मे || आर्जवेनार्यसंगेन निरहंक्रियया तथा ||१८|| मद्धर्मणो गु
णैरेतैः परिसंशुद्ध आशयः || पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां ||१९|| यथा वातर
थो घ्राणमावृंक्ते गंध आशयात् || एवं योगरतं चेत आत्मानमविकारि यत् ||२०|| यो मां स
र्वेषु भूतेषु संतमात्मानमीश्वरं || हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ||२१|| द्विष
तः परकाये मां मानिनो भिन्नदर्शिनः || भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति ||२२|| अह
मुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे || नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ||२३|| अह
ं सर्वेषु भूतेषु भूतात्मावस्थितः सदा || तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडंबनं ||२४|| यो मां

अविकारि समं यथा तेन ||२०|| त्रिभिः सर्वभूतात्महेतोरेव भवतीति वक्तुं || केवलं प्रतिमादि
निष्ठां निंदति त्रिभिः अहं सर्वेष्विति || अर्चैव विडंबनमनुकरणं || अर्चायां पूजायां विडंबनमिति वा ||२४||
अवज्ञोपेक्षा द्वेषनिंदाक्रमेण च तानि त्रीणि निषिध्यंते हित्वा उपेक्ष्य ||२२|| द्वेष्टुर्दुष्टत्वयाक्रियया भूतग्रामा
मानिनः न वितरकस्य ||२३|| नहि किमर्चादावर्चनमनर्थकमेव नेत्याह || अर्चादाविति ||२५||

कर्मनिर्हारं पापक्षयं परस्मिन्परमेश्वरे तदर्पणं भगवत्प्रीतिमुद्दिश्येत्यर्थः ॥ यष्टव्यमिति ॥ विधिसिद्धिमुद्दिश्येत्यर्थः ॥ भेददर्शित्वमर्यादावचनेन त्रिविधापि समाने ॥१०॥ तदेवं तामसादिभक्तिस्त्रयस्त्रयो भेदाः ॥ तासु प्रत्येकं श्रेष्ठमेवं च श्रवणकीर्तनादयो नवापि प्रत्येकेन नवनवभेदाः तदेवं सगुणा भक्तिरेकाशीतिभेदा निर्गुणा तु भक्तिरेकविधैव ॥ तामाह ॥ मद्गुणश्रुतिमात्रेणेति द्वाभ्यां अविच्छिन्ना संतता ॥११॥ अहैतुकी फलानुसंधानशून्या अव्यवहिता भेददर्शनरहिता च मद्गुणश्रुतिमात्रेण ॥ मयि पुरुषोत्तमे मनोगतिरविच्छिन्ना या भक्तिः ॥ सा निर्गुणस्य भक्तियोगस्य लक्षणमित्य

कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं ॥ यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः ॥१०॥
मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ॥ मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ ॥११॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं ॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥१२॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानं न गृह्णंति विना मत्सेवनं जनाः ॥१३॥ स एव भक्तियोगाख्य आत्यंतिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥१४॥

न्वयः ॥ लक्षणं स्वरूपं भक्तानां निष्कामतां कैमुत्यन्यायेनाह ॥१३॥ सालोक्यं मया सहैकस्मिँल्लोके वासं सार्ष्टिं समानैश्वर्यं सामीप्यं निकटवर्तित्वं ॥ सारूप्यं समानरूपतां एकत्वं सायुज्यं उत अपि दीयमानमपि दीयमानमपि न गृह्णंति ॥ अतस्तत्कामेनेत्यर्थः ॥१४॥ किमिति तर्हि भजंते न भक्तेरेव परमफलत्वादित्याह ॥ स एवेति ॥ ननु त्रैगुण्यरहिता ब्रह्मप्राप्तिः परमफलं प्रसिद्धं सत्यं ॥ न तु भक्त्या वा तु यं तिकमित्याह ॥ येन भक्तियोगेन मद्भावाय ब्रह्मत्वाय ॥ एवंभूताया भक्तेः साधना

भा॰ टी॰ १०२

येन संसृतीनामाख्यानेन विगतरागो भवेत्॥ ३॥ ईश्वररूपस्य महाप्रभावस्य ते तव हात्मकस्य यद्धेतोः यद्धयात् कुशलं पुण्यं कुर्वंति अचक्षुषः अतस्मात्तो मिथ्याभूतदेहादावभिमतिरहंकारो यस्मात् कर्मस्वनुविद्धया आसक्तया श्रान्तस्य अतएवानाश्रये अपारे तमसि सुप्तस्य चिरं प्रसुप्तस्य लोकस्य प्रबोधाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोसि॥ ५॥ श्लक्ष्णं स्नेहवत्॥ ६॥ मार्गैः प्रकार

विरागो येन पुरुषो भगवन्सर्वतो भवेत्॥ आचक्ष्व जीवलोकस्य विविधा लोकसंसृतीः॥ ३॥ कालस्येश्वररूपस्य परेषां च परस्य ते॥ स्वरूपं बत कुर्वंति यद्धेतोः कुशलं जनाः॥ ४ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये॥ श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः॥ ५॥ मैत्रेय उवाच॥ इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः॥ ६॥ श्रीभगवानुवाच॥ भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते॥ स्वभावगुणमार्गेण पुंसां भावो विभिद्यते॥ ७॥ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव च॥ संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः॥ ८॥ विषयानभिसंधाय यश ऐश्वर्यमेव च॥ अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः॥ ९॥

विशेषैः नानेवार॥ स्वभावभूता ये गुणाः॥ तेषां मार्गेण वृत्तिभेदेन भावः अभिप्रायः फलसंकल्पभेदाद्भक्तिभेद इत्यर्थः॥ ७॥ अभिसंधाय संकल्प्य संरंभी क्रोधी भिन्नदृक् भेददर्शी यो वै भक्तिं कुर्यात्॥ स त्रिविधोपि॥ तामसः पृथग्भावः भेददर्शी॥ ९॥

श्रिया

१०२

भूतादेर्दृष्टान्तेभ्यः पृथक्॥ तस्मादपि जीवसंज्ञितादात्मसंज्ञितः पृथक्॥ तथा प्रधानादपि तत्प्रवर्तको भगवान्ब्रह्मसंज्ञितः॥४२॥ उपाधितो विवेकमुक्त्वा ऐक्यमाह॥ सर्वभूतेष्विति॥ भूतेषु चतुर्विधेषु तदात्मतां महाभूतात्मताम्॥४३॥ यमभेदस्यौपाधिकत्वं सदृष्टान्तमाह॥ स्वयोनिषु ज्योतिरग्निः गुणवैषम्यात्॥ दीर्घह्रस्वादिभेदात्॥ प्रकृतौ देहे॥४४॥ स्वांशस्य जीवस्य बन्धहेतुं दैवीं देवस्य विष्णोः शक्तिं पराभाव्य तत्प्रसादेनैव निरस्य स्वरूपेणात्मत्वेनावतिष्ठते॥४५॥ इति श्रीभावार्थदी

भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसंज्ञितात्॥ आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः॥४२॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम्॥४३॥ स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते॥ योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः॥ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम्॥ दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ४५

इति श्रीभागवते महापुराणे तृतीयस्कन्धे कापिलेये स्वधर्मोपाष्टानं नामाष्टाविंशः॥२८॥ देवहूतिरुवाच॥ लक्षणं महदादीनां प्रकृतेः पुरुषस्य च॥ स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकं १ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो॥२

पिकायां तृतीयस्कन्धेऽष्टाविंशः॥२८॥ एकोनत्रिंशके भक्तियोगस्तत्र बहुधोच्यते॥ कालस्य च बलं घोरसंसृतिश्च विरक्तये॥१॥ उक्तमुपवादरूपं भक्तिमार्गभेदान्पृच्छति द्वाभ्याम्॥ लक्षणं महदादीनां यथा सांख्येषु तथा कथितं येन लक्षणेन तत्स्वरूपं पारमार्थिकं परस्परविभक्तमित्यर्थः॥ यो भक्तियोगो मूलं यस्य तत्॥ तत्कथितं तस्य भक्तियोगस्य मार्गं प्रकारं विस्तरतो मे ब्रूहि॥२॥

निर्गीक्रानिऽज्वलीह्मतानिबाऊवलयान्यंगदानियेषु ॥ अथिश्रिनालोकपालायेषुदशाशनारेचक्रेनसमर्थे तेजोयस्यकरसरोरुहराजहंसमिव ॥ २७ ॥ अरातयोयेमदाः योद्धारः ॥ तेषांप्राणानिमवकर्दमस्तेनदिग्धालि मा अस्यकंठेमालामणिवस्तरेत ॥ मथुब्रतानावद्रूयस्यगिराउपवुष्टानादिता ॥ चैतन्यस्यजीवस्यतत्व ॥ तद्ध नोवेस्तवे ॥ आत्मानमस्यजगतानिलेपमशुणामल ॥ विभर्तिकोस्वभमगास्वरूपभगवान्दगिविति ॥ स्फुते ष्वनकेपिताहृतानुकपायाथीः ॥ तयागृहीतामहर्निर्येननस्यविस्फुरनीयेमरकतकुंडलेनयोर्वलितेन वाहूद्धममंदरगिरेः परिवर्तनेननिर्गीकबाऊवलयानथिलोकपालान् ॥ संचितयेद्दशाशनाव मसस्यतेजः शांखचतन्करसरोरुहराजहंस ॥ २७ ॥ कोमोदकीभगवतोदयितांस्मरेतदिग्धामरातिभटशोणितकर्दमेन ॥ मालामधुव्रतवरूथगिरोपघुष्टांचैत्यस्यतत्वममलंमणिमस्यकंठे ॥ २८ ॥ भृत्यानुकंपितधियेहगृहीतमूर्तेः संचिंतयेद्भगवतोवदनारविंदं ॥ यद्विस्फुरन्मकरकुंडलवल्गि तेनविद्योतितामलकपोलमुदारनास ॥ २९ ॥ यच्छ्रीनिकेतमलिभिः परिसेव्यमानंभूत्यास्वया कुटिलकुंतलवृंदजुष्टंमीनद्वयाश्रयमधिक्षिपदब्जनेत्रंध्यायेन्मनोमयमतंद्रितमुल्लसद्भ्रु ॥ ३० ॥ तस्यावलोकमधिकंकृपयातिघोरतापत्रयोपशमनायनिसृष्टमक्ष्णोः ॥ स्निग्धस्मितानु गुणितंविपुलप्रसादंध्यायेच्चिरंविपुलभावनयागुहायां ॥ ३१ ॥ रामजीनमः ॥

प्रचलनेनविद्योतितोअमलोकपोलोयस्मिंस्तत् ॥ उदाराउन्नतानासायस्मिंस्तत् ॥ २९ ॥ यच्चस्वयाभूत्या श्रीभयाअलिभिः ॥ परिसेव्यमानंमीनद्वयाश्रयंचश्रीनिकेतंपद्ममधिक्षिपद्यन्नेत्रं ॥ तद्ध्यायेत् ॥ नम्रकुंत लेवलीनामधिक्षेपः ॥ नेत्रद्वयेनमीनद्वयस्येतिद्रष्टव्यम ॥ अतंद्रस्तनेत्रेयस्मिंस्तन्मनोमयंमानसंतं ॥ उल्लस त्योभ्रुवौयस्मिंस्तत् ॥ मनोमयंमनस्याविर्भवत् ॥ ३० ॥ कृपयाधिकमित्यर्थः ॥ अक्ष्णोर्निसृष्टंप्रसृतंस्निग्ध स्मितेनानुगुणितंसयुतं ॥ विपुलः प्रसादोयस्मिंस्तत् ॥ गुहायांहृदि ॥ ३१ ॥

अवनतायेऽखिललोकास्तेषांतीव्रशोकेनयान्यश्रूणितेषांसागरंविशोषयतीतितथातं ॥ हरेर्हासंस्मरेत्
दारंभ्रूमंडलंचध्यायेत् ॥ कथंभूतंनिजमाययामकरध्वजस्यापिसंमोहनायरचितं ॥ मुनिकृतेमुनीना
मुपकारायमुनीनांसंमोहनेप्रवृत्तंकाममेवमोहयितुमित्यर्थः ॥३२॥ मंदहासस्यध्यानमुक्त्वास्फुटहासस्यध्या
नमाह ॥ विसोःप्रहसितं ॥ उच्चैर्हसितंध्यायेत् ॥ कीदृशंध्यानायनंप्रतिसंदर्शनयायप्यत्तंविनैवध्यानस्य
विषयभूतं ॥ सौंदर्यमेवाह ॥ बहुलयाऽधिकयाअधरोष्ठस्यभासाकोमा ॥ अरुणायिताभूतास्तनवःसू
क्ष्माद्विजाएवकुंदकुड्मलानितेषांपंक्तिःस्फुरतियस्मिंस्तत् ॥ स्वदेहकुहरेहृदयाकाशेअवस्थितस्यध्याने
स्नेहरसेनार्द्रयाभक्त्यार्पितमनाःसन् ॥ पृथगन्यत्किंचिद्द्रष्टुंनेच्छेत् ॥ नचिंतेवि बाल

हासंहरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं ॥ संमोहनायरचितंनि
जमाययास्यभ्रूमंडलंमुनिकृतेमकरध्वजस्य ॥३२॥ ध्यानायनंप्रहसितंबहुलाधरोष्ठभासा
रुणायिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरेवसितस्यविष्णोर्भक्त्यार्द्रयार्पितमनानपृथ
ग्दिदृक्षेत् ॥३३॥ एवंहरौभगवतिप्रतिलब्धभावोभक्त्याद्रवद्धृदयउत्पुलकःप्रमोदात् ॥ औत्कंठ्य
बाष्पकलयामुहुरर्द्यमानस्तच्चापिचित्तबडिशंशनकैर्वियुंक्ते ॥३४॥ ॥

येत् ॥ इत्यर्थः ॥३३॥ समाधिमाह ॥ एवमितिद्वाभ्यांनिर्बीजःसबीजश्चेतिद्विविधोयोगः ॥ तत्रनिर्बीजयो
गे ॥ यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ॥ ततस्ततोनियम्यैतदात्मन्येववशंनयेदितिगीतोक्तमा
र्गेणक्रियमाणोऽपिदुष्करःसमाधिः ॥ सबीजेतुसुकरः ॥ तत्रहिपरमानंदमूर्तौहरौध्यायमानेप
ततएवचित्तोपरमोभवति ॥ तदुक्तंहृतात्मनोहृतप्राणांश्चभक्तिरनिच्छतोगतिमण्वींप्रयुंक्तइत्य
तःसएवोपलक्षितंयोगस्तल्लक्षणंवक्ष्येसबीजस्येतितदेवायत्नसिद्धंतदर्शयति ॥ एवंध्यानमार्गे
णहरौप्रतिलब्धोभावः ॥ प्रेमयेनतथाभक्त्याद्रवद्धृदयंयस्य ॥ प्रमोदादुद्गतानिपुलकानियस्य ॥ औत्क
ण्ठ्यमहत्तास्त्रकलयाश्रुरेखयासानंदंआनंदसंप्लवेनिमज्जमानःइत्थंहस्यभगवतोग्रहणायबडिशमस्य

यदि ह्यदा एवं निर्विषयं भवति ॥ अतएव शुक्लापांगे चक्षुषो यसंबंधं विना ध्यानर्यं च स्यात्तस्संभवात् ॥ न
वरश्वंवच्छ्रेहादिविषयः स्यात ॥ यतस्तत्र विरक्ते परमात्मनेदा तु भवे न अतो निर्वाणलय सरकृ निह
ति हृष्यत्तो परिसन्नच्च स्याकारेणापरिणामततत्स्वर्थं ॥ यथार्थविन्यो लाभ्यास्वयविषयापरमेमहा
भूतस्तोनिहृष्येणपरिणमते ॥ अत्रास्वादशायांअवधानेस्मात ध्येयविभागमपूर्णमेकं ॥ अ
विद्यमानानन्मनुगतमीलते ॥ अत्र हेतुः प्रतिनिहृतोपरागोगुणभवाहादेहाशुपाधियस्य ॥ ३४
न च सम्मोष्यनिरवशुनः संसरतीत्याह ॥ सोपि सएव शुद्धः नस्मिन्महिम्नि वस्त्ररूपे अवसि

शुक्लापांगे यदि निर्विषयं विरक्ते निर्वाणमृच्छति मनः सहसा यथार्चिः ॥
आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ३५ ॥
सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये ॥
हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ॥ ३६ ॥

नः अवसाने निष्ठां प्राप्तः कया मनसो निवृत्त्या चरमया विद्यारहितयेति सुषुप्ताद्व्यावृत्तिः ॥ तत्र
स विद्यास्ति न विद्यानी ॥ अत्र हेतुः ॥ एतया योगाभ्यासकृतयेत्यर्थः ॥ न केवलमपि सुखदुःखयो
रात्मधर्मत्वे कृतो वैयर्थ्यं तत्राह ॥ दुःखयोः सुखदुःखयोर्हेतुत्वं भोक्तृत्वं यत्सर्वमासीत ॥ तद
पि असति अविद्याकृते कर्तरि अहंकारे विधत्ते तत्त्विष्टमेव यत्प्रतीत्यर्थः यतः ॥ उपलब्धप
रात्मकाष्ठः ॥ अपरोक्षीकृतात्मतत्त्वः ॥ तस्य जीवन्मुक्तिमाह ॥ देहं चेति द्वाभ्याम् ॥ ३६

चरमउत्कलक्षणः सिद्धो देहमपि न विपश्यति॥ कुतः स्वदेहः देवाद्वा सनादुत्थितमुत्थाय गत्वैव स्थितं तस्यापार्थयेतं॥ ततो दैववशात्तन्न रपिजपेतं वा न विपश्यति॥ यतः स्वरूपं प्राप्तः यतो देहात्स्वरूपस्य ध्यगमत्॥ देहमिति वा॥ स तेन तदनुसंधानेन दृष्टांतः॥ वासः उपरिकृतं कटिदेशे परिवेष्टितं स्थितं गतं वा॥ मदिरामदेनांधो यथा न पश्यतीति॥ ३६॥ ननु तर्हि देहस्य कथं प्रवृत्तिनिवृत्ती जीवनं च तत्राह॥ देहोपीति दैवं दृष्टं संस्कारस्तद्वशेन गच्छन्॥ यावत्स्वारंभकं कर्म तिष्ठति तावत्प्रतिसमी क्षते जीवत्येव सासुः सेंद्रियं न तु तत्र हि तस्मिन् तु नः संगः स्यात्तमत्राह॥ तदेहं सप्रपंचं देहादिप्रपंचं

देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो विपश्यति यतोध्यगमत्स्वरूपं॥ दैवादपेतमथ दैव वशादुपेतं वासो यथा परिकृतं मदिरामदांधः॥ ३६॥ देहोपि दैववशगः खलु कर्म यावत्स्वा रंभकं प्रतिसमीक्षत एव सासुः॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबु द्धवस्तुः॥ ३७॥ यथा पुत्राद्यविनाशेप्यपगमस्य प्रतीयते॥ अध्यात्मत्वेनाभिमताद्देहादेः पुरु षस्तथा॥ ३८॥ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात्॥ अप्यात्मत्वेनाभिमताद्यथा ग्निः पृथगुल्मुकात्॥ ३९॥

सप्रपंचं देहं पुत्रादिसहितं पुनर्न भजते॥ अहं ममेति नाभिमन्यते॥ स्वाप्नदृष्टं स्वप्नं समाधिपर्यंतो योगो येन॥ अत एव प्रतिबुद्धं वस्तु आत्मतत्त्वं येन सः॥ ३७॥ प्रतिबोधप्रकारमाह द्वाभ्यां यथेति॥ प्रतिबोधदृष्टांतः आत्मत्वेनाभिमतादपि पुत्रादेः मर्त्यः पित्रादिः पुरुषो देहादेः॥ ३८॥ एवमात्मत्वेनाभावेपि भेदं सदृष्टांतमाह यथोल्मुकात्॥ दग्धानीज्वलतः काष्ठात् स्वसंभवात्॥ अग्नेः संभूतात्॥ आत्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादपि॥ अग्निं ता विवेकिनो हि एवमे व अभिमानोस्ति॥ उल्मुकात्सर्वं सिद्धादपि तदाहकं प्रकाशकं चाग्निः पृथगेव॥ ३९॥॥

ग्राम्यधर्मो मैथुनं तस्य निवृत्तिः ॥ मितं च तन्मेध्यं शुद्धं च तस्यादनं ॥ तत्र मितं नाम ॥ द्वौ भागौ पूरयेदन्नै स्तोयेनैकं प्रपूरयेत् ॥ मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत् ॥ इति स्वल्पमितमिदं ॥ विविक्तं विजनं क्षेमं निर्बाधं तस्य स्थानस्य सेवनम् ॥ ३ ॥ यावदर्थः प्रयोजनं तावन्मात्रस्य परिग्रहः ॥ ४ ॥ आसनादीनां संग्रामादिभिः ॥ सदासनस्य जयेन स्थैर्यं ॥ स्वधिष्ण्यानां प्राणस्थानानां मूलाधारादीनां मध्ये एकस्मिन् देशे मनसा सह प्राणस्य धारणं ॥ आत्मनो मनसः समाधाने आत्माकारता ॥ एतैः शुद्धान्नदानादिभिः पथिभिरिह प्रोक्तैः ॥ ७ ॥ आसनमादौ निश्चलं बध्नाति ॥ शुद्धावृत्ति यावत्समाप्तिः ॥ आसनं कुशाजि

ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा ॥ मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ॥ ३ ॥ अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ॥ ४ ॥ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः ॥ प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि ॥ ५ ॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणा ॥ वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥ ६ ॥ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथं ॥ बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ॥ ७ ॥ शुचौ देशे प्रतिष्ठाप्य विजितासन आसनं ॥ तस्मिन्स्वस्ति समासीन ऋजुकायः समभ्यसेत् ॥ ८ ॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलम् ॥ ९ ॥

तं चैलोत्तरं प्रतिष्ठाप्य स्वस्तिकासनेन यथासुखमिति वा ॥ समभ्यसेत्प्राणायाममिति शेषः ॥ ऊरुजंघान्तराधाय पादाग्रे जानुमध्यगे ॥ योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः ॥ बाह्यवायोरंतः प्रवेशनं पूरकः ॥ प्रवेशितस्य धारणं कुंभकः ॥ धृतस्य बहिर्निःसारणं रेचकः ॥ प्रतिकूलेन रेचकपूरककुंभकैः ॥ यद्वा इडया पूर्णं पिंगलया रेचनं पिंगलया पूर्ये इडया रेचनमित्येवं प्रतिकूलेन वा शोधयेदित्यर्थः ॥ स्थिरं स्वस्थं अचपलं चलं यथा न भवति ॥ तथा शोधयेत् ॥ ९ ॥

ध्मातं सेतं तप्तमित्यर्थः ॥ लोहं सुवर्णं यथा मलं त्यजति ॥ तथा मनो विरजं स्यात् ॥ ततश्च चलं तत्स्यादिति भावः ॥ १०॥ प्राणायामादीनां समाधौ हारकार्यत्वात् ॥ प्राणायामैरिति ॥ दोषान् वातश्लेष्मादीन् ॥ संसर्गान् विषयसंसर्गान् अनीश्वरान् रागादीन् ॥ वायुना सह मनसः स्थिरीकरणं धारणा ॥ स्थिरस्य वृत्तिसंहृतिर्ध्यानं ॥ वृत्तिनिरोधः समाधिरिति भेदः ॥ ११॥ सुसमाहितं स्थिरं जातं काष्ठां कलां मूर्तिमित्यर्थः ॥ स्वनासाग्रेऽवलोकनं यस्य ॥ एतच्च लयविक्षेपयोः परिहाराय ॥ १२॥ ध्येयं हरिमाह सप्तभिः प्रसन्नेव॰ ॥

मनोचिरात्स्याद्विरजं जितश्वासस्य योगिनः ॥ वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं ॥ १०॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् ॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ११॥ यदा मनः स्वं विरजं योगेन सुसमाहितं ॥ काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः ॥ १२॥ प्रसन्नवदनांभोजं पद्मगर्भारुणेक्षणं ॥ नीलोत्पलदलश्यामं शंखचक्रगदाधरं ॥ १३॥ लसत्पंकजकिंजल्कपीतकौशेयवाससं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं ॥ १४॥ मत्तद्विरेफकलया परीतं वनमालया ॥ परार्ध्यहारवलयकिरीटांगदनूपुरं ॥ १५॥ कांचीगुणोल्लसच्छ्रोणिं हृदयांभोजविष्टरं ॥ दर्शनीयतमं शांतं मनोनयनवर्धनं ॥ १६॥

वदनांभोजं यस्य तं ध्यायेदिति षष्ठेनान्वयः ॥ पद्मगर्भवदरुणे ईक्षणे नेत्रे यस्य ॥ नीलोत्पलवत् श्यामं ॥ १३॥ लसत्पंकजकिंजल्कपीतं कौशेयं वासो यस्य ॥ श्रीवत्सो लांछनं वक्षसि यस्य ॥ भ्राजत्कौस्तुभेनामुक्ता आसमंताच्छ्लिष्टा कंधरा यस्य ॥ १४॥ मत्तद्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तया परीतं व्याप्तं ॥ परार्ध्यानि श्रेष्ठानि हारादीनि यस्य ॥ १५॥ कांचीगुणेनोल्लसंती श्रोणिर्यस्य ॥ भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य ॥ भक्तानां मनोनयनानि वर्धयति हर्षयतीति तथा ॥ १६॥

प्रपीक्ष्यमतिसुंदरं भक्तविषयं दर्शनं यस्य॥ कैशोरे ताऽरुण्ये वयसि स्थितं॥ भृत्यानामनुग्रहे कातरं व्यग्रं॥१७॥
कीर्तन्यं कीर्तनार्हं तीर्थं यशो यस्य पुण्यश्लोकावलिप्रमुखाः॥ तेषां यशस्करं समग्राण्यंगानि यस्मिन् तथा
वमेतन्नापयाति तावत्पर्यंतं॥१८॥ प्रेक्षणीयमीहितं लीला यस्य॥१९॥ तदेवं समग्रं ध्यानमुक्त्वा एकैकावयव
ध्यानमाह॥ तस्मिन् लब्धपदं स्थितिर्येन तच्चित्तं विलक्ष्य विशेषेण लक्षीकृत्य एकत्र एकस्मिन्नंगे संयुंज्यात्॥२०॥
तदेवं पादादिक्रमेणाष्टभिः श्लोकैः॥ सम्यक् चिंतयेत् पादतले रेखात्मकानि वज्रादीनि लांछनानि तै

प्रापीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतं॥ संतं वयसि कैशोरे भृत्यानुग्रहकातरं॥१७॥ कीर्तन्य
तीर्थयशसं पुण्यश्लोकयशस्करं॥ ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः॥१८॥ स्थितं व्रजंत
मासीनं शयानं वा गुहाशयं॥ प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा॥१९॥ तस्मिन् लब्धपदं चित्तं
सर्वावयवसंस्थितं॥ विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः॥२०॥ संचिंतयेद्भगवतश्चरणा
रविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं॥ उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभि
राहतमहद्हृदयांधकारं॥२१॥ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन
शिवः शिवोऽभूत्॥ ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं २२

ध्वजपद्मांकं उत्तुंगान्युन्नतानि रक्तानि विलसंति च नखाः॥ तेषां चक्रवालं मंडलं तस्य॥ ज्योत्स्नाभिराहतो महतां ध्यातॄ
णां हृदयांधकारो येन॥ एतच्च सर्वेषु पादेषु विशेषणं ध्येयत्वेनैवोच्यते॥२१॥ किं च यस्य शौचेन क्षा
लनेन निःसृताया सरित्प्रवराया गंगाया उदकेन तीर्थेन संसारतारकेण मूर्ध्नि अधिकृतेन धृतेन धृते
न शिवो सन्॥ अत्यधिकं स्वयं मायेत्यर्थः॥ ध्यातुर्मनसि यः शमलशैलः पापपर्वतस्तस्मिन्॥ नि
सृष्टं क्षिप्तं वज्रमिव यत्॥ यद्वा शमलशैले निसृष्टं उत्सृष्टं लांछनरूपं वज्रं येन तत्॥२२॥

त्रिभो नीनुहृद्यं तनवर्ये ते नेत्राहृयमखिलस्य विधातर्वे स्मणोजननस्थालत्स्यासंलालितं स्वर्णेवामयें णा
संसेवितं सस्मारित्वमिव प्रतीतं वारयति ॥ अभवस्यास्य हरिं कुर्यात ध्यायेत ॥ ४४ ॥ स्वपर्ष्णास्य भुजयोः स्कं
धयोः अपि उपरि गेजत्मेवलस्य निधी आधारौ ॥ अतसिका यां कुसुमवत्कांत्या बभासमानौ याल्लवि
श्राउलं लंबमानं प्रत्यांतां बरवासः ॥ तस्मिन्नतेमानो यः कांचीकलापः तेन परिरंभः संश्लेषो विद्यते
यस्य तं हरिं भोनितंब विंबं च हरिं कुर्यादिति एवं सौवान्वयः ॥ ४५ ॥ अग्रव्याहरे लोमभि हृदं ध्यायेत ॥ क

नातुहृद्यं नलनलोचन यानजनन्यालयत्वा खिलस्य सर्वं दिनत्या विधातः ॥ ३ वौ निधायक रथ
लवं बोविंवा पत्रं संसालितं हरिं विभोरभवस्य कुर्यात ॥ ४६ ॥ ३ रस्त पर्णा भुजयोः रथि यो भ माला
वीजो निधी अतसिका कुसुमावभासौ ॥ व्याले विपीतवरवास सिवर्तमाने कांचीकलापपरि
रंभिनितंबविंबं ॥ ४७ ॥ नाभिहृदे भुवनकोश गृहोदरस्य यत्रात्मयोनि धिषणा खिललोकप
द्मं ॥ व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहाररमयूरवगौरं ॥ ४८ ॥ वक्षोधिवासमृषभ
स्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं ॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कु
र्यान्मनसाखिललोकनमस्कृतस्य ॥ ४९ ॥ ॥

बाहू भुवनानां कोशस्य समूहस्य गृहाः स्थितिस्थानं य
दुदरं तत्र स्थितं ध्यायेत ॥ यत्र नाभिहृदे आत्मयोने ब्रह्मणो धिषणां धिस्थं अखिललोकात्मकं पद्मं
व्यूढं उत्थितं ॥ तथा हरिन्मणि वृषयोः मरकतमणि श्रेष्ठयोरिव ॥ यौ स्तनौ तयोर्द्वयं ध्यायेत ॥ विशदस्य
हारस्य मयूखैः गौरं शुभ्रं ॥ ४८ ॥ ऋषभस्य पुरुषश्रेष्ठस्य महाविभूतेः महालक्ष्म्याः अधिवासं स्थानं वक्षः कंठं
च मनसि कुर्यात ॥ कथं भूतं कंठं यः कौस्तुभमणिर्योभूषणान्येषुतं तस्याप्यधिकं भूषणं ॥ अथ यः प्र
यो जनं यस्य ॥ कौस्तुभमणिमेव स्वयम लंकुर्वे इत्यर्थ ॥ पुंसा मन्तर्मनो नयनानां नि

ततः किमत्राह ॥ प्रकृतेर्विविक्ते ॥ विगुणात्मा न च योग्य स्य सतः तेषु प्रकृतेर्गुणेषु सत्त्वगुणस्य केवल्यं कथं ॥ अ
त एव कविचित्रिगुणात्मिकायाः प्रकृतेः संसारभयस्य गुणत्रयबोद्धृत्वं ततः स्वार्थं कविदिति ॥ २३ ॥ न प्रकृतेरि
वेधर्मा वेधरे ततः किं न गुणत्रयज्ञानं ततः किं निवृत्तो संसारो नाम ततो हते ॥ कविद्रूढ्वत्स्वस्वाय
नवेकस्य स्वादिमभि प्रेत्य साधनानि योगकर्मयन्निवृत्त्यर्थानि त्रिभिः ॥ निमित्तफलेन निमित्ते प्रव
र्तते ॥ यस्मिन् विवेकात्मेन यथार्थं गुणत्रयमलात्मना निमित्तेन मनसा प्रकृतेः न कथाश्रवणेन संसृत
प्रकृतेः कर्मबन्धो येन गुणत्रयस्य यदा श्रयः ॥ गुणेषु सत्त्वप्रकृतेः कैवल्यं नेष्यतः कथं ॥ २४ ॥
के विनत्वावसर्पणं निवृत्तं भयगुणत्रयं ॥ अनिवृत्तनिमित्तत्वात्सतः सम्भवति इष्टते ॥ २५ ॥ श्री
भगवान् ॥ अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना ॥ तीव्रया मयि भक्त्या च श्रुतसंभृत
याचिरं ॥ २६ ॥ ज्ञानेन दृष्टतत्त्वेन वैराग्येन बलीयसा ॥ तपोयुक्तेन योगेन तीव्रेणात्मसमाधि
ना ॥ २७ ॥ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं ॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥
२८ ॥ भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ॥ नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य
च ॥ २९ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते
॥ ३० ॥ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसं ॥ युञ्जतो नापकुरुत आत्मारामस्य कर्हिचित्
॥ ३१ ॥ [illegible]त्या ॥ ३१ ॥ दह्यमाना अभिभूयमाना तिरोहिता भवति ॥ ३२ ॥ एवं च सति पुनरुद्भवो न स्यादित्या
ह ॥ भुक्तभोगा यस्याः नित्यशः सदा दृष्टदोषा च यस्याः ॥ अत एव परित्यक्ता सती ईश्वरस्याप्यत्र
स्वे महिम्नि स्थितस्य स्वानंदपात्रस्य ॥ ३३ ॥ अविवेकावस्थायामनर्थहेतुरपि विवेकानंतरं
न भवतीति सदृष्टांतमाह यथेति द्वाभ्यां प्रस्वापः ॥ स्वप्नः बह्वनर्थान् बिभर्ति पुष्णाति ॥ प्रतिबुद्ध

भा
टी
९८

बहूनि जन्मानि यस्मिन्काले ॥ २७ ॥ प्रतिबुद्धार्थः विदितात्मतत्त्वः कैवल्याख्यं स्वसंस्थानं देहादिव्यतिरिक्तं
स्वरूपं मदाश्रयं निरतिशयानन्दं ॥ २८ ॥ स्वदृष्टात्मज्ञानेन छिन्नाः संशया मिथ्याज्ञानानि यस्य ॥ लिंगा
द्विनिर्गमे लिंगशरीरनाशे सतीत्यर्थः ॥ २९ ॥ तदा न अणिमादिसिद्धयो नश्वराद्यद्रूपा भवंति ॥ तासु योगे
नोपचितासु समस्तहारायनयोगादन्यो हेतुर्यासां तासु यदा सिद्धस्य चेतो न विषज्जते ॥ अंगेव देहान्तः अ
पतनदा अनेन मतिरकांतो येहस्य तत्त्सर्वविधिनीयत्वयस्यांगतीमृत्योर्हासो न भवति ॥ विषयैतसि

एवं विदितमध्यात्मं तं कालेन बहुजन्मना ॥ सर्वत्र जातवैराग्य आब्रह्मभवनान्मुनिः ॥ २७ ॥ म
द्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा ॥ निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं ॥ २८ ॥
प्राप्नोतीहांजसा धीरः स्वदृशा छिन्नसंशयः ॥ यद्गत्वा न निवर्त्तेत योगी लिंगाद्विनिर्गमे ॥ २९ ॥
यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग ॥ अनन्यहेतुष्वथ मे गतिः स्यादा
त्यंतिकी यत्र न मृत्युहासः ॥ ३० ॥ इतिश्रीभागवते महापुराणे तृतीयस्कंधे सप्तविंशोऽध्या
यः ॥ २७ ॥ श्रीभगवानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ॥ मनो येनैव विधि
ना प्रसन्नं याति सत्पथं ॥ १ ॥ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्त्तनम् ॥ दैवाल्लब्धेन संतो
षआत्मविच्चरणार्चनम् ॥ २

होपि मायावधीकृतत्रुतिमृत्योर्हासो गर्वो भवतीत्यर्थः ॥ ३० ॥ इतिश्री
भागवतभावार्थदीपिकायां तृतीये सप्तविंशः ॥ २७ ॥ अष्टाविंशे ततोष्टांगयोगेन ध्यानयोगभि
ना ॥ सर्वोपाधिविनिर्मुक्तस्वरूपज्ञानमीर्यते ॥ १ ॥ भक्तिसंक्षेपतः प्रोक्ता सांख्यमार्गाय विस्तृता ।
अथाष्टवैस्वंयोगमष्टांगं कपिलो मुनिः ॥ २ ॥ सबीजस्य सालंबनस्य प्रसन्नं सत् ॥ १ ॥ नव्यमति
यमानाहृत्विभिरल्पदयापिकैः शक्त्या स्वधर्माचरणम् ॥ २ ॥

९८

बुद्ध्यादिभिर्हृदयमेवाधिष्ठानं गिरां पतिर्ब्रह्मा ॥६०॥ चैत्यः क्षेत्रज्ञः अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विवेक्तुं सर्वेषां पुनः प्रवेशमाह ॥ एतदुक्तं नवभिः विराड्देहस्याधिष्ठितिर्देहदेशान्ततेन दर्शयन् सांख्योक्तं कथयन्नस्य प्रयोजनमाह ॥ यथेति द्वाभ्यां ॥७१॥ प्रथमं श्रीपरमेश्वरे भक्तिः ॥ ततोऽन्यत्र विरक्तिः ॥ ततो योगप्रवृत्ता धीः ॥ एका

अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं ॥ चंद्रमा मनसो जातो बुद्धिर्बुद्धेर्गिरां पतिः ॥६०॥ अहंकार स्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥ एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् ॥६१॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥ वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ॥६२॥ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ॥ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ॥६३॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ॥ त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ॥६४॥ रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ॥ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ॥६५॥ हस्ताविंद्रो बलेनैव नोदतिष्ठत्तदा विराट् ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ॥६६॥ नाड्यो नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ॥ क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ॥६७॥ हृदयं मनसा चंद्रो नोदतिष्ठत्तदा विराट् ॥ बुद्ध्या ब्रह्मापि हृदयं नोद० ॥ ॥ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा ॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥६९॥ यथा प्रसुप्तं पुरुषं प्राणेंद्रियमनोधियः ॥ प्रभवंति विना येन नोत्थापयितुमोजसा ॥७०॥ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया ॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ॥७१॥ इति श्रीभागवते तृतीयस्कंधे कापिलेये तत्त्वसमाम्नाये षड्विंशतितमोऽध्यायः २६

यं चिंतंत तोयज्ञानेनेन यत्त्वगणात्मानं देवेभ्यते ॥ प्रसिन्त्वात्मनि कार्यकारणसंघाते विविच्य चिंतयेत् ७१ ॥ इति श्रीभागवतभावार्थदीपिकायां तृतीयस्कंधे षड्विंशोऽध्यायः ॥२६॥ ॥ ॥

भा
स्की
९९

समविंशेततः सम्यग्ज्ञानसाधनयोगतः पुंप्रकृत्योर्विवेकेन मोक्षरीतिर्निरूप्यते ॥ १ ॥ विवेकज्ञानेन मो
क्षमुपपादयितुं शुद्धस्यैव पुरुषस्य सर्वार्थं प्रकृत्यविवेकतः संसारमनुसारयति ॥ प्रकृतिस्थोपीति
त्रिभिः ॥ देहस्थोपि नाज्यते न लिप्यते गुणैस्तत्कृतैः सुखदुःखादिभिः निर्गुणत्वादकर्तृत्वं ततोऽविका
रित्वं तस्मात् ॥ १ ॥ यदि हेतत्र विनार्थः सन् प्रकृतिसंगकृतैः सदसन्मिश्रयोनिषु देवतिर्यगादि
षु संसारपदवीं प्राप्नोति ॥ ननु तर्हि वास्तवत्वात्संसृतेः किं तन्निवृत्तिप्रयासेन तत्राह ॥ अर्थे हीति २

श्रीभगवानुवाच ॥ प्रकृतिस्थोपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गु
णत्वाज्जलार्कवत् ॥ १ ॥ स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते ॥ अहंक्रियाविमूढात्मा कर्तास्मी
त्यभिमन्यते ॥ २ ॥ तेन संसारपदवीमवशोभ्येत्यनिर्वृतः ॥ प्रासंगिकैः कर्मदोषैः सदसन्मिश्र
योनिषु ॥ ३ ॥ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो
यथा ॥ ४ ॥ अत एव शनैश्चित्तं प्रसक्तमसतां पथि ॥ भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ॥ ५
यमादिभिर्योगपथैरभ्यसञ्छ्रद्धयान्वितः ॥ मयि भावेन सत्येन मत्कथाश्रवणेन च ॥ ६ ॥
सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ॥ ब्रह्मचर्येण मौनेन स्वधर्मेण महीयसा ॥ ७ ॥

यतो विषयध्यानमनर्थहेतुः ॥ अतो मनो नियंतव्यमित्याह ॥ अत एवेति ४ ॥ असतामिंद्रियाणां
पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या च तीव्रया ॥ ५ ॥ भक्तिविरक्त्योस्तीव्रत्वकारणानि वर्णयन्नात्मा
नं मोक्षप्रकारमाह षड्भिः ॥ यमादिभिर्योगमार्गैश्चित्तमभ्यसन् ॥ पुनः पुनरेकाग्रीकुर्वन् आत्मा
नमुपलभ्य ॥ सर्वोन् सत्तमहत्त्वं परमात्मानं प्रतिपद्येतेति ॥ षष्ठेनान्वयः ॥ सत्येन निष्कपटेन भावे

विविक्तशरणमेकांतवासी ॥ ७ ॥ अस्मदाद्यहंप्रत्ययगम्यमानो प्रकृतेः पुरुषस्य च द्रष्टृत्वं तस्य येन नेतृत्वानेन निर्वृ
तानि वृत्तिवस्थानानि जाग्रदादीनि यस्य सः ॥ अत एव हरीभूतमन्त्र दर्शने यस्य ॥ आत्मनो हंकाराद्वहि
र्वेनात्मानं शुद्धरूपलभ्य ॥ एकस्मै वा वक्षेदानव वक्षेदाभ्यां करणत्वकर्मत्वे दृष्टांतमाह ॥ च्छेषावच्छ्
र्वच्छिन्नेनाकेणगगनस्य पूर्णमिव ॥ एवमात्माष्टकं शुद्धमात्मानं पश्यन् ॥ १० ॥ अकलिंगानि रूपाधिक
असनि मिथ्याभ्रमः ॥ अहंकारे सदाभासे सद्रूपेणाभासमानं ब्रह्म प्राप्नोति ॥ शुद्धजीवस्वरूपा हि शैवमा
मतः कारणस्य प्रधानस्य वेधुमपि ध्यानस्य प्रसतः कार्यस्य च तस्य विप्रकाशक ॥ सर्वे शुकार्यकारणे
घ्नत्वत ॥ अद्वयपरिग्रहेण ॥ अहंकारोपहितेन शुद्धब्रह्मप्रतिपत्ति सदृष्टांतमाह यथेति ॥ ११ ॥ जले

घटवत्प्रोपस्थितेन संतदृष्टाऽमितभुग्मृतिः ॥ विविक्तशरणः शांतो मैत्रः करुणः आत्मवान् ॥ ७ ॥
सात्त्वकं येवदेहस्मिन्नकत्वं च सदा ग्रहे ॥ तानेनेनष्टत्रयेन प्रकृतेः पुरुषस्य च ॥ ८ ॥ निर्वृत्त
वस्था नो हरीभूतान्मदर्शनः ॥ उपलभ्यात्मनात्मानं वंच्छेदवाकेमात्मष्टक ॥ ९ ॥ अकलिंग
सदाभासमसतिप्रतिपद्यते ॥ सतो वै धुमसच्चतः सर्वानुसूतमद्वयं ॥ १० ॥ यथा जलस्थ आ
भासः स्थलस्थेनावदृश्यते ॥ स्वाभासेन तथा सूर्यो जलस्थेन दिविस्थितः ॥ ११ ॥ एवं त्रिवृद्दहं
कारो भूतेंद्रियमनोमयैः ॥ स्वाभासैर्लक्षितो नेनसदाभासेनसत्यदृक् ॥ १२ ॥

स्थित आभासः सर्वप्रतिबिंबो यदा परहोतवंति भिन्नौ स्फुरति ॥ तदा हृदकोणस्थितैः शुद्धैः भिन्ना दे
स्थलस्थितेन स्वाभासेन सर्वप्रतिबिंबेन यथा प्रथमं जलस्थ आभासो वदृश्यते ॥ लक्ष्यते ॥ गगनस्थस्
र्यस्य प्रतिबिंबाद्योगात् ॥ वाक्येन यथा शाह ॥ यथा चेत्यर्थः तथा व जलस्थेन दिविस्थितः सूर्यो लक्ष्यते ॥
१२ ॥ एवंभूतेंद्रियमनोमयैः देहेंद्रियमनोवच्छिन्नैः आवभासैः आत्मप्रतिबिंबैः ॥ त्रिगुणोहंकारः सतो
वे स्वल्प आभासो थसि स्तेनरूपेण लक्षितः ॥ अहंकारस्याभासं विना विषयाभासाऽभावतः ॥ अनेन चाहं
कारेण सदाभासवता ॥ सत्यदृक् परमार्थतत्त्वं हृत्य आत्मालक्षित इत्यर्थः ॥ यदा मोक्ष भूमि सत्त्वेन शु

ध्यानप्रदीपिकाशमवतोद्वैतपरिशिष्टः ॥ २८ ॥

भूतादिष्वसति प्रसत्वेः विद्याकृतेन निद्रया लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं प्रतिपद्यत इति तृतीयेनान्वयः ॥१४॥ ननु यदि तदा विनिद्रोऽसौ वर्त्तते तर्हि जाग्रत्स्वप्नयोरिव स्फुटः किं नावभासते तत्राह ॥ एवं सद्रष्टाहंद्रष्टत्वेन सविकल्पतया स्फुटं प्रतीतः ॥ सुषुप्तौ तु भूतादेरहंकारविषयस्य लीनत्वात् ॥ तद्विषयेऽहंकारे नष्टे सति ॥ स्वयमनष्टोऽपि मृषैवात्मानं नष्टवन्मन्यमानो यः ॥ अन्यस्य नाशे न स्वनष्टत्वे दृष्टान्तः ॥ नष्टत्वस्य तु दृष्टान्तः ॥ नष्टवित्तो यथातुरः विवशः नष्टवद्भवति तद्वत् ॥ १५॥ ननु सुषुप्तेन किंचिदनुभूयत एव ॥ सत्यं सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना

भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विह निद्रया ॥ लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ॥१४॥ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा ॥ नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥१५॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते ॥ साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः ॥१६॥ देवहूतिरुवाच
पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् ॥ अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ॥१७॥ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः ॥ अपां रसस्य च यथा तथा बुद्धेः परस्य च ॥१८॥ ॥

नौ तथा न

केवलस्यात्मनः प्रतिसंधानादित्याह ॥ एवमिति ॥ ननु प्रति ॥ ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह ॥ साहंकारस्य द्रव्यस्य कार्यकारणसंघातस्यानुग्रहः प्रकाशकः अवस्थानं च द्रष्टृविशेषणतया अहंकारस्यापि दृश्यत्वाच्च ॥ तद्द्रष्टात्मा तद्व्यतिरिक्तः तमात्मानमित्यन्वयः ॥१६॥ भक्तिविरक्तिभ्यां सम्यग्विवेकेऽपि प्रकृतिपुरुषयोः परस्परत्यागाभावात् ॥ कथं मुक्तिरिति पृच्छति ॥ पुरुषमिति त्रिभिः ॥१७॥ व्यतिरेकाभावमात्रे दृष्टांतः यथा व्यतिरेकतो भावः सत्ता नास्ति गंधस्य कदाचिदप्यतः परस्परं दर्शनादृष्टांतांतरम् ॥ अपामिति बुद्धेः प्रकृतेः परस्य पुरुषस्य च ॥१८॥

भा० टी० ८८

प्राप्ते सर्ववर्णधर्मनिजात्मस्वरूपः साधनतनोन्दुर्शयति ॥ अतो भक्तिं कृतवानित्याह ॥ वासुदेवेरति ॥ सुदृढत्व ॥ अस्मदेहादिके न वेद ॥ ३८ ॥ स एवं वर्तमानः ॥ आत्मन्यात्मानं विद्वान ॥ अन्यत्सार्द्धपरमाह ॥ कर्णं विद्वान्व्यतिरिक्तं तया देहादिव्यतिरिक्तत्वेन ऊर्ध्वोव्यापकतया देहादिप्रकाशकत्वेन ॥ नतु देहाद्युकाराविमर्शात्तत्वकाशयति ॥ तत्तु निराकारमात्मानं तत्राह ॥ यासर्वासामपि सादिशां ॥ अयंभावः ॥ देमर्यो नाना कर्तृकरणाकृतिः ॥ साचमेरुत्वादात्मप्रकाश्येवेति ॥ यथा च स्वमेरुदेशमवाशिरश्चित्रमादिप्रकीर्णोत्थ्यतिरिक्तमात्मानं वेत्तितद्वत् ॥ केन विद्वान्तत्राह ॥ ३९ ॥ साक्षाद्विवेकयोग्यः तेनो

प्राप्तस्यापरिवेकृतदिंध्येवर्षयानेस्थिरः ॥ वासुदेवे भगवति तद्भक्तोद्दहत्वतिं ॥ ३९ ॥
मद्व्यापकतयात्मानं व्यतिरिक्ततयात्मनि ॥ विद्वान्स्वमर्धवान्सर्वासामाशिषां विरराम ह ॥ ४० ॥
साक्षाद्भगवतोक्तेन गुरुरूपाह्विना नृप ॥ विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखे ॥ ४१ ॥
